Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्री भगवद्रामानुजग्रन्थमाला ॥

— प्रकाशकः —

श्रीकाञ्ची प्रतिवादिभयङ्कर

अण्णङ्गराचार्यः ।

मूल्यम् १५-०-०

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

M.S.P. Sharma

Sanskrit Department

25/9/79

SARASA KALA NILAYAM,
8, South Mada Street,
MYLAPORE, MADRAS-4.

RELIGIOUS BOOK SELLERS
& PUBLISHERS.

Digitization by Arya Samaj Charitable Foundation, Chennai

Bhawan's Sri Sankarach... ...skrit Mahavi... ...iya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीरस्तु ।

श्रीमते रामानुजाय नमः

विशिष्टाद्वैतसिद्धान्तनिर्धारणधुरन्धर भगवद्रामानुजविरचितैः नवनिधिकल्पैः नवरत्ननिर्विशेषैः वेदार्थसंग्रह—शारीरकमीमांसाभाष्य—वेदान्तदीप—वेदान्तसार—गीताभाष्य—शरणागतिगद्य—श्रीरङ्गगद्य—श्रीवैकुण्ठगद्य—नित्यग्रन्थसमाख्यैर्नवभिः अनघैरनघैश्च महाग्रन्थैस्समलंकृता

❋ श्री भगवद्रामानुजग्रन्थमाला ❋

— प्रकाशकः —

वेदवेदान्तवैजयन्तीविद्यालयाध्यक्षः

श्री जगदाचार्यसिंहासनाधीशः

* श्रीकाञ्ची प्रतिवादिभयङ्कर - अणङ्गराचार्यः *

— परिष्कारकः —

न्यायवेदान्तविद्वान् M. A. उपाधिविभूषितः

* अकारकनि - सम्पत्कुमाराचार्यः । *

एतन्मूल्यम् — पञ्चदशमुद्रामात्रम्

प्राप्तिस्थानम् :—

ग्रन्थमाला आफीस, काञ्चीपुरम् ।

16-4-1956.

Bhawan's Sri Sankaracharya Sa... Bharatiya Vidya Bhavidyalaya

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

SRI RAMANUJA'S
NINE VALUABLE WORKS

Vedartha Sangraha - Sariraka Mimamsa Bhashya
Vedantha Deepa - Vedanta Sara - Geetha
Bhashya - Saranagathi Gadya - Sri Ranga
Gadya - Sri Vaikunta Gadya - Nitya
Grantham are contained in

SRI BHAGAVAD RAMANUJA GRANTHAMALA

Editor :

Sri Kanchi P. B. ANNANGARACHARYA SWAMY

PRICE Rs. 15 ONLY

Apply to : Granthamala Office, Kancheepuram

1956.

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
312

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

" तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणाम् अन्तर्ज्वरमशीशमत् ॥

" रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥ "

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

— ग्रन्थमालाया अस्या अवतरणे महोपकारका अमी —

— :*: —

१. श्रीमत्परमहंसेत्यादि तिरुक्कुरुङ्गुडिमठाधीशाः-पेररुळाळरामानुजयतीन्द्रस्वामिपादाः ।
२. श्रीजगन्नाथपुरी - श्रीराजगोपालमठाधीश-महन्त. पं. गदाधररामानुजस्वामि महोदयाः
३. श्रीजगन्नाथपुरी - विद्वद्वर-श्रीकुमारवेङ्कटाचार्यमठाधीशस्वामिपादाः
४. श्रीजगन्नाथपुरी त्रिमालीमठाधीश श्रीयुत. पं. संकर्षणाचार्यजी महात्मा
५- मथुरा प्रयागघाट - वेणीमाधवमन्दिराधीश. श्रीयुत पं. परांकुशाचार्यजी
६. बृन्दावन. श्रीहरिदेवजी मन्दिराधीश श्रीयुत पं. कमलनयनाचार्यजी
७. श्रीयुत सेठजी. राजा गोवर्धनलालजी पीती मोतीलाल बन्सीलाल हैद्राबाद.
८. श्रीमन्तः M. V. R. N. आचार्याः श्रीरामवैद्यशाला कलिङ्गपट्टणम् ।
९. मुम्बई. बडामन्दिर. पं गोस्वामि दीक्षितजी.
१०. मुम्बई. रवीन्द्र भाई मगनलाल प्रभुदासजी.
११. सेठजी बच्चूलालजी गंगाप्रसाद जावरा.
१२. सेठजी वेंकटलाल घासीराम हैद्राबाद.
१३. श्रीमान् वेंकटलालपसारी जालना (नैजाम्)
१४. सीतारामयतीन्द्रजी श्रीकृष्णाश्रमम् पेदमुत्तेवि.
१५. विद्वान्. ते. कं. गोपालाचार्यः श्रीविशिष्टाद्वैत प्रचारक संघ कार्यदर्शी नडिगड्डपालें.
१६. सेठजी लक्ष्मीनारायण राधावल्लभकाबरा पिपरिया.

17. Sri M. Ananthasayanam Iyengar, speaker, Lok sabha, Delhi
18. Srimath Sir S. Varadacharya, Rtd. Federal Court Judge, Mylapore.
19. P. B. Srinivasachariar, B.A., B.L., Rtd. Commissioner of Income tax.
20. Sri T. A. (Aravamudu) Thathacharya Advocate, Kallakkurichi.
21. Sri V. V. Iyengar, Bombay.
22. R. L. Narayanayyangar, Calcutta.
23. Dr. V. Ramayyangar, T. Nagar, Madras.
24. Sri M. Sudarsanam Iyengar & Sons, Timber Merchants, Madras.
25. Sriyuth Settji Sri Ramji Kabara Pipariya.
26. Dr. K. Rangacharyulu, Hyderabad.
27. Rao Bahadur V. Ranganadham Chetty, Dharmakartha, Triplicane.
28. Sri A. N. Parasuramayyar, Principal, Minerwa College, Madras.
29. Srimathi M. A. Krishnammal, Advocate, Madras-5.
30. Sri Ramanujakootam Elayalwarayya, Glass Merchant, Madras.
31. Sri T. A. C. Srinivasavaradan, Deputy Commissioner, Jagadalpur.
32. Dr. Sir Padmabhooshana K. S. Krishnan, F. R. S. New Delhi.
33. Srimath C. S. Parthasarathi Iyengar, B.A., B.L, New Delhi.
34. Sri S. R. S. Raghavan, New Delhi.
35. Sri Sathaloori Pedda Rangacharlu, Korukonda.
36. Sri Vedala Venkatacharya, Rajanagaram.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

।। प्रकाशकस्य प्रणतिभरितं विज्ञापनम् ।।

विशिष्टाद्वैतसिद्धान्तपद्धतिबद्धादरा भो भो महाभागाः !

महत्तरमिदं जन्मसाफल्यप्रदं कैङ्कर्यं निर्व्यूढम् यदुत श्रीभगवद्रामानुजग्रन्थमालाया अस्याः प्रकाशनमिति सत्यं धन्यधन्यमात्मानं मन्यते दास एषः। निरवग्रहभगवद्भागवतानुग्रहभूम्नैव तदिदं सुमहत्तरं कैङ्कर्यं निष्प्रत्यूहं निष्पन्नमिति सन्तोषसीम्नि वर्तामहे। यद्यपि श्रीभाष्यादीनि नवैतानि ग्रन्थरत्नानि तत्र तत्र पृथक्पृथङ्मुद्रितान्येव सन्ति, तथाऽपि भगवद्रामानुजग्रन्थमालासमाख्यैकसम्पुटात्मना मुद्रणमिदानीन्तनो विशेषः। षोडशसंवत्सरतः पूर्वमस्माभिरेव आन्ध्राक्षरैरियं ग्रन्थमाला मुद्रिता द्राविडान्ध्रमण्डलेषु प्रसृमरप्रचारा वर्तत एव। परंतु सर्वजनीनदेवनागराक्षरैस्संमुद्रणं भूयोभिरास्तिकप्रवरैः पण्डितप्रकाण्डैः प्रतीक्षितं प्रार्थितं चेदानीं सुमहतैव प्रयासेन निर्व्यूढमभूत्। आन्ध्राक्षरैर्मुद्रितपूर्वाऽपि सेयं ग्रन्थमाला पञ्चषैर्वत्सरैरत्यन्तं दुर्लभतां गतेत्यनेनापि कारणेन मुद्रणमिदमधुना आवश्यकमभूत्।

श्रीभगवद्रामानुजदिव्यग्रन्था व्याख्यानसनाथास्सन्तोऽपि दुरवगमभावबन्धा इति स्थिते वस्तुतत्त्वे मूलमात्रप्रकाशनमिदं कस्मै फलाय कल्पेतेति केचन महान्तो मन्येरन्। सत्यमेतत्। अर्थावबोधमन्तरेणापि श्रीभगवद्रामानुजदिव्यसूक्तीनां नित्यशः पारायणं भूयसे श्रेयसे कल्पेतेति, तत्राप्यशक्तानां सतां भगवदाराधनपेटिकायां प्रतिष्ठाप्य नित्यार्चनं वा भूयादिति च वस्तुत एतावन्तमेवाभिसन्धिमभिराममुद्वहन्नयं जन एवं मूलमात्रप्रकाशने व्यवसित इति वेदितव्यम्। गीताभाष्यव्याख्यानभूता श्रीमन्निगमान्तदेशिकैर्विरचिता तात्पर्यचन्द्रिका, तैरेव प्रणीतं शरणागतिगद्यादिगद्यत्रयभाष्यं च प्रागेवास्माभिर्वेदान्तदेशिकग्रन्थमालायां संमुद्रय प्रकाशिते अद्यापि सुलभे स्तः। वेदान्तदीप - वेदान्तसार - नित्यग्रन्थानां तु व्याख्यानं नैवावतीर्णम्। वेदार्थसंग्रह - श्रीभाष्ययोरुभयोरेव व्याख्यानं मुद्रणीयमवशिष्यते। क्रमेण तात्पर्यदीपिकायाः श्रुतप्रकाशिकायाश्च मुद्रणे महती समुत्कण्ठा जागर्ति नः। मनोरथस्समुत्पादकः परमकारुणिको भगवान् श्रीहस्तिशैलशिखरोज्ज्वलपारिजात एव तत्पूरयिताऽपीति निर्भरास्स्मः।

अस्या ग्रन्थमालाया मुद्रणम् अतीतजयनामसंवत्सरीय - कार्तिकमासे समुपक्रान्तं पञ्चषेष्वेव मासेषु समापयितुमभिसंहितमासीत्; तेनैवाभिसन्धिना सोलापुरे श्रीरङ्गक्षेत्रे चेति स्थलद्वये मुद्रणमस्यास्संपादितम्। अथापि कार्यस्य सुमहत्त्वात् शोधनिकाया गतागतप्रयुक्तविलम्बस्यावर्जनीयत्वाच्च सप्तदशे मासि समाप्तिस्समघटत। मुद्रणागारद्वयकृतमुद्रणबलादेव अक्षरसन्निवेशो मात्रया भेदोऽपरिहार्यस्संवृत्तः। तेनैव हेतुना पुटाङ्कानुस्यूतिरपि वर्जनीयाऽभवत्। वेदार्थसंग्रहः, श्रीभाष्यम्, वेदान्तसारः इत्येते त्रयः प्रबन्धाः सोलापुरस्थवर्धमानमुद्रणालये समसुद्रयन्त। वेदान्तदीपः, गीताभाष्यम्, गद्यत्रयम्, नित्यग्रन्थश्च श्रीरङ्गस्थश्रीविलासमुद्रणागारे मुद्रयन्तेस्म। सूत्रानुक्रमणिका, प्रमाणानुक्रमणिका, गीतायाः पादानुक्रमणिकेत्यादिकं चात्र संयोजितमस्त्यनुबन्धरूपेण।

अस्या ग्रन्थमालायाः संशोधनादिसर्वकार्यनिर्वहणार्थमतिमात्रं परिश्रमं षोडशसु मासेषु परमभोग्यं मत्वा स्वयंप्रयोजनत्वेनानुभूतवत्सु, चिरादेवास्मदीयानामेवंविधानां महत्तराणां कार्यवर्गाणां निर्वहणे निपुणेषु जागरूकेषु चास्मत्प्रियजामातृपादेषु न्यायवेदान्तादिनानाविद्यानिधिषु M. A इत्युपाधिभूषितेषु च श्रीमत्सूभयवेदान्तप्रवर्तक श्रीशैलानन्तपूरुष (अक्कारक्कनि) सम्पत्कुमाराचार्येषु धन्यवादा उपह्रियन्ते। एतेषामेव जामातृपादानां सहयोगबलेनास्माकं मनोरथानामतटाः प्रवाहास्समेधन्ते सन्ततमिति विदन्तु विपश्चितः। निरतिशयया जाग्रत्तया निर्व्यूढेऽपि संशोधने केचिदक्षरदोषा अवशादत्र लब्धपदा अभूवन्; ते प्राज्ञैः स्वयं समीकरणीया इति प्रार्थयामहे।

श्रीकाञ्ची १ - ४ - ५६ इति श्रीकाञ्ची प्रतिवादिभयङ्कर **अण्णङ्गराचार्यः**

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीः
श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः
श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजग्रन्थमालायाम्

॥ वेदार्थसंग्रहः ॥

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति तत् परोपाध्यालीढं विवशमशुभस्यास्पदमिति ।
श्रुतिन्यायापेतं जगति विततं मोहनमिदं तमो येनापास्तं स हि विजयते यामुनमुनिः ॥

अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः—जीवपरयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्तत्प्राप्तिफलः ॥

अस्य जीवात्मनोऽनाद्यविद्यासंचितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तदात्माभिमानजनितावर्जनीयभवभयविध्वंसनाय देहातिरिक्तात्मस्वरूप—तत्स्वभाव—तदन्तर्यामि-परमात्मस्वरूप-तत्स्वभाव-तदुपासन—तत्फलभूतात्मस्वरूपाविर्भावपूर्वकानवधिकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातम्—*तत्त्वमसि, *अयमात्मा ब्रह्म, *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः, *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन, *ब्रह्मविदाप्नोति परम्, *तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते* इत्यादिकम् ।

जीवात्मस्वरूपं देवमनुष्यादिप्रकृतिपरिणामविशेषरूपनानाविधभेदरहितं ज्ञानानन्दैकगुणम् । तस्यैतस्य कर्मकृतदेवादिभेदेऽपध्वस्ते स्वरूपभेदो वाचामगोचरः स्वसंवेद्यः, ज्ञानस्वरूपमित्येतावदेव निर्देश्यम् । तच्च सर्वेषामात्मनां समानम् ।

एवंविधचिदचिदात्मकप्रपञ्चस्योद्भवस्थितिप्रलयसंसारनिवर्तनैकहेतुभूतः समस्तहेयप्रत्यनीकतया [अनन्त] कल्याणैकतानतया च स्वेतरसमस्तवस्तुविलक्षणस्वरूपोऽनवधिकातिशयासंख्येयकल्याणगुणगणः सर्वात्म—परब्रह्म-परज्योतिः-परतत्त्व—परमात्म—सदादिशब्दभेदैर्निखिलवेदान्तवेद्यो भगवान्नारायणः पुरुषोत्तमः इत्यन्तर्यामिस्वरूपम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य च वैभवप्रतिपादनपराः श्रुतयः स्वेतरसमस्ताचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनं तच्छक्ति-तदंश-तद्विभूति-तद्रूप-तच्छरीर-तत्तनुप्रभृतिभिः शब्दैस्तत्सामानाधिकरण्येन च प्रतिपादयन्ति ।

तस्य वैभवप्रतिपादनपराणामेषां सामानाधिकरण्यादीनां विवरणे प्रवृत्ताः केचन निर्विशेषज्ञानमात्रमेव ब्रह्म, तच्च नित्यमुक्तस्वप्रकाशमपि तत्त्वमस्यादिसामानाधिकरण्यावगतजीवैक्यम्, ब्रह्मैवाज्ञं बध्यते मुच्यते च, निर्विशेषचिन्मात्रातिरेकीशेशितव्याद्यनन्तविकल्पस्वरूपं कृत्स्नं जगन्मिथ्या, कश्चिद्बद्धः कश्चिन्मुक्त इतीयं व्यवस्था न विद्यते, इतः पूर्वं केचन मुक्ता इत्ययमर्थो मिथ्या, एकमेव शरीरं जीववत्, निर्जीवानीतराणि शरीराणि, तच्च शरीरं किमिति न व्यवस्थितम्, आचार्यो ज्ञानस्योपदेष्टा मिथ्या, प्रमाता च मिथ्या, शास्त्रं च मिथ्या, शास्त्रजन्यज्ञानं च मिथ्या, एतत्सर्वं मिथ्याभूतेनैव शास्त्रेणावगम्यते-इति वर्णयन्ति ।

अपरे तु-अपहतपाप्मत्वादिसमस्तकल्याणगुणोपेतमपि ब्रह्म तेनैवैक्यावबोधेन केनचिदुपाधिविशेषेण संबद्धं बध्यते मुच्यते च ; नानाविधमलरूपपरिणामास्पदं च-इति व्यवस्थिताः ।

अन्ये पुनरैक्यावबोधयाथात्म्यं वर्णयन्तः स्वाभाविकापरिमितोदारगुणसागरं ब्रह्मैव सुरनरतिर्यक्स्थावरनारकिस्वर्ग्यपवर्गिचेतनैकस्वभावं स्वभावतो विलक्षणमविलक्षणं च वियदादिनानाविधमलरूपपरिणामास्पदं च-इति प्रत्यवतिष्ठन्ते ।

तत्र प्रथमपक्षे श्रुत्यर्थपर्यालोचनपरा दुष्परिहरान् दोषानुदाहरन्ति । तथा हि—प्रकृतपरामर्शितच्छब्दावगतस्य ब्रह्मणः स्वसङ्कल्पकृतजगदुदयविभवलयादयः *तदैक्षत बहु स्यां प्रजायेय* इत्यारभ्य *सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः* इत्यादिभिः पदैः प्रतिपादिताः, तत्संबन्धितया प्रकरणान्तरनिर्दिष्टाः सर्वज्ञता-सर्वशक्तित्व-सर्वेश्वरत्व-सर्वप्रकारत्व-समाभ्यधिकनिवृत्ति-सत्यकामत्व-सत्यसङ्कल्पत्व-सर्वावभासकत्वाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणाः *अपहतपाप्मेत्याद्यनेकवाक्यावगतनिरस्तनिखिलदोषता च सर्वे तस्मिन् पक्षे विहन्यन्ते ।

अथ स्यात्-उपक्रमेऽप्येकविज्ञानेन सर्वविज्ञानमुखेन कारणस्यैव सत्यतां प्रतिज्ञाय तस्य कारणभूतस्यैव सत्यतां विकारजातस्य चासत्यतां मृद्दृष्टान्तेन दर्शयित्वा सत्यभूतस्यैव ब्रह्मणः *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, इति सजातीयविजातीयनिखिलभेदनिरसनेन निर्विशेषतैव प्रतिपादिता । एतच्छोधकानि प्रकरणान्तर [गत] वाक्यान्यपि *सत्यं ज्ञानमनन्तं ब्रह्म, *निष्कलम्, *निष्क्रियम्, *निर्गुणम्, *विज्ञानम्, * आनन्दमित्यादीनि सर्वविशेषप्रत्यनीकैकाकारतां बोधयन्ति । न च एकाकारतावबोधनेऽपि पदानां

Digitization by Arya Samaj Charitable Foundation, Chennai

पर्यायता; एकत्वेऽपि वस्तुनः सर्वविशेषप्रत्यनीकाकारत्वोपस्थापनेन सर्वपदानामर्थवत्त्वादिति।

नैतदेवम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न सेत्स्यति, सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वा। अपि त्वेकविज्ञानेन सर्वविज्ञा[नप्रतिज्ञा]नं सर्वस्य तदात्मकत्वेनैव सत्यत्वे सिध्यति।

अयमर्थः—श्वेतकेतुं प्रत्याह *स्तब्धोऽस्युत तमादेशमप्राक्ष्यः, इति, परिपूर्ण इव लक्ष्यसे तानाचार्यान्प्रति, तमप्यादेशं पृष्टवानसीति। आदिश्यतेऽनेनेत्यादेशः, आदेशः प्रशासनम्, *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, इत्यादिभिरैकार्थ्यात्। तथा च मानवं वचः *प्रशासितारं सर्वेषाम्, इत्यादि। अत्राप्येकमेवेति जगदुपादानतां प्रतिपाद्य अद्वितीयपदेनाधिष्ठात्रन्तरनिवारणादस्यैवाधिष्ठातृत्वमपि प्रतिपाद्यते। अतस्तं प्रशासितारं जगदुपादानभूतमपि पृष्टवानसि, येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवति? इत्युक्तं स्यात्। निखिलजगदुदयविभवविलयादिकारणभूतं सर्वज्ञत्व-सत्यकामत्व-सत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरं किं ब्रह्मापि त्वया श्रुता मिति हार्दो भावः।

तस्य निखिलकारणतया कारणमेव नानासंस्थानविशेषसंस्थितं कार्यमित्युच्यत इति कारणभूतसूक्ष्मचिदचिद्वस्तुशरीरकब्रह्मविज्ञानेन कार्यभूतमखिलं जगद्विज्ञातं भवतीति हृदि निधाय *येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति पुत्रं प्रति पृष्टवान् पिता। तदेतत् सकलस्य वस्तुजातस्यैककारणत्वं पितृहृदि निहितमजानन्पुत्रः परस्परविलक्षणेषु वस्तुष्वन्यस्य[वि]ज्ञानेन तदन्य[वि]ज्ञानस्याघटमानतां बुद्ध्वा परिचोदयति *कथं नु भगवस्स आदेशः इति। परिचोदितः पुनस्तदेव हृदि निहितं ज्ञानानन्दामलत्वैकस्वरूपमपरिच्छेद्यमाहात्म्यं सत्यसङ्कल्पत्वमिश्रैरनवधिकातिशयासंख्येयकल्याणगुणगणैर्जुष्टमविकारस्वरूपं परं ब्रह्मैव नामरूपविभागानर्हसूक्ष्मचिदाचिद्वस्तुशरीरं स्वलीलायै स्वसङ्कल्पेनानन्तविचित्रस्थिरत्रसरूपजगत्संस्थानं स्वांशेनावस्थितमिति तज्ज्ञानेनान्यस्य निखिलस्य ज्ञाततां ब्रुवन् लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाह—*यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् इति। एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारास्पदत्वाय घटशरावादिनानासंस्थानावस्थारूपविकारापन्नं नानानामधेयमपि मृत्तिकासंस्थानविशेषत्वात् मृद्द्रव्यमेवेत्थमवस्थितम्, न वस्त्वन्तरमिति, यथा मृत्पिण्डविज्ञानेन तत्संस्थानविशेषरूपं घटशरावादि सर्वं विज्ञातमेव भवतीत्यर्थः।

ततः कृत्स्नस्य जगतो ब्रह्मैककारणतामजानन्पुत्रः पृच्छति *भगवांस्त्वेव मे तद्ब्रवीतु, इति। ततः सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वकारणमित्युपदिशन् स होवाच *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, इति। अत्रेदमिति जगन्निर्दिष्टम्, अग्र इति च सृष्टेः पूर्वकालः। तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्य तत्सृष्टिकालेऽप्यविशिष्टमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

कृत्वा एकमेवेति सदापन्नस्य जगतस्तदानीमविभक्तनामरूपतां प्रतिपाद्य, तत्प्रतिपादनेनैव सतो जगदुपादानत्वं प्रतिपादितमिति, स्वव्यतिरिक्तनिमित्तकारणमद्वितीयपदेन प्रतिषिद्धमिति, *तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवतीति, आदावेव प्रशासितैव जगदुपादानमिति हृदि निहितम् इदानीमभिव्यक्तम्। एतदेवोपपादयति–स्वयमेव जगदुपादानं जगन्निमित्तं च सत् *तदैक्षत बहु स्यां प्रजायेयेति*। तदेतत्सच्छब्दवाच्यं परं ब्रह्म सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पमवाप्तसमस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेणाहमेव बहु स्यां तदर्थं प्रजायेयेति स्वयमेव संकल्प्य स्वांशैकदेशादेव वियदादिभूतानि सृष्ट्वा पुनरपि सैव सच्छब्दाभिहिता परा देवतैवमैक्षत *हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, *अनेन जीवेनात्मनेति जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य ब्रह्मात्मकजीवानुप्रवेशादेव कृत्स्नस्याचिद्वस्तुनः पदार्थत्वम्; एवंभूतस्यैव [अचिद्वस्तुनः] सवस्य वस्तुनो नामरूपभाक्त्वमिति च दर्शयति।

एतदुक्तं भवति–जीवात्मा तु ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः *यस्यात्मा शरीरमिति श्रुत्यन्तरात्; एवंभूतस्य जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यादिसंस्थानानि वस्तूनीति ब्रह्मात्मकानि तानि सर्वाणि। अतः देवो मनुष्यो यक्षो राक्षसः पशुर्मृगः पक्षी वृक्षो लता काष्ठं शिला तृण घटः पट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धाश्शब्दाः लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्यन्तस्य संघातस्यैव वाचका इति।

एवं समस्तस्य चिदचिदात्मकप्रपञ्चस्य सदुपादानता-सन्निमित्तता-सदाधारता-सन्नियाम्यता-सच्छेषतादि सर्वं च *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः* इत्यादिना विस्तरेण प्रतिपाद्य कार्यकारणभावादिमुखेन *ऐतदात्म्यमिदं सर्वं तत्सत्यमिति कृत्स्नस्य जगतः ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्य, कृत्स्नस्य जगतः स एवात्मा कृत्स्नं च जगत्तस्य शरीरम्, तस्मात्त्वंशब्दवाच्यमपि जीवप्रकारं ब्रह्मैवेति सर्वस्य ब्रह्मात्मकत्वं प्रतिज्ञातं *तत्त्वमसीति जीवविशेषे उपसंहृतम्।

एतदुक्तं भवति—*ऐतदात्म्यमिदं सर्वमिति चेतनाचेतनप्रपञ्चम् इदं सर्वमिति निर्दिश्य तस्य प्रपञ्चस्यैष आत्मेति प्रतिपादितः। प्रपञ्चोद्देशेन ब्रह्मात्मकत्वं प्रतिपादितमित्यर्थः। तदिदं ब्रह्मात्मकत्वं किमात्मशरीरभावेन, उत स्वरूपेणेति विवेचनीयम्। स्वरूपेणेति चेत्, ब्रह्मणः सत्यसङ्कल्पत्वादयः *तदैक्षत बहु स्यामित्युपक्रमावगता बाधिता भवन्ति। शरीरात्मभावेन च तदात्मकत्वं श्रुत्यन्तराद्विशेषतोऽवगतम् *अन्तः प्रविष्टः शास्ता जनानां सर्वात्मेति। प्रशासितृत्वरूपात्मत्वेन सर्वेषां जनानामन्तः प्रविष्टः, अतः सर्वात्मा–सर्वेषां जनानामात्मा, सर्वं चास्य शरीरमिति विशेषतो ज्ञायते ब्रह्मात्मकत्वम्। *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्माऽन्तर्याम्यमृतः, इति च। अत्रापि* अनेन जीवेनात्मनेति इदमेव ज्ञायत इति पूर्व-मेवोक्तम्। अतः सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वात्सर्वशरीरं सर्वप्रकारं सर्वैश्शब्दैर्ब्रह्मैवाभिधीयत इति *तत्त्वमिति सामानाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैवाभिहितम्।

एवमभिहिते सत्ययमर्थो ज्ञायते—त्वमिति यः पूर्वं देहस्याधिष्ठातृतया प्रतीतः स परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः; [redacted] अतस्त्वमितिशब्दः (त) त्वत्प्रकारविशिष्टं (त) त्वदन्तर्यामिणमेवाचष्ट इति, *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकतयैव जीवस्य शरीरिणः स्वनामभाक्त्वात्, तत्त्वमिति समानाधिकरणवृत्तयोर्द्वयोरपि पदयोर्ब्रह्मैव वाच्यम्। तत्र तत्पदं जगत्कारणभूतं सकलकल्याणगुणगणाकरं निरवद्यं निर्विकारमाचष्टे। त्वमिति च तदेव ब्रह्म जीवान्तर्यामिरूपं सशरीरजीवप्रकारविशिष्टमाचष्टे। तदेवं प्रवृत्तिनिमित्तभेदेनैकस्मिन् ब्रह्मण्येव तत्त्वमिति द्वयोः पदयोर्वृत्तिरुक्ता। ब्रह्मणो निरवद्यत्वं निर्विकारत्वं सर्वकल्याणगुणाकरत्वं जगत्कारणत्वं चाबाधितम्।

अश्रुतवेदान्ताः पुरुषाः सर्वे पदार्थास्सर्वे जीवात्मानश्च ब्रह्मात्मका इति न पश्यन्ति; सर्वशब्दानां च केवलेषु तत्तत्पदार्थेषु वाच्यैकदेशेषु वाच्यपर्यवसानं मन्यन्ते। इदानीं वेदान्तवाक्यश्रवणेन ब्रह्मकार्यतया तदन्तर्यामिकतया सर्वस्य ब्रह्मात्मकत्वं सर्वशब्दानां तत्तत्प्रकारसंस्थितब्रह्मवाचित्वं च जानन्ति। नन्वेवं गवादिशब्दानां तत्तत्पदार्थवाचितया व्युत्पत्तिर्बाधिता स्यात्। नैवम्, सर्वे शब्दा अचिज्जीवविशिष्टस्य परमात्मनो वाचका इत्युक्तं *नामरूपे व्याकरवाणीत्यत्र। तत्र लौकिकास्तु पुरुषाः शब्दं व्याहरन्तः शब्दवाच्ये प्रधानांशस्य परमात्मनः प्रत्यक्षाद्यपरिच्छेद्यत्वाद्वाच्यैकदेशभूते वाच्यसमाप्तिं मन्यन्ते। वेदान्तश्रवणेन च व्युत्पत्तिः पूर्यते। एवमेव वैदिकास्सर्वे शब्दाः परमात्मपर्यन्तान् स्वार्थान् बोधयन्ति। वैदिका एव सर्वे शब्दा वेदादेवोद्धृत्योद्धृत्य परेणैव ब्रह्मणा सर्वपदार्थान्पूर्ववत्सृष्ट्वा तेषु परमात्मपर्यन्तेषु पूर्ववन्नामतया प्रयुक्ताः। तदाह मनुः—

*सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे॥

इति। संस्थाः-संस्थानानि; रूपाणीति यावत्। आह च भगवान् पराशरः- *नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार सः॥

इति। श्रुतिश्च *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति। सूर्यादीन् पूर्ववत्परिकल्प्य नामानि च पूर्ववच्चकारेत्यर्थः। एवं जगद्ब्रह्मणोरनन्यत्वं प्रपञ्चितम्। तेनैकेन ज्ञातेन सर्वस्य ज्ञाततोपपादिता भवति। सर्वस्य ब्रह्मकार्यत्वप्रतिपादनेन तदात्मकतयैव सत्यत्वं नान्यथेति *तत्सत्यमित्युक्तम्। यथा दृष्टान्ते सर्वस्य मृद्विकारस्य मृदात्मनैव सत्यत्वम्।

शोधकवाक्यान्यपि निरवद्यं सर्वकल्याणगुणाकरं परं ब्रह्म शोधयन्ति। सर्वप्रत्यनीकाकारताबोधनेऽपि तत्तत्प्रत्यनीकताभेदस्यावर्जनीयत्वान्न निर्विशेष(त्व)वस्तुसिद्धिः।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु च ज्ञानमात्रं ब्रह्मेति प्रतिपादिते निर्विशेषज्ञानमात्रं ब्रह्मेति निश्चीयते। नैवम्। स्वरूपनिरूपणधर्मशब्दा हि धर्ममुखेन स्वरूपमपि प्रतिपादयन्ति, गवादिशब्दवत्। तथाऽऽह सूत्रकारः *तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्, *यावदात्मभावित्वाच्च न दोषः* इति। ज्ञानेन धर्मेण स्वरूपमपि निरूपितं न तु ज्ञानमात्रं ब्रह्मेति। कथमिदमवगम्यत इति चेत्; *यः सर्वज्ञः सर्ववित् इत्यादिज्ञातृत्वश्रुतेः। *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, *विज्ञातारमरे केन विजानीयादित्यादिश्रुतिशतसमधिगतमिदम्। ज्ञानस्य धर्ममात्रत्वाद्धर्ममात्रस्यैकस्य वस्तुत्वप्रतिपादनानुपपत्तेश्च। अतः सत्यज्ञानादिपदानि स्वार्थभूतज्ञानादिविशिष्टमेव ब्रह्म प्रतिपादयन्ति।

तत्त्वमिति द्वयोरपि पदयोः स्वार्थप्रहाणेन निर्विशेषवस्तुस्वरूपोपस्थापनपरत्वे मुख्यार्थपरित्यागश्च। ऐक्यतात्पर्यनिश्चयान्न लक्षणा दोषः सोऽयं देवदत्त इतिवत्। यथा सोऽयमित्यत्र स इति शब्देन देशान्तरकालान्तरसंबन्धी पुरुषः प्रतीयते; अयमिति च संनिहितदेशवर्तमानकालसंबन्धी। तयोस्सामानाधिकरण्येनैक्यं प्रतीयते। तत्रैकस्य युगपद्विरुद्धदेशकालसंबन्धितया प्रतीतिर्न घटत इति द्वयोरपि पदयोः स्वरूपमात्रोपस्थापनपरत्वं स्वरूपस्य चैक्यं प्रतिपाद्यत इति चेत्; नैतदेवम्। सोऽयं देवदत्त इत्यत्रापि लक्षणागन्धो न विद्यते, विरोधाभावात्। एकस्य भूतवर्तमानक्रियाद्वयसंबन्धो न विरुद्धः। देशान्तरस्थितिर्भूता, संनिहितदेशस्थितिर्वर्तते; अतो भूतवर्तमानक्रियाद्वयसंबन्धितयैक्यप्रतिपादनमविरुद्धम्। देशद्वयविरोधश्च कालभेदेन परिहृतः। लक्षणायामपि न द्वयोरपि पदयोर्लक्षणासमाश्रयणम्, एकेनैव लक्षितेन विरोधपरिहारात्। लक्षणाभाव एवोक्तः, देशान्तरसंबन्धितया भूतस्यैवान्यदेशसंबन्धितया वर्तमानत्वाविरोधात्। एवमत्रापि जगत्कारणभूतस्यैव परस्य ब्रह्मणो जीवान्तर्यामितया जीवात्मत्वमविरुद्धमिति प्रतिपादितम्। यथाभूतयोरेव हि द्वयोरैक्यं सामानाधिकरण्येन प्रतीयते। तत्परित्यागेन स्वरूपमात्रैक्यं न सामानाधिकरण्यस्यार्थः। *भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति हि तद्विदः। तथाभूतयोरेवैक्यमुपपादितमस्माभिः। उपक्रमाविरोध्युपसंहारवाक्यतात्पर्यनिश्चयश्च न घटते। उपक्रमे हि *तदैक्षत बहु स्यामित्यादिना सत्यसङ्कल्पत्वं जगदेककारणत्वमप्युक्तम्। तद्विरोधि चाविद्याश्रयत्वादि ब्रह्मणः।

अपि चार्थभेदतत्संसर्गविशेषबोधनकृतपदवाक्यस्वरूपतालब्धप्रमाणभावस्य शब्दस्य निर्विशेषवस्तुबोधनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणम्। निर्विशेष इत्यादिशब्दास्तु केनचिद्विशेषेण विशिष्टतयाऽवगतस्य वस्तुनो वस्त्वन्तरावगतविशेषनिषेधपरतया बोधकाः, इतरथा तेषामप्यनवबोधकत्वमेव; प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषगर्भितत्वात्, अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य ॥

अथ स्यात्—नास्माभिर्निर्विशेषे स्वयंप्रकाशे वस्तुनि शब्दः प्रमाणमित्युच्यते, स्वतस्सिद्धस्य प्रमाणानपेक्षत्वात्। सर्वैः शब्दैस्तदुपरागविशेषा ज्ञातृत्वादयः सर्वे निवर्त्यन्ते;

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वेषु विशेषेषु निवृत्तेषु वस्तुमात्रमनवच्छिन्नं स्वयंप्रकाशं स्वत एवावतिष्ठत इति। नैतदेवम्, केन शब्देन तद्वस्तु निर्दिश्य तद्गता विशेषा निरस्यन्ते? ज्ञप्तिमात्रशब्देनेति चेन्न, सोऽपि सविशेषमेव वस्त्ववलम्बते, प्रकृतिप्रत्ययरूपेण विशेषगर्भत्वादेव। ज्ञा अवबोधन इति सकर्मकः सकर्तृकः क्रियाविशेषः क्रियान्तरव्यावर्तकस्वभावविशेषश्च प्रकृत्याऽवगम्यते; प्रत्ययेन लिङ्गसङ्ख्यादयः। स्वतस्सिद्धावप्येतत्स्वभावविशेषविरहे सिद्धिरेव न स्यात्। अनन्यसाधनस्वभावतया हि ज्ञप्तेः स्वतस्सिद्धिरुच्यते। ब्रह्मस्वरूपं कृत्स्नं सर्वदा स्वयमेव प्रकाशते चेत्, न तस्मिन्नन्यधर्माध्यासस्संभवति। न हि रज्जुस्वरूपेऽवभासमाने सर्पत्वादिरध्यस्यते। अत एव हि भवद्भिराच्छादिकाऽविद्याऽभ्युपगम्यते। ततश्च, शास्त्रीयनिवर्तकज्ञानस्य ब्रह्मणि तिरोहितांशो विषयः। अन्यथा तस्य निवर्तकत्वं च न स्यात्। अधिष्ठानातिरेकिरज्जुत्वप्रकाशनेन हि सर्पत्वं बाध्यते। एकश्चेद्विशेषो ज्ञानमात्रे वस्तुनि शब्देनाभिधीयते, स च ब्रह्मविशेषणं भवतीति सर्वश्रुतिप्रतिपादितसर्वविशेषणविशिष्टं ब्रह्म भवति। अतः प्रामाणिकानां न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः।

निर्विकल्पकप्रत्यक्षेऽपि सविशेषमेव वस्तु प्रतीयते, अन्यथा सविकल्पके सोऽयमिति पूर्वावगतप्रकारविशिष्टप्रत्ययानुपपत्तेः। वस्तुसंस्थानविशेषरूपत्वाद्गोत्वादेर्निर्विकल्पकदशायामपि ससंस्थानमेव वस्त्वित्थमिति प्रतीयते। द्वितीयादिप्रत्ययेषु तस्यैव संस्थानविशेषस्यानेकवस्तुनिष्ठतामात्रं प्रतीयते। संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयाऽनेकविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादिप्रत्ययास्सविकल्पका इत्युच्यन्ते।

अत एवैकस्य पदार्थस्य भिन्नाभिन्नरूपेण विरुद्धं द्व्यात्मकत्वं प्रत्युक्तम्। संस्थानस्य संस्थानिनः प्रकारतया पदार्थान्तरत्वं, प्रकारत्वादेव पृथक्सिद्ध्यनर्हत्वं पृथगनुपलम्भश्चेति न द्व्यात्मकत्वसिद्धिः।

अपि च निर्विशेषवस्तुवादिना स्वयंप्रकाशे वस्तुनि तदुपरागविशेषाः (सर्वे) सर्वैश्शब्दैर्निषिध्यन्त इति वदता के ते शब्दा निषेधका इति वक्तव्यम्। *वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति विकारनामधेययोर्वाचारम्भणमात्रत्वात् यत्तत्र कारणतयोपलक्ष्यते वस्तुमात्रं तदेव सत्यमन्यदसत्यमितीयं श्रुतिर्वदतीति चेत्; नैतदुपपद्यते। एकस्मिन् विज्ञाते सर्वं विज्ञातं भवतीति प्रतिज्ञाते, अन्यज्ज्ञानेनान्यज्ज्ञानासंभवं मन्वानस्यैकमेव वस्तु विकाराद्यवस्थाविशेषेण पारमार्थिकेनैव नानारूपमवस्थितं चेत्, तत्रैकस्मिन् विज्ञाते तस्माद्विलक्षणसंस्थानान्तरमपि तदेवेति तत्र दृष्टान्तोऽयं निदर्शितः। नात्र कस्यचिद्विशेषस्य निषेधकः कोऽपि शब्दो दृश्यते। *वाचारम्भणमिति वाचा-व्यवहारेण आरभ्यत इति आरम्भणम्। पिण्डरूपेणावस्थितताया मृत्तिकाया नाम चान्यत्, व्यवहारश्चान्यः। घटशरावादिरूपेणावस्थितायास्तस्या एव मृत्तिकाया अन्यानि नामानि, व्यवहाराश्चान्यादृशाः। तथाऽपि सर्वत्र मृत्तिकाद्रव्यमेकमेव नानासंस्थाननानानामधेयाभ्यां नानाव्यवहारेण चारभ्यत इत्येतदेव

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्यमित्यनेनान्यज्ञानेनान्यज्ञानसंभवो निदर्शितः। नात्र किञ्चिद्वस्तु निषिध्यत इति पूर्वमेवायमर्थः प्रपञ्चितः।

अपि च *येनाश्रुतं श्रुतमित्यादिना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं प्रतिज्ञातं चेत् *यथा सोम्यैकेन मृत्पिण्डेन* इत्यादिदृष्टान्तः साध्यविकलः स्यात्; रज्जुसर्पादिवन्मृत्तिकाविकारस्य घटशरावादेरसत्यत्वं श्वेतकेतोः शुश्रूषोः प्रमाणान्तरेण युक्त्या चासिद्धमिति। एतदपि सिषाधयिषितमिति चेत्; यथेति दृष्टान्ततयोपादानं न घटते। [*सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्र] सदेवैकमेवेत्यवधारणद्वयेनाद्वितीयमित्यनेन च सन्मात्रातिरेकि सजातीयविजातीयाः सर्वे विशेषा निषिद्धा इति प्रतीयत इति चेत्; नैतदेवम्। कार्यकारणभावावस्थाद्वयावस्थितस्यैकस्य वस्तुनः एकावस्थावस्थितस्य ज्ञानेनावस्थान्तरावस्थितस्यापि वस्त्वैक्येन ज्ञाततां दृष्टान्तेन दर्शयित्वा श्वेतकेतोरप्रज्ञातं सर्वस्य ब्रह्मकारणत्वं च वक्तुं *सदेव सोम्येदमित्यारब्धम्। इदमग्रे सदेवासीदिति अग्र इति कालविशेषः इदंशब्दवाच्यस्य प्रपञ्चस्य सदापत्तिरूपां क्रियां सद्रूप्यतां च वदति, एकमेवेति चास्य नानानामरूपविकारप्रहाणम्। एतस्मिन् प्रतिपादिते अस्य जगतस्सदुपादानता प्रतिपादिता भवति। अन्यत्रोपादानकारणस्य स्वव्यतिरिक्ताधिष्ठात्रपेक्षादर्शनेऽपि सर्वविलक्षणत्वादस्य सर्वज्ञस्य ब्रह्मणः सर्वक्तियोगो न विरुद्ध इति अद्वितीयपदमधिष्ठात्रन्तरं निवारयति।

सर्वशक्तियुक्तत्वादेव ब्रह्मणः काश्चन श्रुतयः प्रथममुपादानकारणत्वं प्रतिपाद्य निमित्तकारणमपि तदेवेति प्रतिपादयन्ति, यथेयं श्रुतिः। अन्याश्च श्रुतयो ब्रह्मणो निमित्तकारणत्वमनुज्ञाय, अस्यैवोपादानतादि कथमिति परिचोद्य, सर्वशक्तियुक्तत्वादुपादानकारणं तदितराशेषोपकरणं च ब्रह्मैवेति परिहरन्ति, *किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छते दुतद्यदध्यतिष्ठद्भुवनानि धारयन्॥ ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्॥ इति सामान्यतो दृष्टेन विरोधमाशङ्क्य ब्रह्मणः सर्वविलक्षणत्वेन परिहार उक्तः। अतः *सदेव सोम्येदमग्र आसीदित्यत्राप्यग्र इत्याद्यनेकविशेषा ब्रह्मणः प्रतिपादिताः। भवदभिमतविशेषनिषेधवाचकः कोऽपि शब्दो न दृश्यते। प्रत्युत जगद्ब्रह्मणोः कार्यकारणभावज्ञापनाय अग्र इति कालविशेषसद्भावः, आसीदिति च क्रियाविशेषः, जगदुपादानता जगन्निमित्तता च, निमित्तोपादानयोर्भेदनिरसनेन तस्यैव ब्रह्मणस्सर्वशक्तियोगश्चेत्यप्रज्ञातास्सहस्रशो विशेषा एव प्रतिपादिताः। यतो वास्तवकार्यकारणभावादिज्ञापने प्रवृत्तमिदम्, अत एव *असदेवेदमग्र आसीदित्यारभ्यासत्कार्यवादनिषेधश्च क्रियते *कुतस्तु खलु सोम्यैवं स्यादिति। प्राग सत उत्पत्तिरहेतुकेत्यर्थः तदेवोपपादयति *कथमसतस्सज्जायेतेति। असत उत्पन्नमसदात्मकमेव भवतीत्यर्थः; यथा मृद उत्पन्नं घटादिकं मृदात्मकम्। सत उत्पत्तिर्नाम व्यवहारविशेषहेतुभूतोऽवस्थाविशेषयोगः।

Digitization by Arya Samaj Charitable Foundation, Chennai

एतदुक्तं भवति-एकमेव कारणभूतं द्रव्यमवस्थान्तरयोगेन कार्यमित्युच्यत इति एकविज्ञानेन सर्वविज्ञानं प्रतिपिपादयिषितम्। तदसत्कार्यवादे न सेत्स्यति। तथा हि-निमित्तसमवाय्यसमवायिप्रभृतिभिः कारणैरवयव्याख्यं कार्यं द्रव्यान्तरमेवारभ्यत इति कारणभूताद्वस्तुनः कार्यस्य वस्त्वन्तरत्वात् तज्ज्ञानेनास्य ज्ञातता कथमपि न संभवतीति। कथमवयवि द्रव्यान्तरं निरस्यत इति चेत्; कारणगतावस्थान्तरयोगस्य द्रव्यान्तरोत्पत्तिवादिनः संप्रतिपन्नस्यैवैकत्वनामान्तरव्यवहारान्तरादेरुपपादकत्वात् द्रव्यान्तरादर्शनाच्चेति कारणमेवावस्थान्तरापन्नं कार्यमित्युच्यत इत्युक्तम्।

ननु निरधिष्ठानभ्रमासंभवज्ञापनायासत्कार्यवादनिरासः क्रियते। तथा हि-एकं चिद्रूपं सत्यमेवाविद्याच्छादितं जगद्रूपेण विवर्तत इति, अविद्याश्रयत्वाय मूलकारणं सत्यमित्यभ्युपगन्तव्यमित्यसत्कार्यवादनिरासः। नैतदेवम्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तमुखेन सत्कार्यवादस्यैव प्रसक्तत्वादित्युक्तम्, भवत्पक्षे निरधिष्ठानभ्रमासंभवस्य दुरुपपादत्वाच्च। यस्य हि चेतनगतो दोषः पारमार्थिकः, दोषाश्रयत्वं च पारमार्थिकम्, तस्य पारमार्थिकदोषेण युक्तस्यापारमार्थिकगन्धर्वनगरादिदर्शनमुपपन्नम्। यस्य तु दोषश्चापारमार्थिकः, दोषाश्रयत्वं चापारमार्थिकम्, तस्यापारमार्थिकेनाप्याश्रयेण तदुपपन्नमिति भवत्पक्षे न निरधिष्ठानभ्रमासंभवः।

शोधकवाक्येष्वपि *सत्यं ज्ञानमनन्तं ब्रह्म* *आनन्दो ब्रह्म* इत्यादिषु सामानाधिकरण्यव्युत्पत्तिसिद्धानेकगुणविशिष्टैकार्थाभिधानमविरुद्धमिति सर्वगुणविशिष्टं ब्रह्माभिधीयते इति पूर्वमेवोक्तम्। *अथात आदेशो नेति नेति* इति बहुधा निषेधो दृश्यत इति चेत्; किमत्र निषिध्यत इति वक्तव्यम्।

*द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च*इति मूर्तामूर्तात्मकः प्रपञ्चः सर्वोऽपि निषिध्यत इति चेत्, ब्रह्मणो रूपतया अप्रज्ञातं सर्वं रूपतयोपदिश्य पुनस्तदेव निषेद्धुमयुक्तम्, *प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात्। कस्तर्हि निषेधवाक्यार्थः? सूत्रकारः स्वयमेव वदति *प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः* इति। उत्तरत्र *अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्* इत्यादिना गुणगणस्य प्रतिपादितत्वात् पूर्वप्रकृतैतावन्मात्रं न भवति ब्रह्मेति ब्रह्मणस्तावन्मात्रता प्रतिषिध्यत इति सूत्रार्थः। *नेह नानास्ति किञ्चनेत्यादिना नानात्वप्रतिषेध एव दृश्यत इति चेत्; अत्राप्युत्तरत्र *सर्वस्य वशी सर्वस्येशान *इति सत्यसङ्कल्पत्वसर्वेश्वरत्वप्रतिपादनाच्चेतनाचेतनवस्तुशरीर ईश्वर इति सर्वप्रकारसंस्थितः सर्वेश्वरः स एक एवेति तत्प्रत्यनीकाब्रह्मात्मकनानात्वं प्रतिषिद्धम्, न भवदभिमतम्। सर्वास्वेवंप्रकारासु श्रुतिष्वियमेव स्थितिरिति न क्वचिदपि ब्रह्मणः सविशेषत्वनिषेधवाची कोऽपि शब्दो दृश्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि च निर्विशेषज्ञानमात्रं ब्रह्म, तच्च आच्छादिकाविद्यातिरोहितस्वस्वरूपं स्वगत-नानात्वं पश्यतीत्ययमर्थो न घटते। तिरोधानं नाम प्रकाशनिवारणम्, स्वरूपातिरेकि-प्रकाशधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनाश एव स्यात्। प्रकाशपर्यायं ज्ञानं नित्यम्, स च प्रकाशोऽविद्यातिरोहित इति बालिशभाषितमिदम्। अविद्यया प्रकाशस्तिरोहित इति प्रकाशोत्पत्तिप्रतिबन्धो वा विद्यमानस्य विनाशो वा? प्रकाशस्यानुत्पाद्यत्वाद्विनाश एव स्यात्। प्रकाशो नित्यो निर्विकारस्तिष्ठतीति चेत्; सत्यामप्यविद्यायां ब्रह्मणि न किंचित्ति-रोहितमिति नानात्वं पश्यतीति भवतामयं व्यवहारः सत्स्वनिवर्चनीय एव।

ननु च भवतोऽपि विज्ञानस्वरूप आत्माऽभ्युपगन्तव्यः, स च स्वयंप्रकाशः, तस्य च देवादिस्वरूपात्माभिमाने स्वरूपप्रकाशतिरोधानमवश्याश्रयणीयम्, स्वरूपप्रकाशे सति स्वात्म-न्याकारान्तराध्यासायोगात्; अतो भवतश्च समानोऽयं दोषः। किञ्च अस्माकमेकस्मिन्नेवात्मनि भवदुदीरितं दुर्घटत्वम्; भवतामात्मानन्त्याभ्युपगमात् सर्वेष्वयं दोषः परिहरणीयः। अत्रोच्यते स्वभावतः मलप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपम्, स्वाभाविकानवधिकातिशयापरिमितोदारगु-णसागरम्, निमेषकाष्ठाकलामुहूर्तादि परार्धपर्यन्तापरिमित व्यवच्छेदस्वरूपसर्वोत्पत्तिस्थितिवि-नाशादिसर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टानन्तमहाविभूति, स्वलीलापरिकरस्वां-शभूतानन्तबद्धमुक्तनानाविधचेतनतद्भोग्यभूतानन्तविचित्रपरिणामशक्तिचेतनेतरवस्तुजाता-न्तर्यामित्वकृतसर्वशरीरत्वसर्वप्रकारावस्थानावस्थितं परं ब्रह्म च वेद्यम्, तत्साक्षात्कारक्षमभग-वद्द्वैपायनपराशर वाल्मीकिमनुयाज्ञवल्क्यगौतमापस्तम्बप्रभृतिमुनिगणप्रणीतविध्यर्थवाद-मन्त्ररूपवेदमूलेतिहासपुराणधर्मशास्त्रोपबृंहितपरमार्थभूतानादिनिधनाविच्छिन्नपाठसंप्रदाय-र्ग्यजुस्सामाथर्वरूपानन्तशाखं वेदं च, अभ्युपगच्छतामस्माकं किं न सेत्स्यति? यथोक्तं भगवता द्वैपायनेन महाभारते-*यो मामजमनादिं च वेत्ति लोकमहेश्वरम्,*द्वाविमौ पुरुषौ लोके क्षरश्चा-क्षर एव च। क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ *कालं स पचते तत्र न कालस्तत्र वै प्रभुः। एते वै निरयास्तात स्थानस्य परमात्मनः॥ अव्यक्तादिविशेषान्तं परिणामर्द्धिसंयुतम्। क्रीडा हरेरिदं सर्व क्षरमित्यवधार्यताम्॥*कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः। कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम्॥ इति। कृष्णस्य हि कृते इति कृष्णस्य शेषभूतमित्यर्थः॥ भगवता पराशरेणाप्येवमुक्तम्—*शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्दस्सर्वकारणकारणे॥*ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥ *एवमेष महाशब्दो मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥ *एवंप्रकारममलं नित्यं व्यापकमक्षयम्। समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्॥ *कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः॥ *क्रीडतो बालकस्येव चेष्टां तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

विश्रामय इति । मनुनाऽपि *प्रशासितारं सर्वेषामणीयांसमणीयसाम्, इत्याद्युक्तम् ॥ याज्ञवल्क्येनापि— *क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता, इत्यादि ॥

आपस्तम्बेनापि *पूः प्राणिनस्सर्वगुहाशयस्य, इति । सर्वे प्राणिनः गुहाशयस्य—परमात्मनः, पूः—पुरम्, शरीरमित्यर्थः । प्राणिन इति जीवात्मकभूतसंघाताः ॥

ननु च किमनेनाडम्बरेण ? चोद्यं तु न परिहृतम् । उच्यते—एवमभ्युपगच्छतामस्माकम्, आत्मधर्मभूतस्य चैतन्यस्य स्वाभाविकस्यापि कर्मणा पारमार्थिकं संकोचं, विकासं च ब्रुवतां सर्वमिदं परिहृतम् । भवतस्तु प्रकाश एव स्वरूपमिति प्रकाशो न धर्मभूतः, तस्य संकोचो विकासो वा नाभ्युपगम्यते । प्रकाशप्रसरानुत्पत्तिमेव तिरोधानभूताः कर्मादयः कुर्वन्ति । अविद्या चेत् तिरोधानम्, तिरोधानभूतया तया, स्वरूपभूतप्रकाशनाशः पूर्वमेवोक्तः । अस्माकं चाविद्यारूपेण कर्मणा स्वरूपनित्यधर्मभूतज्ञानप्रकाशः सङ्कुचितः; तेन देवादिरूपात्माभिमानो भवतीति विशेषः ॥ यथोक्तम् *अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा । संसारतापानखिलानवाप्नोत्यतिसन्ततान् । तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥ इति, क्षेत्रज्ञानां स्वधर्मभूतज्ञानस्य कर्मसंज्ञयाऽविद्यया संकोचं विकासं च दर्शयति ॥

अपि च, आच्छादिकाविद्या, श्रुतिभिश्च, ऐक्योपदेशबलाच्च ब्रह्मस्वरूपतिरोधानहेतुदोषरूपा, आश्रीयते । तस्याश्च मिथ्यारूपत्वेन, प्रपञ्चवत् स्वदर्शनमूलदोषापेक्षत्वात् न सा मिथ्यादर्शनमूलदोषस्स्यादिति, ब्रह्मैव मिथ्यादर्शनमूलं स्यात् । तस्याश्चानादित्वेऽपि मिथ्यारूपत्वादेव ब्रह्मदृश्यत्वेनैव अनादित्वात्, तद्दर्शनमूलपरमार्थदोषानभ्युपगमाच्च, ब्रह्मैव तद्दर्शनमूलं स्यात्; तस्य नित्यत्वादनिर्मोक्ष एव ॥ अत एवेदमपि निरस्तम्—एकमेव शरीरं जीववत्, निर्जीवानीतराणि शरीराणि । यथा स्वप्नदृष्टनानाविधशरीराणां निर्जीवत्वम् । तत्र स्वप्ने द्रष्टुश्शरीरमेकमेव जीववत्; तस्य स्वप्नवेलायां दृश्यभूतनानाविधानन्तशरीराणां निर्जीवत्वमेव । अनेनैकेनैव अन्येषां जीवानां शरीराणां च परिकल्पितत्वात् जीवाः मिथ्याभूताः इति । ब्रह्मणा स्वस्वरूपव्यतिरिक्तस्य जीवभावस्य सर्वशरीराणां च कल्पितत्वात्, एकस्मिन्नपि शरीरे शरीरवत्, जीवसद्भावस्य मिथ्यारूपत्वात्, सर्वाणि शरीराणि मिथ्यारूपाणि तत्र जीवभावश्च मिथ्यारूप इति, एकस्य शरीरस्य तत्र जीवसद्भावस्य च न कश्चिद्विशेषः । अस्माकं तु स्वप्ने द्रष्टुश्शरीरस्य तस्मिन्नात्मसद्भावस्य च प्रबोधवेलायामबाधितत्वात्, अन्येषां शरीराणां तद्गतजीवानां च बाधितत्वात् ते सर्वे मिथ्याभूताः; स्वशरीरमेकम्, तस्मिन् जीवभावश्च परमार्थ इति विशेषः ॥

अपि च केन वा अविद्यानिवृत्तिः ? सा च कीदृशी ? इति विवेचनीयम् । ऐक्यज्ञानं निवर्तकम्, निवृत्तिश्च अनिर्वचनीयप्रत्यनीकाकारा, इति चेत् । अनिर्वचनीयप्रत्यनीकं निर्वचनीयम् । तच्च सद्वा ? असद्वा ? द्विरूपं वा ? कोट्यन्तरं न विद्यते । ब्रह्मव्यतिरेकेण-

Digitization by Arya Samaj Charitable Foundation, Chennai

तदभ्युपगमे पुनरप्यविद्या न निवृत्ता स्यात्। ब्रह्मैव चेन्निवृत्तिः, तत् प्रागप्यविशिष्टमिति, वेदान्तज्ञानात्पूर्वमेव निवृत्तिस्स्यात्। ऐक्यज्ञानं निवर्तकम्, तदभावात् संसारः, इति भवद्दर्शनं विहन्यते ॥

किञ्च निवर्तकज्ञानस्याप्यविद्यारूपत्वात् तन्निवर्तनं केनेति वक्तव्यम्। निवर्तकज्ञानं स्वेतरसमस्तभेदं निवर्त्य, क्षणिकत्वादेव स्वयमेव विनश्यति, दावानलविषनाशनविषान्तरवत्, इति चेन्न। निवर्तकज्ञानस्य ब्रह्मव्यतिरिक्तत्वेन तत्स्वरूपतदुत्पत्तिविनाशानां मिथ्यारूपत्वात् तद्विनाशरूपा अविद्या तिष्ठत्येवेति, तद्विनाशदर्शनस्य निवर्तकं वक्तव्यमेव। दावाग्न्यादीनामपि पूर्वावस्थाविरोधिपरिणामपरम्परा अवर्जनीयैव ॥

अपि च चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता? अध्यासरूप इति चेन्न; तस्य निषेध्यतया निवर्तकज्ञानकर्मत्वात् तत्कर्तृत्वानुपपत्तेः। ब्रह्मस्वरूपमेव इति चेन्न। ब्रह्मणः निवर्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपम्, उताध्यस्तम्? अध्यस्तं चेत्, अयमध्यासः, तन्मूलाविद्यान्तरं च निवर्तकज्ञानाविषयतया तिष्ठत्येव। तन्निवर्तकान्तराभ्युपगमे, तस्यापि त्रिरूपतया अनवस्थैव। सर्वस्य हि ज्ञानस्य त्रिरूपत्वविरहे ज्ञानत्वमेव हीयते; कस्यचित् कञ्चनार्थविशेषं प्रति सिद्धिरूपत्वात् ज्ञानस्य। त्रिरूपत्वविरहे, भवतां स्वरूपभूतज्ञानवत् निवर्तकज्ञानमप्यनिवर्तकं स्यात्। ब्रह्मस्वरूपस्यैव ज्ञातृत्वाभ्युपगमे, अस्मदीयपक्ष एव परिगृहीतस्स्यात्। निवर्तकज्ञानस्वरूपज्ञातृत्वं च स्वनिवर्त्यान्तर्गतमिति वचनम्, भूतलव्यतिरिक्तं कृत्स्नं छिन्नं देवदत्तेन, इत्यस्यामेव छेदनक्रियायाम् अस्याः छेदनक्रियायाः, छेत्तृत्वस्य च छेद्यान्तर्भाववचनवत् उपहास्यम् ॥

अपि च निखिलभेदनिवर्तकमिदमैक्यज्ञानं केन जातमिति विवेचनीयम्। श्रुत्यैवेति चेन्न। तस्याः ब्रह्मव्यतिरिक्तायाः अविद्यापरिकल्पितत्वात्, प्रपञ्चबाधकज्ञानोत्पादकत्वं न संभवति। तथा हि—दुष्टकारणजन्यमपि रज्जुसर्पज्ञानम्, दुष्टकारणजन्येन रज्जुरियं न सर्प इति ज्ञानेन न बाध्यते। रज्जुसर्पज्ञानभये वर्तमाने, केनचिद्भ्रान्तेन पुरुषेण, रज्जुरियं न सर्प इत्युक्तेऽपि, अयं भ्रान्त इति ज्ञाने सति, तद्वचनं रज्जुसर्पज्ञानस्य बाधकं न भवति, भयं च न निवर्तते। प्रयोजकज्ञानवतः श्रवणवेलायामेव हि, ब्रह्मव्यतिरिक्तत्वेन श्रुतेरपि भ्रान्तिमूलत्वं ज्ञातमिति ॥

किञ्च, निवर्तकज्ञानस्य, ज्ञातुः, तत्सामग्रीभूतशास्त्रस्य च ब्रह्मव्यतिरिक्ततया यदि बाध्यत्वमुच्यते, हन्त! तर्हि प्रपञ्चनिवृत्तेः मिथ्यात्वमापततीति प्रपञ्चस्य सत्यता स्यात्; स्वप्नदृष्टपुरुषवाक्यावगतपुत्रादिमरणस्य मिथ्यात्वेन पुत्रादिसत्यतावत्। किञ्च तत्वमस्यादिवाक्यं न प्रपञ्चस्य बाधकम् भ्रान्तिमूलत्वात्; भ्रान्तप्रयुक्तरज्जुसर्पबाधकवाक्यवत्। ननु च स्वप्ने कस्मिंश्चिद्भये वर्तमाने स्वप्नदशायामेव अयं स्वप्न इति ज्ञाते सति, पूर्वभयनिवृत्तिर्दृष्टा;

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्वदत्रापि संभवतीति। नैवम्; स्वप्नवेलायामेव, सोऽपि स्वप्न इति ज्ञाते सति, पुनर्भयानुवृत्तिरेव दृष्टेति न कश्चिद्विशेषः। श्रवणवेलायामेव सोऽपि स्वप्न इति ज्ञातमेवेत्युक्तम्॥

यदपि चेदमुक्तम्— भ्रान्तिपरिकल्पितत्वेन मिथ्यारूपमपि शास्त्रं सदद्वितीयं ब्रह्मेति बोधयति। तस्य सतो ब्रह्मणो विषयस्य पश्चात्तनबाधादर्शनात् ब्रह्म सुस्थितमेवेति। तदयुक्तम्। शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधितत्वात्। इदं भ्रान्तिमूलं वाक्यमिति चेत्, सदद्वितीयं ब्रह्मेति वाक्यमपि भ्रान्तिमूलमिति त्वयैवोक्तम्। पश्चात्तनबाधादर्शनं तु सर्वशून्यवाक्यस्यैवेति विशेषः। सर्वशून्यवादिनः, ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनश्च, स्वपक्षसाधनप्रमाणपारमार्थ्यानभ्युपगमेन अभियुक्तैर्वादानधिकार एव प्रतिपादितः— *अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः इति॥

अपि च, प्रत्यक्षदृष्टस्य प्रपञ्चस्य मिथ्यात्वं केन प्रमाणेन साध्यते? प्रत्यक्षस्य दोषमूलत्वेन अन्यथासिद्धिसंभवात्, निर्दोषं शास्त्रमनन्यथासिद्धं प्रत्यक्षस्य बाधकमिति चेत्, केन दोषेण जातं प्रत्यक्षमनन्तभेदविषयमिति वक्तव्यम्। अनादिभेदवासनाख्यदोषजातं प्रत्यक्षमिति चेत्, हन्त! तर्हि अनेनैव दोषेण जातं शास्त्रमपीति, एकदोषमूलत्वात् शास्त्रप्रत्यक्षयोः न बाध्यबाधकभावसिद्धिः। आकाशवाय्वादिभूततदारब्धशब्दस्पर्शादियुक्तमनुष्यत्वादिसंस्थानसंस्थितपदार्थग्राहि प्रत्यक्षम्; शास्त्रं तु प्रत्यक्षाद्यपरिच्छेद्यसर्वान्तरात्मत्वाद्यनन्तविशेषणविशिष्टब्रह्मस्वरूपतदुपासनाद्याराधनप्रकारतत्प्राप्तिपूर्वकतत्प्रसादलभ्यफलविशेषतदनिष्टकरणमूलनिग्रहविशेषविषयमिति शास्त्रप्रत्यक्षयोर्न विरोधः। अनादिनिधनाविच्छिन्नपाठसंप्रदायताद्यनेकगुणविशिष्टस्य शास्त्रस्य बलीयस्त्वं वदता प्रत्यक्षपारमार्थ्यमवश्यमभ्युपगन्तव्यमिति,अलमनेन श्रुतिशतविततिवातवेगपराहतकुदृष्टिदुष्टयुक्तिजालतूलनिरसनेनेत्युपरम्यते॥

[इति शाङ्करमतनिराकरणम्।]

द्वितीये तु पक्षे, उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरानभ्युपगमात्, ब्रह्मण्येवोपाधिसंसर्गात् आपाधिकास्सर्वे दोषाः ब्रह्मण्येव भवेयुः। ततश्च अपहतपाप्मत्वादिनिर्दोषश्रुतयस्सर्वा विहन्यन्ते। यथा घटाकाशादेः परिच्छिन्नतया महाकाशाद्वैलक्षण्यं परस्परभेदश्च दृश्यते, तत्रस्था दोषा वा गुणा वा अनवच्छिन्ने महाकाशे न संबध्यन्ते; एवमुपाधिकृतभेदव्यवस्थितजीवगता दोषाः अनुपहिते परे ब्रह्मणि न संबध्यन्त इति चेत्, नैतदुपपद्यते। निरवयवस्याकाशस्यानवच्छेद्यस्य घटादिभिश्छेदासंभवात्, तेनैवाकाशेन घटादयस्संयुक्ता इति, ब्रह्मणोऽच्छेद्यत्वात् ब्रह्मैवोपाधिसंयुक्तं स्यात्। घटसंयुक्ताकाशप्रदेशः अन्यस्मादाकाशप्रदेशाद्भिद्यत इति चेत्, आकाशस्यैकस्यैव प्रदेशभेदेन घटादिसंयोगात्, घटादौ गच्छति, तस्य च प्रदेशस्यानियम इति, तद्वत् ब्रह्मण्येव प्रदेशभेदानियमेनोपाधिसंसर्गात्, उपाधौ गच्छति संयुक्तवियुक्तब्रह्मप्रदेशभेदाच्च, ब्रह्मण्येव उपाधिसंसर्गः, क्षणे क्षणे बन्धो मोक्षश्च भवतीति सन्तः परिहसन्ति॥

Digitization by Arya Samaj Charitable Foundation, Chennai

निरवयवस्याकाशस्यैव श्रोत्रेन्द्रियत्वेऽपि इन्द्रियव्यवस्थावत् ब्रह्मण्यपि व्यवस्थोपपद्यत इति चेन्न। वायुविशेषसंस्कृतकर्णप्रदेशसंयुक्तस्यैवाकाशप्रदेशस्येन्द्रियत्वात्, तस्य च प्रदेशान्तराद्भेदानियमेऽपि इन्द्रियव्यवस्थोपपद्यते। आकाशस्य तु, सर्वेषां शरीरेषु गच्छत्सु अनियमेन सर्वप्रदेशसंयोग इति ब्रह्मण्यपि उपाधिसंयोगप्रदेशानियम एव। आकाशस्य स्वरूपेणैव श्रोत्रेन्द्रियत्वमभ्युपगम्यापि, इन्द्रियव्यवस्थोक्ता। परमार्थतस्तु आकाशो न श्रोत्रेन्द्रियम्। वैकारिकादहङ्कारादेकादशेन्द्रियाणि जायन्त इति हि वैदिकाः। यथोक्तं भगवता पराशरेण—*तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश। एकादशं मनश्चात्र देवा वैकारिका स्स्मृताः॥ इति। अयमर्थः—वैकारिकः तैजसो भूतादिरिति त्रिविधोऽहङ्कारः। स च क्रमात् सात्विकः, राजसः, तामसश्च। तत्र, तामसाद्भूतादेः आकाशादीनि भूतानि जायन्त इति सृष्टिक्रममुक्त्वा, तैजसात् राजसाहङ्कारात् एकादशेन्द्रियाणि जायन्त इति परमतमुपन्यस्य, सात्विकाहङ्कारात् वैकारिकाणीन्द्रियाणि जायन्त इति स्वमतमुच्यते—देवा वैकारिकास्स्मृताः इति। देवाः—इन्द्रियाणि। एवम् आहङ्कारिकाणामिन्द्रियाणां भूतैश्चाप्यायनं महाभारते उच्यते॥ भौतिकत्वेऽपीन्द्रियाणामाकाशादिभूतविकारत्वादेव, आकाशादिभूतपरिणामविशेषाः व्यवस्थिता एव, शरीरवत् पुरुषाणामिन्द्रियाणि भवन्तीति; ब्रह्मण्यच्छेद्ये निरवयवे निर्विकारे त्वनियमेनानन्तहेयोपाधिसंसर्गदोषो दुष्परिहर एवेति श्रद्धधानानामेवायं पक्ष इति शास्त्रविदो न बहुमन्यन्ते॥ स्वरूपपरिणामाभ्युपगमात् अविकारश्रुतिर्बाध्यते, निरवद्यता च ब्रह्मणः। शक्तिपरिणाम इति चेत्, केयं शक्तिरित्युच्यते? किं ब्रह्मपरिणामरूपा? उत ब्रह्मणोऽन्या काऽपि? इति; उभयपक्षेऽपि स्वरूपपरिणामोऽवर्जनीय एव॥

[इति भास्करमतनिराकरणम्]

तृतीयेऽपि पक्षे जीवब्रह्मणोर्भेदवदभेदस्य चाभ्युपगमात्, तस्य च तद्भावात्, सौभरिभेदवत् स्वावतारभेदवच्च सर्वस्येश्वरभेदत्वात् सर्वे जीवगता दोषास्तस्यैव स्युः। एतदुक्तं भवति—ईश्वरः स्वरूपेणैव सुरनरतिर्यक्स्थावरादिभेदेनावस्थित इति हि तदात्मकत्ववर्णनं क्रियते? तथा सति, एकमृत्पिण्डारब्धघटशरावादिगतान्युदकाहरणादीनि सर्वकार्याणि यथा तस्यैव भवन्ति, एवं सर्वजीवगतसुखदुःखादि सर्वमीश्वरगतमेव स्यादिति॥ घटकरकादिसंस्थानानुपयुक्तमृद्द्रव्यं यथा कार्यान्तरानन्वितम्, एवमेव सुरपशुमनुजादिजीवत्वानुपयुक्तेश्वरः सर्वज्ञस्सत्यसङ्कल्पत्वादिगुणाकर इति चेत्; सत्यम्, स एवेश्वरः एकेनांशेन कल्याणगुणाकरः, स एव चान्येनांशेन हेयगुणाकर इत्युक्तम्, द्वयोरंशयोरीश्वरत्वाविशेषात्। द्वावंशौ व्यवस्थिताविति चेत्, कस्तेन लाभः? एकस्यैव एकेनांशेन नित्यदुःखित्वात्, अंशान्तरेण सुखित्वमपि नेश्वरत्वाय कल्पते। यथा देवदत्तस्य एकस्मिन् हस्ते चन्दनपङ्कानुलेपः, केयूरकटकाङ्गुलीयकालङ्कारः, एतस्यैवान्यस्मिन् हस्ते मुद्गराभिघातः, कालानलज्वालानुप्रवेशश्च; तद्वदेवेश्वरस्य स्यादिति, ब्रह्माज्ञानपक्षादपि पापीयानयं भेदाभेदपक्षः; अपरिमितदुःखस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

पारमार्थिकत्वात्, संसारिणामनन्तत्वेन दुस्तरत्वाच्च। तस्मात् विलक्षणोऽयं जीवांश इति चेत्, आगतोऽसि तर्हि मदीयं पन्थानम्। ईश्वरस्य स्वरूपेण तादात्म्यवर्णने स्यादयं दोषः। आत्मशरीरभावेन तु तादात्म्यप्रतिपादने न कश्चिद्दोषः। प्रत्युत निखिलभुवननियमनादिः महान् गुणगणः प्रतिपादितो भवति। सामानाधिकरण्यं च मुख्यवृत्तम्। अपि च, एकस्य वस्तुनो हि भिन्नाभिन्नत्वं विरुद्धत्वान्न संभवतीत्युक्तम्। घटस्य पटाद्भिन्नत्वे सति तस्य तस्मिन्नभावः, अभिन्नत्वे सति तस्य च भाव इति, एकस्मिन् काले चैकस्मिन् देशे चैकस्य हि पदार्थस्य युगपत् सद्भावोऽसद्भावश्च विरुद्धः। जात्यात्मना भावः व्यक्त्यात्मना चाभाव इति चेत्, जातेः मुण्डेन व्यक्त्या चाभेदे सति, खण्डे मुण्डस्यापि सद्भावप्रसङ्गः। खण्डेन च जातेरभिन्नत्वे सद्भावः; भिन्नत्वे असद्भावः; अश्वे महिषत्वस्येवेति विरोधो दुष्परिहर एव॥ जात्यादेर्वस्तुसंस्थानतया वस्तुनः प्रकारत्वात्, प्रकारप्रकारिणोश्च पदार्थान्तरत्वम्, प्रकारस्य पृथक्सिद्ध्यनर्हत्वम्, पृथगनुपलम्भश्च, तस्य संस्थानस्य चानेकवस्तुषु प्रकारतयावस्थितिश्च, इत्यादि पूर्वमेवोक्तम्॥ सोऽयमिति बुद्धिः प्रकारैक्यात्, अयमपि दण्डीति बुद्धिवत्। अयमेव च जात्यादिः प्रकारो वस्तुनो भेद इत्युच्यते, तद्योग एव वस्तु भिन्नमिति व्यवहारहेतुरित्यर्थः। स च वस्तुनो भेदव्यवहारहेतुः स्वस्य च, संवेदनवत्; यथा संवेदनं वस्तुनो व्यवहारहेतुः, स्वस्य व्यवहारहेतुश्च भवति। अत एव सन्मात्रग्राहिप्रत्यक्षं न भेदग्राहि—इत्यादिवादा निरस्ताः; जात्यादिसंस्थानसंस्थितस्यैव वस्तुनः प्रत्यक्षेण गृहीतत्वात् तस्यैव संस्थानरूपजात्यादेः प्रतियोग्यपेक्षया भेदव्यवहारहेतुत्वाच्च। स्वरूपपरिणामदोषश्च पूर्वमेवोक्तः॥ [इति यादवप्रकाशमतनिराकरणम्]

(अथ स्वमतस्थापनम्)

*यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः, *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, *यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरम्, यं पृथिवी न वेद, इत्यादि, *योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद यो मृत्युमन्तरे संचरन् यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः, *द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥ *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, इत्यादि, *सत्यं चानृतं च सत्यमभवत्, *अनेन जीवेनात्मना इत्यादि, *पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, *भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्, *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, *प्रधानक्षेत्रज्ञपतिर्गुणेशः, *ज्ञाज्ञौ द्वावजावीशनीशौ, इत्यादिश्रुतिशतैः,

Digitization by Arya Samaj Charitable Foundation, Chennai

तदुपबृंहणैः *जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्, *यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज। तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः॥ *अहमात्मा गुडाकेश सर्वभूताशयस्थितः, *सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं च, इत्यादिवेदविदग्रेसरवाल्मीकिपराशरद्वैपायनवचोभिश्च, परस्य ब्रह्मणः सर्वस्यात्मत्वावगमात्, चिदचिदात्मकस्य वस्तुनः तच्छरीरत्वावगमाच्च, शरीरस्य च शरीरिणं प्रति प्रकारतयैव पदार्थत्वात्, शरीरशरीरिणोश्च धर्मभेदेऽपि तयोरसङ्करात्, सर्वशरीरं ब्रह्मेति ब्रह्मणो वैभवं प्रतिपादयद्भिः सामानाधिकरण्यादिभिः मुख्यवृत्तैः सर्वचेतनाचेतनप्रकारं ब्रह्मैवाभिधीयते ॥

सामानाधिकरण्यं हि द्वयोः पदयोः प्रकारद्वयमुखेनैकार्थनिष्ठत्वम् । तस्य चैतस्मिन् पक्षे मुख्यता । तथा हि—तत्, त्वम्, इति सामानाधिकरण्ये तदित्यनेन जगत्कारणं सर्वकल्याणगुणाकरं निरवद्यं ब्रह्मोच्यते। त्वमिति च चेतनसमानाधिकरणवृत्तेन जीवान्तर्यामिरूपि, तच्छरीरं तदात्मतयाऽवस्थितं तत्प्रकारं ब्रह्मोच्यते । इतरेषु पक्षेषु सामानाधिकरण्यहानिः, ब्रह्मणस्सदोषता च स्यात् ॥

एतदुक्तं भवति । ब्रह्मैवैवमवस्थितमित्यत्र एवंशब्दार्थभूतप्रकारतयैव विचित्रचेतनाचेतनात्मकप्रपञ्चस्य स्थूलस्य सूक्ष्मस्य च सद्भावः । तथा च *बहु स्यां प्रजायेयेत्ययमर्थस्संपन्नो भवति। तस्यैवेश्वरस्य कार्यतया कारणतया च नानासंस्थानसंस्थितस्य संस्थानतया चिदचिद्वस्तुजातमवस्थितमिति ॥

ननु च संस्थानरूपेण प्रकारतया एवंशब्दार्थत्वं जातिगुणयोरेव दृष्टम्; न द्रव्यस्य। स्वतन्त्रसिद्धियोग्यस्य पदार्थस्य एवंशब्दार्थतया ईश्वरस्य प्रकारमात्रत्वमयुक्तमिति चेत्; उच्यते। द्रव्यस्यापि दण्डकुण्डलादेः द्रव्यान्तरप्रकारत्वं दृष्टमेव । ननु च दण्डादेः स्वतन्त्रस्य द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः यथा—दण्डी कुण्डलीति । अतः गोत्वादितुल्यतया चेतनाचेतनस्य द्रव्यभूतस्य वस्तुनः ईश्वरप्रकारतया सामानाधिकरण्येन प्रतिपादनं न युज्यते। अत्रोच्यते—गौरश्वो मनुष्यो देव इति, भूतसंघातरूपाणां द्रव्याणामेव, देवदत्तो मनुष्यो जातः पुण्यविशेषेण, यज्ञदत्तो गौर्जातः पापेन कर्मणा, अन्यश्चेतनः पुण्यातिरेकेण देवो जातः इत्यादि देवादिशरीराणां, चेतनप्रकारतया लोकवेदयोः सामानाधिकरण्येन प्रतिपादनं दृष्टम्।

अयमर्थः—जातिर्वा द्रव्यं वा गुणो वा न तत्रादरः। कश्चन द्रव्यविशेषं प्रति विशेषणतयैव यस्य सद्भावः, तस्य तदपृथक्सिद्धेः तत्प्रकारतया तत्सामानाधिकरण्येन प्रतिपादनं युक्तम्। यस्य पुनर्द्रव्यस्य पृथक्सिद्धस्यैव कदाचित् क्वचित् द्रव्यान्तरप्रकारत्वमिष्यते, तत्र मत्वर्थीयप्रत्यय इति विशेषः। एवमेव स्थावरजङ्गमात्मकस्य सर्वस्य वस्तुनः ईश्वरशरीरत्वेन तत्प्रकारतयैव स्वरूपसद्भाव इति, तत्प्रकारी ईश्वर एव तत्तच्छब्देनाभिधीयत इति, तत्सामानाधिकरण्येन प्रतिपादनं युक्तम्। तदेतत् पूर्वमेव नामरूपव्याकरणश्रुतिविवरणे

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रपञ्चितम् । अतः, प्रकृतिपुरुषमहदहङ्कारतन्मात्रभूतेन्द्रियतदारब्धचतुर्दशभुवनात्मकब्रह्माण्ड-तदन्तर्वर्तिदेवतिर्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थितं कार्यमपि सर्वं ब्रह्मवति, कारणभूतब्रह्मविज्ञानादेव सर्वं विज्ञातं भवतीति, एकविज्ञानेन सर्वविज्ञानमुपपन्नतरम्। तदेवं कार्यकारणभावादिमुखेन कृत्स्नस्य चिदचिद्वस्तुनः परब्रह्मप्रकारतया तदात्मकत्वमुक्तम् ॥

ननु च परस्य ब्रह्मणः स्वरूपेण परिणामास्पदत्वं निर्विकारनिरवद्यश्रुतिव्याकोपप्रसंगेन निवारितम्। *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा मृत्तत्कार्यदृष्टान्ताभ्याम् परमपुरुषस्य जगदुपादानकारणत्वं च प्रतिपादितम्। उपादानकारणत्वं च परिणामास्पदत्वमेव; कथमिदमुपपद्यते अत्रोच्यते—सजीवस्य प्रपञ्चस्य अविशेषेण कारणत्वमुक्तम् । तत्र, ईश्वरस्य जीवरूपपरिणामाभ्युपगमे, *नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः इति विरुध्यते । वैषम्यनैर्घृण्यपरिहारश्च, जीवानामनादित्वाभ्युपगमेन तत्कर्मनिमित्ततया प्रतिपादितः *वैषम्यनैर्घृण्ये न सापेक्षत्वात्, *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च इति। अकृताभ्यागमकृतविप्रणाशप्रसंगश्चानित्यत्वेऽभिहितः॥ तथा प्रकृतेरप्यनादिता श्रुतिभिः प्रतिपादिता—*अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥ इति प्रकृतिपुरुषयोरजत्वं दर्शयति । *अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥ इति प्रकृतिरेव स्वरूपेण विकारास्पदमिति च दर्शयति। *गौरनाद्यन्तवती सा जनित्री भूतभाविनी, इति च । स्मृतिश्च—*प्रकृतिं पुरुषं चैव विद्ध्यनादी-उभावपि, *भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ *प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः, *मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्, इत्यादिका ॥

एवं च प्रकृतेरपीश्वरशरीरत्वात्, प्रकृतिशब्दोऽपि तदात्मभूतस्येश्वरस्य, तत्प्रकारसंस्थितस्य वाचकः। पुरुषशब्दोऽपि तदात्मभूतस्येश्वरस्य पुरुषप्रकारसंस्थितस्य वाचकः। अतः तद्विकाराणामपि तथैव ईश्वर आत्मा । तदाह—*व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च *स एव क्षोभको ब्रह्मन् क्षोभ्यश्च परमेश्वरः, इति । अतः प्रकृतिप्रकारसंस्थिते परमात्मनि प्रकारभूतप्रकृत्यंशे विकारः, प्रकार्यंशे चाविकारः। एवमेव जीवप्रकारसंस्थिते परमात्मनि च प्रकारभूतजीवांशे सर्वे चापुरुषार्थाः, प्रकार्यंशो नियन्ता, निरवद्यः, सर्वकल्याणगुणाश्रयः, सत्यसंकल्प एव ॥ तथा च सति कारणावस्थ ईश्वर एवेति तदुपादानकजगत् कार्यावस्थोऽपि स एवेति, कार्यकारणयोरनन्यत्वं सर्वश्रुत्यविरोधश्च भवति।

तदेवं नामरूपविभागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थम् । जगतस्तदापत्तिरेव च प्रलयः। नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्थम्। ब्रह्मणः तथाविधस्थूलभाव एव सृष्टिरित्युच्यते। यथोक्तं भगवता पराशरेण— *प्रधानपुंसोरजयोः कारणं कार्यभूतयोः, इति। तस्मात्, ईश्वरप्रकारभूतसर्वावस्थप्रकृति-पुरुषवाचिनश्शब्दाः तत्प्रकारविशिष्टतयाऽवस्थिते परमात्मनि मुख्यतया वर्तन्ते, जीवात्मवाचिदेवमनुष्यादिशब्दवत्; यथा देवमनुष्यादिशब्दाः देवमनुष्यादिप्रकृतिपरिणाम-विशेषाणां जीवात्मप्रकारतयैव पदार्थत्वात्, प्रकारिणि जीवात्मनि मुख्यतया वर्तन्ते। तस्मात् सर्वस्य चिदचिद्वस्तुनः परमात्मशरीरतया तत्प्रकारत्वात्, परमात्मनि मुख्यतया वर्तन्ते सर्वे तद्वाचकाश्शब्दाः ॥

अयमेवात्मशरीरभावः पृथक्सिद्ध्यनर्हाधाराधेयभावः, नियन्तृनियाम्यभावः, शेष-शेषिभावश्च। सर्वात्मना आधारतया, नियन्तृतया, शेषितया च आप्नोतीति–आत्मा; सर्वात्मना आधेयतया, नियाम्यतया, शेषतया चापृथक्सिद्धं प्रकारभूतमिति–आकारः, शरीर-मिति चोच्यते। एवमेव हि जीवात्मनस्स्वशरीरसम्बन्धः। एवमेव परमात्मनः सर्वशरीर-त्वेन सर्वशब्दवाच्यत्वम्। तदाह श्रुतिगणः—*सर्वे वेदा यत्पदमामनन्ति, *सर्वे वेदा यत्रैकं भवन्ति, इति। तस्यैकस्य वाच्यत्वादेकार्थवाचिनो भवन्तीत्यर्थः। *एको देवो बहुधा सन्निविष्टः, *सहैव सन्तं न विजानन्ति देवाः, इत्यादि। देवाः–इन्द्रियाणि; देवमनुष्यादीनामन्तर्यामितया आत्मत्वेन निविश्य सहैव सन्तं तेषामिन्द्रियाणि मनःपर्यन्तानि न विजानन्तीत्यर्थः ॥ तथा च पौराणिकानि वचांसि– *नतास्स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती। वाच्ये हि वचसः प्रतिष्ठा। *कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्, *वेदैश्च सर्वैरहमेव वेद्यः, इत्यादीनि सर्वाणि हि वचांसि सशरीरात्मविशिष्टमन्तर्यामिणमेवाचक्षते। *तिस्रो देवता अनेन जीवे-नात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि, इति हि श्रुतिः। तथा च मानवं वचः–*प्रशासितारं सर्वेषामणीयांसमणीयसाम्। रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्॥ अन्तः प्रविश्य–अन्तर्यामितया, सर्वेषां प्रशासितारं–नियन्तारम्, अणीयांसः—आत्मानः, कृत्स्नस्याचेतनस्य व्यापकतया सूक्ष्मभूताः, तेषामपि व्यापकत्वात् तेभ्योऽपि सूक्ष्मतरः–इत्यर्थः। रुक्माभः–आदित्यवर्णः। स्वप्नधीगम्यः–स्वप्नकल्पबुद्धिप्राप्यः। विशदतमप्रत्यक्षतापन्नानुध्यानैकलभ्यः इत्यर्थः। *एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम्। इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्व-तम्॥ इति। एके–वेदाः इत्यर्थः। उक्तरीत्या परस्यैव ब्रह्मणः सर्वस्य प्रशासितृत्वेन सर्वा-न्तरात्मतया प्रविश्यावस्थितत्वात्, अग्न्यादयोऽपि शब्दाः शाश्वतब्रह्मशब्दवत्, तस्यैव वाचका भवन्तीत्यर्थः। तथा च स्मृत्यन्तरम्– *ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुता-शनान्। सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते॥ इति। पितृदेवब्राह्मणहुताशनादिशब्दाः तन्मुखेन तदन्तरात्मभूतस्य विष्णोरेव वाचकाः इत्युक्तं भवति ॥

अत्रेदं सर्वशास्त्रहृदयम्–जीवात्मानः, स्वयमसङ्कुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपा-स्सन्तः कर्मरूपाविद्यावेष्टिताः तत्तत्कर्मानुरूपज्ञानसङ्कोचमापन्नाः ब्रह्मादिस्तम्बपर्यन्तविविध-

Digitization by Arya Samaj Charitable Foundation, Chennai

विचित्रदेहेषु प्रविष्टाः तत्तद्देहोचितलब्धज्ञानप्रसराः तत्तद्देहात्माभिमानिनः तदुचितकर्माणि कुर्वाणाः तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते। एतेषां संसारमोचनं भगवत्प्रपत्तिमन्तरेण नोपपद्यत इति, तदर्थं प्रथममेषां देवादिभेदरहितज्ञानैकाकारतया सर्वेषां साम्यं प्रतिपाद्य, तस्यापि स्वरूपस्य भगवच्छेषतैकस्वरूपैकरसतया भगवदात्मकतामपि प्रतिपाद्य, भगवत्स्वरूपं च हेयप्रत्यनीककल्याणैकतानतया सकलेतरविसजातीयम्, अनवधिकातिशयासंख्येयकल्याणगुणगणाश्रयम्, स्वसंकल्पप्रवृत्तसमस्तचिदचिद्वस्तुजाततया सर्वस्यात्मभूतं प्रतिपाद्य, तदुपासनं साङ्गं तत्प्रापकं प्रतिपादयन्ति शास्त्राणीति ॥

यथोक्तम् – *निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः । दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः ॥ प्रकृतिसंसर्गकृतकर्ममूलत्वात् नात्मस्वरूपप्रयुक्ता धर्माः (इत्यर्थः।) प्राप्ताप्राप्तविवेकेन प्रकृतेरेव धर्माः इत्युक्तम् ॥ *विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ इति, देवतिर्यङ्मनुष्यस्थावररूपप्रकृतिसंसृष्टस्यात्मनः स्वरूपविवेचनी बुद्धिः येषां ते पण्डिताः, तत्तत्प्रकृतिविशेषविविक्तात्मयाथात्म्यज्ञानवन्तः, तत्र तत्रात्यन्तविषमाकारे वर्तमानमात्मानं समानाकारं पश्यन्तीति समदर्शिनः इत्युक्तम् ॥ तदिदमाह–*इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥ इति। निर्दोषम्–देवादिप्रकृतिविशेषसंसर्गरूपदोषरहितं, स्वरूपेणावस्थितं सर्वमात्मवस्तु निर्वाणरूपज्ञानैकाकारतया सममित्यर्थः। तस्यैवंभूतस्य आत्मनः भगवच्छेषतैकरसता तन्नियाम्यता, तदेकाधारता च तच्छरीरतत्तनुप्रभृतिभिश्शब्दैः, तत्सामानाधिकरण्येन च श्रुतिस्मृतीतिहासपुराणादिषु प्रतिपाद्यते इति पूर्वमेवोक्तम् ॥ *दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ इति, तस्यैतस्यात्मनः कर्मकृतविचित्रगुणमयप्रकृतिसंसर्गरूपात्संसारान्मोक्षः भगवत्प्रपत्तिमन्तरेण नोपपद्यत इत्युक्तं भवति; *नान्यः पन्था अयनाय विद्यते इत्यादिभिः श्रुतिभिश्च ॥

*मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः। न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्॥ इति सर्वशक्तियोगात् स्वैश्वर्यवैचित्र्यमुक्तम्। तदाह *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्, इति। अनन्तविचित्रमहाश्चर्यरूपं जगत्, मम अयुतायुतांशांशेन आत्मतया प्रविश्य, सर्वं मत्संकल्पेन विष्टभ्य, अनेन रूपेण अनन्तमहाविभूतिः अपरिमितोदारगुणसागरः निरतिशयाश्चर्यभूतः स्थितोऽहमित्यर्थः॥ तदिदमाह—*एकत्वे सति नानात्वं नानात्वे सति चैकता। अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति॥ इति प्रशासितृत्वेनैक एव सन् विचित्रचिदचिद्वस्तुष्वन्तरात्मतया प्रविश्य, तत्तद्रूपेण विचित्रप्रकारः, विचित्रकर्म कारयन् नानारूपतां भजते। एवं स्वल्पाल्पांशेन तु सर्वाश्चर्यमयं नानारूपं जगत् तदन्तरात्मतया प्रविश्य, विष्टभ्य, नानात्वेनावस्थितोऽपि सन्, अनवधिकातिशयासङ्ख्येयकल्याणगुणगणः सर्वेश्वरेश्वरः परब्रह्मभूतः

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरुषोत्तमः नारायणः निरतिशयाश्चर्यभूतः नीलतोयदसंकाशः पुण्डरीकदलामलायतेक्षणः सहस्रांशुः सहस्रकिरणः परमे व्योम्नि *यो वेद निहितं गुहायां परमे व्योमन्, *तदक्षरे परमे व्योमन्, इत्यादिश्रुतिसिद्धे एक एवावतिष्ठते ॥

ब्रह्मव्यतिरिक्तस्य कस्यचिदपि वस्तुनः, एकस्वभावस्यैककार्यशक्तियुक्तस्यैकरूपस्य रूपान्तरयोगः स्वभावान्तरयोगः शक्त्यन्तरयोगश्च न घटते; तस्यैकस्य परस्य ब्रह्मणः सर्ववस्तुविसजातीयतया सर्वस्वभावत्वं सर्वशक्तियोगश्चेति, एकस्यैव विचित्रानन्तनानारूपता च, पुनरप्यनन्तापरिमिताश्चर्ययोगेनैकरूपता च न विरुद्धेति वस्तुमात्रसाम्यात् विरोधचिन्ता न युक्तेत्यर्थः ॥ यथोक्तम् *शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता ॥ एतदुक्तं भवति सर्वेषामग्निजलादीनां भावानामेकस्मिन्नपि भावे दृष्टैव शक्तिः तद्विसजातीयभावान्तरेऽपीति न चिन्तयितुं युक्ता; जलादावदृष्टाऽपि, तद्विसजातीये पावके भासकत्वोष्णत्वादिशक्तिः यथा दृश्यते, एवमेव सर्ववस्तुविसजातीये ब्रह्मणि सर्वसाम्यं नानुमातुं युक्तमिति । अतः विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थः । तदाह *जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः । तेनाश्चर्यवरेणाहं भवता कृष्ण ! सङ्गतः ॥ इति ॥

तदेतत् नानाविधानन्तश्रुतिनिकरशिष्टपरिगृहीततद्व्याख्यानपरिश्रमादवधारितम् । तथा हि– प्रमाणान्तरापरिदृष्टापरिमितपरिणामानेकतत्वनियतक्रमविशिष्टौ सृष्टिप्रलयौ, ब्रह्मणोऽनेकविधाः श्रुतयो वदन्ति ॥

*निरवद्यं निरञ्जनम्, * विज्ञानम्, * आनन्दम्, * निर्विकारम्, * निष्कलं निष्क्रियं शान्तम्, * निर्गुणम्, इत्यादिकाः, निर्गुणं ज्ञानस्वरूपं ब्रह्मेति काश्चन श्रुतयोऽभिदधति । *नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति, *यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्, तत्केन कं विजानीयात्, इत्यादिकाः नानात्वनिषेधवादिन्यस्सन्ति काश्चन श्रुतयः । *यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः, *सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाऽभिवदन् यदास्ते, * सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, *अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः इति सर्वस्मिन् जगति हेयतयाऽवगतं सर्वं गुणं प्रतिषिध्य, निरतिशयकल्याणगुणानन्त्यं सर्वज्ञतां सर्वशक्तियोगं सर्वनामरूपव्याकरणं सर्वस्याधारतां च काश्चन श्रुतयो ब्रुवते ॥ *सर्वं खल्विदं ब्रह्म तज्जलानिति, *ऐतदात्म्यमिदं सर्वम्, *एकस्सन् बहुधा विचारः इत्यादिकाः ब्रह्मसृष्टं जगत् नानाकारं प्रतिपाद्य, तदैक्यं च प्रतिपादयन्ति काश्चन श्रुतयः ॥ *पृथगात्मानं प्रेरितारं च मत्वा *भोक्ता भोग्यं प्रेरितारं च मत्वा, *प्रजापतिरकामयत प्रजास्सृजेयेति, *पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् *तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

*सर्वस्य वशी सर्वस्येशानः इत्यादिकाः, ब्रह्मणः सर्वस्मादन्यत्वम्, सर्वस्येशितव्यत्वम्, ईश्वरत्वं च ब्रह्मणः, सर्वस्य शेषतां पतित्वं चेश्वरस्य काश्चन ॥ *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा, *एष त आत्मा अन्तर्याम्यमृतः, *यस्य पृथिवी शरीरं यस्यापश्शरीरं यस्य तेजश्शरीरम् इत्यादि, *यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युश्शरीरं यस्यात्मा शरीरम्, इति ब्रह्मव्यतिरिक्तस्य सर्वस्य वस्तुनः ब्रह्मणश्च शरीरात्मभावं दर्शयन्ति काश्चनेति नानारूपाणां वाक्यानामविरोधः मुख्यार्थापरित्यागश्च यथा संभवति, तथैव वर्णनीयम्; वर्णितं च ॥

अविकारश्रुतयः स्वरूपपरिणामपरिहारादेव मुख्यार्थाः। निर्गुणवादाश्च प्राकृतहेयगुणनिषेधविषयतया व्यवस्थिताः। नानात्वनिषेधवादाश्च एकस्यैव ब्रह्मणश्शरीरतया प्रकारभूतं सर्वं चेतनाचेतनं वस्त्विति, सर्वस्यात्मतया सर्वप्रकारं ब्रह्मैवावस्थितमिति सुरक्षिताः। सर्वविलक्षणत्वपतित्वेश्वरत्वकल्याणगुणाकरत्वसत्यकामत्वसत्यसङ्कल्पत्वादिवाक्यं तदभ्युपगमादेव सुरक्षितम्। ज्ञानानन्दमात्रवादि च सर्वस्मादन्यस्य सर्वकल्याणगुणाश्रयस्य सर्वेश्वरस्य सर्वशेषिणः सर्वाधारस्य सर्वोत्पत्तिस्थितिप्रलयहेतुभूतस्य निरवद्यस्य निर्विकारस्य सर्वात्मभूतस्य परस्य ब्रह्मणः स्वरूपनिरूपकधर्मः मलप्रत्यनीकानन्दरूपज्ञानमेवेति स्वप्रकाशतया स्वरूपमपि ज्ञानमेवेति च प्रतिपादनात्, अनुपालितम्। ऐक्यवादाश्च शरीरात्मभावेन सामानाधिकरण्यमुख्यार्थतोपपादनादेव सुस्थिताः।

एवं च सति, अभेदो वा भेदो वा द्व्यात्मकता वा वेदान्तवेद्यः कोऽयमर्थस्समर्थितो भवति? सर्वस्य वेदवेद्यत्वात् सर्वं समर्थितम्। सर्वशरीरतया सर्वप्रकारं ब्रह्मैवावस्थितमिति, अभेदस्समर्थितः। एकमेव ब्रह्म नानाभूतचिदचिद्वस्तुप्रकारं नानात्वेनावस्थितमिति, भेदाभेदौ। अचिद्वस्तुनश्च चिद्वस्तुनश्चेश्वरस्य च स्वरूपस्वभाववैलक्षण्यादसंकराच्च भेदः समर्थितः। ननु च *तत्त्वमसि श्वेतकेतो, *तस्य तावदेव चिरम्, इत्यैक्यज्ञानमेव परमपुरुषार्थलक्षणमोक्षसाधनमिति गम्यते। नैतदेवम्; *पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति आत्मानं प्रेरितारं चान्तर्यामिणं पृथक् मत्वा, ततः पृथक्त्वज्ञानाद्धेतोः, तेन परमात्मना जुष्टः अमृतत्वमेतीति साक्षादमृतत्वप्राप्तिसाधनमात्मनो नियन्तुश्च पृथग्भावज्ञानमित्यवगम्यते। ऐक्यवाक्यविरोधात् एतदपरमार्थसगुणब्रह्मप्राप्तिविषयमित्यभ्युपगन्तव्यमिति चेत्, पृथक्त्वज्ञानस्यैव साक्षादमृतत्वप्राप्तिसाधनत्वश्रवणात्, विपरीतं कस्मान्न भवति?

एतदुक्तं भवति—द्वयोस्तुल्ययोर्विरोधे सति, अविरोधेन तयोर्विषयो विवेचनीय इति। कथमविरोध इति चेत्, अन्तर्यामिरूपेणावस्थितस्य परस्य ब्रह्मणः, शरीरतया प्रकारत्वाज्जीवात्मनः, तत्प्रकारं ब्रह्मैव त्वमितिशब्देनाभिधीयते, तथैव ज्ञातव्यम्; इति तस्य वाक्यस्यार्थः। एवंभूताज्जीवात्, तदात्मतयाऽवस्थितस्य परमात्मनो निखिलदोषरहिततया, सत्यसंकल्पत्वाद्यनवधिकातिशयासंख्येयकल्याणगुणाकरत्वेन च यः पृथग्भावः, सोऽनुसन्धेय

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यस्य वाक्यस्य विषयः। इत्ययमर्थः पूर्वमेवासकृदुक्तः। *भोक्ता भोग्यं प्रेरितारं च मत्वेति भोग्यभूतस्य वस्तुनः अचेतनत्वं परमार्थत्वं सततविकारास्पदत्वमित्यादयः स्वभावाः; भोक्तुर्जीवात्मनश्चामलापरिच्छिन्नज्ञानानन्दस्वभावस्यैवानादिकर्मरूपाविद्याकृतनानाविधज्ञान-संकोचविकासौ भोग्यभूताचिद्वस्तुसंसर्गश्च परमात्मोपासनान्मोक्षश्च, इत्यादयस्स्वभावाः; एवंभूतभोक्तृभोग्ययोरन्तर्यामिरूपेणावस्थानम्, स्वरूपेण चापरिमितगुणौघाश्रयत्वेनावस्था-नमिति परस्य ब्रह्मणः त्रिविधावस्थानं ज्ञातव्यमित्यर्थः॥

*तत्त्वमसीति सद्विद्यायामुपास्यं ब्रह्म सगुणम्, सगुणब्रह्मप्राप्तिश्च फलमित्य-भियुक्तैः पूर्वाचार्यैः व्याख्यातम्। यथोक्तं वाक्यकारेण—*युक्तं तद्गुणकोपासनात्, इति। व्याख्यातं च द्रमिडाचार्येण विद्याविकल्पं वदता—*यद्यपि सच्चित्तो न निर्भुग्नदैवतं गुण-गणं मनसाऽनुधावेत्; तथाऽप्यन्तर्गुणामेव देवतां भजते इति तत्रापि सगुणैव देवता प्राप्यते* इति। सच्चित्तः—सद्विद्यानिष्ठः, न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत्—अपहतपाप्मत्वादि-कल्याणगुणगणं दैवतात् विभक्तम्, यद्यपि दहरविद्यानिष्ठ इव सच्चित्तो न स्मरेत्; तथाऽपि अन्तर्गुणामेव देवतां भजते—देवस्वरूपानुबन्धित्वात् सकलकल्याणगुणगणस्य केनचित् पर-देवतासाधारणेन निखिलजगत्कारणत्वादिना गुणेनोपास्यमानाऽपि देवता, वस्तुतः स्वरू-पानुबन्धिसर्वकल्याणगुणगणविशिष्टैवोपास्यते; अतस्सगुणमेव ब्रह्म तत्रापि प्राप्यमिति सद्वि-द्यादहरविद्ययोर्विकल्पः—इत्यर्थः॥

ननु च, सर्वस्य जन्तोः परमात्माऽन्तर्यामी, तन्नियाम्यं च सर्वमित्युक्तम्; एवं च सति, विधिनिषेधशास्त्राणामधिकारी न दृश्यते। यः स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः, स एवं कुर्यान्न कुर्यादिति विधिनिषेधयोग्यः। न चैष दृश्यते। सर्वस्मिन् प्रवृत्तिजाते सर्वस्य प्रेरकः परमात्मा कारयितेति तस्य सर्वनियमनं प्रतिपादितम्। श्रूयते च *एष एव साधु कर्म कारयति, तं यमेभ्यो लोकेभ्य उन्निनीषति, एष एवासाधु कर्म कारयति, तं यमधो निनीषति इति। साध्वसाधुकर्मकारयितृत्वात् नैर्घृण्यं च॥ अत्रोच्यते—सर्वेषामेव चेतनानां चिच्छ-क्तियोगः प्रवृत्तिशक्तियोग इत्यादि सर्वं प्रवृत्तिनिवृत्तिपरिकरं सामान्येन संविधाय, तन्निर्व-हणाय तदाधारो भूत्वाऽन्तः प्रविश्य, अनुमन्तृतया च नियमनं कुर्वन्, शेषित्वेनावस्थितः परमात्मा। एतदाहितशक्तिस्सन् प्रवृत्तिनिवृत्त्यादि स्वयमेव कुरुते। एवं कुर्वाणमीक्षमाणः परमात्मा उदासीन आस्ते। अतः सर्वमुपपन्नम्॥ साध्वसाधुकर्मकारयितृत्वं तु व्यवस्थित-विषयम्, न सर्वसाधारणम्। यस्तु पूर्वं स्वयमेवातिमात्रमानुकूल्ये प्रवृत्तः, तं प्रति प्रीतः स्वयमेव भगवान् कल्याणबुद्धियोगदानं कुर्वन् कल्याणे प्रवर्तयति। यः पुनरतिमात्रं प्राति-कूल्ये प्रवृत्तः, तस्य तु क्रूरां बुद्धिं ददत्, स्वयमेव क्रूरेष्वेव कर्मसु प्रेरयति भगवान्॥ यथोक्तं भगवता *तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन

Digitization by Arya Samaj Charitable Foundation, Chennai

मामुपयान्ति ते ।। *तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।। *तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।। इति ।।

सोऽयं परब्रह्मभूतः पुरुषोत्तमः, निरतिशयपुण्यसञ्चयक्षीणाशेषजन्मोपचितपापराशेः परमपुरुषचरणारविन्दशरणागतिजनिततदाभिमुख्यस्य, सदाचार्योपदेशोपबृंहितशास्त्राधिगततत्वयाथात्म्यावबोधपूर्वकाहरहरुपचीयमानशमदमतपश्शौचक्षमाऽऽर्जवभयाभयस्थानविवेकदयाहिंसाद्यात्मगुणोपेतस्य, वर्णाश्रमोचितपरमपुरुषाराधनवेषनित्यनैमित्तिककर्मोपसंहृतिनिषिद्धपरिहारनिष्ठस्य, परमपुरुषचरणारविन्दयुगलन्यस्तात्मात्मीयस्य, तद्भक्तिकारितानवरतस्तुतिस्मृतिनमस्कृतियतनकीर्तनगुणश्रवणवचनध्यानार्चनप्रणामादिप्रीतपरमकारुणिकपुरुषोत्तमप्रसादविध्वस्तस्वान्तध्वान्तस्य, अनन्यप्रयोजनानवरतनिरतिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपभक्त्येकलभ्यः ।। तदुक्तं परमगुरुभिः भगवद्यामुनाचार्यपादैः *उभयपरिकर्मितस्वान्तस्य ऐकान्तिकात्यन्तिकभक्तियोगलभ्यः *इति। ज्ञानयोगकर्मयोगसंस्कृतान्तःकरणस्येत्यर्थः । तथा च श्रुतिः– *विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।। इति। अत्राविद्याशब्देन विद्येतरत् वर्णाश्रमाचारादि पूर्वोक्तं कर्मोच्यते; विद्याशब्देन भक्तिरूपापन्नध्यानमुच्यते । यथोक्तम्–

*इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः। ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ।।

इति, * तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते, *य एनं विदुरमृतास्ते भवन्ति, *ब्रह्मविदाप्नोति परम्, *ब्रह्म वेद ब्रह्मैव भवति, इत्यादि।। वेदनशब्देन ध्यानमेवाभिहितम् *निदिध्यासितव्यः इत्यादिनैकार्थ्यात्। तदेव ध्यानं पुनरपि विशिनष्टि– *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।। इति।। भक्तिरूपापन्नानुध्यानेनैव लभ्यते, न केवलवेदनमात्रेण; न मेधयेति केवलस्य निषिद्धत्वात् ।। एतदुक्तं भवति– योऽयं मुमुक्षुः वेदान्तविहितवेदनरूपध्यानादिनिष्ठः, यदा तस्य तस्मिन्नेवानुध्याने निरवधिकातिशया प्रीतिर्जायते, तदैव तेन लभ्यते परः पुरुष इति।। यथोक्तं भगवता *पुरुषस्स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया।। *भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप ! ।। *भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः । ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्।। इति । तदनन्तरं मां तत एव–भक्तेः, विशत इत्यर्थः । भक्तिरपि निरतिशयप्रियानन्यप्रयोजनस्वेतरवैतृष्ण्यावहज्ञानविशेष एवेति, तद्युक्त एव, तेन परेणात्मना वरणीयो भवतीति, तेन लभ्यते–इति श्रुत्यर्थः ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

एवंविधपरभक्तिरूपज्ञानविशेषस्योत्पादकः, पूर्वोक्ताहरहरुपचीयमानज्ञानपूर्वक कर्मानुगृहीतभक्तियोग एव। यथोक्तं भगवता पराशरेण— *वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्थाः नान्यस्तत्तोषकारकः ॥ इति ॥ निखिलजगदुद्धरणाय अवनितलेऽवतीर्णः परब्रह्मभूतः पुरुषोत्तमः स्वयमेवैतदुक्तवान्— *स्वकर्मनिरतस्सिद्धिं यथा विन्दति तच्छृणु ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ इति, यथोदितक्रमपरिणतभक्त्येकलभ्य एव ॥

भगवद्बोधायनटङ्कद्रामिडगुहदेवकपर्दिभारुचिप्रभृत्यविगीतशिष्टपरिगृहीतपुरातन-वेदवेदान्तव्याख्यानसुव्यक्तार्थश्रुतिनिकरनिदर्शितोऽयं पन्थाः। अनेन, चार्वाकशाक्यौलूक्या-क्षपादक्षपणककपिलपतञ्जलिमतानुसारिणो वेदबाह्याः वेदावलम्बिकुदृष्टिभिस्सह निरस्ताः। वेदावलम्बिनामपि यथावस्थितवस्तुविपर्यस्तदृशां बाह्यसाम्यं मनुनैवोक्तम्-*या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥ इति। रजस्तमोभ्यामस्पृष्टमुत्तमं सत्वमेव येषां स्वाभाविको गुणः, तेषामेव वैदिकी रुचिः वेदार्थयाथा-त्म्यावबोधश्चेत्यर्थः। यथोक्तं मात्स्ये *सङ्कीर्णास्साात्त्विकाश्चैव राजसास्तामसास्तथा ॥ इति। केचिद्ब्रह्मकल्पास्सङ्कीर्णाः, केचित् सत्त्वप्रायाः, केचित् रजःप्रायाः, केचित् तमःप्रायाः, इति कल्पविभागमुक्त्वा सत्त्वरजस्तमोमयानां तत्त्वानां माहात्म्यवर्णनञ्च, तत्तत्कल्पप्रोक्तपुराणेषु सत्त्वादिगुणमयेन ब्रह्मणा क्रियते, इति चोक्तम्— *यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥ इति विशेषतश्चोक्तम्। *अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते। राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः॥ सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धाः गमिष्यन्ति परां गतिम्॥ संकीर्णेषु सरस्वत्याः पितॄणाम्... इत्यादि ॥

एतदुक्तं भवति—आदिक्षेत्रज्ञत्वात् ब्रह्मणः तस्यापि केषुचिदहस्सु सत्त्वमुद्रिक्तम्, केषुचिद्रजः, केषुचित्तमः। यथोक्तं भगवता— *न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ इति ॥ *यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै, इति श्रुतेः, ब्रह्मणोऽपि सृज्यत्वेन शास्त्रवश्यत्वेन च क्षेत्रज्ञत्वं गम्यते। सत्त्वप्रायेष्वहस्सु तदितरेषु च यानि पुराणानि ब्रह्मणा प्रोक्तानि, तेषां परस्परविरोधे सति, सात्त्विकाहःप्रोक्तं पुराणमेव यथार्थम्, तद्विरोधि अन्यदयथार्थमिति पुराणनिर्णयायैवेदं सत्त्वनिष्ठेन ब्रह्मणा अभिहितमिति विज्ञायत इति। सत्त्वादीनां काय च भगवतैवोक्तम्—

*सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसः भवतोऽज्ञानमेव च॥*प्रवृत्तिं च निवृत्तिं च कार्याकाय भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ! सात्त्विकी॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यया धर्ममधर्मं च कार्यं चाकार्यमेव च। अयथावत् प्रजानाति बुद्धिस्सा पार्थ! राजसी॥ अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता। सर्वार्थान् विपरीतांश्च बुद्धिस्सा पार्थ! तामसी॥इति॥ सर्वान् पुराणार्थान् ब्रह्मणस्सकाशादधिगम्यैव सर्वाणि पुराणानि पुराणकाराश्चक्रुः। यथोक्तम्— *कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः। पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः॥ इति॥

अपौरुषेयेषु वेदवाक्येषु परस्परविरुद्धेषु कथमिति चेत्, तात्पर्यनिश्चयादविरोधः पूर्वमेवोक्तः। यदपि चेदं विरुद्धमिव दृश्यते— *प्राणं मनसि सह करणैः नादान्ते परात्मनि संप्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायीतैवं सर्वमिदम्, ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते, स कारणं...कारणं तु ध्येयः सर्वैश्वर्यसंपन्नस्सर्वेश्वरश्शम्भुराकाशमध्ये ध्येयः॥

यस्मात्परं नापरमस्ति किंचित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः तेनेदं पूर्णं पुरुषेण सर्वम्॥

ततो यदुत्तरतरं तदरूपमनामयम्। य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति॥ सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्यापी च भगवान् तस्मात् सर्वगतश्शिवः॥

*यदा तमस्तन्न दिवा न रात्रि र्न सन् न चासच्छिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी॥ इत्यादि॥

*नारायणः परं ब्रह्मेति च पूर्वमेव प्रतिपादितम्, तेनास्य कथमविरोधः? अत्यल्पमेतत्।

वेदवित्प्रवरप्रोक्तवाक्यन्यायोपबृंहिताः। वेदास्साङ्गा हरिं प्राहुः जगज्जन्मादिकारणम्॥ *जन्माद्यस्य यतः, *यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्म, इति जगज्जन्मादिकारणं ब्रह्मेत्यवगम्यते। तच्च, जगत्सृष्टिप्रलयप्रकरणेष्वेवावगन्तव्यम्। *सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्, इति जगदुपादानताजगन्निमित्तताजगदन्तर्यामितादिमुखेन परमकारणं सच्छब्देन प्रतिपादितम्। अयमेवार्थः *ब्रह्म वा इदमेक एवाग्र आसीदिति शाखान्तरे ब्रह्मशब्देन प्रतिपादितः। अनेन सच्छाब्दाभिहितं ब्रह्मेत्यवगतम्। अयमेवार्थः शाखान्तरे *आत्मा वा इदमेक एवाग्र आसीत्, नान्यत् किञ्चन मिषत् *इति, तथा सद्ब्रह्मशब्दाभ्यामात्मैवाभिहित इत्यवगम्यते। तथा च शाखान्तरे *एको ह वै नारायण आसीत्, न ब्रह्मा नेशानो, नेमे द्यावापृथिवी इत्यादिना, सद्ब्रह्मात्मादिपरमकारणवाचिभिश्शब्दैः नारायण एवाभिधीयत इति निश्चीयते॥ *यमन्तस्समुद्रे कवयो वयन्ति, इत्यादि, *नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्। न तस्येशे कश्चन तस्य नाम महद्यशः। न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्। हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति * इति सर्वस्मात् परत्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

मस्य प्रतिपाद्य, *न तस्येशे कश्चनेति तस्मात्परं किमपि न विद्यत इति च प्रतिषिध्य, *अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टौ * इति तेनैकवाक्यतां गमयति। तच्च महापुरुषप्रकरणं ह्रीश्च ते लक्ष्मीश्च पत्न्यौ *इति नारायण एवेति द्योतयति ॥

अयमर्थः नारायणानुवाके प्रपञ्चितः — * सहस्रशीर्षं देवम् इत्यारभ्य, *स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट् * इति सर्वशाखासु परतत्त्वप्रतिपादनपरान्, अक्षरशिवशम्भुपरब्रह्मपरंज्योतिःपरतत्त्वपरायणपरमात्मादिसर्वशब्दान्, तत्तद्गुणयोगेन नारायण एव प्रयुज्य, तद्व्यतिरिक्तस्य समस्तस्य तदायत्ततां तद्व्याप्यतां तदाधारतां तन्नियाम्यतां तच्छेषतां तदात्मकतां च प्रतिपाद्य, ब्रह्मशिवयोरपीन्द्रादिसमानाकारतया तद्विभूतित्वं च प्रतिपादितम्। इदं च वाक्यं केवलपरतत्त्वप्रतिपादनपरम्, अन्यत् किञ्चिदप्यत्र न विधीयते। अस्मिन् वाक्ये प्रतिपादितस्य सर्वस्मात् परत्वेनावस्थितस्य ब्रह्मणो वाक्यान्तरेषु *ब्रह्मविदाप्नोति परमित्यादिषूपासनादि विधीयते । अतः, *प्राणं मनसि सह करणैरित्यादिवाक्यं सर्वकारणे परमात्मनि करणप्राणादि सर्वं विकारजातमुपसंहृत्य, तमेव परमात्मानं सर्वस्येशानं ध्यायीतेति परब्रह्मभूतनारायणस्यैव ध्यानं विदधाति ॥ *पतिं विश्वस्य, *न तस्येशे कश्चनेति तस्यैव सर्वेशानता प्रतिपादिता। अत एव *सर्वैश्वर्यसंपन्नस्सर्वेश्वरश्शम्भुराकाशमध्ये ध्येयः*इति नारायणस्यैव परमकारणस्य शम्भुशब्दवाच्यस्य ध्यानं विधीयते; *कश्च ध्येय इत्यारभ्य *कारणं तु ध्येय इति कार्यस्याध्येयतापूर्वकं कारणैकध्येयतापरत्वात् वाक्यस्य। तस्यैव नारायणस्य परमकारणता शम्भुशब्दवाच्यता च परमकारणप्रतिपादनैकपरे नारायणानुवाक एव प्रतिपन्नेति, तद्विरोध्यर्थान्तरपरिकल्पनं कारणस्यैव ध्येयत्वेनविधिवाक्ये न युज्यते ॥

यदपि *ततो यदुत्तरतरमित्यत्र पुरुषादन्यस्य परतरत्वं प्रतीयत इत्यभ्यधायि; तदपि *यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्—यस्मादपरम्—यस्मादन्यत् किञ्चिदपि परं नास्ति, केनापि प्रकारेण पुरुषव्यतिरिक्तस्य परत्वं नास्तीत्यर्थ अणीयस्त्वम्—सूक्ष्मत्वम्, ज्यायस्त्वम्—सर्वेश्वरत्वम्। सर्वव्यापित्वात्, सर्वेश्वरत्वात् अस्य, एतद्व्यतिरिक्तस्य कस्यापि अणीयस्त्वं, ज्यायस्त्वं च नास्तीत्यर्थः। *यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्*इति पुरुषादन्यस्य कस्यापि ज्यायस्त्वं निषिद्धमिति, तस्मादन्यस्य परत्वं न युज्यत इति प्रत्युक्तम्॥ कस्तर्ह्यस्य वाक्यस्यार्थः? अस्य प्रकरणस्योपक्रमे *तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनायेति पुरुषवेदनस्य अमृतत्वहेतुताम्, तद्व्यतिरिक्तस्यापथतां च प्रतिज्ञाय, *यस्मात्परं नापरमस्ति किञ्चित्...तेनेदं पूर्णं पुरुषेण सर्वम्, इत्येतदन्तेन पुरुषस्य सर्वस्मात्परत्वं प्रतिपादितम्। यतः पुरुषतत्त्वमेवोत्तरतरं ततो यदुत्तरतरं पुरुषतत्वम्, तदेव अरूपम् अनामयम्; य एतद्विदुरमृतास्ते भवन्ति, अथेतरं दुःखमेवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

पियन्ति; इति पुरुषवेदनस्यामृतत्वहेतुत्वम्, तदितरस्य चापथत्वं प्रतिज्ञातं, सहेतुकमुपसंहृतम्। अन्यथा उपक्रमगतप्रतिज्ञाभ्यां विरुध्यते।

पुरुषस्यैव शुद्धिगुणयोगेन शिवशब्दाभिधेयत्वम् *शाश्वतं शिवमच्युतमित्यादिना ज्ञातमेव। पुरुष एव शिवशब्दाभिहित इत्यनन्तरमेव च वदति–*महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः इति॥ उक्तेनैव न्यायेन *न सन्न चासच्छिव एव केवलः, इत्यादि सर्वं नेयम्॥ किञ्च, *न तस्येशे कश्चनेति निरस्तसमाभ्यधिकसंभावनस्य पुरुषस्य *अणोरणीयानित्यस्मिन्ननुवाके, वेदाद्यन्तरूपतया, वेदबीजभूतप्रणवस्य, प्रकृतिभूताकारवाच्यतया महेश्वरत्वं प्रतिपाद्य, दहरपुण्डरीकमध्यस्थाकाशान्तवर्तितया उपास्यत्वमुक्तम्॥ अयमर्थः–*सर्वस्य वेदजातस्य प्रकृतिः प्रणव उक्तः। प्रणवस्य च प्रकृतिरकारः। प्रणवविकारो वेदः स्वप्रकृतिभूते प्रणवे लीनः। प्रणवोऽपि अकारविकारभूतः स्वप्रकृतावकारे लीनः। तस्य च प्रणवप्रकृतिभूतस्याकारस्य यः परः– वाच्यः, स एव महेश्वरः–इति। सर्ववाचकजातप्रकृतिभूताकारवाच्यः सर्ववाच्यजातप्रकृतिभूतनारायणो यः, स महेश्वरः–इत्यर्थः॥ यथोक्तं भगवता—
*अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय!॥
*अक्षराणामकारोऽस्मि इति। *अ इति ब्रह्म *इति च श्रुतेः *अकारो वै सर्वा वाक्, इति च, वाचकजातस्य अकारप्रकृतित्वम्, वाच्यजातस्य ब्रह्मप्रकृतित्वं च सुस्पष्टम्।

अतः, ब्रह्मणः अकारवाच्यताप्रतिपादनात्, अकारवाच्यो नारायण एव महेश्वर इति सिद्धम्। तस्यैव *सहस्रशीर्षं देवमिति केवलपरतत्त्वविशेषप्रतिपादनपरेण नारायणानुवाकेन सर्वस्मात् परत्वं प्रपञ्चितम्। अनेन अनन्यपरेण प्रतिपादितमेव परतत्वम्, अन्यपरेषु सर्वेषु वाक्येषु केनापि शब्देन प्रतीयमानं तदेवेत्यवगम्यत इति, *शास्त्रदृष्ट्या तूपदेशो वामदेववत्, इति सूत्रकारेण निर्णीतम्॥ तदेतत् परं ब्रह्म, क्वचित् ब्रह्मशिवादिशब्दावगतमिति केवलब्रह्मशिवयोः न परत्वप्रसंगः। अस्मिन्ननन्यपरेऽनुवाके तयोरिन्द्रादितुल्यतया तद्विभूतित्वप्रतिपादनात्; क्वचिदाकाशप्राणादिशब्देन परं ब्रह्माभिहितमिति भूताकाशप्राणादेर्यथा न परत्वम्॥

यत्पुनरिदमाशङ्कितम्–*अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम्, तद्वाव विजिज्ञासितव्यम्*इत्यत्र आकाशशब्देन जगदुपादानकारणं प्रतिपाद्य, तदन्तर्वर्तिनः कस्यचित् तत्त्वविशेषस्यान्वेष्टव्यता प्रतिपाद्यते; अस्याकाशस्य नामरूपयोर्निर्वाहकत्वश्रवणात्, पुरुषसूक्ते पुरुषस्य नामरूपयोः कर्तृत्वदर्शनाच्च, आकाशपर्यायभूतात्पुरुषादन्यस्य अन्वेष्टव्यतयोपास्यत्वं प्रतीयत इति॥ अनधीतवेदानामदृष्टशास्त्रविदामिदं चोद्यम्। यतस्तत्र श्रुतिरेवास्य परिहारमाह। वाक्यकारश्च *दहरोस्मिन्नन्तर आकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति–चोदिते,

Digitization by Arya Samaj Charitable Foundation, Chennai

*यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः इत्यादिना अस्याकाशशब्दवाच्यस्य परमपुरुषस्यानवधिकमहत्त्वम्, सकलजगत्कारणतया सकलजगदाधारत्वं च प्रतिपाद्य,*तस्मिन् कामास्समाहिता इति, अपहतपाप्मत्वादि सत्यकामशब्देन सत्यसङ्कल्पत्वपर्यन्तगुणाष्टकं निहितमिति, परमपुरुषवत् परमपुरुषगुणाष्टकस्यापि पृथग्विजिज्ञासितव्यताप्रतिपिपादयिषया, *तस्मिन् यदन्तस्तदन्वेष्टव्यमित्युक्तमिति श्रुत्यैव सर्वं परिहृतम् ॥

एतदुक्तं भवति—किं तदत्र विद्यते यदन्वेष्टव्यमित्यस्य चोद्यस्य, तस्मिन् सर्वस्य जगतः स्रष्टृत्वमाधारत्वम् नियन्तृत्वम् शेषित्वम्, अपहतपाप्मत्वादयो गुणाश्च विद्यन्त इति परिहार इति ॥ तथा च वाक्यकारवचनम्—* तस्मिन् यदन्तः इति कामव्यपदेश इति । काम्यन्त इति कामाः, अपहतपाप्मत्वादयो गुणा इत्यर्थः ॥ एतदुक्तं भवति—यदेतत् दहराकाशशब्दाभिधेयम्, निखिलजगदुदयविभवलयलीलं, परं ब्रह्म, तस्मिन् यदन्तर्निहितम्, अनवधिकातिशयमपहतपाप्मत्वादिगुणाष्टकम्, तदुभयमप्यन्वेष्टव्यम्, विजिज्ञासितव्यमिति। यथाऽऽह—*अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति, इति ॥

यः पुनः कारणस्यैव ध्येयताप्रतिपादनपरे वाक्ये विष्णोरनन्यपरवाक्यप्रतिपादितपरतत्त्वभूतस्य कार्यमध्ये निवेशः; सः स्वकार्यभूततत्त्वसंख्यापूरणं कुर्वतः, स्वलीलया जगदुपकाराय स्वेच्छावतार इत्यवगन्तव्यः; यथा लीलया देवसंख्यापूरणं कुर्वत उपेन्द्रत्वं परस्यैव; यथा च, सूर्यवंशोद्भवराजसंख्यापूरणं कुर्वतः परस्यैव ब्रह्मणो दाशरथिरूपेण स्वेच्छावतारः; यथा च सोमवंशसंख्यापूरणं कुर्वतो भगवतो भूभारावतरणाय स्वेच्छया वसुदेवगृहेऽवतारः । सृष्टिप्रलयप्रकरणेषु नारायण एव परमकारणतया प्रतिपाद्यत इति पूर्वमेवोक्तम् ॥

यत्पुनरथर्वशिरसि रुद्रेण स्वसर्वैश्वर्यं प्रपञ्चितम्, तत् *सोऽन्तरादन्तरं प्राविशत् इति परमात्मप्रवेशादुक्तमिति श्रुत्यैव व्यक्तम् ॥ *शास्त्रदृष्ट्या तूपदेशो वामदेववत्, इति सूत्रकारेण एवमादीनामर्थः प्रतिपादितः ॥ यथोक्तं प्रह्लादेनापि— *सर्वगत्वादनन्तस्य स एवाहमवस्थितः। मत्तस्सर्वमहं सर्वं मयि सर्वं सनातने॥ इत्यादि॥ अत्र सर्वगत्वादनन्तस्येति हेतुरुक्तः; स्वशरीरभूतस्य सर्वस्य चिदचिद्वस्तुनः आत्मत्वेन, सर्वगतः परमात्मेति सर्वे शब्दाः सर्वशरीरं परमात्मानमेवाभिदधतीत्युक्तम् । अतः अहमिति शब्दः स्वात्मप्रकारिणं परमात्मानमेवाचष्टे। अत इदमुच्यते *आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेरित्यादिना अहंग्रहणोपासनं वाक्यकारेण; कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमात्मैवेति *सर्वस्य तन्निष्पत्तेरित्युक्तम् । *आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति सूत्रकारेण च ॥

महाभारते च ब्रह्मरुद्रसंवादे ब्रह्मा रुद्रं प्रत्याह—*तवान्तरात्मा मम च ये चान्ये

Digitization by Arya Samaj Charitable Foundation, Chennai

देहिसंज्ञिताः, इति रुद्रस्य ब्रह्मणश्च अन्येषां च देहिनां परमेश्वरो नारायणः अन्तरात्मतयाऽवस्थित इति ॥

तथा तत्रैव— *विष्णुरात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ॥ इति ॥

तत्रैव— *एतौ द्वा विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ।
तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ॥ इति ॥

अन्तरात्मतयाऽवस्थितनारायणदर्शितपथौ ब्रह्मरुद्रौ सृष्टिसंहारकार्यकरावित्यर्थः ॥

निमित्तोपादानयोस्तु भेदं वदन्तः वेदबाह्या एव स्युः ; *जन्माद्यस्य यतः, *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, इत्यादिवेदवित्प्रणीतसूत्रविरोधात् ; *सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्, *ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः, *ब्रह्माध्यतिष्ठद्भुवनानि धारयन्, *सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, *न तस्येशे कश्चन तस्य नाम महद्यशः, *नेह नानाऽस्ति किञ्चन, *सर्वस्य वशी सर्वस्येशानः, *पुरुष एवेदं सर्वम् यद्भूतं यच्च भव्यम्, उतामृतत्वस्येशानः, *नान्यः पन्था अयनाय विद्यते, इत्यादिसर्वश्रुतिगणविरोधाच्च ॥

इतिहासपुराणेषु च, सृष्टिप्रलयप्रकरणयोरिदमेव परतत्त्वमित्यवगम्यते । यथा महाभारते—

*केन सृष्टमिदं सर्वं जगत् स्थावरजङ्गमम् । प्रलये च कमभ्येति तन्मे ब्रूहि पितामह ! ॥
इति पृष्टः, *नारायणो जगन्मूर्तिरनन्तात्मा सनातनः । इत्यादि च वदन्,
*ऋषयः पितरो देवा महाभूतानि धातवः । जङ्गमाजङ्गमश्चेदं जगन्नारायणोद्भवम् ॥ इति च ॥

प्राच्योदीच्यदाक्षिणात्यपाश्चात्यसर्वशिष्टैः सर्वधर्मसर्वतत्त्वव्यवस्थायामिदमेव पर्याप्तमित्यविगानपरिगृहीतं वैष्णवं च पुराणम्, *जन्माद्यस्य यत इति जगज्जन्मादिकारणं ब्रह्मेत्यवगम्यते, तत् जन्मादिकारणं किमिति प्रश्नपूर्वकम्, *विष्णोस्सकाशादुद्भूतमित्यादिना ब्रह्मस्वरूपविशेषप्रतिपादनैकपरतया प्रवृत्तमिति सर्वसम्मतम् । तथा तत्रैव—

*प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥ इति ॥

सर्ववेदवेदान्तेषु सर्वैश्शब्दैः परमकारणतया अयमेव गीयत इत्यर्थः ॥ यथा सर्वासु श्रुतिषु केवलपरब्रह्मस्वरूपविशेषप्रतिपादनायैव प्रवृत्तो नारायणानुवाकः, तथेदं वैष्णवं च पुराणम्

*सोहमिच्छामि धर्मज्ञ ! श्रोतुं त्वत्तो यथा जगत् । बभूव भूयश्च यथा महाभाग ! भविष्यति ॥
यन्मयं च जगत् ब्रह्मन् ! यतश्चैतच्चराचरम् । लीनमासीद्यथा यत्र लयमेष्यति यत्र च ॥

इति परं ब्रह्म किमिति प्रक्रम्य,

Digitization by Arya Samaj Charitable Foundation, Chennai

*विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् । स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥
परः पराणां परमः परमात्माऽऽत्मसंस्थितः । रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः । वर्जितश्शक्यते वक्तुं यस्सदाऽस्तीति केवलम् ॥
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ॥
तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् । एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥
तदेव सर्वमेवैतत् व्यक्ताव्यक्तस्वरूपवत् । तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥

*स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने ! व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा तेनाऽऽस्तृतं यद्भुवनान्तराले ॥
समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतवर्गः ।
इच्छागृहीताभिमतोरुदेहस्संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहाववोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरस्सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाऽप्यधिगम्यते वा तद् ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥

इति परब्रह्मस्वरूपविशेषनिर्णयायैव प्रवृत्तम् । अन्यानि सर्वपुराणान्यन्यपराण्येतद्विरोधेन नेयानि। अन्यपरत्वं च तत्तदारम्भप्रकारैरवगम्यते। सर्वात्मना विरुद्धांशस्तामसत्वादनादरणीयः ॥ नन्वस्मिन्नपि,

*सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवान् एक एव जनार्दनः ॥

इति त्रिमूर्तिसाम्यं प्रतीयते। नैतदेवम्, *एक एव जनार्दन इति जनार्दनस्यैव ब्रह्मशिवादिकृत्स्नप्रपञ्चतादात्म्यं विधीयते । *जगच्च सः इति पूर्वोक्तमेव विवृणोति—

*स्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च। उपसंह्रियते चान्ते संहर्ता च स्वयंप्रभुः॥

इति स्रष्टृत्वेनवस्थितं ब्रह्माणं सृज्यं च, संहर्तारं संहार्यं च, युगपन्निर्दिश्य, सर्वस्य विष्णुतादात्म्योपदेशात्, सृज्यसंहार्यभूताद्वस्तुनः स्रष्टृसंहर्त्रोः जनार्दनविभूतित्वेन विशेषो दृश्यते । जनार्दनविष्णुशब्दयोः पर्यायत्वेन, *ब्रह्मविष्णुशिवात्मिकामिति विभूतिमत एव स्वेच्छया लीलार्थं विभूत्यन्तर्भाव उच्यते; यथेदमनन्तरमेवोच्यते—

* पृथिव्यापस्तथा तेजो वायुराकाश एव च । सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ॥
स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः । सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

312

स एव सृज्यस्स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्तिः विष्णुर्वरिष्ठो वरदो वरेण्यः ॥ इति ।

अत्र सामानाधिकरण्यनिर्दिष्टं हेयमिश्रप्रपञ्चतादात्म्यं निरवद्यस्य, निर्विकारस्य, समस्तकल्याणगुणाकरस्य ब्रह्मणः कथमुपपद्यते ? इत्याशङ्क्य, *स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः, इति स्वयमेवोपपादयति। स एव सर्वेश्वरेश्वरः परब्रह्मभूतो विष्णुरेव, सर्वं जगदिति प्रतिज्ञाय, सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति हेतुरुक्तः। सर्वभूतानामयमात्मा विश्वशरीरो यतोऽव्ययः, इत्यर्थः । वक्ष्यति च *तत्सर्वं वै हरेस्तनुरिति । एतदुक्तं भवति—अस्याव्ययस्यापि परस्य ब्रह्मणो विष्णोः विश्वशरीरतया तादात्म्यमविरुद्धमिति । आत्मशरीरयोश्च स्वभावाः व्यवस्थिता एव ॥

एवंभूतस्य सर्वेश्वरस्य विष्णोः प्रपञ्चान्तर्भूतनियाम्यकोटिनिविष्टब्रह्मादिदेवतिर्यङ्मनुष्येषु तत्तत्समाश्रयणीयत्वाय स्वेच्छावतारः पूर्वोक्तः । तदेतत् ब्रह्मादीनां भावनात्रयान्वयेन कर्मवश्यत्वम्, भगवतः परब्रह्मभूतस्य वासुदेवस्य निखिलजगदुपकाराय स्वेच्छया स्वेनैव रूपेण देवादिष्ववतार इति च षष्ठेंशे शुभाश्रयप्रकरणे सुव्यक्तमुक्तम् । अस्य देवादिरूपेणावतारेष्वपि न प्राकृतो देह इति महाभारते *न भूतसंघसंस्थानो देहोऽस्य परमात्मनः, इति प्रतिपादितः। श्रुतिश्च *अजायमानो बहुधा विजायते, तस्य धीराः परिजानन्ति योनिम्, इति। कर्मवश्यानां ब्रह्मादीनामनिच्छतामपि तत्तत्कर्मानुगुणप्रकृतिपरिणामरूपभूतसंघसंस्थानविशेषदेवादिशरीरप्रवेशरूपं जन्म अवर्जनीयम्; अयं तु सर्वेश्वरस्सत्यसंकल्पो भगवान् एवंभूतशुभेतरजन्माकुर्वन्नपि, स्वेच्छया स्वेनैव निरतिशयकल्याणरूपेण देवादिषु जगदुपकाराय बहुधा जायते। तस्यैतस्य शुभेतरजन्माकुर्वतोऽपि सर्वकल्याणगुणानन्त्येन बहुधा योनिम्—बहुविधजन्म, धीराः — धीमतामग्रेसराः जानन्तीत्यर्थः ॥

तदेतन्निखिलजगन्निमित्तोपादानभूतात् *जन्माद्यस्य यतः, *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, इत्यादिसूत्रैः प्रतिपादितात् परस्मात् ब्रह्मणः परमपुरुषादन्यस्य कस्यचित् परत्वम् *परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः, इत्याशङ्क्य, *सामान्यात्तु, *बुद्ध्यर्थः पादवत्, *स्थानविशेषात् प्रकाशादिवत्, *उपपत्तेश्च, *तथाऽन्यप्रतिषेधात् *अनेन सर्वगतत्वमायामशब्दादिभ्यः, इति सूत्रकारः स्वयमेव निराकरोति ।

मानवे च शास्त्रे—*प्रादुरासीत्तमोनुदः, *सिसृक्षुर्विविधाः प्रजाः, *अप एव ससर्जादौ तासु वीर्यमपासृजत्, तस्मिन् जज्ञे स्वयं ब्रह्मा, इति ब्रह्मणो जन्मश्रवणात् क्षेत्रज्ञत्वमेवावगम्यते । तथा च स्रष्टुः परमपुरुषस्य, तद्विसृष्टस्य च ब्रह्मणः *अयनं तस्य ताः पूर्वं तेन नारायणस्स्मृतः, *तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यते इति नामनिर्देशाच्च ॥

तथा वैष्णवे पुराणे, हिरण्यगर्भादीनां भावनात्रयान्वयादशुद्धत्वेन शुभाश्रयत्वानर्हत्वोपपादनात् क्षेत्रज्ञत्वं निश्चीयते ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यदपि कैश्चिदुक्तम् सर्वस्य शब्दजातस्य विध्यर्थवादमन्त्ररूपस्य कार्याभिधायित्वेनैव प्रामाण्यं वर्णनीयम् । व्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासंभवात् व्यवहारस्य च कार्यबुद्धिमूलत्वात् कार्यरूप एव शब्दार्थः; न परिनिष्पन्ने वस्तुनि शब्दः प्रमाणमिति ।। अत्रोच्यते–प्रवर्तकवाक्यव्यवहार एव शब्दानामर्थबोधकत्वशक्त्यवधारणं कर्तव्यमिति, किमियं राजाज्ञा ? सिद्धवस्तुषु शब्दस्य बोधकत्वशक्तिग्रहणमत्यन्तसुकरम् । तथा हि–केनचित् हस्तचेष्टादिना अपवरके दण्डः स्थित इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित् तज्ज्ञापने प्रवृत्तः, अपवरके दण्डः स्थितः इति शब्दं प्रयुङ्क्ते । मूकवत् हस्तचेष्टामिमां जानन् पार्श्वस्थोऽन्यः प्रागव्युत्पन्नोऽपि, एतस्यार्थस्य बोधनाय अपवरके दण्डः स्थितः इत्यस्य शब्दस्य प्रयोगदर्शनात्, अस्यार्थस्यायं शब्दो बोधक इति जानातीति, किमत्र दुष्करम् ।।

तथा बालः तातोऽयम्, इयमम्बा, अयं मातुलः, अयं मनुष्यः, अयं मृगः, चन्द्रोऽयम्, अयं च सर्पः, इति मातापितृप्रभृतिभिश्शब्दैः, शनैश्शनैः अङ्गुल्या निर्देशेन तत्र तत्र बहुशश्शिक्षितः, तैरेव शब्दैस्तेष्वर्थेषु, स्वात्मनश्च बुद्ध्युत्पत्तिं दृष्ट्वा, तेष्वर्थेषु तेषां शब्दानामङ्गुल्या निर्देशपूर्वकप्रयोगः, संबन्धान्तराभावात्, संकेतयितृपुरुषाज्ञानाच्च बोधकत्वनिबन्धन इति क्रमेण निश्चित्य, पुनरपि, अस्य शब्दस्यायमर्थ इति पूर्ववृद्धैश्शिक्षितः, सर्वशब्दानामर्थमवगम्य, स्वयमपि सर्वं वाक्यजातं प्रयुङ्क्ते । एवमेव सर्वपदानां स्वार्थाभिधायित्वं संघातविशेषाणां च यथावस्थितसंसर्गविशेषबोधकत्वं च जानातीति, कार्यार्थ एव व्युत्पत्तिरित्यादिनिर्बन्धो निर्निबन्धनः । अतः परिनिष्पन्ने वस्तुनि शब्दस्य बोधकत्वशक्त्यवधारणात्, सर्वाणि वेदान्तवाक्यानि सकलजगत्कारणं सर्वकल्याणगुणाकरमुक्तलक्षणं ब्रह्म बोधयन्त्येव ।।

अपि च कार्यार्थ एव व्युत्पत्तिरस्तु, वेदान्तवाक्यानि उपासनविषयकार्याधिकृतविशेषणभूतफलत्वेन, दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवत्, रात्रिसत्रप्रतिष्ठादिवत्, अपगोरणशतयातनासाध्यसाधनभाववच्च, कार्योपयोगितयैव सर्वं बोधयन्ति । तथा हि–*ब्रह्मविदाप्नोति परमित्यत्र ब्रह्मोपासनविषयकार्याधिकृतविशेषणभूतफलत्वेन ब्रह्मप्राप्तिश्श्रूयते, परप्राप्तिकामो ब्रह्म विद्यादिति । अत्र प्राप्यतया प्रतीयमानं ब्रह्मस्वरूपम्, तद्विशेषणं च सर्वं कार्योपयोगितयैव सिद्धं भवति । तदन्तर्गतमेव जगतः स्रष्टृत्वम् संहर्तृत्वमाधारत्वमन्तरात्मत्वमित्याद्युक्तमनुक्तं च सर्वमिति, न किञ्चिदनुपपन्नम् ।।

एवं च सति मन्त्रार्थवादगता ह्यविरुद्धाः अपूर्वाश्चार्थास्सर्वे विधिशेषतयैव सिद्धा भवन्ति । यथोक्तं द्रमिडभाष्ये—*ऋणं हि वै जायते इति श्रुतेः, इत्युपक्रम्य, *यद्यप्यवदानस्तुतिपरं वाक्यम्, तथाऽपि नासता स्तुतिरुपपद्यते, इति । एतदुक्तं भवति—सर्वो

Digitization by Arya Samaj Charitable Foundation, Chennai

ह्यर्थवादभागः देवताराधनभूतयागादेस्साङ्गस्य आराध्यदेवतायाश्च अदृष्टरूपान् गुणान् सहस्रशो वदन् कर्मणि प्राशस्त्यबुद्धिमुत्पादयति; तेषामसद्भावे प्राशस्त्यबुद्धिरेव न स्यादिति कर्मणि प्राशस्त्यबुद्ध्यर्थं गुणसद्भावमेव बोधयतीति। अनयैव दिशा सर्वे मन्त्रार्थवादगता ह्यर्थास्सिद्धाः ॥

अपि च कार्यवाक्यार्थवादिभिः किमिदं कार्यत्वं नामेति वक्तव्यम्। कृतिभावभाविता, कृत्युद्देश्यता चेति चेत्; किमिदं कृत्युद्देश्यत्वम्? यदधिकृत्य कृतिर्वर्तते, तत् कृत्युद्देश्यत्वमिति चेत्; पुरुषव्यापाररूपायाः कृतेः कोऽयमधिकारो नाम? यत्प्राप्तीच्छया कृतिमुत्पादयति पुरुषः, तत् कृत्युद्देश्यत्वमिति चेत्; हन्त! तर्हि इष्टत्वमेव कृत्युद्देश्यत्वम्॥ अथैवं मनुषे, इष्टस्यैव रूपद्वयमस्ति, इच्छाविषयतया स्थितिः, पुरुषप्रेरकत्वं च; तत्र प्रेरकत्वाकारः कृत्युद्देश्यत्वमिति। सोऽयं स्वपक्षाभिनिवेशकारितो वृथाश्रमः॥ तथा हि— इच्छाविषयतया प्रतीतस्य स्वप्रयत्नोत्पत्तिमन्तरेणासिद्धिरेव प्रेरकत्वम्; तत एव प्रवृत्तेः। इच्छायां जातायाम्, इष्टस्य स्वप्रयत्नोत्पत्तिमन्तरेणासिद्धिः प्रतीयते चेत्; ततश्चिकीर्षा जायते, ततः प्रवर्तते पुरुष इति तत्त्वविदां प्रक्रिया। तस्मात् इष्टस्य कृत्यधीनात्मलाभत्वातिरेकि कृत्युद्देश्यत्वं नाम किमपि न दृश्यते॥

अथोच्येत, इष्टताहेतुश्च पुरुषानुकूलता, तत्पुरुषानुकूलत्वं कृत्युद्देश्यत्वमिति। नैवम्, पुरुषानुकूलं सुखमित्यनर्थान्तरम्; तथा, पुरुषप्रतिकूलं दुःखपर्यायम्। अतः, सुखव्यतिरिक्तस्य कस्यापि पुरुषानुकूलत्वं न संभवति। ननु च दुःखनिवृत्तेरपि सुखव्यतिरिक्तायाः पुरुषानुकूलता दृष्टा? नैतत्; आत्मानुकूलं सुखम्, आत्मप्रतिकूलं दुःखमिति हि सुखदुःखयोर्विवेकः? तत्र आत्मानुकूलं सुखमिष्टं भवति; तत्प्रतिकूलं दुःखं चानिष्टम्। अतः दुःखसंयोगस्यासह्यतया तन्निवृत्तिरपि इष्टा भवति; तत एव इष्टतासाम्यादनुकूलताभ्रमः। तथा हि—प्रकृतिसंसृष्टस्य संसारिणः पुरुषस्य अनुकूलसंयोगः, प्रतिकूलसंयोगः स्वरूपेणावस्थितिरिति च तिस्रोऽवस्थाः, तत्र प्रतिकूलसंबन्धनिवृत्तिः, अनुकूलसंबन्धनिवृत्तिश्च स्वरूपेणावस्थितिरेव। तस्मात् प्रतिकूलसंयोगे वर्तमाने, तन्निवृत्तिरूपा स्वरूपेण अवस्थितिरपीष्टा भवति, तत्र इष्टतासाम्यादनुकूलताभ्रमः। अतस्सुखस्वरूपत्वादनुकूलतायाः, नियोगस्यानुकूलतां वदन्तं प्रामाणिकाः परिहसन्ति॥

इष्टस्यार्थविशेषस्य निर्वर्तकतयैव हि नियोगस्य नियोगत्वम् स्थिरत्वमपूर्वत्वं च प्रतीयते। *स्वर्गकामो यजेतेत्यत्र कार्यस्य क्रियातिरिक्तता, स्वर्गकामपदसमभिव्याहारेण स्वर्गसाधनत्वनिश्चयादेव भवति। न च वाच्यम्, यजेतेत्यत्र प्रथमं नियोगः स्वप्रधानतयैव प्रतीयते, स्वर्गकामपदसमभिव्याहारात् स्वसिद्धये स्वर्गसिद्ध्यनुकूलता च नियोगस्येति। यजेतेति हि धात्वर्थस्य पुरुषप्रयत्नसाध्यतैव प्रतीयते। स्वर्गकामपदसमभिव्याहारादेव धात्वर्थातिरेकिणो नियोगत्वं स्थिरत्वमपूर्वत्वं चेत्याद्यवगम्यते। तच्च स्वर्गसाधनत्वप्रतीतिनिबन्धनम्। समभिव्याहृतस्वर्गकामपदार्थान्वययोग्यं स्वर्गसाधनमेव कार्यं लिङादयोऽभिदधतीति हि लोकव्युत्पत्तिरपि तिरस्कृता॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एतदुक्तं भवति। समभिव्याहृतपदान्तरवाच्यान्वययोग्यमेवेतरपदप्रतिपाद्यमिति अन्विताभिधायिपदसंघातरूपवाक्यश्रवणसमनन्तरमेव प्रतीयते; तच्च स्वर्गसाधनरूपम्। अतः क्रियावदनन्यार्थताऽपि विरोधादेव परित्यक्तेति। अत एव, गङ्गायां घोष इत्यादौ घोषप्रतिवासयोग्यार्थोपस्थापनपरत्वं गङ्गापदस्याश्रीयते। प्रथमं गङ्गापदेन गङ्गार्थस्स्मृत इति, गङ्गापदार्थस्य पेयत्वं न वाक्यार्थान्वयी भवति। एवमत्रापि यजेतेत्येतावन्मात्रश्रवणे कार्यमनन्यार्थं स्मृतमिति वाक्यार्थान्वयसमये कार्यस्यानन्यार्थता नावतिष्ठते।

कार्याभिधायिपदश्रवणवेलायां प्रथमं कार्यमनन्यार्थं प्रतीतमित्येतदपि न संगच्छते; व्युत्पत्तिकाले गवानयनादिक्रियाया दुःखरूपायाः इष्टविशेषसाधनतयैव कार्यताप्रतीतेः। अतः नियोगस्य पुरुषानुकूलत्वं सर्वलोकविरुद्धम्। नियोगस्य सुखरूपपुरुषानुकूलतां वदतः स्वानुभवविरोधश्च। *कारीर्या वृष्टिकामो यजेतेत्यादिषु सिद्धेऽपि नियोगे वृष्ट्यादिसिद्धिनिमित्तस्य वृष्टिव्यतिरेकेण नियोगस्यानुकूलता नानुभूयते। यद्यपि, अस्मिन् जन्मनि वृष्ट्यादिसिद्धेरनियमः; तथाऽपि अनियमादेव नियोगसिद्धिरवश्याश्रयणीया। तस्मिन्ननुकूलतापर्यायसुखानुभूतिर्न विद्यते। एवमुक्तरीत्या कृतिसाध्येष्टत्वातिरेकि कृत्युद्देश्यत्वं न दृश्यते।

कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति चेत्; किमिदं शेषित्वम्, किं च शेषत्वमिति वक्तव्यम्। कार्यप्रतिसंबन्धी शेषः, तत्प्रतिसंबन्धित्वं शेषित्वमिति चेत्; एवं तर्हि कार्यत्वमेव शेषित्वमित्युक्तं भवति; कार्यत्वमेव हि विचार्यते? परोद्देशप्रवृत्तकृतिव्याप्त्यर्हत्वं शेषत्वमिति चेत्; कोऽयं परोद्देशो नामेति? अयमेव हि विचार्यते। उद्देश्यत्वं नाम ईप्सितसाध्यत्वमिति चेत्; किमीप्सितत्वम्? कृतिप्रयोजनत्वमिति चेत्; पुरुषस्य कृत्यारम्भप्रयोजनमेव हि कृतिप्रयोजनम्? स चेच्छाविषयः कृत्यधीनात्मलाभ इति पूर्वोक्त एव॥

अयमेव हि सर्वत्र शेषशेषिभावः—परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपम्, स शेषः, परश्शेषी। फलोत्पत्तीच्छया यागादेः, तत्प्रयत्नस्य च उपादेयत्वम्, यागादिसिद्धीच्छया अन्यत्सर्वमुपादेयम्। एवं, गर्भदासादीनामपि पुरुषविशेषातिशयाधानेच्छयोपादेयत्वमेव स्वरूपम्। एवम्, ईश्वरगतातिशयाधानेच्छयोपादेयत्वमेव चेतनाचेतनात्मकस्य नित्यस्यानित्यस्य च सर्वस्य वस्तुनः स्वरूपमिति सर्वमीश्वरशेषभूतम् सर्वस्य चेश्वरश्शेषीति *सर्वस्य वशी सर्वस्येशानः *पतिं विश्वस्य इत्याद्युक्तम्। *कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते इत्ययमर्थः श्रद्धानेष्वेव शोभते॥

अपि च *स्वर्गकामो यजेतेत्यादिषु लकारवाच्यकर्तृविशेषसमर्पणपराणां स्वर्गकामादिपदानां नियोज्यविशेषसमर्पणपरत्वं शब्दानुशासनविरुद्धं केनावगम्यते? साध्यस्वर्गविशिष्टस्य स्वर्गसाधने कर्तृत्वान्वयो न घटत इति चेत्; नियोज्यत्वान्वयोऽपि न घटत इति हि स्वर्गसाधनत्वनिश्चयः; स तु शास्त्रसिद्धे कर्तृत्वान्वये स्वर्गसाधनत्वनिश्चयः क्रियते।

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा भोक्तुकामो देवदत्तगृहं गच्छेदित्युक्त, भोजनकामस्य देवदत्तगृहगमने कर्तृत्वश्रवणादेव प्रागज्ञातमपि भोजनसाधनत्वं देवदत्तगृहगमनस्यावगम्यते; एवमत्रापि भवति। न क्रियान्तरं प्रति कर्तृतया श्रुतस्य क्रियान्तरे कर्तृत्वकल्पनं युक्तम्। यजेतेति हि यागकर्तृतया श्रुतस्य बुद्धौ कर्तृत्वकल्पनं क्रियते; बुद्धेः कर्तृत्वकल्पनमेव हि नियोज्यत्वम्; यथोक्तम् *नियोज्यस्स च कार्यं यस्स्वकीयत्वेन बुद्ध्यत इति। यष्टृत्वानुगुणं तद्बोद्धृत्वमिति चेत्; देवदत्तः पचेदिति पाककर्तृतया श्रुतस्य देवदत्तस्य, पाकार्थगमनं पाकानुगुणमिति गमने कर्तृत्वकल्पनं न युज्यते ॥

किञ्च लिङादिशब्दवाच्यं स्थायिरूपं किमित्यपूर्वमाश्रीयते ? स्वर्गकामपदसमभिव्याहारानुपपत्तेरिति चेत्, काऽत्रानुपपत्तिः ? सिषाधयिषितस्वर्गो हि स्वर्गकामः, तस्य स्वर्गकामस्य कालान्तरभाविस्वर्गसिद्धौ क्षणभङ्गिनी यागादिक्रिया न समर्था, इति चेत्; अनाघ्रातवेदसिद्धान्तानामियमनुपपत्तिः। सर्वैः कर्मभिराराधितः परमेश्वरो भगवान् नारायणः तत्तदिष्टं फलं ददातीति वेदविदो वदन्ति ॥ यथाऽऽहुः वेदविदग्रेसराः द्रमिडाचार्याः— *फलसंबिभन्त्सया कर्मभिरात्मानं पिप्रीषन्ति, स प्रीतोऽलं फलायेति शास्त्रमर्यादा, इति। फलसंबन्धेच्छया कर्मभिः यागदानहोमादिभिः इन्द्रादिदेवतामुखेन तत्तदन्तर्यामिरूपेणावस्थितम् इन्द्रादिशब्दवाच्यं परमात्मानं भगवन्तं वासुदेवमारिराधयिषन्ति। स हि कर्मभिराराधितः तेषामिष्टानि फलानि प्रयच्छतीत्यर्थः। तथा च श्रुतिः *इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः इति। इष्टापूर्तमिति सकलश्रुतिस्मृतिचोदितं कर्मोच्यते। तत्, विश्वं बिभर्ति— इन्द्राग्निवरुणादिसर्वदेवतासंबन्धितया प्रतीयमानम्, तत्तदन्तरात्मतया अवस्थितः परमपुरुषः स्वयमेव बिभर्ति— स्वयमेव स्वीकरोति; भुवनस्य नाभिः —ब्रह्मक्षत्रादिसर्ववर्णपूर्णस्य भुवनस्य धारकः, तैस्तैः कर्मभिराराधितः तत्तदिष्टफलप्रदानेन भुवनानां धारक इति नाभिरित्युक्तः ॥

अग्निवायुप्रभृतिदेवतान्तरात्मतया तत्तच्छब्दाभिधेयः अयमेवेत्याह— *तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः इति ॥ यथोक्तं भगवता—

*यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याऽऽराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान्॥

यां यां तनुम् —इन्द्रादिदेवताविशेषाः तत्तदन्तर्यामितया अवस्थितस्य भगवतः तनवः शरीराणीत्यर्थः। *अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च इत्यादि। प्रभुरेव चेति— सर्वफलानां प्रदाता चेत्यर्थः ॥ यथा च:— *यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत !
*यैस्स्वधर्मपरैर्नाथ ! नरैराराधितो भवान्। ते तरन्त्यखिलामेताम् मायामात्मविमुक्तये ॥ इति सेतिहासपुराणेषु सर्वेष्वेव वेदेषु सर्वाणि कर्माणि सर्वेश्वराराधनरूपाणि; तैस्तैः कर्मभिराराधितः

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरुषोत्तमः तत्तदिष्टफलं ददातीति तत्र तत्र प्रपञ्चितम् ।

एवमेव हि सर्वज्ञं सर्वशक्तिं सर्वेश्वरं भगवन्तमिन्द्रादिदेवतान्तर्यामिरूपेण यागदानहोमादिवेदोदितसर्वकर्मणां भोक्तारम् सर्वफलानां प्रदातारं च सर्वाश्श्रुतयो वदन्ति, *चतुर्होतारो यत्र संपदं गच्छन्ति देवैः, इत्याद्याः । चतुर्होतारः –यज्ञाः, यत्र–परमात्मनि देवेष्वन्तर्यामितयाऽवस्थिते, देवैः संपदं गच्छन्ति– देवैः संबन्धं गच्छन्तीत्यर्थः । अन्तर्यामिरूपेणावस्थितस्य परमात्मनश्शरीरतयाऽवस्थितानामिन्द्रादीनां यागादिसंबन्धः इत्युक्तं भवति । यथोक्तं भगवता– *भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्, इति । तस्मात्, अग्न्यादिदेवतान्तर्यामिभूतपरमपुरुषाराधनभूतानि सर्वाणि कर्माणि; स एव चाभिलषितप्रदायीति, किमत्रापूर्वेण व्युत्पत्तिपथदूरवर्तिना वाच्यतयाऽभ्युपगतेन, कल्पितेन वा प्रयोजनम् ?

एवं च सति लिङादेः कोऽयमर्थः परिगृहीतो भवति ? *यज देवपूजायामिति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति, न किञ्चिदनुपपन्नम् । कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापारसंबन्धप्रकारो हि वाच्यः ? भूतवर्तमानतादिमन्ये वदन्ति । लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्ति ।

अपि च कामिनः कर्तव्यतया कर्म विधाय, कर्मणो देवताराधनरूपताम् तद्द्वारेण फलसिद्धिं च तत्तत्कर्मविधिवाक्यान्येव वदन्ति *वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति, इत्यदीनि । नात्र फलसिद्ध्यनुपपत्तिः काऽपि दृश्यत इति, फलसाधनत्वावगतिः औपादानिकीत्यपि न सङ्गच्छते; विध्यपेक्षितं यागादेः फलसाधनत्वप्रकारं वाक्यशेष एव बोधयतीत्यर्थः । *तस्माद्ब्राह्मणाय नापगुरेतेत्यत्र अपगोरणनिषेधविधिपरवाक्यशेषे श्रूयमाणं, निषेध्यस्यापगोरणस्य शतयातनासाधनत्वं निषेधविध्युपयोगीति हि स्वीक्रियते ? अत्र पुनः कामिनः कर्तव्यतया विहितस्य यागादेः काम्यस्वर्गादिसाधनत्वप्रकारं वाक्यशेषावगतमनादृत्य किमित्युपादानेन यागादेः फलसाधनत्वं परिकल्प्यते ? “हिरण्यनिधिमपवरके निधाय, याचते कोद्रवादिलुब्धः कृपणं जनम्” इति श्रूयते, तदेतत् युष्मासु दृश्यते ॥

शतयातनासाधनत्वमपि नादृष्टद्वारेण; चोदितान्यनुतिष्ठतः, विहितं कर्माकुर्वतः, निन्दितानि च कुर्वतः सर्वाणि सुखानि, दुःखानि च परमपुरुषानुग्रहनिग्रहाभ्यामेव भवन्ति । *एष ह्येवानन्दयाति, *अथ सोऽभयं गतो भवति, *अथ तस्य भयं भवति,* भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चम इति, *एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि ! ददतो मनुष्याः प्रशंसन्ति, यजमानं देवाः, दर्वीं पितरोअन्वायत्ताः, इत्याद्यनेकविधाः श्रुतयस्सन्ति । यथोक्तं द्रमिडभाष्ये–*तस्याज्ञया धावति वायुर्नद्यस्स्रवन्ति तेन च कृतसीमानो जलाशया-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्समदा इव मेषत्रिसर्पितं कुर्वन्ति, इति, *तत्संकल्पनिबन्धना हीमे लोकाः न च्यवन्ते, न स्फुटन्ते; स्वशासनानुवर्तिनं ज्ञात्वा कारुण्यात् स भगवान् वर्धयेत विद्वान् कर्मदक्षः, इति च। परमपुरुषयाथात्म्यज्ञानपूर्वकं तदुपासनादिविहितकर्मानुष्ठायिनः, तत्प्रसादात् तत्प्राप्तिपर्यन्तानि सुखानि, अभयं च यथाधिकारं भवन्ति। तज्ज्ञानपूर्वकं तदुपासनादि विहितं कर्म अकुर्वतः, निन्दितानि च कुर्वतः तन्निग्रहादेव तदप्राप्तिपूर्वकापरिमितदुःखानि, भयं च भवन्ति। यथोक्तं भगवता—*नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः, इत्यदिना कृत्स्नं कर्म ज्ञानपूर्वकमनुष्ठेयं विधाय, *मयि सर्वाणि कर्माणि सन्यस्य, इति सर्वस्य कर्मणः स्वाराधनताम्, आत्मनां स्वनियाम्यतां च प्रतिपाद्य,

*ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥

इति स्वाज्ञानुवर्तिनः प्रशस्य, विपरीतान् विनिन्द्य, पुनरपि स्वाज्ञानुपालनमकुर्वतामासुरप्रकृत्यन्तर्भावमभिधाय, अधमा गतिश्चोक्ता—

*तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु॥

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिम्॥ इति।

*सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥

इति च स्वाज्ञानुवर्तिनां शाश्वतं पदं चोक्तम्॥ अश्रुतवेदान्तानां कर्माणि अश्रद्धा मा भूदिति देवताधिकरणेऽतिवादाः कृताः, कर्ममात्रे यथा श्रद्धा स्यादिति; सर्वमेकशास्त्रमिति वेदवित्सिद्धान्तः॥

तस्यैतस्य परस्य ब्रह्मणो नारायणस्य अपरिच्छेद्यज्ञानानन्दामलत्वस्वरूपवत्, ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृत्यनवधिकातिशयासंख्येयकल्याणगुणवत्, स्वसंकल्पप्रवर्त्यस्वेतरसमस्तचिदचिद्वस्तुजातवत्, स्वाभिमतस्वानुरूपैकरूपदिव्यरूप– तदुचितनिरतिशयकल्याणविविधानन्तभूषण–स्वशक्तिसदृशापरिमितानन्ताश्चर्यनानाविधायुध–स्वाभिमतस्वानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकमहिममहिषी–स्वानुरूपकल्याणज्ञानक्रियाद्यपरिमेयगुणानन्तपरिजनपरिच्छद–स्वोचितनिखिलभोग्यभोगोपकरणाद्यनन्तमहाविभवावाङ्मनसगोचरस्वरूपस्वभावदिव्यस्थानादिनित्यतानिरवद्यतागोचराश्च सहस्रशः श्रुतयस्सन्ति। *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्, *य एषोऽन्तरादित्ये हिरण्मयः पुरुषः...तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, *स य एषोऽन्तर्हृदय आकाशः, तस्मिन्नयं पुरुषो मनोमयः, अमृतो हिरण्मयः। मनोमय इति मनसैव विशुद्धेन गृह्यत इत्यर्थः। *सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि–विद्युद्वर्णात् पुरुषादित्यर्थः। *नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा–

Digitization by Arya Samaj Charitable Foundation, Chennai

मध्यस्थनीलतोयदा विद्युल्लेखेव; सेयं दहरपुण्डरीकमध्यस्थाकाशवर्तिनी वह्निशिखा, स्वान्तर्निहितनीलतोयदाभपरमात्मस्वरूपा स्वान्तर्निहितनीलतोयदा विद्युदिव आभाती त्यर्थः। *मनोमयः प्राणशरीरो भारूपस्सत्यकामस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः, *माहारजतं वासः, इत्याद्याः। *अस्येशाना जगतो विष्णुपत्नी, *ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, *तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, *क्षयन्तमस्य रजसः पराके, *यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्, *यो वेद निहितं गुहायां परमे व्योमन्, *यो अस्याध्यक्षः परमे व्योमन्, *तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्, इत्यादिश्रुतिशतनिश्चितोऽयमर्थः ॥

*तद्विष्णोः परमं पदमिति विष्णोः—परस्य ब्रह्मणः परमं पदं सूरयः सदा पश्यन्ति इति वचनात्, सर्वकालदर्शनवन्तः परिपूर्णज्ञानाः केचन सन्तीति विज्ञायते। ये सूरयः, ते सदा पश्यन्तीति वचनव्यक्तिः; ये सदा पश्यन्ति, ते सूरय इति वा। उभयपक्षेऽप्यनेक-विधानं न संभवतीति चेन्न; अप्राप्तत्वात्सर्वस्य सर्वविशिष्टं परमं स्थानं विधीयते। यथोक्तम् *तद्गुणास्तु विधीयेरन्न विभागाद्विधानार्थे न चेदन्येन शिष्टाः, इति। यथा *यदाग्नेयोऽ-ष्टाकपालः, इत्यादिकर्मविधौ कर्मणो गुणानां चाप्राप्तत्वेन सर्वगुणविशिष्टं कर्म विधीयते, तथाऽत्रापि सूरिभिस्सदा दृश्यत्वेन विष्णोः परं स्थानमप्राप्तं प्रतिपादयतीति न कश्चिद्विरोधः। करणमन्त्राः क्रियमाणानुवादिनः स्तोत्रशस्त्ररूपाः जपादिषु विनियुक्ताश्च प्रकरणपठिताश्चा-प्रकरणपठिताश्च स्वार्थं सर्वं यथावस्थितमेवाप्राप्तमविरुद्धं ब्राह्मणवत् बोधयन्तीति हि वैदिकाः। (प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्; अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्।) विनियुक्तार्थप्रकाशिनां च देवतादिषु अप्राप्ताविरुद्धगुणविशेषप्रतिपादनं विनियोगा-नुगुणमेव। नेयं श्रुतिर्मुक्तजनविषया, तेषां सदादर्शनानुपपत्तेः; नापि मुक्तप्रवाहविषया, *सदा पश्यन्तीत्येकैककर्तृविषयतया प्रतीतेः श्रुतिभङ्गप्रसङ्गात्। मन्त्रार्थवादगता ह्यर्थाः कार्यपरत्वेऽपि सिद्ध्यन्तीत्युक्तम्; किं पुनः सिद्धवस्तुन्येव तात्पर्ये व्युत्पत्तिसिद्ध इति सर्वमुपपन्नम् ॥

ननु चात्र *तद्विष्णोः परमं पदमिति परस्वरूपमेव परमपदशब्देनाभिधीयते, *समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्, इत्यादिषु अव्यतिरेकदर्शनात्। नैवम्; *क्षयन्तमस्य रजसः पराके, *तदक्षरे परमे व्योमन्, *यो अस्याध्यक्षः परमे व्योमन्, *यो वेद निहितं गुहायां परमे व्योमन् इत्यादिषु परस्थानस्यैव दर्शनात्, *विष्णोः परमं पदमिति व्यतिरेक-निर्देशाच्च। *विष्ण्वाख्यं परमं पदमिति विशेषणात् अन्यदपि परमं पदं विद्यत इति तेनैव ज्ञायते। तदिदं परं स्थानं सूरिभिस्सदा दृश्यत्वेन प्रतिपाद्यते ॥

एतदुक्तं भवति— क्वचित् परस्थानं परमपदशब्देन प्रतिपाद्यते; क्वचित् प्रकृति-वियुक्तात्मस्वरूपम्; क्वचित् भगवत्स्वरूपम्। *तद्विष्णोः परमं पदमिति परस्थानम्;

Digitization by Arya Samaj Charitable Foundation, Chennai

*सर्गस्थित्यन्तकालेषु त्रिधैवं संप्रवर्तते । गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ॥ इत्यत्र प्रकृतिवियुक्तात्मस्वरूपम्; *समस्तहेयरहितं विष्ण्वाख्यं परमं पदमित्यत्र भगवत्स्वरूपम् । त्रीण्यप्येतानि प्ररमप्राप्यत्वेन परमपदशब्देन प्रतिपाद्यन्ते ।

कथं त्रयाणां परमप्राप्यत्वमिति चेत्, भगवत्स्वरूपं परमप्राप्यत्वादेव परमं पदम्; इतरयोरपि भगवत्प्राप्तिगर्भत्वादेव परमपदत्वम् । सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिः भगवत्प्राप्तिगर्भा *त इमे सत्याः कामा अनृतापिधानाः, इति भगवतो गुणगणस्य तिरोधायकत्वेन अनृतशब्देन स्वकर्मणः प्रतिपादनात् । अनृतरूपतिरोधानं क्षेत्रज्ञकर्मेति कथमवगम्यत इति चेत्;

*अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा ॥
संसारतापानखिलानवाप्नोत्यतिसन्ततान् । तया तिरोहितत्वाच्च...... ॥

इत्यादिवचनात् । परस्थानप्राप्तिरपि भगवत्प्राप्तिगर्भैवेति सुव्यक्तम् । *क्षयन्तमस्य रजसः पराके, इति रजश्शब्देन त्रिगुणात्मिका प्रकृतिरुच्यते, केवलस्य रजसोऽनवस्थानात्; इमां त्रिगुणात्मिकां प्रकृतिमतिक्रम्य स्थिते स्थाने, क्षयन्तं–वसन्तमित्यर्थः । अनेन, त्रिगुणात्मकात् क्षेत्रज्ञस्य भोग्यभूताद्वस्तुन परस्तात् विष्णोर्वासस्थानमिति गम्यते । *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्, इत्यत्रापि तमश्शब्देन सैव प्रकृतिरुच्यते; केवलस्य तमसः अनवस्थानादेव; *रजसः पराके क्षयन्तमित्यनेनैकवाक्यत्वात्, तमसः परस्तात् वसन्तं महान्तमादित्यवर्णं पुरुषमहं वेदेत्ययमर्थोऽवगम्यते । *सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायां परमे व्योमन्, *तदक्षरे परमे व्योमन्, इति तत् स्थानमविकाररूपं परमव्योमशब्दाभिधेयमिति च गम्यते । *अक्षरे परमे व्योमन्निति अस्य स्थानस्याक्षरत्वश्रवणात्, क्षररूपादित्यमण्डलादयः न परमव्योमशब्दाभिधेयाः । *यत्र पूर्वे साध्यास्सन्ति देवाः, *यत्रर्षयः प्रथमजा ये पुराणाः, इत्यादिषु च त एव सूरय इत्यवगम्यते । *तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते, विष्णोर्यत्परमं पदम्, इत्यत्रापि, विप्रासः –मेधाविनः, विपन्यवः – स्तुतिशीलाः, जागृवांसः – अस्खलितज्ञानाः; त एवास्खलितज्ञानाः, तत् विष्णोः परमं पदं सदा स्तुवन्तस्समिन्धते–इत्यर्थः ॥

एतेषां परिजनस्थानादीनाम्, *सदेव सोम्येदमग्र आसीत्, इत्यत्र ज्ञानबलैश्वर्यादिकल्याणगुणगणवत् परब्रह्मस्वरूपान्तर्भूतत्वात्, सदेव, एकमेव, अद्वितीयम्, इति ब्रह्मान्तर्भावोऽवगम्यते । एषामपि कल्याणगुणैकदेशत्वादेव *सदेव सोम्येदमग्र आसीदित्यत्र, इदमिति शब्दस्य कर्मवश्यभोक्तृवर्गमिश्रतद्भोग्यभूतप्रपञ्चविषयत्वाच्च, *सदा पश्यन्ति सूरय इति सदादर्शित्वेन च तेषां कर्मवश्यानन्तर्भावात्; *अपहतपाप्मा, इत्यादि *अपिपासः, इत्यन्तेन स्वलीलोपकरणभूतत्रिगुणात्मकप्रकृतिप्राकृततत्संसृष्टपुरुषगतं हेयस्वभावं सर्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिषिध्य, *सत्यकाम इत्यनेन स्वभोग्यभोगोपकरणजातस्य सर्वस्य नित्यता प्रतिपादिता। सत्याः कामाः यस्यासौ—सत्यकामः। काम्यन्त इति— कामाः, तेन परेण ब्रह्मणा स्वभोग्य-तदुपकरणादयः स्वाभिमताः ये काम्यन्ते, ते सत्याः—नित्या इत्यर्थः। अन्यस्य लीलोप-करणस्यापि वस्तुनः प्रमाणसंबन्धयोग्यत्वे सत्यपि विकारास्पदत्वेनास्थिरत्वात्, तद्विपरीतं स्थिरत्वमेषां सत्यपदेनोच्यते; सत्यसंकल्प इति, एतेषु भोग्यतदुपकरणादिषु नित्येषु निरति-शयेष्वनन्तेषु सत्स्वपि, अपूर्वाणामपरिमितानामर्थानामपि संकल्पमात्रेण सिद्धिं वदति। एषां च भोगोपकरणानां लीलोपकरणानां चेतनानामचेतनानां स्थिराणामस्थिराणां च, तत्संकल्पायत्तस्वरूपस्थितिप्रवृत्तिभेदादि सर्वं वदति *सत्यसंकल्प इति॥

इतिहासपुराणयोः वेदोपबृंहणयोश्चायमर्थ उच्यते—

*तौ तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ। वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥

इति वेदोपबृंहणतया प्रारब्धे श्रीरामायणे—

*व्यक्तमेष महायोगी परमात्मा सनातनः। अनादिमध्यनिधनः महतः परमो महान्॥
तमसः परमो धाता शङ्खचक्रगदाधरः। श्रीवत्सवक्षा नित्यश्रीरजय्यश्शाश्वतो ध्रुवः॥
*शरा नानाविधाश्चापि धनुरायतविग्रहम्। अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः।
*विवेश वैष्णवं धाम सशरीरः सहानुगः।

श्रीमद्वैष्णवे पुराणे—

*समस्ताः शक्तयश्चैताः नृप! यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥
*मूर्तं ब्रह्म महाभाग! सर्वब्रह्ममयो हरिः।
*नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी। यथा सर्वगतो विष्णुः तथैवेयं द्विजोत्तम!॥
*देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी। विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्॥
*एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां तत् परमं स्थानं यद्वै पश्यन्ति सूरयः॥
*कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः।

महाभारते च— *दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यम्।
गच्छ प्रभो! रक्ष चास्मान् प्रपन्नान् कल्पेकल्पे जायमानस्स्वमूर्त्या॥
*कालस्संपच्यते तत्र न कालस्तत्र वै प्रभुः। इति॥

परस्य ब्रह्मणो रूपवत्त्वं सूत्रकारश्च वदति *अन्तस्तद्धर्मोपदेशात् इति। योऽसावादित्यमण्डलान्तर्वर्ती तप्तकार्तस्वरगिरिवरप्रभः सहस्रांशुशतसहस्रकिरणः गम्भी-राम्भस्समुद्भूतसुमृष्टनालरविकरविकासितपुण्डरीकदलामलायतेक्षणः सुभ्रूललाटः सुनासः सुस्मिताधरविद्रुमः सुरुचिरकोमलगण्डः कम्बुग्रीवः समुन्नतांसविलम्बिचारुरूपदिव्यकर्ण-किसलयः पीनवृत्तायतभुजः चारुतराताम्रकरतलानुरक्ताङ्गुलीभिरलङ्कृतः तनुमध्यः विशाल-

Digitization by Arya Samaj Charitable Foundation, Chennai

वक्षस्स्थलः, समविभक्तसर्वाङ्गः, अनिर्देश्यदिव्यरूपसंहननः, स्निग्धवर्णः प्रबुद्धपुण्डरीकचारुचरणयुगलः, स्वानुरूपपीताम्बरधरः,अमलकिरीटकुण्डलहारकौस्तुभकेयूरकटकनूपुरोदरबन्धनाद्यपरिमिताश्चर्यानन्तदिव्यभूषणः, शङ्खचक्रगदासिशार्ङ्गश्रीवत्सवनमालालङ्कृतः, अनवधिकातिशयसौन्दर्याहृताशेषमनोदृष्टिवृत्तिः, लावण्यामृतपूरिताशेषचराचरभूतजातः, अत्यद्भुताचिन्त्यनित्ययौवनः, पुष्पहाससुकुमारः, पुण्यगन्धवासितानन्तादिगन्तरालः, त्रैलोक्याक्रमणप्रवृत्तगम्भीरभावः करुणानुरागमधुरलोचनावलोकिताश्रितवर्गः पुरुषवरो दृश्यते; स च, निखिलजगदुदयविभवलयलीलः, निरस्तसमस्तहेयः, समस्तकल्याणगुणनिधिः, स्वेतरसमस्तवस्तुविलक्षणः, परमात्मा, परं ब्रह्म, नारायणः इत्यवगम्यते; *तद्धर्मोपदेशात् – *स एष सर्वेषां लोकानामीशस्सर्वेषां कामानाम्, *स एष सर्वेभ्यः पाप्मभ्य उदितः, इत्यादिदर्शनात् ॥ तस्यैते गुणाः *सर्वस्य वशी सर्वस्येशानः, *अपहतपाप्मा विजरः, इत्यादि *सत्यसंकल्पः इत्यन्तम्, *विश्वतः परमं नित्यं विश्वं नारायणं हरिम्, * पतिं विश्वस्यात्मेश्वरम्, इत्यादिवाक्यप्रतिपादिताः ॥

वाक्यकारश्चैतत् सुस्पष्टमाह—*हिरण्मयः पुरुषो दृश्यते, इति प्राज्ञस्सर्वान्तरस्स्यात्—लोककामेशोपदेशात्—तथोदयात्पाप्मनाम्, इत्यादिना॥ तस्य च रूपस्यानित्यतादि वाक्यकारेणैव प्रतिषिद्धम्; *स्याद्रूपं कृतकमनुग्रहार्थं तच्चेतसामैश्वर्यात्, इति, उपासितुः अनुग्रहार्थः परमपुरुषस्य रूपसंग्रह इति पूर्वपक्षं कृत्वा, *रूपं वाऽतीन्द्रियमन्तःकरणप्रत्यक्षनिर्देशात् इति। यथा ज्ञानादयः परस्य ब्रह्मणः स्वरूपतया निर्देशात् स्वरूपभूता गुणाः, तथेदमपि रूपं श्रुत्या स्वरूपतया निर्देशात् स्वरूपभूतमित्यर्थः ॥

भाष्यकारेणैतद्व्याख्यातम्—*अञ्जसैव विश्वसृजो रूपम्, तत्तु न चक्षुषा ग्राह्यम्, मनसा त्वकलुषेण साधनान्तरवता गृह्यते, *न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेन, इति श्रुतेः; न ह्यरूपाया देवताया रूपमुपदिश्यते; यथाभूतवादि हि शास्त्रम्; *माहारजतं वासः, *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात् इति प्रकरणान्तरनिर्देशाच्च साक्षिणः इत्यादिना। हिरण्मय इति रूपसामान्यात् चन्द्रमुखवत्, न मयडत्र विकारमादाय प्रयुज्यते अनारभ्यत्वादात्मनः इति ॥

यथा ज्ञानादिकल्याणगुणानन्त्यनिर्देशात् अपरिमितकल्याणगुणविशिष्टं परं ब्रह्मेत्यवगम्यते, एवम् *आदित्यवर्णम्, *पुरुषम् इत्यादिनिर्देशात्, स्वाभिमतस्वानुरूपकल्याणतमरूपः परब्रह्मभूतः पुरुषोत्तमो नारायण इति ज्ञायते। तथा *अस्येशाना, *ह्रीश्च ते लक्ष्मीश्च पत्न्यौ *सदा पश्यन्ति सूरयः, *तमसः परस्तात्, *क्षयन्तमस्य रजसः पराके, इत्यादिना पत्नीपरिजनस्थानादीनां निर्देशादेव तथैव सन्तीत्यवगम्यते। यथाऽऽह भाष्यकारः—*यथाभूतवादि हि शास्त्रम् इति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एतदुक्तं भवति—यथा *सत्यं ज्ञानमनन्तं ब्रह्मेति निर्देशात् परमात्मस्वरूपं समस्तहेयप्रत्यनीकानवधिकानन्दैकतानतया अपरिच्छेद्यतया च सकलेतरविलक्षणम्; तथा *यस्सर्वज्ञः सर्ववित् *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इत्यादिनिर्देशात् निरतिशयासंख्येयाश्च गुणाः सकलेतरविलक्षणाः; तथा *आदित्यवर्णमित्यादिनिर्देशात् रूपपरिजनस्थानादयश्च सकलेतरविलक्षणाः स्वासाधारणा अनिर्देश्यस्वरूपस्वभावा इति ॥

वेदाः प्रमाणं चेत्, विध्यर्थवादमन्त्रगतं सर्वम् अपूर्वमविरुद्धमर्थजातं यथावस्थितमेव बोधयन्ति। प्रामाण्यं च वेदानाम् *औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः *इत्युक्तम्। यथा अग्निजलादीनामौष्ण्यादिशक्तियोगस्स्वाभाविकः, यथा च चक्षुरादीनामिन्द्रियाणां बुद्धिविशेषजननशक्तिस्स्वाभाविकी; तथा शब्दस्यापि बोधकत्वशक्तिः स्वाभाविकी॥ न च हस्तचेष्टादिवत् सङ्केतमूलं शब्दस्य बोधकत्वमिति वक्तुं शक्यम्; अनाद्यनुसन्धानाविच्छेदेऽपि सङ्केतयितृपुरुषाज्ञानात्; यानि सङ्केतमूलानि, तानि सर्वाणि साक्षाद्वा परंपरया वा ज्ञायन्ते॥ न च देवदत्तादिशब्दवत् कल्पयितुं युक्तम्; तेषु च साक्षाद्वा परंपरया वा संकेतो ज्ञायते, गवादिशब्दानां तु अनाद्यनुसन्धानाविच्छेदेऽपि सङ्केताज्ञानादेव बोधकत्वशक्तिः स्वाभाविकी। अतः अग्न्यादीनामौष्ण्यादिशक्तिवत्, इन्द्रियाणां बोधकत्वशक्तिवच्च शब्दस्यापि बोधकत्वशक्तिराश्रयणीया॥

ननु च इन्द्रियवत् शब्दस्यापि बोधकत्वं स्वाभाविकम् (चेत्); संबन्धग्रहणं बोधकत्वाय किमित्यपेक्षते? लिङ्गवत् इत्युच्यते, यथा ज्ञातसंबन्धनियमं धूमादि अग्न्यादिविज्ञानजनकम्, तथा ज्ञातसंबन्धनियमश्शब्दोऽप्यर्थविशेषबुद्धिजनकः। एवं तर्हि शब्दोऽप्यर्थविशेषस्य लिङ्गमिति अनुमानमेव स्यात्। नैवम्—शब्दार्थयोस्संबन्धः बोध्यबोधकभाव एव; धूमादीनां तु संबन्धान्तरमिति, तस्य संबन्धस्य ज्ञानद्वारेण बुद्धिजनकत्वमिति विशेषः॥ एवं गृहीतसंबन्धस्य बोधकत्वदर्शनात् अनाद्यनुसन्धानाविच्छेदेऽपि सङ्केताज्ञानात् बोधकत्वशक्तिरेवेति निश्चीयते॥

एवं बोधकानां पदसंघातानां संसर्गविशेषबोधकत्वेन वाक्यशब्दाभिधेयानाम् उच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः, ते पौरुषेयाश्शब्दा इत्युच्यन्ते; यत्र तूच्चारणक्रमः पूर्वपूर्वोच्चारणक्रमजनितसंस्कारपूर्वकः, सर्वदा अपौरुषेयाः, ते च वेदाः इत्युच्यन्ते॥ एतदेव वेदानामपौरुषेयत्वं नित्यत्वं च, यत् पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वम्॥

ते च, आनुपूर्वीविशेषेण संस्थिताः अक्षरराशयो वेदाः ऋग्यजुस्सामाथर्वभेदभिन्नाः अनन्तशाखा वर्तन्ते; ते च विध्यर्थवादमन्त्ररूपा वेदाः, परब्रह्मभूतनारायणस्वरूपं, तदाराधनप्रकारम्, आराधितात् फलविशेषं च बोधयन्ति॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परमपुरुषवत्, तत्स्वरूपतदाराधनतत्फलज्ञापकवेदाख्यं शब्दजातं नित्यमेव ॥ वेदानामनन्तत्वात्, दुरवगाहत्वाच्च परमपुरुषनियुक्ताः परमर्षयः कल्पे कल्पे निखिलजगदुपकारार्थं वेदार्थं स्मृत्वा, विध्यर्थवादमन्त्रमूलानि धर्मशास्त्राणि इतिहासपुराणानि च चक्रुः ॥ लौकिकाश्च शब्दाः वेदराशेरुद्धृत्यैव तत्तदर्थविशेषनामतया पूर्ववत् प्रयुक्ताः पारंपर्येण च प्रयुज्यन्ते ॥ ननु च वैदिका एव सर्वे वाचकाश्शब्दाश्चेत्, छन्दस्येवम् भाषायामेवमिति लक्षणभेदः कथमुपपद्यते ? उच्यते—तेषामेव शब्दानां तस्यामेवानुपूर्व्यां वर्तमानानां तथैव प्रयोगः; अन्यत्र प्रयुज्यमानानामन्यथेतीति न कश्चिद्दोषः ॥

एवम् इतिहासपुराणधर्मशास्त्रोपबृंहितसाङ्गवेदवेद्यः परब्रह्मभूतो नारायणः निखिलहेयप्रत्यनीकः सकलेतरविलक्षणः अपरिच्छिन्नज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणाकरः, स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदचिदचिद्वस्तुजातः, अपरिच्छेद्यस्वरूपस्वभावानन्तमहाविभूतिः, नानाविधानन्तचेतनाचेतनात्मकप्रपञ्चलीलोपकरणः—इति प्रतिपादितम् ॥ *सर्वं खल्विदं ब्रह्म, *ऐतदात्म्यमिदं सर्वं...तत्त्वमसि श्वेतकेतो *एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम्। इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् *ज्योतींषि शुक्राणि च यानि लोके त्रयो लोका लोकपालास्त्रयी च। त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा देवकीपुत्र एव ॥ *त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परन्तपः* *ऋतधामा वसुः पूर्वः वसूनां त्वं प्रजापतिः *जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्। अग्निः कोपः प्रसादस्ते सोमश्श्रीवत्सलक्षणः ॥ *ज्योतींषि विष्णुर्भुवनानि विष्णुः वनानि विष्णुर्गिरयो दिशश्च। नद्यः समुद्राश्च स एव सर्वम् यदस्ति यन्नास्ति च विप्रवर्य ! ॥ इत्यादिसामानाधिकरण्यप्रयोगेषु सर्वैश्शब्दैः सर्वशरीरितया सर्वप्रकारं ब्रह्मैवाभिधीयत इति चोक्तम् ॥

सत्यसङ्कल्पं परं ब्रह्म स्वयमेव बहुप्रकारं स्यामिति सङ्कल्प्य, अचित्समष्टिरूपमहाभूतसूक्ष्मं वस्तु भोक्तृवर्गसमूहं च स्वस्मिन् प्रलीनं स्वयमेव विभज्य, तस्मात् भूतसूक्ष्मात् वस्तुनः महाभूतानि सृष्ट्वा, तेषु च भोक्तृवर्गमात्मतया प्रवेश्य, तैः चिदधिष्ठितैर्महाभूतैरन्योन्यसंसृष्टैः कृत्स्नं जगत् विधाय, स्वयमपि सर्वस्यात्मतया प्रविश्य, परमात्मत्वेनावस्थितं सर्वशरीरं बहुप्रकारमवतिष्ठते ॥ यदिदं महाभूतसूक्ष्मं वस्तु, तदेव प्रकृतिशब्देनाभिधीयते। भोक्तृवर्गसमूह एव पुरुषशब्देनोच्यते। तौ च प्रकृतिपुरुषौ परमात्मशरीरतया परमात्मप्रकारभूतौ; तत्प्रकारः परमात्मैव, प्रकृतिपुरुषशब्दाभिधेयः। *सोऽकामयत, बहु स्यां प्रजायेयेति...तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, निरुक्तं चानिरुक्तं च, निलयनं चानिलयनं च, विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवत् *इति पूर्वोक्तं सर्वमनयैव श्रुत्या व्यक्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मप्राप्त्युपायश्च शास्त्राधिगततत्त्वज्ञानपूर्वकस्वकर्मानुगृहीतभक्तिनिष्ठासाध्यानवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपपरभक्तिरेवेत्युक्तम्। भक्तिशब्दश्च प्रीतिविशेषे वर्तते। प्रीतिश्च ज्ञानविशेष एव॥ ननु च सुखं प्रीतिरित्यनर्थान्तरम्; सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरमिति लौकिकाः। नैवम्; येन ज्ञानविशेषेण तत् साध्यमित्युच्यते, स एव ज्ञानविशेषस्सुखम्॥ एतदुक्तं भवति—विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि। तानि च विषयाधीनविशेषाणि तथा भवन्ति। येन च विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्याभिमतम्, तद्विषयज्ञानमेव सुखम्; तदतिरेकि पदार्थान्तरं नोपलभ्यते; तेनैव सुखित्वव्यवहारोपपत्तेश्च।

एवंविधसुखरूपज्ञानस्य विशेषकत्वम् ब्रह्मव्यतिरिक्तस्य वस्तुनः सातिशयमस्थिरं च; ब्रह्मणस्तु अनवधिकातिशयं स्थिरं चेति *आनन्दो ब्रह्म इत्युच्यते। विषयायत्तत्वात् ज्ञानस्य, सुखरूपतया ब्रह्मैव सुखम्। तदिदमाह— *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति इति। ब्रह्मैव सुखमिति ब्रह्म लब्ध्वा सुखी भवतीत्यर्थः। परमपुरुषः स्वेनैव स्वयमनवधिकातिशयसुखस्सन् परस्यापि सुखं भवति, सुखरूपत्वाविशेषात्; ब्रह्म यस्य ज्ञानविषयो भवति स सुखी भवतीत्यर्थः।

तदेवं, परस्य ब्रह्मणः अनवधिकातिशयासंख्येयकल्याणगुणाकरस्य निरवद्यस्य अनन्तमहाविभूतेः अनवधिकातिशयसौशील्यवात्सल्यसौन्दर्यजलधेः सर्वशेषित्वात्, आत्मनश्शेषत्वात्, प्रतिसंबन्धितयाऽनुसन्धीयमानम् अनवधिकातिशयप्रीतिविषयं सत् परं ब्रह्मैव एनमात्मानं प्रापयतीति॥

ननु च अत्यन्तशेषतैवात्मनोऽनवधिकातिशयं सुखमित्युक्तं भवति; तदेतत् सर्वलोकविरुद्धम्। तथा हि— सर्वेषामेव चेतनानां स्वातन्त्र्यमेवेष्टतमं दृश्यते, पारतन्त्र्यं दुःखतरम्; स्मृतिश्च— *सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् *तथा च *सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् * इति। तदिदमनधिगतदेहातिरिक्तात्मस्वरूपाणां शरीरात्माभिमानविजृम्भितम्; तथा हि—शरीरं हि मनुष्यत्वादिजातिगुणाश्रयपिण्डभूतं स्वतन्त्रं प्रतीयते; तस्मिन्नेव अहमिति संसारिणां प्रतीतिः। आत्माभिमानो यादृशः तदनुगुणैव पुरुषार्थप्रतीतिः। सिंहव्याघ्रवराहमनुष्ययक्षरक्षःपिशाचदेवदानवस्त्रीपुंसव्यवस्थितात्माभिमानानां सुखानि व्यवस्थितानि; तानि च परस्परविरुद्धानि। तस्मात्, आत्माभिमानानुगुणपुरुषार्थव्यवस्थया सर्वं समाहितम्॥

आत्मस्वरूपं तु देवादिदेहविलक्षणं ज्ञानैकाकारम्; तच्च परशेषतैकस्वरूपम्। यथावस्थितात्माभिमाने तदनुगुणैव पुरुषार्थप्रतीतिः। *आत्मा ज्ञानमयोऽमलः इति स्मृतेः ज्ञानैकाकारता प्रतिपन्ना। *पतिं विश्वस्य इत्यादिश्रुतिगणैः परमात्मशेषतैकाकारता च प्रति-

Digitization by Arya Samaj Charitable Foundation, Chennai

पादिता। अतः सिंहव्याघ्रादिशरीरात्माभिमानवत् स्वतन्त्राभिमानोऽपि कर्मकृतविपरीतात्मज्ञानरूपो वेदितव्यः। अतः कर्मकृतमेव परमपुरुषव्यतिरिक्तविषयाणां सुखत्वम्; अत एव तेषामल्पत्वमस्थिरत्वं च। परमपुरुषस्यैव स्वत एव सुखत्वम्। अतः तदेव स्थिरमनवधिकातिशयं च; *कं ब्रह्म खं ब्रह्म *आनन्दो ब्रह्म *सत्यं ज्ञानमनन्तं ब्रह्म इति श्रुतेः॥

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य वस्तुनः स्वरूपेण सुखत्वाभावः, कर्मकृतत्वेन चास्थिरत्वं भगवता पराशरेणोक्तम्– *नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम!। वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च। कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं कुतः॥ सुखदुःखाद्येकान्तरूपेण वस्तुनो वस्तुत्वं कुतः? तदेकान्तता पुण्यपापकृतेत्यर्थः। एवम् अनेकपुरुषापेक्षया कस्यचित् सुखमेव कस्यचित् दुःखं भवतीत्यनवस्थां प्रतिपाद्य, एकस्मिन्नपि पुरुषे न व्यवस्थितमित्याह– *तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते। तस्माद्दुःखात्मकं नास्ति न च किञ्चित्सुखात्मकम्॥ इति। सुखदुःखात्मकत्वं सर्वस्य वस्तुनः कर्मकृतम्, न वस्तुस्वरूपकृतम्; अतः कर्मावसाने तदपैतीत्यर्थः॥

यत्तु सर्वं परवशं दुःखमित्युक्तम्; तत् परमपुरुषव्यतिरिक्तानां परस्परशेषशेषिभावाभावात्, तद्व्यतिरिक्तं प्रति शेषता दुःखमेवेत्युक्तम्। *सेवा श्ववृत्तिराख्यातेत्यत्रापि असेव्यसेवा श्ववृत्तिरेवेत्युक्तम्। *स ह्याश्रमैस्सदोपास्यः समस्तैरेक एव तु, इति सर्वैरात्मयाथात्म्यविद्भिस्सेव्यः पुरुषोत्तम एक एव। यथोक्तं भगवता–
*मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥इति।

इयमेव भक्तिरूपा सेवा *ब्रह्मविदाप्नोति परम्, *तमेवं विद्वानमृत इह भवति, *ब्रह्म वेद ब्रह्मैव भवति, इत्यादिषु वेदनशब्देनाभिधीयत इत्युक्तम्। *यमेवैष वृणुते तेन लभ्यः इति विशेषणात्, यमेवैष वृणुत इति भगवता वरणीयत्वं प्रतीयते; वरणीयश्च प्रियतमः; यस्य भगवति अनवधिकातिशया प्रीतिर्जायते, स एव भगवतः प्रियतमः। तदुक्तं भगवतैव– *प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः* इति।

तस्मात्, परभक्तिरूपापन्नमेव वेदनं तत्त्वतो भगवत्प्राप्तिसाधनम्॥ यथोक्तं भगवता द्वैपायनेन मोक्षधर्मे सर्वोपनिषद्व्याख्यानरूपम्–

*न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।
भक्त्या च धृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह॥ इति।

धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं पश्यति–साक्षात्करोति, प्राप्नोतीत्यर्थः; *भक्त्या त्वनन्यया शक्यः इत्यनेनैकार्थ्यात्। भक्तिश्च ज्ञानविशेष एवेति सर्वमुपपन्नम्॥

सारासारविवेकज्ञाः गरीयांसो विमत्सराः॥
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः॥

इति श्रीभगवद्रामानुजविरचितः वेदार्थसंग्रहस्समाप्तः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

वेदार्थसंग्रहोपात्तप्रमाणवचानानामकारादि क्रमसूचिका ।

संख्या, पृष्ठसंख्या

अइतिब्रह्म	२७
अकारो वै सर्वा वाक्	२७
अक्षराणामकारोऽस्मि	२७
अग्ने शिवस्य माहात्म्यम्	२४
अजामेकां लोहितशुक्ल	१७
अजायमानो बहुधा	३१
अञ्जसैव विश्वसृजो	४१
अणोरणीयान्	२७
अथ तस्य भयं भवति	३६
अथ नामधेयम्	९
अथ य इहात्मानम्	२८
अथ यदिदमस्मिन्	२७
अथसोऽभयं गतो	३६
अथात आदेशो नेतिनेति	९
अद्वयस्संभूतः	२६
अधिकारोऽनुपायत्वात्	१३
अनेनजीवेनात्मना	४,५,१५
अनेनसर्वगतत्वम्	३१
अन्तःप्रविष्टःशास्ता	४,१५,२१
अन्तरस्तद्धर्मोपदेशात्	४०
अपएव ससर्जादौ	३१
अपक्षयविनाशाभ्यां	३०
अपहतपाप्मा विजरः	२,२०,३९
अयनं तस्य ताः पूर्वम्	३१
अयमात्माब्रह्म	१
अविद्या कर्मसंज्ञाऽन्या	११,३९
असदेवेदमग्र आसीत्	८
अस्मान्मायी सृजते	१७
अस्येशाना	२८,४१
अहं कृत्स्नस्य जगतः	२७
अहं हि सर्वयज्ञानाम्	३५
अहमात्मा गुडाकेश	१६
आत्मा ज्ञानमयोऽमलः	४४
आत्मा वा इदमेक एवाग्रे	२५
आत्मेतितूपगच्छन्ति	२८
आत्मेत्येवतु गृह्णीयात्	२८
आदित्यवर्णम्	४२
आनन्दो ब्रह्म	१,४४,४५
आसुरीं योनिमा	३७
इयाज सोऽपि	२३
इष्टापूर्तं बहुधा जातम्	३५
इहैव तैर्जितः सर्गो	१९
उपपत्तेश्च	३१
उभयपरिकर्मित	२३
ऋणंहिवैजायते इति	३२
ऋतधामावसुः पूर्वः	४३
ऋषयः पितरो देवाः	२९
एकत्वे सति नानात्वं	१९
एकस्सन् बहुधा	२०
एकान्तिनस्सदा	४०
एको देवो बहुधा	१८
एको ह वै नारायण	२५
एतस्य वा अक्षरस्य	३,३६
एतौद्वौविबुध	२९
एनमेकेवदन्त्यग्निम्	२८,४३
एवं प्रकारममलं	१०
एवमेष महाशब्द	१०
एष एव साधुकर्म	२२
एष त आत्मा	२१
एष सर्वभूतान्तरात्मा	१
एष ह्येवानन्दयाति	३६
ऐतदात्म्यमिदम्	४,२०,४३
औत्पत्तिकस्तु	४२
कं ब्रह्म खं ब्रह्म	४५
कथन्नुभगवस्स	३
कथमसतस्सज्जायेत	८
कथयामियथापूर्वम्	२५
कलामुहूर्तादिमयश्च	१०,४०
कश्चध्येयः	२६
कारणं तु ध्येयः	२६
कारीर्या वृष्टिकामो यजेत	३४
कार्याणां कारणं पूर्वम्	१८
कालं स पचते यत्र	१०,४०
कालस्संपच्यते तत्र	४०
किंतदत्र विद्यते	२८
किंस्विद्वनम्	८
कुतस्तुखलु	८
कृतिसाध्यम्	३४
कृष्णएवहि	१०
केनसृष्टमिदम्	२९
क्रीडतोबालकस्येव	१०
क्षयन्तमस्यरजसः	३८,३९,४१
क्षेत्रज्ञस्येश्वरज्ञानात्	११
गौरनाद्यन्तवतीसा	१७
चतुर्होतारो	३६
जगच्चसः	३०
जगत्सर्वं शरीरम्	१६,४३
जगदेतन्महाश्चर्यम्	२०
जन्माद्यस्य यतः	२९,३१
ज्ञाज्ञौद्वावजावीशनीशौ	१५
ज्ञानशक्तिबलैश्वर्य	१०
ज्योतींषि विष्णुः	४३
ज्योतींषि शुक्राणिच	४३

Digitization by Arya Samaj Charitable Foundation, Chennai

त इमे सत्याः कामाः ३६
ततो यदुत्तरतरम् २५,२९
तत्त्वमसि १,४,२१,२२,२७
तत्संकल्पनिबन्धना ३
तत्सत्यम् ५९
तत्सर्वे वै हरेस्तनुः ३१
तत्सृष्ट्वा तदेवानु प्राविशत् १५
तथाऽन्यप्रतिषेधात् ३१
तदक्षरे परमेव्योमन् २०,३८,३९
तदेव प्रीतये भूत्वा ४५
तदेव भूतं तदुभव्यमा ३८
तदेवसर्वमेवैतत् ३०
तदेवाग्निस्तद्वायुः ३५
तदैक्षत बहुस्याम् २,४,६
तद्गुणसारत्वात् ६
तद्गुणास्तु विधीयेरन् ३८
तद्धर्मोपदेशात् ४१
तद्ब्रह्मपरमं ३०
तद्विप्रासो विपन्यवः ३९
तद्विष्णोः परमं पदम् ३८
तद्विसृष्टस्सपुरुषः ३१
तमसः परस्तात् ४१
तमादेशमप्राक्ष्यः ४
तमीश्वराणां परमम् २०
तमेतं वेदानुवचनेन १
तमेवं विद्वान् १,२३,४८
तमेव भान्तमनुभाति ४२
तवान्तरात्मा ममच २८
तस्मिन्कामाः २८
तस्मिन्जज्ञे स्वयम् ३१
तस्मिन्यदन्तः इति २८
तस्मिन् यदन्तस्तत् २८
तस्य तावदेवचिरम् २१
तस्याज्ञया धावति ३६
तानहं द्विषतः क्रूरान् २३,३७
तिस्रो देवता अनेन २८
तेजोबलैश्वर्य ३०
तेषामेवानुकम्पार्थम् २३
तेषां सतत युक्तानाम् २२
तैजसानीन्द्रियाण्याहुः १४
तौ तु मेधाविनौ दृष्ट्वा ४०
त्वं यज्ञस्त्वंवषट्कारः ४३
त्वत्तः कमलपत्राक्ष २७
दहरोऽस्मिन्नन्तर २७
दिव्यं स्थानमजरम् ४०
देवत्वे देवदेहेयम् ४०
दैवीह्येषा गुणमयी १९
द्वाविमौपुरुषौलोके १०५
द्वासुपर्णा सयुजा २५
द्वेवावब्रह्मणो रूपे ९
न कर्माविभागादिति १७
न चक्षुषा गृह्यते ४१
न तदस्ति पृथिव्याम् २४
नतस्येशेकश्चन २६,२७,२९
नतास्स्म सर्ववचसाम् १८
न भूतसंघसंस्थानो ३१
न मयडत्र विकारम् ३१
नरकस्वर्गसंज्ञे वै ४५
न संदृशेतिष्ठति ४५
न सन्नचासच्छिव २६
नात्मा श्रुतेर्नित्यत्वाच्च १७
नान्यः पन्था अयनाय १९,२९
नाम रूपं च भूतानाम् ३१
नामरूपे व्याकरवाणि ५
नायमात्मा प्रवचनेन २३
नारायणपरं ब्रह्म २५
नारायणो जगन्मूर्तिः २९
नित्योनित्यानाम् १५
नित्यैवैषा जगन्माता ४०
निदिध्यासितव्यः २३
नियतं कुरुकर्मत्वम् ३७
नियोज्यस्स च ३५
निरवद्यम् २०
निर्गुणम् २१,२०
निर्वाणमय एवायम् १९
निर्विकारम् २०
निष्कलं निष्क्रियम् २,२०
निष्क्रियम् २
नीलतोयदमध्यस्था ३७
नेह नानाऽस्ति ९,२०,२९
नैनमूर्ध्वं न २५
पतिं विश्वस्यात्मेश्वरम् २०,२६,४४
परः पराणाम् ३०
परमतस्सेतून्मान ३१
पराऽस्यशक्तिः ६,४२
पुरुषम् ४१
पुरुष स्सपरः २३
पुरुषएवेदम् २९
पूः प्राणिनः सर्व ११
पृथगात्मानम् १५,२०,२१
पृथिव्यापस्तथा ३०
प्रकृतिं पुरुषं चैव १७
प्रकृतिं स्वाम् १७
प्रकृतिर्यामया २९
प्रकृतिश्च प्रतिज्ञा १७,२९,३१
प्रकृतैतावत्त्वम् ९
प्रक्षालनाद्धि ९
प्रजापतिरकामयत २०
प्रधानक्षेत्रज्ञपतिः १५

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रधानपुंसोः १८
प्रवृत्तिंच निवृत्तिंच २४
प्रशासितारम् ३,११,१८
प्राणंमनसिसह २५,२६
प्रादुरासीत्तमोनुदः ३१
प्रियोहिज्ञानिनो ४५
फलसंबिभन्त्सया ३५
बहुस्यां प्रजायेय १६
बुद्ध्यर्थः पादवत् ३१
ब्रह्मवनं ब्रह्म २९
ब्रह्म वा इदम् २५
ब्रह्मविदाप्नोति १,२३,२६,३२,४५
ब्रह्मविष्णुशिवात्मिकाम् ३०
ब्रह्म वेद ब्रह्मैव २३,४५
ब्रह्माध्यतिष्ठत् २९
भक्त्याच धृत्याच ४५
भक्त्यात्वनन्यया २३,४५
भक्त्यामामभिजानाति २३
भगवांस्त्वेव मे ३
भिन्नप्रवृत्तिनिमित्तानाम् ६
भीषाऽस्माद्वातः ३६
भूमिरापोऽनलो १७
भोक्ता भोग्यम् १५,२०,२२
भोक्तारं-यज्ञतपसाम् ३६
मनोमयः प्राण ३८
मया ततमिदम् १९
मयाऽध्यक्षेण १७
मयिसर्वाणिकर्माणि ३७
महान् प्रभुर्वै २७
माहारजतं वासः ३८
मांच योऽव्यभिचारेण ४५
मूर्तं ब्रह्म महाभाग ४०
यआत्मनि तिष्ठन्नात्मनो ४,१५
य एतद्विदुरमृतास्ते २६
य एनं विदुरमृतास्ते २३
य एषोक्षिणिपुरुषः
य एषोन्तरक्षिणि
य एषोन्तरादित्ये ३७
यः पृथिवीमन्तरो १५
यः पृथिव्यां तिष्ठन् १५
यज-देवपूजायाम् ३६
यज्ञैस्त्वभिज्यसे ३५
यतोवा इमानि २५
यत्किंचित्सृज्यते १६
यत्रर्षयः प्रथमजाः ३९
यत्रत्वस्य सर्वम् २०
यत्र पूर्वेसाध्याः ३९
यथाभूतवादिहि ४१
यथा सोम्यैकेन ३,८
यदाग्नेयोष्टाकपालः ३८
यदा तमस्तन्न २५
यदेकमव्यक्तमनन्त ३८
यद्यपि सच्चित्तो २२
यद्यप्यबदानस्तुतिः ३२
यमन्तस्समुद्रे २५
यमेवैषवृणुते ४५
यस्मात्परं नापरमस्ति २५,२६
यस्मान्नाणीयो न २६
यस्मिन् कल्पेतु २४
यस्य पृथिवीशरीरम् २१
यस्यात्माशरीरम् ४
यस्याव्यक्तं शरीरम् २१
यस्सर्वज्ञस्सर्व ६,२०,४२
यावदात्मभावित्वाच्च ६
यावान्वा अयमाकाशः २८
यावेदबाह्याः २४
युक्तं तद्गुणकोपासनात् २२
येत्वेतदभ्यसूयन्तो ३७
ये मे मतमिदम् ३७
येनाश्रुतं श्रुतम् ३,८
ये यजन्ति पितॄन् १८
यैस्स्वधर्मपरैः ३५
योक्षरमन्तरे १५
यो ब्रह्माणम् २४
योमामजम् १०
यो यो यांयांतनुम् ३५
यो वेद निहितम् २०,३८
यो अस्याध्यक्षः ३८
रसोवैसः ४४
रूपंवातीन्द्रियम् ४१
वर्णाश्रमाचारवता २४
वाचारम्भणं विकारो ७
वायव्यं श्वेतमालभेत ३६
विज्ञातारमरेकेन ६
विज्ञानम् २
विद्यांचाविद्यांच २३
विद्याविनयसंपन्ने १९
विवेशवैष्णवम् ४०
विश्वतःपरमं नित्यम् ४१
विष्टभ्याहमिदम् १९
विष्णुरात्मा भगवतः २९
विष्णोःपरमम् ३८
विष्णोस्सकाशात् २९,३०
विष्ण्वाख्यं परमम् ३८
वेदवित्प्रवरप्रोक्त २५
वेदाहमेतं पुरुषम् ३७,३९,४१
वेदैश्च सर्वैरहमेव १८
वैषम्यनैर्घृण्ये न १७
व्यक्तमेषमहायोगी ४०

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यक्तं विष्णुस्तथा १७
शक्तयस्सर्वभावानाम् २०
शरानानाविधाश्चापि ४०
शाश्वतं शिवमच्युतम् २७
शास्त्रदृष्ट्यातूपदेशः २७,२८
शुद्धेमहाविभूत्याख्ये १०
स ईश्वरोव्यष्टिसमष्टि ३०
स एवक्षोभको १७
स एव सर्वभूतात्मा ३१
स एष सर्वेभ्यः ४१
स एष सर्वेषाम् ४१
स एव सृज्यः ३१
संकीर्णाः सात्विकाश्चैव २४
संकीर्णेषु सरस्वत्याः २४
संज्ञायते येन ३०
सत्वात्संजायते २४
सतया श्रद्धया ७,२२
सत्यं चानृतंच १५
सत्यं ज्ञानमनन्तम् २,९,३९,४२,४५
सत्यकामः ४०
सत्यसंकल्पः ४१
सदा पश्यन्ति सूरयः ४१
सदेव सोम्येदमग्रे २,३,८,२५,२९,३९
सन्मूलास्सोम्येमाः २,४
सब्रह्मासशिवः २६
समस्तकल्याण ३०
समस्तहेयरहितम् ३८,३९
समस्ताश्शक्तयश्चैताः ४०
स य एषोऽन्तर्हृदय ३७
सर्गास्थित्यन्तकालेषु ३९
सर्वं खल्विदं ब्रह्म २०,४३
सर्वं परवशं दुःखम् ४४,४५
सर्वकर्माण्यपि सदा ३७
सर्वगत्वादनन्तस्य २८
सर्वत्रासौ समस्तं च ३०
सर्वस्यचाहं हृदि १६
सर्वस्यवशी २९,३४,४१
सर्वाणि रूपाणि २०
सर्वाननशिरोग्रीवः २५
सर्वेनिमेषाजज्ञिरे २०,२९,३७
सर्वे वेदायत्पदम् १८
सर्वे वेदा यत्रैकम् १८
सर्वेषां तु सनामानि ५
सर्वैश्वर्य संपन्नः २६
स सर्वभूत प्रकृतिम् ३०
सहस्रशीर्षे देवम् २५,२७
सहैव सन्तम् १८
सह्याश्रमैस्सदोपास्यः ४५
सात्विकेष्वथकल्पेषु २४
सामान्यात्तु ३१
सिसृक्षुर्विविधाः ३१
सूर्याचन्द्रमसौधाता ५
सृष्टिस्थित्यन्तकरणीम् ३०
सेवाश्ववृत्तिराख्याता ४४,४५
सोऽकामयत ४३
सोन्तरादन्तरम् २८
सोहमिच्छामिधर्मज्ञ २९
स्तब्धोस्युत तमा देशम् ३
स्थानविशेषात्प्रकाशादिवत् ३१
स्याद्रूपंकृतकम् ४१
स्रष्टा सृजति चात्मानम् ३०
स्वकर्मनिरतस्सिद्धिम् २४
स्वर्गकामो यजेत ३३,३४
हन्ताहमिमाः ४
हिरण्मय इतिरूप ४१
हिरण्मयः पुरुषो ४१
हिरण्मयःइति ४१
हिरण्यनिधिमपवरके ३६
ह्रीश्चतेलक्ष्मीश्च ३८,४१

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीरस्तु

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजग्रन्थमालायाम्

शारीरकमीमांसाभाष्यम् ॥

प्रथमाध्याये–प्रथमपादे–जिज्ञासाधिकरणम् ॥

अखिलभुवनजन्मस्थेमभङ्गादिलीले, विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिञ्शेमुषी भक्तिरूपा ॥
पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थितामानीतां तु निजाक्षरैस्सुमनसो भौमाः पिबन्त्वन्वहम् ॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः; तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते—

1 ॐ ॥ अथातो ब्रह्मजिज्ञासा ॥ १–१–१ ॥

अत्रायमथशब्द आनन्तर्ये भवति। अतश्शब्दो वृत्तस्य हेतुभावे । अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी ॥

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण इति कर्मणि षष्ठी, *कर्तृकर्मणोः कृति* इति विशेषविधानात् । यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः; तथाऽप्याक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यते । न च *प्रतिपदविधाना षष्ठी न समस्यते, इति कर्मणि षष्ठयास्समासनिषेधश्शङ्कनीयः; * कृद्योगा च षष्ठी समस्यते इति प्रतिप्रसवसद्भावात् । ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते । सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः । बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः; स च सर्वेश्वर एव । अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः । तस्मादन्यत्र तद्गुणलशयोगादौपचारिकः, अनेकार्थकल्पनायोगात्, भगवच्छब्दवत् । तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः । अतस्सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म । ज्ञातुमिच्छा जिज्ञासा । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते ॥

मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः—

Digitization by Arya Samaj Charitable Foundation, Chennai

*वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषा, इति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यम्—*संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः, इति। अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः। मीमांसाशास्त्रम्—*अथातो धर्मजिज्ञासा, इत्यारभ्य *अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्, इत्येवमन्तं सङ्गतिविशेषेण विशिष्टक्रमम्। तथाहि—प्रथमं तावत् *स्वाध्यायोऽध्येतव्यः, इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते॥ तच्चाध्ययनं किंरूपं कथं च कर्तव्यमित्यपेक्षायाम् *अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत् इत्यनेन, *श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्॥ इत्यादिव्रतनियमविशेषोपदेशैश्चापेक्षितानि विधीयन्ते। एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्य आचार्योच्चारणानूच्चारणरूपमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते। अध्ययनं च स्वाध्यायसंस्कारः, *स्वाध्यायोऽध्येतव्यः, इति स्वाध्यायस्य कर्मत्वावगमात्। संस्कारो हि नाम कार्यान्तरयोग्यताकरणम्। संस्कार्यत्वं च स्वाध्यायस्य युक्तम्, धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात्; जपादिना स्वरूपेणापि तत्साधनत्वाच्च॥

एवमध्ययनविधिर्मन्त्रवत् नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति। अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात्स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषस्स्वयमेव प्रवर्तते। तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति। तथा च वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं दर्शयन्ति— *तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते, *अन्तवदेवास्य तद्भवति, *न ह्यध्रुवैः प्राप्यते, *प्लवा ह्येते अदृढा यज्ञरूपाः, *परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठम्॥ तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्॥ *ब्रह्मविदाप्नोति परम्, *न पुनर्मृत्यवे तदेकं पश्यति, *न पश्यो मृत्युं पश्यति, *स स्वराड्भवति, *तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते *पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीत्यादीनि॥

ननु च—साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वम्, स्वर्गादीनां च क्षयित्वं, ब्रह्मोपासनस्यामृतत्वफलत्वं च ज्ञायत एव। अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्तताम्; किमर्था धर्मविचारापेक्षा? एवं तर्हि शारीरकमीमांसायामपि न प्रवर्तताम्, साङ्गाध्ययनादेव कृत्स्नस्य ज्ञातत्वात्। सत्यम्; आपातप्रतीतिर्विद्यत एव; तथाऽपि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापातप्रतीतोऽप्यर्थस्संशयविपर्ययौ नातिवर्तते; अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्तव्य इति चेत्; तथैव धर्मविचारोऽपि कर्तव्य इति पश्यतु भवान्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

(लघुपूर्वपक्षः)

ननु च—ब्रह्मजिज्ञासा यदेव नियमेनापेक्षते, तदेव पूर्ववृत्तं वक्तव्यम्। न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः; अधीतवेदान्तस्यानधिगतकर्मणोऽपि वेदान्तवाक्यार्थविचारोपपत्तेः। कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते; तदनधिगतकर्मणो न शक्यं कर्तुम्—इति चेत्; अनभिज्ञो भवान् शारीरकशास्त्रविज्ञानस्य। अस्मिन् शास्त्रे अनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलमिथ्याज्ञाननिबर्हणाय आत्मैकत्वविज्ञानं प्रतिपिपादयिषितम्। अस्य हि भेदावलम्बि कर्मज्ञानं क्वोपयुज्यते? प्रत्युत विरुद्धमेव। उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानरूपत्वाविशेषादिहैव क्रियते। स तु न साक्षात्सङ्गतः। अतो यत्प्रधानं शास्त्रं, तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम्॥

बाढम्; तदपेक्षितं च कर्मविज्ञानमेव, कर्मसमुच्चितात् ज्ञानादपवर्गश्रुतेः। वक्ष्यति च—*सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्, इति। अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः, केन नेति विभागो न शक्यते ज्ञातुम्। अतस्तदेव पूर्ववृत्तम्। नैतद्युक्तं, सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः। अविद्यानिवृत्तिरेव हि मोक्षः। वर्णाश्रमविशेषसाध्यसाधनेतिकर्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत्? श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं, ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति— *अन्तवदेवास्य तद्भवति, *तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते, *ब्रह्मविदाप्नोति परम्, *ब्रह्म वेद ब्रह्मैव भवति, *तमेव विदित्वाऽतिमृत्युमेति —इत्याद्याः॥

यदपि चेदमुक्तं यज्ञादिकर्मापेक्षा विद्येति। तद्वस्तुविरोधात् श्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते; न फलोत्पत्तौ, *विविदिषन्ति, इति श्रवणात्। विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गोपायतां श्रुतिरेवाह— *शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्— इति। तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्यां, *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, *सत्यं ज्ञानमनन्तं ब्रह्म, *निष्कलं निष्क्रियं शान्तम्, *अयमात्मा ब्रह्म, *तत्त्वमसि, इत्यादिवाक्यजन्यज्ञानादविद्या निवर्तते। वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननिदिध्यासनानि। श्रवणं नाम वेदान्तवाक्यानि आत्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम्। एवमाचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम्। एतद्विरोध्यनादिभेदवासनानिरसनायास्यैवार्थस्यानवरतभावना निदिध्यासनम्। श्रवणादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्तयतीति, एवंरूपस्य श्रवणस्यावश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम्। तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत्, इहामुत्रफलभोगविरागः, मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयम्। अनेन विना जिज्ञासानुपपत्तेः, अर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एतदुक्तं भवति— ब्रह्मस्वरूपाच्छादिकाविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम्। बन्धश्चापारमार्थिकः। स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्यते। निवर्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम्। तस्यैतस्य वाक्यजन्यस्य ज्ञानस्य स्वरूपोत्पत्तौ कार्ये वा कर्मणां नोपयोगः। विविदिषायामेव तु कर्मणामुपयोगः। स च पापमूलरजस्तमोनिबर्हणद्वारेण सत्त्वविवृद्ध्या भवतीतीममुपयोगमभिप्रेत्य *ब्राह्मणा विविदिषन्ति, इत्युक्तमिति। अतः कर्मज्ञानस्यानुपयोगात् उक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम्॥

(लघुसिद्धान्तः)

अत्रोच्यते—यदुक्तमविद्यानिवृत्तिरेव मोक्षः; सा च ब्रह्मविज्ञानादेव भवति—इति। तदभ्युपगम्यते। अविद्यानिवृत्तये वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम्— किं वाक्याद्वाक्यार्थज्ञानमात्रम्, उत तन्मूलमुपासनात्मकं ज्ञानम्? इति। न तावद्वाक्यजन्यं ज्ञानम्; तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः; तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च। न च वाच्यं—भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयति; जातेऽपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय; चन्द्रैकत्वे ज्ञातेऽपि द्विचन्द्रज्ञानानिवृत्तिवत्। अनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवति—इति। सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः; सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात्। सत्यपि वाक्यार्थज्ञाने अनादिवासनया मात्रया भेदज्ञानमनुवर्तत इति भवता न शक्यते वक्तुम्; भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात्। ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकान्तराभावात् कदाचिदपि नास्या वासनाया निवृत्तिः। वासनाकार्यं भेदज्ञानं छिन्नमूलमथ चानुवर्तत इति बालिशभाषितम्। द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वात् मिथ्याज्ञानानुवृत्तिरविरुद्धा। प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्तते। अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति; भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्, तद्विरोधिभावनायाश्चाल्पत्वादनया तन्निरसनानुपपत्तेः। अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम्। तथा च श्रुतयः— *विज्ञाय प्रज्ञां कुर्वीत, * अनुविद्य विजानाति, *ओमित्येवात्मानं ध्यायथ, *निचाय्य तं मृत्युमुखात्प्रमुच्यते, *आत्मानमेव लोकमुपासीत, *आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, *सोऽन्वेष्टव्यस्सविजिज्ञासितव्यः —इत्येवमाद्याः॥

अत्र *निदिध्यासितव्यः इत्यादिनैकार्थ्यात्, *अनुविद्य विजानाति, *विज्ञाय प्रज्ञाङ्कुर्वीत, इत्येवमादिभिर्वाक्यार्थज्ञानं (नस्य) ध्यानोपकारकत्वात्, 'अनुविद्य', 'विज्ञाय' इत्यनूद्य 'प्रज्ञां कुर्वीत', 'विजानाति' इति ध्यानं विधीयते। श्रोतव्य इति चानुवादः, स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वात्। श्रवण-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिष्ठार्थत्वान्मननस्य, मन्तव्य इति चानुवादः। तस्माद्ध्यानमेव विधीयते। वक्ष्यति च— *आवृत्तिरसकृदुपदेशात्, इति। तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते, विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनात्— *मनो ब्रह्मेत्युपासीतेत्यत्र *भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद, *न स वेद अकृत्स्नो ह्येषः— आत्मेत्येवोपासीत, *यस्तद्वेद यत्स वेद स मयैतदुक्तः, इत्यत्र *अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से— इति॥

ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपम्; *ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः, इति ध्रुवायास्स्मृतेरपवर्गोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकारा, *भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥ इत्यनेनैकार्थ्यात्। एवं च सति, *आत्मा वा अरे द्रष्टव्यः इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते। भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता। वाक्यकारेणैतत्सर्वं प्रपञ्चितम्—*वेदनमुपासनं स्यात्तद्विषये श्रवणात्, इति। सर्वास्पनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम्। *सकृत्प्रत्ययं कुर्याच्छाब्दार्थस्य कृतत्वात्प्रयाजादिवत्, इति पूर्वपक्षं कृत्वा, *सिद्धं तूपासनशब्दात्, इति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम्। *उपासनं स्याद्ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्च, इति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम्॥

सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता। दर्शनरूपता च प्रत्यक्षतापत्तिः। एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि— *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥ इति। अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा, यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तम्। प्रियतम एव हि वरणीयो भवति। यस्यायं निरतिशयप्रियस्स एवास्य प्रियतमो भवति। यथाऽयं प्रियतम आत्मानं प्राप्नोति, तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तम् *तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ इति, *प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः। इति च। अतस्साक्षात्काररूपा स्मृतिस्स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य, स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते पर आत्मेत्युक्तं भवति। एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते, उपासनपर्यायत्वाद्भक्तिशब्दस्य। अत एव श्रुतिस्मृतिभिरेवमभिधीयते— *तमेव विदित्वाऽतिमृत्युमेति, *तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते।

*नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन!। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप!॥
*पुरुषस्स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया॥ इति॥

एवंरूपाया ध्रुवानुस्मृतेस्साधनानि यज्ञादीनि कर्माणीति— *यज्ञादिश्रुतेरश्ववत्, इत्यभिधास्यते। यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते; तथाऽपि तस्यैव

Digitization by Arya Samaj Charitable Foundation, Chennai

वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्य आप्रयाणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात् तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि। वक्ष्यति च *आप्रयाणात्तत्रापि हि दृष्टम्, *अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्, *सहकारित्वेन च, इत्यादिषु। वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह—*तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यस्संभवान्निर्वचनाच्च, इति। विवेकादीनां स्वरूपं चाह *जात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिर्विवेकः, इति। अत्र निर्वचनम्—*आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः, इति। *विमोकः कामानभिष्वङ्गः, इति। *शान्त उपासीत, इति निर्वचनम्। *आरम्बणसंशीलनं पुनःपुनरभ्यासः, इति। निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेण— *सदा तद्भावभावितः, इति। *पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रिया, इति। निर्वचनं— *क्रियावानेष ब्रह्मविदां वरिष्ठः, *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन, इति च। *सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानि, इति। निर्वचनं— *सत्येन लभ्यः, *तेषामेवैष विरजो ब्रह्मलोकः, इत्यादि। *देशकालवैगुण्याच्छोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसाद इति तद्विपर्ययोऽनवसादः। निर्वचनं— *नायमात्मा बलहीनेन लभ्यः, इति। *तद्विपर्ययजा तुष्टिरुद्धर्षः इति, तद्विपर्ययोऽनुद्धर्षः। अतिसन्तोषश्च विरोधीत्यर्थः। निर्वचनमपि— *शान्तो दान्तः, इति। एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति॥

तथा च श्रुत्यन्तरम्— *विद्यां चाविद्यां च यस्तद्वेदोभयँ सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ इति॥ अत्राविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म। अविद्यया—कर्मणा। मृत्युं—ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म। तीर्त्वा-अपोह्य। विद्यया-ज्ञानेन। अमृतं-ब्रह्म। अश्नुते-प्राप्नोतीत्यर्थः। मृत्युतरणोपायतया प्रतीता अविद्या विद्येतरद्विहितं कर्मैव; यथोक्तम्— *इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः। ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया॥ इति॥

ज्ञानविरोधि च कर्म पुण्यपापरूपम्। ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम्। अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण। पापस्य च ज्ञानोदयविरोधित्वम्— *एष एवासाधु कर्म कारयति तं यमधो निनीषति, इति श्रुत्याऽवगम्यते। रजस्तमसोर्यथार्थज्ञानावरणत्वं, सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम् *सत्त्वात्संजायते ज्ञानम्, इत्यादिना। अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयम्। तन्निरसनं च अनभिसंहितफलेनानुष्ठितेन कर्मणा। तथा च श्रुतिः— *धर्मेण पापमपनुदति, इति। तदेवं ब्रह्मप्राप्तिसाधनं ज्ञानं सर्वाश्रमकर्मापेक्षम्। अतोऽपेक्षितकर्मस्वरूपज्ञानं, केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति, सैवापेक्षिता ब्रह्मजिज्ञासायाः पूर्ववृत्ता वक्तव्या॥

अपि च नित्यानित्यवस्तुविवेकादयश्च, मीमांसाश्रवणमन्तरेण न संपत्स्यन्ते, फलकरणेतिकर्तव्यताधिकारिविशेषनिश्चयादृते कर्मस्वरूपतत्फलतत्स्थिरत्वास्थिरत्वात्मनित्यत्वादीनां दुरवबोधत्वात्। एषां साधनत्वं च विनियोगावसेयम्। विनियोगश्च श्रुतिलिङ्गादिभ्यः। स च तार्तीयः।

Digitization by Arya Samaj Charitable Foundation, Chennai

उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि, ब्रह्मज्ञानापेक्षाणीति इहैव चिन्तनीयानि। तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादकानीति तत्साद्गुण्यापादनान्येतानि सुतरामिहैव सङ्गतानि। तेषां च कर्मस्वरूपाधिगमापेक्षा सर्वसंमता ॥

(महापूर्वपक्षः)

यदप्याहुः—अशेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थः, तदतिरेकि नानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम्, *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, *अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः, *सत्यं ज्ञानमनन्तं ब्रह्म, *निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, *यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥ *न दृष्टेर्द्रष्टारं पश्येः, न मतेर्मन्तारं मन्वीथाः, *आनन्दो ब्रह्म, *इदं सर्वं यदयमात्मा, *नेह नानाऽस्ति किंचन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति, *यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तत्केन कं विजानीयात्, *वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, *यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति *न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि, *मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्,

*प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
*ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः। तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥
*परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते ! ॥
*यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव। भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः। अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥
ये तु ज्ञानविदश्शुद्धचेतसस्तेऽखिलं जगत्। ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ! ॥
*तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्। विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥
*यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम !। तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥
*वेणुरन्ध्रविभेदेन भेदष्षड्जादिसंज्ञितः। अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥
*सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥
इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ॥
*विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
*अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः ॥ *क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत !
*न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥

इत्यादिभिर्वस्तुस्वरूपोपदेशपरैश्शास्त्रैः, निर्विशेषचिन्मात्रं ब्रह्मैव सत्यमन्यत्सर्वं मिथ्या, इत्यभिधानात् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वम्, यथा रज्ज्वाद्यधिष्ठान-सर्पादेः। दोषवशाद्धि तत्र तत्कल्पनम्। एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं देवतिर्यङ्मनुष्यस्थावरादिभेदं सर्वं जगद्यथावस्थितब्रह्मस्वरूपावबोधबाध्यं मिथ्यारूपम्। दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयाऽनाद्यविद्या। *अनृतेन हि प्रत्यूढाः *तेषां सत्यानां सतामनृतमपिधानम्, *नासदासीन्नो सदासीत्तदानीं तम आसीत्तमसा गूढमग्रे प्रकेतम्, *मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, *इन्द्रो मायाभिः पुरुरूप ईयते, *मम माया दुरत्यया, *अनादिमायया सुप्तो यदा जीवः प्रबुध्यते– इत्यादिभिः निर्विशेषचिन्मात्रं ब्रह्मैवानाद्य-विद्यया सदसदनिर्वाच्यया तिरोहितस्वरूपं स्वगतनानात्वं पश्यतीत्यवगम्यते। यथोक्तम्—

*ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः।
ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि ॥
यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषम्।
तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः॥
*तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्क्वचित्कदाचिद्द्विज! वस्तुजातम्।
विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥
ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम्।
एकं सदैकं परमः परेशस्स वासुदेवो न यतोऽन्यदस्ति ॥
सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्।
एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ॥ इति ॥

अस्याश्चाविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृत्तिं वदन्ति– *न पुनर्मृत्यवे तदेकं पश्यति, *न पश्यो मृत्युं पश्यति, *यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति, *भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥ *ब्रह्म वेद ब्रह्मैव भवति, *तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः, इत्याद्याश्श्रुतयः। अत्र मृत्युशब्देनाविद्याऽभिधीयते। यथा सनत्सुजातवचनम् *प्रमादं वै मृत्युमहं ब्रवीमि सदाप्रमादममृतत्वं ब्रवीमि—इति। *सत्यं ज्ञानमनन्तं ब्रह्म, *विज्ञानमानन्दं ब्रह्म, इत्यादिशोधकवाक्यावसेयनिर्विशेषचिन्मात्रस्वरूपब्रह्मात्मैकत्वविज्ञानं च, *अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद, *अकृत्स्नो ह्येषः, *आत्मेत्येवोपासीत, *तत्त्वमसि, *त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहमस्मि, इत्यादिवाक्य-सिद्धम्। वक्ष्यति चैतदेव–*आत्मेति तूपगच्छन्ति ग्राहयन्ति च, इति। तथा च वाक्यकारः *आत्मे-त्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेः, इति॥ अनेन च ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बन्धस्य निवृत्तिर्युक्ता॥

ननु च, सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रजन्यविज्ञानेन क्रियते? कथं वा

Digitization by Arya Samaj Charitable Foundation, Chennai

'रज्जुरेषा न सर्पः' इति ज्ञानेन प्रत्यक्षविरुद्धा सर्पनिवृत्तिः क्रियते ? तत्र द्वयोः प्रत्यक्षयोर्विरोधः; इह तु प्रत्यक्षमूलस्य शास्त्रस्य प्रत्यक्षस्य चेति चेत्; तुल्ययोर्विरोधे वा कथं बाध्यबाधकभावः ? पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेत्; शास्त्रप्रत्यक्षयोरपि समानमेतत्।

एतदुक्तं भवति–बाध्यबाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादि न कारणम्, ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात्। तत्र हि ज्वालैक्यं प्रत्यक्षेणावगम्यते। एवं च सति द्वयोः प्रमाणयोर्विरोधे यत्संभाव्यमानान्यथासिद्धि तद्बाध्यम्; अनन्यथासिद्धमनवकाशमितरद्बाधकम्–इति सर्वत्र बाध्यबाधकभावनिर्णय इति ॥

तस्मादनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगन्धानवकाशशास्त्रजन्यनिर्विशेषनित्यशुद्धमुक्तबुद्धस्वप्रकाशचिन्मात्रब्रह्मात्मभावावबोधेन संभाव्यमानदोषसावकाशप्रत्यक्षादिसिद्धविविधविकल्परूपबन्धनिवृत्तिर्युक्तैव। संभाव्यते च विविधविकल्पभेदप्रपञ्चग्राहिप्रत्यक्षस्यानादिभेदवासनादिरूपाविद्याख्यो दोषः। ननु, अनादिनिधनाविच्छिन्नसंप्रदायतया निर्दोषस्यापि शास्त्रस्य, *ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादेर्भेदावलम्बिनो बाध्यत्वं प्रसज्येत। सत्यम्; पूर्वापरापच्छेदे पूर्वशास्त्रवन्मोक्षशास्त्रस्य निरवकाशत्वात्तेन बाध्यत एव। वेदान्तवाक्येष्वपि सगुणब्रह्मोपासनपराणां शास्त्राणामयमेव न्यायः, निर्गुणत्वात्परस्य ब्रह्मणः। ननु च, *यस्सर्वज्ञस्सर्ववित्, *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, *सत्यकामस्सत्यसङ्कल्पः, इत्यादिब्रह्मस्वरूपप्रतिपादनपराणां शास्त्राणां कथं बाध्यत्वम् ? निर्गुणवाक्यसामर्थ्यादिति ब्रूमः ॥

एतदुक्तं भवति– *अस्थूलमनण्वह्रस्वमदीर्घम्, * सत्यं ज्ञानमनन्तं ब्रह्म, *निर्गुणम्, *निरञ्जनम्–इत्यादिवाक्यानि निरस्तसमस्तविशेषकूटस्थनित्यचैतन्यं ब्रह्मेति प्रतिपादयन्ति; इतराणि च सगुणम्। उभयविधवाक्यानां विरोधे तेनैवापच्छेदन्यायेन निर्गुणवाक्यानां गुणापेक्षत्वेन परत्वाद्बलीयस्त्वमिति न किंचिदपहीनम् ॥

ननु च, *सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यज्ञानादयो गुणाः प्रतीयन्ते ॥ नेत्युच्यते, सामानाधिकरण्येनैकार्थत्वप्रतीतेः। अनेकगुणविशिष्टाभिधानेऽप्येकार्थत्वमविरुद्धमिति चेत्; अनभिधानज्ञो देवानां प्रियः। एकार्थत्वं नाम सर्वपदानामर्थैक्यम्; विशिष्टपदार्थाभिधाने विशेषणभेदेन पदानामर्थभेदोऽवर्जनीयः; ततश्चैकार्थत्वं न सिध्यति। एवं तर्हि सर्वपदानां पर्यायता स्यात्, अविशिष्टार्थाभिधायित्वात्। एकार्थाभिधायित्वेऽप्यपर्यायत्वमवहितमनाश्शृणु। एकत्वतात्पर्यनिश्चयादेकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकत्वपरत्वेन सर्वपदानामर्थवत्त्वमेकार्थत्वमपर्यायता च॥

एतदुक्तं भवति—लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपम्। तद्विरोधिरूपं सर्वमनेन पदत्रयेण फलतो व्युदस्यते। तत्र सत्यपदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तब्रह्मपरम्। ज्ञानपदं चान्याधीनप्रकाशजडरूपाद्वस्तुनो व्यावृत्तपरम्। अनन्तपदं च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम्। न च व्यावृत्तिर्भावरूपोऽभावरूपो वा धर्मः। अपि तु सकलेतरविरोधि ब्रह्मैव।

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिस्तत्तत्पदार्थस्वरूपमेव, न धर्मान्तरम्। एवमेकस्यैव वस्तुनस्सकलेतरविरोध्याकारतामवगमयदर्थवत्तरमेकार्थमपर्यायं च पदत्रयम् ॥

तस्मादेकमेव ब्रह्म स्वयंज्योतिर्निर्धूतनिखिलविशेषमित्युक्तं भवति। एवं वाक्यार्थप्रतिपादने सत्येव, *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् इत्यादिभिरैकार्थ्यम्। *यतो वा इमानि भूतानि जायन्ते, *सदेव सोम्येदमग्र आसीत्, *आत्मा वा इदमेक एवाग्र आसीत्—इत्यादिभिर्जगत्कारणतयोपलक्षितस्य ब्रह्मणः स्वरूपमिदमुच्यते *सत्यं ज्ञानमनन्तं ब्रह्मेति। तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्येषु सर्वेषु सजातीयविजातीयव्यावृत्तमद्वितीयं ब्रह्मावगतम्। जगत्कारणतयोपलक्षितस्य ब्रह्मणोऽद्वितीयस्य प्रतिपिपादयिषितं स्वरूपं तदविरोधेन वक्तव्यम्। अद्वितीयत्वश्रुतिर्गुणतोऽपि सद्वितीयतां न सहते। अन्यथा, *निरञ्जनम्, *निर्गुणम्, इत्यादिभिश्च विरोधः। अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपादयति। ननु च, सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरोधिव्यावृत्तवस्तुस्वरूपोपस्थापनपरत्वे लक्षणा स्यात्। नैष दोषः, अभिधानवृत्तेरपि तात्पर्यवृत्तेर्बलीयस्त्वात्। सामानाधिकरण्यस्य ह्यैक्य एव तात्पर्यमिति सर्वसंमतम्। ननु च, सर्वपदानां लक्षणा न दृष्टचरी। ततः किम्? वाक्यतात्पर्याविरोधे सत्येकस्यापि न दृष्टा। समभिव्याहृतपदसमुदायस्यैतत्तात्पर्यमिति निश्चिते सति द्वयोस्त्रयाणां सर्वेषां वा तदविरोधाय एकस्येव लक्षणा न दोषाय। तथा च शास्त्रस्थैरभ्युपगम्यते। कार्यवाक्यार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते। अपूर्वकार्य एव लिङादेर्मुख्यवृत्तत्वात् लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यते। कार्यान्वितस्वार्थाभिधायिनां चेतरेषां पदानामपूर्वकार्यान्वित एव मुख्यार्थ इति क्रियाकार्यान्वितप्रतिपादनं लाक्षणिकमेव। अतो वाक्यतात्पर्याविरोधाय सर्वपदानां लक्षणाऽपि न दोषः। अत इदमेवार्थजातं प्रतिपादयन्तो वेदान्ताः प्रमाणम् ॥

प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्वमुक्तम्। सति च विरोधे बलीयस्त्वं वक्तव्यम्। विरोध एव न दृश्यते, निर्विशेषसन्मात्रब्रह्मग्राहित्वात्प्रत्यक्षस्य। ननु च, घटोऽस्ति पटोस्ति इति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते। विलक्षणग्रहणाभावे सति सर्वेषां ज्ञानानामेकविषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुतैव स्यात्। सत्यम्; तथैवात्र विविच्यते। कथम्? घटोऽस्तीत्यत्रास्तित्वं तद्भेदश्च व्यवह्रियते। न च द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं संभवति, तयोर्भिन्नकालज्ञानफलत्वात्, प्रत्यक्षज्ञानस्य चैकक्षणवर्तित्वात्। तत्र स्वरूपं वा भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयम्। भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगिस्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति न भेदः प्रत्यक्षेण गृह्यते। अतो भ्रान्तिमूल एव भेदव्यवहारः ॥

किंच भेदो नाम कश्चित्पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते। भेदस्तावन्न वस्तुस्वरूपम्, वस्तुस्वरूपे गृहीते स्वरूपव्यवहारवत्सर्वस्माद्भेदव्यवहारप्रसक्तेः। न च वाच्यम्, स्वरूपे गृहीतेऽपि भिन्न इति व्यवहारस्य प्रतियोगिस्मरणसव्यपेक्षत्वात्, तत्स्मरणाभावेन तदानीमेव न भेदव्यवहार इति। स्वरूपमात्रभेदवादिनो हि प्रतियोग्यपेक्षा च नोत्प्रेक्षितुं क्षमा, स्वरूपभेदयोस्स्वरूपत्वाविशेषात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः, भेदव्यवहारोऽपि तथैव स्यात्। हस्तः करः इतिवत् घटो भिन्नः इति पर्यायत्वं च स्यात्। नापि धर्मः; धर्मत्वे सति तस्य स्वरूपाद्भेदोऽवश्याश्रयणीयः, अन्यथा स्वरूपमेव स्यात्। भेदे च तस्यापि भेदस्तद्धर्मस्तस्यापीत्यनवस्था। किंच जात्यादिविशिष्टवस्तुग्रहणे सति भेदग्रहणम्, भेदग्रहणे सति जात्यादिविशिष्टवस्तुग्रहणमित्यन्योन्याश्रयणम्। अतो भेदस्य दुर्निरूपत्वात्सन्मात्रस्यैव प्रकाशकं प्रत्यक्षम्॥

किंच 'घटोऽस्ति' 'पटोऽस्ति 'घटोऽनुभूयते' 'पटोऽनुभूयते' इति सर्वे पदार्थास्सत्तानुभूतिघटिता एव दृश्यन्ते। अत्र सर्वासु प्रतिपत्तिषु सन्मात्रमनुवर्तमानं दृश्यत इति तदेव परमार्थः। विशेषास्तु व्यावर्तमानतया अपरमार्थाः, रज्जुसर्पादिवत्। यथा रज्जुरधिष्ठानतयाऽनुवर्तमाना परमार्था सती; व्यावर्तमानास्सर्पभूदलनाम्बुधारादयोऽपरमार्थाः। ननु च, रज्जुसर्पादौ 'रज्जुरियं न सर्पः' इत्यादिरज्ज्वाद्यधिष्ठानयाथार्थ्यज्ञानेन बाधितत्वात्सर्पादेरपारमार्थ्यम्, न व्यावर्तमानत्वात्। रज्ज्वादेरपि पारमार्थ्यं नानुवर्तमानतया, किंत्वबाधितत्वात्। अत्र तु घटादीनामबाधितानां कथमपारमार्थ्यम्? उच्यते, घटादौ दृष्टा व्यावृत्तिस्सा किंरूपेति विवेचनीयम्। किं घटोस्तीत्यत्र पटाद्यभावः? सिद्धं तर्हि घटोऽस्तीत्यनेन पटादीनां बाधितत्वम्। अतो बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः। सा व्यावर्तमानानामपारमार्थ्यं साधयति। रज्जुवत् सन्मात्रमबाधितमनुवर्तते। तस्मात्सन्मात्रातिरेकि सर्वमपरमार्थः। प्रयोगश्च भवति–सत्परमार्थः, अनुवर्तमानत्वात्, रज्जुसर्पादौ रज्ज्वादिवत्। घटादयोऽपरमार्थाः, व्यावर्तमानत्वात्, रज्ज्वाद्यधिष्ठानसर्पादिवत्—इति। एवं सत्यनुवर्तमानाऽनुभूतिरेव परमार्थः; सैव सती॥

ननु च, सन्मात्रमनुभूतेर्विषयतया ततो भिन्नम्। नैवम्; भेदो हि प्रत्यक्षाविषयत्वाद्दुर्निरूपत्वाच्च पुरस्तादेव निरस्तः। अत एव सतोऽनुभूतिविषयभावोऽपि न प्रमाणपदवीमनुसरति। तस्मात्सदनुभूतिरेव॥ सा च स्वतस्सिद्धा, अनुभूतित्वात्। अन्यतस्सिद्धौ घटादिवदननुभूतित्वप्रसङ्गः। किंच अनुभवापेक्षा चानुभूतेर्न शक्या कल्पयितुम्, सत्तयैव प्रकाशमानत्वात्। न ह्यनुभूतिर्वर्तमाना घटादिवदप्रकाशा दृश्यते, येन परायत्तप्रकाशाऽभ्युपगम्येत॥

अथैवं मनुषे—उत्पन्नायामप्यनुभूतौ विषयमात्रमवभासते 'घटोऽनुभूयते' इति। न हि कश्चित् 'घटोऽयम्' इति जानन् तदानीमेवाविषयभूतामनिदंभावामनुभूतिमप्यनुभवति। तस्माद्घटादिप्रकाशनिष्पत्तौ चक्षुरादिकरणसन्निकर्षवदनुभूतेस्सद्भाव एव हेतुः। तदनन्तरमर्थगतकादाचित्कप्रकाशातिशयलिङ्गेनानुभूतिरनुमीयते। एवं तर्ह्यनुभूतेरजडाया अर्थवज्जडत्वमापद्यत इति चेत्; किमिदमजडत्वं नाम? न तावत्स्वसत्तायाः प्रकाशाव्यभिचारः, सुखादिष्वपि तत्संभवात्; नहि कदाचिदपि सुखादयस्सन्तो नोपलभ्यन्ते। अतोऽनुभूतिस्स्वयमेव नानुभूयते, अर्थान्तरं स्पृशतोऽङ्गुल्यग्रस्य स्वात्मस्पर्शवदशक्यत्वादिति। तदिदमनाकलितानुभवविभवस्य स्वमतिविजृम्भितम्। अनुभूतिव्यतिरेकिणो विषयधर्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः; उभयाभ्युपेतानुभूत्यैवाशेष-

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यवहारोपपत्तौ प्रकाशाख्यधर्मकल्पनानुपपत्तेश्च । अतो नानुभूतिरनुमीयते । नापि ज्ञानान्तरसिद्धा । अपि तु सर्वं साधयन्त्यनुभूतिस्स्वयमेव सिध्यति । प्रयोगश्च—अनुभूतिरनन्याधीनस्वधर्मव्यवहारा, स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्; यस्स्वसंबन्धादर्थान्तरे यद्धर्मव्यवहारहेतुः स तयोस्स्वस्मिन्ननन्याधीनो दृष्टः, यथा रूपादिश्चाक्षुषत्वादौ । रूपादिर्हि पृथिव्यादौ स्वसंबन्धाच्चाक्षुषत्वादि जनयन् स्वस्मिन्न रूपादिसंबन्धाधीनश्चाक्षुषत्वादौ । अतोऽनुभूतिरात्मनः प्रकाशमानत्वे प्रकाशत इति व्यवहारे च स्वयमेव हतुः ॥

सेयं स्वयंप्रकाशाऽनुभूतिर्नित्या च, प्रागभावाद्यभावात् । तदभावश्च स्वतस्सिद्धत्वादेव । न ह्यनुभूतेस्स्वतस्सिद्धायाः प्रागभावस्स्वतोऽन्यतो वाऽवगन्तुं शक्यते । अनुभूतिस्स्वाभावमवगमयन्ती, सती तावन्नावगमयति । तस्यास्सत्त्वे विरोधादेव तदभावो नास्तीति कथं सा स्वाभावमवगमयति ? एवमसत्यपि नावगमयति; अनुभूतिस्स्वयमसती स्वाभावे कथं प्रमाणं भवेत् ? नाप्यन्यतोऽवगन्तुं शक्यते, अनुभूतेरनन्यगोचरत्वात् । अस्याः प्रागभावं साधयत् प्रमाणम् 'अनुभूतिरियम्' इति विषयीकृत्य तदभावं साधयेत्; स्वतस्सिद्धत्वेन इयमिति विषयीकारानर्हत्वात्, न तत्प्रागभावोऽन्यतश्शक्यावगमः । अतोऽस्याः प्रागभावाभावादुत्पत्तिर्न शक्यते वक्तुमित्युत्पत्तिप्रतिसंबद्धाश्चान्येऽपि भावविकारास्तस्या न सन्ति ॥

अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते, व्यापकविरुद्धोपलब्धेः । न ह्यनुत्पन्नं नानाभूतं दृष्टम् । भेदादीनामनुभाव्यत्वेन च रूपादेरिवानुभूतिधर्मत्वं न संभवति । अतोऽनुभूतेरनुभवस्वरूपत्वादेवान्योऽपि कश्चिदनुभाव्यो नास्या धर्मः । यतो निर्धूतनिखिलभेदा संवित्, अत एव नास्यास्स्वरूपातिरिक्त आश्रयो ज्ञाता नाम कश्चिदस्तीति स्वप्रकाशरूपा सैवात्मा, अजडत्वाच्च । अनात्मत्वव्याप्तं जडत्वं संविदि व्यावर्तमानमनात्मत्वमपि हि संविदो व्यावर्तयति ॥

ननु च, अहं जानामीति ज्ञातृता प्रतीतिसिद्धा । नैवम्; सा भ्रान्तिसिद्धा, रजततेव शुक्तिशकलस्य, अनुभूतेस्स्वात्मनि कर्तृत्वायोगात् । अतो मनुष्योऽहमित्यत्यन्तर्वहिर्भूतमनुष्यत्वादिविशिष्टपिण्डात्माभिमानवत् ज्ञातृत्वमप्यध्यस्तम् । ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम् । तच्च विक्रियात्मकं जडं विकारिद्रव्याहंकारग्रन्थिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि कथमिव संभवति ? दृश्यधीनसिद्धित्वादेव रूपादेरिव कर्तृत्वादेर्नात्मधर्मत्वम् । सुषुप्तिमूर्च्छादावहंप्रत्ययापायेऽप्यात्मानुभवदर्शनेन नात्मनोऽहंप्रत्ययगोचरत्वम् । कर्तृत्वेऽहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येव जडत्वपराक्त्वानात्मत्वादिप्रसङ्गो दुष्परिहरः । अहंप्रत्ययगोचरात् कर्तृतया प्रसिद्धाद्देहात्तत्क्रियाफलस्वर्गादेर्भोक्तुरात्मनोऽन्यत्वं प्रामाणिकानां प्रसिद्धमेव । तथाऽहमर्थात् ज्ञातुरपि विलक्षणस्साक्षी प्रत्यगात्मेति प्रतिपत्तव्यम् । एवमविक्रियानुभवस्वरूपस्यैवाभिव्यञ्जको जडोऽप्यहंकारस्स्वाश्रयतया तमभिव्यनक्ति । आत्मस्थतयाऽभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः । दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिकमात्मस्थतयाऽभिव्यनक्ति । तत्कृतोयं 'जानाम्यहम्' इति भ्रमः । स्वप्रकाशाया अनुभूतेः कथमिव तदभिव्यङ्ग्यजडरूपाहङ्कारेणाभिव्यङ्ग्यत्वमिति मा वोचः, रविकर-

Digitization by Arya Samaj Charitable Foundation, Chennai

निकराभिव्यङ्ग्यकरतलस्य तदभिव्यञ्जकत्वदर्शनात्; जालकरन्ध्रनिष्क्रान्तद्युमणिकिरणानां तदभिव्यङ्ग्येनापि करतलेन स्फुटतरप्रकाशो हि दृष्टचरः। यतोऽहं जानामीति ज्ञाताऽयमहमर्थश्चिन्मात्रात्मनो न पारमार्थिको धर्मः; अत एव सुषुप्तिमुक्त्योर्नान्वेति। तत्र ह्यहमर्थोल्लेखविगमेन स्वाभाविकानुभवमात्ररूपेणात्माऽवभासते। अत एव सुप्तोत्थितः कदाचिन्मामप्यहं न ज्ञातवानिति परामृशति - तस्मात्परमार्थतो निरस्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदा विवर्तत इति तन्मूलभूताविद्यानिबर्हणाय नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते—इति ॥

महासिद्धान्तः

तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणामनादिपापवासनादूषिताशेषशेमुषीकाणामनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततदितिकर्तव्यतारूपसमीचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्ककल्पितमिति, न्यायानुगृहीतप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम् ॥

तथाहि— निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुम्, सविशेषवस्तुविषयत्वात्सर्वप्रमाणानाम्। यस्तु स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठस्समयः, सोऽप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः; 'इदमहमदर्शम्' इति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानाम्। सविशेषोऽप्यनुभूयमानोऽनुभवः केनचिद्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणस्सत्तातिरेकिभिस्स्वासाधारणैस्स्वभावविशेषैर्निष्कृष्टव्य इति निष्कर्षहेतुभूतैस्सत्तातिरेकिभिस्स्वासाधारणैस्स्वभावविशेषैस्सविशेष एवावतिष्ठते। अतः कैश्चिद्विशेषैर्विशिष्टस्यैव वस्तुनोऽन्ये विशेषा निरस्यन्त इति, न क्वचिन्निर्विशेषवस्तुसिद्धिः। धियो हि धीत्वं स्वप्रकाशता च ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः। स्वापमदमूर्च्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः। स्वाभ्युपगताश्च नित्यत्वादयो ह्यनेके विशेषास्सन्त्येव। ते च न वस्तुमात्रमिति शक्योपपादनाः; वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात्, स्वाभिमततद्विधाभेदैश्च स्वमतोपपादनात्। अतः प्रामाणिकविशेषैर्विशिष्टमेव वस्त्विति वक्तव्यम् ॥

शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, पदवाक्यरूपेण प्रवृत्तेः। प्रकृतिप्रत्यययोगेन हि पदत्वम्। प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम्। पदभेदश्चार्थभेदनिबन्धनः। पदसङ्घातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादनासामर्थ्यात् न निर्विशेषवस्तुनि शब्दः प्रामाणम्।

प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदभिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः। सविकल्पकं जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम्। निर्विकल्पकमपि सविशेषविषयमेव, सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसंधानहेतुत्वात्। निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

ग्रहणम्, न सर्वविशेषरहितस्य; तथाभूतस्य कदाचिदपि ग्रहणादर्शनादनुपपत्तेश्च। केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिरुपजायते, त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात्। अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्। द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते। तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते। द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः। प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति, द्वितीयादिग्रहणस्य सविकल्पकत्वम्। सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति, प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम्; न पुनस्संस्थानरूपजात्यादेरग्रहणात्। संस्थानरूपजात्यादेरप्यैन्द्रियिकत्वाविशेषात्, संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेऽपि ससंस्थानमेव वस्तु इत्थमिति गृह्यते। अतो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानिवत्संस्थानवच्च सर्वदैव गृह्यत इति तेषु सविकल्पकत्वमेव। अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वम्॥

अतएव सर्वत्र भिन्नाभिन्नत्वमपि निरस्तम्। इदमित्थमिति प्रतीताविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते? तत्रेत्थंभावस्सास्नादिसंस्थानविशेषः; तद्विशेष्यं द्रव्यमिदमंश इत्यनयोरैक्यं प्रतीतिपराहतमेव। तथाहि—प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते। व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतयेत्थमिति प्रतीतेः। सर्वत्र विशेषणविशेष्यभावप्रतिपत्तौ तयोरत्यन्तभेदः प्रतीत्यैव सुव्यक्तः। तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः स्वनिष्ठाश्च कदाचित्क्वचिद्द्रव्यान्तरविशेषणतयाऽवतिष्ठन्ते। गोत्वादयस्तु द्रव्यसंस्थानतयैव पदार्थभूतास्सन्तो द्रव्यविशेषणतया अवस्थिताः। उभयत्र विशेषणविशेष्यभावस्समानः। तत एव तयोर्भेदप्रतिपत्तिश्च। इयांस्तु विशेषः—पृथक्स्थितिप्रतिपत्तियोग्या दण्डादयः, गोत्वादयस्तु नियमेन तदनर्हाः इति। अतो वस्तुविरोधः प्रतीतिपराहत इति प्रतीतिप्रकारनिह्नवादेवोच्यते। प्रतीतिप्रकारो हि इदमित्थमित्येव सर्वसंमतः। तदेतत्सूत्रकारेण *नैकस्मिन्नसम्भवात्, इति सुव्यक्तमुपपादितम्॥

अतः प्रत्यक्षस्य सविशेषविषयत्वेन प्रत्यक्षादिदृष्टसंबन्धविशिष्टविषयत्वादनुमानमपि सविशेषविषयमेव। प्रमाणसङ्ख्याविवादेऽपि सर्वाभ्युपगतप्रमाणानामयमेव विषय इति न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः। वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषमिति वदन् जननीवन्ध्यात्वप्रतिज्ञायामिव स्ववाग्विरोधमपि न जानाति।

यत्तु, प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयम्, भेदश्च विकल्पासहत्वाद्दुर्निरूप इत्युक्तम्, तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षविषयत्वाज्जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनस्स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम्। संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोस्स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि संभवत्येव। अत एव च नानवस्थाऽन्योन्याश्रयणं च। एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानरूपगोत्वादेर्गृहीतत्वात् क्षणान्तरग्राह्यं न किञ्चिदिह तिष्ठति॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि च सन्मात्रग्राहित्वे 'घटोऽस्ति' 'पटोऽस्ति' इति विशिष्टविषया प्रतीतिर्विरुध्यते। यदि च सन्मात्रातिरेकिवस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः, किमित्यश्वार्थी महिषदर्शने निवर्तते। सर्वासु प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्; तत्तत्प्रतिपत्तिविषयसहचारिणस्सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न स्मर्यन्ते? किञ्च अश्वे हस्तिनि च संवेदनयोरेकविषयत्वेन उपरितनस्य गृहीतग्राहित्वाद्विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात्। प्रतिसंवेदनं विशेषाभ्युपगमे प्रत्यक्षस्य विशिष्टार्थविषयत्वमेवाभ्युपगतं भवति। सर्वेषां संवेदनानामेकविषयतायामेकेनैव संवेदनेनाशेषग्रहणादन्धबधिराद्यभावश्च प्रसज्येत। न च चक्षुषा सन्मात्रं गृह्यते, तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात्। नापि त्वचा, स्पर्शवद्वस्तुविषयत्वात्। श्रोत्रादीन्यपि न सन्मात्रविषयाणि; किंतु शब्दरसगन्धलक्षणविशेषविषयाण्येव। अतस्सन्मात्रस्य ग्राहकं न किञ्चिदिह दृश्यते। निर्विशेषसन्मात्रस्य प्रत्यक्षेणैव ग्रहणे तद्विषयागमस्य प्राप्तविषयत्वेनानुवादकत्वमेव स्यात्। सन्मात्रब्रह्मणः प्रमेयभावश्च। ततो जडत्वनाशित्वादयस्त्वयैवोक्ताः। अतो वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षम्। संस्थानातिरेकिणोऽनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात्, तावतैव गोत्वादिजातिव्यवहारोपपत्तेः; अतिरेकवादेऽपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जातिः। संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तु संस्थानमनुसंधेयम्। जातिग्रहणेनैव भिन्न इति व्यवहारसंभवात्, पदार्थान्तरादर्शनात्, अर्थान्तरवादिनाऽप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः। ननु च जात्यादिरेव भेदश्चेत्तस्मिन् गृहीते तद्वद्व्यवहारवद्भेदव्यवहारोऽपि स्यात्। सत्यम्, भेदश्च व्यवह्रियत एव, गोत्वादिव्यवहारात्। गोत्वादिरेव हि सकलेतरव्यावृत्तिः, गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः। भेदग्रहणेनैव ह्यभेदनिवृत्तिः। 'अयमस्माद्भिन्नः' इति तु व्यवहारे प्रतियोगिनिर्देशस्य तदपेक्षत्वात् प्रतियोग्यपेक्षया भिन्न इति व्यवहार इत्युक्तम् ॥

यत्पुनर्घटादीनां विशेषाणां व्यावर्तमानत्वेनापारमार्थ्यमुक्तम्, तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य भ्रान्तिपरिकल्पितम्। द्वयोर्ज्ञानयोर्विरोधे हि बाध्यबाधकभावः। बाधितस्यैव व्यावृत्तिः। अत्र घटपटादिषु देशकालभेदेन विरोध एव नास्ति। यस्मिन् देशे यस्मिन् काले यस्य सद्भावः प्रतिपन्नः, तस्मिन् देशे तस्मिन् काले तस्याभावः प्रतिपन्नश्चेत्; तत्र विरोधात् बलवतो बाधकत्वं बाधितस्य च निवृत्तिः। देशान्तरकालान्तरसंबन्धितयाऽनुभूतस्यान्यदेशकालयोरभावप्रतिपत्तौ न विरोध इति कथमत्र बाध्यबाधकभावः? अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते? रज्जुसर्पादिषु तु तद्देशकालसंबन्धितयैवाभावप्रतीतेः, विरोधो बाधकत्वं व्यावृत्तिश्चेति देशकालान्तरदृष्टस्य देशकालान्तरव्यावर्तमानत्वं मिथ्यात्वव्याप्तं न दृष्टमिति न व्यावर्तमानत्वमात्रमपारमार्थ्यहेतुः। यत्तु, अनुवर्तमानत्वात्सत्परमार्थ इति, तत्सिद्धमेवेति न साधनमर्हति। अतो न सन्मात्रमेव वस्तु ॥

अनुभूतिसद्विशेषयोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वादबाधितत्वाच्चानुभूतिरेव सतीत्येतदपि निरस्तम् ॥

यत्त्वनुभूतेस्स्वयंप्रकाशत्वमुक्तम्; तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव; न तु सर्वेषां

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वदा तथैवेति नियमोऽस्ति, परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात्, स्वानुभवस्याप्यतीतस्य 'अज्ञासिषम्' इति ज्ञानविषयत्वदर्शनाच्च। अतोऽनुभूतिश्चेत् स्वतस्सिद्धेति वक्तु न शक्यते ॥ अनुभूतेरनुभाव्यत्वे अननुभूतित्वमित्यपि दुरुक्तम्; स्वगतातीतानुभवानां परगतानुभवानां चानुभाव्यत्वेनाननुभूतित्वप्रसङ्गात्। परानुभवानुमानानभ्युपगमे च शब्दार्थसंबन्धग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः। आचार्यस्य ज्ञानवत्त्वमनुमाय तदुपसत्तिश्च क्रियते; सा च नोपपद्यते। न चान्यविषयत्वेऽननुभूतित्वम्। अनुभूतित्वं नाम वर्तमानदशायां स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वं, स्वसत्तयैव स्वविषयसाधनत्वं वा। ते चानुभवान्तरानुभाव्यत्वेऽपि स्वानुभवसिद्धे नापगच्छत इति नानुभूतित्वमपगच्छति। घटादेस्त्वननुभूतित्वमेतत्स्वभावविरहात्; नानुभाव्यत्वात्। तथाऽनुभूतेरननुभाव्यत्वेऽपि अननुभूतित्वप्रसङ्गो दुर्वारः; गगनकुसुमादेरननुभाव्यस्याननुभूतित्वात्। गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तम्, नाननुभाव्यत्वप्रयुक्तमिति चेत्; एवं तर्हि घटादेरप्यज्ञानाविरोधित्वमेवाननुभूतित्वनिबन्धनम्, नानुभाव्यत्वमित्यास्थीयताम्। अनुभूतेरनुभाव्यत्वे अज्ञानाविरोधित्वमपि तस्याः घटादेरिव प्रसज्यत इति चेत्; अननुभाव्यत्वेऽपि गगनकुसुमादेरिवाज्ञानाविरोधित्वमपि प्रसज्यत एव। अतोऽनुभाव्यत्वेऽननुभूतित्वमित्युपहास्यम् ॥

यत्तु संविदस्स्वतसिद्धायाः प्रागभावाद्यभावादुत्पत्तिर्निरस्यते, तदन्धस्य जात्यन्धेन यष्टिः प्रदीयते। प्रागभावस्य ग्राहकाभावादभावो न शक्यते वक्तुम्; अनुभूत्यैव ग्रहणात्। कथमनुभूतिस्सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत्; न ह्यनुभूतिस्स्वसमकालवर्तिनमेव विषयीकरोतीत्यस्ति नियमः; अतीतानागतयोरविषयत्वप्रसङ्गात्। अथ मन्यसे—अनुभूतिप्रागभावादेस्सिद्धयतस्तत्समकालभावनियमोऽस्तीति; किं त्वया क्वचिदेवं दृष्टम्, येन नियमं ब्रवीषि? हन्त तर्हि तत एव दर्शनात् प्रागभावादिस्सिद्ध इति न तदपह्नवः। तत्प्रागभावं च तत्समकालवर्तिनमनुन्मत्तः को ब्रवीति? इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमः, यत्स्वसमकालवर्तिनः पदार्थस्य ग्राहकत्वम्; न सर्वेषां ज्ञानानां प्रमाणानां च; स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्तिनोऽपि ग्रहणदर्शनात्। अत एव च प्रमाणस्य प्रमेयाविनाभावः। न हि प्रमाणस्य स्वसमकालवर्तिनाऽविनाभावोऽर्थसंबन्धः; अपि तु यद्देशकालादिसंबन्धितया योऽर्थोऽवभासते, तस्य तथाविधाकारमिथ्यात्वप्रत्यनीकता। अत इदमपि निरस्तं—स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनात्—इति ॥

अथोच्येत—न तावत्संवित्प्रागभावः प्रत्यक्षावसेयः, अवर्तमानत्वात्। न च प्रमाणान्तरावसेयः, लिङ्गाद्यभावात्। न हि संवित्प्रागभावव्याप्तमिह लिङ्गमुपलभ्यते। नानुपपत्तिरपि कस्यचित् दृश्यते। न चाऽगमस्तद्विषयो दृष्टचरः। अतस्तत्प्रागभावः प्रमाणाभावादेव न सेत्स्यति—इति; यद्येवं स्वतस्सिद्धत्वविभवं परित्यज्य प्रमाणाभावेऽवरूढश्चेत्; योग्यानुपलब्ध्यैवाभावस्समर्थित इत्युपशाम्यतु भवान् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किंच–प्रत्यक्षज्ञानं स्वविषयं घटादिकं स्वसत्ताकाले सन्तं साधयत्तस्य न सर्वदा सत्तामवगमयद्दृश्यत इति घटादेः पूर्वोत्तरकालसत्ता न प्रतीयते । तदप्रतीतिश्च संवेदनस्य कालपरिच्छिन्नतया प्रतीतेः । घटादिविषयमेव संवेदनं स्वयं कालानवच्छिन्नं प्रतीतं चेत्; संवेदनविषयो घटादिरपि कालानवच्छिन्नः प्रतीयेतेति नित्यस्स्यात् । नित्यं चेत्संवेदनं स्वतस्सिद्धं नित्यमित्येव प्रतीयेत । न च तथा प्रतीयते । एवमनुमानादिसंविदोऽपि कालानवच्छिन्नाः प्रतीताश्चेत्; स्वविषयानपि कालानवच्छिन्नान् प्रकाशयन्तीति ते च सर्वे कालानवच्छिन्ना नित्यास्स्युः, संविदनुरूपस्वरूपत्वाद्विषयाणाम् । न च निर्विषया काचित्संविदस्ति; अनुपलब्धेः । विषयप्रकाशनतयैवोपलब्धेरेव हि संविदस्स्वयंप्रकाशता समर्थिता । संविदो विषयप्रकाशनतास्वभावविरहे सति स्वयंप्रकाशत्वासिद्धेः, अनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविदस्तुच्छतैव स्यात् । न च स्वापमदमूर्च्छादिषु सर्वविषयशून्या केवलैव संवित्परिस्फुरतीति वाच्यम्; योग्यानुपलब्धिपराहतत्वात् । तास्वपि दशास्वनुभूतिरनुभूता चेत्; तस्याः प्रबोधसमयेऽनुसंधानं स्यात्; न च तदस्ति ॥

नन्वनुभूतस्य पदार्थस्य स्मरणनियमो न दृष्टचरः । अतस्स्मरणाभावः कथमनुभवाभावं साधयेत्? उच्यते । निखिलसंस्कारतिरस्कृतिकरदेहविगमादिप्रबलहेतुविरहेऽप्यस्मरणनियमोऽनुभवाभावमेव साधयति । न केवलमस्मरणनियमादनुभवाभावः; सुप्तोत्थितस्य 'इयन्तं कालं न किंचिदहमज्ञासिषम्' इति प्रत्यवमर्शेनैव सिद्धेः । न च सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहादहंकारविगमाद्वेति शक्यते वक्तुम्; अर्थान्तराननुभवस्यार्थान्तराभावस्य चानुभूतार्थान्तरास्मरणहेतुत्वाभावात् । तास्वपि दशास्वहमर्थोऽनुवर्तत इति च वक्ष्यते । ननु स्वापादिदशास्वपि सविशेषोऽनुभवोऽस्तीति पूर्वमुक्तम् । सत्यमुक्तम्? स त्वात्मानुभवः; स च सविशेष एवेति स्थापयिष्यते । इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते । केवलैव संविदात्मानुभव इति चेत्; सा च साश्रयेति ह्युपपादयिष्यते । अतोऽनुभूतिस्सती स्वयं स्वप्रागभावं न साधयतीति । प्रागभावासिद्धिर्न शक्यते वक्तुम् । अनुभूतेरनुभाव्यत्वसंभवोपपादनेनान्यतोऽप्यसिद्धिर्निरस्ता । तस्मान्न प्रागभावाद्यसिद्ध्या संविदोऽनुत्पत्तिरुपपत्तिमती ॥

यदप्यस्या अनुत्पत्त्या विकारान्तरनिरसनम्; तदप्यनुपपन्नम्, प्रागभावे व्यभिचारात् । तस्य हि जन्माभावेऽपि विनाशो दृश्यते । भावेष्विति विशेषणे तर्ककुशलताऽऽविष्कृता भवति । तथाच भवदभिमताऽविद्याऽनुत्पन्नैव विविधविकारास्पदं तत्त्वज्ञानोदयादन्तवती चेति तस्यामनैकान्त्यम् । तद्विकारास्सर्वे मिथ्याभूता इति चेत्; किं भवतः परमार्थभूतोऽप्यस्ति विकारः, येनैतद्विशेषणमर्थवद्भवति ? न ह्यसावभ्युपगम्यते ॥

यदप्यनुभूतिरजत्वात्स्वस्मिन्विभागं न सहत इति; तदपि नोपपद्यते, अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वात्; अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात् । स च विभागो मिथ्यारूप इति चेत्; जन्मप्रतिबद्धः परमार्थविभागः किं क्वचिद्दृष्टस्त्वया ?

Digitization by Arya Samaj Charitable Foundation, Chennai

अविद्याया आत्मनः परमार्थतो विभागाभावे वस्तुतो ह्यविद्यैव स्यादात्मा। अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमथनेन दर्शनभेदोऽपि समर्थित एव, छेद्यभेदाच्छेदनभेदवत् ॥

यदपि नास्या दृशेर्दृशिरूपाया दृश्यः कश्चिदपि धर्मोऽस्ति; दृश्यत्वादेव तेषां न दृशिधर्मत्वम्—इति च; तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकम्। न च ते संवेदनमात्रम्, स्वरूपभेदात्। स्वसत्तयैव स्वाश्रयं प्रति कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम्। स्वयंप्रकाशता तु स्वसत्तयैव स्वाश्रयाय प्रकाशमानता। प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम्। सर्वकालवर्तमानत्वं हि नित्यत्वम्। एकत्वमेकसंख्यावच्छेद इति। तेषां जडत्वाद्यभावरूपतायामपि तथाभूतैरपि चैतन्यधर्मभूतैस्तैरनैकान्त्यमपरिहार्यम्। संविदि तु स्वरूपातिरेकेण जडत्वादिप्रत्यनीकत्वमित्यभावरूपो भावरूपो वा धर्मो नाभ्युपेतश्चेत्; तत्तन्निषेधोक्त्या किमपि नोक्तं भवेत् ॥

अपि च संवित्सिध्यति वा न वा? सिध्यति चेत्; सधर्मता स्यात्। न चेत्; तुच्छता, गगनकुसुमादिवत्। सिद्धिरेव संविदिति चेत्; कस्य कं प्रतीति वक्तव्यम्। यदि न कस्य चित्कंचित्प्रति; सा तर्हि न सिद्धिः। सिद्धिर्हि पुत्रत्वमिव कस्यचित्कंचित्प्रति भवति। आत्मन इति चेत्; कोऽयमात्मा? ननु संविदेवेत्युक्तम्। सत्यमुक्तम्; दुरुक्तं तु तत्। तथाहि; कस्यचित्पुरुषस्य किंचिदर्थजातं प्रति सिद्धिरूपा तत्संबन्धिनी सा संवित्स्वयं कथमिवात्मभावमनुभवेत्? एतदुक्तं भवति— अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्मविशेषो 'घटमहं जानामि, इममर्थमवगच्छामि, पटमहं संवेद्मि' इति सर्वेषामात्मसाक्षिकः प्रसिद्धः। एतत्स्वभावतया हि तस्यास्स्वयंप्रकाशता भवताप्युपपादिता। अस्य सकर्मकस्य कर्तृधर्मविशेषस्य कर्मत्ववत्कर्तृत्वमपि दुर्घटमिति। तथाहि; अस्य कर्तुस्स्थिरत्वं कर्तृधर्मस्य संवेदनाख्यस्य सुखदुःखादेरिवोत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्ष्यन्ते। कर्तृस्थैर्यं तावत् 'स एवायमर्थः पूर्वं मयाऽनुभूतः' इति प्रत्यभिज्ञाप्रत्यक्षसिद्धम्। 'अहं जानामि, अहमज्ञासिषं ज्ञातुरेव ममेदानीं ज्ञानं नष्टम्' इति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्तदैक्यम्? एवं क्षणभङ्गिन्यास्संविद आत्मत्वाभ्युपगमे पूर्वेद्युर्दृष्टमपरेद्युः 'इदमहमदर्शम्' इति प्रत्यभिज्ञा च न घटते; अन्येनानुभूतस्य न ह्यन्येन प्रत्यभिज्ञानसंभवः ॥

किञ्च अनुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेऽपि प्रतिसन्धानासंभवस्तदवस्थः। प्रतिसन्धानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति; नानुभूतिमात्रम्; अहमेवेदं पूर्वमप्यन्वभूवमिति। भवतोऽप्यनुभूतेर्न ह्यनुभवितृत्वमिष्टम्। अनुभूतिरनुभूतिमात्रमेव। संविन्नाम काचिन्निराश्रया निर्विषया वाऽत्यन्तानुपलब्धेर्न संभवतीत्युक्तम्। उभयाभ्युपेता संविदेवात्मेत्युपलब्धिपराहतम्। अनुभूतिमात्रमेव परमार्थ इति निष्कर्षकहेत्वाभासाश्च निराकृताः ॥

ननु च 'अहं जानामि' इत्यस्मत्प्रत्यये योऽनिदमंशः प्रकाशैकरसश्चित्पदार्थस्स आत्मा।

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मिन् तद्बलनिर्भासिततया युष्मदर्थलक्षणः अहं जानामीति सिध्यन्नहमर्थ श्चिन्मात्रातिरक्ती युष्मदर्थ एव । नैतदेवम्, 'अहं जानामि' इति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव ॥ किञ्च,

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् । अहंबुद्ध्या परागर्थात् प्रत्यगर्थो हि भिद्यते ॥
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् । भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥
मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता । इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वसंबन्धितया ह्यस्यास्सत्तापि ज्ञप्तितादि च । स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिद्ध्यति ॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् । अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥
*विज्ञातारमरे केन *जानात्येवेति च श्रुतिः । *एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः ॥
*नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति । *ज्ञोऽत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम् ॥

अहंप्रत्ययसिद्धो ह्यस्मदर्थः; युष्मत्प्रत्ययविषयो युष्मदर्थः । तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वन्ध्येतिवद्व्याहतार्थं च । नचासौ ज्ञाताऽहमर्थोऽन्याधीनप्रकाशः, स्वयंप्रकाशत्वात् । चैतन्यस्वभावता हि स्वयंप्रकाशता । यः प्रकाशस्वभावः; सोऽनन्याधीनप्रकाशः, दीपवत् । नहि दीपादेस्स्वप्रभाबलनिर्भासितत्वेनाप्रकाशत्वमन्याधीनप्रकाशत्वं च । किं तर्हि ? दीपस्स्वयंप्रकाशस्वभावस्स्वयमेव प्रकाशते; अन्यानपि प्रकाशयति स्वप्रभया ॥

एतदुक्तं भवति—यथैकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते । यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता; तथाऽपि तेजोद्रव्यमेव, न शौक्ल्यादिवद्गुणः। स्वाश्रयादन्यत्रापि वर्तमानत्वाद्रूपवत्त्वाच्च शौक्ल्यादिवैधर्म्यात्; प्रकाशवत्त्वाच्च तेजोद्रव्यमेव; नार्थान्तरम् । प्रकाशवत्त्वं च स्वस्वरूपस्यान्येषां च प्रकाशकत्वात् । अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्वतच्छेषत्वनिबन्धनः ॥ न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते, मणिद्युमणिप्रभृतीनां विनाशप्रसङ्गात् ॥ दीपेऽप्यवयवविप्रतिपत्तिः कदाचिदपि न स्यात् । नहि विशरणस्वभावावयवा दीपाश्चतुरङ्गुलमात्रं नियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्यगूर्ध्वमधश्चैकरूपा विशीर्णाः प्रचरन्तीति शक्यं वक्तुम् । अतस्सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति पुष्कलकारणक्रमोपनिपातात्तद्विनाशे विनाशाच्चावगम्यते । प्रभायास्स्वाश्रयसमीपे प्रकाशाधिक्यमौष्ण्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम्; अग्न्यादीनामौष्ण्यादिवत् । एवमात्मा चिद्रूप एव चैतन्यगुणक इति । चिद्रूपता हि स्वयंप्रकाशता ॥

तथाहि श्रुतयः— *स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव, एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव * विज्ञानघन एव, * अत्रायं पुरुषस्स्वयंज्योतिर्भवति, * न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, * अथ यो वेदेदं जिघ्राणीति स आत्मा, *कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तज्योतिः पुरुषः, *एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः, *विज्ञातारमरे केन विजानीयात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

*जानात्येवायं पुरुषः *न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्, *स उत्तमः पुरुषः, *नोपजनं स्मरन्निदं शरीरम्, *एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, *तस्माद्वा एतस्मान्मनोमयात्, अन्योऽन्तर आत्मा विज्ञानमयः—इत्याद्याः। वक्ष्यति च *ज्ञोऽत एवेति ॥

अतस्स्वयंप्रकाशोऽयमात्मा ज्ञातैव, न प्रकाशमात्रम्। प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः, दीपादिप्रकाशवत्। तस्मान्नात्मा भवितुमर्हति संवित्। संविदनुभूतिज्ञानादिशब्दास्संबन्धिशब्दा इति च शब्दार्थविदः। नहि लोकवेदयोर्जानात्यादेरकर्मकस्याकर्तृकस्य च प्रयोगो दृष्टचरः। यच्चोक्तमजडत्वात्संविदेवात्मेति; तत्रेदं प्रष्टव्यम्, अजडत्वमिति किमभिप्रेतम्? स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत्; तथा सति दीपादिष्वनैकान्त्यम्। संविदतिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिर्विरोधश्च। अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निरस्तम्। यद्युच्येत, सुखादिरव्यभिचरितप्रकाशोऽप्यन्यस्मै प्रकाशमानतया घटादिवज्जडत्वेनानात्मेति; ज्ञानं वा किं स्वस्मै प्रकाशते? तदपि ह्यन्यस्यैवाहमर्थस्य ज्ञातुरवभासते, अहं सुखीतिवज्जानाम्यहमिति। अतस्स्वस्मै प्रकाशमानत्वरूपजडत्वं संविद्यसिद्धम्। तस्मात् स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोऽहमर्थ एवात्मा। ज्ञानस्यापि प्रकाशता तत्संबन्धायत्ता। तत्कृतमेव हि ज्ञानस्य सुखादेरिव स्वाश्रयचेतनं प्रति प्रकटत्वमितरं प्रत्यप्रकटत्वं च। अतो न ज्ञप्तिमात्रमात्मा; अपि तु ज्ञातैवाहमर्थः ॥

अथ यदुक्तम्, अनुभूतिः परमार्थतो निर्विषया निराश्रया च सती भ्रान्त्या ज्ञातृतयाऽवभासते, रजततयेव शुक्तिः, निरधिष्ठानभ्रमानुपपत्तेः—इति। तदयुक्तम्; तथा सत्यनुभवसामानाधिकरण्येनानुभविताऽहमर्थः प्रतीयेत, 'अनुभूतिरहम्' इति; पुरोऽवस्थितभास्वरद्रव्याकारतया रजतादिरिव। अत्र तु पृथगवभासमानैवेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि, दण्ड इव देवदत्तम्। तथाहि 'अनुभवाम्यहम्' इति प्रतीतिः। तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दण्डमात्रे 'दण्डी देवदत्तः' इति प्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत?

यदप्युक्तं स्थूलोऽहमित्यादिदेहात्माभिमानवत एव ज्ञातृत्वप्रतिभासनात् ज्ञातृत्वमपि मिथ्येति, तदयुक्तम्; आत्मतया अभि[illegible] अनुभूतेरपि मिथ्यात्वं स्यात्, तद्वत एव प्रतीतेः। सकलेतरोपमर्दितत्त्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत्; हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या। यदप्युक्तम्—अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति। अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहङ्कारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः; अपि त्वन्तःकरणरूपस्याहङ्कारस्य। कर्तृत्वादिर्हि रूपादिवद्दृश्यधर्मः; कर्तृत्वेऽहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येवानात्मत्वपराक्त्वजडत्वादिप्रसङ्गश्च—इति। नैतदुपपद्यते—देहस्येवाचेतनत्वप्रकृतिपरिणामत्वदृश्यत्वपराक्त्वपरार्थत्वादियोगादन्तःकरणरूपस्याहङ्कारस्य, चेतनासाधारण-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वभावत्वाच्च ज्ञातृत्वस्य ॥ एतदुक्तं भवति—यथा देहादिर्दृश्यत्वपराक्त्वादिहेतुभिस्तत्प्रत्यनीकद्रष्टृत्वप्रत्यक्त्वादेर्विविच्यते, एवमन्तःकरणरूपाहङ्कारोऽपि तद्दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यत इति ॥

अतो विरोधादेव न ज्ञातृत्वमहङ्कारस्य, दर्शितववत्। यथा दर्शितवं तत्कर्मणोऽहङ्कारस्य नाभ्युपगम्यते, तथा ज्ञातृत्वमपि न तत्कर्मणोऽभ्युपगन्तव्यम् ॥ न च ज्ञातृत्वं विक्रियात्मकम्। ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम्। ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यम्। नित्यत्वं चात्मनो *नात्मा श्रुतेः, इत्यादिषु वक्ष्यति। *ज्ञोऽत एवेत्यत्र ज्ञ इति व्यपदेशेन ज्ञानाश्रयत्वं च स्वाभाविकमिति वक्ष्यति। अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तम्। स्वयमपरिच्छिन्नमेव ज्ञानं सङ्कोचविकासार्हमित्युपपादयिष्यामः। अतः क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते। तच्चेन्द्रियद्वारेण व्यवस्थितम्। तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते। ज्ञानप्रसरे तु कर्तृत्वमस्त्येव। तच्च न स्वाभाविकम्; अपि तु कर्मकृतमित्यविक्रियस्वरूप एवात्मा। एवंरूपविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्याऽत्मन एवेति न कदाचिदपि जडस्याहङ्कारस्य ज्ञातृत्वसंभवः।

जडस्वरूपस्याप्यहङ्कारस्य चित्संनिधानेन तच्छायापत्त्या तत्संभव इति चेत्; केयं चिच्छायापत्तिः? किमहङ्कारच्छायापत्तिस्संविदः? उत संविच्छायापत्तिरहङ्कारस्य? न तावत्संविदः, संविदो ज्ञातृत्वानभ्युपगमात्। नाप्यहङ्कारस्य, उक्तरीत्या तस्य जडस्य ज्ञातृत्वायोगात्, द्वयोरप्यचाक्षुषत्वाच्च; न ह्यचाक्षुषाणां छाया दृष्टा। अथ, अग्निसंपर्कादयःपिण्डौष्ण्यवच्चित्संपर्काज्ज्ञातृत्वोपलब्धिरिति चेत्; नैतत्, संविदि वस्तुतो ज्ञातृत्वानभ्युपगमादेव न तत्संपर्कादहङ्कारे ज्ञातृत्वं तदुपलब्धिर्वा। अहंकारस्य त्वचेतनस्य ज्ञातृत्वासंभवादेव सुतरां न तत्संपर्कात्संविदि ज्ञातृत्वं तदुपलब्धिर्वा ॥ यदप्युक्तम्, उभयत्र न वस्तुतो ज्ञातृत्वमस्ति। अहङ्कारस्त्वनुभूतेरभिव्यञ्जकस्स्वात्मस्थामेवानुभूतिमभिव्यनक्ति, आदर्शादिवत् इति; तदयुक्तम्; आत्मनस्स्वयंज्योतिषो जडस्वरूपाहङ्कराभिव्यङ्ग्यत्वायोगात् ॥ तदुक्तं— *शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः। स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत् ॥ इति। स्वयंप्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थाः। तत्र तदायत्तप्रकाशोऽचिदहङ्कारोऽनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति ॥

किंच अहङ्कारानुभवयोस्स्वभावविरोधादनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यङ्क्तृव्यङ्ग्यभावः। यथोक्तं— *व्यङ्क्तृव्यङ्ग्यत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः। व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे ॥ इति। नच रविकरनिकराणां स्वाभिव्यञ्जककरतलाभिव्यङ्ग्यत्ववत्संविदभिव्यङ्ग्याहङ्काराभिव्यङ्ग्यत्वं संविदस्साधीयः; तत्रापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात्, करतलप्रतिहतगतयो हि रश्मयो बहुलास्स्वयमेव स्फुटतरमुपलभ्यन्त इति तद्बाहुल्यमात्रहेतुत्वात्करतलस्य नाभिव्यञ्जकत्वम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किंचास्य संवित्स्वरूपस्यात्मनोऽहंकारनिर्वर्त्याभिव्यक्तिः किंरूपा ? न तावदुत्पत्तिः, स्वतस्सिद्धतयाऽनन्योत्पाद्यत्वाभ्युपगमात् । नापि तत्प्रकाशनम्, तस्यानुभवान्तरानुभाव्यत्वात् । अत एव च न तदनुभवसाधनानुग्रहः । स हि द्विधा; ज्ञेयस्येन्द्रियसंबन्धहेतुत्वेन वा, यथा जातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसंबन्धहेतुत्वेन; बोद्धृगतकल्मषापनयनेन वा, यथा परतत्त्वावबोधनसाधनस्य शास्त्रस्य शमदमादिना। यथोक्तं *करणानामभूमित्वान्न तत्संबन्धहेतुतेति॥

किंच अनुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहस्सुवचः, स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धनिरसनेन भवेत्; यथा रूपादिग्रहणोत्पत्तिनिरोधिसंतमसनिरसनेन चक्षुषो दीपादिना । न चेह तथाविधं निरसनीयं संभाव्यते । न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिनिरोधि किंचिदप्यहंकारापनेयमस्ति । अस्ति ह्यज्ञानमिति चेन्न, अज्ञानस्याहंकारापनोद्यत्वानभ्युपगमात् । ज्ञानमेव ह्यज्ञानस्य निवर्तकम् । न च संविदाश्रयत्वमज्ञानस्य संभवति; ज्ञानसमानाश्रयत्वात्तत्समानविषयत्वाच्च ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं भवितुमर्हति । यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वम्, तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात्। संविदोऽज्ञानाश्रयत्वाभ्युपगमेऽपि आत्मतयाऽभ्युपगतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः । ज्ञानं हि स्वविषय एवाज्ञानं निवर्तयति, यथा रज्ज्वादौ । अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छिद्येत । अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते । ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः । अतो न केनापि प्रकारेणाहङ्कारेणानुभूतेरभिव्यक्तिः ॥

न च स्वाश्रयतयाऽभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः; प्रदीपादिष्वदर्शनात्, यथावस्थितपदार्थप्रतीत्यनुगुणस्वाभाव्याच्च ज्ञानतत्साधनयोरनुग्राहकस्य च। तच्च स्वतःप्रामाण्यन्यायसिद्धम् ॥ न च दर्पणादिर्मुखादेरभिव्यञ्जकः, अपि तु चाक्षुषतेजःप्रतिफलनरूपदोषहेतुः। तद्दोषकृतश्च तत्रान्यथावभासः। अभिव्यञ्जकस्त्वालोकादिरेव ॥ न चेह तथाऽहङ्कारेण संविदि स्वप्रकाशायां तादृशदोषापादनं संभवति। व्यक्तेस्तु जातिराकार इति तदाश्रयतया प्रतीतिः; न तु व्यक्तिव्यङ्ग्यत्वात्। अतोऽन्तःकरणभूताहङ्कारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किंचिदिह कारणमिति नाहङ्कारस्य ज्ञातृत्वं तथोपलब्धिर्वा। तस्मात्स्वत एव ज्ञातृतया सिद्ध्यन्नहमर्थ एव प्रत्यगात्मा; न ज्ञप्तिमात्रम्। अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरित्युक्तम् ॥

तमोगुणाभिभवात्परागर्थानुभवाभावाच्चाहमर्थस्य विविक्तस्फुटप्रतिभासाभावेऽप्याप्रबोधादहमित्येकाकारेणात्मनस्स्फुरणात्सुषुप्तावपि नाहंभावविगमः। भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् ॥ न हि सुप्तोत्थितः कश्चिदहंभावविधुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञानसाक्षितयाऽवतिष्ठत इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति। एवं हि सुप्तोत्थितस्य परामर्शस्सुखमहमस्वाप्समिति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनस्सुखित्वं ज्ञातृत्वं च ज्ञायते ॥ न च वाच्यं, यथेदानीं सुखं भवति, तथा तदानीमस्वाप्समित्येषा प्रतिपत्तिरिति; अतद्रूपत्वात्प्रतिपत्तेः। न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसंधानानुपपत्तिः; यतस्सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितो 'मयेदं कृतं मयेदमनुभूतमहमेतदवोचम्' इति परामृशति। 'एतावन्तं कालं न किंचिदहमज्ञासिषम्' इति च परामृशतीति चेत्; ततः किम्? न किंचिदिति कृत्स्नप्रतिषेध इति चेन्न 'नाहमवेदिषम्' इति वेदितुरहमर्थस्यैवानुवृत्तेः वेद्यविषयो हि स प्रतिषेधः। न किंचिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात्। सुषुप्तिसमये त्वनुसंधीयमानमहमर्थमात्मानं ज्ञातारमहमिति परामृश्य न किंचिदवेदिषमिति वेदने तस्य प्रतिषिध्यमाने तस्मिन् काले निषिध्यमानाया वित्तेस्सिद्धिमनुवर्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव 'न किंचिदहमवेदिषम्' इति परामर्शेन साधयंस्तमिममर्थं देवानामेव साधयतु ॥ 'मामप्यहं न ज्ञातवान्' इति अहमर्थस्यापि तदानीमननुसंधानं प्रतीयत इति चेत्; स्वानुभवस्ववचनयोर्विरोधमपि न जानन्ति भवन्तः। 'अहं मां न ज्ञातवान्' इति ह्यनुभववचने। मामिति किं निषिध्यत इति चेत्; साधु पृष्टं भवता, तदुच्यते–अहमर्थस्य ज्ञातुरनुवृत्तेः न स्वरूपं निषिध्यते; अपि तु प्रबोधसमयेऽनुसंधीयमानस्याहमर्थस्य वर्णाश्रमादिविशिष्टता। अहं मां न ज्ञातवानित्युक्ते विषयो विवेचनीयः। जागरितावस्थानुसंहितजात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः। स्वाप्ययावस्थाप्रसिद्धाविशदस्वानुभवैकतानश्चाहमर्थोऽहमित्यंशस्य विषयः। अत्र सुप्तोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः ॥

किंच, सुषुप्तावात्माऽज्ञानसाक्षित्वेनास्त इति हि भवदीया प्रक्रिया। साक्षित्वं च साक्षाज्ज्ञातृत्वमेव। न ह्यजानतस्साक्षित्वम्। ज्ञातैव हि लोकवेदयोस्साक्षीति व्यपदिश्यते; न ज्ञानमात्रम्। स्मरति च भगवान् पाणिनिः *साक्षाद्द्रष्टरि संज्ञायाम्, इति साक्षाज्ज्ञातर्येव साक्षिशब्दम्। स चायं साक्षी जानामीति प्रतीयमानोऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत? आत्मने स्वयमवभासमानोऽहमित्येवावभासत इति स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानोऽहमित्येवावभासत इति सिद्धम् ॥

यत्तु, मोक्षदशायामहमर्थो नानुवर्तत इति; तदपेशलम्। तथा सत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात्। न चाहमर्थो धर्ममात्रम्; येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत। प्रत्युत स्वरूपमेवाहमर्थ आत्मनः। ज्ञानं तु तस्य धर्मः, 'अहं जानामि, ज्ञानं मे जातम्' इति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव ॥

अपि च यः परमार्थतो भ्रान्त्या वाऽऽध्यात्मिकादिदुःखैर्दुःखितया स्वात्मानमनुसंधत्ते–अहं दुःखीति; 'सर्वमेतद्दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलस्स्वस्थो भवेयम्' इत्युत्पन्नमोक्षरागस्स एव तत्साधने प्रवर्तते। स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेत्; अपसर्पेदेवासौ मोक्षकथाप्रस्तावात्। ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात्। अहमुपलक्षितं प्रकाशमात्रमपवर्गेऽवतिष्ठत इति चेत्; किमनेन? मयि नष्टेऽपि किमपि प्रकाशमात्रमपवर्गेऽवतिष्ठत इति

Digitization by Arya Samaj Charitable Foundation, Chennai

मत्वा नहि कश्चित् बुद्धिपूर्वकारी प्रयतते। अतोऽहमर्थस्यैव ज्ञातृतया सिद्ध्यतः प्रत्यगात्मत्वम्। स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते, स्वस्मै प्रकाशमानत्वात्। यो यः स्वस्मै प्रकाशते, स सर्वोऽहमित्येव प्रकाशते, यथा तथावभासमानत्वेनोभयवादिसंमतस्संसार्यात्मा। यः पुनरहमिति न चकास्ति;नासौ स्वस्म प्रकाशते,यथा घटादिः। स्वस्मै प्रकाशते चायं मुक्तात्मा। तस्मादहमित्येव प्रकाशते। न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः, मोक्षविरोधात्, अज्ञत्वाद्यहेतुत्वाच्चाहंप्रत्ययस्य। अज्ञानं नाम स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा? अहमित्येवात्मनस्स्वरूपमिति स्वरूपज्ञानरूपोऽहंप्रत्ययो नाज्ञत्वमापादयति; कुतस्संसारित्वम्? अपि तु तद्विरोधित्वान्नाशयत्येव। ब्रह्मात्मभावापरोक्ष्यनिर्धूतनिरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च। श्रूयते हि– *तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च, इति, *अहमेकः प्रथममासं वर्तामि च भविष्यामि च, इत्यादि। सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव– * हन्ताहमिमास्तिस्रो देवताः, *बहु स्यां प्रजायेय, *स ईक्षत लोकान्नु सृजा इति। तथा– *यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ *अहमात्मा गुडाकेश, *न त्वेवाहं जातु नासम्, *अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा, *अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते, *तेषामहं समुद्धर्ता मृत्युसंसारसागरात्, *अहं बीजप्रदः पिता, *वेदाहं समतीतानि –इत्यादिषु॥

यद्यहमित्येवात्मनः स्वरूपम्; कथं तर्ह्यहंकारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते *महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इति? उच्यते–स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात्तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्रत्यगात्मनः स्वरूपम्। अव्यक्तपरिणामभेदस्याहंकारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते। स त्वनात्मनि देहेऽहंभावकरणहेतुत्वेन अहंकार इत्युच्यते। अस्य त्वहंकारशब्दस्य अभूततद्भावेऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या। अयमेव त्वहंकार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते। तस्माद्बाधकापेताऽहंबुद्धिस्साक्षादात्मगोचरैव। शरीरगोचरा त्वहंबुद्धिरविद्यैव। यथोक्तं भगवता पराशरेण–*श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन!। अनात्मन्यात्मबुद्धिर्या–इति। यदि ज्ञप्तिमात्रमेवात्मा, तदाऽनात्मन्यात्माभिमाने शरीरे ज्ञप्तिमात्रप्रतिभासः स्यात्; न ज्ञातृत्वप्रतिभासः। तस्माज्ज्ञाताऽहमर्थ एवात्मा। तदुक्तम्–*अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात्। अविद्यायोगतश्चात्मा ज्ञाताऽहमिति भासते॥ इति॥ तथाच *देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः। नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नस्स्वतस्सुखी॥ इति। अनन्यसाधनः–स्वप्रकाशः। व्यापी–अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशनस्वभावः॥

यदुक्तं दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति; कोऽयं दोष इति वक्तव्यम्, यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः। अनादिभेदवासनैव हि दोष इति चेत्; भेदवासनायास्तिमिरादिवद्यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम्? अनेनैव

Digitization by Arya Samaj Charitable Foundation, Chennai

शास्त्रविरोधेन ज्ञास्यत इति चेन्न, अन्योन्याश्रयणात्— शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयः, भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय इति। किंच, यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वम्; शास्त्रमपि तन्मूलत्वेन तथैव स्यात्॥ अथोच्येत--दोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात्तत् प्रत्यक्षस्य बाधकमिति। तन्न; दोषमूलत्वे ज्ञाते सति परत्वमकिंचित्करम्। रज्जुसर्पज्ञाननिमित्तभये सति भ्रान्तोऽयमिति परिज्ञातेन केनचित् 'नायं सर्पो मा भैषीः' इत्युक्तेऽपि भयानिवृत्तिदर्शनात्। शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम्; श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः॥

अपि च इदं शास्त्रम्; एतच्चासंभाव्यमानदोषम्; प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया? न तावत्स्वतस्सिद्धा निर्धूतनिखिलविशेषाऽनुभूतिरिममर्थमवगमयति; तस्यास्सर्वविषयविरक्तत्वात्, शास्त्रपक्षपातविरहाच्च। नाप्यैन्द्रियिकं प्रत्यक्षम्, दोषमूलत्वेन विपरीतार्थत्वात्। तन्मूलत्वादेव नान्यान्यपि प्रमाणानि। अतस्स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः॥

ननु व्यावहारिकप्रमाणप्रमेयव्यवहारोऽस्माकमप्यस्त्येव। कोऽयं व्यावहारिको नाम? आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथाऽवस्थित इति चेत्; किं तेन प्रयोजनम्? प्रमाणतया प्रतिपन्नेऽपि यौक्तिकबाधादेव प्रमाणकार्याभावात्। अथोच्येत—शास्त्रप्रत्यक्षयोः द्वयोरप्यविद्यामूलत्वेऽपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते; शास्त्रविषयस्य सदद्वितीयब्रह्मणः पश्चात्तनबाधादर्शनेन निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थः—इति। तदयुक्तम्, अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात्। एतदुक्तं भवति—यथा सकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्य तिमिरदोषाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते। न तत्र बाधकप्रत्ययोऽस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतं द्विचन्द्रत्वमपि मिथ्यैव। दोषो ह्ययथार्थज्ञानहेतुः। तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति।

भवन्ति चात्र प्रयोगाः—विवादाध्यासितं ब्रह्म मिथ्या, अविद्यावत उत्पन्नज्ञानविषयत्वात्, प्रपञ्चवत्,। ब्रह्म मिथ्या, ज्ञानविषयत्वात्, प्रपञ्चवत्। ब्रह्म मिथ्या, असत्यहेतुजन्यज्ञानविषयत्वात्, प्रपञ्चवदेव॥

न च वाच्यं स्वाप्नस्य हस्त्यादिविज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध इति। स्वाप्नज्ञानस्यासत्यत्वाभावात्। तत्र हि विषयाणामेव मिथ्यात्वम्; तेषामेव हि बाधो दृश्यते; न ज्ञानस्य; न हि मया स्वप्नवेलायामनुभूतं ज्ञानमपि न विद्यत इति कस्यचिदपि प्रत्ययो जायते। दर्शनं तु विद्यते अर्था न सन्तीति हि बाधकप्रत्ययः। मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतेर्भयस्य च हेतुः; तत्रापि ज्ञानस्याबाधितत्वात्। विषयेन्द्रियादिदोषजन्यं रज्ज्वादौ सर्पादिविज्ञानं

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्यमेव भयादिहेतुः। सत्यैवादृष्टेऽपि स्वात्मनि सर्पसन्निधानादृष्टबुद्धिः। सत्यव शङ्काविषबुद्धिर्मरणहेतुभूता। वस्तुभूत एव जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः। एषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते। हस्त्यादीनामभावेऽपि कथं तद्बुद्धयस्सत्या भवन्तीति चेत्; नैतत्, बुद्धीनां सालम्बनत्वमात्रनियमात्। अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितम्; प्रतिभासमानता चास्त्येव दोषवशात्। स तु बाधितोऽसत्य इत्यवसीयते। अबाधिता हि बुद्धिस्सत्यैवेत्युक्तम्। रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धिः, रेखायास्सत्यत्वात्। ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः, वर्णात्मता त्वसत्या। नैवम्, वर्णात्मताया असत्याया उपायत्वायोगात्। असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टमनुपपन्नं च। अथ तस्यां वर्णबुद्धेरुपायत्वम्; एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात्, बुद्धेस्सत्यत्वादेव; उपायोपेययोरेकत्वप्रसङ्गश्च, उभयोर्वर्णबुद्धित्वाविशेषात्। रेखाया अविद्यमानवर्णात्मनोपायत्वे चैकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात्सर्ववर्णप्रतिपत्तिस्स्यात्। अथ पिण्डविशेषे देवदत्तादिशब्दसंकेतवच्चक्षुर्ग्राह्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसंकेतवशाद्रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति। हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः, रेखायास्संकेतस्य च सत्यत्वात्। रेखागवयादपि सत्यगवयबुद्धिस्सादृश्यनिबन्धना,सादृश्यं च सत्यमेव। न चैकरूपस्य शब्दस्य नादविशेषेणार्थभेदबुद्धिहेतुत्वेऽप्यसत्यात्सत्यप्रतिपत्तिः; नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैस्सह संबन्धग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात्। शब्दस्यैकरूपत्वमपि न साधीयः, गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्। अतोऽसत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ॥

ननु न शास्त्रस्य गगनकुसुमवदसत्यत्वम्; प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात्। उत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य। न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्रब्रह्मज्ञानोपायः। यदोपायस्तदा अस्त्येव शास्त्रम्, अस्तीतिबुद्धेः। नैवम्; असति शास्त्रे अस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात्। ततः किम्? इदं ततः— मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणो मिथ्यात्वम्; यथा धूमबुद्ध्या गृहीतबाष्पजन्याग्निज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वम्। पश्चात्तनबाधादर्शनञ्चासिद्धम्; शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधदर्शनात्। तत्तु भ्रान्तिमूलमिति चेत्; एतदपि भ्रान्तिमूलमिति त्वयैवोक्तम्। पाश्चात्त्यबाधादर्शनं तु तस्यैवेत्यलमप्रतिष्ठितकुतर्कपरिहसनेन ॥

यदुक्तं वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि, *सदेव सोम्येदमग्र आसीत्, इत्येवमादीनीति; तदयुक्तम्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वम्, जगन्निमित्तत्वम्, सर्वज्ञता, सर्वशक्तियोगः, सत्यसङ्कल्पत्वम्, सर्वान्तिरत्वम्, सर्वाधारत्वम्, सर्वनियमनमित्याद्यनेककल्याणगुणविशिष्टताम्, कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्य, एवंभूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात्प्रकरणस्य। प्रपञ्चितश्चायमर्थो वेदार्थसंग्रहे। अत्राप्यारम्भणाधिकरणे निपुणतरमुपपादयिष्यते ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

*अथ परा यया तदक्षरम्, इत्यत्रापि प्राकृतान् हेयगुणान् प्रतिषिध्य नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वाव्ययत्वभूतयोनित्वसार्वज्ञ्यादिकल्याणगुणयोगः परस्य ब्रह्मणः प्रतिपादितः॥

*सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशेषवस्तुसिद्धिः। प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं हि सामानाधिकरण्यम्। तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैस्तत्तद्गुणविरोध्याकारप्रत्यनीकाकारैर्वैकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोऽवश्याश्रयणीयः। इयांस्तु विशेषः—एकस्मिन् पक्षे पदानां मुख्यार्थता; अपरस्मिंश्च तेषां लक्षणा। न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव; एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात्। तथा सति सामानाधिकरण्यासिद्धिश्च; एकस्मिन् वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्। न चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि; एकस्यैव वस्तुनोऽनेकविशेषणविशिष्टताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य। *भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यम्, इति हि शाब्दिकाः॥

यदुक्तम्, एकमेवाद्वितीयमित्यत्राद्वितीयपदं गुणतोऽपि सद्वितीयतां न सहते; अतस्सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयम्। कारणतयोपलक्षितस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते, *सत्यं ज्ञानमनन्तं ब्रह्मेति। अतो लिलक्षयिषितं ब्रह्म निर्गुणमेव; अन्यथा *निर्गुणम् *निरञ्जनम्, इत्यादिभिर्विरोधश्च—इति; तदनुपपन्नम्; जगदुपादानस्य ब्रह्मणस्स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वादद्वितीयपदस्य। तथैव विचित्रशक्तियोगमेवावगमयति—*तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत, इत्यादि। अविशेषेणाद्वितीयमित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत इति चेत्; सिसृक्षोर्ब्रह्मण उपादानकारणत्वं *सदेव सोम्येदमग्र आसीदेकमेव, इति प्रतिपादितम्। कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमित्तान्तरमिति तदेवाद्वितीयपदेन निषिद्धयत इत्यवगम्यते। सर्वनिषेधे हि स्वाभ्युपगतास्सिषाधयिषिता नित्यत्वादयश्च निषिद्धास्स्युः। सर्वशाखाप्रत्ययन्यायश्चात्र भवतो विपरीतफलः, सर्वशाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामत्रोपसंहारहेतुत्वात्। अतः कारणवाक्यस्व भावादपि *सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन सविशेषमेव प्रतिपाद्यत इति विज्ञायते॥

न च निर्गुणवाक्यविरोधः, प्राकृतहेयगुणविषयत्वात्तेषां *निर्गुणम्, *निरञ्जनम्, *निष्कलं निष्क्रियं शान्तम्, इत्यादीनाम्। ज्ञानमात्रस्वरूपवादिन्योऽपि श्रुतयः ब्रह्मणो ज्ञानस्वरूपतामभिदधति; न तावता निर्विशेषज्ञानमात्रमेव तत्त्वम्, ज्ञातुरेव ज्ञानस्वरूपत्वात्। ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिदीपादिवद्युक्तमेवेत्युक्तम्। ज्ञातृत्वमेव हि सर्वाश्श्रुतयो वदन्ति—*यस्सर्वज्ञस्सर्ववित्, *तदैक्षत, *सेयं देवतैक्षत, *स ईक्षत लोकान्नु सृजा इति, *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, *ज्ञाज्ञौ द्वावजावीशनीशौ, *तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्। पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् *न

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः—इत्याद्याश्श्रुतयो ज्ञातृत्वप्रमुखान् कल्याणगुणान् ज्ञानस्वरूपस्यैव ब्रह्मणस्स्वाभाविकान्वदन्ति; समस्तहेयरहिततां च। निर्गुणवाक्यानां सगुणवाक्यानां च विषयमपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान् प्रतिषिद्धय सत्यकामस्सत्यसङ्कल्पः इति ब्रह्मणः कल्याणगुणान्विदधतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताश्रयणमपि नाशङ्कनीयम् ॥

*भीषाऽस्माद्वातः पवते, इत्यादिना ब्रह्मगुणानारभ्य, *ते ये शतमित्यनुक्रमेण क्षेत्रज्ञानन्दातिशयमुक्त्वा *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्, इति ब्रह्मणः कल्याणगुणानन्त्यमत्यादरेण वदतीयं श्रुतिः॥ *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता, इति ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानन्त्यं ब्रवीति। विपश्चिता ब्रह्मणा सह सर्वान् कामान् समश्नुते। काम्यन्त इति कामाः—कल्याणगुणाः। ब्रह्मणा सह तद्गुणान् सर्वानश्नुत इत्यर्थः। दहरविद्यायां, *तस्मिन्यदन्तस्तदन्वेष्टव्यम्, इतिवद्गुणप्राधान्यं वक्तुं सहशब्दः। फलोपासनयोः प्रकारैक्यं, *यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवतिती श्रुत्यैव सिद्धम्॥

*यस्यामतं तस्य मतम्, अविज्ञातं विजानताम्, इति ब्रह्मणो ज्ञानाविषयत्वमुक्तं चेत्; *ब्रह्मविदाप्नोति परम्, ब्रह्म वेद ब्रह्मैव भवति, इति ज्ञानान्मोक्षोपदेशो न स्यात्। *असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः, इति ब्रह्मविषयज्ञानासद्भावसद्भावाभ्यामात्मनाशमात्मसत्तां च वदति। अतो ब्रह्मविषयवेदनमेवापवर्गोपायं सर्वाश्श्रुतयो विदधति। ज्ञानं चोपासनात्मकम्। उपास्यं च ब्रह्म सगुणमित्युक्तम्। *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, इति ब्रह्मणोऽनन्तस्यापरिच्छिन्नगुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैतावदिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातममतमित्युक्तम्, अपरिच्छिन्नत्वाद्ब्रह्मणः। अन्यथा *यस्यामतं तस्य मतम्, *विज्ञातमविजानतामिति मतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते॥

यत्तु *न दृष्टेर्द्रष्टारं न मतेर्मन्तारम्, इति श्रुतिर्दृष्टेर्मतेर्व्यतिरिक्त द्रष्टारं मन्तारं च प्रतिषेधतीति; तदागन्तुकचैतन्यगुणयोगितया ज्ञातुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा न तथाऽऽत्मानं पश्येः, न मन्वीथाः; अपि तु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येरित्यभिदधातीति परिहृतम्। अथवा दृष्टेर्द्रष्टारं मतेर्मन्तारं जीवात्मानं प्रतिषिध्य सर्वभूतान्तरात्मानं परमात्मानमेवोपास्स्वेति वाक्यार्थः; अन्यथा *विज्ञातारमरे केन विजानीयात्, इत्यादिज्ञातृत्वश्रुतिविरोधश्च॥

*आनन्दो ब्रह्मेति आनन्दमात्रमेव ब्रह्मस्वरूपं प्रतीयत इति यदुक्तम्; तज्ज्ञानाश्रयस्य ब्रह्मणो ज्ञानं स्वरूपमिति वदतीति परिहृतम्। ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यते। विज्ञानमानन्दं ब्रह्मेत्यानन्दरूपमेव ज्ञानं ब्रह्मेत्यर्थः। अत एव भवतामेकरसता। अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तम्। तद्वदेव *स एको ब्रह्मण आनन्दः, *आनन्दं ब्रह्मणो विद्वान्, इति

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यतिरेकनिर्देशाच्च नानन्दमात्रं ब्रह्म; अपि त्वानन्दि । ज्ञातृत्वमेव ह्यानन्दित्वम् ॥

यदिदमुक्तम् *यत्र हि द्वैतमिव भवति, *नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति, *यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्, इति भेदनिषेधो बहुधा दृश्यत इति; तत्कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्, तत्प्रत्यनीकनानात्वं प्रतिषिद्ध्यते; न पुनः *बहु स्यां प्रजायेयेति बहुभवनसंकल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतम् । नानात्वनिषेधादियमपरमार्थविषयेति चेन्न; प्रत्यक्षादिसकलप्रमाणानवगतं नानात्वं दुरारोहं ब्रह्मणः प्रतिपाद्य तदेव बाध्यत इत्युपहास्यमिदम् ॥

*यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति, इति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तम्; तदसत्, *सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत, इति तन्नानात्वानुसन्धानस्य शान्तिहेतुत्वोपदेशात् । तथा हि—सर्वस्य जगतस्तदुत्पत्तिस्थितिलयकर्मतया तदात्मकत्वानुसंधानेनात्र शान्तिर्विधीयते । अतो यथावस्थितदेवतिर्यङ्मनुष्यस्थावरादिभेदभिन्नं जगत् ब्रह्मात्मकमित्यनुसंधानस्य शान्तिहेतुतया अभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसङ्गः । एवं तर्हि *अथ तस्य भयं भवतीति किमुच्यते ? इदमुच्यते *यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति, इत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठाऽभिहिता; तस्या विच्छेदे भयं भवतीति । यथोक्तं महर्षिभिः—*यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते । सा हानिस्तन्महच्छिद्रं सा भ्रान्तिस्सा च विक्रिया ॥ इत्यादि । ब्रह्मणि प्रतिष्ठाया अन्तरमवकाशो विच्छेद एव ॥

यदुक्तम्, *न स्थानतोऽपि, इति सर्वविशेषरहितं ब्रह्मेति च वक्ष्यतीति, तन्न, सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति । *मायामात्रं तु, इति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत इति जागरितावस्थानुभूतानामिव पारमार्थिकत्वमेव वक्ष्यति ॥

स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्रमेव परमार्थोऽन्यदपारमार्थिकमिति प्रतीयत इति यदभिहितम्; तदसत्—

*यो मामजमनादिं च वेत्ति लोकमहेश्वरम् । *मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥
*अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
*विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥
*उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
*स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः।
इच्छागृहीताभिमतोरुदेहस्संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः।
परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः।
सर्वेश्वरस्सर्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः॥
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम्।
संदृश्यते वाऽप्यधिगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥

*शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्दस्सर्वकारणकारणे ॥
संभर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः। नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि। स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥
*ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
*एवमेष महाशब्दो मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ॥
*समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर। देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा। चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥
*एवंप्रकारममलं नित्यं व्यापकमक्षयम्। समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥
*परः पराणां परमः परमात्माऽऽत्मसंस्थितः। रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः। वर्जितश्शक्यते वक्तुं यस्सदाऽस्तीति केवलम् ॥
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ॥
*तद्ब्रह्म परमं नित्यमजमक्षरमव्ययम्। एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥
तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत्। तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥
*प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः। विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥
*द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूतमेव च। क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते ॥
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्। एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ॥
परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत् ॥
*विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा। अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा। संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥
*प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया । विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥
तयोस्सैव पृथग्भावकारणं संश्रयस्य च ॥
यथा सक्तं जले वातो बिभर्ति कणिकाशतम् । शक्तिस्सापि तथा विष्णोः प्रधानपुरुषात्मनः ॥
*तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥

इत्यादिना परं ब्रह्म स्वभावत एव निरस्तनिखिलदोषगन्धं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य, कृत्स्नस्य चिदचिद्वस्तुनस्सर्वावस्थावस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणश्शरीरतया रूपत्वं शरीररूपतन्वंशशक्तिविभूत्यादिशब्दैस्तत्तच्छब्दसामानाधिकरण्येन चाभिधाय, तद्विभूतिभूतस्य चिद्वस्तुनस्स्वरूपेणावस्थितिमचिन्मिश्रतया क्षेत्रज्ञरूपेण स्थितिं चोक्त्वा, क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वाननुसन्धानमचिद्रूपार्थाकारतयाऽनुसन्धानं च प्रतिपादितमिति, परं ब्रह्म सविशेषं, तद्विभूतिभूतं जगदपि पारमार्थिकमेवेति ज्ञायते ॥

*प्रत्यस्तमितभेदमित्यत्र देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्याप्यात्मनस्स्वरूपं तद्गतभेदरहितत्वेन तद्भेदवाचिदेवादिशब्दागोचरं ज्ञानसत्तैकलक्षणं स्वसंवेद्यं योगयुङ्मनसो न गोचर इत्युच्यत इति, अनेन न प्रपञ्चापलापः । कथमिदमवगम्यत इति चेत् ; तदुच्यते—अस्मिन् प्रकरणे संसारैकभेषजतया योगमभिधाय योगावयवान् प्रत्याहारपर्यन्तांश्चोक्त्वा, धारणासिद्ध्यर्थं शुभाश्रयं वक्तुं परस्य ब्रह्मणो विष्णोश्शक्तिशब्दाभिधेयं रूपद्वयं मूर्तामूर्तविभागेन प्रतिपाद्य, तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितम् अचिद्विशिष्टं क्षेत्रज्ञं मूर्ताख्यविभागं भावनात्रयान्वयादशुभमित्युक्त्वा, द्वितीयस्य कर्माख्याविद्याविरहिणोऽचिद्वियुक्तस्य ज्ञानैकाकारस्यामूर्ताख्यविभागस्य निष्पन्नयोगिध्येयतया योगयुञ्जनसोऽनालम्बनतया स्वतश्शुद्धिविरहाच्च शुभाश्रयत्वं प्रतिषिध्य, परशक्तिरूपमिदममूर्तमपरशक्तिरूपं क्षेत्रज्ञाख्यमूर्तं च परशक्तिरूपस्यात्मनः क्षेत्रज्ञतापत्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्या चेत्येतच्छक्तित्रयाश्रयो भगवदसाधारणम् * आदित्यवर्णमित्यादिवेदान्तसिद्धं मूर्तरूपं शुभाश्रय इत्युक्तम् । अत्र परिशुद्धात्मस्वरूपस्य शुभाश्रयतानर्हतां वक्तुं *प्रत्यस्तमितभेदं यत् इत्युच्यते । तथाहि—

*न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः । द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम् ॥
समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥

इति च वदति । तथा चतुर्मुखसनकसनन्दनादीनां जगदन्तर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयतानर्हतामुक्त्वा, बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां च स्वतश्शुद्धिविरहाद्भगवता शौनकेन शुभाश्रयता निषिद्धा—

*आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः। अविद्यान्तर्गतास्सर्वे ते हि संसारगोचराः॥
पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः। नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः॥
तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत्॥

इत्यादिना परस्य ब्रह्मणो विष्णोस्स्वरूपं स्वासाधारणमेव शुभाश्रय इत्युक्तम्। अतोऽत्र न भेदापलापः प्रतीयते॥

*ज्ञानस्वरूपमित्यत्रापि ज्ञानव्यतिरिक्तस्यार्थजातस्य कृत्स्नस्य न मिथ्यात्वं प्रतिपाद्यते, ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणावभासो भ्रान्तिरित्येतावन्मात्रवचनात्। न हि शुक्तिकाया रजततयाऽवभासो भ्रान्तिरित्युक्ते जगति कृत्स्नं रजतजातं मिथ्या भवति। जगद्ब्रह्मणोस्सामानाधिकरण्येनैक्यप्रतीतेः, ब्रह्मणो ज्ञानस्वरूपस्यार्थाकारता भ्रान्तिरित्युक्ते सत्यर्थजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेत्; तदसत्; अस्मिन् शास्त्रे परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नतया तस्य भ्रान्तिदर्शनासंभवात्। सामानाधिकरण्येनैक्यप्रतिपादनं च बाधासहमविरुद्धं चेत्यनन्तरमेवोपपादयिष्यते। अतोऽयमपि श्लोको नार्थस्वरूपस्य बाधकः। तथाहि— *यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्म *इति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति, *इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥ इति शास्त्रेणार्थस्य इतिहासपुराणाभ्यामुपबृंहणं कार्यमिति विज्ञायते। उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैस्स्वावगतवेदवाक्यार्थव्यक्तीकरणम्। सकलशाखागतस्य वाक्यार्थस्याल्पभागश्रवणाद्दुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेव॥

तत्र पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानवतो भगवतः पराशरात्स्वावगतवेदार्थोपबृंहणमिच्छन्मैत्रेयः परिपप्रच्छ—

*सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत्। बभूव भूयश्च यथा महाभाग भविष्यति॥
यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरम्। लीनमासीद्यथा यत्र लयमेष्यति यत्र च॥ इत्यादिना।

अत्र ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाश्च पृष्टाः। ब्रह्मस्वरूपविशेषप्रश्नेषु यतश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वाद्यन्मयमित्यनेन सृष्टिस्थितिलयकर्मभूतं जगत्किमात्मकमिति पृष्टम्। तस्य चोत्तरं जगच्च स इति। इदं च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतम्, न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतम्; यन्मयमिति प्रश्नस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य। यन्मयमिति मयडत्र न विकारार्थः, पृथक् प्रश्नवैयर्थ्यात्। नापि प्राणमयादिवत्स्वार्थिकः, जगच्च स इत्युत्तरानुपपत्तेः। तदा हि विष्णुरेवेत्युत्तरमभविष्यत्। अतः प्राचुर्यार्थ एव। *तत्प्रकृतवचने मयट् इति मयट्। कृत्स्नं च जगत्तच्छरीरतया तत्प्रचुरमेव। तस्माद्यन्मयमित्यस्य प्रतिवचनं जगच्च स इति सामानाधिकरण्यं जगद्ब्रह्मणोश्शरीरात्मभावनिबन्धनमिति निश्चीयते। अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेऽभ्युपगम्यमाने सर्वाण्येतानि प्रश्नप्रतिवचनानि न [redacted] संगच्छन्ते।

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्विवरणरूपं कृत्स्नं च शास्त्रं न संगच्छते। तथाहि सति प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेकमेवोत्तरं स्यात्। जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये सत्यसङ्कल्पत्वादिकल्याणगुणैकतानता निखिलहेयप्रत्यनीकता च बाध्येत। सर्वाशुभास्पदं च ब्रह्म भवेत्। आत्मशरीरभाव एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्थाप्यते॥ अतो–*विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः॥ इति संग्रहेणोक्तमर्थं *परः पराणामित्यारभ्य विस्तरेण वक्तुं परब्रह्मभूतं भगवन्तं विष्णुं स्वेनैव स्वरूपेणावस्थितम् *अविकारायेति श्लोकेन प्रथमं प्रणम्य तमेव हिरण्यगर्भस्वावतारशङ्कररूपत्रिमूर्तिप्रधानकालक्षेत्रज्ञसमष्टिव्यष्टिरूपेणावस्थितं च नमस्करोति। तत्र *ज्ञानस्वरूपमित्ययं श्लोकः क्षेत्रज्ञव्यष्टयात्मनाऽवस्थितस्य परमात्मनस्स्वभावमाह। तस्मान्नात्र निर्विशेषवस्तुप्रतीतिः॥

यदि निर्विशेषज्ञानरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रम्; तर्हि, *निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥ इति चोद्यम्, *शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥ भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता॥ इति परिहारश्च न घटते। तथाहि सति, निर्गुणस्य ब्रह्मणः कथं सर्गादिकर्तृत्वम्? न ब्रह्मणः पारमार्थिकस्सर्गः, अपि तु भ्रान्तिपरिकल्पितः—इति चोद्यपरिहारौ स्याताम्। उत्पत्त्यादिकार्यं सत्त्वादिगुणयुक्तापरिपूर्णकर्मवश्येषु दृष्टमिति सत्त्वादिगुणरहितस्य परिपूर्णस्याकर्मवश्यस्य कर्मसंबन्धानर्हस्य कथं सर्गादिकर्तृत्वमभ्युपगम्यत इति चोद्यम्। दृष्टसकलविसजातीयस्य ब्रह्मणो यथोदितस्वभावस्यैव जलादिविसजातीयस्याग्न्यादेरौष्ण्यादिशक्तियोगवत्सर्वशक्तियोगो न विरुध्यत इति परिहारः॥

परमार्थस्त्वमेवैकः इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वदति। अपि तु कृत्स्नस्य तदात्मकतया तद्व्यतिरेकेणावस्थितस्यापारमार्थ्यम्। तदेवोपपादयति—*तवैष महिमा येन व्याप्तमेतच्चराचरमिति। येन त्वयेदं चराचरं व्याप्तम्; अतस्त्वदात्मकमेवेदं सर्वमिति त्वदन्यः कोऽपि नास्ति। अतस्सर्वात्मतया त्वमेवैकः परमार्थः। अत इदमुच्यते—तवैष महिमा, या सर्वव्याप्तिः—इति। अन्यथा तवैषा भ्रान्तिरिति वक्तव्यम्। जगतः पते त्वमित्यादीनां पदानां लक्षणा च स्यात्। लीलया महीमुद्धरतो भगवतो महावराहस्य स्तुतिप्रकरणविरोधश्च॥

यतः कृत्स्नं जगत् ज्ञानात्मना त्वयाऽऽत्मतया व्याप्तत्वेन तव मूर्तम्, तस्मात्त्वदात्मकत्वानुभवसाधनयोगविरहिण एतत्केवलदेवमनुष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्तीत्याह *यदेतद्दृश्यते* इति॥ न केवलं वस्तुतस्त्वदात्मकं जगद्देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः, ज्ञानाकाराणामात्मनां देवमनुष्याद्यर्थाकारत्वदर्शनमपि भ्रम इत्याह *ज्ञानस्वरूपमखिलम् *इति॥ ये पुनर्बुद्धिमन्तो ज्ञानस्वरूपात्मविदस्सर्वस्य भगवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसश्च ते देवमनुष्यादिप्रकृतिपरिणामविशेषशरीररूपमिदमखिलं जगत् शरीरातिरिक्तज्ञानस्वरूपात्मकं त्वच्छरीरं च पश्यन्ती-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्याह *ये तु ज्ञानविदः* इति। अन्यथा श्लोकानां पौनरुक्त्यम्, पदानां लक्षणा, अर्थविरोधः, प्रकरणविरोधः शास्त्रतात्पर्यविरोधश्च ॥

तस्यात्मपरदेहेषु सतोऽप्येकमयम् इत्यत्र सर्वेष्वात्मसु ज्ञानैकाकारतया समानेषु सत्सु देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिण्डसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनमतथ्यमित्युच्यते। पिण्डगतमात्मगतमपि द्वैतं न प्रतिषिध्यते। देवमनुष्यादिविविधविचित्रपिण्डेषु वर्तमानं सर्वमात्मवस्तु सममित्यर्थः। यथोक्तं भगवता *शुनि चैव श्वपाके च पण्डितास्समदर्शिनः* *निर्दोषं हि समं ब्रह्म इत्यादिषु। तस्यात्मपरदेहेषु सतोऽपीति देहातिरिक्ते वस्तुनि स्वपरविभागस्योक्तत्वात् ॥ *यद्य-न्योऽस्ति परः कोऽपि* इत्यत्रापि नात्मैक्यं प्रतीयते; यदि मत्तः परः कोऽप्यन्य इत्येकस्मिन्नर्थे परशब्दान्यशब्दयोः प्रयोगायोगात्। तत्र परशब्दस्स्वव्यतिरिक्तात्मवचनः। अन्यशब्दस्तस्यापि ज्ञानैकाकारत्वादन्याकारत्वप्रतिषेधार्थः। एतदुक्तं भवति—यदि मद्व्यतिरिक्तः कोऽप्यात्मा मदाकार-भूतज्ञानाकारादन्याकारोऽस्ति, तदाहमेवमाकारः, अयं चान्यादृशाकार इति शक्यते व्यपदेष्टुम्। न चैवमस्ति; सर्वेषां ज्ञानैकाकारत्वेन समानत्वादेवेति ॥

*वेणुरन्ध्रविभेदेन *इत्यत्राप्याकारवैषम्यमात्मनां न स्वरूपकृतम्, अपितु देवादिपिण्ड-प्रवेशकृतमित्युपदिश्यते; नात्मैक्यम्। दृष्टान्ते चानेकरन्ध्रवर्तिनां वाय्वंशानां न स्वरूपैक्यम्; अपि त्वाकारसाम्यमेव। तेषां वायुत्वेनैकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः। एवमात्मनां देवादिसंज्ञाभेदः। यथा तैजसाप्यपार्थिवद्रव्यांशभूतानां पदार्थानां तत्तद्द्रव्यत्वेनैक्यमेव, न स्वरूपैक्यम्; तथा वायवीयानामंशानामपि स्वरूपभेदोऽवर्जनीयः। * सोऽहं स च त्वम् * इति सर्वात्मनां पूर्वोक्तं ज्ञानाकारत्वं तच्छब्देन परामृश्य तत्सामानाधिकरण्येनाहं त्वमित्यादीनामर्थानां ज्ञानमेवाकार इत्युपसंहरन् देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजेत्याह। अन्यथा देहातिरिक्ता-त्मोपदेश्यस्वरूपे अहं त्वं सर्वमेतदात्मस्वरूपमिति भेदनिर्देशो न घटते। अहंत्वमादिशब्दानामुप-लक्ष्येण सर्वमेतदात्मस्वरूपमित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न संगच्छते। सोऽपि यथो-पदेशमकरोदित्याह *तत्याज भेदं परमार्थदृष्टिः *इति। कुतश्चैष निर्णय इति चेत्, देहात्मविवेक-विषयत्वादुपदेशस्य। तच्च *पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः इति प्रक्रमात् ॥

*विभेदजनकेऽज्ञाने *इति च नात्मस्वरूपैक्यपरम्; नापि जीवपरयोः। आत्मस्वरूपैक्य-मुक्तरीत्या निषिद्धम्। जीवपरयोरपि स्वरूपैक्यं देहात्मनोरिव न संभवति। तथाच श्रुतिः *द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभि-चाकशीति *ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा, इत्याद्या। अस्मिन्नपि शास्त्रे * स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः। अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले॥ * समस्तकल्याणगुणात्मकोऽसौ *परः पराणां सकला न यत्र क्लेशादय-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्सन्ति परावरेशे *अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते। यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा।। इति भेदव्यपदेशात्, *उभयेऽपि हि भेदेनैनमधीयते *भेदव्यपदेशाच्चान्यः, *अधिकं तु भेदनिर्देशात् इत्यादिसूत्रेषु च *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति *प्राज्ञेनात्मना संपरिष्वक्तः, *प्राज्ञेनात्मनाऽन्वारूढः इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिर्णयात्। नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसंभवः, अविद्याश्रयत्वयोग्यस्य तदनर्हत्वासंभवात्। यथोक्तम्— *परमात्मात्मनोर्योगः परमार्थ इतीष्यते। मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः।। इति। मुक्तस्य तु तद्धर्मतापत्तिरेवेति भगवद्गीतासूक्तम्— *इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।। इति। इहापि— *आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने। विकार्यमात्मनश्शक्त्या लोहमाकर्षको यथा।। इति। आत्मभावम्-आत्मनस्स्वभावम्। न ह्याकर्षकस्वरूपापत्तिराकृष्यमाणस्य। वक्ष्यति च *जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च *भोगमात्रसाम्यलिङ्गाच्च *मुक्तोपसृप्यव्यपदेशाच्च इति। वृत्तिरपि *जगद्व्यापारवर्जं समानो ज्योतिषा इति। द्रमिडभाष्यकारश्च *देवतासायुज्यादशरीरस्यापि देवतावत्सर्वार्थसिद्धिस्स्यात् इत्याह। श्रुतयश्च *य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति *ब्रह्मविदाप्नोति परम् *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता *एतमानन्दमयमात्मानमुपसंक्रम्य, इमान् लोकान् कामान्नी कामरूप्यनुसंचरन् *स तत्र पर्येति *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति *यथा नद्यः स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् *तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति इत्याद्याः।।

परविद्यासु सर्वासु सगुणमेव ब्रह्मोपास्यम्, फलं चैकरूपमेव, अतो विद्याविकल्प इति सूत्रकारेणैव *आनन्दादयः प्रधानस्य *विकल्पोऽविशिष्टफलत्वात् इत्यादिषूक्तम्। वाक्यकारेण च सगुणस्यैवोपास्यत्वं विद्याविकल्पश्चोक्तः— *युक्तं तद्गुणकोपासनात् इति। भाष्यकृता व्याख्यातं च *यद्यपि सच्चित्तः इत्यादिना। *ब्रह्म वेद ब्रह्मैव भवतीत्यत्रापि *नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् *निरञ्जनः परमं साम्यमुपैति *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इत्यादिभिरैकार्थ्यात् प्राकृतनामरूपाभ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारतोच्यते। प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव; यथा सेयं गौरिति।।

अत्रापि *विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव। प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः।। इति परब्रह्मध्यानात्आत्मा परब्रह्मवत् प्रक्षीणाशेषभावनः—कर्मभावनाब्रह्मभवानोभयभावनेति भावनात्रयरहितः प्रापणीय इत्यभिधाय, *क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज। निष्पाद्य मुक्तिकार्यं हि कृतकृत्यं निवर्तयेत्।। इति करणस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभावनात्मस्वरूपप्राप्त्या कृतकृत्यत्वेन निवृत्तिवचनाद्यावत्सिद्ध्यनुष्ठेयमित्युक्त्वा, *तद्भावभावमापन्नस्तदाऽसौ परमात्मना। भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्।। इति मुक्तस्य स्वरूपमाह। तद्भावः ब्रह्मणो भावः स्वभावः।

Digitization by Arya Samaj Charitable Foundation, Chennai

न तु स्वरूपैक्यम्, तद्भावभावमापन्न इति द्वितीयभावशब्दानन्वयात्, पूर्वोक्तार्थविरोधाच्च । यद्ब्रह्मणः प्रक्षीणाशेषभावनत्वं तदापत्तिस्तद्भावभावापत्तिः । यदैवमापन्नस्तदाऽसौ परमात्मना अभेदी भवति भेदरहितो भवति । ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः । तदन्वयोऽस्य कर्मरूपाज्ञानमूलः, न स्वरूपकृतः । स तु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे हेत्वभावान्निवर्तत इत्यभेदी भवति । यथोक्तम् *एकस्वरूपभेदस्तु बाह्यकर्मवृत्तिप्रजः। देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः ॥ इति। एतदेव विवृणोति *विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति इति। विभेदः विविधो भेदः-देवतिर्यङ्मनुष्यस्थावरात्मकः । यथोक्तं शौनकेनापि *चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः इति । आत्मनि ज्ञानरूपे देवादिरूपविविधभेदहेतुभूतकर्माख्याज्ञाने परब्रह्मध्यानेनात्यन्तिकनाशं गते सति हेत्वभावादसन्तं परस्मात् ब्रह्मण आत्मनो देवादिरूपभेदं कः करिष्यतीत्यर्थः । *अविद्या कर्मसंज्ञाऽन्या इति ह्यत्रैवोक्तम् ॥

क्षेत्रज्ञं चापि मां विद्धि इत्यादिनाऽन्तर्यामिरूपेण सर्वस्यात्मतयैक्याभिधानम् । अन्यथा *क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते, उत्तमः पुरुषस्त्वन्य इत्यादिभिर्विरोधः । अन्तर्यामिरूपेण सर्वेषामात्मत्वं तत्रैव भगवताऽभिहितम्— *ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इति, *सर्वस्य चाहं हृदि सन्निविष्टः इति च । *अहमात्मा गुडाकेश सर्वभूताशयस्थितः इति च तदेवोच्यते । भूतशब्दो ह्यात्मपर्यन्तदेहवचनः । यतस्सर्वेषामयमात्मा तत एव सर्वेषां तच्छरीरतया पृथगवस्थानं प्रतिषिध्यते *न तदस्ति विना यत्स्यादिति। भगवद्विभूत्युपसंहारश्चायमिति तथैवाभ्युपगन्तव्यम् । तत इदमुच्यते— *यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति ॥

अतश्शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति । नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनम् । नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः ॥

अथ सप्तविधानुपपत्तयः

यदप्युच्यते—निर्विशेषे स्वयंप्रकाशे वस्तुनि दोषपरिकल्पितमीशेशितव्याद्यनन्तविकल्पं सर्वं जगत्। दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयाऽनाद्यविद्या । सा चावश्याभ्युपगमनीया; *अनृतेन हि प्रत्यूढाः इत्यादिभिः श्रुतिभिः, ब्रह्मणस्तत्त्वमस्यादिवाक्यसामानाधिकरण्यावगतजीवैक्यानुपपत्त्या च। सा तु न सती, भ्रान्तिबाधयोरयोगात्। नाप्यसती, ख्यातिबाधयोश्चायोगात्। अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तत्त्वविदः—इति। तदयुक्तम्; सा हि किमाश्रित्य भ्रमं जनयति ? न तावज्जीवमाश्रित्य; अविद्यापरिकल्पितत्वाज्जीवभावस्य। नापि ब्रह्माश्रित्य; तस्य स्वयंप्रकाशज्ञानस्वरूपत्वेनाविद्याविरोधित्वात्। सा हि ज्ञानबाध्याऽभिमता ॥

*ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम्। अज्ञानं चेत्तिरस्कुर्यात्कः प्रभुस्तन्निवर्तने ॥
ज्ञानं ब्रह्मेति चेत् ज्ञानमज्ञानस्य निवर्तकम्। ब्रह्मवत्तत्प्रकाशत्वात्तदपि ह्यनिवर्तकम् ॥
ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यात्प्रमेयता। ब्रह्मणोऽननुभूतित्वं त्वदुक्त्यैव प्रसज्यते ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्या अविद्याया बाधकम्, न स्वरूपभूतं ज्ञानमिति चेन्न, उभयोरपि ब्रह्मस्वरूपप्रकाशत्वे सत्यन्यतरस्याविद्याविरोधित्वमन्यतरस्य नेति विशेषानवगमात् ॥

एतदुक्तं भवति—ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यस्स्वभावोऽवगम्यते; स ब्रह्मणस्स्वयंप्रकाशत्वेन स्वयमेव प्रकाशत इत्यविद्याविरोधित्वे न कश्चिद्विशेषस्स्वरूपतद्विषयज्ञानयोः—इति। किं च अनुभवस्वरूपस्य ब्रह्मणोऽनुभवान्तराननुभाव्यत्वेन भवतो न तद्विषयं ज्ञानमस्ति। अतो ज्ञानमज्ञानविरोधि चेत्स्वयमेव विरोधि भवतीति नास्या ब्रह्माश्रयत्वसंभवः। शुक्त्यादयस्तु स्वयाथात्म्यप्रकाशे स्वयमसमर्थास्स्वाज्ञानाविरोधिनस्तन्निवर्तने च ज्ञानान्तरमपेक्षन्ते। ब्रह्म तु स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव। तत एव निवर्तकान्तरं च नापेक्षते। अथोच्येत— ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधि—इति। न; इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं किं ब्रह्मयाथात्म्याज्ञानविरोधि? उत प्रपञ्चसत्यत्वरूपाज्ञानविरोधीति विवेचनीयम्। न तावत् ब्रह्मयाथात्म्याज्ञानविरोधि, अतद्विषयत्वात्। ज्ञानाज्ञानयोरेकविषयत्वेन हि विरोधः। प्रपञ्चमिथ्यात्वज्ञानं तत्सत्यत्वरूपाज्ञानेन विरुध्यते। तेन प्रपञ्चसत्यत्वरूपाज्ञानमेव बाधितमिति ब्रह्मस्वरूपाज्ञानं तिष्ठत्येव। ब्रह्मस्वरूपाज्ञानं नाम तस्य सद्वितीयत्वमेव; तत्तु तद्व्यतिरिक्तस्य मिथ्यात्वज्ञानेन निवृत्तम्; स्वरूपं तु स्वानुभवसिद्धमिति चेन्न; ब्रह्मणोऽद्वितीयत्वं स्वरूपं स्वानुभवसिद्धमिति तद्विरोधि सद्वितीयत्वरूपाज्ञानं तद्बाधश्च न स्याताम्। अद्वितीयत्वं धर्म इति चेन्न; अनुभवस्वरूपस्य ब्रह्मणोऽनुभाव्यधर्मविरहस्य भवतैव प्रतिपादितत्वात्। अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव नाज्ञानाश्रयत्वम् ॥ इत्याश्रयानुपपत्तिः।

किंच, अविद्यया प्रकाशैकस्वरूपं ब्रह्म तिरोहितमिति वदता स्वरूपनाश एवोक्तस्स्यात्। प्रकाशतिरोधानं नाम प्रकाशोत्पत्तिप्रतिबन्धो विद्यमानस्य विनाशो वा। प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन प्रकाशतिरोधानं प्रकाशनाश एव ॥ इति तिरोधानानुपपत्तिः।

अपि च, निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिस्स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूतः? उतापरमार्थभूत इति विवेचनीयम्। न तावत्परमार्थः, अनभ्युपगमात्। नाप्यपरमार्थः, तथा सति हि द्रष्टृत्वेन वा दृश्यत्वेन वा दृशित्वेन वाऽभ्युपगमनीयः। न तावद्दृशिः, दृशिस्वरूपभेदानभ्युपगमात्; भ्रमाधिष्ठानभूतायास्तु साक्षाद्दृशेर्माध्यमिकपक्षप्रसङ्गेनापारमार्थ्यानभ्युपगमाच्च। द्रष्टृदृश्ययोस्तदवच्छिन्नाया दृशेश्च काल्पनिकत्वेन मूलदोषान्तरापेक्षयाऽनवस्था स्यात्। अथैतत्परिजिहीर्षया परमार्थसत्यनुभूतिरेव ब्रह्मरूपा दोष इति चेत्; ब्रह्मैव चेद्दोषः, प्रपञ्चदर्शनस्यैव तन्मूलं स्यात्; किं प्रपञ्चतुल्याविद्यान्तरपरिकल्पनेन? ब्रह्मणो दोषत्वे सति तस्य नित्यत्वेनानिर्मोक्षश्च स्यात्। अतो यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमः; न तावद्भ्रान्तिरुपपादिता भवति ॥ इति स्वरूपानुपपत्तिः।

अनिर्वचनीयत्वं च किमभिप्रेतम्? सदसद्विलक्षणत्वमिति चेत्; तथाविधस्य वस्तुनः प्रमाणशून्यत्वेन अनिर्वचनीयतैव स्यात्। एतदुक्तं भवति—सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वा च प्रतीतिस्सदसदाकारा। सदसदाकारायास्तु प्रतीतेस्सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने सर्वं सर्वप्रतीतेर्विषयस्स्यात्—इति ॥ इत्यनिर्वचनीयत्वानुपपत्तिः।

अथ स्यात्—वस्तुस्वरूपतिरोधानकरमान्तरबाह्यरूपविविधाध्यासोपादानं सदसदनिर्वचनीयमविद्याज्ञानादिपदवाच्यं वस्तुयाथात्म्यज्ञाननिवर्त्यं ज्ञानप्रागभावातिरेकेण भावरूपमेव किंचिद्वस्तु प्रत्यक्षानुमानाभ्यां प्रतीयते। तदुपहितब्रह्मोपादानश्चाविकारे स्वप्रकाशचिन्मात्रवपुषि तेनैव तिरोहितस्वरूपे प्रत्यगात्मन्यहङ्कारज्ञानज्ञेयविभागरूपोऽध्यासः। तस्यैवावस्थाविशेषेणाध्यासरूपे जगति ज्ञानबाध्यसर्परजतादिवस्तु तत्तज्ज्ञानरूपाध्यासोऽपि जायते। कृत्स्नस्य मिथ्यारूपस्य तदुपादानत्वं च मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव कारणं भवितुमर्हतीति हेतुबलादवगम्यते। कारणाज्ञानविषयं प्रत्यक्षं तावत् "अहमज्ञो मामन्यं च न जानामि" इत्यपरोक्षावभासः। अयं तु न ज्ञानप्रागभावविषयः। स हि षष्ठप्रमाणगोचरः। अयं तु अहं सुखीतिवदपरोक्षः। अभावस्य प्रत्यक्षत्वाभ्युपगमेऽप्ययमनुभवो नात्मज्ञानाभावविषयः; अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात्; अविद्यमानत्वे ज्ञानाभावप्रतीत्यनुपपत्तेश्च ॥

एतदुक्तं भवति—अहमज्ञ इत्यस्मिन्ननुभवे अहमित्यात्मनोऽभावधर्मितया ज्ञानस्य च प्रतियोगितयाऽवगतिरस्ति वा, न वा? अस्ति चेद्विरोधादेव न ज्ञानाभावानुभवसंभवः। नो चेद्धर्मिप्रतियोगिज्ञानसव्यपेक्षो ज्ञानाभावानुभवस्सुतरां न संभवति। ज्ञानाभावस्यानुमेयत्वे अभावाख्यप्रमाणविषयत्वे चेयमनुपपत्तिस्समाना। अस्याज्ञानस्य भावरूपत्वे धर्मिप्रतियोगिज्ञानसद्भावेऽपि विरोधाभावादयमनुभवो भावरूपाज्ञानविषय एवाभ्युपगन्तव्यः—इति। ननु च भावरूपमप्यज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते। मैवम्; साक्षिचैतन्यं न वस्तुयाथात्म्यविषयम्, अपि तु अज्ञानविषयम्; अन्यथा मिथ्यार्थविभासानुपपत्तेः। न ह्यज्ञानविषयेण ज्ञानेनाज्ञानं निवर्त्यत इति न विरोधः। ननु चेदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति। स विषयः प्रमाणानधीनसिद्धिरिति कथमिव साक्षिचैतन्येनास्मदर्थव्यावृत्तमज्ञानं विषयीक्रियते? नैष दोषः; सर्वमेव वस्तुजातं ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषयभूतम्। तत्र जडत्वेन ज्ञाततया सिध्यत एव प्रमाणव्यवधानापेक्षा। अजडस्य तु प्रत्यग्वस्तुनस्स्वयं सिध्यतो न प्रमाणव्यवधानापेक्षेति सदैवाज्ञानस्य व्यावर्तकत्वेनावभासो युज्यते। तस्मान्न्यायोपबृंहितेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते। तदिदं भावरूपमज्ञानमनुमानेनापि सिध्यति—विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्—इति। आलोकाभावमात्रं वा रूपदर्शनाभावमात्रं वा तमो न द्रव्यान्तरम्, तत्कथं भावरूपाज्ञानसाधने निदर्शनतयोपन्यस्यत इति चेत्; उच्यते—बहुलत्वविरलत्वाद्यवस्थायोगेन रूपवत्तया चोपलब्धेर्द्रव्यान्तरमेव तम इति निरवद्यम्—इति ॥

अत्रोच्यते—अहमज्ञो मामन्यं च न जानामीत्यत्रोपपत्तिसहितेन केवलेन च प्रत्यक्षेण न

Digitization by Arya Samaj Charitable Foundation, Chennai

भावरूपमज्ञानं प्रतीयते। यस्तु ज्ञानप्रागभावविषयत्वे विरोध उक्तः; स हि भावरूपाज्ञानेऽपि तुल्यः। विषयत्वेनाश्रयत्वेन चाज्ञानस्य व्यावर्तकतया प्रत्यगर्थः प्रतिपन्नो वा, अप्रतिपन्नो वा? प्रतिपन्नश्चेत्; तत्स्वरूपज्ञाननिवर्त्यं तदज्ञानं तस्मिन् प्रतिपन्ने कथमिव तिष्ठति? अप्रतिपन्नश्चेद्व्यावर्तकाश्रयविषयज्ञानशून्यमज्ञानं कथमनुभूयेत? अथ विशदस्वरूपावभासोऽज्ञानविरोधी; अविशदस्वरूपं तु प्रतीयत इत्याश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोधः इति। हन्त तर्हि ज्ञानप्रागभावोऽपि विशदस्वरूपविषयः, आश्रयप्रतियोगिज्ञानं तु अविशदस्वरूपविषयमिति न कश्चिद्विशेषोऽन्यत्राभिनिवेशात्। भावरूपस्याज्ञानस्यापि ह्यज्ञानमिति सिध्यतः प्रागभावसिद्धाविव सापेक्षत्वमस्त्येव। तथा हि—अज्ञानमिति ज्ञानाभावस्तदन्यस्तद्विरोधी वा? त्रयाणामपि तत्स्वरूपज्ञानापेक्षाऽवश्याश्रयणीया। यद्यपि तमस्स्वरूपप्रतिपत्तौ प्रकाशापेक्षा न विद्यते; तथाऽपि प्रकाशविरोधीत्यनेनाकारेण प्रतिपत्तौ प्रकाशप्रतिपत्त्यपेक्षाऽस्त्येव। भवदभिमताज्ञानं न कदाचित्स्वरूपेण सिध्यति; अपि त्वज्ञानमित्येव। तथा सति ज्ञानाभाववत्तदपेक्षत्वं समानम्। ज्ञानप्रागभावस्तु भवताऽप्यभ्युपगम्यते, प्रतीयते चेत्युभयाभ्युपेतो ज्ञानप्रागभाव एव अहमज्ञो मामन्यं च न जानामीत्यनुभूयत इत्यभ्युपगन्तव्यम्॥

नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न संभवति; स्वानुभवस्वरूपत्वात्। स्वानुभवस्वरूपमपि तिरोहितस्वरूपमज्ञानमनुभवतीति चेत्; किमिदं तिरोहितस्वरूपत्वम्? अप्रकाशितस्वरूपत्वमिति चेत्; स्वानुभवस्वरूपस्य कथमप्रकाशितस्वरूपत्वम्? स्वानुभवस्वरूपस्याप्यन्यतोऽप्रकाशितस्वरूपत्वमापद्यत इति चेत्; एवं तर्हि प्रकाशाख्यधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वादन्यतस्स्वरूपनाश एव स्यादिति पूर्वमेवोक्तम्॥

किंच ब्रह्मस्वरूपतिरोधानहेतुभूतमेतदज्ञानं स्वयमनुभूतं सत् ब्रह्म तिरस्करोति, ब्रह्म तिरस्कृत्य स्वयं तदनुभवविषयो भवतीत्यन्योन्याश्रयणम्। अनुभूतमेव तिरस्करोतीति चेत्; यद्यतिरोहितस्वरूपमेव ब्रह्माज्ञानमनुभवति; तदा तिरोधानकल्पना निष्प्रयोजना स्यात्; अज्ञानस्वरूपकल्पना च। ब्रह्मणोऽज्ञानदर्शनवत् अज्ञानकार्यतयाऽभिमतप्रपञ्चदर्शनस्यापि संभवात्। किंच ब्रह्मणोऽज्ञानानुभवः किं स्वतोऽन्यतो वा? स्वतश्चेदज्ञानानुभवस्य स्वरूपप्रयुक्तत्वेनानिर्मोक्षस्स्यात्। अनुभूतिस्वरूपस्य ब्रह्मणोऽज्ञानानुभवस्वरूपत्वेन मिथ्यारजतबाधकज्ञानेन रजतानुभवस्यापि निवृत्तिवन्निवर्तकज्ञानेनाज्ञानानुभूतिरूपब्रह्मस्वरूपनिवृत्तिर्वा। अन्यतश्चेत्; किं तदन्यत्? अज्ञानान्तरमिति चेत्; अनवस्था स्यात्। ब्रह्म तिरस्कृत्यैव स्वयमनुभवविषयो भवतीति चेत्; तथा सतीदमज्ञानं काचादिवत् स्वसत्तया ब्रह्म तिरस्करोतीति ज्ञानबाध्यत्वमज्ञानस्य न स्यात्। अथेदमज्ञानं स्वयमनादि, ब्रह्मणस्स्वसाक्षित्वं ब्रह्मस्वरूपतिरस्कृतिं च युगपदेव करोति। अतो नानवस्थादयो दोषा इति; नैतत्, स्वानुभवस्वरूपस्य ब्रह्मणस्स्वरूपातिरस्कृतिमन्तरेण साक्षित्वापादनायोगात्। हेत्वन्तरेण तिरस्कृतमिति चेत्; तर्ह्यस्यानादित्वमपास्तम्। अनवस्था च पूर्वोक्ता। अतिरस्कृतस्वरूपस्यैव साक्षित्वापादने ब्रह्मणस्स्वानुभवैकतानता च न स्यात्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि च अविद्यया ब्रह्मणि तिरोहिते तद्ब्रह्म न किंचिदपि प्रकाशते? उत किंचित्प्रकाशते? पूर्वस्मिन् कल्पे प्रकाशमात्रस्वरूपस्य ब्रह्मणोऽप्रकाशे तुच्छतापत्तिरसकृदुक्ता। उत्तरस्मिन् कल्पे सच्चिदानन्दैकरसे ब्रह्मणि कोऽयमंशस्तिरस्क्रियते? को वा प्रकाशते? निरंशे निर्विशेषे प्रकाशमात्रे वस्तुन्याकारद्वयासंभवेन तिरस्कारः प्रकाशश्च युगपन्न संगच्छेते। अथ सच्चिदानन्दैकरसं ब्रह्म अविद्यया तिरोहितस्वरूपमविशदमिव लक्ष्यत इति; प्रकाशमात्रस्वरूपस्य विशदताऽविशदता वा किंरूपा? एतदुक्तं भवति—यस्सांशस्सविशेषः प्रकाशविषयः; तस्य सकलावभासो विशदावभासः, कतिपयविशेषरहितावभासश्चाविशदावभासः। तत्र य आकारोऽप्रतिपन्नस्तस्मिन्नंशे प्रकाशाभावादेव प्रकाशावैशद्यं न विद्यते। यश्चांशः प्रतिपन्नस्तस्मिन्नंशे तद्विषयप्रकाशो विशद एव। अतस्सर्वत्र प्रकाशांशे अवैशद्यं न संभवति। विषयेऽपि स्वरूपे प्रतीयमाने तद्गतकतिपयविशेषाप्रतीतिरेवावैशद्यम्। तस्मादविषये निर्विशेषे प्रकाशमात्रे ब्रह्मणि स्वरूपे प्रकाशमाने तद्गतकतिपयविशेषाप्रतीतिरूपावैशद्यं नामाज्ञानकार्यं न संभवति। अपि च इदमविद्याकार्यमवैशद्यं तत्त्वज्ञानोदयान्निवर्तते, न वा? अनिवृत्तावपवर्गाभावः। निवृत्तौ च वस्तु किंरूपमिति विवेचनीयम्। विशदस्वरूपमिति चेत्; तद्विशदस्वरूपं प्रागस्ति, न वा? अस्ति चेदविद्याकार्यमवैशद्यं तन्निवृत्तिश्च न स्याताम्। नो चेन्मोक्षस्य कार्यतया अनित्यता स्यात्॥

अस्याज्ञानस्याश्रयानिरूपणादेवासंभवः पूर्वमेवोक्तः। अपि च अपरमार्थदोषमूलभ्रमवादिना निरधिष्ठानभ्रमासंभवोऽपि दुरुपपादः; भ्रमहेतुभूतदोषदोषाश्रयत्ववदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः। ततश्च सर्वशून्यत्वमेव स्यात्॥

यदुक्तमनुमानेनापि भावरूपमज्ञानं सिध्यतीति; तदयुक्तम्; अनुमानासंभवात्। ननूक्तमनुमानम्? सत्यमुक्तम्; दुरुक्तं तु तत्; अज्ञानेऽप्यनभिमताज्ञानान्तरसाधनेन विरुद्धत्वाद्धेतोः। तत्राज्ञानान्तरासाधने हेतोरनैकान्त्यम्। साधने च तदज्ञानमज्ञानसाक्षित्वं निवारयति। ततश्चाज्ञानकल्पना निष्फला स्यात्। दृष्टान्तश्च साधनविकलः; दीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात्। सर्वत्र ज्ञानस्यैव हि प्रकाशकत्वम्; सत्यपि दीपे ज्ञानेन विना विषयप्रकाशाभावात्। इन्द्रियाणामपि ज्ञानोत्पत्तिहेतुत्वमेव; न प्रकाशकत्वम्। प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव। प्रकाशकज्ञानोत्पत्तौ व्याप्रियमाणचक्षुरिन्द्रियोपकारकहेतुत्वमपेक्ष्य दीपस्य प्रकाशकत्वव्यवहारः। नास्माभिर्ज्ञानतुल्यप्रकाशकत्वाभ्युपगमेन दीपप्रभा निदर्शिता; अपि तु ज्ञानस्यैव स्वविषयावरणनिरसनपूर्वकप्रकाशकत्वमङ्गीकृत्येति चेन्न; न हि विरोधिनिरसनमात्रं प्रकाशकत्वम्; अपि त्वर्थपरिच्छेदः; व्यवहारयोग्यतापादनमिति यावत्। तत्तु ज्ञानस्यैव। यद्युपकारकाणामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकृतम्; तर्हीन्द्रियाणामुपकारकतमत्वेनाप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयम्। तथा सति तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावाद्धेतोरनैकान्त्यमित्यलमनेन॥

प्रतिप्रयोगाश्च—विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम्; अज्ञानत्वात्; शुक्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

काद्यज्ञानवत्। ज्ञात्राश्रयं हि तत्। विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्मावरणम्, अज्ञानत्वात्, शुक्तिकाद्यज्ञानवत्। विषयावरणं हि तत्। विवादाध्यासितमज्ञानं न ज्ञाननिवर्त्यम्; ज्ञानविषयानावरणत्वात्। यत् ज्ञाननिवर्त्यमज्ञानं तत् ज्ञानविषयावरणम्; यथा शुक्तिकाद्यज्ञानम्। ब्रह्म नाज्ञानास्पदम्; ज्ञातृत्वविरहात्; घटादिवत्। ब्रह्म नाज्ञानावरणम्; ज्ञानाविषयत्वात्। यदज्ञानावरणं तज्ज्ञानविषयभूतम्; यथा शुक्तिकादि। ब्रह्म न ज्ञाननिवर्त्याज्ञानम्; ज्ञानाविषयत्वात्। यत् ज्ञाननिवर्त्याज्ञानम्, तज्ज्ञानविषयभूतम्; यथा शुक्तिकादि। विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्ताज्ञानपूर्वकं न भवति, प्रमाणज्ञानत्वात्, भवदभिमताज्ञानसाधनप्रमाणज्ञानवत्। ज्ञानं न वस्तुनो विनाशकम्; शक्तिविशेषोपबृंहणविरहे सति ज्ञानत्वात्। यद्वस्तुनो विनाशकं तच्छक्तिविशेषोपबृंहितं ज्ञानमज्ञानं च दृष्टम्; यथेश्वरयोगिप्रभृतिज्ञानम्, यथा च मुद्गरादि। भावरूपमज्ञानं न ज्ञानविनाश्यम्; भावरूपत्वात्, घटादिवदिति। अथोच्येत—बाधकज्ञानेन पूर्वज्ञानोत्पन्नानां भयादीनां विनाशो दृश्यते—इति। नैवम्; न हि ज्ञानेन तेषां विनाशः; क्षणिकत्वेन तेषां स्वयमेव विनाशात्; कारणनिवृत्त्या च पश्चादनुत्पत्तेः। क्षणिकत्वं च तेषां ज्ञानवदुत्पत्तिकारणसन्निधान एवोपलब्धेः, अन्यथाऽनुपलब्धेश्चावगम्यते। अक्षणिकत्वे च भयादीनां भयादिहेतुभूतज्ञानसंततावविशेषेण सर्वेषां ज्ञानानां भयाद्युत्पत्तिहेतुत्वेनानेकभयोपलब्धिप्रसङ्गाच्च॥

स्वप्रागभावव्यतिरिक्तवस्त्वन्तरपूर्वकमिति व्यर्थविशेषणोपादानेन प्रयोगकुशलता चाविष्कृता। अतोऽनुमानेनापि न भावरूपाज्ञानसिद्धिः। श्रुतितदर्थापत्तिभ्यामज्ञानासिद्धिरनन्तरमेव वक्ष्यते। मिथ्यार्थस्य हि मिथ्यैवोपादानं भवितुमर्हतीत्येतदपि *न विलक्षणत्वादित्यधिकरणन्यायेन परिह्रियते। अतोऽनिर्वचनीयाज्ञानविषया न काचिदपि प्रतीतिरस्ति। प्रतीतिभ्रान्तिबाधैरपि न तथाऽभ्युपगमनीयम्। प्रतीयमानमेव हि प्रतीतिभ्रान्तिबाधविषयः। आभिः प्रतीतिभिः प्रतीत्यन्तरेण चानुपलब्धमासां विषय इति न युज्यते कल्पयितुम्॥

शुक्त्यादिषु रजतादिप्रतीतेः, प्रतीतिकालेऽपि तन्नास्तीति बाधेन चान्यस्यान्यथाभानायोगाच्च सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशात् प्रतीयत इति कल्पनीयमिति चेन्न; तत्कल्पनायामप्यन्यस्यान्यथाभानस्यावर्जनीयत्वात्; अन्यथाभानाभ्युपगमादेव ख्यातिप्रवृत्तिबाधभ्रमत्वानामुपपत्तेरत्यन्तापरिदृष्टाकारणकवस्तुकल्पनायोगात्। कल्प्यमानं हीदमनिर्वचनीयम्, न तावदनिर्वचनीयमिति प्रतीयते; अपितु परमार्थरजतमित्येव। अनिर्वचनीयमित्येव प्रतीतं चेत्, भ्रान्तिबाधयोः प्रवृत्तेरप्यसंभवः। अतोऽन्यस्यान्यथाभानविरहे प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तेस्तस्यापरिहार्यत्वाच्च, शुक्त्यादिरेव रजताद्याकारेणावभासत इति भवताऽभ्युपगन्तव्यम्। ख्यात्यन्तरवादिनां च सुदूरमपि गत्वाऽन्यथावभासोऽवश्याश्रयणीयः— असत्ख्यातिपक्षे सदात्मना; आत्मख्यातिपक्षे अर्थात्मना; अख्यातिपक्षेऽपि अन्यविशेषणमन्यविशेषणत्वेन ज्ञानद्वयमेकत्वेन च; विषयासद्भावपक्षेऽपि विद्यमानत्वेन॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किंच अनिर्वचनीयमपूर्वरजतमत्र जातमिति वदता तस्य जन्मकारणं वक्तव्यम्। न ताव-त्प्रतीतिः, तस्यास्तद्विषयत्वेन तदुत्पत्तेः प्रागात्मलाभायोगात्। निर्विषया जाता तदुत्पाद्य तदेव विषयीकरोतीति महतामिदमुपपादनम्। अथेन्द्रियादिगतो दोषः, तन्न; तस्य पुरुषाश्रयत्वेनार्थ-गतकार्यस्योत्पादकत्वायोगात्। नापीन्द्रियाणि, तेषां ज्ञानकारणत्वात्। नापि दुष्टानीन्द्रियाणि, तेषा-मपि स्वकार्यभूते ज्ञान एव हि विशेषकरत्वम्। अनादिमिथ्याज्ञानोपादानत्वं तु पूर्वमेव निरस्तम्। किंच अपूर्वमनिर्वचनीयमिदं वस्तुजातं रजतादिबुद्धिशब्दाभ्यां कथमिव विषयीक्रियते, न घटा-दिबुद्धिशब्दाभ्याम्। रजतादिसादृश्यादिति चेत्; तर्हि तत्सदृशमित्येव प्रतीतिशब्दौ स्याताम्। रजतादिजातियोगादिति चेत्; सा किं परमार्थभूता? अपरमार्थभूता वा? न तावत्परमार्थभूता, तस्या अपरमार्थान्वयायोगात्। नाप्यपरमार्थभूता, परमार्थान्वयायोगात्, अपरमार्थे परमार्थबुद्धि-शब्दयोर्निर्वाहकत्वायोगाच्चेत्यलमपरिणतकुतर्कनिरसनेन ॥

अथवा—यथार्थं सर्वविज्ञानमिति वेदविदां मतम्। श्रुतिस्मृतिभ्यस्सर्वस्य सर्वात्मत्वप्रतीतितः॥
*बहु स्यामिति संकल्पपूर्वसृष्ट्याद्युपक्रमे। *तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितम्॥
त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते। *यदग्ने रोहितं रूपं तेजसस्तदपामपि॥
शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता। श्रुत्यैव दर्शिता तस्मात्सर्वे सर्वत्र संगताः॥
पुराणे चैवमेवोक्तं वैष्णवे सृष्ट्युपक्रमे॥
*नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यण्डमित्यादिना ततः॥
सूत्रकारोऽपि भूतानां त्रिरूपत्वं तथाऽवदत्। *त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधाभिदा॥
सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम्। सोमावयवसद्भावादिति न्यायविदो विदुः॥
व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः। तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक्॥
शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव बोधितः। रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते। अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः॥
कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः। रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते॥
दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते। अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु॥
बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते। शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः॥
नातो मिथ्यार्थसत्यार्थविषयत्वनिबन्धनः। एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः॥

स्वप्ने च प्राणिनां पुण्यपापानुगुणं भगवतैव तत्तत्पुरुषमात्रानुभाव्याः तत्तत्कालावसानाः तथाभूताश्चार्थास्सृज्यन्ते। तथा हि श्रुतिः स्वप्नविषया *न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान्पथस्सृजते, न तत्रानन्दा मुदः प्रमुदो भवन्ति, अथानन्दान्मुदः प्रमुदस्सृजते, न तत्र वेशन्ताः पुष्करिण्यस्स्रवन्त्यो भवन्ति, अथ वेशन्तान्पुष्करिण्यस्स्रवन्त्यस्सृजते, स हि कर्ता

Digitization by Arya Samaj Charitable Foundation, Chennai

इति। यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्ति। तथाऽपि तत्तत्पुरुषमात्रानुभाव्यतया तथाविधानर्थानीश्वरस्सृजति। स हि कर्ता। तस्य सत्यसङ्कल्पस्याश्चर्यशक्तेस्तथाविधं कर्तृत्वं संभवतीत्यर्थः। *य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिँल्लोकाश्श्रिताःसर्वे तदु नात्येति कश्चन इति च। सूत्रकारोऽपि *सन्ध्ये सृष्टिराह हि *निर्मातारं चैके पुत्रादयश्च इति सूत्रद्वयेन स्वाप्नेष्वर्थेषु जीवस्य स्रष्टृत्वमाशङ्क्य *मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् इत्यादिना न जीवस्य सङ्कल्पमात्रेण स्रष्टृत्वमुपपद्यते, जीवस्य स्वाभाविकसत्यसङ्कल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात्, ईश्वरस्यैव तत्तत्पुरुषमात्रानुभाव्यतया आश्चर्यभूता सृष्टिरियम्; *तस्मिँल्लोकाश्श्रितास्सर्वे तदु नात्येति कश्चनेति परमात्मैव तत्र स्रष्टेत्यवगम्यते—इति परिहरति। अपवरकादिषु शयानस्य स्वप्नदृशः स्वदेहेनैव देशान्तरगमनराज्याभिषेकशिरश्छेदादयश्च पुण्यपापफलभूताश्शयानदेहसरूपसंस्थानदेहान्तरसृष्ट्योपपद्यन्ते॥

पीतशङ्खादौ तु नयनवर्तिपित्तद्रव्यसंभिन्ना नायनरश्मयश्शङ्खादिभिस्संयुज्यन्ते। तत्र पित्तगतपीतिमाभिभूतश्शङ्खगतशुक्लिमा न गृह्यते। अतस्सुवर्णानुलिप्तशङ्खवत् पीतश्शङ्ख इति प्रतीयते। पित्तद्रव्यं तद्गतपीतिमा चातिसौक्ष्म्यात्पार्श्वस्थैर्न गृह्यते। पित्तोपहतेन तु स्वनयननिष्क्रान्ततयाऽतिसामीप्यात् सूक्ष्ममपि गृह्यते। तद्ग्रहणजनितसंस्कारसचिवनायनरश्मिभिर्दूरस्थमपि गृह्यते॥

जपाकुसुमसमीपवर्तिस्फटिकमणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते। जपाकुसुमप्रभा विततऽपि स्वच्छद्रव्यसंयुक्ततया स्फुटतरमुपलभ्यत इत्युपलब्धिव्यवस्थाप्यमिदम्। मरीचिकाजलज्ञानेऽपि तेजःपृथिव्योरप्यम्बुनो विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्योरग्रहणाददृष्टवशाच्चाम्बुनो ग्रहणाद्यथार्थत्वम्। अलातचक्रेऽप्यलातस्य द्रुततरगमनेन सर्वदेशसंयोगादन्तरालाग्रहणात्तथा प्रतीतिरुपपद्यते। चक्रप्रतीतावप्यन्तरालाग्रहणपूर्वकतत्तद्देशसंयुक्ततत्तद्वस्तुग्रहणमेव। क्वचिदन्तरालाभावादन्तरालाग्रहणम्, क्वचिच्छैघ्र्यादग्रहणमिति विशेषः। अतस्तदपि यथार्थम्। दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था। दर्पणादिप्रतिहतगतयो हि नायनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृह्णन्ति। तत्रापि अतिशैघ्र्यादन्तरालाग्रहणात्तथा प्रतीतिः॥ दिङ्मोहेऽपि दिगन्तरस्यास्यां दिशि विद्यमानत्वाददृष्टवशेनैतद्दिगंशवियुक्तो दिगन्तरांशो गृह्यते। अतो दिगन्तरप्रतीतिर्यथार्थैव।

द्विचन्द्रज्ञानादावपि अङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वयहेतुर्भवति। तत्रैका सामग्री स्वदेशविशिष्टं चन्द्रं गृह्णाति। द्वितीया तु किञ्चिद्वक्रगतिश्चन्द्रसमीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशवियुक्तं गृह्णाति। अतस्सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचन्द्रग्रहणे ग्रहणभेदेन ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चन्द्राविति भवति प्रतीतिविशेषः। देशान्तरस्य तद्विशेषणत्वं देशान्तरस्य अगृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति। तत्र सामग्रीद्वित्वं पारमार्थिकम्। तेन देशद्वयविशिष्टचन्द्रग्रहणद्वयं च पारमार्थिकम्। ग्रहणद्वित्वेन चन्द्रस्यैव ग्राह्याकारद्वित्वं च पारमार्थिकम्। तत्र विशेषणद्वयविशिष्टचन्द्रग्रहणद्वयस्यैक एव

Digitization by Arya Samaj Charitable Foundation, Chennai

चन्द्रो ग्राह्य इति ग्रहणे प्रत्यभिज्ञानवत् केवलचक्षुषस्सामर्थ्याभावाचाक्षुषज्ञानं तथैवावतिष्ठते । द्वयोश्चक्षुषोरेकसामग्र्यन्तर्भावेऽपि तिमिरादिदोषभिन्नं चाक्षुषं तेजस्सामग्रीद्वयं भवतीति कार्यकल्प्यम् । अपगते तु दोषे स्वदेशविशिष्टस्य चन्द्रस्यैकग्रहणवेद्यत्वादेकश्चन्द्र इति भवति प्रत्ययः । दोषकृतं तु सामग्रीद्वित्वं तत्कृतं ग्रहणद्वित्वं तत्कृतं ग्राह्याकारद्वित्वं चेति निरवद्यम् ॥

अतस्सर्वं विज्ञानजातं यथार्थमिति सिद्धम् । ख्यात्यन्तराणां दूषणानि तैस्तैर्वादिभिरेव प्रपञ्चितानीति न तत्र यत्नः क्रियते। अथवा किमनेन बहुनोपपादनप्रकारेण । प्रत्यक्षानुमानागमाख्यं प्रमाणजातमागमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसङ्कल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति? किं नोपपद्यते? भगवता हि परेण ब्रह्मणा क्षेत्रज्ञपुण्यपापानुगुणं तद्भोग्यत्वायाखिलं जगत्सृजता सुखदुःखोपेक्षाफलानुभवानुभाव्याः पदार्थास्सर्वसाधारणानुभवविषयाः, केचन तत्तत्पुरुषमात्रानुभवविषयास्तत्तत्कालावसानास्तथातथाऽनुभाव्याः सृज्यन्ते । तत्र बाध्यबाधकभावस्सर्वानुभवविषयतया तद्रहिततया चोपपद्यत इति सर्वं समञ्जसम् ॥

इति प्रमाणानुपपत्तौ यथार्थख्यातिः ।

यत्पुनस्सदसदनिर्वचनीयमज्ञानं श्रुतिसिद्धमिति; तदसत्; *अनृतेन हि प्रत्यूढाः इत्यादिष्वनृतशब्दस्यानिर्वचनीयानभिधायित्वात् । ऋतेतरविषयो ह्यनृतशब्दः । ऋतमिति कर्मवाचि, *ऋतं पिबन्ताविति वचनात्। ऋतं—कर्म फलाभिसंधिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलम्। अत्र तद्व्यतिरिक्तं सांसारिकफलं कर्मानृतं ब्रह्मप्राप्तिविरोधि; *एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः इति वचनात् ॥ *नासदासीन्नो सदासीत् इत्यत्रापि सदसच्छब्दौ चिदचिद्व्यष्टिविषयौ । उत्पत्तिवेलायां सत्त्यच्छब्दाभिहितयोश्चिदचिद्व्यष्टिभूतयोर्वस्तुनोरप्ययकाले अचित्समष्टिभूते तमश्शब्दाभिधेये वस्तुनि प्रलयप्रतिपादनपरत्वादस्य वाक्यस्य । नात्र कस्य चित्सदसदनिर्वचनीयतोच्यते; सदसतोः कालविशेषे असद्भावमात्रवचनात् । अत्र तमश्शब्दाभिहितस्याचित्समष्टित्वं श्रुत्यन्तरादवगम्यते *अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते इति । सत्यम्, तमश्शब्देनाचित्समष्टिरूपायाः प्रकृतेस्सूक्ष्मावस्थोच्यते । तस्यास्तु *मायां तु प्रकृतिं विद्यादिति मायाशब्देनाभिधानादनिर्वचनीयत्वमिति चेत्; नैतदेवम्; मायाशब्दस्यानिवचनीयवाचित्वं न दृष्टमिति । मायाशब्दस्य मिथ्यापर्यायत्वेनानिर्वचनीयवाचित्वमिति चेत्; तदपि नास्ति । न हि सर्वत्र मायाशब्दो मिथ्याविषयः; आसुरराक्षसास्त्रादिषु सत्येष्वेव मायाशब्दप्रयोगात् । यथोक्तम्—*तेन मायासहस्रं तच्छम्बरस्याशुगामिना । बालस्य रक्षता देहमैकैकश्येन सूदितम् ॥ इति ॥ अतो मायाशब्दो विचित्रार्थसर्गकराभिधायी । प्रकृतेश्च मायाशब्दाभिधानं विचित्रार्थसर्गकरत्वादेव । *अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः इति मायाशब्दवाच्यायाः प्रकृतेर्विचित्रार्थसर्गकरत्वं दर्शयति । परमपुरुषस्य च तद्वत्तामात्रेण मायित्वमुच्यते; नाज्ञत्वेन । जीवस्यैव हि मायया निरोधश्श्रूयते *तस्मिंश्चान्यो मायया सन्निरुद्धः इति, *अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इति च । *इन्द्रो

Digitization by Arya Samaj Charitable Foundation, Chennai

मायाभिः पुरुरूप ईयते इत्यत्रापि विचित्राश्शक्तयोऽभिधीयन्ते। अत एव हि *भूरि त्वष्टेव राजति इत्युच्यते। न हि मिथ्याभिभूतः कश्चिद्विराजते। *मम माया दुरत्यया इत्यत्रापि गुणमयीति वचनात्सैव त्रिगुणात्मिका प्रकृतिरुच्यत इति न श्रुतिभिस्सदसदनिर्वचनीयाज्ञानप्रतिपादनम्॥

नाप्यैक्योपदेशानुपपत्त्या। नहि * तत्त्वमसीति जीवपरयोरैक्योपदेशे सति सर्वज्ञे सत्यसङ्कल्पे सकलजगत्सर्गस्थितिविनाशहेतुभूते तच्छब्दावगते प्रकृते ब्रह्मणि विरुद्धाज्ञानपरिकल्पनाहेतुभूता काचिदप्यनुपपत्तिर्दृश्यते। ऐक्योपदेशस्तु त्वंशब्देनापि जीवशरीरकस्य ब्रह्मण एवाभिधानादुपपन्नतरः। * अनेन जीवेनाऽत्मनानुप्रविश्य नामरूपे व्याकरवाणीति सर्वस्य वस्तुनः परमात्मपर्यन्तस्यैव हि नामरूपभाक्त्वमुक्तम्। अतो न ब्रह्माज्ञानपरिकल्पनम्॥ इति प्रमाणानुपपत्तौ अविद्यायाः श्रुतितदर्थापत्तिसिद्धत्वनिरासः

इतिहासपुराणयोरपि न ब्रह्माज्ञानवादः क्वचिदपि दृश्यते। ननु *ज्योतींषि विष्णुः इति ब्रह्मैकमेव तत्त्वमिति प्रतिज्ञाय *ज्ञानस्वरूपो भगवान्यतोऽसौ इति शैलाब्धिधरादिभेदभिन्नस्य जगतो ज्ञानैकस्वरूपब्रह्माज्ञानविजृम्भितत्वमभिधाय *यदा तु शुद्धं निजरूपि इति ज्ञानस्वरूपस्यैव ब्रह्मणः स्वस्वरूपावस्थितिवेलायां वस्तुभेदाभावदर्शनेनाज्ञानविजृम्भितत्वमेव स्थिरीकृत्य *वस्त्वस्ति किम् * मही घटत्वम् इति श्लोकद्वयेन जगदुपलब्धिप्रकारेणापि वस्तुभेदानामसत्यत्वमुपपाद्य * तस्मान्न विज्ञानमृते इति प्रतिज्ञातं ब्रह्मव्यतिरिक्तस्यासत्यत्वमुपसंहृत्य *विज्ञानमेकम् इति ज्ञानस्वरूपे ब्रह्मणि भेददर्शननिमित्ताज्ञानमूलं निजकर्मैवेति स्फुटीकृत्य *ज्ञानं विशुद्धम् इति ज्ञानस्वरूपस्य ब्रह्मणः स्वरूपं विशोध्य * सद्भाव एवं भवतो मयोक्तः इति ज्ञानस्वरूपस्य ब्रह्मण एव सत्यत्वं नान्यस्य; अन्यस्य चासत्यत्वमेव; तस्य भुवनादेस्सत्यत्वं व्यावहारिकमिति तत्त्वं तवोपदिष्टमिति ह्युपदेशो दृश्यते॥

नैतदेवम्। अत्र भुवनकोशस्य विस्तीर्णं स्वरूपमुक्त्वा, पूर्वमनुक्तं रूपान्तरं संक्षेपतः *श्रूयताम् इत्यारभ्याभिधीयते। चिदचिन्मिश्रे जगति चिदंशो वाङ्मनसागोचरस्वसंवेद्यस्वरूपभेदो ज्ञानैकाकारतया अस्पृष्टप्राकृतभेदोऽविनाशित्वेनास्तिशब्दवाच्यः। अचिदंशस्तु चिदंशकर्मनिमित्तपरिणामभेदो विनाशीति नास्तिशब्दाभिधेयः। उभयं तु परब्रह्मभूतवासुदेवशरीरतया तदात्मकमित्येतद्रूपं संक्षेपेणात्राभिहितम्। तथाहि——

*यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा। पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता॥

इत्यम्बुनो विष्णोश्शरीरत्वेनाम्बुपरिणामभूतं ब्रह्माण्डमपि विष्णोः कायः, तस्य च विष्णुरात्मेति सकलश्रुतिगततादात्म्योपदेशोपबृंहणरूपस्य सामानाधिकरण्यस्य * ज्योतींषि विष्णुः इत्यारभ्य वक्ष्यमाणस्य शरीरात्मभाव एव निबन्धनमित्याह। अस्मिन् शास्त्रे पूर्वमप्येतदसकृदुक्तम् *तानि सर्वाणि तद्वपुः *तत्सर्वं वै हरेस्तनुः *स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः इति। तदिदं शरीरात्मभावायत्तं तादात्म्यं सामानाधिकरण्येन व्यपदिश्यते *ज्योतींषि विष्णुरिति। अत्रास्त्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्मकं नास्त्यात्मकं च जगदन्तर्गतं वस्तु विष्णोः कायतया विष्ण्वात्मकमित्युक्तम्। इदमस्त्यात्मकम्, इदं नास्त्यात्मकम्, अस्य च नास्त्यात्मकत्वे हेतुरयमित्याह– *ज्ञानस्वरूपो भगवान्यतोऽसौ इति। अशेषक्षेत्रज्ञात्मनाऽवस्थितस्य भगवतो ज्ञानमेव स्वाभाविकं रूपम्, न देवमनुष्यादिवस्तुरूपम्। यत एवम्, तत एवाचिद्रूपदेवमनुष्यशैलाब्धिधरादयश्च तद्विज्ञानविजृम्भिताः; तस्य ज्ञानैकाकारस्य सतो देवाद्याकारेण स्वात्मवैविध्यानुसंधानमूला देवाद्याकारानुसंधानमूलकर्ममूला इत्यर्थः। यतश्चाचिद्वस्तु क्षेत्रज्ञकर्मानुगुणपरिणामास्पदं, ततस्तन्नास्तिशब्दाभिधेयम्, इतरदस्तिशब्दाभिधेयमित्यर्थादुक्तं भवति। तदेव विवृणोति *यदा तु शुद्धं निजरूपीति। यदैतत् ज्ञानैकाकारमात्मवस्तु देवाद्याकारेण स्वात्मनि वैविध्यानुसन्धानमूलसर्वकर्मक्षयान्निर्दोषं परिशुद्धं निजरूपि भवति, तदा देवाद्याकारेणैकीकृत्यात्मकल्पनामूलकर्मफलभूतास्तद्भोगार्था वस्तुषु वस्तुभेदा न भवन्ति। ये देवादिषु वस्तुष्वात्मतयाऽभिमतेषु भोग्यभूता देवमनुष्यशैलाब्धिधरादिवस्तुभेदाः; ते तन्मूलभूतकर्मसु विनष्टेषु न भवन्तीत्यचिद्वस्तुनः कादाचित्कावस्थाविशेषयोगितया नास्तिशब्दाभिधेयत्वम्, इतरस्य सर्वदा निजसिद्धज्ञानैकाकारत्वेन अस्तिशब्दाभिधेयत्वमित्यर्थः। प्रतिक्षणमन्यथाभूततया कादाचित्कावस्थायोगिनोऽचिद्वस्तुनो नास्तिशब्दाभिधेयत्वमेवेत्याह– *वस्त्वस्ति किमिति। अस्तिशब्दाभिधेयो ह्यादिमध्यपर्यन्तहीनस्सततैकरूपः पदार्थः, तस्य कदाचिदपि नास्तिबुद्ध्यनर्हत्वात्। अचिद्वस्तु किंचित् क्वचिदपि तथाभूतं न दृष्टचरम्। ततः किमित्यत्राह *यच्चान्यथात्वमिति। यद्वस्तु प्रतिक्षणमन्यथात्वं याति तदुत्तरोत्तरावस्थाप्राप्त्या पूर्वपूर्वावस्थां जहातीति तस्य पूर्वावस्थस्योत्तरावस्थायां न प्रतिसंधानमस्ति। अतस्सर्वदा तस्य नास्तिशब्दाभिधेयत्वमेव। तथा ह्युपलभ्यत इत्याह *महीघटत्वमिति। स्वकर्मणा देवमनुष्यादिभावेन स्तिमितात्मनिश्चयैस्स्वभोग्यभूतमचिद्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यते–अनुभूयत इत्यर्थः। एवं सति किमप्यचिद्वस्त्वस्तिशब्दार्हमादिमध्यपर्यन्तहीनं सततैकरूपमालक्षितमस्ति किम्? न ह्यस्तीत्यभिप्रायः। यस्मादेवम्, तस्मात् ज्ञानस्वरूपादनन्यातिरिक्तमचिद्वस्तु कदाचित्क्वचित् केवलास्तिशब्दवाच्यं न भवतीत्याह *तस्मान्न विज्ञानमृते इति। आत्मा तु सर्वत्र ज्ञानैकाकारतया देवादिभेदप्रत्यनीकस्वरूपोऽपि देवादिशरीरप्रवेशहेतुभूतस्वकृतविविधकर्ममूलदेवादिभेदभिन्नात्मबुद्धिभिस्तेन तेन रूपेण बहुधाऽनुसंहित इति तद्भेदानुसंधानं नात्मस्वरूपप्रयुक्तमित्याह *विज्ञानमेकमिति।

आत्मस्वरूपं तु कर्मरहितम्, तत एव मलरूपप्रकृतिस्पर्शरहितम्; ततश्च तत्प्रयुक्तशोकमोहलोभाद्यशेषहेयगुणासङ्गि, उपचयापचयानर्हतयैकम्, तत एव सदैकरूपम्; तच्च वासुदेवशरीरमिति तदात्मकम्, अतदात्मकस्य कस्यचिदप्यभावादित्याह *ज्ञानं विशुद्धमिति। चिदंशस्सदैकरूपतया सर्वदाऽस्तिशब्दवाच्यः। अचिदंशस्तु क्षणपरिणामित्वेन सर्वदा नाशगर्भ इति सर्वदा नास्तिशब्दाभिधेयः। एवंरूपचिदचिदात्मकं जगद्वासुदेवशरीरं तदात्मकमिति जगद्याथात्म्यं सम्यगुक्तमित्याह– *सद्भाव एवमिति। अत्र सत्यम्, असत्यमिति, यदस्ति, यन्नास्तीति प्रक्रान्तस्योपसंहारः। एतत् ज्ञानैकाकारतया समस्तं अशब्दगोचरस्वरूपभेदमेवाचिन्मिश्रं भुवनाश्रितं देवमनुष्यादिरूपेण सम्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्व्यवहारार्हभेदं यद्वर्तते; तत्र हेतुः कर्मैवेत्युक्तमित्याह *एतत्तु यदिति। तदेव विवृणोति— * यज्ञः पशुरिति। जगद्याथात्म्यज्ञानप्रयोजनं मोक्षोपाययतनमित्याह *यच्चैतदिति॥

अत्र निर्विशेषे परे ब्रह्मणि तदाश्रये सदसदनिर्वचनीये चाज्ञाने, जगतस्तत्कल्पितत्वे वाऽनुगुणं किञ्चिदपि पदं न दृश्यते। अस्तिनास्तिशब्दाभिधेयं चिदचिदात्मकं कृत्स्नं जगत् परमस्य परेशस्य परस्य ब्रह्मणो विष्णोः कायत्वेन तदात्मकम्; ज्ञानैकाकारस्यात्मनो देवादिविविधाकारानुभवेऽचित्परिणामे च हेतुर्वस्तुयाथात्म्यज्ञानविरोधि क्षेत्रज्ञानां कर्मैवेति प्रतिपादनात्; अस्तिनास्तिसत्यासत्यशब्दानां च सदसदनिर्वचनीयवस्त्वभिधानासामर्थ्याच्च। नास्त्यसत्यशब्दावस्तिसत्यशब्दविरोधिनौ। अतश्च ताभ्यामसत्त्वं हि प्रतीयते; नानिर्वचनीयत्वम्। अत्र चाचिद्वस्तुनि नास्त्यसत्यशब्दौ न तुच्छत्वमिथ्यात्वपरौ प्रयुक्तौ; अपि तु विनाशित्वपरौ। *वस्त्वस्ति किम् *मही घटत्वमित्यत्रापि विनाशित्वमेव ह्युपपादितम्; न निष्प्रमाणकत्वं, ज्ञानबाध्यत्वं वा; एकेनाकारेणैकस्मिन् कालेऽनुभूतस्य कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनात्। तुच्छत्वं हि प्रमाणसंबन्धानर्हत्वम्। बाधोऽपि यद्देशकालादिसंबन्धितया यदस्तीत्युपलब्धम्, तस्य तद्देशकालादिसंबन्धितया नास्तीत्युपलब्धिः; न तु कालान्तरे अनुभूतस्य कालान्तरे परिणामादिना नास्तीत्युपलब्धिः, कालभेदेन विरोधाभावात्। अतो न मिथ्यात्वम्॥

एतदुक्तं भवति—ज्ञानस्वरूपमात्मवस्तु आदिमध्यपर्यन्तहीनं सततैकस्वरूपमिति स्वत एव सदाऽस्तिशब्दवाच्यम्। अचेतनं तु क्षेत्रज्ञभोग्यभूतं तत्कर्मानुगुणपरिणामि विनाशीति सर्वदा नास्त्यर्थगर्भमिति नास्त्यसत्यशब्दाभिधेयमिति॥ यथोक्तम्—

*यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसंभूतां तद्वस्तु नृप तच्च किम्॥

*अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नास्ति न संदेहो नाशिद्रव्योपपादितम्॥ इति॥

देशकालकर्मविशेषापेक्षया अस्तित्वनास्तित्वयोगिनि वस्तुनि केवलास्तिबुद्धिबोध्यत्वमपरमार्थ इत्युक्तम्। आत्मन एव केवलास्तिबुद्धिबोध्यत्वमिति स परमार्थ इत्युक्तम्। श्रोतुश्च मैत्रेयस्य *विष्ण्वाधारं यथा चैतत्त्रैलोक्यं समवस्थितम्। परमार्थश्च मे प्रोक्तो यथाज्ञानं प्रधानतः॥ इत्यनुभाषणाच्च, *ज्योतींषि विष्णुरित्यादिसामानाधिकरण्यस्यात्मशरीरभाव एव निबन्धनम्; चिदचिद्वस्तुनोश्चास्तिनास्तिशब्दप्रयोगनिबन्धनं ज्ञानस्याकर्मनिमित्तस्वाभाविकरूपत्वेन प्राधान्यम्, अचिद्वस्तुनश्च तत्कर्मनिमित्तपरिणामित्वेनाप्राधान्यमिति प्रतीयते॥ इत्यविद्यायाः स्मृतिपुराणसिद्धत्वनिरासः। इति प्रमाणानुपपत्तिः।

यदुक्तं निर्विशेषब्रह्मविज्ञानादेवाविद्यानिवृत्तिं वदन्ति श्रुतय इति। तदसत्, * वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्, तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय *सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि *न तस्येशे कश्चन तस्य नाम महद्यशः * य एनं विदुरमृतास्ते भवन्ति इत्याद्यनेकवाक्यविरोधात्। ब्रह्मणस्सविशेषत्वादेव सर्वाण्यपि वाक्यानि सविशेषज्ञानादेव मोक्षं वदन्ति। शोधकवाक्यान्यपि सविशेषमेव ब्रह्म प्रतिपादयन्तीत्युक्तम्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्त्वमस्यादिवाक्येषु सामानाधिकरण्यं न निर्विशेषवस्त्वैक्यपरम्, तत्त्वंपदयोस्सविशेषब्रह्माभिधायित्वात् । तत्पदं हि सर्वज्ञं सत्यसङ्कल्पं जगत्कारणं ब्रह्म परामृशति *तदैक्षत बहु स्यामित्यादिषु तस्यैव प्रकृतत्वात् । तत्समानाधिकरणं त्वंपदं च अचिद्विशिष्टजीवशरीरकं ब्रह्म प्रतिपादयति, प्रकारद्वयावस्थितैकवस्तुपरत्वात्सामानाधिकरण्यस्य । प्रकारद्वयपरित्यागे, प्रवृत्तिनिमित्तभेदासंभवेन सामानाधिकरण्यमेव परित्यक्तं स्यात्; द्वयोः पदयोर्लक्षणा च । सोऽयं देवदत्तः इत्यत्रापि न लक्षणा, भूतवर्तमानकालसंबन्धितयैक्यप्रतीत्यविरोधात् । देशभेदविरोधश्च कालभेदेन परिहृतः । *तदैक्षत बहु स्यामित्युपक्रमविरोधश्च । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं च न घटते । ज्ञानस्वरूपस्य निरस्तनिखिलदोषस्य सर्वज्ञस्य समस्तकल्याणगुणात्मकस्याज्ञानं तत्कार्यानन्तापुरुषार्थाश्रयत्वं च भवति । बाधार्थत्वे च सामानाधिकरण्यस्य त्वंतत्पदयोरधिष्ठानलक्षणा निवृत्तिलक्षणा चेति लक्षणादयस्त एव दोषाः ॥

इयांस्तु विशेषः—नेदं रजतमितिवदप्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनम्; तत्पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्च । अधिष्ठानं तु प्राक्तिरोहितमतिरोहितस्वरूपं तत्पदेनोपस्थाप्यत इति चेन्न, प्रागधिष्ठानाप्रकाशे तदाश्रयभ्रमबाधयोरसंभवात् । भ्रमाश्रयमधिष्ठानमतिरोहितमिति चेत्; तदेवाधिष्ठानस्वरूपं भ्रमविरोधीति तत्प्रकाशे सुतरां न तदाश्रयभ्रमबाधौ । अतोऽधिष्ठानातिरेकिपारमार्थिकधर्मतत्तिरोधानानभ्युपगमे भ्रान्तिबाधौ दुरुपपादौ । अधिष्ठाने हि पुरुषमात्राकारे प्रतीयमाने तदतिरेकिणि पारमार्थिके राजत्वे तिरोहिते सत्येव व्याधत्वभ्रमः। राजत्वोपदेशेन च तन्निवृत्तिर्भवति; नाधिष्ठानमात्रोपदेशेन; तस्य प्रकाशमानत्वेनानुपदेश्यत्वात्; भ्रमानुपमर्दित्वाच्च॥

जीवशरीरकजगत्कारणब्रह्मपरत्वे मुख्यवृत्तं पदद्वयम् । प्रकारद्वयविशिष्टैकवस्तुप्रतिपादनेन सामानाधिकरण्यं च सिद्धम् । निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणो जीवान्तर्यामित्वमप्यैश्वर्यमपरं प्रतिपादितं भवति । उपक्रमानुकूलता च । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिश्च । सूक्ष्मचिदचिद्वस्तुशरीरस्यैव ब्रह्मणस्स्थूलचिदचिद्वस्तुशरीरत्वेन कार्यत्वात् *तमीश्वराणां परमं महेश्वरम् *पराऽस्य शक्तिर्विविधैव श्रूयते *अपहतपाप्मा......सत्यकामस्सत्यसङ्कल्पः इत्यादिश्रुत्यन्तराविरोधश्च ।

*तत्त्वमसीत्यत्रोद्देश्योपादेयविभागः कथमिति चेत्; नात्र किंचिदुद्दिश्य किमपि विधीयते; *ऐतदात्म्यमिदं सर्वमित्यनेनैव प्राप्तत्वात् । अप्राप्ते हि शास्त्रमर्थवत् । इदं सर्वमिति सजीवं जगन्निर्दिश्य ऐतदात्म्यमिति तस्यैष आत्मेति तत्र प्रतिपादितम् । तत्र च हेतुरुक्तः *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः इति; *सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः इतिवत् ॥

तथा श्रुत्यन्तराणि च ब्रह्मणस्तद्व्यतिरिक्तस्य चिदचिद्वस्तुनश्च शरीरात्मभावमेव तादात्म्यं वदन्ति *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः *य आत्मनि

Digitization by Arya Samaj Charitable Foundation, Chennai

तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः * यः पृथिवीमन्तरे संचरन्नित्यारभ्य * यस्य मृत्युश्शरीरम्, यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, इत्यादीनि। अत्रापि * अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकजीवानुप्रवेशेनैव सर्वेषां वस्तुत्वं शब्दवाच्यत्वं च प्रतिपादितम्। *तदनुप्रविश्य, सच्च त्यच्चाभवत् इत्यनेनैकार्थ्याज्जीवस्यापि ब्रह्मात्मकत्वं ब्रह्मानुप्रवेशादेवेत्यवगम्यते। अतश्चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य ब्रह्मतादात्म्यमात्मशरीरभावादेवेत्यवगम्यते। तस्मात् ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात्तस्य प्रतिपादकोऽपि शब्दस्तत्पर्यन्तमेव स्वार्थमभिदधाति। अतस्सर्वशब्दानां लोकव्युत्पत्त्यवगततत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमिति *ऐतदात्म्यमिदं सर्वमिति प्रतिज्ञातार्थस्य *तत्त्वमसीति सामानाधिकरण्येन विशेष उपसंहारः॥

अतो निर्विशेषवस्त्वैक्यवादिनो भेदाभेदवादिनः केवलभेदवादिनश्च वैयधिकरण्येन सामानाधिकरण्येन च ब्रह्मात्मभावोपदेशास्सर्वे परित्यक्तास्स्युः। एकस्मिन्वस्तुनि कस्य तादात्म्यमुपदिश्यते? तस्यैवेति चेत्; तत्स्ववाक्येनैवावगतमिति न तादात्म्योपदेशावसेयमस्ति किंचित्। कल्पितभेदनिरसनमिति चेत्; तत्तु न सामानाधिकरण्यतादात्म्योपदेशावसेयमित्युक्तम्। सामानाधिकरण्यं तु ब्रह्मणि प्रकारद्वयप्रतिपादनेन विरोधमेवावहेत्। भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात्तत्प्रयुक्ता जीवगता दोषा ब्रह्मण्येव प्रादुःष्युरिति निरस्तनिखिलदोषकल्याणगुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्तास्स्युः। स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणस्स्वत एव जीवभावाभ्युपगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशो विरुद्ध एव। केवलभेदवादिनां चात्यन्तभिन्नयोः केनापि प्रकारेणैक्यासंभवादेव ब्रह्मात्मभावोपदेशा न संभवन्तीति सर्ववेदान्तपरित्यागस्स्यात्॥

निखिलोपनिषत्प्रसिद्धं कृत्स्नस्य ब्रह्मशरीरभावमातिष्ठमानैः कृत्स्नस्य ब्रह्मात्मभावोपदेशास्सर्वे सम्यगुपपादिता भवन्ति। जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वेन 'गौरश्वो मनुष्यो देवो जातः पुरुषः कर्मभिः' इति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृष्टचरम्। जातिगुणयोरपि द्रव्यप्रकारत्वमेव खण्डो गौः शुक्लः पटः इति सामानाधिकरण्यनिबन्धनम्। मनुष्यत्वादिविशिष्टपिण्डानामप्यात्मनः प्रकारतयैव पदार्थत्वात् मनुष्यः पुरुषष्षण्डो योषिदात्मा जातः इति सामानाधिकरण्यं सर्वत्रानुगतमिति प्रकारत्वमेव सामानाधिकरण्यनिबन्धनम्, न परस्परव्यावृत्ता जात्यादयः। स्वनिष्ठानामेव हि द्रव्याणां कदाचित् क्वचिद्द्रव्यविशेषणत्वे मत्वर्थीयप्रत्ययो दृष्टः, दण्डी कुण्डलीति; न पृथक् प्रतिपत्तिस्थित्यनर्हाणां द्रव्याणाम्; तेषां विशेषणत्वं सामानाधिकरण्यावसेयमेव॥

यदि गौरश्वो मनुष्यो देवः पुरुषो योषित् षण्ड आत्मा कर्मभिर्जातः इत्यत्र खण्डो मुण्डो गौः, शुक्लः पटः कृष्णः पटः इति जातिगुणवदात्मप्रकारत्वं मनुष्यादिशरीराणामिष्यते; तर्हि जाति-

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यक्त्योरिव प्रकारप्रकारिणोश्शरीरात्मनोरपि नियमेन सहप्रतिपत्तिस्स्यात्। न चैवं दृश्यते;नहि नियमेन गोत्वादिवदात्माश्रयतयैवात्मना सह मनुष्यादिशरीरं पश्यन्ति। अतो मनुष्य आत्मेति सामानाधिकरण्यं लाक्षणिकमेव। नैतदेवम्; मनुष्यादिशरीराणामप्यात्मैकाश्रयत्वम् तदेकप्रयोजनत्वम् तत्प्रकारत्वं च जात्यादितुल्यम्। आत्मैकाश्रयत्वमात्मविश्लेषे शरीरविनाशादवगम्यते। आत्मैकप्रयोजनत्वं च तत्कर्मफलभोगार्थतयैव सद्भावात्। तत्प्रकारत्वमपि देवो मनुष्यः इत्यात्मविशेषणतयैव प्रतीतेः। एतदेव हि गवादिशब्दानां व्यक्तिपर्यन्तत्वे हेतुः। एतत्स्वभावविरहादेव दण्डकुण्डलादीनां विशेषणत्वे दण्डी कुण्डलीति मत्वर्थीयप्रत्ययः। देवमनुष्यादिपिण्डानामात्मैकाश्रयत्वतदेकप्रयोजनत्वतत्प्रकारत्वस्वभावात् देवो मनुष्य आत्मा इति लोकवेदयोस्सामानाधिकरण्येन व्यवहारः। जातिव्यक्त्योर्नियमेन सहप्रतीतिरुभयोश्चाक्षुषत्वात्। आत्मनस्त्वचाक्षुषत्वाच्चक्षुषा शरीरग्रहणवेलायामात्मा न गृह्यते। पृथग्ग्रहणयोग्यस्य प्रकारतैकस्वरूपत्वं दुर्घटमिति मा वोचः; जात्यादिवत्तदेकाश्रयत्वतदेकप्रयोजनत्वतद्विशेषणत्वैश्शरीरस्यापि तत्प्रकारतैकस्वभावत्वावगमात्। सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धन इत्युक्तम्। यथा चक्षुषा पृथिव्यादेर्गन्धरसादिसंबन्धित्वं स्वाभाविकमपि न गृह्यते; एवं चक्षुषा गृह्यमाणं शरीरमात्मप्रकारतैकस्वभावमपि न तथा गृह्यते; आत्मग्रहणे चक्षुषस्सामर्थ्याभावात्। नैतावता शरीरस्य तत्प्रकारत्वस्वभावविरहः। तत्प्रकारतैकस्वभावत्वमेव सामानधिकरण्यनिबन्धनम्। आत्मप्रकारतया प्रतिपादनसमर्थस्तु शब्दस्सहैव प्रकारतया प्रतिपादयति। ननु च शाब्देऽपि व्यवहारे शरीरशब्देन शरीरमात्रं गृह्यत इति नात्मपर्यन्तता शरीरशब्दस्य। नैवम्; आत्मप्रकारभूतस्यैव शरीरस्य पदार्थविवेकप्रदर्शनाय निरूपणान्निष्कर्षकशब्दोऽयम्; यथा गोत्वं शुक्लत्वमाकृतिगुण इत्यादिशब्दाः॥

अतो गवादिशब्दवद्देवमनुष्यादिशब्दा आत्मपर्यन्ताः। एवं देवमनुष्यादिपिण्डविशिष्टानां जीवानां परमात्मशरीरतया तत्प्रकारत्वात् जीवात्मवाचिनश्शब्दाः परमात्मपर्यन्ताः। अतः परस्य ब्रह्मणः प्रकारतयैव चिदचिद्वस्तुनः पदार्थत्वमिति तत्सामानाधिकरण्येन प्रयोगः। अयमर्थो वेदार्थसंग्रहे समर्थितः। इदमेव शरीरात्मभावलक्षणं तादात्म्यम् *आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति वक्ष्यति; *आत्मेत्येव तु गृह्णीयादिति च वाक्यकारः॥

अत्रेदं तत्त्वम्—अचिद्वस्तुनः चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः— *अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः *मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् *क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः अमृताक्षरं हर इति भोक्ता निर्दिश्यते, प्रधानमात्मनो भोग्यत्वेन हरतीति हरः। *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः *प्रधानक्षेत्रज्ञपतिर्गुणेशः *पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् *ज्ञाज्ञौ द्वावजावीशनीशौ *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् *भोक्ता भोग्यं प्रेरितारं च मत्वा *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति *पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति *अजामेकां लोहितशुक्ल-

Digitization by Arya Samaj Charitable Foundation, Chennai

कृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥ *समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ इत्याद्याः ॥ स्मृतावपि—

*अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥
*सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥
*मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ॥
*प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
*मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् । संभवस्सर्वभूतानां ततो भवति भारत ॥ इति ॥

जगद्योनिभूतं महत् ब्रह्म मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु यत्; तस्मिंश्चेतनाख्यं गर्भं यत्संयोजयामि, ततो मत्कृताचिदचित्संसर्गाद्देवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां संभवो भवतीत्यर्थः ॥

एवं भोक्तृभोग्यरूपेणावस्थितयोस्सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः—* यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति इत्यारभ्य * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति । तथा *यः पृथिवीमन्तरे सञ्चरन्यस्य पृथिवी शरीरं यं पृथिवी न वेद इत्यारभ्य *योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यमक्षरं न वेद यो मृत्युमन्तरे सञ्चरन्यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः। अत्र मृत्युशब्देन तमश्शब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते; अस्यामेवोपनिषदि *अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते इति वचनात्; *अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा इति च ॥

एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं च जगत् स एवेत्याहुः— *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत इत्यारभ्य *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः, ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति । तथा *सोऽकामयत बहु स्यां प्रजायेयेति, स तपोऽतप्यत, स तपस्तप्त्वा, इदं सर्वमसृजत इत्यारभ्य *सत्यं चानृतं च सत्यमभवत् इत्याद्याः ॥

अत्रापि श्रुत्यन्तरसिद्धश्चिदचितोः परमपुरुषस्य च स्वरूपविवेकस्स्मारितः— *हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, *तत्सृष्ट्वा, तदेवानुप्राविशत्,

Digitization by Arya Samaj Charitable Foundation, Chennai

तदनुप्रविश्य, सच्च त्यच्चाभवत्,...विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवदिति च। *अनेन जीवेनात्मनाऽनुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं, *तदनुप्रविश्य, सच्च त्यच्चाभवत्... विज्ञानं चाविज्ञानं चेत्यनेनैकार्थ्यात् आत्मशरीरभावनिबन्धनमिति विज्ञायते। एवंभूतमेव नामरूपव्याकरणं *तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यां व्याक्रियत इत्यत्राप्युक्तम्। अतः कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात्कार्यस्यानन्यत्वेन कारणविज्ञानेन कार्यस्य ज्ञाततयैकविज्ञानेन सर्वविज्ञानं समीहितमुपपन्नतरम्। *अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात्, सर्वे वाचकाश्शब्दाः अचिद्विशिष्टजीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनश्शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम्। अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत्। सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कारणमिति॥

ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासङ्करोऽप्युपपन्नतरः। यथा शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंबन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसङ्करः; तथा चिदचिदीश्वरसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसङ्करः। तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च। इह तु चिदचितोस्सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात्तत्प्रकारः परमपुरुषस्सर्वदा सर्वशब्दवाच्य इति विशेषः। स्वभावभेदस्तदसङ्करश्च तत्र चात्र च तुल्यः। एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयाऽवस्थानात्कार्यत्वमप्युपपन्नतरम्। अवस्थान्तरापत्तिरेव हि कार्यता॥

निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणासंबन्धादुपपद्यन्ते। *अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपास इति हेयगुणान् प्रतिषिध्य *सत्यकामस्सत्यसङ्कल्प इति कल्याणगुणान्विदधती इयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति॥

ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेर्निखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणस्स्वरूपं ज्ञानैकनिरूपणीयं स्वयंप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः। *यस्सर्वज्ञस्सर्ववित् *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *विज्ञातारमरे केन विजानीयादित्यादिकाः ज्ञातृत्वमावेदयन्ति; *सत्यं ज्ञानमित्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्वरूपताम्॥

*सोऽकामयत बहु स्याम् *तदैक्षत बहु स्याम् *तन्नामरूपाभ्यां व्याक्रियतेति ब्रह्मैव स्वसङ्कल्पाद्विचित्रस्थिरत्रसरूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकवस्तुनानात्वमतत्त्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

मिति तत्प्रतिमिध्यते *मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति *नेह नानाऽस्ति किञ्चन *यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयादित्यादिना। न पुनः *बहु स्यां प्रजायेयेत्यादिश्रुतिसिद्धं स्वसङ्कल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते। *यत्र त्वस्य सर्वमात्मैवाभूदित्यादिनिषेधवाक्यादौ च तत्स्थापितम् *सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद *तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः इत्यादिना ॥

एवं चिदचिदीश्वराणां स्वभावभेदं स्वरूपभेदं च वदन्तीनां कार्यकारणभावं कार्यकारणयोरनन्यत्वं च वदन्तीनां सर्वासां श्रुतीनामविरोधः, चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावं शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिश्श्रुतिभिरेव ज्ञायत इति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यस्याप्यपन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथञ्चिदप्यवकाशो दृश्यते। चिदचिदीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारणभावप्रतिपादनं कार्यकारणयोरैक्यप्रतिपादनं च ह्यविरुद्धम्। यथा—आग्नेयादीन् षड्यागानुत्पत्तिवाक्यैः पृथगुत्पन्नान् समुदायानुवादिवाक्यद्वयेन समुदायद्वयत्वमापन्नान् *दर्शपूर्णमासाभ्यामित्यधिकारवाक्यं कामिनः कर्तव्यतया विदधाति; तथा चिदचिदीश्वरान्विविक्तस्वरूपस्वभावान् *क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः *पतिं विश्वस्यात्मेश्वरम् *आत्मा नारायणः परः इत्यादिवाक्यैः पृथक् प्रतिपाद्य *यस्य पृथिवी शरीरम् *यस्यात्मा शरीरम् *यस्याव्यक्तं शरीरम्, यस्याक्षरं शरीरम्, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इत्यादिभिर्वाक्यैश्चिदचितोस्सर्वावस्थावस्थितयोः परमात्मशरीरतां परमात्मनस्तदात्मतां च प्रतिपाद्य शरीरिभूतपरमात्माभिधायिभिस्सद्ब्रह्मात्मादिशब्दैः कारणावस्थः कार्यावस्थश्च परमात्मैक एवेति पृथक्प्रतिपन्नं वस्तुत्रितयं *सदेव सोम्येदमग्र आसीत् *ऐतदात्म्यमिदं सर्वम् *सर्वं खल्विदं ब्रह्म इत्यादिवाक्यं प्रतिपादयति। चिदचिद्वस्तुशरीरिणः परमात्मनः परमात्मशब्देनाभिधाने हि नास्ति विरोधः; यथा मनुष्यपिण्डशरीरकस्यात्मविशेषस्य अयमात्मा सुखीत्यात्मशब्देनाभिधान इत्यलमतिविस्तरेण ॥ इति निवर्तकानुपपत्तिः।

यत्पुनरिदमुक्तम् ब्रह्मात्मैकत्वविज्ञानेनैवाविद्यानिवृत्तिर्युक्तेति, तदयुक्तम्, बन्धस्य पारमार्थिकत्वेन ज्ञाननिवर्त्यत्वाभावात्। पुण्यापुण्यरूपकर्मनिमित्तदेवादिशरीरप्रवेशतत्प्रयुक्तसुखदुःखानुभवरूपस्य बन्धस्य मिथ्यात्वं कथमिव शक्यते वक्तुम्? एवंरूपबन्धनिवृत्तिर्भक्तिरूपापन्नोपासनप्रीतपरमपुरुषप्रसादलभ्येति पूर्वमेवोक्तम्। भवदभिमतस्यैक्यज्ञानस्य यथावस्थितवस्तुविपरीतविषयस्य मिथ्यारूपत्वेन बन्धविवृद्धिरेव फलं भवति, *मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः इति शास्त्रात्; *उत्तमः पुरुषस्त्वन्यः *पृथगात्मानं प्रेरितारं च मत्वा इति जीवात्मविसजातीयस्य तदन्तर्यामिणो ब्रह्मणो ज्ञानं परमपुरुषार्थलक्षणमोक्षसाधनमित्युपदेशाच्च ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अपिच भवदभिमतस्यापि निवर्तकज्ञानस्य मिथ्यारूपत्वात्तस्य निवर्तकान्तरं मृग्यम् । निवर्तकज्ञानमिदं स्वविरोधि सर्वं भेदजातं निवर्त्य क्षणिकत्वात्स्वयमेव नश्यतीति चेन्न; तत्स्वरूपतदुत्पत्तिविनाशानां काल्पनिकत्वेन विनाशतत्कल्पनाकल्पकरूपाविद्याया निवर्तकान्तरमन्वेषणीयम् । तद्विनाशो ब्रह्मस्वरूपमेवेति चेत्; तथा सति निवर्तकज्ञानोत्पत्तिरेव न स्यात्, तद्विनाशे तिष्ठति तदुत्पत्त्यसंभवात् ॥

अपिच चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता ? अध्यासरूप इति चेन्न; तस्य निषेध्यतया निवर्तकज्ञानकर्मत्वात् तत्कर्तृत्वानुपपत्तेः । ब्रह्मस्वरूपमिति चेत्; ब्रह्मणो निवर्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपम्; उताध्यस्तम् ? अध्यस्तं चेत्, अयमध्यासस्तन्मूलाविद्यान्तरं च निवर्तकज्ञानाविषयतया तिष्ठत्येव । निवर्तकज्ञानान्तराभ्युपगमे तस्यापि त्रिरूपत्वात् ज्ञात्रपेक्षयाऽनवस्था स्यात् । ब्रह्मस्वरूपस्यैव ज्ञातृत्वेऽस्मदीय एव पक्षः परिगृहीतस्स्यात् । निवर्तकज्ञानस्वरूपं स्वस्य ज्ञाता च ब्रह्मव्यतिरिक्तत्वेन स्वनिवर्त्यान्तर्गतमिति वचनं 'भूतलव्यतिरिक्तं कृत्स्नं देवदत्तेन च्छिन्नम्' इत्यस्यामेव च्छेदनक्रियायामस्य च्छेत्तुरस्याश्छेदनक्रियायाश्च च्छेद्यानुप्रवेशवचनवदुपहास्यम् । अध्यस्तो ज्ञाता स्वनाशहेतुभूतनिवर्तकज्ञाने स्वयं कर्ता च न भवति, स्वनाशस्यापुरुषार्थत्वात् । तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमे भेददर्शनतन्मूलाविद्यादीनां कल्पनमेव न स्यात् । इत्यलमनेन दिष्टहतमुद्गराभिघातेन ॥ इति निवृत्त्यनुपपत्तिः ।

तस्मादनादिकर्मप्रवाहरूपाज्ञानमूलत्वाद्बन्धस्य तन्निबर्हणमुक्तलक्षणज्ञानादेव । तदुत्पत्तिश्चाहरहरनुष्ठीयमानपरमपुरुषाराधनवेषात्मयाथात्म्यबुद्धिविशेषसंस्कृतवर्णाश्रमोचितकर्मलभ्या । तत्र केवलकर्मणामल्पास्थिरफलत्वम्, अनभिसंहितफलपरमपुरुषाराधनवेषाणां कर्मणाम् उपासनात्मकज्ञानोत्पत्तिद्वारेण ब्रह्मयाथात्म्यानुभवरूपानन्तस्थिरफलत्वं च कर्मस्वरूपज्ञानादृते न ज्ञायते; केवलाकारपरित्यागपूर्वकयथोक्तस्वरूपकर्मोपादानं च न संभवतीति कर्मविचारानन्तरं तत एव हेतोः ब्रह्मविचारः कर्तव्य इति अथात इत्युक्तम् ॥ इति महासिद्धान्तः ।

[अथ सूत्रकाराभिमतसूत्रार्थयोजनारम्भः]

तत्र पूर्वपक्षवादी मन्यते—वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासंभवात्, व्यवहारस्य च कार्यबुद्धिपरत्वेन कार्यार्थ एव शब्दस्य प्रामाण्यमिति कार्यरूप एव वेदार्थः । अतो न वेदान्ताः परिनिष्पन्ने परे ब्रह्मणि प्रमाणभावमनुभवितुमर्हन्ति । न च पुत्रजन्मादिसिद्धवस्तुविषयवाक्येषु हर्षहेतूनां कालत्रयवर्तिनामर्थानामानन्त्यात् सुलग्नसुखप्रसवादिहर्षहेत्वर्थान्तरोपनिपातसंभावनया च प्रियार्थप्रतिपत्तिनिमित्तमुखविकासादिलिङ्गेनार्थविशेषबुद्धिहेतुत्वनिश्चयः; नापि व्युत्पन्नेतरपदविभक्त्यर्थस्य पदान्तरार्थनिश्चयेन प्रकृत्यर्थनिश्चयेन वा शब्दस्य सिद्धवस्तुन्यभिधानशक्तिनिश्चयः; ज्ञातकार्याभिधायिपदसमुदायस्य तदंशविशेषनिश्चयरूपत्वात्तस्य । न च सर्पाद्भीतस्य नायं सर्पो रज्जुरेषेति शब्दश्रवणसमनन्तरं भयनिवृत्तिदर्शनेन सर्पाभावबुद्धिहेतुत्वनिश्चयः; अत्रापि निश्चेष्टे

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्विषमचेतनमिदं वस्त्वित्याद्यर्थबोधेषु बहुषु भयनिवृत्तिहेतुषु सत्सु विशेषनिश्चयायोगात्। कार्यबुद्धिप्रवृत्तिव्याप्तिबलेन शब्दस्य प्रवर्तकार्थावबोधित्वमवगतमिति सर्वपदानां कार्यपरत्वेन सर्वैः पदैः कार्यस्यैव विशिष्टस्य प्रतिपादनान्नान्यान्वितस्वार्थमात्रे पदशक्तिनिश्चयः। इष्टसाधनताबुद्धिस्तु कार्यबुद्धिद्वारेण प्रवृत्तिहेतुः; न स्वरूपेण, अतीतानागतवर्तमानेष्टोपायबुद्धिषु प्रवृत्त्यनुपलब्धेः। इष्टोपायो हि मत्प्रयत्नादृते न सिध्यति; अतो मत्कृतिसाध्य इति बुद्धिर्यावन्न जायते, तावन्न प्रवर्तते। अतः कार्यबुद्धिरेव प्रवृत्तिहेतुरिति प्रवर्तकस्यैव शब्दवाच्यतया कार्यस्यैव वेदवेद्यत्वात्परिनिष्पन्नरूपब्रह्मप्राप्तिलक्षणानन्तस्थिरफलाप्रतिपत्तेः, *अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवतीत्यादिभिः कर्मणामेव स्थिरफलत्वप्रतिपादनाच्च कर्मफलाल्पास्थिरत्वब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुको ब्रह्मविचारारम्भो न युक्तः—इति ॥

अत्राभिधीयते— निखिललोकविदितशब्दार्थसंबन्धावधारणप्रकारमपनुद्य सर्वशब्दानामलौकिकैकार्थावबोधित्वावधारणं प्रामाणिका न बहु मन्वते। एवं किल बालाश्शब्दार्थसंबन्धमवधारयन्ति—मातापितृप्रभृतिभिरम्बातातमातुलादीन् शशिपशुनरमृगपक्षिसर्पादींश्च एनमवेहि इमं चावधारयेत्यभिप्रायेण अङ्गुल्या निर्दिश्य निर्दिश्य तैस्तैश्शब्दैस्तेषुतेष्वर्थेषु बहुशश्शिक्षिताश्शनैश्शनैस्तैस्तैरेव शब्दैस्तेषुतेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोस्संबन्धान्तरादर्शनात्संकेतयितृपुरुषाज्ञानाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति। पुनश्च व्युत्पन्नेतरशब्देषु अस्य शब्दस्यायमर्थ इति पूर्ववृद्धैश्शिक्षितास्सर्वशब्दानामर्थमवगम्य परप्रत्यायनाय तत्तदर्थावबोधि वाक्यजातं प्रयुञ्जते। प्रकारान्तरेणापि शब्दार्थसंबन्धावधारणं सुशकम्—केनचित्पुरुषेण हस्तचेष्टादिना पिता ते सुखमास्ते इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित् तज्ज्ञापने प्रवृत्तः 'पिता ते सुखमास्ते' इति शब्दं प्रयुङ्क्ते। पार्श्वस्थोऽन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञस्तज्ज्ञापने प्रवृत्तमिमं ज्ञात्वाऽनुगतस्तज्ज्ञापनाय प्रयुक्तमिमं शब्दं श्रुत्वा अयं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति कार्यार्थ एव व्युत्पत्तिरिति निर्बन्धो निर्निबन्धनः। अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म, तदुपासनं चापरिमितफलं बोधयन्तीति तन्निर्णयफलो ब्रह्मविचारः कर्तव्यः ॥

कार्यार्थत्वेऽपि वेदस्य ब्रह्मविचारः कर्तव्य एव। कथम्? *आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः *सोऽन्वेष्टव्यस्स विजिज्ञासितव्यः *विज्ञाय प्रज्ञां कुर्वीत *दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासितव्यम् *तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् इत्यादिभिः प्रतिपन्नोपासनविषयकार्याधिकृतफलत्वेन *ब्रह्मविदाप्नोति परमित्यादिभिर्ब्रह्मप्राप्तिश्श्रूयत इति ब्रह्मस्वरूपतद्विशेषणानां दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवत्, रात्रिसत्रप्रतिष्ठावत्, अपगोरणशतयातनासाध्यसाधनभाववच्च, कार्योपयोगितयैव सिद्धेः॥

गामानयेत्यादिष्वपि वाक्येषु न कार्यार्थे व्युत्पत्तिः; भवदभिमतकार्यस्य दुर्निरूपत्वात्। कृतिभावभावि कृत्युद्देश्यं हि भवतः कार्यम्। कृत्युद्देश्यत्वं च कृतिकर्मत्वम् कृतिकर्मत्वंच कृत्या प्राप्तु-

Digitization by Arya Samaj Charitable Foundation, Chennai

मिष्टतमत्वम्। इष्टतमं च सुखं वर्तमानदुःखस्य तन्निवृत्तिर्वा। तत्रेष्टसुखादिना पुरुषेण स्वप्रयत्नादृते यदि तदसिद्धिः प्रतीता, ततः प्रयत्नेच्छुः प्रवर्तते पुरुष इति न क्वचिदपीच्छाविषयस्य कृत्यधीनसिद्धित्वमन्तरेण कृत्युद्देश्यत्वं नाम किञ्चिदप्युपलभ्यते। इच्छाविषयस्य प्रेरकत्वं च प्रयत्नाधीनसिद्धित्वमेव, तत एव प्रवृत्तेः। न च पुरुषानुकूलत्वं कृत्युद्देश्यत्वम्; यतस्सुखमेव पुरुषानुकूलम्। न च दुःखनिवृत्तेः पुरुषानुकूलत्वम्; पुरुषानुकूलं सुखं तत्प्रतिकूलं दुःखमिति हि सुखदुःखयोस्स्वरूपविवेकः। दुःखस्य प्रतिकूलतया तन्निवृत्तिरिष्टा भवति; नानुकूलतया। अनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिर्हि दुःखनिवृत्तिः। अतस्सुखव्यतिरिक्तस्य क्रियादेरनुकूलत्वं न संभवति। न सुखार्थतया तस्याप्यनुकूलत्वम्; दुःखात्मकत्वात्तस्य। सुखार्थतयाऽपि तदुपादानेच्छामात्रमेव भवति।

न च कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वम्, भवत्पक्षे शेषित्वस्यानिरूपणात्। न च परोद्देशप्रवृत्तकृतिव्याप्त्यर्हत्वं शेषत्वमिति तत्प्रतिसंबन्धी शेषीत्यवगम्यते, तथा सति कृतेरशेषत्वेन तां प्रति तत्साध्यस्य शेषित्वाभावात्। न च परोद्देशप्रवृत्त्यर्हतायाश्शेषत्वेन परश्शेषी; उद्देश्यत्वस्यैव निरूप्यमाणत्वात्, प्रधानस्यापि भृत्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च। प्रधानस्तु भृत्यपोषणेऽपि स्वोद्देशेन प्रवर्तत इति चेन्न, भृत्योऽपि हि प्रधानपोषणे स्वोद्देशेनैव प्रवर्तते। कार्यस्वरूपस्यैवानिरूपणात्, कार्यप्रतिसंबन्धी शेषः, तत्प्रतिसंबन्धी शेषी इत्यप्यसङ्गतम्॥

नापि कृतिप्रयोजनत्वं कृत्युद्देश्यत्वम्; पुरुषस्य कृत्यारम्भप्रयोजनमेव हि कृतिप्रयोजनम्। स चेच्छाविषयः। तस्मादिष्टत्वातिरेकिकृत्युद्देश्यत्वानिरूपणात् कृतिसाध्यताकृतिप्रधानत्वरूपं कार्यं दुर्निरूपमेव॥

नियोगस्यापि साक्षादिष्टविषयभूतसुखदुःखनिवृत्तिभ्यामन्यत्वात्तत्साधनतयैवेष्टत्वं कृतिसाध्यत्वं च। अत एव हि तस्य क्रियातिरिक्तता; अन्यथा क्रियैव कार्यं स्यात्; स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङादिवाच्यं कार्यं स्वर्गसाधनमेवेति क्षणभङ्गिकर्मातिरेकि स्थिरं स्वर्गसाधनमपूर्वमेव कार्यमिति स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः। अतः प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणायापूर्वमेव पश्चात्स्वर्गसाधनं भवतीत्युपहास्यम्, स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्यनन्यार्थतानभिधानात्, सुखदुःखनिवृत्तितत्साधनेभ्योऽन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतीत्यनुपपत्तेश्च। अपिच किमिदं नियोगस्य प्रयोजनत्वम्? सुखवन्नियोगस्याप्यनुकूलत्वमेवेति चेत्, किं नियोगस्सुखम्? सुखमेव ह्यनुकूलम्। सुखविशेषत्वन्नियोगापरपर्यायं विलक्षणं सुखान्तरमिति चेत्; किं तत्र प्रमाणमिति वक्तव्यम्। स्वानुभवश्चेत्, नः विषयविशेषानुभवसुखवन्नियोगानुभवसुखमिदमिति भवताऽपि नानुभूयते। शास्त्रेण नियोगस्य पुरुषार्थतया प्रतिपादनात् पश्चात्तु भोक्ष्यत इति चेत्; किं तन्नियोगस्य पुरुषार्थत्ववाचि शास्त्रम्? न तावल्लौकिकं वाक्यम्; तस्य दुःखात्मकक्रियाविषयत्वात्, तेन सुखादिसाधनतयैव कृतिसाध्यतामात्रप्रतिपादनात्। नापि वैदिकं, तेनापि स्वर्गादिसाधनतयैव कार्यस्य प्रतिपादनात्। नापि नित्यनैमित्तिकशास्त्रम्; तस्यापि तदभिधायित्वं स्वर्गकामवाक्यस्थापूर्वव्युत्पत्तिपूर्वकमित्युक्तरीत्या तेनापि सुखादिसाधनकार्याभिधानमवर्जनीयम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

नियतैहिकफलस्य कर्मणोऽनुष्ठितस्य फलत्वेन तदानीमनुभूयमानान्नाद्यरोगतादिव्यतिरेकेण नियोगरूपसुखानुभवानुपलब्धेश्च नियोगस्सुखमित्यत्र न किंचन प्रमाणमुपलभामहे। अर्थवादादिष्वपि स्वर्गादिसुखप्रकारकीर्तनवन्नियोगरूपसुखप्रकारकीर्तनं भवतामपि न दृष्टचरम् ॥

अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते। धात्वर्थस्य च यागादेरग्न्यादिदेवतान्तर्यामिपरमपुरुषसमाराधनरूपता, समाराधितात्परमपुरुषात्फलसिद्धिश्चेति *फलमत उपपत्तेरित्यत्र प्रतिपादयिष्यते। अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म बोधयन्तीति ब्रह्मोपासनफलानन्त्यं स्थिरत्वं च सिद्धम्। चातुर्मास्यादिकर्मस्वपि केवलस्य कर्मणः क्षयिफलत्वोपदेशादक्षयफलश्रवणं *वायुश्चान्तरिक्षं चैतदमृतमित्यादिवदापेक्षिकं मन्तव्यम् ॥

अतः केवलानां कर्मणामल्पास्थिरफलत्वात्, ब्रह्मज्ञानस्य चानन्तास्थिरफलत्वात्तन्निर्णयफलो ब्रह्मविचारारम्भो युक्त इति स्थितम् ॥ १ ॥ इति जिज्ञासाधिकरणम् ॥ १ ॥

— अथ जन्माद्यधिकरणम् २ —

किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इत्यत्राह–

2 जन्माद्यस्य यतः ॥ १. १. २ ॥

जन्मादीति सृष्टिस्थितिप्रलयम्। तद्गुणसंविज्ञानो बहुव्रीहिः। अस्य– अचिन्त्यविविधविचित्ररचनस्य नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रितस्य जगतः, यतः– यस्मात् सर्वेश्वरात् निखिलहेयप्रत्यनीकस्वरूपात् सत्यसंकल्पात् ज्ञानानन्दाद्यनन्तकल्याणगुणात् सर्वज्ञात् सर्वशक्तेः परमकारुणिकात् परस्मात्पुंसः सृष्टिस्थितिप्रलयाः प्रवर्तन्ते तद्ब्रह्मेति सूत्रार्थः।

*भृगुर्वै वारुणिः, वरुणं पितरमुपससार, अधीहि भगवो ब्रह्म, इत्यारभ्य, *यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति श्रूयते। तत्र संशयः– किमस्माद्वाक्याद्ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते न वेति। किं प्राप्तम्? न शक्यमिति। न तावज्जन्मादयो विशेषणत्वेन ब्रह्म लक्षयन्ति, अनेकविशेषणव्यावृत्तत्वेन ब्रह्मणोऽनेकत्वप्रसक्तेः। विशेषणत्वं हि व्यावर्तकत्वम्। ननु देवदत्तश्श्यामो युवा लोहिताक्षस्समपरिमाण इत्यत्र विशेषणबहुत्वेऽपि एक एव देवदत्तः प्रतीयते; एवमत्राप्येकमेव ब्रह्म भवति। नैवम्; तत्र प्रमाणान्तरेणैक्यप्रतीतेरेकस्मिन्नेव विशेषणानामुपसंहारः। अन्यथा तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यम्। अत्र त्वनेनैव विशेषणेन लिलक्षयिषितत्वात् ब्रह्मणः प्रमाणान्तरेणैक्यमनवगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयम्। ब्रह्मशब्दैक्यादत्राप्यैक्यं प्रतीयत इति चेन्न। अज्ञातगोव्यक्तेर्जिज्ञासोः

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरुषस्य खण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते गोपदैक्येऽपि खण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेः ब्रह्मव्यक्तयोऽपि बह्वयस्स्युः। अत एव लिलक्षयिषिते वस्तुन्येषां विशेषणानां संभूय लक्षणत्वमप्यनुपपन्नम्। नाप्युपलक्षणत्वेन लक्षयन्ति, आकारान्तराप्रतिपत्तेः। उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य केनचिदाकारान्तरेण प्रतिपत्तिहेतुत्वं हि दृष्टम्— यत्रायं सारसस्स देवदत्तकेदार इत्यादिषु। ननु च *सत्यं ज्ञानमनन्तं ब्रह्मेति प्रतिपन्नाकारस्य जगज्जन्मादीन्युपलक्षणानि भवन्ति। न; इतरेतरप्रतिपन्नाकारापेक्षत्वेन उभयोर्लक्षणवाक्ययोरन्योन्याश्रयणात्। अतो न लक्षणतो ब्रह्म प्रतिपत्तुं शक्यत इति।

एवं प्राप्तेऽभिधीयते—जगत्सृष्टिस्थितिप्रलयैरुपलक्षणभूतैर्ब्रह्म प्रतिपत्तुं शक्यते। नचोपलक्षणोपलक्ष्याकारव्यतिरिक्ताकारान्तराप्रतिपत्तेर्ब्रह्माप्रतिपत्तिः। उपलक्ष्यं ह्यनवधिकातिशयबृहत् बृंहणं च; बृहतेर्धातोस्तदर्थत्वात्। तदुपलक्षणभूताश्च जगज्जन्मस्थितिलयाः। यतो येन यदिति प्रसिद्धवन्निर्देशेन यथाप्रसिद्धि जन्मादिकारणमनूद्यते। प्रसिद्धिश्च *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येकस्यैव सच्छब्दवाच्यस्य निमित्तोपादानरूपकारणत्वेन। तदपि *सदेवेदमग्र एकमेवासीदित्युपादानतां प्रतिपाद्य *अद्वितीयमित्यधिष्ठात्रन्तरं प्रतिषिध्य *तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येकस्यैव प्रतिपादनात्। तस्माद्यन्मूला जगज्जन्मस्थितिलयास्तद्ब्रह्मेति जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्मेति लक्षयन्ति। जगन्निमित्तोपादनताक्षिप्तसर्वज्ञत्वसत्यसङ्कल्पत्वविचित्रशक्तित्वाद्याकारबृहत्त्वेन प्रतिपन्नं ब्रह्मेति च जन्मादीनां तथा प्रतिपन्नस्य लक्षणत्वेन नाकारान्तराप्रतिपत्तिरूपानुपपत्तिः। जगज्जन्मादीनां विशेषणतया लक्षणत्वेऽपि न कश्चिद्दोषः। लक्षणभूतान्यपि विशेषणानि स्वविरोधिव्यावृत्तं वस्तु लक्षयन्ति। अज्ञातस्वरूपे वस्तुन्येकस्मिन् लिलक्षयिषितेऽपि परस्पराविरोध्यनेकविशेषणलक्षणत्वं न भेदमापादयति। विशेषणानामेकाश्रयतया प्रतीतेरेकस्मिन्नेवोपसंहारात्। खण्डत्वादयस्तु विरोधादेव गोव्यक्तिभेदमापादयन्ति। अत्र तु कालभेदेन जन्मादीनां न विरोधः।

*यतो वा इमानि भूतानि जायन्त इत्यादिकारणवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मणस्सकलेतरव्यावृत्तं स्वरूपमभिधीयते *सत्यं ज्ञानमनन्तं ब्रह्मेति। तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह। तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्तः; नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात्। ज्ञानपदं नित्यासंकुचितज्ञानैकाकारमाह। तेन कदाचित्संकुचितज्ञानत्वेन मुक्ता व्यावृत्ताः। अनन्तपदं देशकालवस्तुपरिच्छेदरहितं स्वरूपमाह। सगुणत्वात्स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम्। तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणास्सातिशयस्वरूपस्वगुणा नित्या व्यावृत्ताः; विशेषणानां व्यावर्तकत्वात्। ततः *सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन वाक्येन जगज्जन्मादिनाऽवगतस्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयमिति लक्ष्यत इति नान्योन्याश्रयणम्। अतस्सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसङ्कल्पं सर्वशक्ति ब्रह्म लक्षणतः प्रतिपत्तुं शक्यत इति सिद्धम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

ये तु निर्विशेषवस्तु जिज्ञास्यमिति वदन्ति, तन्मते *ब्रह्मजिज्ञासा, *जन्माद्यस्य यतः इत्यसंगतं स्यात्; निरतिशयबृहत् बृंहणं च ब्रह्मेति निर्वचनात्, तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च। एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु च ईक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृतश्रुतयश्च न तत्र प्रमाणम्। तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषवस्तुनि प्रमाणम्। जगज्जन्मादिभ्रमो यतस्तद्ब्रह्मेति स्वोत्प्रेक्षापक्षेऽपि न निर्विशेषवस्तुसिद्धिः; भ्रममूलमज्ञानम्, अज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात्। साक्षित्वं हि प्रकाशैकरसतयैवोच्यते। प्रकाशत्वं तु जडाद्व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति। तथा सति सविशेषत्वम्। तदभावे प्रकाशतैव न स्यात्; तुच्छतैव स्यात्॥ इति जन्माद्यधिकरणम्॥२॥

— अथ शास्त्रयोनित्वाधिकरणम् ३ —

जगज्जन्मादिकारणं ब्रह्म वेदान्तवेद्यमित्युक्तम्। तदयुक्तम्; तद्धि न वाक्यप्रतिपाद्यम्। अनुमानेन सिद्धेः इत्याशङ्क्याह—

३. शास्त्रयोनित्वात्॥ १. १. ३.॥

शास्त्रं यस्य योनिः—कारणं, प्रमाणम्, तच्छास्त्रयोनि; तस्य भावश्शास्त्रयोनित्वम्; तस्मात्। ब्रह्मज्ञानकारणत्वाच्छास्त्रस्य तद्योनित्वं ब्रह्मणः। अत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया ब्रह्मणश्शास्त्रैकप्रमाणकत्वादुक्तस्वरूपं ब्रह्म *यतो वा इमानि भूतानीत्यादिवाक्यं बोधयत्येवेत्यर्थः॥

ननु शास्त्रयोनित्वं ब्रह्मणो न संभवति, प्रमाणान्तरवेद्यत्वाद्ब्रह्मणः; अप्राप्ते तु शास्त्रमर्थवत्। किं तर्हि तत्र प्रमाणम्? न तावत्प्रत्यक्षम्। तद्धि द्विविधम्- इन्द्रियसंभवं योगसंभवं चेति। इन्द्रियसंभवं च बाह्यसंभवमान्तरसंभवं चेति द्विधा। बाह्येन्द्रियाणि विद्यमानसन्निकर्षयोग्यस्वविषयबोधजननानीति न सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषविषयबोधजननानि। नाप्यान्तरम्; आन्तरसुखदुःखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः। नापि योगजन्यम्; भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेऽपि पूर्वानुभूतविषयस्मृतिमात्रत्वान्न प्रामाण्यमिति कुतः प्रत्यक्षता? तदतिरिक्तविषयत्वे कारणाभावात्; तथा सति तस्य भ्रमरूपता। नाप्यनुमानं विशेषतो दृष्टं सामान्यतो दृष्टं वा। अतीन्द्रिये वस्तुनि संबन्धावधारणविरहान्न विशेषतो दृष्टम्। समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषनियतं सामान्यतो दृष्टमपि न लिङ्गमुपलभ्यते।

ननु च जगतः कार्यत्वं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तम्। अचेतनारब्धत्वं जगतश्चैकचेतनाधीनत्वेन व्याप्तम्। सर्वं हि घटादिकार्यं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकं दृष्टम्। अचेतनारब्धमरोगं स्वशरीरमेकचेतनाधीनं च। सावयवत्वेन जगतः कार्यत्वम्।

उच्यते। किमिदमेकचेतनाधीनत्वम्? न तावत्तदायत्तोत्पत्तिस्थितित्वम्; दृष्टान्तो हि साध्यविकलः स्यात्। न ह्यरोगं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थिति; तच्छरीरस्य भोक्तॄणां भार्यादिसर्वचेतनानामदृष्टजन्यत्वात्तदुत्पत्तिस्थित्योः। किंच, शरीरावयविनः स्वावयवसमवेततारूपा स्थिति-

Digitization by Arya Samaj Charitable Foundation, Chennai

रवयवसंश्लेषव्यतिरेकेण न चेतनमपेक्षते। प्राणनलक्षणा तु स्थितिः पक्षत्वाभिमते क्षितिजलधिमहीधरादौ न संभवतीति पक्षसपक्षानुगतामेकरूपां स्थितिं नोपलभामहे। तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेत्, अनेकचेतनसाध्येषु गुरुतररथशिलामहीरुहादिषु व्यभिचारः। चेतनमात्राधीनत्वे सिद्धसाध्यता।

किंच, उभयवादिसिद्धानां जीवानामेव लाघवेन कर्तृत्वाभ्युपगमो युक्तः। न च जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासंभवः; सर्वेषामेव चेतनानां पृथिव्याद्युपादानयागाद्युपकरणसाक्षात्कारसामर्थ्यात्; यथेदानीं पृथिव्यादयो यागादयश्च प्रत्यक्षमीक्ष्यन्ते। उपकरणभूतयागादिशक्तिरूपापूर्वादिशब्दवाच्यादृष्टसाक्षात्काराभावेऽपि चेतनानां न कर्तृत्वानुपपत्तिः; तत्साक्षात्कारानपेक्षणात्कार्यारम्भस्य। शक्तिमत्साक्षात्कार एव हि कार्यारम्भोपयोगी; शक्तेस्तु ज्ञानमात्रमेवोपयुज्यते, न साक्षात्कारः। न हि कुलालादयः कार्योपकरणभूतदण्डचक्रादिवत्तच्छक्तिमपि साक्षात्कृत्य घटमणिकादिकार्यमारभन्ते। इह तु चेतनानामागमावगतयागादिशक्तिविशेषाणां कार्यारम्भो नानुपपन्नः।

किंच, यच्छक्यक्रियं शक्योपादानादिविज्ञानं च तदेव तदभिज्ञकर्तृकं दृष्टम्। महीमहीधरमहार्णवादि त्वशक्यक्रियमशक्योपादानादिविज्ञानं चेति न चेतनकर्तृकम्। अतो घटमणिकादि सजातीयशक्यक्रियशक्योपादानादिविज्ञानवस्तुगतमेव कार्यत्वं बुद्धिमत्कर्तृपूर्वकत्वसाधने प्रभवति।

किंच, घटादिकार्यमनीश्वरेणाल्पज्ञानशक्तिना सशरीरेण परिग्रहवताऽनाप्तकामेन निर्मितं दृष्टमिति तथाविधमेव चेतनं कर्तारं साधयन्नयं कार्यत्वहेतुस्सिषाधयिषितपुरुषसार्वज्ञ्यसर्वैश्वर्यादिविपरीतसाधनाद्विरुद्धस्स्यात्। न चैतावता सर्वानुमानोच्छेदप्रसङ्गः। लिङ्गिनि प्रमाणान्तरगोचरे लिङ्गबलोपस्थापिता विपरीतविशेषास्तत्प्रमाणप्रतिहतगतयो निवर्तन्ते। इह तु सकलेतरप्रमाणाविषये लिङ्गिनि निखिलनिर्माणचतुरे अन्वयव्यतिरेकावगताविनाभावनियमा धर्मास्सर्व एवाविशेषेण प्रसज्यन्ते; निवर्तकप्रमाणाभावात्तथैवावतिष्ठन्ते। अत आगमादृते कथमीश्वरस्सेत्स्यति ?

अत्राहुः। सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते। भवन्ति च प्रयोगाः— विवादाध्यासितं भूभूधरादि कार्यम्, सावयवत्वात्, घटादिवत्। तथा विवादाध्यासितमवनिजलधिमहीधरादि कार्यम्, महत्त्वे सति क्रियावत्त्वात्, घटवत्। तनुभुवनादि कार्यम्, महत्त्वे सति मूर्तत्वात्, घटवत्—इति। सावयवेषु द्रव्येषु इदमेव क्रियते नेतरदिति कार्यत्वस्य नियामकं सावयवत्वातिरेकि रूपान्तरं नोपलभामहे। कार्यत्वप्रतिनियतं शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति चेन्न; कार्यत्वेनानुमतेऽपि विषये ज्ञानशक्ती कार्यानुमेये इत्यन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति ते च प्रतिपन्ने एवेति न कश्चिद्विशेषः। तथा हि घटमणिकादिषु कृतेषु कार्यदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्य अवयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति। अतस्तनुभुवनादेः कार्यत्वे सिद्धे सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् पुरुषविशेषस्सिध्यत्येव।

Digitization by Arya Samaj Charitable Foundation, Chennai

किंच सर्वचेतनानां धर्माधर्मनिमित्तेऽपि सुखदुःखोपभोगे चेतनानधिष्ठितयोस्तयोरचेतनयोः फलहेतुत्वानुपपत्तेस्सर्वकर्मानुगुणसर्वफलप्रदानचतुरः कश्चिदास्थेयः; वर्धकिनाऽनधिष्ठितस्य वास्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात्। बीजाङ्कुरादेः पक्षान्तर्भावेन तैर्व्यभिचारापादनं श्रोत्रियवेतालानामनभिज्ञताविजृम्भितम्। तत एव सुखादिभिर्व्यभिचारवचनमपि तथैव। न च लाघवेनोभयवादिसंप्रतिपन्नक्षेत्रज्ञानामेव ईदृशाधिष्ठातृत्वकल्पनं युक्तम्; तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात्। दर्शनानुगुणैव हि सर्वत्र कल्पना। न च क्षेत्रज्ञवदीश्वरस्याशक्तिनिश्चयोऽस्ति। अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः। समर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुना सिध्यन् स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनशक्तिसंपन्न एव सिध्यति।

यत्त्वनैश्वर्याद्यापादनेन धर्मविशेषविपरीतसाधनत्वमुन्नीतम्, तदनुमानवृत्तानभिज्ञत्वनिबन्धनम्; सपक्षे सहदृष्टानां सर्वेषां कार्यस्याहेतुभूतानां च धर्माणां लिङ्गिन्यप्राप्तेः। एतदुक्तं भवति। केनचित् किंचित् क्रियमाणं स्वोत्पत्तये कर्तुस्स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणज्ञानं चापेक्षते; न त्वन्यासामर्थ्यमन्याज्ञानं च, हेतुत्वाभावात्। स्वनिर्माणसामर्थ्यस्वोपादानोपकरणज्ञानाभ्यामेव स्वोत्पत्तावुपपन्नायां संबन्धितया दर्शनमात्रेणाकिंचित्करस्यार्थान्तराज्ञानादेः हेतुत्वकल्पनायोगादिति। किंच, क्रियमाणवस्तुव्यतिरिक्तार्थाज्ञानादिकं किं सर्वविषयं क्रियोपयोगि? उत, कतिपयविषयम्? न तावत्सर्वविषयम्; न हि कुलालादिः क्रियमाणव्यतिरिक्तं किमपि न जानाति। नापि कतिपयविषयम्; सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात्। अतः कार्यत्वस्यासाधकानामनीश्वरत्वादीनां लिङ्गिन्यप्राप्तिरिति न विपरीतसाधनत्वम्।

कुलालादीनां दण्डचक्राद्याधिष्ठानं शरीरद्वारेणैव दृष्टमिति जगदुपादानोपकरणाधिष्ठानमीश्वरस्याशरीरस्यानुपपन्नमिति चेन्न; संकल्पमात्रेणैव परशरीरगतभूतवेतालगरलाद्यपगमविनाशदर्शनात्। कथमशरीरस्य परप्रवर्तनरूपस्संकल्प इति चेत्; न शरीरापेक्षस्संकल्पः, शरीरस्य संकल्पहेतुत्वाभावात्। मन एव हि संकल्पहेतुः। तदभ्युपगतमीश्वरेऽपि; कार्यत्वेनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात्। मानसस्संकल्पस्सशरीरस्यैव, सशरीरस्यैव समनस्कत्वादिति चेन्न; मनसो नित्यत्वेन देहापगमेऽपि मनसस्सद्भावेनानैकान्त्यात्।

अतो विचित्रावयवसन्निवेशविशेषतनुभुवनादिकार्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न प्रभवतीति निखिलभुवननिर्माणचतुरोऽचिन्त्यापरिमितज्ञानशक्त्यैश्वर्योऽशरीरः संकल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोऽनुमानेनैव सिद्ध्यति। अतः प्रमाणान्तरावसेयत्वाद्ब्रह्मणो नैतद्वाक्यं ब्रह्म प्रतिपादयति।

किंच, अत्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेन आकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्या च नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानं च प्रतिपादयितुं शक्नोतीति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्राप्ते ब्रूमः— यथोक्तलक्षणं ब्रह्म जन्मादिवाक्यं बोधयत्येव। कुतः? शास्त्रैकप्रमाणकत्वात् ब्रह्मणः। यदुक्तं सावयवत्वादिना कार्यं सर्वं जगत्, कार्यं च तदुचितकर्तृविशेषपूर्वकं दृष्टमिति निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति; तदयुक्तम्; महीमहार्णवादीनां कार्यत्वेऽपि एकदैवैकेनैव निर्मिता इत्यत्र प्रमाणाभावात्। न चैकस्य घटस्येव सर्वेषामेकं कार्यत्वम्, येनैकदैवैकः कर्ता स्यात्। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमादर्शनात्। न च क्षेत्रज्ञानां विचित्रजगन्निर्माणाशक्त्या कार्यत्वबलेन तदतिरिक्तकल्पनायामनेककल्पनानुपपत्तेश्च एकः कर्ता भवितुमर्हतीति; क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणां शक्तिवैचित्र्यदर्शनेन तेषामेवातिशयिताद‍ृष्टसंभावनया च तत्तद्विलक्षणकार्यहेतुत्वसंभवात्, तदतिरिक्तात्यन्ताद‍ृष्टपुरुषकल्पनानुपपत्तेः। न च युगपत्सर्वोत्पत्तिस्सर्वोच्छित्तिश्च प्रमाणपदवीमधिरोहतः; अदर्शनात्, क्रमेणैवोत्पत्तिविनाशदर्शनाच्च। कार्यत्वेन सर्वोत्पत्तिविनाशयोः कल्प्यमानयोः दर्शनानुगुण्येन कल्पनायां विरोधाभावाच्च। अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्त्यम्, पक्षस्याप्रसिद्धविशेषणत्वम्, साध्यविकलता च दृष्टान्तस्य; सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः। बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाधनता। सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं किं युगपदुत्पद्यमानसर्ववस्तुगतम्? उत क्रमेणोत्पद्यमानसर्ववस्तुगतम्? युगपदुत्पद्यमानसर्ववस्तुगतत्वे कार्यत्वस्यासिद्धता। क्रमेणोत्पद्यमानसर्ववस्तुगतत्वे अनेककर्तृकत्वसाधनाद्विरुद्धता। अत्राप्येककर्तृकत्वसाधने प्रत्यक्षानुमानविरोधश्शास्त्रविरोधश्च; कुम्भकारो जायते, रथकारो जायत इत्यादिश्रवणात्।

अपि च सर्वेषां कार्याणां शरीरादीनां च सत्त्वादिगुणकार्यरूपसुखाद्यन्वयदर्शनेन सत्त्वादिमूलत्वमवश्याश्रयणीयम्। कार्यवैचित्र्यहेतुभूताः कारणगता विशेषास्सत्त्वादयः; तेषां कार्याणां तन्मूलत्वापादनं तद्युक्तपुरुषान्तःकरणविकारद्वारेण, पुरुषस्य च तद्योगः कर्ममूलः— इति कार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्तुः कर्मसंबन्धः कार्यहेतुत्वेनैवावश्याश्रयणीयः; ज्ञानशक्तिवैचित्र्यस्य च कर्ममूलत्वात्। इच्छायाः कार्यारम्भहेतुत्वेऽपि विषयविशेषविशेषितायास्तस्यास्सत्त्वादिमूलकत्वेन कर्मसंबन्धोऽवर्जनीयः। अतः क्षेत्रज्ञा एव कर्तारः, न तद्विलक्षणः कश्चिदनुमानात्सिध्यति। भवन्ति च प्रयोगाः— तनुभुवनादि क्षेत्रज्ञकर्तृकम्, कार्यत्वात्, घटवत्। ईश्वरः कर्ता न भवति, प्रयोजनशून्यत्वात्, मुक्तात्मवत्। ईश्वरः कर्ता न भवति, अशरीरत्वात्, तद्वदेव। न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः; तत्राप्यनादेस्सूक्ष्मशरीरस्य सद्भावात्। विमतिविषयः कालो न लोकशून्यः, कालत्वात्, वर्तमानकालवत् इति।

अपि च, किमीश्वरस्सशरीरोऽशरीरो वा कार्यं करोति? न तावदशरीरः; अशरीरस्य कर्तृत्वानुपलब्धेः। मानसान्यपि कार्याणि सशरीरस्यैव भवन्ति; मनसो नित्यत्वेऽपि अशरीरेषु मुक्तेषु तत्कार्यादर्शनात्। नापि सशरीरः; विकल्पासहत्वात्— तच्छरीरं किं नित्यमुतानित्यम्? न तावन्नित्यम्; सावयवस्य तस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः। नाप्यनित्यम्

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । स्वयमेव हेतुरिति चेन्न; अशरीरस्य तदयोगात्; अन्येन शरीरेण सशरीर इति चेन्न; अनवस्थानात् ।

स किं सव्यापारो निर्व्यापारो वा ? अशरीरत्वादेव न सव्यापारः । नापि निर्व्यापारः कार्यं करोति मुक्तात्मवत् । कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम्, दृष्टान्तस्य च साध्यहीनता ।

अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परब्रह्मभूतस्सर्वेश्वरः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञ्यसत्यसंकल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धप्रसङ्गः ।

यत्तु निमित्तोपादानयोरैक्यमाकाशादेर्निरवयवद्रव्यस्य कार्यत्वं चानुपलब्धमशक्यप्रतिपादनमित्युक्तम्, तदप्यविरुद्धमिति *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, *न वियदश्रुतेरित्यत्र प्रतिपादयिष्यते । अतः प्रमाणान्तरागोचरत्वेन शास्त्रैकविषयत्वात् *यतो वा इमानि भूतानीति वाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम् ॥ ३ ॥ इति शास्त्रयोनित्वाधिकरणम् ३.

— अथ समन्वयाधिकरणम् ४ —

यद्यपि प्रमाणान्तरागोचरं ब्रह्म; तथाऽपि प्रवृत्तिनिवृत्तिपरत्वाभावे न सिद्धरूपं ब्रह्म शास्त्रं प्रतिपादयतीत्याशङ्क्याह—

4. तत्तु समन्वयात् १. १. ४ ॥

प्रसक्ताशङ्कानिवृत्त्यर्थस्तुशब्दः । तत्– शास्त्रप्रमाणकत्वं ब्रह्मणस्संभवत्येव । कुतः ? समन्वयात्–परमपुरुषार्थतयाऽन्वयस्समन्वयः, परमपुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतयाऽन्वयात् । एवमिव समन्वितो ह्यौपनिषदः पदसमुदायः *यतो वा इमानि भूतानि जायन्ते *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत *ब्रह्म वा इदमेक एवाग्र आसीत् *आत्मा वा इदमेक एवाग्र आसीत् *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *एको ह वै नारायण आसीत् *सत्यं ज्ञानमनन्तं ब्रह्म *आनन्दो ब्रह्मेत्येवमादिः । न च व्युत्पत्तिसिद्धपरिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिलजगदुत्पत्तिस्थितिविनाशहेतुभूताशेषदोषप्रत्यनीकापरिमितोदारगुणसागरानवधिकातिशयानन्दस्वरूपे ब्रह्मणि समन्वितानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वम्; स्वविषयावबोधपर्यवसायित्वात्सर्वप्रमाणानाम् । न च प्रयोजनानुगुणा प्रमाणप्रवृत्तिः । प्रयोजनं हि प्रमाणानुगुणम् । न च प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वम्; पुरुषार्थान्वयप्रतीतेः । तथा स्वरूपपरेष्वपि पुत्रस्ते जातः, नायं सर्प इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टम् ।

अत्राह— न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति, प्रवृत्तिनिवृत्त्यन्वयविरहिणश्शास्त्रस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

नर्थक्यात्। यद्यपि प्रत्यक्षादीनि वस्तुयाथात्म्यावबोधे पर्यवस्यन्ति; तथाऽपि शास्त्रं प्रयोजनपर्यवसाय्येव। नहि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः। नच किंचित् प्रयोजनमनुद्दिश्य वाक्यप्रयोगः श्रवणं वा संभवति। तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम्— अर्थार्थी राजकुलं गच्छेत्, मन्दाग्निर्नाम्बु पिबेत्, स्वर्गकामो यजेत, न कलञ्जं भक्षयेदित्येवमादिषु। यत्पुनस्सिद्धवस्तुपरेष्वपि पुत्रस्ते जातः, नायं सर्पो रज्जुरेषेत्यादिषु हर्षभयनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट इत्युक्तम्; तत्र किं पुत्रजन्माद्यर्थात् पुरुषार्थावाप्तिः, उत तज्ज्ञानादिति विवेचनीयम्। सतोऽप्यज्ञातस्यार्थस्यापुरुषार्थत्वेन तज्ज्ञानादिति चेत्; तर्ह्यसत्यप्यर्थे ज्ञानादेव पुरुषार्थस्सिध्यतीत्यर्थपरत्वाभावेन प्रयोजनपर्यवसायिनोऽपि शास्त्रस्य नार्थसद्भावे प्रामाण्यम्। तस्मात्सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजनपर्यवसानमिति कस्यापि वाक्यस्य परिनिष्पन्ने वस्तुनि तात्पर्यासंभवान्न वेदान्ताः परिनिष्पन्नं ब्रह्म प्रतिपादयन्ति।

अत्र कश्चिदाह—वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति। कथम्? निष्प्रपञ्चमद्वितीयं ज्ञानैकरसं ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलयद्वारेण विधिविषयत्वमिति। कोऽसौ द्रष्टृदृश्यरूपप्रपञ्चप्रविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः? *न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथा इत्यादिः। द्रष्टृदृश्यरूपभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः। स्वतस्सिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण कार्यत्वमविरुद्धमिति॥

तदयुक्तम्। नियोगवाक्यार्थवादिना हि नियोगो, नियोज्यविशेषणम्, विषयः, करणम्, इतिकर्तव्यता, प्रयोक्ता च वक्तव्याः। तत्र हि नियोज्यविशेषणमनुपादेयम्। तच्च निमित्तं फलमिति द्विधा। अत्र किं नियोज्यविशेषणम्, तच्च किं निमित्तं फलं वेति विवेचनीयम्। ब्रह्मस्वरूपयाथात्म्यानुभवश्चेन्नियोज्यविशेषणं तर्हि न तन्निमित्तम्, जीवनादिवत्तस्यासिद्धत्वात्। निमित्तत्वे च तस्य नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवन्नित्यतद्विषयानुष्ठानप्रसङ्गः। नापि फलम्, नैयोगिकफलत्वेन स्वार्गादिवदनित्यत्वप्रसङ्गात्। कश्चात्र नियोगविषयः? ब्रह्मैवेति चेन्न, तस्य नित्यत्वेनाभव्यरूपत्वात्, अभावार्थत्वाच्च। निष्प्रपञ्चं ब्रह्म साध्यमिति चेत्, साध्यत्वेऽपि फलत्वमेव। अभावार्थत्वान्न विधिविषयत्वम्। साध्यत्वं च कस्य? किं ब्रह्मणः? उत प्रपञ्चनिवृत्तेः? न तावद्ब्रह्मणः, सिद्धत्वात्, अनित्यत्वप्रसक्तेश्च। अथ प्रपञ्चनिवृत्तेः, न तर्हि ब्रह्मणस्साध्यत्वम्। प्रपञ्चनिवृत्तिरेव विधिविषय इति चेन्न, तस्याः फलत्वेन विधिविषयत्वायोगात्। प्रपञ्चनिवृत्तिरेव हि मोक्षः, स च फलम्। अस्य च नियोगविषयत्वे नियोगात् प्रपञ्चनिवृत्तिः प्रपञ्चनिवृत्त्या नियोग इतीतरेतराश्रयत्वम्।

अपि च, किं निवर्तनीयः प्रपञ्चो मिथ्यारूपस्सत्यो वा? मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किंचित्प्रयोजनम्, नियोगस्तु निवर्तकज्ञानमुत्पाद्य तद्द्वारेण प्रपञ्चस्य निवर्तक इति चेत्, तत्स्ववाक्यादेव जातमिति नियोगेन न प्रयोजनम्। वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

कृत्स्नस्य मिथ्याभूतस्य प्रपञ्चस्य बाधितत्वात् सपरिकरस्य नियोगस्यासिद्धिश्च । प्रपञ्चस्य निवर्त्यत्वे प्रपञ्चनिवर्तको नियोगः किं ब्रह्मस्वरूपमेव ? उत तद्व्यतिरिक्तः ? यदि ब्रह्मस्वरूपमेव, निवर्तकस्य नित्यतया निवर्त्यप्रपञ्चसद्भाव एव न संभवति । नित्यत्वेन नियोगस्य विषयानुष्ठानसाध्यत्वं च न घटते । अथ ब्रह्मस्वरूपव्यतिरिक्तः, तस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्ता च नष्ट इत्याश्रयाभावादसिद्धिः । प्रपञ्चनिवृत्तिरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वान्न नियोगनिष्पाद्यं मोक्षाख्यं फलम् ।

किंच, प्रपञ्चनिवृत्तेर्नियोगकरणस्य इतिकर्तव्यताभावादनुपकृतस्य च करणत्वायोगान्न करणत्वम् । कथमितिकर्तव्यताभाव इति चेत्, इत्थम्– अस्येतिकर्तव्यता भावरूपा ? अभावरूपा वा ? भावरूपा च करणशरीरनिष्पत्तितदनुग्रहकार्यभेदभिन्ना । उभयविधा च न संभवति । न हि मुद्गराभिघातादिवत् कृत्स्नस्य प्रपञ्चस्य निवर्तकः कोऽपि दृश्यत इति दृष्टार्था न संभवति । नापि निष्पन्नस्य करणस्य कार्योत्पत्तावनुग्रहस्संभवति; अनुग्राहकांशसद्भावेन कृत्स्नप्रपञ्चनिवृत्तिरूपकरण-स्वरूपासिद्धेः । ब्रह्मणोऽद्वितीयत्वज्ञानं प्रपञ्चनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेत्, तेनैव प्रपञ्च-निवृत्तिरूपो मोक्षस्सिद्ध इति न करणादिनिष्पाद्यमवशिष्यत इति पूर्वमेवोक्तम् । अभावरूपत्वे चाभावा-देव न करणशरीरं निष्पादयति । नाप्यनु (ग्राहकः) ग्रहम् । अतो निष्प्रपञ्चविषयो विधिर्न संभवति ।

अन्योऽप्याह– यद्यपि वेदान्तवाक्यानां न परिनिष्पन्नब्रह्मस्वरूपपरतया प्रामाण्यम् । तथाऽपि ब्रह्मस्वरूपं सिध्यत्येव । कुतः ? ध्यानविधिसामर्थ्यात् । एवमेव हि समामनन्ति– *आत्मा वा अरे द्रष्टव्यः *निदिध्यासितव्यः *य आत्मा अपहतपाप्मा *सोऽन्वेष्टव्यस्स विजिज्ञासितव्यः *आत्मेत्येवोपासीत *आत्मानमेव लोकमुपासीतेति । अत्र ध्यानविषयो हि नियोगः स्वविषयभूत-ध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति । स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा । स किंरूप इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण *सत्यं ज्ञानमनन्तं ब्रह्म *सदेव सोम्येदमग्र आसीदित्येव-मादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपे-ऽपि तात्पर्यमस्त्येव । अतः *एकमेवाद्वितीयम् *तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो *नेह नाना-स्ति किंचनेत्यादिभिर्ब्रह्मस्वरूपमेकमेवं सत्यम्, तद्व्यतिरिक्तं सर्वं मिथ्येत्यवगम्यते । प्रत्यक्षादिभिः भेदावलम्बिना च कर्मशास्त्रेण भेदः प्रतीयते । भेदाभेदयोः परस्परविरोधे सत्यनाद्यविद्यामूलत्वेनापि भेदप्रतीत्युपपत्तेः अभेद एव परमार्थ इति निश्चीयते । तत्र ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृतविविधभेदाद्वितीयज्ञानैकरसब्रह्मरूपमोक्षः प्राप्यते । न च वाक्याद्वाक्यार्थ-ज्ञानमात्रेण ब्रह्मभावसिद्धिः; अनुपलब्धेः, विविधभेददर्शनानुवृत्तेश्च । तथा सति श्रवणादिविधान-मनर्थकं स्यात् ।

अथोच्येत—रज्जुरेषा न सर्प इत्युपदेशेन सर्पभयनिवृत्तिदर्शनात्, रज्जुसर्पवत् बन्धस्य मिथ्यारूपत्वेन ज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता, न नियोगेन । नियोगसाध्यत्वे

Digitization by Arya Samaj Charitable Foundation, Chennai

मोक्षस्यानित्यत्वं स्यात् स्वर्गादिवत्। मोक्षस्य नित्यत्वं हि सर्ववादिसंप्रतिपन्नम्। किं च धर्माधर्मयोः फलहेतुत्वं स्वफलानुभवानुगुणशरीरोत्पादानद्वारेणेति ब्रह्मादिस्थावरान्तचतुर्विधशरीरसंबन्धरूपसंसारफलत्वमवर्जनीयम्। तस्मान्न धर्मसाध्यो मोक्षः। तथा च श्रुतिः — *न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः इति। अशरीरत्वरूपे मोक्षे धर्माधर्मसाध्यप्रियाप्रियविरहश्रवणात् न धर्मसाध्यमशरीरत्वमिति विज्ञायते। न च नियोगविशेषसाध्यफलविशेषवत् ध्याननियोगसाध्यमशरीरत्वम्; अशरीरत्वस्य स्वरूपेणासाध्यत्वात्। यथाऽऽहुः श्रुतयः— *अशरीरं शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥ *अप्राणो ह्यमनाश्शुभ्रः *असङ्गो ह्ययं पुरुषः इत्याद्याः। अतः अशरीरत्वरूपो मोक्षो नित्य इति न धर्मसाध्यः। तथा च श्रुतिः — * अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताद्भव्याच्च यत्तत्पश्यसि तद्वदेति।

अपि च उत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपेण चतुर्विधं हि साध्यत्वं मोक्षस्य न संभवति। न तावदुत्पाद्यः; मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात्। नापि प्राप्यः; आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात्। नापि विकार्यः; दध्यादिवदनित्यत्वप्रसङ्गादेव। नापि संस्कार्यः। संस्कारो हि दोषापनयनेन गुणाधानेन वा साधयति। न तावद्दोषापनयनेन; नित्यशुद्धत्वाद्ब्रह्मणः। नाप्यतिशयाधानेन; अनाधेयातिशयस्वरूपत्वात्। नित्यनिर्विकारत्वेन स्वाश्रयायाः पराश्रयायाश्च क्रियाया अविषयतया न निर्घर्षणेनादर्शादिवदपि संस्कार्यत्वम्। न च देहस्थया स्नानादिक्रियया आत्मा संस्क्रियते; किं त्वविद्यागृहीतस्तत्सङ्गतोऽहंकर्ता। तत्फलानुभवोऽपि तस्यैव। न चाहंकर्तैवात्मा; तत्साक्षित्वात्। तथा च मन्त्रवर्णः—*तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीतीति। * आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः, *एको देवस्सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्च॥ *स पर्यगाच्छुक्रमकायमव्रणम (स्ना) स्थाविरं शुद्धमपापविद्धमिति चाविद्यागृहीतादहंकर्तुरात्मस्वरूपमनाधेयातिशयं नित्यशुद्धं निर्विकारं निष्कृष्यते। तस्मादात्मस्वरूपत्वेन न साध्यो मोक्षः।

यद्येवं किं वाक्यार्थज्ञानेन क्रियत इति चेत्; मोक्षप्रतिबन्धनिवृत्तिमात्रमिति ब्रूमः। तथा च श्रुतयः— *त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति * श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवश्शोचामि तं मा भगवान् शोकस्य पारं तारयतु * तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इत्याद्याः। तस्मान्नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते। निवृत्तिस्तु साध्याऽपि प्रध्वंसाभावरूपा न विनश्यति। * ब्रह्म वेद ब्रह्मैव भवति *तमेव विदित्वा अतिमृत्युमेतीत्यादि वचनं मोक्षस्य वेदनानन्तरभावितां प्रतिपादयन्नियोगव्यवधानं प्रतिरुणद्धि। न च विदिक्रियाकर्मत्वेन वा ध्यानक्रियाकर्मत्वेन वा कार्यानुप्रवेशः; उभयविधकर्मत्वप्रतिषेधात्— * अन्यदेव तद्विदितादथो अविदिताद(धि)पि * येनेदं सर्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

विजानाति तत्केन विजानीयादिति। *तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति च। न चैतावता शास्त्रस्य निर्विषयत्वम्; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हीदंतया ब्रह्म विषयीकरोति शास्त्रम्; अपि तु अविषयं प्रत्यगात्मस्वरूपं प्रतिपादयत् अविद्याकल्पितज्ञानज्ञातृज्ञेयविभागं निवर्तयति। तथा च शास्त्रम्— *न दृष्टेर्द्रष्टारं पश्येरित्येवमादिः। न च ज्ञानादेव बन्धनिवृत्तिरिति श्रवणादिविध्यानर्थक्यम्; स्वभावप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषाम्। न च ज्ञानमात्राद्बन्धनिवृत्तिर्न दृष्टेति वाच्यम्; बन्धस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालं स्थित्यनुपपत्तेः। अत एव न शरीरपातादूर्ध्वमेव बन्धनिवृत्तिरिति वक्तुं युक्तम्। नहि मिथ्यारूपसर्पभयनिवृत्ती रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते। यदि शरीरसंबन्धः पारमार्थिकः, तदा हि तद्विनाशापेक्षा। स तु ब्रह्मव्यतिरिक्ततया न पारमार्थिकः। यस्य तु बन्धो न निवृत्तः, तस्य ज्ञानमेव न जातमित्यवगम्यते, ज्ञानकार्यादर्शनात्। तस्माच्छरीरस्थितिर्भवतु वा मा वा; वाक्यार्थज्ञानसमनन्तरं मुक्त एवासौ। अतो न ध्याननियोगसाध्यो मोक्ष इति न ध्यानविधिशेषतया ब्रह्मणस्सिद्धिः। अपि तु *सत्यं ज्ञानमनन्तं ब्रह्म *तत्त्वमसि *अयमात्मा ब्रह्मेति तत्परेणैव पदसमुदायेन सिध्यतीति।

तदयुक्तं, वाक्यार्थज्ञानमात्राद्बन्धनिवृत्त्यनुपपत्तेः। यद्यपि मिथ्यारूपो बन्धो ज्ञानबाध्यः। तथाऽपि बन्धस्यापरोक्षत्वात् न परोक्षरूपेण वाक्यार्थज्ञानेन स बाध्यते, रज्ज्वादावपरोक्षसर्पप्रतीतौ वर्तमानायां नायं सर्पो रज्जुरेषेत्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेण भयानिवृत्तिदर्शनात्; आप्तोपदेशस्य तु भयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन। तथा हि— रज्जुसर्पदर्शनभयात् परावृत्तः पुरुषो नायं सर्पो रज्जुरेषेत्याप्तोपदेशेन तद्वस्तुयाथात्म्यदर्शने प्रवृत्तस्तदेव प्रत्यक्षेण दृष्ट्वा भयान्निवर्तते। न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तम्, तस्यानिन्द्रियत्वात्। ज्ञानसामग्रीष्विन्द्रियाण्येव ह्यपरोक्षसाधनानि। न चास्यानभिसंहितफलकर्मानुष्ठानमृदितकषायस्य श्रवणमननिदिध्यासनविमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति, निवृत्तप्रतिबन्धे तत्परेऽपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्वविषयानियमातिक्रमादर्शनेन तदयोगात् ॥

न च ध्यानस्य वाक्यार्थज्ञानोपायता, इतरेतराश्रयत्वात्—वाक्यार्थज्ञाने जाते तद्विषयध्यानम्, ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति। न च ध्यानवाक्यार्थज्ञानयोर्भिन्नविषयत्वम्, तथा सति ध्यानस्य वाक्यार्थज्ञानोपायता न स्यात्। न ह्यन्यध्यानमन्यौन्मुख्यमुत्पादयति। ज्ञातार्थस्मृतिसन्ततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयम्, ध्येयब्रह्मविषयज्ञानस्य हेत्वन्तरासंभवात्। न च ध्यानमूलं ज्ञानं वाक्यान्तरजन्यम्, निवर्तकज्ञानं तत्त्वमस्यादिवाक्यजन्यमिति युक्तम्। ध्यानमूलमिदं वाक्यान्तरजन्यं ज्ञानं तत्त्वमस्यादिवाक्यजन्यज्ञानेनैकविषयम्, भिन्नविषयं वा? एकविषयत्वे तदेवेतरेतराश्रयत्वम्। भिन्नविषयत्वे ध्यानेन तदौन्मुख्यापादनासंभवः। किञ्च ध्यानस्य ध्येयध्यात्राद्यनेकप्रपञ्चापेक्षत्वान्निष्प्रपञ्चब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ दृष्टद्वारेण नोपयोग इति वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं वदतः श्रवणमननिदिध्यासनविधीनामानर्थक्यमेव ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यतो वाक्यादापरोक्ष्यज्ञानासंभवाद्वाक्यार्थज्ञानेनाविद्या न निवर्तते; तत एव जीवन्मुक्तिरपि दूरोत्सारिता। का चेयं जीवन्मुक्तिः? सशरीरस्यैव मोक्ष इति चेत्, माता मे वन्ध्येतिवदसङ्गतार्थं वचः; यतस्सशरीरत्वं बन्धः, अशरीरत्वमेव मोक्ष इति त्वयैव श्रुतिभिरुपपादितम्। अथ सशरीरत्वप्रतिभासे वर्तमाने यस्यायं प्रतिभासो मिथ्येति प्रत्ययः, तस्य सशरीरत्वनिवृत्तिरिति। न, मिथ्येति प्रत्ययेन सशरीरत्वं निवृत्तं चेत्, कथं सशरीरस्य मुक्तिः? अजीवतोऽपि मुक्तिस्सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति कोऽयं जीवन्मुक्तिरिति विशेषः? अथ सशरीरत्वप्रतिभासो बाधितोऽपि यस्य द्विचन्द्रज्ञानवदनुवर्तते, स जीवन्मुक्त इति चेत्; न, ब्रह्मव्यतिरिक्तसकलवस्तुविषयत्वाद्बाधकज्ञानस्य कारणभूताविद्याकर्मादिदोषस्सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति बाधितानुवृत्तिर्न शक्यते वक्तुम्। द्विचन्द्रादौ तु तत्प्रतिभासहेतुभूतदोषस्य बाधकज्ञानभूतचन्द्रैकत्वज्ञानाविषयत्वेनाबाधितत्वात्, द्विचन्द्रप्रतिभासानुवृत्तिर्युक्ता। किञ्च *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये, इति सद्विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति वदन्तीयं श्रुतिः जीवन्मुक्तिं वारयति। सैषा जीवन्मुक्तिरापस्तम्बेनापि निरस्ता--*वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्। बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम्। बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत। एतेन परं व्याख्यातम् इति। अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः। अतस्सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न संभवति।

तस्माद्ध्याननियोगेन ब्रह्मापरोक्षज्ञानफलेनैव बन्धनिवृत्तिः। न च नियोगसाध्यत्वे मोक्षस्यानित्यत्वप्रसक्तिः, प्रतिबन्धनिवृत्तिमात्रस्यैव साध्यत्वात्। किंच—न नियोगेन साक्षात् बन्धनिवृत्तिः क्रियते; किन्तु निष्प्रपञ्चज्ञानैकरसब्रह्मापरोक्ष्यज्ञानेन। नियोगस्तु तदापरोक्ष्यज्ञानं जनयति। कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत्, कथं वा भवतोऽनभिसंहितफलानां कर्मणां वेदनोत्पत्तिहेतुत्वम्? मनोनैर्मल्यद्वारेणेति चेत्, ममापि तथैव। मम तु निर्मले मनसि शास्त्रेण ज्ञानमुत्पाद्यते, तव तु नियोगेन मनसि निर्मले ज्ञानसामग्री वक्तव्येति चेत्, ध्याननियोगनिर्मलं मन एव साधनमिति ब्रूमः। केनात्रगम्यत इति चेत्; भवतो वा कर्मभिर्मनो निर्मलं भवति, निर्मले मनसि श्रवणमनननिदिध्यासनैस्सकलेतरविषयविमुखस्यैव शास्त्रं निवर्तकज्ञानमुत्पादयतीति केनावगम्यते? *विविदिषन्ति यज्ञेन दानेन तपसानाशकेन *श्रोतव्यो मन्तव्यो निदिध्यासितव्यः *ब्रह्म वेद ब्रह्मैव भवति—इत्यादिभिश्शास्त्रैरिति चेत्, ममापि *श्रोतव्यो मन्तव्यो निदिध्यासितव्यः *ब्रह्मविदाप्नोति परम् *न चक्षुषा गृह्यते नापि वाचा *मनसा तु विशुद्धेन *हृदा मनीषा मनसाभिक्लृप्तः इत्यादिभिश्शास्त्रैर्ध्याननियोगेन मनो निर्मलं भवति, निर्मलं च मनो ब्रह्मापरोक्षज्ञानं जनयतीत्यवगम्यते—इति निरवद्यम्॥

*नेदं यदिदमुपासते इत्युपास्यत्वं प्रतिषिद्धमिति चेत्, नैवम्; नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते; अपि तु ब्रह्मणो जगद्वैरूप्यं प्रतिपाद्यते। यदिदं जगदुपासते प्राणिनः, नेदं ब्रह्म; तदेव ब्रह्म त्वं विद्धि, यद्वाचाऽनभ्युदितं येन वागभ्युद्यते—इति वाक्यार्थः। अन्यथा *तदेव ब्रह्म त्वं विद्धि

Digitization by Arya Samaj Charitable Foundation, Chennai

इति विरुध्यते। ध्यानविधिवैयर्थ्यं च स्यात्। अतो ब्रह्मसाक्षात्कारफलेन ध्याननियोगेनैवापरमार्थभूतस्य कृत्स्नस्य द्रष्टृदृश्यादिप्रपञ्चरूपबन्धस्य निवृत्तिः॥

यदपि कैश्चिदुक्तम्—भेदाभेदयोर्विरोधो न विद्यत इति; तदयुक्तम्। न हि शीतोष्णतमःप्रकाशादिवद्भेदाभेदावेकस्मिन्वस्तुनि सङ्गच्छेते। अथोच्येत—सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यम्। सर्वं च भिन्नाभिन्नं प्रतीयते—कारणात्मना जात्यात्मना चाभिन्नम्, कार्यात्मना व्यक्त्यात्मना च भिन्नम्। छायातपादिषु विरोधस्सहानवस्थानलक्षणो भिन्नाधारत्वरूपश्च। कार्यकारणयोर्जातिव्यक्त्योश्च तदुभयमपि नोपलभ्यते। प्रत्युत एकमेव वस्तु द्विरूपं प्रतीयते; यथा 'मृदयं घटः' 'खण्डो गौः' 'मुण्डो गौः' इति। न चैकरूपं किंचिदपि वस्तु लोके दृष्टचरम्। न च तृणादेर्ज्वलनादिवदभेदो भेदोपमर्दी दृश्यत इति न वस्तुविरोधः; मृत्सुवर्णगवाश्वाद्यात्मनाऽवस्थितस्यैव घटमकुटखण्डबडबाद्यात्मना चावस्थानात्। न चाभिन्नस्य भिन्नस्य च वस्तुनोऽभेदो भेदश्च एक एवाकार इतीश्वराज्ञा। प्रतीतत्वादैकरूप्यं चेत्, प्रतीतत्वादेव भिन्नाभिन्नत्वमिति द्वैरूप्यमप्यभ्युपगम्यताम्। न हि विष्फारिताक्षः पुरुषो घटशरावखण्डमुण्डादिषु वस्तुषूपलभ्यमानेषु 'इयं मृत्, अयं घटः, इदं गोत्वम्, इयं व्यक्तिः' इति विवेक्तुं शक्नोति। अपि तु 'मृदयं घटः, खण्डो गौः' इत्येव प्रत्येति। अनुवृत्तिबुद्धिबोध्यं कारणमाकृतिश्च, व्यावृत्तिबुद्धिबोध्यं कार्यं व्यक्तिश्चेति विविनक्तीति चेत्, नैवम्, विविक्ताकारानुपलब्धेः। न हि सुसूक्ष्ममपि निरीक्षमाणैः इदमनुवर्तमानम्, इदं च व्यावर्तमानमिति पुरोऽवस्थिते वस्तुन्याकारभेद उपलभ्यते। यथा संप्रतिपन्नैक्ये कार्ये विशेषे चैकत्वबुद्धिरुपजायते; तथैव सकारणे ससामान्ये चैकत्वबुद्धिरविशिष्टोपजायते। एवमेव देशतः कालतश्चाकारतश्चात्यन्तविलक्षणेष्वपि वस्तुषु तदेवेदमिति प्रत्यभिज्ञा जायते। अतो द्व्यात्मकमेव वस्तु प्रतीयत इति कार्यकारणयोर्जातिव्यक्त्योश्चात्यन्तभेदोपपादनं प्रतीतिपराहतम्। अथोच्येत—मृदयं घटः खण्डो गौरितिवत् देवोऽहं मनुष्योऽहमिति सामानाधिकरण्येनैक्यप्रतीतेरात्मशरीरयोरपि भिन्नाभिन्नत्वं स्यात्; अत इदं भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायत इति; तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्यावबोधविलसितम्। तथा हि—अबाधित एव प्रत्ययः सर्वत्रार्थं व्यवस्थापयति। देवाद्यात्माभिमानस्तु आत्मयाथात्म्यगोचरैस्सर्वैः प्रमाणैर्बाध्यमानो रज्जुसर्पादिबुद्धिवन्नात्मशरीरयोरभेदं साधयति। खण्डो गौः, मुण्डो गौरिति सामानाधिकरण्यस्य न केनचित्क्वचिद्बाधो दृश्यते। तस्मान्नातिप्रसङ्गः।

अत एव जीवोऽपि ब्रह्मणो नात्यन्तभिन्नः। अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः। तत्राभेद एव स्वाभाविकः, भेदस्त्वौपाधिकः। कथमवगम्यत इति चेत्; *तत्त्वमसि *नान्योऽतोऽस्ति द्रष्टा *अयमात्मा ब्रह्मेत्यादिभिश्श्रुतिभिः, *ब्रह्मेमे द्यावापृथिवी इति प्रकृत्य *ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत। स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोत वा पुमान्॥ इत्याथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्ते अभेदश्रवणाच्च। *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् *ज्ञाज्ञौ द्वावजावीशनीशौ *क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः *प्रधानक्षेत्रज्ञपतिर्गुणेशस्संसार-

Digitization by Arya Samaj Charitable Foundation, Chennai

मोक्षस्थितिबन्धहेतुः *स कारणं करणाधिपाधिपः *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति *य आत्मनि तिष्ठन् *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद...प्राज्ञेनात्मनान्वारूढः उत्सर्जन्याति *तमेव विदित्वाऽतिमृत्युमेति इत्यादिभिर्भेदश्रवणाच्च, जीवपरयोर्भेदाभेदावश्याश्रयणीयौ। तत्र *ब्रह्म वेद ब्रह्मैव भवतीत्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशात्, *यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् इति तदानीं भेदेनेश्वरदर्शननिषेधाच्चाभेदस्स्वाभाविक इत्यवगम्यते। ननु च *सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति सहश्रुत्या तदानीमपि भेदः प्रतीयते। वक्ष्यति च *जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च *भोगमात्रसाम्यलिङ्गाच्चेति। नैतदेवम् *नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिशतैरात्मभेदप्रतिषेधात्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति सर्वैः कामैस्सह ब्रह्माश्नुते—सर्वगुणान्वितं ब्रह्माश्नुत इत्युक्तं भवति। अन्यथा ब्रह्मणा सहेत्यप्राधान्यं ब्रह्मणः प्रसज्येत। *जगद्व्यापारवर्जमित्यत्र मुक्तस्य भेदेनावस्थाने सत्यैश्वर्यस्य न्यूनताप्रसङ्गो वक्ष्यते; अन्यथा *संपद्याविर्भावस्स्वेनशब्दात् इत्यादिभिर्विरोधात्। तस्मादभेद एव स्वाभाविकः। भेदस्तु जीवानां परस्मात् ब्रह्मणः, परस्परं च बुद्धीन्द्रियदेहोपाधिकृतः। यद्यपि ब्रह्म निरवयवं सर्वगतं च; तथाऽप्याकाश इव घटादिना बुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदस्संभवत्येव। न च भिन्ने ब्रह्मणि बुद्ध्याद्युपाधिसंयोगः, बुद्ध्याद्युपाधिसंयोगाद्ब्रह्मणि भेद इतीतरेतराश्रयत्वम्; उपाधेस्तत्संयोगस्य च कर्मकृतत्वात्, तत्प्रवाहस्य चानादित्वात्। एतदुक्तं भवति—पूर्वकर्मसंबद्धाज्जीवात् स्वसंबद्ध एवोपाधिरुत्पद्यते, तद्युक्तात्कर्म। एवं बीजाङ्कुरन्यायेन कर्मोपाधिसंबन्धस्यानादित्वान्न दोषः—इति। अतो जीवानां परस्परं ब्रह्मणा चाभेद एव स्वाभाविकः। भेदस्त्वौपाधिकः। उपाधीनां पुनः परस्परं ब्रह्मणा चाभेदवत् भेदोऽपि स्वाभाविकः, उपाधीनामुपाध्यन्तराभावात्, तदभ्युपगमेऽनवस्थानाच्च। अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधय उत्पद्यन्ते इति॥

अत्रोच्यते—अद्वितीयसच्चिदानन्दब्रह्मध्यानविषयविधिपरं वेदान्तवाक्यजातमिति वेदान्तवाक्यैरभेदः प्रतीयते। भेदावलम्बिभिः कर्मशास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते। भेदाभेदयोः परस्परविरोधात् अनाद्यविद्यामूलतयाऽपि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इत्युक्तम्। तत्र यदुक्तं भेदाभेदयोरुभयोरपि प्रतीतिसिद्धत्वान्न विरोध इति। तदयुक्तम्, कस्माच्चित्कस्यचिद्विलक्षणत्वं हि तस्मात्तस्य भेदः। तद्विपरीतत्वं चाभेदः। तयोस्तथाभावातथाभावरूपयोरेकत्र संभवमनुन्मत्तः को ब्रवीति? कारणात्मना जात्यात्मना चाभेदः, कार्यात्मना व्यक्त्यात्मना च भेदः—इत्याकारभेदादविरोध इति चेन्न; विकल्पासहत्वात्। आकारभेदादविरोधं वदतः किमेकस्मिन्नाकारे भेदः, आकारान्तरे चाभेद इत्यभिप्रायः? उताकारद्वययोगिवस्तुगतावुभावपीति? पूर्वस्मिन् कल्पे व्यक्तिगतो भेदः, जातिगतश्चाभेद इति नैकस्य द्व्यात्मकता। जातिर्व्यक्तिरिति चैकमेव वस्त्विति चेत्, तर्ह्याकारभेदादविरोधः परित्यक्तस्स्यात्। एकस्मिंश्च विलक्षणत्वतद्विपर्ययौ विरुद्धावित्युक्तम्। द्वितीये तु कल्पे अन्योन्यविलक्षणमाकारद्वयमप्रतिपन्नं च तदाश्रयभूतं वस्त्विवतित्रितयाभ्युपगमेऽपि त्रयाणाम-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्योन्यवैलक्षण्यमेवोपपादितं स्यात्; न पुनरभेदः। आकारद्वयनिरुह्यमाणाविरोधं तदाश्रयभूते वस्तुनि भिन्नाभिन्नत्वमिति चेत्; स्वस्माद्विलक्षणं स्वाश्रयमाकारद्वयं स्वस्मिन्विरुद्धधर्मद्वयसमावेशनिर्वाहकं कथं भवेत्? अविलक्षणं तु कथंतराम्? आकारद्वयतद्वतोश्च द्व्यात्मकत्वाभ्युपगमे निर्वाहकान्तरापेक्षयाऽनवस्था स्यात्। न च संप्रतिपन्नैक्यव्यक्तिप्रतीतिवत् ससामान्येऽपि वस्तुन्येकरूपा प्रतीतिरुपजायते। यतः इदमित्थमिति सर्वत्र प्रकारप्रकारितयैव सर्वा प्रतीतिः। तत्र प्रकारांशो जातिः, प्रकार्यंशो व्यक्तिरिति नैकाकारा प्रतीतिः। अत एव जीवस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न संभवति। तस्मादभेदस्यानन्यथासिद्धशास्त्रमूलत्वादनाद्यविद्यामूल एव भेदप्रत्ययः।

नन्वेवं ब्रह्मण एवाज्ञत्वं, तन्मूलाश्च जन्मजरामरणादयो दोषाः प्रादुःष्युः। ततश्च *यस्सर्वज्ञस्सर्ववित् *एष आत्माऽपहतपाप्मा इत्यादीनि शास्त्राणि बाध्येरन्। नैवम्, अज्ञानादिदोषाणामपरमार्थत्वात्। भवतस्तूपाधिब्रह्मव्यतिरिक्तं वस्त्वन्तरमनभ्युपगच्छतो ब्रह्मण्येवोपाधिसंसर्गस्तत्कृताश्च जीवत्वाज्ञत्वादयो दोषाः परमार्थत एव भवेयुः। न हि ब्रह्मणि निरवयवे अच्छेद्ये संबद्धयमाना उपाधयस्तच्छित्वा भित्त्वा वा संबध्यन्ते। अपि तु ब्रह्मस्वरूपे संयुज्य तस्मिन्नेव स्वकार्याणि कुर्वन्ति। यदि मन्वीत—उपाध्युपहितं ब्रह्म जीवः। स चाणुपरिमाणः। अणुत्वं चावच्छेदकस्य मनसोऽणुत्वात्। स चावच्छेदोऽनादिः। एवमुपाध्युपहितेंशे संबद्धयमाना दोषाः अनुपहिते परे ब्रह्मणि न संबद्धयन्ते—इति। अयं प्रष्टव्यः—किमुपाधिना छिन्नो ब्रह्मखण्डोऽणुरूपो जीवः? उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः? उतोपाधिसंयुक्तं ब्रह्मस्वरूपम्? अथोपाधिसंयुक्तं चेतनान्तरम्? अथोपाधिरेव? इति। अच्छेद्यत्वाद्ब्रह्मणः प्रथमः कल्पो न कल्पते। आदिमत्त्वं च जीवस्य स्यात्। एकस्य सतो द्वैधीकरणं हि च्छेदनम्। द्वितीये तु कल्पे ब्रह्मण एव प्रदेशविशेषे उपाधिसंबन्धादौपाधिकास्सर्वे दोषास्तस्यैव स्युः। उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशभेदात् क्षणेक्षणे बन्धमोक्षौ च स्याताम्। आकर्षणे चाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मणः आकर्षणं स्यात्। निरंशस्य व्यापिनः आकर्षणं न संभवतीति चेत्; तर्हि उपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात्। अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषां च जीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वेन प्रतिसन्धानं स्यात्। प्रदेशभेदादप्रतिसन्धाने चैकस्यापि स्वोपाधौ गच्छति प्रतिसन्धानं न स्यात्। तृतीये तु कल्पे ब्रह्मस्वरूपस्यैवोपाधिसंबन्धेन जीवत्वापातात् तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात्। सर्वेषु च देहेष्वेक एव जीवः स्यात्। तुरीये तु कल्पे ब्रह्मणोऽन्य एव जीव इति जीवभेदस्यौपाधिकत्वं परित्यक्तं स्यात्। चरमे चार्वाकपक्ष एव परिगृहीतः स्यात्। तस्मादभेदशास्त्रबलेन कृत्स्नस्य भेदस्याविद्यामूलत्वमेवाभ्युपगन्तव्यम्। अतः प्रवृत्तिनिवृत्तिप्रयोजनपरतयैव शास्त्रस्य प्रामाण्येऽपि ध्यानविधिशेषतया वेदान्तवाक्यानां ब्रह्मस्वरूपे प्रामाण्यमुपपन्नमिति॥

तदप्ययुक्तम्—ध्यानविधिशेषत्वेऽपि वेदान्तवाक्यानामर्थसत्यत्वे प्रामाण्यायोगात्। एतदुक्तं भवति—ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिपद्यन्ते; उत स्वतन्त्राण्येव ? एकवाक्यत्वे ध्यानविधिपरत्वेन ब्रह्मस्वरूपे तात्पर्यं न संभवति । भिन्नवाक्यत्वे प्रवृत्तिनिवृत्तिप्रयोजनविरहादनवबोधकत्वमेव । न च वाच्यम्—ध्यानं नाम स्मृतिसन्ततिरूपम् । तच्च स्मर्तव्यैकनिरूपणीयमिति ध्यानविधेस्स्मर्तव्यविशेषाकाङ्क्षायाम् *इदं सर्वं यदयमात्मा *ब्रह्म सर्वानुभूः *सत्यं ज्ञानमनन्तं ब्रह्म इत्यादीनि स्वरूपतद्विशेषादीनि समर्पयन्ति । तेनैकवाक्यतामापन्नान्यर्थसद्भावे प्रमाणमिति । ध्यानविधेस्स्मर्तव्यविशेषापेक्षत्वेऽपि *नाम ब्रह्मेत्यादिदृष्टिविधिवदसत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेः ध्येयसत्यत्वानपेक्षणात् । अतो वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वाद्ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात्, स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्यवत् ज्ञानमात्रेणैव पुरुषार्थपर्यन्ततासिद्धेश्च परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावात् ब्रह्मणश्शास्त्रप्रमाणकत्वं न संभवतीति प्राप्तम् ॥

तत्र प्रतिपद्यते—तत्तु समन्वयादिति । समन्वयः—सम्यगन्वयः, पुरुषार्थतयाऽन्वय इत्यर्थः । परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयात्, तत्—शास्त्रप्रमाणकत्वं सिध्यत्येवेत्यर्थः । निरस्तनिखिलदोषनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म बोधयन्वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहान्न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलाननुप्रवेशेन प्रयोजनशून्यतां ब्रूते । एतदुक्तं भवति—अनादिकर्मरूपाविद्यावेष्टनतिरोहितपरावरतत्त्वयाथात्म्यस्वस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिन्नरकिंपुरुषयक्षराक्षसपिशाचमनुजपशुशकुनिसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुन्नपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभवचेष्टितैरनवधिकातिशयानन्दजननं परं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि । प्रवृत्तिनिवृत्तिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवंभूतं परं ब्रह्म कथं प्राप्यत इत्यपेक्षायां *ब्रह्मविदाप्नोति परम् *आत्मानमेव लोकमुपासीतेति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा स्ववेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तस्सन् पश्चात्तदुपादाने च प्रयतते । यथा च कश्चिद्राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गाद्भ्रष्टो नष्ट इति राज्ञा विज्ञातस्स्वयं चाज्ञातपितृकः केनचिद्द्विजवर्येण वर्धितोऽधिगतवेदशास्त्रष्षोडशवर्षस्सर्वकल्याणगुणाकरस्तिष्ठन् 'पिता ते सर्वलोकाधिपतिः गाम्भीर्यौदार्यवात्सल्यसौशील्यशौर्यवीर्यपराक्रमादिगुणसंपन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठति' इति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणोति चेत्; तदानीमेव अहं तावत् जीवतः पुत्रः, मत्पिता च सर्वसंपत्समृद्ध इति निरतिशयहर्षसमन्वितो भवति । राजा च स्वपुत्रं जीवन्तमरोगमतिमनोहरदर्शनं विदितसकलवेद्यं श्रुत्वाऽवाप्तसमस्तपुरुषार्थो भवति । पश्चात्तदुपादाने च प्रयतते । पश्चात्तावुभौ सङ्गच्छेते चेति ॥

यत्पुनः परिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्यवसानात् बालातुराद्युपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमिति, तदसत् । अर्थसद्भावाभावे निश्चिते ज्ञातोऽप्यर्थः पुरु-

Digitization by Arya Samaj Charitable Foundation, Chennai

षार्थाय न भवति । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या हर्षाद्युत्पत्तिः । तेषामेव तस्मिन्नेव ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत ततस्तदानीमेव हर्षादयो निवर्तेरन् । औपनिषदेष्वपि वाक्येषु ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात् । अतः *यतो वा इमानि भूतानि जायन्ते इत्यादिवाक्यं निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम् ॥ ४ ॥

इति समन्वयाधिकरणम् ॥ ४ ॥

अथ ईक्षत्यधिकरणम्. 5

5. ईक्षतेर्नाशब्दम् । १ । १ । ५ ॥

*यतो वा इमानीत्यादिजगत्कारणवादिवाक्यप्रतिपाद्यं सर्वज्ञं सर्वशक्ति समस्तहेयप्रत्यनीककल्याणगुणैकतानं ब्रह्म जिज्ञास्यमित्युक्तम् । इदानीं जगत्कारणवादिवाक्यानामानुमानिकप्रधानादिप्रतिपादनानर्हतोच्यते–ईक्षतेर्नाशब्दमित्यादिना ॥

इदमाम्नायते छान्दोग्ये–*सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत *इत्यादि । तत्र संदेहः–किं सच्छब्दवाच्यं जगत्कारणं परोक्तमानुमानिक प्रधानम्, उतोक्तलक्षणं ब्रह्मेति । किं प्राप्तम् ? प्रधानमिति । कुतः ? सदेव सोम्येदमग्र आसीदेकमेवेतीदंशब्दवाच्यस्य चेतनभोग्यभूतस्य सत्त्वरजस्तमोमयस्य वियदादिनानारूपविकारावस्थस्य वस्तुनः कारणावस्थां वदति । कारणभूतद्रव्यस्यावस्थान्तरापत्तिरेव हि कार्यता । अतो यद्द्रव्यं यत्स्वभावं च कार्यावस्थम् तत्स्वभावं तदेव द्रव्यं कारणावस्थम् । सत्त्वादिमयं च कार्यमिति गुणसाम्यावस्थं प्रधानमेव हि कारणम् । तदेवोपसंहृतसकलविशेषं सन्मात्रमिति *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यभिधीयते । तत एव च कार्यकारणयोरनन्यत्वम् । तथा सत्येवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिः । अन्यथा *यथा सोम्यैकेन मृत्पिण्डेनेत्यादिमृत्पिण्डतत्कार्यदृष्टान्तदार्ष्टान्तिकयोर्वैरूप्यं चेति जगत्कारणवादिवाक्येन महर्षिणा कपिलेनोक्तं प्रधानमेव प्रतिपाद्यते प्रतिज्ञादृष्टान्तरूपेणानुमानवेषमेव चेदं वाक्यमिति सच्छब्दवाच्यमानुमानिकमेव ।

इत्येवं प्राप्तेऽभिधीयते–ईक्षतेर्नाशब्दमिति । यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दम्, आनुमानिकं प्रधानमित्यर्थः । न तज्जगत्कारणवादिवाक्यप्रतिपाद्यम्; कुतः ? ईक्षतेः–सच्छब्दवाच्यसंबन्धिव्यापारविशेषाभिधायिन ईक्षतेर्धातोश्श्रवणात् *तदैक्षत बहु स्यां प्रजायेयेति । ईक्षणक्रियायोगश्चाचेतने प्रधाने न संभवति । अत ईदृशेक्षणक्षमश्चेतनविशेषस्सर्वज्ञस्सर्वशक्तिः पुरुषोत्तमस्सच्छब्दाभिधेयः । तथा च सर्वेष्वेव सृष्टिप्रकरणेष्वीक्षापूर्विकैव सृष्टिः प्रतीयते *स ईक्षत लोकान्नु सृजा इति स इमाल्लोकानसृजत *स ईक्षाञ्चक्रे...स प्राणमसृजतेत्यादिषु । ननु च कार्यानुगुणेनैव कारणेन भवितव्यम् । सत्यम्; सर्वकार्यानुगुण एव सर्वज्ञस्सर्वशक्तिस्सत्यसङ्कल्पः पुरुषोत्तमस्सूक्ष्माचिदचिद्वस्तुशरीरकः। यथाऽऽह *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *यस्सर्वज्ञस्सर्वविद्यस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानमयं तपः *यस्याव्यक्तं शरीरं...यस्याक्षरं शरीरं यस्य मृत्युश्शरीरम्...एष सर्वभूतान्तरात्मा इति। तदेतत्— *न विलक्षणत्वादित्यादिषु प्रतिपादयिष्यते। अत्र सृष्टिवाक्यानि न प्रधानप्रतिपादनयोग्यानीत्युच्यते। वस्तुविरोधस्तु तत्रैव परिहरिष्यते। यत्तूक्तं प्रतिज्ञादृष्टान्तयोगादनुमानरूपमेवेदं वाक्यमिति, तदसत्; हेत्वनुपादानात्। *येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञाने प्रतिपिपादयिषिते सर्वात्मना तदसंभवं मन्वानस्य तत्संभवमात्रप्रदर्शनाय हि दृष्टान्तोपादानम्। ईक्षत्यादिश्रवणादेव ह्यनुमानगन्धाभावोऽवगतः॥ ५॥

अथ स्यात्—न चेतनगतं मुख्यमीक्षणमिहोच्यते, अपि तु प्रधानगतं गौणमीक्षणम्, *तत्तेज ऐक्षत *ता आप ऐक्षन्तेति गौणेक्षणसाहचर्यात्। भवति चाचेतनेष्वपि चेतनधर्मोपचारः। यथा *वृष्टिप्रतीक्षाश्शालयः *वर्षेण बीजं प्रतिसञ्जहर्षेति। अतो गौणमीक्षणमितीमामाशङ्कामनुभाष्य परिहरति—

6 गौणश्चेन्नात्मशब्दात्।१।१।६॥

यदुक्तं गौणेक्षणसाहचर्यात् सतोऽपीक्षणव्यपदेशस्सर्गनियतपूर्वावस्थाभिप्रायो गौण इति। तन्न, *ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा इति सच्छब्दप्रतिपादितस्य आत्मशब्देन व्यपदेशात्। एतदुक्तं भवति—*ऐतदात्म्यमिदं सर्वम्, स आत्मेति चेतनाचेतनप्रपञ्चोद्देशेन सत आत्मत्वोपदेशोऽयं नाचेतने प्रधाने संगच्छत इति। अतस्तेजोबन्नानामपि परमात्मैवात्मेति तेजःप्रभृतयोऽपि शब्दाः परमात्मन एव वाचकाः। तथाहि *हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति परमात्मानुप्रवेशादेव तेजःप्रभृतीनां वस्तुत्वं तत्तन्नामभाक्त्वञ्चेति *तत्तेज ऐक्षत, *ता आप ऐक्षन्तेत्यपि मुख्य एवेक्षणव्यपदेशः। अतस्साहचर्यादपि *तदैक्षतेत्यत्र गौणत्वाशङ्का दूरोत्सारितेति सूत्राभिप्रायः॥ ६॥

इतश्च न प्रधानं सच्छब्दप्रतिपाद्यम्—

7 तन्निष्ठस्य मोक्षोपदेशात्।१।१।७॥

मुमुक्षोश्श्वेतकेतोः *तत्त्वमसीति सदात्मकत्वानुसंधानमुपदिश्य, तन्निष्ठस्य *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये *इति शरीरपातमात्रान्तरायो ब्रह्मसंपत्तिलक्षणो मोक्ष इत्युपदिशति। यदि च प्रधानमचेतनं कारणमुपदिश्येत; तदा तदात्मकत्वानुसंधानस्य मोक्षसाधनत्वोपदेशो नोपपद्यते। *यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति तन्निष्ठस्याचेतनसंपत्तिरेव स्यात्। नच मातापितृसहस्रेभ्योऽपि वत्सलतरं शास्त्रमेवंविधतापत्रयाभिहतिहेतुभूतामचित्संपत्तिमुपदिशति। प्रधानकारणवादिनोऽपि हि प्रधाननिष्ठस्य मोक्षं नाभ्युपगच्छन्ति॥ ७॥

इतश्च न प्रधानम्—

Digitization by Arya Samaj Charitable Foundation, Chennai

8 हेयत्वावचनाच्च । १ । १ । ८ ॥

यदि प्रधानमेव कारणं सच्छब्दाभिहितं भवेत्, तदा मुमुक्षोश्श्वेतकेतोस्तदात्मकत्वं मोक्षविरोधित्वाद्धेयत्वेनैवोपदेश्यं स्यात्। न च तत्क्रियते, प्रत्युतोपादेयत्वेनैव *तत्त्वमसि *तस्य तावदेव चिरमित्युपदिश्यते ॥ ८ ॥

इतश्च न प्रधानम्—

9 प्रतिज्ञाविरोधात् । १ । १ । ९ ॥

प्रधानकारणत्वे प्रतिज्ञाविरोधश्च भवति। वाक्योपक्रमे ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तच्च कार्यकारणयोरनन्यत्वेन कारणभूतसद्विज्ञानात्तत्कार्यभूतचेतनाचेतनप्रपञ्चस्य ज्ञाततयैवोपपादनीयम्। तत्तु प्रधानकारणत्वे चेतनवर्गस्य प्रधानकार्यत्वाभावात् प्रधानविज्ञानेन चेतनवर्गविज्ञानासिद्धेर्विरुध्यते ॥ ९ ॥

इतश्च न प्रधानम्—

10 स्वाप्ययात् । १ । १ । १० ॥

तदेव सच्छब्दवाच्यं प्रकृत्याह *स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषस्स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति* इति सुषुप्तं जीवं सता संपन्नं, स्वमपीतः—स्वस्मिन् प्रलीनः इति व्यपदिशति। प्रलयश्च—स्वकारणे लयः। न चाचेतनं प्रधानं चेतनस्य जीवस्य कारणं भवितुमर्हति। स्वमपीतो भवति—आत्मानमेव जीवोऽपीतो भवतीत्यर्थः। चिद्वस्तुशरीरकं तदात्मभूतं ब्रह्मैव जीवशब्देनाभिधीयत इति नामरूपव्याकरणश्रुत्योक्तम्। तज्जीवशब्दाभिधेयं ब्रह्म सुषुप्तिकालेऽपि प्रलयकाल इव नामरूपपरिष्वङ्गाभावात् केवलसच्छब्दाभिधेयमिति *सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीत्युच्यते। तथा समानप्रकरणे नामरूपपरिष्वङ्गाभावेन प्राज्ञेनैव परिष्वङ्गात् *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमित्युच्यते। आमोक्षाज्जीवस्य नामरूपपरिष्वङ्गादेव हि स्वव्यतिरिक्तविषयज्ञानोदयः। सुषुप्तिकाले हि नामरूपे विहाय सता संपरिष्वक्तः पुनरपि जागरदशायां नामरूपे परिष्वज्य तत्तन्नामरूपो भवतीति श्रुत्यन्तरे स्पष्टमभिधीयते—*यदा सुप्तस्स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति, तस्माद्वा आत्मनः प्राणा यथायथं विप्रतिष्ठन्ते। तथा—*त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति इति च। तथा सुषुप्तं जीवं *प्राज्ञेनात्मना संपरिष्वक्तः इति च वदति। तस्मात् सच्छब्दवाच्यः परं ब्रह्म सर्वज्ञः परमेश्वरः पुरुषोत्तम एव। तदाह वृत्तिकारः—*सता सोम्य तदा संपन्नो भवतीति, संपत्त्यसंपत्तिभ्यामेतदध्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

वसीयते, *प्राज्ञेनात्मना संपरिष्वक्तः इति चाहेति ॥ १० ॥

इतश्च न प्रधानम्—

11 गतिसामान्यात् । १ । १ । ११ ॥

*आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्, स ईक्षत लोकान्नु सृजा इति, स इमाल्लोँकानसृजत *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी *तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः इत्यादिसृष्टिवाक्यानां या गतिः–प्रवृत्तिः, तत्सामान्यात्–तत्समानार्थत्वादस्य; तेषु च सर्वेषु सर्वेश्वरः कारणमवगम्यते । तस्मादत्रापि सर्वेश्वर एव कारणमिति निश्चीयते ॥ ११ ॥

इतश्च न प्रधानम्—

12 श्रुतत्वाच्च । १ । १ । १२ ॥

श्रुतमेव ह्यस्यामुपनिषदि अस्य सच्छब्दवाच्यस्य आत्मत्वेन नामरूपयोर्व्याकर्तृत्वं सर्वज्ञत्वं सर्वशक्तित्वं सर्वाधारत्वम् अपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसङ्कल्पत्वञ्च—*अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः *ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा *यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितम् *तस्मिन् कामास्समाहिताः *एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः इति । तथाच श्रुत्यन्तराणि *न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥ *सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाऽभिवदन्यदास्ते *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *विश्वात्मानं परायणम् *पतिं विश्वस्यात्मेश्वरम् *यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा, अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः *इत्यादीनि । तस्माज्जगत्कारणवादिवाक्यं न प्रधानादिप्रतिपादनयोग्यम् । अतस्सर्वज्ञस्सर्वशक्तिस्सर्वेश्वरेश्वरो निरस्तनिखिलदोषगन्धोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणौघमहार्णवः पुरुषोत्तमो नारायण एव निखिलजगदेककारणं जिज्ञास्यं ब्रह्मेति स्थितम् ॥

अत एव निर्विशेषचिन्मात्रब्रह्मवादोऽपि सूत्रकारेण आभिश्श्रुतिभिः निरस्तो वेदितव्यः; पारमार्थिकमुख्येक्षणादिगुणयोगि जिज्ञास्यं ब्रह्मेति स्थापनात् । निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम् । वेदान्तवेद्यं ब्रह्म जिज्ञास्यतया प्रतिज्ञातम् । तच्च चेतनमिति *ईक्षतेर्नाशब्दमित्यादिभिस्सूत्रैः प्रतिपाद्यते । चेतनत्वं नाम चैतन्यगुणयोगः । अत ईक्षणगुणविरहिणः प्रधानतुल्यत्वमेव । किंच निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम् । प्रकाशो हि नाम स्वस्य परस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

च व्यवहारयोग्यतामापादयन्वस्तुविशेषः। निर्विशेषस्य वस्तुनस्तदुभयरूपत्वाभावात् घटादिवद-चित्त्वमेव। तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेत्, तन्न, तत्क्षमत्वं हि तत्सामर्थ्यमेव। सामर्थ्य-गुणयोगे हि निर्विशेषवादः परित्यक्तस्स्यात्। अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यत इति चेत्, हन्त तर्हि तत एव सर्वज्ञता, सर्वशक्तित्वं, सर्वेश्वरेश्वरत्वं, सर्वकल्याणगुणाकरत्वं, सकलहेय-प्रत्यनीकतेत्यादयस्सर्वेऽभ्युपगन्तव्याः। शक्तिमत्त्वं च कार्यविशेषानुगुणत्वम्; तच्च कार्यविशेषै-कनिरूपणीयम्; कार्यविशेषस्य निष्प्रमाणकत्वे तदेकनिरूपणीयं शक्तिमत्त्वमपि निष्प्रमाणकं स्यात्। किञ्च निर्विशेषवस्तुवादिनो वस्तुत्वमपि निष्प्रमाणम्। प्रत्यक्षानुमानागमस्वानुभवाः सविशेषगोचरा इति पूर्वमेवोक्तम्। तस्माद्विचित्रचेतनाचेतनात्मकजगद्रूपेण *बहु स्यामितीक्षणक्षमः पुरुषोत्तम एव जिज्ञास्य इति सिद्धम् ॥ १२ ॥ इति ईक्षत्याधिकरणम् ॥ ५ ॥

॥ अथ आनन्दमयाधिकरणम् ॥ ६ ॥

एवं जिज्ञासितस्य ब्रह्मणश्चेतनभोग्यभूतजडरूपसत्त्वरजस्तमोमयप्रधानाद्व्यावृत्तिरुक्ता। इदानीं कर्मवश्यात् त्रिगुणात्मकप्रकृतिसंसर्गनिमित्तनानाविधानन्तदुःखसागरनिमज्जनेनाशुद्धाच्छुद्धाच्च प्रत्यगात्मनोऽन्यन्निखिलहेयप्रत्यनीकनिरतिशयानन्दं ब्रह्मेतिप्रतिपाद्यते–

13 आनन्दमयोऽभ्यासात्। १। १। १३ ॥

तैत्तिरीया अधीयते– *स वा एष पुरुषोऽन्नरसमयः इति प्रकृत्य *तस्माद्वा एतस्माद्वि-ज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः इति। तत्र सन्देहः–किमयमानन्दमयो बन्धमोक्षभागिनः प्रत्यगात्मनो जीवशब्दाभिलपनीयादन्यः परमात्मा; उत स एवेति। किं युक्तम्? प्रत्यगात्मेति। कुतः? *तस्यैष एव शारीर आत्मा इत्यानन्दमयस्य शारीरत्वश्रवणात्; शारीरो हि शरीरसंबन्धी जीवात्मा ॥

ननु च जगत्कारणतया प्रतिपादितस्य ब्रह्मणः सुखप्रतिपत्त्यर्थमन्नमयादीननुक्रम्य तदेव जगत्कारणमानन्दमय इत्युपदिशति; जगत्कारणं च *तदैक्षतेतीक्षणश्रवणात्सर्वज्ञस्सर्वेश्वर इत्युक्तम्। सत्यमुक्तम्; स तु जीवान्नातिरिच्यते, *अनेन जीवेनात्मनाऽनुप्रविश्य *तत्त्वमसि श्वेतकेतो इति कारणतया निर्दिष्टस्य जीवसामानाधिकरण्यनिर्देशात्। सामानाधिकरण्यं ह्येकत्वप्रतिपादनपरम्; यथा सोऽयं देवदत्त इत्यादौ। ईक्षापूर्विका च सृष्टिश्चेतनस्य जीवस्योपपद्यत एव। अतः *ब्रह्मविदाप्नोति परमिति जीवस्याचित्संसर्गवियुक्तं स्वरूपं प्राप्यतयोपदिश्यते। अचिद्वियुक्तस्वरूपस्य लक्षणमिदमुच्यते *सत्यं ज्ञानमनन्तं ब्रह्मेति। तद्रूपप्राप्तिरेव हि मोक्षः। *न ह वै सशरीरस्य सतः प्रियाप्रिययोरप-हतिरस्ति, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इति। अतो जीवस्याविद्यावियुक्तं स्वरूपं प्राप्यतया प्रक्रान्तमानन्दमय इत्युपदिश्यते। तथाहि-शाखाचन्द्रन्यायेनात्मस्वरूपं दर्शयितुम् *अन्नमयः पुरुष इति शरीरं प्रथमं निर्दिश्य तदन्तरभूतं तस्य धारकं पञ्चवृत्तिप्राणम्, तस्याप्यन्तरभूतं मनः, तदन्तरभूतां च बुद्धिं, *प्राणमयो *मनोमयो *विज्ञानमयः इति तत्र तत्र बुद्ध्यवतरणक्रमेण

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्दिश्य, सर्वान्तरभूतं जीवात्मानम् *अन्योऽन्तर आत्माऽऽनन्दमयः इत्युपदिश्यान्तरात्मपरम्पर समापयति। अतो जीवात्मस्वरूपमेव *ब्रह्मविदाप्नोतीति प्रक्रान्तं ब्रह्म; तदेवानन्दमय इत्युपदिष्टमिति निश्चीयते ॥

ननु च, *ब्रह्म पुच्छं प्रतिष्ठेत्यानन्दमयादन्यद्ब्रह्मेति प्रतीयते। नैवम्; ब्रह्मैव स्वस्वभावविशेषेण पुरुषविधत्वरूपितं शिरःपक्षपुच्छरूपेण व्यपदिश्यते। यथाऽन्नमयो देहोऽवयवी स्वस्मादनतिरिक्तैः स्वावयवैरेव *तस्येदमेव शिरः इत्यादिना शिरःपक्षपुच्छवत्तया निदर्शितः; तथा आनन्दमयं ब्रह्मापि स्वस्मादनतिरिक्तैः प्रियादिभिर्निदर्शितम्। तत्रावयवत्वेन रूपितानां प्रियमोदप्रमोदानन्दानामाश्रयतया अखण्डरूपमानन्दमयं *ब्रह्म पुच्छं प्रतिष्ठेत्युच्यते। यदि चानन्दमयादन्यद्ब्रह्माभविष्यत्, *तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर आत्मा ब्रह्मेत्यपि निरदेक्ष्यत। नचैवं निर्दिश्यते। एतदुक्तं भवति– *ब्रह्मविदाप्नोति परमिति प्रक्रान्तं ब्रह्म *सत्यं ज्ञानमनन्तं ब्रह्मेति–लक्षण तस्सकलेतरव्यावृत्ताकारं प्रतिपाद्य तदेव *तस्माद्वा एतस्मादात्मन इत्यात्मशब्देन निर्दिश्य तस्य सर्वान्तरत्वेनात्मत्वं व्यञ्जयद्वाक्यमन्नमयादिषु तत्तदन्तरतया आत्मत्वेन निर्दिष्टान् प्राणमयादीनतिक्रम्य *अन्योऽन्तर आत्माऽऽनन्दमयः इत्यात्मशब्देन निर्देशमानन्दमये समापयति। अत आत्मशब्देन प्रक्रान्तं ब्रह्मानन्दमय इति निश्चीयते—इति। ननु च *ब्रह्म पुच्छं प्रतिष्ठेत्युक्त्वा *असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुरिति ब्रह्मज्ञानाज्ञानाभ्यामात्मनस्सद्भावासद्भावौ दर्शयति; नानन्दमयज्ञानाज्ञानाभ्याम्। न चानन्दमयस्य प्रियमोदादिरूपेण सर्वलोकविदितस्य सद्भावासद्भावज्ञानाशङ्का युक्ता। अतो नानन्दमयमधिकृत्यायं श्लोक उदाहृतः। तस्मादानन्दमयादन्यद्ब्रह्म। नैवम्; *इदं पुच्छं प्रतिष्ठा *पृथिवी पुच्छं प्रतिष्ठा *अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा *महः पुच्छं प्रतिष्ठा इत्युक्त्वा तत्रतत्रोदाहृताः *अन्नाद्वै प्रजाः प्रजायन्ते इत्यादिश्लोकाः यथा न पुच्छमात्रप्रतिपादनपराः; अपि त्वन्नमयादिपुरुषप्रतिपादनपराः; एवमत्राप्यानन्दमयस्यायम् *असन्नेवेति श्लोकः; नानन्दमयव्यतिरिक्तस्य पुच्छस्य। आनन्दमयस्यैव ब्रह्मत्वेऽपि प्रियमोदादिरूपेण रूपितस्यापरिच्छिन्नानन्दस्य सद्भावासद्भावज्ञानाशङ्का युक्तैव। पुच्छब्रह्मणोऽप्यपरिच्छिन्नानन्दतयैव ह्यप्रसिद्धता। शिरःप्रभृत्यवयवित्वाभावाद्ब्रह्मणो नानन्दमयो ब्रह्मेति चेत्; ब्रह्मणः पुच्छत्वप्रतिष्ठात्वाभावात् पुच्छमपि ब्रह्म न भवेत्। अथाविद्यापरिकल्पितस्य वस्तुनस्तस्याश्चाश्रयभूतत्वात् ब्रह्मणः पुच्छं प्रतिष्ठेति रूपणमात्रमित्युच्येत; हन्त तर्हि तस्यासुखाद्व्यावृत्तस्यानन्दमयस्य ब्रह्मणः प्रियशिरस्त्वादिरूपणं भविष्यति। एवं च *सत्यं ज्ञानमनन्तं ब्रह्मेति विकारास्पदजडपरिच्छिन्नवस्त्वन्तरव्यावृत्तस्यासुखाद्व्यावृत्तिरानन्दमय इत्युपदिश्यते। ततश्चाखण्डैकरसानन्दरूपे ब्रह्मणि* आनन्दमय इति मयट् प्राणमय इव स्वार्थिको द्रष्टव्यः। तस्मादविद्यापरिकल्पितविविधविचित्रदेवादिभेदभिन्नस्य जीवात्मनस्स्वाभाविकं रूपमखण्डैकरसं सुखैकतानमानन्दमय इत्युच्यत इत्यानन्दमयः प्रत्यगात्मा ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्राप्ते प्रचक्ष्महे—आनन्दमयोऽभ्यासात् । आनन्दमयः परमात्मा । कुतः ? अभ्यासात् *सैषाऽऽनन्दस्य मीमांसा भवति इत्यारभ्य *यतो वाचो निवर्तन्ते इत्येवमन्तेन वाक्येन शतगुणितोत्तरक्रमेण निरतिशयदशाशिरस्कोऽभ्यस्यमान आनन्दः अनन्तदुःखमिश्रपरिमितसुखलवभागिनि जीवात्मन्यसंभवन् निखिलहेयप्रत्यनीकं कल्याणैकतानं सकलेतरविलक्षणं परमात्मानमेव स्वाश्रयमावेदयति ॥

यथाऽऽह *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योन्तर आत्माऽऽनन्दमयः इति । विज्ञानमयो हि जीवः; न बुद्धिमात्रम्, मयट्प्रत्ययेन व्यतिरेकप्रतीतेः । प्राणमये त्वगत्या स्वार्थिकताऽऽश्रीयते । इह तु तद्वतो जीवस्य संभवान्नानर्थक्यं न्याय्यम् । बद्धो मुक्तश्च प्रत्यगात्मा ज्ञातैवेत्यभ्यधिष्महि । प्राणमयादौ च मयडर्थसंभवोऽनन्तरमेव वक्ष्यते । कथं तर्हि विज्ञानमयविषयश्लोके *विज्ञानं यज्ञं तनुत इति केवलविज्ञानशब्दोपादानमुपपद्यते ? ज्ञातुरेवात्मनस्स्वरूपमपि स्वप्रकाशतया विज्ञानमित्युच्यत इति न दोषः, ज्ञानैकनिरूपणीयत्वाच्च ज्ञातुस्स्वरूपस्य । स्वरूपनिरूपणधर्मशब्दा हि धर्ममुखेन धर्मिस्वरूपमपि प्रतिपादयन्ति, गवादिशब्दवत् । *कृत्यल्युटो बहुलमिति वा कर्तरि ल्युडाश्रीयते । नन्द्यादित्वं वाऽऽश्रित्य *नन्दिग्रहीत्यादिना कर्तरि ल्युः । अत एव च *विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि चेति यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते । बुद्धिमात्रस्य हि न कर्तृत्वं संभवति । अचेतनेषु हि चेतनोपकरणभूतेषु विज्ञानमयात्प्राचीनेष्वन्नमयादिषु न चेतनधर्मभूतं कर्तृत्वं श्रूयते । अत एव चेतनमचेतनं च स्वासाधारणैः निलयनत्वानिलयनत्वादिभिर्धर्मविशेषैर्विभज्य निर्दिशद्वाक्यं *विज्ञानं चाविज्ञानं चेति विज्ञानशब्देन तद्गुणं चेतनं वदति । तथाऽन्तर्यामिब्राह्मणे *यो विज्ञाने तिष्ठन् इत्यस्य काण्वपाठगतस्य पर्यायस्य स्थाने *य आत्मनि तिष्ठन् इति पर्यायमधीयाना माध्यन्दिनाः काण्वपाठगतं विज्ञानशब्दनिर्दिष्टं जीवात्मेति स्फुटीकुर्वन्ति । विज्ञानमिति च नपुंसकलिङ्गं वस्तुत्वाभिप्रायम् । तदेवं विज्ञानमयाज्जीवादन्यस्तदन्तरः परमात्मा आनन्दमयः । यद्यपि *विज्ञानं यज्ञं तनुते इति श्लोके ज्ञानमात्रमेवोपादीयते न ज्ञाता; तथाऽपि *अन्योऽन्तर आत्मा विज्ञानमयः इति तद्वान् ज्ञातैवोपदिश्यते; यथा *अन्नाद्वै प्रजाः प्रजायन्ते इत्यत्र श्लोके केवलान्नोपादानेऽपि *स वा एष पुरुषोऽन्नरसमयः इत्यत्र नान्नमात्रं निर्दिष्टम्, अपितु तन्मयः तद्विकारः । एतत्सर्वं हृदि निधाय सूत्रकारस्स्वयमेव *भेदव्यपदेशात् इत्यनन्तरमेव वदति ॥

यदुक्तं जगत्कारणतया निर्दिष्टस्य *अनेन जीवेनात्मनाऽनुप्रविश्य *तत्त्वमसीति च जीवसामानाधिकरण्यनिर्देशाज्जगत्कारणमपि जीवस्वरूपान्नातिरिच्यत इति कृत्वा जीवस्यैव स्वरूपं *ब्रह्मविदाप्नोति परमिति प्रक्रान्तमसुखाद्व्यावृत्तत्वेनानन्दमय इत्युपदिश्यत इति; तदयुक्तम्, जीवस्य चेतनत्वे सत्यपि *तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति स्वसङ्कल्पपूर्वकानन्तविचित्रसृष्टियोगानुपपत्तेः । शुद्धावस्थस्यापि हि तस्य सर्गादिजगद्व्यापारासंभवो *जगद्व्यापारवर्जम् *भोगमात्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

साम्यलिङ्गात् इत्यत्रोपपादयिष्यते। कारणभूतस्य ब्रह्मणो जीवस्वरूपत्वानभ्युपगमे *अनेन जीवेनात्मना* तत्त्वमसीति सामानाधिकरण्यनिर्देशः कथमुपपद्यत इति चेत् ;कथं वा निरस्तनिखिलदोषगन्धस्य सत्यसङ्कल्पस्य सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासङ्ख्येयकल्याणगुणगणस्य सकलकारणभूतस्य ब्रह्मणः नानाविधानन्तदुःखाकरकर्माधीनचिन्तितनिमिषितादिसकलप्रवृत्तिजीवस्वरूपत्वम्? अन्यतरस्य मिथ्यात्वेनोपपद्यत इति चेत्,कस्य भोः? किं हेयसंबन्धस्य?किं वा हेयप्रत्यनीककल्याणैकतानस्वभावस्य? हेयप्रत्यनीककल्याणैकतानस्य ब्रह्मणोऽनाद्यविद्याश्रयत्वेन हेयसंबन्धमिथ्याप्रतिभासो मिथ्यारूप इति चेत्; विप्रतिषिद्धमिदमभिधीयते, ब्रह्मणो हेयप्रत्यनीककल्याणैकतानत्वमनाद्यविद्याश्रयत्वेनानन्तदुःखविषयमिथ्याप्रतिभासाश्रयत्वं चेति । अविद्याश्रयत्वं तत्कार्यदुःखप्रतिभासाश्रयत्वं चैव हि हेयसंबन्धः। तत्संबन्धित्वं तत्प्रत्यनीकत्वं च विरुद्धमेव । तथाऽपि तस्य मिथ्यात्वान्न विरोध इति मा वोचः । मिथ्याभूतमप्यपुरुषार्थ एव, यन्निरसनाय सर्वे वेदान्ता आरभ्यन्त इति ब्रूषे । निरसनीयापुरुषार्थयोगश्च हेयप्रत्यनीककल्याणैकतानतया विरुध्यते । किं कुर्मः ? *येनाश्रुतं श्रुतं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय *सदेव सोम्येदमग्र आसीदित्यादिना निखिलजगदेककारणताम्, *तदैक्षत बहु स्यामिति सत्यसङ्कल्पतां च ब्रह्मणः प्रतिपाद्य तस्यैव ब्रह्मणः *तत्त्वमसीति सामानाधिकरण्येनानन्तदुःखाश्रयजीवैक्यं प्रतिपादितम् ; तदन्यथानुपपत्त्या ब्रह्मण एवाविद्याश्रयत्वादि परिकल्पनीयमिति चेत् ; श्रुतोपपत्तयेऽप्यनुपपन्नं विरुद्धं च न कल्पनीयम्। अथ हेयसंबन्ध एव पारमार्थिकः, कल्याणैकस्वभावता तु मिथ्याभूता; हन्तैवं तापत्रयाभिहतचेतनोज्जिजीवयिषया प्रवृत्तं शास्त्रम्, तापत्रयाभिहतिरेव तस्य पारमार्थिकी, कल्याणैकस्वभावस्तु भ्रान्तिपरिकल्पित इति बोधयत्सम्यगुज्जीवयति! अथैतद्दोषपरिजिहीर्षया ब्रह्मणो निर्विशेषचिन्मात्रस्वरूपातिरिक्तजीवत्वदुःखित्वादिकं सत्यसङ्कल्पत्वकल्याणगुणाकरत्वजगत्कारणत्वाद्यपि मिथ्याभूतमिति कल्पनीयमिति चेत्; अहो भवतां वाक्यार्थपर्यालोचनकुशलता! एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न सेत्स्यति। यथैकविज्ञानं परमार्थविषयम्, तथैव सर्वविज्ञानमपि यदि परमार्थविषयं तदन्तर्गतं च, तदा तज्ज्ञानेन सर्वविज्ञानमिति शक्यते वक्तुम्। न हि परमार्थशुक्तिकाज्ञानेन तदाश्रयमपरमार्थरजतं ज्ञातं भवति ।

अथोच्येत—एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अयमर्थः—निर्विशेषवस्तुमात्रमेव सत्यम्, अन्यदसत्यमिति। न तर्हि *येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति श्रूयेत; येन श्रुतेनाश्रुतमपि श्रुतं भवतीति ह्यस्य वाक्यस्यार्थः। कारणतयोपलक्षितनिर्विशेषवस्तुमात्रस्यैव सद्भावश्चेत्प्रतिज्ञातः, *यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातमिति दृष्टान्तोऽपि न घटते। मृत्पिण्डविज्ञानेन हि तद्विकारस्य ज्ञातता निदर्शिता। तत्रापि विकारस्यासत्यताऽभिप्रेतेति चेत्; मृद्विकारस्य रज्जुसर्पादिवदसत्यत्वं शुश्रूषोरसिद्धमिति प्रतिज्ञातार्थसंभावनाप्रदर्शनाय *यथा सोम्येति प्रसिद्धवदुपन्यासो न युज्यते। न च *तत्त्वमस्यादिवाक्यजन्यज्ञानोत्पत्तेः प्राग्विकारजातस्यासत्यतामापा-

Digitization by Arya Samaj Charitable Foundation, Chennai

दयत्तर्कानुगृहीतमननुगृहीतं वा प्रमाणमुपलभामह इति । अयमर्थः * तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र वक्ष्यते । तथा * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत * हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः... ऐतदात्म्यमिदं सर्वम् इत्यादिना अस्य जगतस्सदात्मकता, सृष्टेः पूर्वकाले नामरूपविभागप्रहाणम्, जगदुत्पत्तौ सच्छब्दवाच्यस्य ब्रह्मणस्स्वव्यतिरिक्तनिमित्तान्तरानपेक्षत्वम्, सृष्टिकालेऽहमेवानन्तस्थिरत्रसरूपेण बहु स्यामित्यनन्यसाधारणसङ्कल्पविशेषः, यथासङ्कल्पमनन्तविचित्रतत्त्वानां विलक्षणक्रमविशेषविशिष्टा सृष्टिः, समस्तेष्वचेतनेषु वस्तुषु स्वात्मकजीवानुप्रवेशेनैवानन्तनामरूपव्याकरणम्, स्वव्यतिरिक्तस्य समस्तस्य स्वमूलत्वम्, स्वायतनत्वम्, स्वप्रवर्त्यत्वम्, स्वेनैव जीवनम्, स्वप्रतिष्ठत्वमित्याद्यनन्तविशेषाश्शास्त्रैकसमधिगम्याः प्रतिपादिताः । तत्संबन्धितया प्रकरणान्तरेष्वप्यपहतपाप्मत्वादिनिरस्तनिखिलदोषतासर्वज्ञतासर्वेश्वरत्वसत्यकामत्वसत्यसङ्कल्पत्वसर्वानन्दकरणनिरतिशयानन्दयोगादयस्सकलेतरप्रमाणाविषयास्सहस्रशः प्रतिपादिताः । एवमनन्यगोचरानन्तविशेषविशिष्टप्रकृतब्रह्मपरामर्शितच्छब्दस्य निर्विशेषवस्तुमात्रोपदेशपरत्वमसङ्गतत्वेनोन्मत्तप्रलपितायेत । त्वंपदं च संसारित्वविशिष्टजीववाचि । तस्यापि निर्विशेषस्वरूपोपस्थापनपरत्वे स्वार्थः परित्यक्तस्स्यात् । निर्विशेषप्रकाशस्वरूपस्य च वस्तुनो ह्यविद्यया तिरोधानं स्वरूपनाशप्रसङ्गादिभिर्न संभवतीति पूर्वमेवोक्तम् । एवं च सति समानाधिकरणवृत्तयोस्तत्त्वमिति द्वयोरपि पदयोर्मुख्यार्थपरित्यागेन लक्षणा च समाश्रयणीया ॥

अथोच्येत—समानाधिकरणवृत्तानामेकार्थप्रतिपादनपरतया विशेषणांशे तात्पर्यासंभवादेव विशेषणनिवृत्तेर्वस्तुमात्रैकत्वप्रतिपादनान्न लक्षणाप्रसङ्गः । यथा नीलमुत्पलमिति पदद्वयस्य विशेष्यैकत्वप्रतिपादनपरत्वेन नीलत्वोत्पलत्वरूपविशेषणद्वयं न विवक्ष्यते । तद्विवक्षायां हि नीलत्वविशिष्टाकारेणोत्पलत्वविशिष्टाकारस्यैकत्वप्रतिपादनं प्रसज्येत । तत्तु न संभवति ; न हि नैल्यविशिष्टाकारेण तद्वस्तूत्पलपदेन विशेष्यते, जातिगुणयोरन्योन्यसमवायप्रसङ्गात् । अतो नीलत्वोत्पलत्वोपलक्षितवस्त्वेकत्वमात्रं सामानाधिकरण्येन प्रतिपाद्यते । तथा सोऽयं देवदत्तः इत्यतीतकालविप्रकृष्टदेशविशिष्टस्य तेनैव रूपेण सन्निहितदेशवर्तमानकालविशिष्टतया प्रतिपादनानुपपत्तेरुभयदेशकालोपलक्षितस्वरूपमात्रैक्यं सामानाधिकरण्येन प्रतिपाद्यते । यद्यपि नीलमित्याद्येकपदश्रवणे प्रतीयमानं विशेषणं सामानाधिकरण्यवेलायां विरोधान्न प्रतिपाद्यते । तथाऽपि वाच्येऽर्थे प्रधानांशस्य प्रतिपादनान्न लक्षणा । अपि तु विशेषणांशस्याविवक्षामात्रम् । सर्वत्र सामानाधिकरण्यस्यैष एव स्वभाव इति न कश्चिद्दोषः – इति ॥

तदिदमसारम् । सर्वेष्वेव वाक्येषु पदानां व्युत्पत्तिसिद्धार्थसंसर्गविशेषमात्रं प्रत्याय्यम् । तत्र समानाधिकरणवृत्तानामपि नीलादिपदानां नैल्यादिविशिष्ट एवार्थो व्युत्पत्तिसिद्धः पदान्तरार्थसंसृष्टोऽभिधीयते । यथा नीलमुत्पलमानयेत्युक्ते नीलिमादिविशिष्टमेवानीयते; यथा च विन्ध्याटव्यां

Digitization by Arya Samaj Charitable Foundation, Chennai

मदमुदितो मातङ्गगणस्तिष्ठतीति पदद्वयावगतविशेषणविशिष्ट एवार्थः प्रतीयते; एवं वेदान्तवाक्येष्वपि समानाधिकरणनिर्देशेषु तत्तद्विशेषणविशिष्टमेव ब्रह्म प्रतिपत्तव्यम् । न च विशेषणविवक्षायामितरविशिष्टाकारं वस्त्वन्येन विशेष्टव्यम्; अपि तु सर्वैर्विशेषणैस्स्वरूपमेव विशेष्यम् । तथाहि *भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति, अन्वयेन निवृत्त्या वा पदान्तरप्रतिपाद्यादाकारादाकारान्तरयुक्ततया तस्यैव वस्तुनः पदान्तरप्रतिपाद्यत्वं सामानाधिकरण्यकार्यम् । यथा 'देवदत्तश्श्यामो युवा लोहिताक्षोऽदीनोऽकृपणोऽनवद्यः' इति । यत्र त्वेकस्मिन् वस्तुनि समन्वयायोग्यं विशेषणद्वयं समानाधिकरणपदनिर्दिष्टम्; तत्राप्यन्यतरत्पदममुख्यवृत्तमाश्रीयते, न द्वयम्, यथा 'गौर्वाहीकः' इति । नीलोत्पलादिषु तु विशेषणद्वयान्वयाविरोधादेकमेवोभयविशिष्टं प्रतिपाद्यते ॥

अथ मनुषे एकविशेषणप्रतिसंबन्धित्वेन निरूप्यमाणं विशेषणान्तरप्रतिसंबन्धित्वाद्विलक्षणमिति घटपटयोरिवैकविभक्तिनिर्देशेऽप्यैक्यप्रतिपादनासंभवात्समानाधिकरणशब्दस्य न विशिष्टप्रतिपादनपरत्वम्, अपि तु विशेषणमुखेन स्वरूपमुपस्थाप्य तदैक्यप्रतिपादनपरत्वमेवेति ।

स्यादेतदेवम्, यदि विशेषणद्वयप्रतिसंबन्धित्वमात्रमेवैक्यं निरुन्ध्यात् । न चैतदस्ति; एकस्मिन्धर्मिण्युपसंहर्तुमयोग्यधर्मद्वयविशिष्टत्वमेव ह्येकत्वं निरुणद्धि । अयोग्यता च प्रमाणान्तरसिद्धा घटत्वपटत्वयोः । नीलमुत्पलमित्यादिषु तु दण्डित्वकुण्डलित्ववद्रूपवत्त्वरसवत्त्वगन्धवत्त्वादिवच्च विरोधो नोपलभ्यते । न केवलमविरोध एव; प्रवृत्तिनिमित्तभेदेनैकार्थनिष्ठत्वरूपं सामानाधिकरण्यमुपपादयत्येव धर्मद्वयविशिष्टताम् । अन्यथा स्वरूपमात्रैक्ये अनेकपदप्रवृत्तौ निमित्ताभावात्सामानाधिकरण्यमेव न स्यात् । विशेषणानां स्वसंबन्धानादरेण वस्तुस्वरूपोपलक्षणपरत्वे सत्येकेनैव वस्तूपलक्षितमित्युपलक्षणान्तरमनर्थकमेव; उपलक्षणान्तरोपलक्ष्याकारभेदाभ्युपगमे तेनाकारेण सविशेषत्वप्रसङ्गः ॥

'सोऽयं देवदत्तः' इत्यत्रापि लक्षणागन्धो न विद्यते, विरोधाभावात् । देशान्तरसंबन्धितयाऽतीतस्य सन्निहितदेशसंबन्धितया वर्तमानत्वाविरोधात् । अत एव हि सोऽयमिति प्रत्यभिज्ञया कालद्वयसंबन्धिनो वस्तुन ऐक्यमुपपाद्यते वस्तुनस्स्थिरत्ववादिभिः । अन्यथा प्रतीतिविरोधे सति सर्वेषां क्षणिकत्वमेव स्यात् । देशद्वयसंबन्धविरोधस्तु कालभेदेन परिह्रियते ॥

यतस्समानाधिकरणपदानामनेकविशेषणविशिष्टैकार्थवाचित्वम्; अत एव *अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यारुण्यादिविशिष्टैकहायन्या क्रयस्साध्यतया विधीयते ॥ तदुक्तम् * अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमस्स्यादिति । तत्रैवं पूर्वपक्षी मन्यते—यद्यप्यरुणयेति पदमाकृतेरिव गुणस्यापि द्रव्यप्रकारतैकस्वभावत्वाद्द्रव्यपर्यन्तमेवारुणिमानमभिदधाति; तथाऽप्येकहायन्यन्वयनियमोऽरुणिम्नो न संभवति; एकहायन्या क्रीणाति, तच्चारुणयेत्यर्थद्वयविधानासंभवात् ॥ ततश्चारुणयेति वाक्यं भित्त्वा प्रकरणविहितसर्वद्रव्यपर्यन्तमेवारुणिमानमविशेषेणाभिदधाति । अरुण-

Digitization by Arya Samaj Charitable Foundation, Chennai

येति स्त्रीलिङ्गनिर्देशः प्रकरणविहितसर्वलिङ्गकद्रव्याणां प्रदर्शनार्थः। तस्मादेकहायन्यन्वयनियमोऽरुणिम्नो न स्यादिति ॥

अत्राभिधीयते— *अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमस्स्यात्। * अरुणयैकहायन्या इत्यारुण्यविशिष्टद्रव्यैकहायनीद्रव्यवाचिपदयोस्सामानाधिकरण्येनार्थैकत्वे सिद्धे सत्येकहायनीद्रव्यारुण्यगुणयोररुणयेति पदेनैव विशेषणविशेष्यभावेन संबन्धितयाऽभिहितयोः क्रयाख्यैककर्मान्वयाविरोधादरुणिम्नः क्रयसाधनभूतैकहायन्यन्वयनियमस्स्यात्। यद्येकहायन्याः क्रयसंबन्धवदरुणिमसंबन्धोऽपि वाक्यावसेयस्स्यात्; तदा वाक्यस्यार्थद्वयविधानं स्यात्। न चैतदस्ति। अरुणयेति पदेनैवारुणिमविशिष्टद्रव्यमभिहितम्। एकहायनीपदसामानाधिकरण्येन तस्यैकहायनीत्वमात्रमवगम्यते; न गुणसंबन्धः; विशिष्टद्रव्यैक्यमेव हि सामानाधिकरण्यस्यार्थः * भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति हि सामानाधिकरण्यलक्षणम् ॥

अत एव हि रक्तः पटो भवतीत्यादिष्वैकार्थ्यादेकवाक्यत्वम्। पटस्य भवनक्रियासंबन्धे हि वाक्यव्यापारः; रागसंबन्धस्तु रक्तपदेनैवाभिहितः; रागसंबन्धि द्रव्यं पट इत्येतावन्मात्रं सामानाधिकरण्यावसेयम्। एवमेकेन गुणेन द्वाभ्यां बहुभिर्वा तेन तेन पदेन समस्तेन व्यस्तेन वा विशिष्टमुपस्थाप्य सामानाधिकरण्येन सर्वविशेषणविशिष्टोऽर्थ एक इति ज्ञापयित्वा तस्य क्रियासंबन्धाभिधानमविरुद्धम्—देवदत्तश्श्यामो युवा लोहिताक्षो दण्डी कुण्डली तिष्ठति; शुक्लेन वाससा यवनिकां संपादयेत्; नीलमुत्पलमानय; नीलोत्पलमानय; गामानय शुक्लां शोभनाक्षीम् * अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् इति। एवम् * अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति ॥

एतदुक्तं भवति—यथा काष्ठैस्स्थाल्यामोदनं पचेदित्यनेककारकविशिष्टैका क्रिया युगपत्प्रतीयते; तथा समानाधिकरणपदसङ्घाताभिहितमेकैकं कारकं तत्तत्कारकप्रतिपत्तिवेलायामेवानेकविशेषणविशिष्टं युगपत्प्रतिपन्नं क्रियायामन्वेतीति न कश्चिद्विरोधः खादिरैश्शुष्कैः काष्ठैस्समपरिमाणे भाण्डे पायसं शाल्योदनं समर्थः पाचकः पचेदित्यादिषु—इति ॥

यत्तूपात्तद्रव्यकवाक्यस्थगुणशब्दः केवलगुणाभिधायीत्यरुणयेति पदेन केवलगुणस्यैवाभिधानमिति; तन्नोपपद्यते, लोकवेदयोर्द्रव्यवाचिपदसमानाधिकरणस्य गुणवाचिनः क्वचिदपि केवलगुणाभिधानादर्शनात्। उपात्तद्रव्यकवाक्यस्थं गुणपदं केवलगुणाभिधायीत्यप्यसङ्गतम्; पटश्शुक्लः इत्यादिषूपात्तद्रव्यकेऽपि गुणविशिष्टस्यैवाभिधानात्। पटस्य शुक्लः इत्यत्र शौक्ल्यविशिष्टपटाप्रतिपत्तिरसमानविभक्तिनिर्देशकृता; न पुनरुपात्तद्रव्यकत्वकृता। तत्रैव पटस्य शुक्लो भागः इत्यादिषु समानविभक्तिनिर्देशे शौक्ल्यविशिष्टद्रव्यं प्रतीयते। यत्पुनः क्रयस्यैकहायन्यवरुद्धतयाऽरुणिम्नः क्रयान्वयो न संभवतीति; तदपि विरोधिगुणरहितद्रव्यवाचिपदसमानाधिकरणगुणपदस्य तदाश्रयगुणाभिधानेन क्रियापदान्वयाविरोधादसङ्गतम्। राद्धान्ते चोक्तन्यायेनारुणिमश्शाब्दे द्रव्यान्वये सिद्धे द्रव्यगुणयोः क्रयसाधनत्वानुपपत्त्या अर्थात्परस्परान्वयस्सिध्यतीत्यप्यसङ्गतम्। अतो यथोक्त एवार्थः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात् तत्त्वमस्यादिसामानाधिकरण्ये पदद्वयाभिहितविशेषणापरित्यागेनैवैक्यप्रतिपादनं वर्णनीयम् । तत्त्वनाद्यविद्योपहितानवधिकदुःखभागिनश्शुद्ध्यशुद्ध्युभयावस्थाच्चेतनादर्थान्तरभूतमशेषहेयप्रत्यनीकानवधिककल्याणैकतानं परमात्मानमनभ्युपगच्छतो न संभवति। अभ्युपगच्छतोऽपि समानाधिकरणपदानां यथावस्थितविशेषणविशिष्टैक्यप्रतिपादनपरत्वाश्रयणे त्वंपदप्रतिपन्नसकलदोषभागित्वं परस्य प्रसज्येतेति चेत्; नैतदेवम्, त्वंपदेनापि जीवान्तर्यामिणः परस्यैवाभिधानात्॥

एतदुक्तं भवति—सच्छब्दाभिहितं निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पमिश्रानवधिकातिशयासंख्येयकल्याणगुणगणं समस्तकारणभूतं परं ब्रह्म * बहु स्यामिति सङ्कल्प्य तेजोबन्नप्रमुखं कृत्स्नं जगत्सृष्ट्वा तस्मिन् देवादिविचित्रसंस्थानसंस्थिते जगति चेतनं जीववर्गं स्वकर्मानुगुणेषु शरीरेष्वात्मतया प्रवेश्य स्वयं च स्वेच्छयैव जीवान्तरात्मतयाऽनुप्रविश्य एवंभूतेषु स्वपर्यन्तेषु देवाद्याकारेषु सङ्घातेषु नामरूपे व्याकरोत्। एवंरूपसङ्घातस्यैव वस्तुत्वं शब्दवाच्यत्वं चाकरोदित्यर्थः। अनेन जीवेनात्मना—जीवेन मयेति निर्देशो जीवस्य ब्रह्मात्मकत्वं दर्शयति । ब्रह्मात्मकत्वं च जीवस्य जीवान्तरात्मतया ब्रह्मणोऽनुप्रवेशादित्यवगम्यते; * इदं सर्वमसृजत, यदिदं किं च, तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवदित्यत्र इदं सर्वमिति निर्दिष्टं चेतनाचेतनवस्तुद्वयं सत्त्यच्छब्दाभ्यां विज्ञानाविज्ञानशब्दाभ्यां च विभज्य निर्दिश्य चिद्वस्तुन्यपि ब्रह्मणोऽनुप्रवेशाभिधानात्। अत एवं नामरूपव्याकरणात्सर्वे वाचकाश्शब्दा अचिज्जीवविशिष्टपरमात्मवाचिन इत्यवगतम्—इति॥

किञ्च * ऐतदात्म्यमिदं सर्वमिति चेतनमिश्रं प्रपञ्चम् इदं सर्वमिति निर्दिश्य * तस्यैष आत्मेति प्रतिपादितम्। एवं च सर्वं चेतनाचेतनं प्रति ब्रह्मण आत्मत्वेन सर्वं सचेतनं जगत् तस्य शरीरं भवति। तथा च श्रुत्यन्तराणि * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम् यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति प्रारभ्य *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम् य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इत्यादि * यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरम्, योऽपामन्तरे सञ्चरन् यस्यापः शरीरमित्यारभ्य *योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरम् यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इत्यादीनि सचेतनं जगत् तस्य शरीरत्वेन निर्दिश्य तस्यात्मत्वेन परमात्मानमुपदिशन्ति। अतश्चेतनवाचिनोऽपि शब्दाश्चेतनस्याप्यात्मभूतं चेतनशरीरकं परमात्मानमेवाभिदधति। यथा अचेतनदेवादिसंस्थानपिण्डवाचिनश्शब्दाः तत्तच्छरीरकजीवात्मन एव वाचकाः *चत्वारः पञ्चदशरात्रादेवत्वं गच्छन्तीत्यादिषु; देवा भवन्तीत्यर्थः। शरीरस्य शरीरिणं प्रति प्रकारत्वात् प्रकारवाचिनां च शब्दानां प्रकारिण्येव पर्यवसानात् शरीरवाचिनां शब्दानां शरीरिपर्यवसानं न्याय्यम्। प्रकारो हि नाम इदमित्थमिति प्रतीयमाने वस्तुनि इत्थमिति प्रतीयमानोंऽशः। तस्य तद्वस्त्वपेक्षत्वेन तत्प्रतीतेस्तदपेक्षत्वात् तस्मिन्नेव पर्यवसानं युक्तमिति तस्य प्रतिपादकोऽपि शब्दस्तस्मिन्नेव पर्यवस्यति। अत

Digitization by Arya Samaj Charitable Foundation, Chennai

एव गौरश्वो मनुष्यः इत्यादिप्रकारभूताकृतिवाचिनश्शब्दाः प्रकारिणि पिण्डे अपर्यवस्यन्तः पिण्डस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात् पिण्डशरीरकचेतनस्यापि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्यवस्यन्तीति सर्वशब्दानां परमात्मैव वाच्य इति परमात्मवाचिशब्देन सामानाधिकरण्यं मुख्यमेव ॥

ननु खण्डो गौः खण्डश्शुक्लः इति जातिगुणवाचिनामेव पदानां द्रव्यवाचिपदैस्सह सामानाधिकरण्यं दृष्टम्; द्रव्याणां तु द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः, यथा दण्डी कुण्डलीति। नैवम्; जातिर्वा गुणो वा द्रव्यं वा नैतेष्वेकमेव सामानाधिकरण्ये प्रयोजकम्, अन्योन्यस्मिन् व्यभिचारात् । यस्य पदार्थस्य कस्यचित्प्रकारतयैव सद्भावः, तस्य तदपृथक्सिद्धिस्थितिप्रतीतिभिस्तद्वाचिनां शब्दानां स्वाभिधेयविशिष्टद्रव्यवाचित्वाद्धर्मान्तरविशिष्टतद्रव्यवाचिना शब्देन सामानाधिकरण्यं युक्तमेव । यत्र पुनः पृथक्सिद्धस्य स्वनिष्ठस्यैव द्रव्यस्य कदाचित्क्वचिद्द्रव्यान्तरप्रकारत्वमिष्यते, तत्र मत्वर्थीयप्रत्यय इति निरवद्यम् ॥

तदेवं परमात्मनश्शरीरतया तत्प्रकारत्वादचिद्विशिष्टजीवस्यापि जीवनिर्देशविशेषरूपा अहंत्वमित्यादिशब्दाः परमात्मानमेवाचक्षत इति *तत्त्वमसीति सामानाधिकरण्येनोपसंहृतम्; एवं च सति परमात्मानं प्रति जीवस्य शरीरतयाऽन्वयाज्जीवगता धर्माः परमात्मानं न स्पृशन्ति, यथा स्वशरीरगता बालत्वयुवत्वस्थविरत्वादयो धर्माः जीवं न स्पृशन्ति । अतः *तत्त्वमसीति सामानाधिकरण्ये तत्पदं जगत्कारणभूतं सत्यसङ्कल्पं सर्वकल्याणगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाचष्टे; त्वमिति च तमेव सशरीरजीवशरीरकमाचष्ट इति सामानाधिकरण्यं मुख्यवृत्तम्; प्रकरणाविरोधस्सर्वश्रुत्यविरोधो ब्रह्मणि निरवद्ये कल्याणैकताने अविद्यादिदोषगन्धाभावश्च । अतो जीवसामानाधिकरण्यमपि विशेषणभूताज्जीवादन्यत्वमेवापादयतीति विज्ञानमयाज्जीवादन्य एवानन्दमयः परमात्मा ॥

यदुक्तम् *तस्यैष एव शारीर आत्मेत्यानन्दमयस्य शारीरत्वश्रवणाज्जीवादन्यत्वं न संभवतीति, तदयुक्तम्; अस्मिन् प्रकरणे सर्वत्र *तस्यैष एव शारीर आत्मा, यः पूर्वस्येति परमात्मन एव शारीरात्मत्वाभिधानात् । कथम् । *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इत्याकाशादिसृज्यवर्गस्य परमकारणत्वेन प्रज्ञातजीवव्यतिरेकस्य परस्य ब्रह्मण आत्मत्वेन व्यपदेशात्तद्व्यतिरिक्ताकाशादीनामन्नमयपर्यन्तानां तच्छरीरत्वमवगम्यते। *यस्य पृथिवी शरीरम्, यस्यापश्शरीरम्, यस्य तेजश्शरीरम्, यस्य वायुश्शरीरम्, यस्याकाशश्शरीरम्, यस्याक्षरं शरीरम्, यस्य मृत्युश्शरीरम्, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति सुबालश्रुत्या सर्वतत्त्वानां परमात्मशरीरत्वं स्पष्टमभिधीयते । अतः *तस्माद्वा एतस्मादात्मनः इत्यत्रैवान्नमयस्य परमात्मैव शारीर आत्मेत्यवगतः । प्राणमयं प्रकृत्याह *तस्यैष एव शारीर आत्मा, यः पूर्वस्येति । पूर्वस्यान्नमयस्य यश्शारीर आत्मा श्रुत्यन्तरसिद्धः परमकारणभूतः परमात्मा; स एव तस्य प्राणमयस्यापि शारीर आत्मेत्यर्थः । एवं मनोमयविज्ञानमययोर्द्रष्टव्यम् । आनन्दमये तु *एष एवेति निर्देशस्तस्यानन्यात्मत्वं दर्शयितुम् । तत्कथम् ?

Digitization by Arya Samaj Charitable Foundation, Chennai

विज्ञानमयस्यापि पूर्वोक्तया नीत्या परमात्मैव शारीर आत्मेत्यवगतः । एवं सति विज्ञानमयस्य यश्शारीर आत्मा, स एवानन्दमयस्यापि शारीर आत्मेत्युक्ते आनन्दमयस्य अभ्यासावगतपरमात्मभावस्य परमात्मनस्स्वयमेवात्मेत्यवगम्यते । एवं च स्वव्यतिरिक्तं चेतनाचेतनवस्तुजातं स्वशरीरमिति स एव निरुपाधिकश्शारीर आत्मा । अत एवेदं परं ब्रह्माधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैरभिधीयते । अतो विज्ञानमयाज्जीवादन्य एव परमात्मा आनन्दमयः ॥ १३ ॥

आह—नायमानन्दमयो जीवादन्यः, विकारशब्दस्य मयट्प्रत्ययस्य श्रवणात् । *मयड्वैतयोः इति प्रकृत्य *नित्यं वृद्धशरादिभ्यः इति विकारार्थे मयट् स्मर्यते । वृद्धश्चायमानन्दशब्दः । ननु प्राचुर्येऽपि मयडस्ति *तत्प्रकृतवचने मयट् इति स्मृतेः । यथा अन्नमयो यज्ञः इति । स एवायं भविष्यति । नैवम्; अन्नमय इत्युपक्रमे विकारार्थत्वं दृष्टम्, अत औचित्यादस्यापि विकारार्थत्वमेव युक्तम् । किञ्च प्राचुर्यार्थत्वेऽपि जीवादन्यत्वं न सिध्यति । तथा हि—आनन्दप्रचुर इत्युक्ते दुःखमिश्रत्वमवर्जनीयम् । आनन्दस्य हि प्राचुर्यं दुःखस्याल्पत्वमवगमयति । दुःखमिश्रत्वमेव हि जीवत्वम् । अत औचित्यप्राप्तविकारार्थत्वमेव युक्तम् । किञ्च लोके मृण्मयं हिरण्मयं दारुमयमित्यादिषु वेदे च *पर्णमयी जुहूः *शमीमय्यस्स्रुचः *दर्भमयी रशना इत्यादिषु मयटो विकारार्थे प्रयोगबाहुल्यात्स एव प्रथमतरं धियमधिरोहति । जीवस्य चानन्दविकारत्वमस्त्येव; तस्य स्वत आनन्दरूपस्य सतस्संसारित्वावस्था तद्विकार एवेति । अतो विकारवाचिनो मयट्प्रत्ययस्य श्रवणादानन्दमयो जीवादनतिरिक्त इति । तदेतदनुभाष्य परिहरति—

14 विकारशब्दान्नेति चेन्न प्राचुर्यात् । १ । १ । १४ ॥

नैतद्युक्तम् । कुतः ? प्राचुर्यात्—परस्मिन् ब्रह्मण्यानन्दप्राचुर्यात् । प्राचुर्यार्थे च मयटः स्संभवात् । एतदुक्तं भवति—शतगुणितोत्तरक्रमेणाभ्यस्यमानस्यानन्दस्य जीवाश्रयत्वासंभवाद्ब्रह्माश्रयोऽयमानन्द इति निश्चिते सति तस्मिन् ब्रह्मणि विकारासंभवात् प्राचुर्येऽपि मयड्विधिसंभवाच्चानन्दमयः परं ब्रह्मेति । औचित्यात्प्रयोगप्रौढ्या च मयटो विकारार्थत्वमर्थविरोधान्न संभवति । किञ्च औचित्यं प्राणमय एव परित्यक्तम्, तत्र विकारार्थत्वासंभवात् । अतस्तत्र पञ्चवृत्तेर्वायोः प्राणवृत्तिमत्तामात्रेण प्राणमयत्वम्; प्राणापानादिषु पञ्चसु वृत्तिषु प्राणवृत्तेः प्राचुर्याद्वा । न च प्राचुर्ये मयट्प्रत्ययस्य प्रौढिर्नास्ति, अन्नमयो यज्ञः शकटमयी यात्रा इत्यादिषु दर्शनात् ॥

यदुक्तमानन्दप्राचुर्यमल्पदुःखसद्भावमवगमयतीति; तदसत् । तत्प्रचुरत्वं हि तत्प्रभूतत्वम्, तच्चेतरस्य सत्तां नावगमयति; अपि तु तस्याल्पत्वं निवर्तयति । इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ । इह च प्रमाणान्तरेण तदभावोऽवगम्यते *अपहतपाप्मेत्यादिना । तत्रैतावदेव वक्तव्यं, ब्रह्मानन्दस्य प्रभूतत्वमन्यानन्दस्याल्पत्वमपेक्षत इति । उच्यते च तत् *स एको मानुष आनन्दः इत्यादिना जीवानन्दापेक्षया ब्रह्मानन्दो निरतिशयदशापन्नः प्रभूत इति । यच्चोक्तं जीवस्यानन्द-

Digitization by Arya Samaj Charitable Foundation, Chennai

विकारत्वं संभवतीति; तदपि नोपपद्यते, जीवस्य ज्ञानानन्दस्वरूपस्य केनचिदाकारेण मृद इव घटाद्याकारेण परिणामस्सकलश्रुतिस्मृतिन्यायविरुद्धः। संसारदशायां तु कर्मणा ज्ञानानन्दौ सङ्कुचिताविरत्युपपादयिष्यते। अतश्चानन्दमयो जीवादन्यः परं ब्रह्म ॥ १४ ॥

इतश्च जीवादन्य आनन्दमयः परं ब्रह्म—

15 तद्धेतुव्यपदेशाच्च। १। १। १५ ॥

*को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयातीति एष एव जीवानानन्दयतीति जीवानन्दहेतुरयं व्यपदिश्यते। अतश्चानन्दयितव्याज्जीवादानन्दयिताऽयमन्य आनन्दमयः परमात्मेति विज्ञायते। आनन्दमय एवात्र आनन्दशब्देनोच्यत इति चानन्तरमेव वक्ष्यते ॥

इतश्च जीवादन्य आनन्दमयः—

16 मान्त्रवर्णिकमेव च गीयते। १। १। १६ ॥

*सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितं ब्रह्मैवानन्दमयं इति गीयते। तच्च जीवस्वरूपादन्यत् परं ब्रह्म। तथा हि—*ब्रह्मविदाप्नोति परमिति जीवस्य प्राप्यतया ब्रह्म निर्दिष्टम् ॥

*तदेषाऽभ्युक्तेति तत्—ब्रह्म अभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य, ऋगेषा अध्येतृभिरुक्ता। ब्राह्मणोक्तस्यार्थस्य वैशद्यमनेन मन्त्रेण क्रियत इत्यर्थः, जीवस्योपासकस्य प्राप्यं ब्रह्म तस्माद्विलक्षणमेव। अनन्तरं च *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इत्यारभ्योत्तरोत्तरैर्ब्राह्मणैर्मन्त्रैश्च तदेव विशदीक्रियते। अतो जीवादन्य आनन्दमयः ॥ १६ ॥

अत्राह—यद्यप्युपासकात्प्राप्यस्य भेदेन भवितव्यम्; तथापि न वस्त्वन्तरं जीवान्मान्त्रवर्णिकं ब्रह्म; किन्तु तस्यैवोपासकस्य निरस्तसमस्ताविद्यागन्धनिर्विशेषचिन्मात्रैकरसं शुद्धं स्वरूपम्, तदेव *सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रेण विशोध्यते। तदेव च *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सहेति वाङ्मनसागोचरतया निर्विशेषमिति गम्यते। अतस्तदेव मान्त्रवर्णिकमिति तस्मादनतिरिक्त आनन्दमय इति। अत उत्तरं पठति—

17 नेतरोऽनुपपत्तेः। १। १। १७ ॥

परमात्मन इतरो जीवशब्दाभिलप्यो मुक्तावस्थोऽपि न भवति मान्त्रवर्णिकः। कुतः? अनुपपत्तेः। तथाविधस्यात्मनो निरुपाधिकं विपश्चित्त्वं नोपपद्यते। इदमेव हि निरुपाधिकं विपश्चित्त्वं *सोऽकामयत, बहु स्यां प्रजायेयेति सत्यसङ्कल्पत्वप्रदर्शनेन विवरिष्यते। विविधं पश्यच्चित्त्वं हि

Digitization by Arya Samaj Charitable Foundation, Chennai

विपश्चित्त्वम्। पृषोदरादित्वात्पश्यच्छब्दावयवस्य यच्छब्दस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दः। यद्यपि मुक्तस्य विपश्चित्त्वं संभवति; तथाऽपि तस्यैवात्मनस्संसारदशायामविपश्चित्त्वमप्यस्तीति निरुपाधिकं विपश्चित्त्वं नोपपद्यते। निर्विशेषचिन्मात्रतापन्नस्य मुक्तस्य विविधदर्शनाभावात् सुतरां विपश्चित्त्वं न संभवतीति न केनापि प्रमाणेन निर्विशेषं वस्तु प्रतिपाद्यत इति च पूर्वमेवोक्तम्। *यतो वाचो निवर्तन्ते इति च वाक्यं यदि वाङ्मनसयोर्ब्रह्मणो निवृत्तिमभिदधीत; न ततो निर्विशेषतां वस्तुनोऽवगमयितुं शक्नुयात्; अपि तु वाङ्मनसयोस्तत्राप्रमाणतां वदेत्; तथा च सति तस्य तुच्छत्वमेवापद्यते। *ब्रह्मविदाप्नोतीत्यारभ्य ब्रह्मणो विपश्चित्त्वं जगत्कारणत्वं ज्ञानानन्दैकतानतामितरान्प्रत्यानन्दयितृत्वं कामादेव चिदचिदात्मकस्य कृत्स्नस्य स्रष्टृत्वं सृज्यवर्गानुप्रवेशकृततदात्मकत्वं भयाभयहेतुत्वं वाय्वादित्यादीनां प्रशासितृत्वं शतगुणितोत्तरक्रमेण निरतिशयानन्दत्वमन्यच्चानेकं प्रतिपाद्य वाङ्मनसयोः ब्रह्मणि प्रवृत्त्यभावेन निष्प्रमाणकं ब्रह्मेत्युच्यत इति भ्रान्तजल्पितम्। *यतो वाचो निवर्तन्ते इति यच्छब्दनिर्दिष्टमर्थम् *आनन्दं ब्रह्मणो विद्वान् इत्यानन्दशब्देन प्रतिनिर्दिश्य तस्य ब्रह्मसंबन्धित्वं *ब्रह्मण इति व्यतिरेकनिर्देशेन प्रतिपाद्य तदेव वाङ्मनसागोचरं *विद्वानिति तद्वेदनमभिदधद्वाक्यं जरद्गवादिवाक्यवदनर्थकं वाच्यनन्तर्गतं च स्यात्।

अतश्शतगुणितोत्तरक्रमेण ब्रह्मानन्दस्यातिशयेयत्तां वक्तुमुद्यम्य तस्येयत्ताया अभावादेव वाङ्मनसयोस्ततो निवृत्तिः *यतो वाचो निवर्तन्ते इत्युच्यते। एवमियत्तारहितं ब्रह्मण आनन्दं विद्वान् कुतश्चन न बिभेतीत्युच्यते। किञ्च अस्य मान्त्रवर्णिकस्य विपश्चितः *सोऽकामयतेत्यारभ्य वक्ष्यमाणस्वसङ्कल्पावक्लृप्तजगज्जन्मस्थितिजगदन्तरात्मत्वादेर्मुक्तात्मस्वरूपादन्यत्वं सुस्पष्टमेव ॥ १७॥

इतश्चोभयावस्थात्प्रत्यगात्मनोऽन्य आनन्दमयः—

18 भेदव्यपदेशाच्च। १। १। १८ ॥

*तस्माद्वा एतस्मादात्मन आकाशः इत्यारभ्य मान्त्रवर्णिकं ब्रह्म व्यञ्जयद्वाक्यमन्नप्राणमनोभ्य इव जीवादपि तस्य भेदं व्यपदिशति *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः इति। अतो जीवाद्भेदस्य व्यपदेशाच्चायं मान्त्रवर्णिक आनन्दमयोऽन्य एवेति ज्ञायते ॥

इतश्च जीवादन्यः—

19 कामाच्च नानुमानापेक्षा। १। १। १९ ॥

जीवस्याविद्यापरवशस्य जगत्कारणत्वे ह्यवर्जनीया आनुमानिकप्रधानादिशब्दाभिधेयाचिद्वस्तुसंसर्गापेक्षा। तथैव हि चतुर्मुखादीनां कारणत्वम्। इह च *सोऽकामयत, बहु स्यां प्रजायेयेत्यचित्संसर्गरहितस्य स्वकामादेव विचित्रचिदचिद्वस्तुनस्सृष्टिः *इदं सर्वमसृजत, यदिदं किञ्चे-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्याम्नायते । अतोऽस्यानन्दमयस्य जगत्सृजतो नानुमानिकाचिद्वस्तुसंसर्गापेक्षा प्रतीयते । ततश्च जीवादन्य आनन्दमयः ॥ १९ ॥

इतश्च—

20 अस्मिन्नस्य च तद्योगं शास्ति । १ । १ । २० ॥

अस्मिन्-आनन्दमये, अस्य-जीवस्य, तद्योगम्-आनन्दयोगम्, शास्ति शास्त्रम् *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति । रसशब्दाभिधेयानन्दमयलाभादयं जीवशब्दाभिलपनीय आनन्दी भवतीत्युच्यमाने यल्लाभाद्य आनन्दी भवति, स स एवेत्यनुन्मत्तः को ब्रवीतीत्यर्थः ॥

एवमानन्दमयः परं ब्रह्मेति निश्चिते सति *यदेष आकाश आनन्दः *विज्ञानमानन्दं ब्रह्मेत्यादिष्वानन्दशब्देनानन्दमय एव परामृश्यते; यथा विज्ञानशब्देन विज्ञानमयः । अत एव *आनन्दं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशः । अत एव च *आनन्दमयमात्मानमुपसंक्रामतीति फलनिर्देशश्च । उत्तरे चानुवाके पूर्वानुवाकोक्तानामन्नमयादीनाम् *अन्नं ब्रह्मेति व्यजानात् *प्राणो ब्रह्मेति व्यजानात् *मनो ब्रह्मेति व्यजानात् *विज्ञानं ब्रह्मेति व्यजानात् इति प्रतिपादनात् *आनन्दो ब्रह्मेत्यप्यानन्दमयस्यैव प्रतिपादनमिति विज्ञायते; तत एव च तत्रापि *आनन्दमयमात्मानमुपसंक्रम्येत्युपसंहृतम् । अतः प्रधानशब्दाभिलप्यादर्थान्तरभूतस्य परस्य ब्रह्मणो जीवशब्दाभिलपनीयादपि वस्तुनोऽर्थान्तरत्वं सिद्धम् ॥ २० ॥ इति आनन्दमयाधिकरणम् ॥ ६ ॥

अथ अन्तरधिकरणम् ॥ ७ ॥

यद्यपि मन्दपुण्यानां जीवानां कामाज्जगत्सृष्टिरतिशयितानन्दयोगो भयाभयहेतुत्वमित्यादि न संभवति; तथाऽपि विलक्षणपुण्यानामादित्येन्द्रप्रजापतिप्रभृतीनां संभवत्येवेतीमामाशङ्कां निराकरोति—

21 अन्तस्तद्धर्मोपदेशात् । १ । १ । २१ ॥

इदमाम्नायते छान्दोग्ये *य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः, तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद, तस्यर्क्च साम च गेष्णौ इत्यधिदैवतम् *अथाध्यात्मम्...अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्थ्यं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति ॥

तत्र सन्दिह्यते—किमयमक्ष्यादित्यमण्डलान्तर्वर्ती पुरुषः पुण्योपचयनिमित्तैश्वर्य आदित्यादिशब्दाभिलप्यो जीव एव; आहोस्वित्तदतिरिक्तः परमात्मेति । किं युक्तम् ? उपचितपुण्यो जीव एवेति । कुतः ? सशरीरत्वश्रवणात् । शरीरसंबन्धो हि जीवानामेव संभवति । कर्मानुगुणप्रियाप्रिय-

Digitization by Arya Samaj Charitable Foundation, Chennai

योगाय हि शरीरसंबन्धः । अत एव हि कर्मसंबन्धरहितस्य मोक्षस्य प्राप्यत्वमशरीरत्वेनोच्यते *न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः इति । संभवति च पुण्यातिशयात् ज्ञानाधिक्यम्, शक्त्याधिक्यञ्च । अत एव लोककामेशत्वादि तस्यैवोपपद्यते । तत एव चोपास्यत्वम्, फलदायित्वम्, पापक्षपणकरत्वेन मोक्षोपयोगित्वं च । मनुष्येष्वप्युपचितपुण्याः केचित् ज्ञानशक्त्यादिभिरधिकतरा दृश्यन्ते; ततश्च सिद्धगन्धर्वादयः; ततश्च देवाः; ततश्चेन्द्रादयः । अतो ब्रह्मादिष्वन्यतम एवैकैकस्मिन् कल्पे पुण्यविशेषेणैवंभूतमैश्वर्यं प्राप्तो जगत्सृष्ट्याद्यपि करोतीति जगत्कारणत्वजगदन्तरात्मत्वादिवाक्यमस्मिन्नेवोपचितपुण्यविशेषे सर्वज्ञे सर्वशक्तौ वर्तते । अतो न जीवादतिरिक्तः परमात्मा नाम कश्चिदस्ति । एवं च सति *अस्थूलमनण्वह्रस्वमित्यादयो जीवात्मनस्स्वरूपाभिप्राया भवन्ति । मोक्षशास्त्राण्यपि तत्स्वरूपतत्प्राप्त्युपायोपदेशपराणीति ॥

एवं प्राप्तेऽभिधीयते—अन्तस्तद्धर्मोपदेशात्; अन्तरादित्येऽन्तरक्षिणि च यः पुरुषः प्रतीयते, स जीवादन्यः परमात्मैव; कुतः ? तद्धर्मोपदेशात्—जीवेष्वसंभवंस्तदतिरिक्तस्यैव परमात्मनो धर्मोऽयमपहतपाप्मत्वादिः *स एष सर्वेभ्यः पाप्मभ्य उदितः इत्यादिनोपदिश्यते । अपहतपाप्मत्वं हि अपहतकर्मत्वम्; कर्मवश्यतागन्धरहितत्वमित्यर्थः । कर्माधीनसुखदुःखभागित्वेन कर्मवश्या हि जीवाः । अतोऽपहतपाप्मत्वं जीवादन्यस्य परमात्मन एव धर्मः । तत्पूर्वकं स्वरूपोपाधिकं लोककामेशत्वम्, सत्यसङ्कल्पत्वादिकं सर्वभूतान्तरात्मत्वञ्च तस्यैव धर्मः । यथाह *एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः इति; तथा *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति । *सोऽकामयत, बहु स्यां प्रजायेयेतीत्यादिसत्यसङ्कल्पत्वपूर्वकसमस्तचिदचिद्वस्तुसृष्टियोगो निरुपाधिकभयाभयहेतुत्वम्, वाङ्मनसपरिमितिकृतपरिच्छेदरहितानवधिकातिशयानन्दयोग इत्यादयोऽकर्मसंपाद्यास्स्वाभाविका धर्मा जीवस्य न संभवन्ति ॥

यत्तु शरीरसंबन्धान्न जीवातिरिक्त इत्युक्तम्; तदसत्, न हि सशरीरत्वं कर्मवश्यतां साधयति, सत्यसङ्कल्पस्येच्छयाऽपि शरीरसंबन्धसंभवात् । अथोच्येत—शरीरं नाम त्रिगुणात्मकप्रकृतिपरिणामरूपभूतसङ्घातः; तत्संबन्धश्चापहतपाप्मनस्सत्यसङ्कल्पस्य पुरुषस्येच्छया न संभवति, अपुरुषार्थत्वात् । कर्मवश्यस्य तु स्वस्वरूपानभिज्ञस्य कर्मानुगुणफलोपभोगायानिच्छतोऽपि तत्संबन्धोऽवर्जनीय इति । स्यादेतदेवम् यदि गुणत्रयमयः प्राकृतोऽस्य देहस्स्यात्; स तु स्वाभिमतस्स्वानुरूपोऽप्राकृत एवेति सर्वमुपपन्नम् । एतदुक्तं भवति—परस्यैव ब्रह्मणो निखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपतया सकलेतरविलक्षणस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणगणाश्च सन्ति । तद्वदेव स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणगणनिधिदिव्यरूपमपि स्वाभाविकमस्ति । तदेवोपासकानुग्रहेण तत्तत्प्रतिपत्त्यनुरूपसंस्थानं करोत्यपारकारुण्यसौशील्यवात्सल्यौदार्यजलनिधिः निरस्तनिखिलहेयगन्धोऽपहतपाप्मा परमात्मा परं ब्रह्म पुरुषोत्तमो नारायण इति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

*यतो वा इमानि भूतानि जायन्ते *सदेव सोम्येदमग्र आसीत् *आत्मा वा इदमेक एवाग्र आसीत् *एको ह वै नारायण आसीन्न ब्रह्मा नेशानः इत्यादिषु निखिलजगदेककारणतयाऽवगतस्य परस्य ब्रह्मणः *सत्यं ज्ञानमनन्तं ब्रह्म, *विज्ञानमानन्दं ब्रह्म इत्यादिष्वेवंभूतं स्वरूपमित्यवगम्यते । *निर्गुणम् *निरञ्जनम् *अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः *न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ *तमीश्वराणां परमं महेश्वरं तं दैवतानां परमञ्च दैवतम् *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः *सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाऽभिवदन्यदास्ते *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात् *सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि इत्यादिषु परस्य ब्रह्मणः प्राकृतहेयगुणान् प्राकृतहेयदेहसंबन्धं तन्मूलकर्मवश्यतासंबन्धं च प्रतिषिध्य कल्याणगुणान् कल्याणरूपं च वदन्ति । तदिदं स्वाभाविकमेव रूपमुपासकानुग्रहेण तत्प्रतिपत्त्यनुगुणाकारं देवमनुष्यादिसंस्थानं करोति स्वेच्छयैव परमकारुणिको भगवान् । तदिदमाह श्रुतिः— *अजायमानो बहुधा विजायते इति । स्मृतिश्च *अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्, इति । साधवो ह्युपासकाः; तत्परित्राणमेवोद्देश्यम्, आनुषङ्गिकस्तु दुष्कृतां विनाशः, सङ्कल्पमात्रेणापि तदुपपत्तेः । प्रकृतिं स्वामिति प्रकृतिः— स्वभावः । स्वमेव स्वभावमास्थाय, न संसारिणां स्वभावमित्यर्थः । आत्ममाययेति स्वसङ्कल्परूपेण ज्ञानेनेत्यर्थः । *माया वयुनं ज्ञानमिति ज्ञानपर्यायमपि मायाशब्दं नैघण्टुका अधीयते । आह च भगवान् पराशरः— *समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥ समस्तशक्तिरूपाणि तत्करोति जनेश्वर । देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया । जगतामुपकाराय न सा कर्मनिमित्तजा ॥ इति । महाभारते चावताररूपस्याप्यप्राकृतत्वमुच्यते— *न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः इति । अतः परस्यैव ब्रह्मण एवंरूपरूपवत्त्वादयमपि तस्यैव धर्मः । अत आदित्यमण्डलाक्ष्यधिकरणः आदित्यादिजीवव्यतिरिक्तः परमात्मैव ॥ २१ ॥

22 भेदव्यपदेशाच्चान्यः । १ । १ । २२ ॥

आदित्यादिजीवेभ्यो भेदो व्यपदिश्यतेऽस्य परमात्मनः— *य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यश्शरीरं य आदित्यमन्तरो यमयति *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति *योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यमक्षरं न वेद यो मृत्युमन्तरे सञ्चरन्यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति चास्यापहतपाप्मनः परमात्मनस्सर्वान् जीवान् शरीरत्वेन व्यपदिश्य तेषामन्तरात्मत्वेनैनं व्यपदिशति । अतस्सर्वेभ्यो हिरण्यगर्भादिजीवेभ्योऽन्य एव परमात्मेति सिद्धम् ॥ २२ ॥ इति अन्तरधिकरणम् ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ आकाशाधिकरणम् ॥ ८ ॥

*यतो वा इमानि भूतानि जायन्ते इति जगत्कारणं ब्रह्मेत्यवगम्यते। किं तज्जगत्कारणमित्यपेक्षायां *सदेव सोम्येदमग्र आसीत् *तत्तेजोऽसृजत *आत्मा वा इदमेक एवाग्र आसीत् *स इमाल्लोकानसृजत *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इति साधारणैश्शब्दैर्जगत्कारणे निर्दिष्टे ईक्षणविशेषानन्दविशेषरूपविशेषार्थस्वभावात्प्रधानक्षेत्रज्ञादिव्यतिरिक्तं ब्रह्मेत्युक्तम्। इदानीमाकाशादिविशेषशब्दैर्निर्दिश्य जगत्कारणत्वजगदैश्वर्यादिवादेऽप्याकाशादिशब्दाभिधेयतया प्रसिद्धचिदचिद्वस्तुनोऽर्थान्तरमुक्तलक्षणमेव ब्रह्मेति प्रतिपाद्यते *आकाशस्तल्लिङ्गात् इत्यादिना पादशेषेण।

23 आकाशस्तल्लिङ्गात्। १। १। २३॥

इदमाम्नायते छान्दोग्ये—*अस्य लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् *इति। तत्र सन्देहः—किं प्रसिद्धाकाश एवात्राकाशशब्देनाभिधीयते, उतोक्तलक्षणमेव ब्रह्मेति। किं प्राप्तम्? प्रसिद्धाकाश इति। कुतः? शब्दैकसमधिगम्ये वस्तुनि य एवार्थो व्युत्पत्तिसिद्धश्शब्देन प्रतीयते स एव ग्रहीतव्यः। अतः प्रसिद्धाकाश एव चराचरभूतजातस्य कृत्स्नस्य कारणम्। अतस्तस्मादनतिरिक्तं ब्रह्म। नन्वीक्षापूर्वकसृष्ट्यादिभिरचेतनाज्जीवाच्च व्यतिरिक्तं ब्रह्मेत्युक्तम्। सत्यमुक्तम्, अयुक्तं तु तत्। तथा हि *यतो वा इमानि भूतानि जायन्ते......तद्ब्रह्मेत्युक्ते कुत इमानि भूतानि जायन्त इत्यादिविशेषापेक्षायां *सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते इत्यादिना विशेषप्रतीतेः जगज्जन्मादिकारणमाकाश एवेति निश्चिते सति *सदेव सोम्येदमग्र आसीदित्यादिष्वपि सदादिशब्दास्साधारणाकारास्तमेव विशेषमाकाशमभिदधति। *आत्मा वा इदमेक एवाग्र आसीदित्यादिष्वात्मशब्दोऽपि तत्रैव वर्तते। तस्यापि हि चेतनैकान्तत्वं न संभवति; यथा मृदात्मको घट इति। आप्नोतीत्यात्मेति व्युत्पत्त्या सुतरामाकाशेऽप्यात्मशब्दो वर्तते। अत एवमाकाश एव कारणं ब्रह्मेति निश्चिते सतीक्षणादयस्तदनुगुणा गौणा वर्णनीयाः। यदि हि साधारणशब्दैरेव सदादिभिः कारणमभ्यधायिष्यत; ईक्षणाद्यर्थानुरोधेन चेतनविशेष एव कारणमिति निरचेष्यत। आकाशशब्देन तु विशेष एव निश्चित इति नार्थस्वाभाव्यान्निर्णेतव्यमस्ति। ननु *आत्मन आकाशस्संभूतः इत्याकाशस्यापि कार्यत्वं प्रतीयते। सत्यम्। सर्वेषामेवाकाशवाय्वादीनां सूक्ष्मावस्था स्थूलावस्था चेत्यवस्थाद्वयमस्ति। तत्राकाशस्य सूक्ष्मावस्था कारणम्, स्थूलावस्था तु कार्यम्। *आत्मन आकाशस्संभूतः इति स्वस्मादेव सूक्ष्मरूपात्स्वयं स्थूलरूपस्संभूतः इत्यर्थः। *सर्वाणि ह वा इमानि भूतान्याकाशदेव समुत्पद्यन्ते इति सर्वस्य जगत आकाशादेव प्रभवाप्ययादिश्रवणात्तदेव हि कारणं ब्रह्मेति निश्चितम्। यत एवं प्रसिद्धाकाशादनतिरिक्तं ब्रह्म, अत एव च *यदेष आकाश आनन्दो न स्यात् *आकाशो ह वै नामरूपयोर्निर्वहिता इत्येवमादिनिर्देशोऽप्युपपन्नतरः। अतः प्रसिद्धाकाशादनतिरिक्तं ब्रह्मेति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्राप्ते ब्रूमः—आकाशस्तल्लिङ्गात् । आकाशशब्दाभिधेयः प्रसिद्धाकाशादचेतनादर्थान्तरभूतो यथोक्तलक्षणः परमात्मैव । कुतः ? तल्लिङ्गात्—निखिलजगदेककारणत्वम्, सर्वस्माज्ज्यायस्त्वम्, परायणत्वम् इत्यादीनि परमात्मलिङ्गान्युपलभ्यन्ते । निखिलकारणत्वं ह्यचिद्वस्तुनः प्रसिद्धाकाशशब्दाभिधेयस्य नोपपद्यते, चेतनवस्तुनस्तत्कार्यत्वासंभवात् । परायणत्वं च चेतनानां परमप्राप्यत्वम् । तच्चाचेतनस्य हेयस्य सकलपुरुषार्थविरोधिनो न संभवति । सर्वस्माज्ज्यायस्त्वं च निरुपाधिकं सर्वैः कल्याणगुणैस्सर्वेभ्यो निरतिशयोत्कर्षः । तदप्यचितो नोपपद्यते ॥

यदुक्तं जगत्कारणविशेषाकाङ्क्षायामाकाशशब्देन विशेषसमर्पणादन्यत्सर्वं तदनुरूपमेव वर्णनीयमिति, तदयुक्तम्; *सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते इति प्रसिद्धवन्निर्देशात् । प्रसिद्धवन्निर्देशो हि प्रमाणान्तरप्राप्तिमपेक्षते । प्रमाणान्तराणि च *सदेव सोम्येदमग्र आसीदित्येवमादीन्येव वाक्यानि । तानि च यथोदितप्रकारेणैव ब्रह्म प्रतिपादयन्तीति तत्प्रतिपादितं ब्रह्माकाशशब्देन प्रसिद्धवन्निर्दिश्यते । संभवति च परस्य ब्रह्मणः प्रकाशकत्वादाकाशशब्दाभिधेयत्वम्—आकाशते, आकाशयति चेति । किञ्च अनेनाकाशशब्देन विशेषसमर्पणक्षमेणापि चेतनांशं प्रत्यसंभावितकारणभावमचेतनविशेषमभिदधानेन *तदैक्षत बहु स्यां प्रजायेय *सोऽकामयत, बहु स्यां प्रजायेयेत्यादिवाक्यशेषावधारितसार्वज्ञ्यसत्यसङ्कल्पत्वादिविशिष्टापूर्वार्थप्रतिपादनसमर्थवाक्यार्थान्यथाकरणं न प्रमाणपदवीमधिरोहति । एवमपूर्वानन्तविशेषणविशिष्टापूर्वार्थप्रतिपादनसमर्थानेकवाक्यगतिसामान्यं चैकेनानुवादस्वरूपेणान्यथाकर्तुं न शक्यते ।

यत्त्वात्मशब्दश्चेतनैकान्तो न भवति, मृदात्मको घट इत्यादिदर्शनादित्युक्तम्; तत्रोच्यते—यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयुज्यते; तथाऽपि शरीरप्रतिसंबन्धिन्यात्मशब्दस्य प्रयोगप्राचुर्यात् *आत्मा वा इदमेक एवाग्र आसीत् *आत्मन आकाशस्संभूतः इत्यादिषु शरीरप्रतिसंबन्धिचेतन एव प्रतीयते । यथा गोशब्दस्यानेकार्थवाचित्वेऽपि प्रयोगप्राचुर्यात्सास्नादिमानेव स्वतः प्रतीयते; अर्थान्तरप्रतीतिस्तु तत्तदसाधारणनिर्देशापेक्षा; तथा स्वतः प्राप्तं शरीरप्रतिसंबन्धिचेतनाभिधानमेव *स ईक्षत लोकान्नु सृजा इति *सोऽकामयत, बहु स्यां प्रजायेयेत्यादितत्तद्वाक्यविशेषा एव स्थिरीकुर्वन्ति । एवं वाक्यशेषावधारितानन्यसाधारणानेकापूर्वार्थविशिष्टं निखिलजगदेककारणं *सदेव सोम्येत्यादिवाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत् *सर्वाणि ह वा इमानि भूतानीत्यादिवाक्येन निर्दिश्यत इति सिद्धम् ॥ २३ ॥ इति आकाशाधिकरणम् ॥ ८ ॥

अथ प्राणाधिकरणम् ॥ ९ ॥

24 अत एव प्राणः । १ । १ । २४ ॥

इदमाम्नायते छान्दोग्ये—*प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता इति प्रस्तुत्य *कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते

Digitization by Arya Samaj Charitable Foundation, Chennai

सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते व्यपतिष्यत् इति। अत्र प्राणशब्दोऽप्याकाशशब्दवत्प्रसिद्धप्राणव्यतिरिक्ते परस्मिन्नेव ब्रह्मणि वर्तते, तदसाधारणनिखिलजगत्प्रवेशनिष्क्रमणादिलिङ्गात्प्रसिद्धवन्निर्दिष्टात्। अधिकाशङ्का तु—कृत्स्नस्य भूतजातस्य प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात् प्रसिद्ध एव प्राणो जगत्कारणतया निर्देशमर्हतीति। परिहारस्तु—शिलाकाष्ठादिषु चेतनस्वरूपे च तदभावात् *सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते इति नोपपद्यत इति। अतः प्राणयति सर्वाणि भूतानीति कृत्वा परं ब्रह्मैव प्राणशब्देनाभिधीयते। अतः प्रसिद्धाकाशप्राणादेरन्यदेव निखिलजगदेककारणमपहतपाप्मत्वसार्वज्ञ्यसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणगणं परं ब्रह्मैवाकाशप्राणादिशब्दाभिधयमिति सिद्धम् ॥ २४॥ इति प्राणाधिकरणम् ॥ ९ ॥

अथ ज्योतिरधिकरणम् ॥ १० ॥

अतः परं जगत्कारणत्वव्याप्तेन येन केनापि निरतिशयोत्कृष्टगुणेन जुष्टं ज्योतिरिन्द्रादिशब्दैरर्थान्तरप्रसिद्धैरप्यभिधीयमानं परं ब्रह्मैवेत्यभिधीयते *ज्योतिश्चरणाभिधानात् इत्यादिना।

25 ज्योतिश्चरणाभिधानात्। १। १। २५॥

इदमाम्नायते छान्दोग्ये *अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः *इति। तत्र संशयः—किमयं ज्योतिश्शब्देन निर्दिष्टो निरतिशयदीप्तियुक्तोऽर्थः प्रसिद्धमादित्यादिज्योतिरेव कारणभूतं ब्रह्म, उत समस्तचिदचिद्वस्तुजातविसजातीयः परमकारणभूतोऽमितभास्सर्वज्ञस्सत्यसङ्कल्पः पुरुषोत्तम इति। किं युक्तम्? प्रसिद्धमेव ज्योतिरिति। कुतः? प्रसिद्धवन्निर्देशेऽप्याकाशप्राणादिवत् स्ववाक्योपात्तपरमात्मव्याप्तलिङ्गविशेषादर्शनात्, परमपुरुषप्रत्यभिज्ञानासंभवात्, कौक्षेयज्योतिषैक्योपदेशाच्च प्रसिद्धमेव ज्योतिः कारणत्वव्याप्तनिरतिशयदीप्तियोगाज्जगत्कारणं ब्रह्मेति॥

एवं प्राप्ते प्रचक्ष्महे—ज्योतिश्चरणाभिधानात्। द्युसंबन्धितया निर्दिष्टं निरतिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव। कुतः? *पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्यस्यैव द्युसंबन्धिनश्चरणत्वेन सर्वभूताभिधानात्। एतदुक्तं भवति—यद्यपि *अथ यदतः परो दिवो ज्योतिरित्यस्मिन्वाक्ये परमपुरुषासाधारणलिङ्गं नोपलभ्यते; तथाऽपि पूर्ववाक्ये द्युसंबन्धितया परमपुरुषस्य निर्देशादिदमपि द्युसंबन्धिज्योतिस्स एवेति प्रत्यभिज्ञायत इति। कौक्षेयज्योतिषैक्योपदेशश्च फलाय तदात्मकत्वानुसन्धानविधिरिति न कश्चिद्दोषः। कौक्षेयज्योतिषश्च तदात्मकत्वं भगवता स्वयमेवोक्तम्—*अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः इति॥ २५॥

26 छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणानिगमात्तथाहि दर्शनम्। १। १। २६॥

पूर्वस्मिन्वाक्ये *गायत्री वा इदं सर्वमिति गायत्र्याख्यं छन्दोऽभिधाय *तदेतदृचाऽ-

Digitization by Arya Samaj Charitable Foundation, Chennai

भ्यनूक्तमित्युदाहृतायाः *तावानस्य महिमेत्यस्या ऋचोऽपि छन्दोविषयत्वान्नात्र परमपुरुषाभिधानमिति चेत्; तन्न, तथा चेतोऽर्पणनिगमात्—न गायत्रीशब्देन छन्दोमात्रमिहाभिधीयते, छन्दोमात्रस्य सर्वात्मकत्वानुपपत्तेः; अपि तु ब्रह्मण एव गायत्रीचेतोऽर्पणमिह निगम्यते। ब्रह्माणि गायत्रीसादृश्यानुसन्धानं फलायोपदिश्यत इत्यर्थः। संभवति च *पादोऽस्य सर्वाभूतानि, त्रिपादस्यामृतं दिवीति चतुष्पदो ब्रह्मणश्चतुष्पदया गायत्र्या च सादृश्यम्। चतुष्पदा च गायत्री क्वचिद्दृश्यते। तद्यथा *इन्द्रश्शचीपतिः, बलेन पीडितः, दुश्च्यवनो वृषा, समित्सुसासहिः* इति। तथा ह्यन्यत्रापि सादृश्याच्छन्दोऽभिधायी शब्दोऽर्थान्तरे प्रयुज्यमानो दृश्यते। यथा संवर्गविद्यायाम् *ते वा एते पञ्चान्ये पञ्चान्ये दश संपद्यन्ते इत्यारभ्य *सैषा विराडन्नात् इत्युच्यते॥ २६॥

इतश्च गायत्रीशब्देन ब्रह्मैवाभिधीयते—

27 भूतादिपादव्यपदेशोपपत्तेश्चैवम्। १। १। २७॥

भूतपृथिवीशरीरहृदयानि निर्दिश्य *सैषा चतुष्पदेति व्यपदेशो ब्रह्मण्येव गायत्रीशब्दाभिधेय उपपद्यते॥ २७॥

28 उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्। १। १। २८॥

पूर्ववाक्ये *त्रिपादस्यामृतं दिवीति दिवोऽधिकरणत्वेन निर्देशादिह च दिवः परइत्यवधित्वेन निर्देशादुपदेशस्य भिन्नरूपत्वेन पूर्ववाक्योक्तं ब्रह्म परस्मिन्न प्रत्यभिज्ञायत इति चेत्; तन्न, उभयस्मिन्नप्युपदेशे अर्थस्वभावैक्येन प्रत्यभिज्ञाया अविरोधात्; यथा वृक्षाग्रे श्येनो वृक्षाग्रात्परतश्श्येन इति। तस्मात्परमपुरुष एव निरतिशयतेजस्को दिवः परो ज्योतिर्दीप्यत इति प्रतिपाद्यते। *एतावानस्य महिमा, अतो ज्यायाश्च पुरुषः, पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवीति प्रतिपादितस्य चतुष्पदः परमपुरुषस्य *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसस्तु पारे इत्यभिहिताप्राकृतरूपस्य तेजोऽप्यप्राकृतमिति तद्वत्तया स एव ज्योतिश्शब्दाभिधेय इति निरवद्यम्॥ इति ज्योतिरधिकरणम्॥ १०॥

अथ इन्द्रप्राणाधिकरणम्॥ ११॥

निरतिशयदीप्तियुक्तं ज्योतिश्शब्दाभिधेयं प्रसिद्धवन्निर्दिष्टं परमपुरुष एवेत्युक्तम्। इदानीं कारणत्वव्याप्तामृतत्वप्राप्त्युपायतयोपास्यत्वेन श्रुत इन्द्रप्राणादिशब्दाभिधेयोऽपि परमपुरुष एवेत्याह—

29 प्राणस्तथाऽनुगमात्। १। १। २९॥

कौषीतकीब्राह्मणे प्रतर्दनविद्यायां *प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम

Digitization by Arya Samaj Charitable Foundation, Chennai

युद्धेन च पौरुषेण चेत्यारभ्य *वरं वृणीष्वेति वक्तारमिन्द्रं प्रति *त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति प्रतर्दनेनोक्ते, *स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति श्रूयते । तत्र संशयः— किमयं हिततमोपासनकर्मतयेन्द्रप्राणशब्दनिर्दिष्टो जीव एव; उत तदतिरिक्तः परमात्मेति । किं युक्तम् ? जीव एवेति । कुतः ? इन्द्रशब्दस्य जीवविशेष एव प्रसिद्धेः, तत्समानाधिकरणस्य प्राणशब्दस्यापि तत्रैव वृत्तेः । अयमिन्द्राभिधानो जीवः प्रतर्दनेन *त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इत्युक्तः *मामुपास्स्वेति स्वात्मोपासनं हिततममुपदिदेश । हिततमश्चामृतत्वप्राप्त्युपाय एव । जगत्कारणोपासनस्यैवामृतत्वप्राप्तिहेतुता *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इत्यवगता । अतः प्रसिद्धजीवभाव इन्द्र एव कारणं ब्रह्म । इत्याशङ्कायामभिधीयते—प्राणस्तथाऽनुगमादिति । अयमिन्द्रप्राणशब्दनिर्दिष्टो न जीवमात्रम्; अपि तु जीवादर्थान्तरभूतं परं ब्रह्म । *स एष प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृतः इतीन्द्रप्राणशब्दाभ्यां प्रस्तुतस्यानन्दाजरामृतशब्दसामानाधिकरण्येनानुगमो हि तथा सत्येवोपपद्यते ॥ २९ ॥

30 न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् । १ । १ । ३० ॥

यदुक्तमिन्द्रप्राणशब्दनिर्दिष्टस्य *आनन्दोऽजरोऽमृतः इत्यनेनैकार्थ्यादयं परं ब्रह्मेति, तन्नोपपद्यते; *मामेव विजानीहि *प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति वक्ता हीन्द्रः *त्रिशीर्षाणं त्वाष्ट्रमहनम् इत्येवमादिना त्वाष्ट्रवधादिभिः प्रज्ञातजीवभावस्य स्वात्मन एवोपास्यतां प्रतर्दनायोपदिशति । अत उपक्रमे जीवविशेष इत्यवगते सति *आनन्दोऽजरोऽमृतः इत्यादिभिरुपसंहारस्तदनुगुण एव वर्णनीय इति चेत्; परिहरति—अध्यात्मसंबन्धभूमा ह्यस्मिन्—आत्मनि यस्संबन्धस्सोऽध्यात्मसंबन्धः । तस्य भूमा-भूयस्त्वम्,—बहुत्वमित्यर्थः । आत्मन्याधेयतया संबध्यमानानां बहुत्वेन संबन्धबहुत्वम् । तच्चास्मिन्वक्तरि परमात्मन्येव हि संभवति । *तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पितास्स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः इति भूतमात्राशब्देनाचेतनवस्तुजातमभिधाय प्रज्ञामात्राशब्देन तदाधारतया चेतनवर्गं चाभिधाय तस्याप्याधारतया प्रकृतमिन्द्रप्राणशब्दाभिधेयं निर्दिश्य तमेव *आनन्दोऽजरोऽमृतः इत्युपदिशति । तदेतच्चेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वं जीवादर्थान्तरभूतेऽस्मिन् परमात्मन्येवोपपद्यत इत्यर्थः ॥

अथवा, अध्यात्मसंबन्धभूमा ह्यस्मिन्—परमात्मासाधारणधर्मसंबन्धोऽध्यात्मसंबन्धः । तस्य भूमा—बहुत्वं हि अस्मिन् प्रकरणे विद्यते । तथाहि—प्रथमं *त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति, *मामुपास्स्वेति च परमात्मासाधारणमोक्षसाधानोपासनकर्मत्वं प्राणशब्दनिर्दिष्टस्येन्द्रस्य प्रतीयते । तथा *एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषतीति सर्वस्य कर्मणः कारयितृत्वं च परमात्मधर्मः । तथा *तद्यथा

Digitization by Arya Samaj Charitable Foundation, Chennai

रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः इति सर्वाधारत्वं च तस्यैव धर्मः । तथा *स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽऽजरोऽमृतः इत्येतेऽपि परमात्मन एव धर्माः । *एष लोकाधिपतिरेष सर्वेशः इति च परमात्मन्येव संभवति । तदेवमध्यात्मसंबन्धभूम्नोऽत्र विद्यमानत्वात्परमात्मैवात्रेन्द्रप्राणशब्दनिर्दिष्टः ॥ ३० ॥

कथं तर्हि प्रज्ञातजीवभावस्येन्द्रस्य स्वात्मन उपास्यत्वोपदेशस्संगच्छते; तत्राह—

31 शास्त्रदृष्ट्या तूपदेशो वामदेववत् । १ । १ । ३१ ॥

प्रज्ञातजीवभावेनेन्द्रेण *मामेव विजानीहि *मामुपास्स्वेत्युपास्यस्य ब्रह्मणस्स्वात्मत्वेनोपदेशोऽयं न प्रमाणान्तरप्राप्तस्वात्मावलोकनकृतः, अपितु शास्त्रेण स्वात्मदृष्टिकृतः । एतदुक्तं भवति—*अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि *ऐतदात्म्यमिदं सर्वम् *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति *एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः इत्येवमादिना शास्त्रेण जीवात्मशरीरकं परमात्मानमवगम्य जीवात्मवाचिनामहंत्वमादिशब्दानामपि परमात्मन्येव पर्यवसानं ज्ञात्वा *मामेव विजानीहि, *मामुपास्स्वेति स्वात्मशरीरकं परमात्मानमेवोपास्यत्वेनोपदिदेशेति । वामदेववत्—यथा वामदेवः परस्य ब्रह्मणः सर्वान्तरात्मत्वं सर्वस्य च तच्छरीरत्वं शरीरवाचिनां च शब्दानां शरीरिणि पर्यवसानं पश्यन् अहमिति स्वात्मशरीरकं परं ब्रह्म निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्यादीन् व्यपदिशति *तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र, इत्यादिना । यथा च प्रह्लादः *सर्वगत्वादनन्तस्य स एवाहमवस्थितः । मत्तस्सर्वमहं सर्वं मयि सर्वं सनातने ॥ इत्यादि वदति ॥ ३१ ॥

अस्मिन् प्रकरणे जीववाचिभिश्शब्दैरचिद्विशेषाभिधायिभिश्चोपास्यभूतस्य परस्य ब्रह्मणोऽभिधाने कारणं चोद्यपूर्वकमाह—

32 जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् । १ । १ । ३२ ॥

*न वाचं विजिज्ञासीत वक्तारं विद्यात् *त्रिशीर्षाणं त्वाष्ट्रमहनम् अरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छम्, इत्यादिजीवलिङ्गात्, *यावदस्मिन् शरीरे प्राणो वसति तावदायुः *अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति इति मुख्यप्राणलिङ्गाच्च नाध्यात्मसंबन्धभूमेति चेन्न, उपासात्रैविध्यात् हेतोः । उपासनात्रैविध्यमुपदेष्टुं तत्तच्छब्देनाभिधानम्—निखिलकारणभूतस्य ब्रह्मणस्स्वरूपेणानुसन्धानम्, भोक्तृवर्गशरीरकत्वानुसन्धानम्, भोग्यभोगोपकरणशरीरकत्वानुसन्धानं चेति त्रिविधमनुसन्धानमुपदेष्टुमित्यर्थः । तदिदं त्रिविधं ब्रह्मानुसन्धानं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकरणान्तरेष्वप्याश्रितम्—*सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्मेत्यादिषु स्वरूपानुसन्धानम्; *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, निरुक्तं चानिरुक्तं च, निलयनं चानिलयनं च, विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवत् *इत्यादिषु भोक्तृशरीरतया, भोग्यभोगोपकरणशरीरतया चानुसन्धानम्। इहापि प्रकरणे तत्रिविधमनुसन्धानं युज्यत एवेत्यर्थः॥

एतदुक्तं भवति—यत्र हिरण्यगर्भादिजीवविशेषाणां प्रकृत्याद्यचेतनविशेषाणां च परमात्मासाधारणधर्मयोगः तदभिधायिनां शब्दानां परमात्मवाचिशब्दैस्सामानाधिकरण्यं वा दृश्यते, तत्र परमात्मनस्तत्तच्चिदचिद्विशेषान्तरात्मत्वानुसन्धानं प्रतिपिपादयिषितमिति। अतोऽत्रेन्द्रप्राणशब्दनिर्दिष्टो जीवादर्थान्तरभूतः परमात्मैवेति सिद्धम्॥ ३२॥ इति इन्द्रप्राणाधिकरणम्॥ ११॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः॥ १॥

श्रीमते रामानुजाय नमः।

(प्रथमाध्याये–द्वितीयः पादः सर्वत्र प्रसिद्ध्यधिकरणम्॥ १॥)

प्रथमे पादे अधीतवेदः पुरुषः कर्ममीमांसाश्रवणाधिगतकर्मयाथात्म्यविज्ञानः कवलकर्मणामल्पास्थिरफलत्वमवगम्य, वेदान्तवाक्येषु चापातप्रतीतानन्तस्थिरफलब्रह्मस्वरूपतदुपासनसमुपजातपरमपुरुषार्थलक्षणमोक्षापेक्षोऽवधारितपरिनिष्पन्नवस्तुबोधनशब्दशक्तिः वेदान्तवाक्यानां परस्मिन् ब्रह्मणि निश्चितप्रमाणभावस्तदितिकर्तव्यतारूपशारीरकमीमांसाश्रवणमारभेतेत्युक्तं शास्त्रारम्भसिद्धये॥ (जिज्ञासा. १)

अनन्तविचित्रस्थिरत्रसरूपभोक्तृभोग्यभोगोपकरणभोगस्थानलक्षणनिखिलजगदुदयविभवलयमहानन्दैककारणं परं ब्रह्म *यतो वा इमानीत्यादिवाक्यं बोधयतीति च प्रत्यपादि॥ (जन्माद्य. २)

जगदेककारणं परं ब्रह्म सकलेतरप्रमाणाविषयतया शास्त्रैकप्रमाणकमित्यभ्यधाम॥ (शास्त्र. ३)

शास्त्रप्रमाणकत्वं च ब्रह्मणः प्रवृत्तिनिवृत्त्यन्वयविरहेऽपि स्वरूपेणैव परमपुरुषार्थभूते परस्मिन् ब्रह्मणि वेदान्तवाक्यानां समन्वयान्निरुह्यत इत्यब्रूम॥ (समन्व. ४)

निखिलजगदेककारणतया वेदान्तवेद्यं ब्रह्म च ईक्षणाद्यन्वयादानुमानिकप्रधानादर्थान्तरभूतश्चेतनविशेष एवेत्युपापीपदाम॥ (ईक्षत्य. ५)

स च स्वाभाविकानवधिकातिशयानन्दविपश्चित्त्वनिखिलचेतनभयाभयहेतुत्वसत्यसङ्कल्पत्वसमस्तचेतनाचेतनान्तरात्मत्वादिभिर्बद्धमुक्तोभयावस्थाज्जीवशब्दाभिलपनीयाच्चार्थान्तरभूत इति च समार्थिथामहि॥ (आनन्द. ६)

स चाप्राकृताकर्मनिमित्तस्वासाधारणदिव्यरूप इत्युदैरिराम॥ (अन्तर. ७)

Digitization by Arya Samaj Charitable Foundation, Chennai

आकाशप्राणाद्यचेतनविशेषाभिधायिभिर्जगत्कारणतया प्रसिद्धवन्निर्दिश्यमानस्सकलेतरचेतनाचेतनविलक्षणस्स एवेति समगरिष्महि ॥ (आकाशा. ८. प्राणा. ९)

परतत्त्वासाधारणनिरतिशयदीप्तियुक्तज्योतिश्शब्दाभिधेयो द्युसंबन्धितया प्रत्यभिज्ञानात्स एवेत्यातिष्ठामहि ॥ (ज्योति. १०)

परमकारणासाधारणामृतत्वप्राप्तिहेतुभूतः परमपुरुष एव शास्त्रदृष्टेन्द्रादिशब्दैरभिधीयत इत्यब्रूमहि ॥ (इन्द्र प्राणा. ११)

तदेवमतिपतितसकलेतरप्रमाणसंभावनाभूमिस्सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरतया स्वेतरसमस्तवस्तुविलक्षणः परं ब्रह्म पुरुषोत्तमो नारायण एव वेदान्तवेद्य इत्युक्तम् ॥

अतः परं द्वितीयतृतीयचतुर्थेषु पादेषु, यद्यपि वेदान्तवेद्यं ब्रह्मैव, तथापि कानिचिद्वेदान्तवाक्यानि प्रधानक्षेत्रज्ञान्तर्भूतवस्तुविशेषस्वरूपप्रतिपादनपराण्येवेत्याशङ्क्य तन्निरसनमुखेन तत्तद्वाक्योदितकल्याणगुणाकरत्वं ब्रह्मणः प्रतिपाद्यते ॥

तत्रास्पष्टजीवादिलिङ्गकानि वाक्यानि द्वितीये पादे विचार्यन्ते; स्पष्टलिङ्गकानि तृतीये; तत्तत्प्रतिपादनच्छायानुसारीणि चतुर्थे ॥

33 सर्वत्र प्रसिद्धोपदेशात् । १ । २ । १ ॥

इदमाम्नायते छान्दोग्ये *अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः *इत्यादि। अत्र *स क्रतुं कुर्वीतेति प्रतिपादितस्योपासनस्योपास्यः *मनोमयः प्राणशरीरः इति निर्दिश्यत इति प्रतीयते । तत्र संशयः—किं मनोमयत्वादिगुणकः क्षेत्रज्ञः; उत परमात्मेति । किं युक्तम् ? क्षेत्रज्ञ इति । कुतः ? मनःप्राणयोः क्षेत्रज्ञोपकरणत्वात्, परमात्मनस्तु *अप्राणो ह्यमनाः इति तत्प्रतिषेधाच्च । न च *सर्वं खल्विदं ब्रह्मेति पूर्वनिर्दिष्टं ब्रह्मात्रोपास्यतया संबद्धुं शक्यते, *शान्त उपासीतेत्युपासनोपकरणशान्तिनिर्वृत्त्युपायभूतब्रह्मात्मकत्वोपदेशायोपात्तत्वात् । न च *स क्रतुं कुर्वीतेत्युपासनस्योपास्यसाकाङ्क्षत्वाद्वाक्यान्तरस्थमपि ब्रह्म संबध्यत इति युक्तं वक्तुम्; स्ववाक्योपात्तेन मनोमयत्वादिगुणकेन निराकाङ्क्षत्वात्; *मनोमयः प्राणशरीरः इत्यनन्यार्थतया निर्दिष्टस्य विभक्तिविपरिणाममात्रेणोभयाकाङ्क्षानिवृत्तिसिद्धेः । एवं निश्चिते जीवत्वे *एतद्ब्रह्मेत्युपसंहारस्थब्रह्मपदमपि जीव एव पूजार्थं प्रयुक्तमित्यध्यवसीयत इति ॥

एवं प्राप्ते ब्रूमः—सर्वत्र प्रसिद्धोपदेशात् । मनोमयत्वादिगुणकः परमात्मा। कुतः ? सर्वत्र—वेदान्तेषु परस्मिन्नेव ब्रह्मणि प्रसिद्धस्य मनोमयत्वादेरुपदेशात् । प्रसिद्धं हि मनोमयत्वादि ब्रह्मणः। यथा—*मनोमयः प्राणशरीरनेता *स एषोऽन्तर्हृदय आकाशः, तस्मिन्नयं पुरुषो मनोमयः, अमृतो

Digitization by Arya Samaj Charitable Foundation, Chennai

हिरण्मयः *हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति *न चक्षुषा गृह्यते नापि वाचा *मनसा तु विशुद्धेन, तथा *प्राणस्य प्राणः *अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति *सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते इत्यादिषु। मनोमयत्वं–विशुद्धेन मनसा ग्राह्यत्वम्। प्राणशरीरत्वं–प्राणस्याप्याधारत्वं नियन्तृत्वं च। एवं च सति *एष म आत्माऽन्तर्हृदय एतद्ब्रह्मेति ब्रह्मशब्दोऽपि मुख्य एव भवति। *अप्राणो ह्यमनाः इति मनआयत्तं ज्ञानं प्राणायत्तां स्थितिं च ब्रह्मणो निषेधति॥

अथवा *सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यत्रैवोपासनं विधीयते–सर्वात्मकं ब्रह्म शान्तस्सन्नुपासीतेति। *स क्रतुं कुर्वीतेति तस्यैव गुणोपादानार्थोऽनुवादः। उपादेयाश्च गुणा मनोमयत्वादयः; अतस्सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमुपासीतेति वाक्यार्थः। तत्र सन्देहः–किमिह ब्रह्मशब्देन प्रत्यगात्मा निर्दिश्यते; उत परमात्मेति। किं युक्तम्? प्रत्यगात्मेति। कुतः? तस्यैव सर्वपदसामानाधिकरण्यनिर्देशोपपत्तेः। सर्वशब्दनिर्दिष्टं हि ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत्। ब्रह्मादिभावश्च प्रत्यगात्मनोऽनाद्यविद्यामूलकर्मविशेषोपाधिको विद्यत एव। परस्य तु ब्रह्मणस्सर्वज्ञस्य सर्वशक्तेरपहतपाप्मनो निरस्तसमस्ताविद्यादिदोषगन्धस्य समस्तहेयाकरसर्वभावो नोपपद्यते। प्रत्यगात्मन्यपि क्वचित्क्वचिद्ब्रह्मशब्दः प्रयुज्यते। अत एव परमात्मा परं ब्रह्मेति परमेश्वरस्य क्वचित्सविशेषणो निर्देशः। प्रत्यगात्मनश्च निर्मुक्तोपाधेर्बृहत्त्वं च विद्यते *स चानन्त्याय कल्पते इति श्रुतेः। अविदुषस्तस्यैव कर्मनिमित्तत्वाज्जन्मस्थितिलयानां तज्जलानिति हेतुनिर्देशोऽप्युपपद्यते। तदयमर्थः–अयं जीवात्मा स्वतोऽपरिच्छिन्नस्वरूपत्वेन ब्रह्मभूतस्सन्ननाद्यविद्यया देवतिर्यङ्मनुष्यस्थावरात्मनाऽवतिष्ठते–इति॥

अत्र प्रतिविधीयते–सर्वत्र प्रसिद्धोपदेशात्। सर्वत्र– *सर्वं खल्विदम् इति निर्दिष्टे सर्वस्मिन् जगति ब्रह्मशब्देन तदात्मतया विधीयमानं परं ब्रह्मैव– न प्रत्यगात्मा। कुतः? प्रसिद्धोपदेशात्, *तज्जलानिति हेतुतः सर्वं खल्विदं ब्रह्मेति प्रसिद्धवदुपदेशात्। ब्रह्मणो जातत्वाद्ब्रह्मणि लीनत्वाद्ब्रह्माधीनजीवनत्वाच्च हेतोर्ब्रह्मात्मकं सर्वं खल्विदं जगदित्युक्ते यस्माज्जगज्जन्मस्थितिलया वेदान्तेषु प्रसिद्धास्तदेवात्र ब्रह्मेति प्रतीयते। तच्च परमेव ब्रह्म। तथाहि *यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेत्युपक्रम्य *आनन्दो ब्रह्मेति व्यजानात्, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते इत्यादिना पूर्वानुवाकप्रतिपादितानवधिकातिशयानन्दयोगिनो विपश्चितः परस्माद्ब्रह्मण एव जगदुत्पत्तिस्थितिलया निर्दिश्यन्ते। तथा *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः इति करणाधिपस्य जीवस्याधिपः परं ब्रह्मैव कारणं व्यपदिश्यते। एवं सर्वत्र परस्यैव ब्रह्मणः कारणत्वं प्रसिद्धम्। अतः परब्रह्मणो जातत्वात्तस्मिन् प्रलीनत्वात्तेन प्राणनाच्चतदात्मकतया तादात्म्यमुपपन्नम्। अतस्सर्वप्रकारं सर्वशरीरं सर्वात्मभूतं परं ब्रह्म शान्तो भूत्वोपासीतेति श्रुतिरेव परस्य ब्रह्मणस्सर्वात्मकत्वमुपपाद्य तस्योपासन-

Digitization by Arya Samaj Charitable Foundation, Chennai

मुपदिशति । परं ब्रह्म हि कारणावस्थं कार्यावस्थं सूक्ष्मस्थूलचिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतम् । एवंभूततादात्म्यस्य प्रतिपादने परस्य ब्रह्मणस्सकलहेयप्रत्यनीककल्याणगुणाकरत्वं न विरुध्यते, प्रकारभूतशरीरगतानां दोषाणां प्रकारिण्यात्मन्यप्रसङ्गात्; प्रत्युत निरतिशयैश्वर्यापादनेन गुणायैव भवतीति पूर्वमेवोक्तम् ।

यदुक्तं जीवस्य सर्वतादात्म्यमुपपद्यत इति; तदसत्, जीवानां प्रतिशरीरं भिन्नानामन्योन्यतादात्म्यासंभवात् । मुक्तस्याप्यनवच्छिन्नस्वरूपस्यापि जगत्तादात्म्यं जगज्जन्मस्थितिप्रलयकारणत्वनिमित्तं न संभवतीति *जगद्व्यापारवर्जम् इत्यत्र वक्ष्यते । जीवकर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानां स एव कारणमित्यपि न साधीयः, तत्कर्मनिमित्तत्वेऽपीश्वरस्यैव जगत्कारणत्वात् । अतः परमात्मैवात्र ब्रह्मशब्दाभिधेयः । इममेव सूत्रार्थमभियुक्ता बहुमन्वते । यथाह वृत्तिकारः *सर्वं खल्विति सर्वात्मा ब्रह्मेशः इति ॥ १ ॥

34 विवक्षितगुणोपपत्तेश्च । १ । २ । २ ॥

वक्ष्यमाणाश्च गुणाः परमात्मन्येवोपपद्यन्ते *मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः इति । मनोमयः—परिशुद्धेन मनसैकेन ग्राह्यः; विवेकविमोकादिसाधनसप्तकानुगृहीतपरमात्मोपासननिर्मलीकृतेन हि मनसा गृह्यते । अनेन हेयप्रत्यनीककल्याणैकतानतया सकलेतरविलक्षणस्वरूपतोच्यते; मलिनमनोभिर्मलिनानामेव ग्राह्यत्वात् । प्राणशरीरः—जगति सर्वेषां प्राणानां धारकः; प्राणो यस्य शरीरम्—आधेयं विधेयं शेषभूतं च स प्राणशरीरः । आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तमित्युपपादयिष्यते । भारूपः—भास्वररूपः; अप्राकृतस्वासाधारणनिरतिशयकल्याणदिव्यरूपत्वेन निरतिशयदीप्तियुक्त इत्यर्थः । सत्यसङ्कल्पः—अप्रतिहतसङ्कल्पः । आकाशात्मा—आकाशवत्सूक्ष्मस्वच्छस्वरूपः । सकलेतरकारणभूतस्याकाशस्याप्यात्मभूत इति वा आकाशात्मा । स्वयं च प्रकाशते अन्यानपि प्रकाशयतीति वा आकाशात्मा । सर्वकर्मा—क्रियत इति कर्म; सर्वं जगद्यस्य कर्म असौ सर्वकर्मा; सर्वा वा क्रिया यस्यासौ सर्वकर्मा । सर्वकामः—काम्यन्त इति कामाः भोग्यभोगोपकरणादयः; ते परिशुद्धाः सर्वविधास्तस्य सन्तीत्यर्थः । सर्वगन्धः सर्वरसः— *अशब्दमस्पर्शमित्यादिना प्राकृतगन्धरसादिनिषेधादप्राकृताः स्वासाधारणा निरवद्या निरतिशयाः कल्याणाः स्वभोग्यभूतास्सर्वविधा गन्धरसास्तस्य सन्तीत्यर्थः । सर्वमिदमभ्यात्तः—उक्तं रसपर्यन्तं सर्वमिदं कल्याणगुणजातं स्वीकृतवान् । अभ्यात्तः इति भुक्ता ब्राह्मणा इतिवत्कर्तरि क्तः प्रतिपत्तव्यः । अवाकी—वाकः उक्तिः; सोऽस्य नास्तीत्यवाकी । कुत इत्याह—अनादर इति । अवाप्तसमस्तकामत्वेनादर्तव्याभावादादररहितः । अत एव अवाकी—अजल्पाकः; परिपूर्णैश्वर्यत्वाद्ब्रह्मादिस्तम्बपर्यन्तं निखिलं जगत्तृणीकृत्य जोषमासीन इत्यर्थः । त एते विवक्षिता गुणाः परमात्मन्येवोपपद्यन्ते ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

35 अनुपपत्तेस्तु न शारीरः । १ । २ । ३ ॥

तमिमं गुणसागरं पर्यालोचयतां खद्योतकल्पस्य शरीरसंबन्धनिबन्धनापरिमितदुःखसंबन्धयोग्यस्य बद्धमुक्तावस्थस्य जीवस्य प्रस्तुतगुणलेशसंबन्धगन्धोऽपि नोपपद्यत इति नास्मिन् प्रकरणे शारीरपरिग्रहशङ्का जायत इत्यर्थः ॥ ३ ॥

36 कर्मकर्तृव्यपदेशाच्च । १ । २ । ४ ॥

*एतमितः प्रेत्याभिसंभविताऽस्मीति प्राप्यतया परं ब्रह्म व्यपदिश्यते, प्राप्तृतया च जीवः अतः प्राप्ता जीव उपासकः, प्राप्यं परं ब्रह्मोपास्यमिति प्राप्तुरन्यदेवेदमिति विज्ञायते ॥ ४ ॥

37 शब्दविशेषात् । १ । २ । ५ ॥

*एष म आत्माऽन्तर्हृदये इति शारीरषष्ठ्या निर्दिष्टः, उपास्यस्तु प्रथमया । एवं समानप्रकरणे वाजिनां च श्रुतौ शब्दविशेषश्श्रूयते जीवपरयोः; यथा *व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन् पुरुषो हिरण्मयो यथा ज्योतिरधूमम् इति । अत्र *अन्तरात्मन्निति सप्तम्यन्तेन शारीरो निर्दिश्यते; *पुरुषो हिरण्मयः इति प्रथमयोपास्यः । अतः पर एवोपास्यः ॥

इतश्च शारीरादन्यः—

38 स्मृतेश्च । १ । २ । ६ ॥

*सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च *यो मामेवमसंमूढो जानाति पुरुषोत्तमम् *ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ तमेव शरणं गच्छ इति शारीरमुपासकं, परमात्मानं चोपास्यं स्मृतिर्दर्शयति ॥ ६ ॥

39 अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च १।२।७॥

अल्पायतनत्वमर्भकौकस्त्वम्; तद्व्यपदेशः–अल्पत्वव्यपदेशः । *एष म आत्माऽन्तर्हृदये इत्यणीयसि हृदयायतने स्थितत्वात् *अणीयान् व्रीहेर्वा यवाद्वा इत्यादिनाऽणीयस्त्वस्य स्वरूपेण व्यपदेशाच्च नायं परमात्मा, अपि तु जीव एव; *सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः इत्यादिभिः परमात्मनोऽपरिच्छिन्नत्वावगमात्, जीवस्य चाराग्रमात्रत्वव्यपदेशादिति चेत्;

नैतदेवम्, परमात्मैव ह्यणीयानित्येवं निचाय्यत्वेन व्यपदिश्यते; एवं निचाय्यत्वेन–एवं द्रष्टव्यत्वेन, एवमुपास्यत्वेनेति यावत्। न पुनरणीयस्त्वमेवास्य स्वरूपमिति । व्योमवच्चायं व्यपदिश्यते– स्वाभाविकं महत्त्वं चात्रैव व्यपदिश्यते— *ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्

Digitization by Arya Samaj Charitable Foundation, Chennai

दिवो ज्यायानेभ्यो लोकेभ्य इति । अत उपासनार्थमेवाल्पत्वव्यपदेशः । तथाहि *सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेति सर्वोत्पत्तिप्रलयकारणत्वेन सर्वस्यात्मतयाऽनुप्रवेशकृतजीवयितृत्वेन च सर्वात्मकं ब्रह्मोपासीतेत्युपासनं विधाय *अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति यथोपासनं प्राप्यसिद्धिमभिधाय *स क्रतुं कुर्वीतेति गुणविधानार्थमुपासनमनूद्य *मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः इति जगदैश्वर्यविशिष्टस्य स्वरूपगुणांश्चोपादेयान् प्रतिपाद्य *एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा इत्युपासकस्य हृदयेऽणीयस्त्वेन तदात्मतयोपास्यस्य परमपुरुषस्योपासनार्थमवस्थानमुक्त्वा *एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यस्सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः इत्यन्तर्हृदयेऽवस्थितस्योपास्यमानस्य प्राप्याकारं निर्दिश्य *एष म आत्माऽन्तर्हृदय एतद्ब्रह्म इत्येवंभूतं परं ब्रह्म परमकारुण्येनास्मदुज्जिजीवयिषयाऽस्मद्धृदये सन्निहितमितीदमनुसन्धानं विधाय *एतमितः प्रेत्याभिसंभविताऽस्मीति यथोपासनं प्राप्तिनिश्चयानुसन्धानं च विधाय *इति यस्य स्यादद्धा न विचिकित्साऽस्तीत्येवंविधप्राप्यप्राप्तिनिश्चयोपेतस्योपासकस्य प्राप्तौ न संशयोऽस्तीत्युपसंहृतम् । अत उपासनार्थमर्भकौकस्त्वमणीयस्त्वं च ॥ ७ ॥

40 संभोगप्राप्तिरिति चेन्न वैशेष्यात् । १ । २ । ८ ॥

जीवस्येव परस्यापि ब्रह्मणश्शरीरान्तर्वर्तित्वमभ्युपगतं चेत्, तद्वदेव शरीरसंबन्धप्रयुक्तसुखदुःखोपभोगप्राप्तिरिति चेत्, तन्न, हेतुवैशेष्यात्—नहि शरीरान्तर्वर्तित्वमेव सुखदुःखोपभोगहेतुः; अपि तु पुण्यपापरूपकर्मपरवशत्वम्; तत्त्वपहतपाप्मनः परमात्मनो न संभवति । तथा च श्रुतिः *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीतीति ॥ ८ ॥ इति सर्वत्रप्रसिद्ध्यधिकरणम् ॥ १ ॥

अथ अत्त्रधिकरणम् ॥ २ ॥

यदि परमात्मा न भोक्ता, एवं तर्हि सर्वत्र भोक्तृतया प्रतीयमानो जीव एव स्यादित्याशङ्क्याह--

41 अत्ता चराचरग्रहणात् । १ । २ । ९ ॥

कठवल्लीष्वाम्नायते *यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ इति । अत्रौदनोपसेचनसूचितोऽत्ता किं जीव एव, उत परमात्मेति सन्दिह्यते । किं युक्तम् ? जीव इति । कुतः ? भोक्तृत्वस्य कर्मनिमित्तत्वाज्जीवस्यैव तत्संभवात् । अत्रोच्यते—अत्ता चराचरग्रहणात् । अत्ता परमात्मैव । कुतः ? चराचरग्रहणात्—चराचरस्य कृत्स्नस्याकृत्वं हि तस्यैव

Digitization by Arya Samaj Charitable Foundation, Chennai

संभवति। न चेदं कर्मनिमित्तभोक्तृत्वम्; अपि तु जगज्जन्मस्थितिलयहेतुभूतस्य परस्य ब्रह्मणो विष्णोस्संहर्तृत्वम्; *सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् इत्यत्रैव दर्शनात्। तथा च *मृत्युर्यस्योपसेचनमिति वचनात्, * ब्रह्म च क्षत्रं चेति कृत्स्नं चराचरं जगदिहादनीयौदनत्वेन गृह्यते। उपसेचनं हि नाम स्वयमद्यमानं सदन्यस्यादनहेतुः। अत उपसेचनत्वेन मृत्योरप्यद्यमानत्वात्तदुपसिच्यमानस्य कृत्स्नस्य ब्रह्मक्षत्रपूर्वकस्य जगतश्चराचरस्यादनमत्र विवक्षितमिति गम्यते। ईदृशं चादनमुपसंहार एव। तस्मादीदृशं जगदुपसंहारित्वरूपं भोक्तृत्वं परमात्मन एव ॥ ९ ॥

42 प्रकरणाच्च। १। २। १० ॥

प्रकरणं चेदं परस्यैव ब्रह्मणः– *महान्तं विभुमात्मानं मत्वा धीरो न शोचति *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ इति हि प्रकृतम्। *क इत्था वेद यत्र सः इत्यपि हि तत्प्रसादादृते तस्य दुरवबोधत्वमेव पूर्वप्रस्तुतं प्रत्यभिज्ञायते ॥ १० ॥

अथ स्यात्–नायं ब्रह्मक्षत्रौदनसूचितः पुरुषोऽपहतपाप्मा परमात्मा; अनन्तरम् *ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ इति कर्मफलभोक्तुरेव सद्वितीयस्याभिधानात्। द्वितीयश्च प्राणो बुद्धिर्वा स्यात्। ऋतपानं हि कर्मफलभोग एव; स च परमात्मनो न संभवति; बुद्धिप्राणयोस्तु भोक्तुर्जीवस्योपकरणभूतयोर्यथा कथञ्चित्पानेऽन्वयस्संभवतीति तयोरन्यतरेण सद्वितीयो जीव एव प्रतिपाद्यते। तदेकप्रकरणत्वात्पूर्वप्रस्तुतोऽत्ताऽपि स एव भवितुमर्हतीति। तत्रोच्यते–

43 गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। १। २। ११ ॥

न प्राणजीवौ बुद्धिजीवौ वा गुहां प्रविष्टावृतं पिबन्तावित्युच्येते; अपि तु जीवपरमात्मानौ हि तथा व्यपदिश्येते। कुतः? तद्दर्शनात्। अस्मिन् प्रकरणे जीवपरयोरेव गुहाप्रवेशव्यपदेशो दृश्यते। परमात्मनस्तावत् *तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ इति। जीवस्यापि *या प्राणेन संभवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत ॥ इति। कर्मफलान्यत्तीत्यदितिर्जीव उच्यते। प्राणेन संभवति–प्राणेन सह वर्तते। देवतामयी–इन्द्रियाधीनभोगा। गुहां प्रविश्य तिष्ठन्ती–हृदयपुण्डरीकोदरवर्तिनी। भूतेभिर्व्यजायत–पृथिव्यादिभिर्भूतैस्सहिता देवादिरूपेण विविधा जायते। एवं च सति *ऋतं पिबन्ताविति व्यपदेशः छत्रिणो गच्छन्तीतिवत्प्रतिपत्तव्यः। यद्वा–प्रयोज्यप्रयोजकरूपेण पाने कर्तृत्वं जीवपरयोरुपपद्यते ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

44 विशेषणाच्च । १ । २ । १२ ॥

अस्मिन् प्रकरणे जीवपरमात्मानावेवोपास्यत्वोपासकत्वप्राप्यत्वप्राप्तृत्वविशिष्टौ सर्वत्र प्रतिपाद्येते । तथाहि— *ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति इति । ब्रह्मजज्ञो जीवः, ब्रह्मणो जातत्वात् ज्ञत्वाच्च । तं देवमीड्यं विदित्वा—जीवात्मानमुपासकं ब्रह्मात्मकत्वेनावगम्येत्यर्थः । तथा *यस्सेतुरीजानानामक्षरं ब्रह्म यत्परम् । अभयं तितीर्षतां पारं नाचिकेतं शकेमहि ॥ इत्युपास्यः परमात्मोच्यते । नाचिकेतम्—नाचिकेतस्य कर्मणः प्राप्यमित्यर्थः । *आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिनोपासको जीव उच्यते । तथा *विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इति प्राप्यप्राप्तारावभिधीयेते जीवपरमात्मानौ । इहापि *छायातपावित्यज्ञत्वसर्वज्ञत्वाभ्यां तावेव विशिष्य व्यपदिश्येते ॥

अथ स्यात् *येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके इति जीवस्वरूपयाथात्म्यप्रश्नोपक्रमात्सर्वमिदं प्रकरणं जीवपरमिति प्रतीयत इति । नैतदेवम्, न हि जीवस्य देहातिरिक्तस्यास्तित्वनास्तित्वशङ्कयाऽयं प्रश्नः, तथा सति पूर्ववरद्वयवरणानुपपत्तेः । तथा हि— पितुस्सर्ववेदसदक्षिणक्रतुसमाप्तिवेलायां दीयमानदक्षिणावैगुण्येन क्रतुवैगुण्यं मन्यमानेन कुमारेण नचिकेतसा आस्तिकाग्रेसरेण स्वात्मदानेनापि पितुः क्रतुसाद्गुण्यमिच्छता *कस्मै मां दास्यसीत्यसकृत्पितरं पृष्टवता स्वनिर्बन्धरुष्टपितृवचनान्मृत्युसदनं प्रविष्टेन स्वसदनात्प्रोषुषि यमे तददर्शनात्तत्र तिस्रो रात्रीरुपोषुषा स्वोपवासभीततत्प्रतिविधानप्रवृत्तमृत्युप्रदत्ते वरत्रये आस्तिक्यातिरेकात्प्रथमेन वरेण स्वात्मानं प्रति पितुः प्रसादो वृतः । एतच्च सर्वं देहातिरिक्तमात्मानमजानतो नोपपद्यते । द्वितीयेन च वरेणोत्तीर्णदेहात्मानुभाव्यफलसाधनभूताऽग्निविद्या वृता । तदपि देहातिरिक्तात्मानभिज्ञस्य न संभवति । अतस्तृतीयेन वरेण यदिदं व्रियते *येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥ इति; अत्र परमपुरुषार्थरूपब्रह्मप्राप्तिलक्षणमोक्षयाथात्म्यविज्ञानाय तदुपायभूतपरमात्मोपासनपरावरात्मतत्त्वजिज्ञासयाऽयं प्रश्नः क्रियते । एवं च *येयं प्रेत इति न शरीरवियोगमात्राभिप्रायम्; अपि तु सर्वबन्धविनिर्मोक्षाभिप्रायम् । यथा *न प्रेत्य संज्ञाऽस्ति इति ।

अयमर्थः—मोक्षाधिकृते मनुष्ये प्रेते—सर्वबन्धविनिर्मुक्ते तत्स्वरूपविषया वादिविप्रतिपत्तिनिमित्ताऽस्तिनास्त्यात्मिका येयं विचिकित्सा, तदपनोदनाय तत्स्वरूपयाथात्म्यं त्वयाऽनुशिष्टोऽहं विद्यां—जानीयाम्—इति । तथा हि बहुधा विप्रतिपद्यन्ते—केचिद्वित्तिमात्रस्यात्मनस्स्वरूपोच्छित्तिलक्षणं मोक्षमाचक्षते । अन्ये वित्तिमात्रस्यैव सतोऽविद्यास्तमयम् । अपरे पाषाणकल्पस्यात्मनो ज्ञानाद्यशेषवैशेषिकगुणोच्छेदलक्षणं कैवल्यरूपम् । अपरे तु अपहतपाप्मानं परमात्मानमभ्युपगच्छन्तस्तस्यैवोपाधिसंसर्गनिमित्तजीवभावस्योपाध्यपगमेन तद्भावलक्षणं मोक्षमातिष्ठन्ते । त्रय्यन्तनिष्णातास्तु

Digitization by Arya Samaj Charitable Foundation, Chennai

निखिलजगदेककारणस्याशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणश्शरीरतया प्रकारभूतस्यानुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमात्मानुभवैकरसस्य जीवस्यानादिकर्मरूपाविद्यातिरोहितस्वरूपस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते । तत्र मोक्षस्वरूपं तत्साधनं च त्वत्प्रसादाद्विद्यामिति नचिकेतसा पृष्टो मृत्युस्तस्यार्थस्य दुरवबोधत्वप्रदर्शनेन विविधभोगवितरणप्रलोभनेन चैनं परीक्ष्य योग्यतामभिज्ञाय परावरात्मतत्त्वविज्ञानं परमात्मोपासनं तत्पदप्राप्तिलक्षणं मोक्षं च *तं दुर्दर्शं गूढमनुप्रविष्टमित्यारभ्य *सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यन्तेनोपदिश्य तदपेक्षितांश्च विशेषानुपदिदेशेति सर्वं समञ्जसम् । अतः परमात्मैवात्तेति सिद्धम् ॥१२॥

इति अत्त्रधिकरणम् ॥ २ ॥

अथ अन्तराधिकरणम् ॥ ३ ॥

45 अन्तर उपपत्तेः । १ । २ । १३ ॥

इदमामनन्ति च्छन्दोगाः *य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म इति । तत्र संदेहः–किमयमक्ष्याधारतया निर्दिश्यमानः पुरुषः प्रतिबिम्बात्मा, उत चक्षुरिन्द्रियाधिष्ठाता देवताविशेषः, उत जीवात्मा, अथ परमात्मेति । किं युक्तम् ? प्रतिबिम्बात्मेति । कुतः ? प्रसिद्धवन्निर्देशात्; *दृश्यते इत्यपरोक्षाभिधानाच्च । जीवात्मा वा, तस्यापि हि चक्षुषि विशेषेण सन्निधानात्प्रसिद्धिरुपपद्यते । उन्मीलितं हि चक्षुरुद्वीक्ष्य जीवात्मनश्शरीरे स्थितिगती निश्चिन्वन्ति । *रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः इति श्रुतिप्रसिद्ध्या चक्षुःप्रतिष्ठो देवताविशेषो वा । एष्वेव प्रसिद्धवन्निर्देशोपपत्तेरेषामन्यतमः । इति प्राप्ते प्रचक्ष्महे—अन्तर उपपत्तेः । अक्ष्यन्तरः परमात्मा । कुतः ? *एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति एतं संयद्वाम इत्याचक्षते, एतं हि सर्वाणि वामान्यभिसंयन्ति एष उ एव वामनिः, एष हि सर्वाणि वामानि नयति, एष उ एव भामनिः, एष हि सर्वेषु लोकेषु भाति इत्येषां गुणानां परमात्मन्येवोपपत्तेः ॥ १३ ॥

46 स्थानादिव्यपदेशाच्च । १ । २ । १४ ॥

चक्षुषि स्थितिनियमनादयः परमात्मन एव *यश्चक्षुषि तिष्ठन्नित्येवमादौ व्यपदिश्यन्ते । अतश्च *य एषोऽक्षिणि पुरुषः इति स एव प्रतीयते । अतः प्रसिद्धवन्निर्देशश्च परमात्मन्युपपद्यते । तत एव *दृश्यते इति साक्षात्कारव्यपदेशोऽपि योगिभिर्दृश्यमानत्वादुपपद्यते ॥ १४ ॥

47 सुखविशिष्टाभिधानादेव च । १ । २ । १५ ॥

इतश्चाक्ष्याधारः पुरुषोत्तमः– *कं ब्रह्म खं ब्रह्मेति प्रकृतस्य सुखविशिष्टस्य ब्रह्मणः

Digitization by Arya Samaj Charitable Foundation, Chennai

उपासनस्थानविधानार्थं संयद्वामत्वादिगुणविधानार्थं च *य एषोऽक्षिणि पुरुष इत्यभिधानात् । एवकारो नैरपेक्ष्यं हेतोर्द्योतयति ॥

नन्वग्निविद्याव्यवधानात् *कं ब्रह्मेति प्रकृतं ब्रह्म नेह सन्निधत्ते । तथा हि—अग्नयः *प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ब्रह्मविद्यामुपदिश्य *अथ हैनं गार्हपत्योऽनुशशासेत्यारभ्याग्नीनामुपासनमुपदिदिशुः । नचाग्निविद्या ब्रह्मविद्याङ्गमिति शक्यं वक्तुम्; ब्रह्मविद्याफलानन्तर्गततद्विरोधिसर्वायुःप्राप्तिसन्तत्यविच्छेदादिफलश्रवणात् ।

उच्यते—*प्राणो ब्रह्म *एतदमृतमभयमेतद्ब्रह्मेत्युभयत्र ब्रह्मसंशब्दनात्, *आचार्यस्तु ते गतिं वक्तेऽत्यग्निवचनाच्च गत्युपदेशात्पूर्वं ब्रह्मविद्याया असमाप्तेस्तन्मध्यगताऽग्निविद्या ब्रह्मविद्याङ्गमिति निश्चीयते; *अथ हैनं गार्हपत्योऽनुशशासेति ब्रह्मविद्याधिकृतस्यैवाग्निविद्योपदेशाच्च । किञ्च *व्याधिभिः प्रतिपूर्णोऽस्मीति ब्रह्मप्राप्तिव्यतिरिक्तनानाविधकामोपहतिपूर्वकगर्भजन्मजरामरणादिभवभयोपतप्तायोपकोसलाय *एषा सोम्य तेऽस्मद्विद्याऽऽत्मविद्या चेति समुच्चित्योपदेशान्मोक्षकफलात्मविद्याङ्गत्वमग्निविद्यायाः प्रतीयते । एवं चाङ्गत्वेऽवगते सति फलानुकीर्तनमर्थवाद इति गम्यते । नचात्र मोक्षविरोधिफलं किञ्चिच्छ्रूयते, *अपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्ते उप वयन्तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च इत्यमीषां फलानां मोक्षाधिकृतस्यानुगुणत्वात् । अपहते पापकृत्याम्—ब्रह्मप्राप्तिविरोधि पापं कर्मापहन्ति । लोकी भवति—तद्विरोधिनि पापे निरस्ते ब्रह्मलोकं प्राप्नोति । सर्वमायुरेति—ब्रह्मोपासनसमाप्तेर्यावदायुरपेक्षितम्, तत्सर्वमेति । ज्योग्जीवति—व्याध्यादिभिरनुपहतो यावद्ब्रह्मप्राप्ति जीवति । नास्यावरपुरुषाः क्षीयन्ते—अस्य शिष्यप्रशिष्यादयः पुत्रपौत्रादयोऽपि ब्रह्मविद एव भवन्ति । *नास्याब्रह्मवित्कुले भवतीति च श्रुत्यन्तरे ब्रह्मविद्याफलत्वेन श्रूयते । उप वयन्तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च—वयम् अग्नयस्तमेनमुपभुञ्जामः—यावद्ब्रह्मप्राप्ति विघ्नेभ्यः परिपालयाम इति । अतोऽग्निविद्याया ब्रह्मविद्याङ्गत्वेन तत्सन्निधानाविरोधात्सुखविशिष्टं प्रकृतमेव ब्रह्मोपासनस्थानविधानार्थं गुणविधानार्थं चोच्यते ।

ननु *आचार्यस्तु ते गतिं वक्तेति गतिमात्रपरिशेषणादाचार्येण गतिरेवोपदेश्येति गम्यते; तत्कथं स्थानगुणविध्यर्थतोच्यते । तदभिधीयते । *आचार्यस्तु ते गतिं वक्तेत्यस्यायमभिप्रायः—ब्रह्मविद्यामनुपदिश्य प्रोषुषि गुरौ तदलाभादनाश्वासमुपकोसलमुज्जीवयितुं स्वपरिचरणप्रीता गार्हपत्यादयो गुरोरग्नयस्तस्मै ब्रह्मस्वरूपमात्रं तदङ्गभूतां चाग्निविद्यामुपदिश्य *आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् इति श्रुत्यर्थमालोच्य साधुतमत्वप्राप्त्यर्थमाचार्य एवास्य संयद्वामत्वादिगुणकं ब्रह्म तदुपासनस्थानमर्चिरादिकां च गतिमुपदिशत्विति मत्वा *आचार्यस्तु ते गतिं वक्तेत्यवोचन् । गतिग्रहणमुपदेश्यविद्याशेषप्रदर्शनार्थम् । अत एवाचार्योऽपि *अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते इत्युपक्रम्य संयद्वामत्वादिकल्याणगुणविशिष्टं ब्रह्माक्षिस्थानोपास्यमर्चिरादिकां च गतिमुपदिदेश । अतः *कं ब्रह्म खं ब्रह्मेति सुखविशिष्टस्य प्रकृतस्यैव ब्रह्मणोऽत्राभिधानादयमक्ष्याधारः परमात्मा ॥ १५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु च *कं ब्रह्म खं ब्रह्मेति परं ब्रह्माभिहितमिति कथमवगम्यते, यस्येहाक्ष्याधारतयाऽभिधानं ब्रूषे; यावता *कं ब्रह्म खं ब्रह्मेति प्रसिद्धाकाशलौकिकसुखयोरेव ब्रह्मदृष्टिर्विधीयत इति प्रतिभाति, *नाम ब्रह्म *मनो ब्रह्मेत्यादिवचनसारूप्यात् । तत्राह—

48 अत एव च स ब्रह्म । १ । २ । १६ ॥

यतस्तत्र *यदेव कं तदेव खमिति सुखविशिष्टस्याकाशस्याभिधानम्, अत एव खशब्दाभिधेयस्सः आकाशः परं ब्रह्म । एतदुक्तं भवति—अग्निभिः *प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्युक्ते उपकोसल उवाच *विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति । अस्यायमभिप्रायः—न तावत्प्राणादिप्रतीकोपासनमग्निभिरभिहितम्, जन्मजरामरणादिभवभयभीतस्य मुमुक्षोर्ब्रह्मोपदेशाय प्रवृत्तत्वात् । अतो ब्रह्मैवोपास्यमुपदिष्टम् । तत्र प्रसिद्धैः प्राणादिभिस्समानाधिकरणं ब्रह्म निर्दिष्टम्; तेषु च प्राणविशिष्टत्वं जगद्विधरणयोगेन वा प्राणशरीरतया प्राणस्य नियन्तृत्वेन वा ब्रह्मण उपपद्यत इति *विजानाम्यहं यत्प्राणो ब्रह्मेत्युक्तवान् । तथा सुखाकाशयोरपि ब्रह्मणः शरीरतया तन्नियाम्यत्वेन विशेषणत्वम् उतान्योन्यव्यवच्छेदकतया निरतिशयानन्दरूपब्रह्मस्वरूपसमर्पणपरत्वेन वा ? तत्र पृथग्भूतयोश्शरीरतया विशेषणत्वे वैषयिकसुखभूताकाशयोर्नियामकत्वं ब्रह्मणस्स्यादिति स्वरूपावगतिर्न स्यात्, अन्योन्यव्यवच्छेदकत्वेऽपरिच्छिन्नानन्दैकस्वरूपत्वं ब्रह्मणस्स्यादित्यन्यतरप्रकारनिर्दिधारयिषया *कं च तु खं च न विजानामीत्युक्तवान् । उपकोसलस्येममाशयं जानन्तोऽग्नयः *यद्वा व कं तदेव खं यदेव खं तदेव कमित्यूचिरे । ब्रह्मणस्सुखरूपत्वमेवापरिच्छिन्नमित्यर्थः । अतः प्राणशरीरतया प्राणविशिष्टं यद्ब्रह्म, तदेवापरिच्छिन्नसुखरूपं चेति निगमितम् *प्राणं च हास्मै तदाकाशं चोचुरिति । अतः *कं ब्रह्म खं ब्रह्मेत्यत्रापरिच्छिन्नसुखं ब्रह्म प्रतिपादितमिति परं ब्रह्मैव तत्र प्रकृतम्, तदेव चात्राक्ष्याधारतयाऽभिधीयत इत्यक्ष्याधारः परमात्मा ॥ १६ ॥

49 श्रुतोपनिषत्कगत्यभिधानाच्च । १ । २ । १७ ॥

श्रुतोपनिषत्कस्य—अधिगतपरमपुरुषयाथात्म्यस्यानुसन्धेयतया श्रुत्यन्तरप्रतिपाद्यमाना अर्चिरादिका गतिर्या, तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषं श्रुतवते *तेऽर्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमित्यारभ्य *चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इत्यन्तेनोपदिशति । अतोऽप्ययमक्षिपुरुषः परमात्मा ॥ १७ ॥

50 अनवस्थितेरसंभवाच्च नेतरः । १ । २ । १८ ॥

प्रतिबिम्बादीनामक्षिणि नियमेनानवस्थानादमृतत्वादीनां च निरुपाधिकानां तेष्वसंभवान्न

Digitization by Arya Samaj Charitable Foundation, Chennai

परमात्मन इतरः छायादिः अक्षिपुरुषो भवितुमर्हति । प्रतिबिम्बस्य तावत्पुरुषान्तरसन्निधानायत्तत्वान्न नियमेनावस्थानसंभवः । जीवस्यापि सर्वेन्द्रियव्यापारानुगुणत्वाय सर्वेन्द्रियकन्दभूते स्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानम् । देवतायाश्च *रश्मिभिरेषोऽस्मिन् प्रतिष्ठित इति रश्मिद्वारेणावस्थानवचनाद्देशान्तरावस्थितस्यापीन्द्रियाधिष्ठानोपपत्तेर्न चक्षुष्यवस्थानम् । सर्वेषामेवैषां निरुपाधिकामृतत्वादयो न संभवन्त्येव । तस्मादक्षिपुरुषः परमात्मा ॥ १८ इति अन्तराधिकरणम् ॥ ३ ॥

अथ अन्तर्याम्यधिकरणम् ॥ ४ ॥

*स्थानादिव्यपदेशाच्चेत्यत्र *यश्चक्षुषि तिष्ठन्नित्यादिना प्रतिपाद्यमानं चक्षुषि स्थितिनियमनादिकं परमात्मन एवेति सिद्धं कृत्वाऽक्षिपुरुषस्य परमात्मत्वं साधितम् । इदानीं तदेव समर्थ्यते—

51 अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् । १ । २ । १९ ॥

काण्वा माध्यन्दिनाश्च वाजसनेयिनस्समामनन्ति *यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः इति । एवमम्ब्वग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकाकाशतमस्तेजस्सु दैवेषु च सर्वेषु भूतेषु प्राणवाक्चक्षुश्श्रोत्रमनस्त्वग्विज्ञानरेतस्स्वात्मात्मीयेषु च तिष्ठन्तं तत्तदन्तरभूतं तत्तदवेद्यं तत्तच्छरीरकं तत्तद्यमयन्तं कञ्चिन्निर्दिश्य *एष त आत्माऽन्तर्याम्यमृतः इत्युपदिश्यते । माध्यन्दिनपाठे तु *यस्सर्वेषु लोकेषु तिष्ठन् *यस्सर्वेषु वेदेषु *यस्सर्वेषु यज्ञेषु इति च पर्यायाः । *यो विज्ञाने तिष्ठन्नित्यस्य पर्यायस्य स्थाने *य आत्मनि तिष्ठन् इति पर्यायः । *स त आत्माऽन्तर्याम्यमृतः इति च विशेषः । तत्र संशय्यते—किमयमन्तर्यामी प्रत्यगात्मा, उत परमात्मेति । किं युक्तम् ? प्रत्यगात्मेति । कुतः ? वाक्यशेषे *द्रष्टा श्रोतेति करणायत्तज्ञानताश्रुतेः; एवं द्रष्टुरेवान्तर्यामित्वोपदेशात्, *नान्योऽतोऽस्ति द्रष्टेति द्रष्ट्रन्तरनिषेधाच्चेति ॥

एवं प्राप्तेऽभिधीयते—अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् । अधिदैवाधिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणोऽन्तर्याम्यपहतपाप्मा परमात्मा नारायणः । काण्वपाठसिद्धेभ्योऽधिदैवादिमद्भ्यो वाक्येभ्योऽधिकान्यधिलोकादिमन्ति वाक्यानि माध्यन्दिनपाठे सन्तीति ज्ञापनार्थमधिदैवाधिलोकादिष्वित्युभयोरुपादानम् । तदेवमुभयेष्वपि वाक्येष्वन्तर्यामी परमात्मेत्यर्थः । कुतः ? तद्धर्मव्यपदेशात्; परमात्मधर्मो ह्ययम्, यदेक एव सन् सर्वलोकसर्वभूतसर्वदेवादीन्नियमयतीति । तथा उद्दालकप्रश्नः— *य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयतीत्युपक्रम्य *तमन्तर्यामिणं ब्रहीति । तस्य चोत्तरम् *यः पृथिव्यां तिष्ठन् इत्यारभ्योक्तम् । तदेतत्सर्वांल्लोकान् सर्वाणि च भूतानि सर्वान् देवान् सर्वान्वेदान् सर्वांश्च यज्ञानन्तः प्रविश्य सर्वप्रकारनियमनम्, सर्वशरीरतया सर्वस्यात्मत्वं च सर्वज्ञात्सत्यसङ्कल्पात्पुरुषोत्तमादन्यस्य न संभवति । तथाहि *अन्तः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रविष्टश्शास्ता जनानाँ सर्वात्मा *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत् इत्यादीन्यौपनिषदानि वाक्यानि परमात्मन एव सर्वस्य प्रशासितृत्वं सर्वस्यात्मत्वमित्यादीनि वदन्ति । तथा सुबालोपनिषदि *नैवेह किञ्चनाग्र आसीदमूलमनाधारमिमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः, चक्षुश्च द्रष्टव्यं च नारायणः, श्रोत्रं च श्रोतव्यं च नारायणः इत्यारभ्य *अन्तश्शरीरे निहितो गुहायामज एको नित्यः यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद यस्यापश्शरीरम् इत्यादि, *यस्य मृत्युश्शरीरं यो मृत्युमन्तरे सञ्चरन्यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति परस्यैव ब्रह्मणस्सर्वात्मत्वं सर्वशरीरत्वं सर्वस्य नियन्तृत्वं च प्रतिपाद्यते । स्वाभाविकं चामृतत्वं परमात्मन एव धर्मः । न च परस्यात्मनः करणायत्तं द्रष्टृत्वादिकम्; अपितु स्वभावत एव सर्वज्ञत्वात्सत्यसङ्कल्पत्वाच्च स्वत एव । तथाच श्रुतिः *पश्यत्यचक्षुस्स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीता इति । न च दर्शनश्रवणादिशब्दाश्चक्षुरादिकरणजन्मनो ज्ञानस्य वाचकाः; अपितु रूपादिसाक्षात्कारस्य । स च रूपादिसाक्षात्कारः कर्मतिरोहितस्वाभाविकज्ञानस्य जीवस्य चक्षुरादिकरणजन्माः; परस्यतु स्वत एव । *नान्योऽतोऽस्ति द्रष्टेत्येतदपि पूर्ववाक्योदितान्नियन्तुर्द्रष्टुरन्यो द्रष्टा नास्तीति वदति । *यं पृथिवी न वेद *यमात्मा न वेदेत्येवमादिभिर्वाक्यैः पृथिव्यात्मादिनियाम्यैरनुपलभ्यमान एव नियमयतीति यत्पूर्वमुक्तम्, तदेव *अदृष्टो द्रष्टा अश्रुतश्श्रोतेति निगमय्य *नान्योऽतोऽस्ति द्रष्टेत्यादिना तस्य नियन्तुर्नियन्त्रन्तरं निषिध्यते । *एष त आत्मा *स त आत्मा इति च त इति व्यतिरेकविभक्तिनिर्दिष्टस्य जीवस्यात्मतयोपदिश्यमानोऽन्तर्यामी न प्रत्यगात्मा भवितुमर्हति ॥ १९ ॥

52 न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च । १ । २ । २० ॥

स्मार्तं प्रधानम् । शारीरः जीवः । स्मार्तं च शारीरश्च नान्तर्यामी, अतद्धर्माभिलापात्—तयोरसंभावितधर्माभिलापात् । स्वभावत एव सर्वस्य द्रष्टृत्वम्, सर्वस्य नियन्तृत्वम्, सर्वस्यात्मत्वम्, स्वत एवामृतत्वं च तयोर्न संभावनागन्धमर्हति । एतदुक्तं भवति—यथा स्मार्तमचेतनं सर्वज्ञत्वनियन्तृत्वसर्वात्मत्वादिकं नार्हति, तथा जीवोऽपि, अतद्धर्मत्वात्—इति ॥ अमीषां गुणानां परमात्मन्यन्वयः, प्रत्यगात्मनि व्यतिरेकश्च सूत्रद्वयेन दर्शितः ॥ २० ॥

निरपेक्षं च हेत्वन्तरमाह—

53 उभयेऽपि हि भेदेनैनमधीयते । १ । २ । २१ ॥

उभये—माध्यन्दिनाः काण्वाश्च, अन्तर्यामिणो नियाम्यत्वेन वागादिभिरचेतनैस्समम् एनं शारीरमपि विभज्याधीयते—*य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति माध्यन्दिनाः, *यो विज्ञाने तिष्ठन्

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यादि च काण्वाः परमात्मनियाम्यतया तस्माद्विलक्षणत्वेनैनमधीयत इत्यर्थः । अतोऽन्तर्यामी प्रत्यगात्मनो विलक्षणोऽपहतपाप्मा परमात्मा नारायण इति सिद्धम् ॥२१॥ इति अन्तर्याम्यधिकरणम् ॥४॥

अथ अदृश्यत्वादिगुणकाधिकरणम् ॥

54 अदृश्यत्वादिगुणको धर्मोक्तेः । १ । २ । २२ ॥

आथर्वणिका अधीयते–*अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्, नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः, इति; तथोत्तरत्र *अक्षरात्परतः परः इति। तत्र संदिह्यते–किमिहादृश्यत्वादिगुणकमक्षरमक्षरात्परतः परश्च प्रकृतिपुरुषौ; अथोभयत्र परमात्मैवेति । किं तावत्प्राप्तम् ? प्रकृतिपुरुषाविति । कुतः ? अस्याक्षरस्य *अदृष्टो द्रष्टेत्यादाविव न द्रष्टृत्वादिश्चेतनधर्मविशेष इह श्रूयते, *अक्षरात्परतः पर इति च सर्वस्माद्विकारात्परभूतादक्षरादस्मात्परः क्षेत्रज्ञसमष्टिपुरुषः प्रतिपाद्यते। एतदुक्तं भवति–– रूपादिमत्स्थूलरूपाचेतनपृथिव्यादिभूताश्रयं दृश्यत्वादिकं प्रतिषिध्यमानं पृथिव्यादिसजातीयसूक्ष्मरूपाचेतनमेवोपस्थापयति, तच्च प्रधानमेव । तस्मात्परत्वं च समष्टिपुरुषस्यैव प्रसिद्धम् । तदधिष्ठितं च प्रधानं महदादिविशेषपर्यन्तं विकारजातं प्रसूत इति तत्र दृष्टान्ता उपन्यस्यन्ते *यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्संभवन्ति। यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह विश्वम् ॥ इति । अतोऽस्मिन् प्रकरणे प्रधानपुरुषावेव प्रतिपाद्येते इति ॥

एवं प्राप्ते ब्रूमः––अदृश्यत्वादिगुणको धर्मोक्तेः । अदृश्यत्वादिगुणकोऽक्षरात्परतः परश्च परमपुरुष एव; कुतः ? तद्धर्मोक्तेः, *यस्सर्वज्ञस्सर्वविदित्यादिना सर्वज्ञत्वादिकास्तस्यैव धर्मा उच्यन्ते । तथा हि *यया तदक्षरमधिगम्यते इत्यादिना अदृश्यत्वादिगुणकमक्षरमभिधाय *अक्षरात्संभवतीह विश्वमिति तस्माद्विश्वसंभवं चाभिधाय *यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ इति भूतयोनेरक्षरस्य सर्वज्ञत्वादिः प्रतिपाद्यते । पश्चात् *अक्षरात्परतः परः इति च प्रकृतमदृश्यत्वादिगुणकं भूतयोन्यक्षरं सर्वज्ञमेव परत्वेन व्यपदिश्यते। अतः *अक्षरात्परतः परः इत्यक्षरशब्दः पञ्चम्यन्तः प्रकृतमदृश्यत्वादिगुणकमक्षरं नाभिधत्ते, तस्य सर्वज्ञस्य विश्वयोनेस्सर्वस्मात्परत्वेन तस्मादन्यस्य परत्वासंभवात् ।अतोऽत्राक्षरशब्दो भूतसूक्ष्ममचेतनं ब्रूते॥२२॥

इतश्च न प्रधानपुरुषौ––

55 विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ । १ । २ । २३ ॥

विशिनष्टि हि प्रकरणम्-प्रधानाच्च पुरुषाच्च भूतयोन्यक्षरं व्यावर्तयतीत्यर्थः; एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनादिभिः । तथा ताभ्यामक्षरस्य भेदश्च व्यपदिश्यते *अक्षरात्परतः परः इत्यादिना । तथाहि–*स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह इति सर्वविद्याप्रतिष्ठाभूता ब्रह्मविद्या

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रक्रान्ता; परविद्यैव च सर्वविद्याप्रतिष्ठा; तामिमां सर्वविद्याप्रतिष्ठां विद्यां चतुर्मुखाथर्वादिगुरुपरम्परयाऽङ्गिरसा प्राप्तां जिज्ञासुः *शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । ब्रह्मविद्यायास्सर्वविद्याश्रयत्वाद्ब्रह्मविज्ञानेन सर्वं विज्ञातं भवतीति कृत्वा ब्रह्मस्वरूपमनेन पृष्टम् । *तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा चेति । ब्रह्मप्रेप्सुना द्वे विद्ये वेदितव्ये—ब्रह्मविषये परोक्षापरोक्षरूपे द्वे विज्ञाने उपादेये इत्यर्थः । तत्र परोक्षं शास्त्रजन्यं ज्ञानम्, अपरोक्षं योगजन्यम्; तयोर्ब्रह्मप्राप्त्युपायभूतमपरोक्षं ज्ञानम्; तच्च भक्तिरूपापन्नम्, *यमेवैष वृणुते तेन लभ्यः इत्यत्रैव विशेष्यमाणत्वात्; तदुपायश्चागमजन्यं विवेकादिसाधनसप्तकानुगृहीतं ज्ञानम्, *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतेः । आह च भगवान्पराशरः *तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने । आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते इति । *तत्रापरा ऋग्वेदो यजुर्वेदः इत्यादिना *धर्मशास्त्राणीत्यन्तेन आगमोत्थं ब्रह्मसाक्षात्कारहेतुभूतं परोक्षज्ञानमुक्तम् । साङ्गस्य सेतिहासपुराणस्य सधर्मशास्त्रस्य समीमांसस्य वेदस्य ब्रह्मज्ञानोत्पत्तिहेतुत्वात् । *अथ परा यया तदक्षरमधिगम्यते इत्युपासनाख्यं ब्रह्मसाक्षात्कारलक्षणं भक्तिरूपापन्नं ज्ञानम् । *यत्तदद्रेश्यमग्राह्यमित्यादिना परोक्षापरोक्षरूपज्ञानद्वयविषयस्य परस्य ब्रह्मणस्स्वरूपमुच्यते । *यथोर्णनाभिस्सृजते गृह्णते चेत्यादिना यथोक्तस्वरूपात्परस्माद्ब्रह्मणोऽक्षरात्कृत्स्नस्य चेतनाचेतनात्मकप्रपञ्चस्योत्पत्तिरुक्ता; विश्वमिति वचनाच्चाचेतनमात्रस्य । *तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात्प्राणो मनस्सत्यं लोकाः कर्मसु चामृतम् ॥ इति ब्रह्मणो विश्वोत्पत्तिप्रकार उच्यते । तपसा—ज्ञानेन, *यस्य ज्ञानमयं तपः इति वक्ष्यमाणत्वात्; चीयते—उपचीयते; *बहु स्यामिति सङ्कल्परूपेण ज्ञानेन ब्रह्म सृष्ट्युन्मुखं भवतीत्यर्थः । ततोऽन्नमभिजायते—अद्यत इत्यन्नम्, विश्वस्य भोक्तृवर्गस्य भोग्यभूतं भूतसूक्ष्ममव्याकृतं परस्माद्ब्रह्मणो जायत इत्यर्थः । प्राणमनःप्रभृति च स्वर्गापवर्गरूपफलसाधनभूतकर्मपर्यन्तं सर्वं विकारजातं तस्मादेव जायते । *यस्सर्वज्ञस्सर्ववित् इत्यादिना सृष्ट्युपकरणभूतं सार्वज्ञ्यसत्यसङ्कल्पत्वादिकमुक्तम् । सर्वज्ञात्सत्यसङ्कल्पात्परस्माद्ब्रह्मणोऽक्षरादेतत् कार्याकारं ब्रह्म नामरूपविभक्तं भोक्तृभोग्यरूपं च जायते । *तदेतत्सत्यमिति परस्य ब्रह्मणो निरुपाधिकसत्यत्वमुच्यते । *मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि, तान्याचरत नियतं सत्यकामाः इति सार्वज्ञ्यसत्यसङ्कल्पत्वादिकल्याणगुणाकरमक्षरं पुरुषं स्वतस्सत्यं कामयमानास्तत्प्राप्तये फलान्तरेभ्यो विरक्ता ऋग्यजुस्सामाथर्वसु कविभिर्दृष्टानि वर्णाश्रमोचितानि त्रेताग्निषु बहुधा सन्ततानि कर्माण्याचरतेति *एष वः पन्थाः इत्यारभ्य *एष वः पुण्यस्सुकृतो ब्रह्मलोकः इत्यन्तेन कर्मानुष्ठानप्रकारं, श्रुतिस्मृतिचोदितेषु कर्मस्वेकतरकर्मवैधुर्येऽपीतरेषामनुष्ठितानामपि निष्फलत्वम्, अयथानुष्ठितस्य चाननुष्ठितसमत्वमभिधाय *प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यू ते पुनरेवापि यन्ति ॥ इत्यादिना फलाभिसन्धिपूर्वकत्वेन ज्ञानविधुरतया चावरं कर्माचरतां पुनरावृत्तिमुक्त्वा *तपश्श्रद्धे ये ह्युपवसन्तीत्यादिना पुनरपि फलाभिसन्धिरहितं

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानिनाऽनुष्ठितं कर्म ब्रह्मप्राप्तये भवतीति प्रशस्य *परीक्ष्य लोकानित्यादिना केवलकर्मफलेषु विरक्तस्य यथोदितकर्मानुगृहीतं ब्रह्मप्राप्त्युपायभूतं ज्ञानं जिज्ञासमानस्य च आचार्योपसदनं विधाय *तदेतत्सत्यं यथा सुदीप्तात् इत्यादिना *सोऽविद्याग्रन्थिं विकिरतीह सोम्येत्यन्तेन पूर्वोक्तस्याक्षरस्य भूतयोनेः परस्य ब्रह्मणः परमपुरुषस्यानुक्तैस्स्वरूपगुणैस्सह सर्वभूतान्तरात्मतया विश्वशरीरत्वेन विश्वरूपत्वम्, तस्माद्विश्वसृष्टिं च विस्पष्टमभिधाय *आविस्सन्निहितमित्यादिना तस्यैवाक्षरस्याव्याकृतात्परतोऽपि पुरुषात्परभूतस्य परस्य ब्रह्मणः परमव्योम्नि प्रतिष्ठितस्यानवधिकातिशयानन्दस्वरूपस्य हृदयगुहायामुपासनप्रकारम् उपासनस्य च परभक्तिरूपत्वमुपासीनस्याविद्याविमोकपूर्वकं ब्रह्मसमं ब्रह्मानुभवफलं चोपदिश्योपसंहृतम् । अत एवं विशेषणाद्भेदव्यपदेशाच्च नास्मिन्प्रकरणे प्रधानपुरुषौ प्रतिपाद्येते ॥

भेदव्यपदेशोऽपि हि ताभ्यां परस्य ब्रह्मणोऽत्र विद्यते । *दिव्यो ह्यमूर्तः पुरुषस्स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः ॥ इत्यादिभिः अक्षरादव्याकृतात्परो यस्समष्टिपुरुषः तस्मादपि परभूतोऽदृश्यत्वादिगुणकोऽक्षरशब्दाभिहितः परमात्मेत्यर्थः । अश्नुत इति वा, न क्षरतीति वाऽक्षरम् । तदव्याकृतेऽपि स्वविकारव्याप्त्या वा महदादिवन्नामान्तराभिलापयोग्यक्षरणाभावाद्वाऽक्षरत्वं कथञ्चिदुपपद्यते ॥ २३ ॥

56 रूपोपन्यासाच्च । १ । २ । २४ ॥

*अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशश्श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ इतीदृशं रूपं सर्वभूतान्तरात्मनः परमात्मन एव संभवति; अतश्च परमात्मा ॥ २४ ॥ इति अदृश्यत्वादिगुणकाधिकरणम् ॥ ५ ॥

अथ वैश्वानराधिकरणम् ॥ ६ ॥

57 वैश्वानरस्साधारणशब्दविशेषात् । १ । २ । २५ ॥

इदमामनन्ति च्छन्दोगाः *आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति प्रक्रम्य *यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते इति । तत्र संदेहः— किमयं वैश्वानर आत्मा परमात्मेति शक्यनिर्णयः, उत नेति । किं प्राप्तम् ? अशक्यनिर्णय इति । कुतः ? वैश्वानरशब्दस्य चतुर्ष्वर्थेषु प्रयोगदर्शनात्—जाठराग्नौ तावत् *अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यावदेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोतीति । महाभूततृतीये च *विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् । इति देवतायां च *वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः इति । परमात्मनि च *तदात्मन्येव

Digitization by Arya Samaj Charitable Foundation, Chennai

हृदय्येऽग्नौ वैश्वानरे प्रास्यत् इति, *स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते इति च। वाक्योपक्रमादिषूपलभ्यमानान्यपि लिङ्गानि सर्वानुगुणतया नेतुं शक्यानीति ॥

एवं प्राप्तेऽभिधीयते—वैश्वानरस्साधारणशब्दविशेषात्। वैश्वानरः पर एवात्मा; कुतः? साधारणशब्दविशेषात्—विशेष्यत इति विशेषः; साधारणस्य वैश्वानरशब्दस्य परमात्मासाधारणैर्धर्मैर्विशेष्यमाणत्वादित्यर्थः। तथाहि—औपमन्यवादयः पञ्चेमे महर्षयस्समेत्य *को न आत्मा किं ब्रह्मेति विचार्य *उद्दालको ह वै भगवन्तोऽयमारुणिस्संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेत्युद्दालकस्य वैश्वानरात्मविज्ञानमवगम्य तमभ्याजग्मुः। स चोद्दालक एतान्वैश्वानरात्मजिज्ञासूनभिलक्ष्यात्मनश्च तत्राकृत्स्नवेदित्वं मत्वा *तान् होवाच अश्वपतिर्वै भगवन्तोऽयं कैकयस्संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति। ते चोद्दालकषष्ठास्तमश्वपतिमभ्याजग्मुः। स च तान्महर्षीन्यथार्हं पृथगभ्यर्च्य *न मे स्तेनः इत्यादिना *यक्ष्यमाणो ह वै भगवन्तोऽहमस्मीत्यन्तेनात्मनो व्रतस्थतया प्रतिग्रहयोग्यतां ज्ञापयन्नेव ब्रह्मविद्भिरपि प्रतिषिद्धपरिहरणीयतां विहितकर्मकर्तव्यतां च प्रज्ञाप्य *यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भवन्तः इत्यवोचत्। ते च मुमुक्षवो वैश्वानरमात्मानं जिज्ञासमानास्तमेवात्मानमस्माकंब्रूहीत्यवोचन्। तदेवं *को न आत्मा किं ब्रह्मेति जीवात्मनामात्मभूतं ब्रह्म जिज्ञासमानैस्तज्ज्ञमन्विच्छद्भिर्वैश्वानरात्मज्ञसकाशमागम्य पृच्छ्यमानो वैश्वानरात्मा परमात्मेति विज्ञायते। आत्मब्रह्मशब्दाभ्यामुपक्रम्य पश्चात्सर्वत्रात्मवैश्वानरशब्दाभ्यां व्यवहाराच्च ब्रह्मशब्दस्थाने निर्दिश्यमानो वैश्वानरशब्दो ब्रह्मैवाभिधत्त इति विज्ञायते। किञ्च *स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति *तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति च वक्ष्यमाणं वैश्वानरात्मविज्ञानफलं वैश्वानरात्मानं परं ब्रह्मेति ज्ञापयति ॥ २५ ॥

इतश्च वैश्वानरः परमात्मा—

58 स्मर्यमाणमनुमानं स्यादिति। १। २। २६ ॥

द्युप्रभृतिपृथिव्यन्तमवयवविभागेन वैश्वानरस्य रूपमिहोपदिश्यते। तच्च श्रुतिस्मृतिषु परमपुरुषरूपतया प्रसिद्धम्। तदिह तदेवेदमिति स्मर्यमाणं—प्रत्यभिज्ञायमानं वैश्वानरस्य परमपुरुषत्वे अनुमानं—लिङ्गमित्यर्थः; इतिशब्दः प्रकारवचनः; इत्थंभूतं रूपं प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वेऽनुमानं स्यात्। श्रुतिस्मृतिषु हि परमपुरुषस्येत्थं रूपं प्रसिद्धम्। यथा आथर्वणे *अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशश्श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा॥ इति। अग्निरिह द्युलोकः, *असौ वै लोकोऽग्निः इति श्रुतेः। स्मरन्ति च मुनयः *द्यां मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे। दिशश्श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता॥ इति, *यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः। सूर्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्चक्षुर्दिशश्श्रोत्रं तस्मै लोकात्मने नमः॥ इति च। इह च द्युप्रभृतयो वैश्वानरस्य मूर्धाद्यवयवत्वेनोच्यन्ते।

तथा हि—तैरौपमन्यवप्रभृतिभिर्महर्षिभिः *आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति पृष्टः केकयस्तेभ्यो वैश्वानरात्मानमुपदिदिक्षुर्विशेषप्रश्नान्यथानुपपत्त्या वैश्वानरात्मन्येतैः किञ्चित् ज्ञातं किञ्चिदज्ञातमिति विज्ञाय ज्ञाताज्ञातांशबुभुत्सया तानेकैकं पप्रच्छ। तत्र *औपमन्यव कं त्वमात्मानमुपास्से इति पृष्टे *दिवमेव भगवो राजन्निति तेन चोक्ते दिवि तस्य पूर्णवैश्वानरात्मबुद्धिं निवर्तयन्वैश्वानरस्य द्यौर्मूर्धेति चोपदिशंस्तस्या वैश्वानरांशभूताया दिवः सुतेजा इति गुणनामधेयं प्राचिख्यपत्। एवं सत्ययज्ञादिभिरादित्यवाय्वाकाशाप्पृथिवीनामेकैकेनैकैकमुपास्यमानतया कथितानां, विश्वरूपः, पृथग्वर्त्मा, बहुलो, रयिः, प्रतिष्ठा इत्येकैकगुणनामधेयानि वैश्वानरात्मनश्चक्षुःप्राणसन्देहबस्तिपादावयवत्वं चोपदिष्टम्। सन्देहो मध्यकाय उच्यते। अत एवंभूतद्युमूर्धत्वादिविशिष्टं परमपुरुषस्यैव रूपमिति वैश्वानरः परमपुरुष एव॥ २६॥

पुनरप्यनिर्णयमेवाशङ्क्य परिहरति—

59 शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते। १। २। २७॥

यदुक्तं वैश्वानरः परमात्मेति निश्चीयत इति, तन्न, शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च जाठरस्याप्यग्नेरिह प्रतीयमानत्वात्। शब्दस्तावद्वाजिनां वैश्वानरविद्याप्रकरणे *स एषोऽग्निर्वैश्वानरः इति वैश्वानरसमानाधिकरणतयाऽग्निरिति श्रूयते; अस्मिन्प्रकरणे च *हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः इति वैश्वानरस्य हृदयादिस्थस्याग्नित्रयकल्पनं क्रियते। *तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहा इत्यादिना प्राणाहुत्याधारत्वं च वैश्वानरस्यावगम्यते। तथा वैश्वानरस्यास्मिन्पुरुषेऽन्तःप्रतिष्ठानं वाजसनेयिनस्समामनन्ति *स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति। अतोऽग्निशब्दसामानाधिकरण्यात् अग्नित्रेतापरिकल्पनात्प्राणाहुत्याधारभावादन्तःप्रतिष्ठानाच्च वैश्वानरस्य जाठरत्वमपि प्रतीयत इति नैकान्ततः परमात्मत्वमिति चेत्।

तन्न; तथा दृष्ट्युपदेशात्—पूर्वोक्तस्य त्रैलोक्यशरीरस्य परस्य ब्रह्मणो वैश्वानरस्य जाठराग्निशरीरतया तद्विशिष्टस्योपासनोपदेशात्। अग्निशब्दादिभिर्हि न केवलो जाठरः प्रतिपाद्यते; अपितु जाठराग्निविशिष्टः परमात्मा। कथमिदमवगम्यत इति चेत्, असंभवात्—जाठरस्य केवलस्य त्रैलोक्यशरीत्वासंभवात्। त्रैलोक्यशरीरतया प्रतिपन्नवैश्वानरसमानाधिकरणो जाठरविषयतया प्रतीयमानोऽग्निशब्दो जाठरशरीरतया तद्विशिष्टं परमात्मानमेवाभिदधातीत्यर्थः। यथोक्तं भगवता— *अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ इति।

Digitization by Arya Samaj Charitable Foundation, Chennai

जाठरानलशरीरो भूत्वेत्यर्थः। अतस्तद्विशिष्टस्योपासनमत्रोपदिश्यते। किंच पुरुषमपि चैनमधीयते वाजसनेयिनः *स एषोऽग्निर्वैश्वानरो यत्पुरुषः इति। न हि जाठरस्य केवलस्य पुरुषत्वम्। परमात्मन एव हि निरुपाधिकं पुरुषत्वम्। यथा *सहस्रशीर्षा पुरुषः *पुरुष एवेदं सर्वम्, इत्यादौ॥ २७॥

60 अत एव न देवता भूतं च। १। २। २८॥

उक्तेभ्य एव हेतुभ्यो देवतायाश्च तृतीयस्य महाभूतस्यापि न वैश्वानरत्वप्रसङ्गः॥ २८॥

61 साक्षादप्यविरोधं जैमिनिः। १। २। २९॥

वैश्वानरसमानाधिकरणस्याग्निशब्दस्य जाठराग्निशरीरतया तद्विशिष्टस्य परमात्मनो वाचकत्वम्, तथैव परमात्मन उपास्यत्वं चोक्तम्। जैमिनिस्त्वाचार्यो वैश्वानरशब्दवदग्निशब्दस्यापि परमात्मन एव साक्षात् अव्यवधानेन वाचकत्वे न कश्चिद्विरोध इति मन्यते। एतदुक्तं भवति—यथा वैश्वानरशब्दस्साधारणोऽपि परमात्मासाधारणधर्मविशेषितो विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवाभिदधातीति निश्चीयते; एवमग्निशब्दोऽप्यग्रनयनादिना येनैव गुणेन योगाज्ज्वलने वर्तते; तस्यैव गुणस्य निरुपाधिकस्य काष्ठागतस्य परमात्मनि संभवादस्मिन्प्रकरणे परमात्मासाधारणधर्मविशेषितः परमात्मानमेवाभिधत्त इति॥ २९॥

*यस्त्वेतमेवं प्रादेशमात्रमभिविमानमित्यपरिच्छिन्नस्य परस्य ब्रह्मणो द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिन्या मात्रया परिच्छिन्नत्वं कथमुपपद्यते? तत्राह—

62 अभिव्यक्तेरित्याश्मरथ्यः। १। २। ३०॥

उपासकाभिव्यक्त्यर्थं प्रादेशमात्रत्वं परमात्मन इत्याश्मरथ्य आचार्यो मन्यते। द्यौर्मूर्धा आदित्यश्चक्षुः, वायुः प्राणः, आकाशो मध्यकायः, आपो वस्तिः, पृथिवी पादौ इति द्युप्रभृतिप्रदेशसंबन्धिन्या मात्रया परिच्छिन्नत्वम् कृत्स्नमभिव्याप्नवतो विगतमानस्य ह्यभिव्यक्तेरेव हेतोर्भवति॥३०॥

मूर्धप्रभृत्यवयवविशेषैः पुरुषविधत्वं परस्य ब्रह्मणः किमर्थमिति चेत्, तत्राह—

63 अनुस्मृतेर्बादरिः। १। २। ३१॥

तथोपासनार्थमिति बादरिराचार्यो मन्यते। *यस्त्वेतमेवमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति इति ब्रह्मप्राप्तये ह्युपासनमुपदिश्यते। एतमेवमिति—उक्तप्रकारेण पुरुषाकारमित्यर्थः। सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु वर्तमानं यदन्नं

Digitization by Arya Samaj Charitable Foundation, Chennai

भोग्यं तदत्ति––सर्वत्र वर्तमानं स्वत एवानवधिकातिशयानन्दं ब्रह्मानुभवति । यत्तु सर्वैः कर्मवश्यै-रात्मभिः प्रत्येकमनन्यसाधारणमन्नं भुज्यते, तन्मुमुक्षुभिस्त्याज्यत्वादिह न गृह्यते ॥ ३१ ॥

यदि परमात्मा वैश्वानरः, कथं तर्ह्युरःप्रभृतीनां वेद्यादित्वोपदेशः, यावता जाठराग्निपरिग्रह एवैतदुपपद्यत इत्यत्राह––

64 संपत्तेरिति जैमिनिस्तथा हि दर्शयति । १ । २ । ३२ ॥

अस्य परमात्मन एव वैश्वानरस्य द्युप्रभृतिपृथिव्यन्तशरीरस्य समाराधनभूतायाः उपासकैरहरहः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसंपादनायायमुरःप्रभृतीनां वेदित्वाद्युपदेश इति जैमिनिराचार्यो मन्यते । तथाहि––परमात्मोपासनोचितमेव फलं प्राणाहुत्या अग्निहोत्रसंपत्तिं च दर्शयतीयं श्रुतिः *स य इदमविद्वानग्निहोत्रं जुहोति यथाऽङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति ॥ ३२ ॥

65 आमनन्ति चैनमस्मिन् । १ । २ । ३३ ॥

एनं परमपुरुषं द्युमूर्धत्वादिविशिष्टं वैश्वानरम् अस्मिन् उपासकशरीरे प्राणाहुत्याधारत्वाय आमनन्ति च *तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः इत्यादिना । अयमर्थः–– *यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते इति त्रैलोक्यशरीरस्य परमात्मनो वैश्वानरस्योपासनं विधाय *सर्वेषु लोकेष्वित्यादिना ब्रह्मप्राप्तिं च फलमुपदिश्य अस्यैवोपासनस्याङ्गभूतं प्राणाग्निहोत्रं *तस्य ह वा एतस्येत्यादिनोपदिशति; यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरः तस्यावयवभूतानग्न्यादित्यादीन् सुतेजोविश्वरूपादिनामधेयानुपासकशरीरे मूर्धादिपादान्तेषु संपादयति । मूर्धैव सुतेजाः-उपासकस्य मूर्धैव परमात्ममूर्धभूता द्यौरित्यर्थः । चक्षुर्विश्वरूपः––आदित्य इत्यर्थः । प्राणः पृथग्वर्त्मा––वायुरित्यर्थः । सन्देहो बहुलः- उपासकस्य मध्यकाय एव परमात्ममध्यकायभूत आकाश इत्यर्थः । वस्तिरेव रयिः–अस्य वस्तिरेव तदवयवभूता आप इत्यर्थः । पृथिव्येव पादौ–– अस्य पादावेव तत्पादभूता पृथिवीत्यर्थः । एवमुपासकः स्वशरीरे परमात्मानं त्रैलोक्यशरीरं वैश्वानरं सन्निहितमनुसन्धाय स्वकीयान्युरोलोमहृदयमनआस्यानि प्राणाहुत्याधारस्य परमात्मनो वैश्वानरस्य वेदिबर्हिर्गार्हपत्यान्वाहार्यपचनाहवनीयानग्निहोत्रोपकरणभूतान्परिकल्प्य प्राणाहुतेश्चाग्निहोत्रत्वं परिकल्प्यैवंविधेन प्राणाग्निहोत्रेण परमात्मानं वैश्वानरमाराधयेदिति *उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः इत्यादिनोपदिश्यते । अतः परमात्मा पुरुषोत्तम एव वैश्वानर इति सिद्धम् ॥ ३३ ॥

इति वैश्वानराधिकरणम् ॥ ६ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः

प्रथमाध्याये-तृतीयः पादः-द्युभ्वाद्यधिकरणम् ॥ १ ॥

66 द्युभ्वाद्यायतनं स्वशब्दात् । १ । ३ । १ ॥

आथर्वणिका अधीयते *यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैः, तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः इति। तत्र संशयः—किमयं द्युपृथिव्यादीनामायतनत्वेन श्रूयमाणो जीवः, उत परमात्मेति। किं युक्तम्? जीव इति। कुतः? *अरा इव रथनाभौ संहता यत्र नाड्यस्स एषोऽन्तश्चरते बहुधा जायमानः इति परस्मिन् श्लोके पूर्ववाक्यप्रस्तुतं द्युपृथिव्याद्यायतनं यत्रेति पुनरपि सप्तम्यन्तेन परामृश्य तस्य नाड्याधारत्वमुक्त्वा, पुनरपि *स एषोऽन्तश्चरते बहुधा जायमान इति तस्य बहुधा जायमानत्वं चोच्यते; नाडीसंबन्धो देवादिरूपेण बहुधा जायमानत्वं च जीवस्यैव धर्मः। अस्मिन्नपि श्लोके *ओतं मनस्सह प्राणैश्च सर्वैरिति प्राणपञ्चकस्य मनसश्चाश्रयत्वमुच्यमानं जीवधर्म एव। एवं जीवत्वे निश्चिते सति द्युपृथिव्याद्यायतनत्वादिकं यथाकथञ्चित्सङ्गमयितव्यमिति ॥

एवं प्राप्ते प्रचक्ष्महे-द्युभ्वाद्यायतनं स्वशब्दात्।द्युपृथिव्यादीनामायतनं परं ब्रह्म। कुतः? स्वशब्दात् परब्रह्मासाधारणशब्दात्। *अमृतस्यैष सेतुरिति परस्य ब्रह्मणोऽसाधारणश्शब्दः। *तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते इति सर्वत्रोपनिषत्सु स एवामृतत्वप्राप्तिहेतुश्श्रूयते। सिनोतेश्च बन्धनार्थत्वात् सेतुः—अमृतस्य प्रापक इत्यर्थः। सेतुरिव वा सेतुः—नद्यादिषु सेतुर्हि कूलस्य प्रतिलम्भकः—संसारार्णवपारभूतस्यामृतस्यैष प्रतिलम्भक इत्यर्थः। आत्मशब्दश्च निरुपाधिकः परस्मिन्ब्रह्मणि मुख्यवृत्तः, आप्नोतीति ह्यात्मा; स्वेतरसमस्तस्य नियन्तृत्वेन व्याप्तिस्तस्यैव संभवति। अतस्सोऽपि तस्यैव शब्दः। *यस्सर्वज्ञस्सर्वविदित्याद्यश्चोपरितनाः परस्यैव ब्रह्मणश्शब्दाः। नाड्याधारत्वं तस्यापि संभवति *सन्ततं सिराभिस्तु लम्बत्याकोशसन्निभमित्यारभ्य *तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः इति श्रवणात्। *बहुधा जायमानः इत्यपि परस्मिन् ब्रह्मणि सङ्गच्छते—*अजायमानो बहुधा विजायते, तस्य धीराः परिजानन्ति योनिमिति देवादीनां समाश्रयणीयत्वाय तत्तज्जातीयरूपसंस्थानगुणकर्मसमन्वितः स्वकीयं स्वभावमजहदेव स्वेच्छया बहुधा विजायते परः पुरुष इत्यभिधानात्। स्मृतिरपि *अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया॥ इति। मनःप्रभृतिजीवोपकरणाधारत्वं च सर्वाधारस्य परस्यैवोपपद्यते ॥१॥

इतश्च परमपुरुषः—

67 मुक्तोपसृप्यव्यपदेशाच्च । १ । ३ । २ ॥

अयं द्युपृथिव्याद्यायतनभूतः पुरुषः संसारबन्धान्मुक्तैरपि प्राप्यतया व्यपदिश्यते *यदा

Digitization by Arya Samaj Charitable Foundation, Chennai

पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ *यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ इति । संसारबन्धनाद्विमुक्ता एव हि विधूतपुण्यपापा निरञ्जना नामरूपाभ्यां विनिर्मुक्ताश्च । पुण्यपापनिबन्धनाचित्संसर्गप्रयुक्तनामरूपभाक्त्वमेव हि संसारः । अतो विधूतपुण्यपापैर्निरञ्जनैः प्रकृतिसंसर्गरहितैः परेण ब्रह्मणा परमं साम्यमापन्नैः प्राप्यतया निर्दिष्टो द्युपृथिव्याद्यायतनभूतः पुरुषः परं ब्रह्मैव ॥ २ ॥

परब्रह्मासाधारणशब्दादिभिः परमेव ब्रह्मेति प्रसाध्य, प्रत्यगात्मासाधारणशब्दाभावाच्चायं पर एवेत्याह—

68 नानुमानमतच्छब्दात्प्राणभृच्च । १ । ३ । ३ ॥

यथाऽस्मिन्प्रकरणे प्रतिपादकशब्दाभावात्प्रधानं न प्रतिपाद्यम्; एवं प्राणभृदपीत्यर्थः । अनुमीयत इत्यनुमानं परोक्तं प्रधानमुच्यते, अनुमानप्रमितत्वादानुमानमिति वा । अतच्छब्दात्—तद्वाचिशब्दाभावादित्यर्थः । *अर्थाभावे यदव्ययमित्यव्ययीभावः ॥ ३ ॥

इतश्चायं न प्रत्यगात्मा—

69 भेदव्यपदेशात् । १ । ३ । ४ ॥

*समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ इत्यादिभिर्जीवाद्विलक्षणत्वेनायं व्यपदिश्यते । अनीशया भोग्यभूतया प्रकृत्या मुह्यमानश्शोचति जीवः । अयं यदा स्वस्मादन्यं सर्वस्येशं प्रीयमाणम्, अस्य ईश्वरस्य महिमानं च निखिलजगन्नियमनरूपं पश्यति; तदा वीतशोको भवति ॥ ४ ॥

70 प्रकरणात् । १ । ३ । ५ ॥

प्रकरणं चेदं परस्य ब्रह्मण इति *अदृश्यत्वादिगुणको धर्मोक्तेः इत्यत्रैव प्रदर्शितम् । नाडीसंबन्धबहुधाजायमानत्वमनःप्राणाधारत्वैश्च प्रकरणविच्छेदाशङ्कामात्रमत्र पर्यहार्ष्म ॥ ५ ॥

71 स्थित्यदनाभ्यां च । १ । ३ । ६ ॥

*द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ॥ इत्येकस्य कर्मफलादनम्, अन्यस्य च कर्मफलमनश्नत एव दीप्यमान-

Digitization by Arya Samaj Charitable Foundation, Chennai

तया शरीरान्तस्स्थितिमात्रं प्रतिपाद्यते। तत्र कर्मफलमनश्नन्दीप्यमान एव सर्वज्ञोऽमृतसेतुस्सर्वात्मा द्युभ्वाद्यायतनं भवितुमर्हति, न पुनः कर्मफलमदन् शोचन् प्रत्यगात्मा। अतो द्युभ्वाद्यायतनं परमात्मेति सिद्धम्॥ ६॥ इति द्युभ्वाद्यधिकरणम्॥ १॥

अथ भूमाधिकरणम्॥ २॥

72 भूमा संप्रसादादध्युपदेशात्। १। ३। ७॥

इदमामनन्ति च्छन्दोगाः *यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम् इति। अत्रायं भूमशब्दो भावप्रत्ययान्तो व्युत्पाद्यते। तथा हि पृथ्वादिषु बहुशब्दः पठ्यते। ततः *पृथ्वादिभ्य इमनिज्वा, इति इमनिच्प्रत्यये कृते *बहोर्लोपो भू च बहोः, इति प्रकृतिप्रत्यययोर्विकारे भूमेति भवति। भूमा-बहुत्वमित्यर्थः। अत्र चायं बहुशब्दो वैपुल्यवाची, न सङ्ख्यावाची, *यत्रान्यत्पश्यति...तदल्पमित्यल्पप्रतियोगित्वश्रवणात्। अल्पशब्दनिर्दिष्टधर्मिप्रतियोगिप्रतिपादनपरत्वादेव धर्मिपरश्च निश्चीयते; न धर्ममात्रपरः। तदेवं भूमेति विपुल इत्यर्थः। वैपुल्यविशेष्यश्चेहात्मेत्यवगतः *तरति शोकमात्मविदिति प्रक्रम्य भूमविज्ञानमुपदिश्य *आत्मैवेदं सर्वमिति तस्यैवोपसंहारात्। अत्र संशय्यते-किमयं भूमगुणविशिष्टः प्रत्यगात्मा, उत परमात्मेति। किं युक्तम्? प्रत्यगात्मेति। कुतः? *श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदित्यात्मजिज्ञासयोपसेदुषे नारदाय नामादिप्राणपर्यन्तेषूपास्यतयोपदिष्टेषु *अस्ति भगवो नाम्नो भूयः, *अस्ति भगवो वाचो भूयः, इत्यादयः प्रश्नाः, *वाग्वाव नाम्नो भूयसी *मनो वाव वाचो भूयः, इत्यादीनि च प्रतिवचनानि, प्राणात्प्राचीनेषु दृश्यन्ते; प्राणे तु न पश्यामः। अतः प्राणपर्यन्त एवायमात्मोपदेश इति प्रतीयते। तेनेह प्राणशब्दनिर्दिष्टः प्राणसहचारी प्रत्यगात्मैव; न वायुविशेषमात्रम्। *प्राणो ह पिता प्राणो ह माता इत्यादयश्च प्राणस्य चेतनतामवगमयन्ति। *पितृहा...मातृहा इत्यादिना सप्राणेषु पितृप्रभृतिषूपमर्दकारिणि हिंसकत्वनिमित्तोपक्रोशवचनात्तेष्वेव विगतप्राणेष्वत्यन्तोपमर्दकारिण्यप्युपक्रोशाभाववचनाच्च हिंसायोग्यश्चेतन एव प्राणशब्दनिर्दिष्टः। अप्राणेषु स्थावरेष्वपि चेतनेषूपमर्दभावाभावयोर्हिंसातदभावदर्शनादयं हिंसायोग्यतया निर्दिष्टः प्राणः प्रत्यगात्मैवेति निश्चीयते। अत एवच अरनाभिदृष्टान्ताद्युपन्यासेन प्राणशब्दनिर्दिष्टः पर इति न भ्रमितव्यम्, परस्य हिंसाप्रसङ्गाभावात्, जीवादितरस्य तद्भोग्यभोगोपकरणभूतस्य कृत्स्नस्याचिद्वस्तुनो जीवायत्तस्थितित्वेन प्रत्यगात्मन्येवारनाभिदृष्टान्तोपपत्तेश्च। अयमेव च प्राणशब्दनिर्दिष्टो भूमा; *'अस्तिभगवः प्राणाद्भूयः' इति प्रश्नस्य, 'अदो वाव प्राणाद्भूयः' इति प्रतिवचनस्य चाभावाद्भूमसंशब्दनात्प्राक्प्राणप्रकरणस्याविच्छेदात्। किञ्च प्राणवेदिनोऽतिवादित्वमुक्त्वा तमेव *एष तु वा अतिवदतीति प्रत्यभिज्ञाप्य *यस्सत्येनातिवदतीति तस्य सत्यवदनं प्राणोपासनाङ्गतयोपदिश्य उपादेयस्य सत्यवदनस्य शेषि-

Digitization by Arya Samaj Charitable Foundation, Chennai

तया पूर्वनिर्दिष्टप्राणयाथात्म्यविज्ञानं *यदा वै विजानात्यथ सत्यं वदतीत्युपदिश्य तत्सिद्ध्यर्थं च मननश्रद्धानिष्ठाप्रयत्नानुपदिश्य तदारम्भाय च प्राप्यभूतप्राणशब्दनिर्दिष्टप्रत्यगात्मस्वरूपस्य सुखरूपताज्ञानमुपादिश्य तस्य च सुखस्य विपुलता *भूमा त्वेव विजिज्ञासितव्यः इत्युपदिश्यते। तदेवं प्रत्यगात्मन एवाविद्याविमुक्तं रूपं विपुलसुखमित्युपदिष्टमिति *तरति शोकमात्मविदित्युपक्रमाविरोधश्च। अतो भूमगुणविशिष्टः प्रत्यगात्मा, यत एवं भूमगुणविशिष्टः प्रत्यगात्मा, अतएवाहमर्थे प्रत्यगात्मनि *अहमेवाधस्तादहमुपरिष्टादित्यारभ्य *अहमेवेदं सर्वमिति प्रत्यगात्मनो वैभवमुपदिशति। एवं प्रत्यगात्मत्वे निश्चिते सति तदनुगुणतया वाक्यशेषो नेतव्य इति॥

एवं प्राप्तेऽभिधीयते—भूमा संप्रसादादध्युपदेशात्। भूमगुणविशिष्टो न प्रत्यगात्मा; अपि तु परमात्मा। कुतः? संप्रसादादध्युपदेशात्; संप्रसादः—प्रत्यगात्मा, *एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते इत्युपनिषत्प्रसिद्धेः। संप्रसादात् प्रत्यगात्मनोऽधिकतया भूमविशिष्टस्य सत्यशब्दाभिधेयस्योपदेशादित्यर्थः। सत्यशब्दाभिधेयं च परं ब्रह्म। एतदुक्तं भवति—यथा नामादिषु प्राणपर्यन्तेषु पूर्वपूर्वाधिकतयोत्तरोत्तराभिधानात्पूर्वेभ्य उत्तरेषामर्थान्तरत्वम्, एवं प्राणशब्दनिर्दिष्टात्प्रत्यगात्मनोऽधिकतया निर्दिष्टस्सत्यशब्दाभिधेयस्तस्मादर्थान्तरभूत एव; सत्यशब्दनिर्दिष्ट एव भूमेति सत्याख्यं परं ब्रह्मैव भूमेत्युपदिश्यत इति। तदाह वृत्तिकारः *भूमा त्वेवेति भूमा ब्रह्म नामादिपरंपरया आत्मन ऊर्ध्वमस्योपदेशादिति। प्राणशब्दनिर्दिष्टादधिकतया सत्यस्योपदेशः कथमवगम्यत इति चेत्; *स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवतीति प्राणविदोऽतिवादित्वमुक्त्वा *एष तु वा अतिवदति यस्सत्येनातिवदतीति सत्यवेदित्वेनातिवादिनं तुशब्देन पूर्वस्मादतिवादिनो व्यावर्तयति। अत एव *एष तु वा अतिवदतीत्यत्र प्राणातिवादिनो न प्रत्यभिज्ञा। अतोऽस्यातिवादित्वनिमित्तं सत्यं पूर्वातिवादित्वनिमित्तात्प्राणादधिकमिति विज्ञायते॥

ननु च प्राणवेदिन एव सत्यवदनमङ्गत्वेनोपदिष्टम्, अतः प्राणप्रकरणाविच्छेद इत्युक्तम्। नैतद्युक्तम्—तुशब्देन ह्यतिवाद्येवान्यः प्रतीयते, न तु तस्यैवातिवादिनस्सत्यवदनाङ्गविशिष्टतामात्रम्। *एष तु वा अग्निहोत्री यस्सत्यं वदतीत्यादिष्वग्निहोत्र्यन्तराप्रतीतेः, प्रतीतस्यैवाग्निहोत्रिणस्सत्यवदनाङ्गविधानमिति क्लिष्टा गतिराश्रीयते। अत्र त्वतिवाद्यन्तरत्वनिमित्तं सत्यशब्दाभिधेयं परं ब्रह्म प्रतीयते। सत्यशब्दश्च *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु परस्मिन्ब्रह्मणि प्रयुक्तः; अतस्तन्निष्ठस्यातिवादिनः पूर्वस्मादधिकत्वं संभवतीति वाक्यस्वरससिद्धमन्यत्वं न बाधितव्यम्। अतिवादित्वं हि वस्त्वन्तरात्पुरुषार्थतयाऽतिक्रान्तस्वोपास्यवस्तुवादित्वम्। नामाद्याशापर्यन्तोपास्यवस्त्वतिक्रान्तस्वोपास्यप्राणशब्दनिर्दिष्टप्रत्यगात्मवादित्वात्प्राणविदोऽतिवादित्वम्। तस्यापि सातिशयपुरुषार्थत्वान्निरतिशयपुरुषार्थतयोपास्यपरब्रह्मवादिन एव साक्षादतिवादित्वमिति *एष तु वा अतिवदति यस्सत्येनातिवदतीत्युक्तम्। सत्येनेतीत्थंभूतलक्षणे तृतीया; सत्येन परेण ब्रह्मणोपास्येनोपलक्षितो योऽतिवदतीत्यर्थः। अत एवैवं शिष्यः प्रार्थयते *सोऽहं भगवस्सत्येनातिवदानीति। आचार्यश्च *सत्यं त्वेव विजिज्ञासितव्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

मित्याह । *आत्मतः प्राणः इति च प्राणशब्दनिर्दिष्टस्यात्मन उत्पत्तिरुच्यते । अतः *तरति शोकमात्मविदिति प्रक्रान्त आत्मा प्राणशब्दनिर्दिष्टादन्य इति गम्यते ॥

यदुक्तम् 'अस्ति भगवः प्राणाद्भूयः' इति प्रश्नस्य, 'अदो वाव प्राणाद्भूयः' इति प्रतिवचनस्य चादर्शनात्प्रक्रान्त आत्मोपदेशः प्राणोपदेशपर्यवसानो गम्यत इति; तदयुक्तम् । नहि प्रश्नप्रतिवचनाभ्यामेवार्थान्तरत्वं गम्यते; प्रमाणान्तरेणापि तत्संभवात् । उक्तश्च प्रमाणान्तरम् । 'अस्ति भगवः प्राणाद्भूयः' इत्यपृच्छतोऽयमभिप्रायः—नामादिष्वाशापर्यन्तेष्वचेतनेषु पुरुषार्थभूयस्तया पूर्वपूर्वमतिक्रान्तेष्वप्युत्तरोत्तरेषूपदिष्टेषु तत्तद्वेदिन आचार्येणातिवादित्वं नोक्तम् । प्राणशब्दनिर्दिष्टप्रत्यगात्मयाथात्म्यवेदिनस्तु पुरुषार्थभूयस्त्वातिशयं मन्वानेन *स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवतीति अतिक्रान्तवस्तुवादित्वमुक्तम् । अतोऽत्रैवात्मोपदेशस्समाप्त इति मत्वा शिष्यो भूयो न पप्रच्छ । आचार्यस्त्विदमपि सातिशयं मत्वा निरतिशयपुरुषार्थभूतं सत्यशब्दाभिधेयं परं ब्रह्म *एष तु वा अतिवदति यस्सत्येनातिवदतीति स्वयमेवोपचिक्षेप । शिष्योऽपि परमपुरुषार्थरूपे परस्मिन्ब्रह्मण्युपक्षिप्ते तत्स्वरूपतदुपासनयाथात्म्यबुभुत्सया *सोऽहं भगवस्सत्येनातिवदानीति प्रार्थयामास । ततो ब्रह्मसाक्षात्कारनिमित्तातिवादित्वसिद्धये ब्रह्मसाक्षात्कारोपायभूतं ब्रह्मोपासनम् *सत्यं त्वेव विजिज्ञासितव्यमित्युपदिश्य तदुपायभूतं ब्रह्ममननम् *मतिस्त्वेव विजिज्ञासितव्येत्युपदिश्य श्रवणप्रतिष्ठार्थत्वान्मननस्य मननोपदेशेन श्रवणमर्थसिद्धं मत्वा श्रवणोपायभूतां ब्रह्मणि श्रद्धाम् *श्रद्धा त्वेव विजिज्ञासितव्येत्युपदिश्य तदुपायभूतां च तन्निष्ठाम् *निष्ठा त्वेव विजिज्ञासितव्येत्युपदिश्य तदुपायभूतां च तदुद्योगप्रयत्नरूपां कृतिमपि *कृतिस्त्वेव विजिज्ञासितव्येत्युपदिश्य श्रवणाद्युपक्रमरूपकृतिसिद्धये प्राप्यभूतस्य सत्यशब्दाभिहितस्य ब्रह्मणस्सुखरूपता ज्ञातव्येति *सुखं त्वेव विजिज्ञासितव्यमितित्युपदिश्य निरतिशयविपुलमेव सुखं परमपुरुषार्थरूपं भवतीति तस्यैव ब्रह्मणस्सुखरूपस्य निरतिशयविपुलता ज्ञातव्येति *भूमा त्वेव विजिज्ञासितव्य इत्युपदिश्य निरतिशयविपुलसुखरूपस्य ब्रह्मणो लक्षणमिदमुच्यते *यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, इति । अयमर्थः—अनवधिकातिशयसुखरूपे ब्रह्मण्यनुभूयमाने ततोऽन्यत्किमपि न पश्यत्यनुभविता, ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वाच्च कृत्स्नस्य वस्तुजातस्य । अत ऐश्वर्यापरपर्यायविभूतिगुणविशिष्टं निरतिशयसुखरूपं ब्रह्मानुभवन् तद्व्यतिरिक्तस्य वस्तुनोऽभावादेव किमप्यन्यन्न पश्यति; अनुभाव्यस्य सर्वस्य सुखरूपत्वादेव दुःखं च न पश्यति । तदेव हि सुखम्, यदनुभूयमानं पुरुषानुकूलं भवति ॥

ननु चेदमेव जगद्ब्रह्मणोऽन्यतयाऽनुभूयमानं दुःखरूपं परिमितसुखरूपं च भवत्कथमिव ब्रह्मविभूतित्वेन तदात्मकतयाऽनुभूयमानं सुखरूपमेव भवेत्? उच्यते—कर्मवश्यानां क्षेत्रज्ञानां ब्रह्मणोऽन्यत्वेनानुभूयमानं कृत्स्नं जगत्तत्तत्कर्मानुरूपं दुःखं च परिमितसुखं च भवति । अतो ब्रह्मणोऽन्यतया परिमितसुखत्वेन दुःखत्वेन च जगदनुभवस्य कर्मनिमित्तत्वात्कर्मरूपाविद्याविमुक्तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेव जगद्विभूतिगुणविशिष्टब्रह्मानुभवान्तर्गतं सुखमेव भवति। यथा पित्तोपहतेन पीयमानं पयः पित्ततारतम्येनाल्पसुखं विपरीतं च भवति; तदेव पयः पित्तानुपहतस्य सुखायैव भवति; यथैव राजपुत्रस्य पितुर्लीलोपकरणमतथात्वेनानुसन्धीयमानं प्रियत्वमनुपगतं तथात्वानुसन्धाने प्रियतमं भवति; तथा निरतिशयानन्दस्वरूपस्य ब्रह्मणोऽनवधिकातिशयासङ्ख्येयकल्याणगुणाकरस्य लीलोपकरणं तदात्मकं चानुसन्धीयमानं जगन्निरतिशयप्रीतये भवत्येव। अतो जगदैश्वर्यविशिष्टमनवधिकातिशयसुखरूपं ब्रह्मानुभवंस्ततोऽन्यत्किमपि न पश्यति; दुःखं च न पश्यति। एतदेवोपपादयति वाक्यशेषः *स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दस्स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषां सर्वेषु लोकेष्वकामचारो भवति* इति। स्वराट्–अकर्मवश्यः। अन्यराजानः–कर्मवश्याः। तथा *न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्। सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः॥ इति च। निरतिशयसुखरूपत्वं च ब्रह्मणः *आनन्दमयोऽभ्यासादित्यत्र प्रपञ्चितम्। अतः प्राणशब्दनिर्दिष्टात्प्रत्यगात्मनोऽर्थान्तरभूतस्य सत्यशब्दाभिधेयस्य ब्रह्मणो भूमेत्युपदेशाद्भूमा परं ब्रह्म ॥७॥

73 धर्मोपपत्तेश्च । १ । ३ । ८ ॥

अस्य भूम्नो ये धर्मा आम्नायन्ते; तेऽपि परस्मिन्नेवोपपद्यन्ते। *एतदमृतमिति स्वाभाविकममृतत्वम्, *स्वे महिम्नीत्यनन्याधारत्वम्, *स एवाधस्तादित्यादि *स एवेदं सर्वमिति सर्वात्मकत्वम्, *आत्मतः प्राण इत्यादिप्राणप्रभृतिसर्वस्योत्पादकत्वमित्यादयो हि धर्माः परमात्मन एव। यत्तु* अहमेवाधस्तादित्यादिना सर्वात्मकत्वमुपदिष्टम्, तद्भूमविशिष्टस्य ब्रह्मणोऽहङ्ग्रहेणोपासनमुपदिश्यते, * अथातोऽहङ्कारादेशः इत्यहङ्ग्रहोपदेशोपक्रमात्। अहमर्थस्य प्रत्यगात्मनोऽपि ह्यात्मा परमात्मेत्यन्तर्यामिब्राह्मणादिषूक्तम्। अतः प्रत्यगर्थस्य परमात्मपर्यवसानादहंशब्दोऽपि परमात्मपर्यवसायीति प्रत्यगात्मशरीरकत्वेन परमात्मानुसन्धानार्थोऽयमहङ्ग्रहोपदेशः। परमात्मनस्सर्वशरीरतया सर्वात्मत्वात्प्रत्यगात्मनोऽप्यात्मा परमात्मा। तदेव* अथात आत्मादेश इत्यादिना *आत्मैवेदं सर्वमित्यन्तेनोच्यते। एतदेवोपपादयितुं प्रत्यगात्मनोऽप्यात्मभूतात्परमात्मनस्सर्वस्योत्पत्तिरुच्यते *तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आकाशः इत्यादिना। उपासकस्यान्तर्यामितयाऽवस्थितात्परमात्मनस्सर्वस्योत्पत्तिरित्यर्थः। अतः परमात्मनः प्रत्यगात्मशरीरकत्वज्ञानप्रतिष्ठार्थमहङ्ग्रहोपासनं कर्तव्यम्। तस्माद्भूमविशिष्टः परमात्मेति सिद्धम् ॥८॥

इति भूमाधिकरणम् ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ अक्षराधिकरणम् ॥ ३ ॥

74 अक्षरमम्बरान्तधृतेः । १ । ३ । ९ ॥

वाजसनेयिनो गार्गीप्रश्ने समामनन्ति *सहोवाचैतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायम् *इत्यादि । तत्र संशयः— किमेतदक्षरं प्रधानम्, जीवो वा, उत परमात्मेति । किं युक्तम् ? प्रधानमिति । कुतः ? *अक्षरात्परतः परः इत्यादिष्व-क्षरशब्दस्य प्रधाने प्रयोगदर्शनादस्थूलत्वादीनां च तत्र समन्वयात् । *यया तदक्षरमधिगम्यते इत्यादिषु परस्मिन्नप्यक्षरशब्दो दृश्यत इति चेन्न, प्रमाणान्तरप्रसिद्धश्रुतिप्रसिद्धयोः प्रमाणान्तर-प्रसिद्धस्य प्रथमप्रतीतेः, प्रतीतपरिग्रहे विरोधाभावात् । किंच, *यदूर्ध्वं गार्गि दिवो, यदर्वाक्पृथिव्याः इत्यारभ्य सर्वस्य कालत्रितयवर्तिनः कारणभूताकाशाधारत्वे प्रतिपादिते *कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्याकाशस्यापि कारणं तदाधारभूतं किमिति पृष्टे प्रत्युच्यमानमक्षरं सर्वविकारकारण-तया तदाधारभूतं प्रमाणान्तरप्रसिद्धं प्रधानमिति प्रतीयते; अतोऽक्षरं प्रधानम् ॥

इति प्राप्त उच्यते—अक्षरमम्बरान्तधृतेः । अक्षरं—परं ब्रह्म; कुतः ? अम्बरान्तधृतेः; अम्बरस्य-आकाशस्य, अन्तः—पारभूतम् अव्याकृतमम्बरान्तः; तस्य धृतेः—तदाधारतयाऽस्याक्षरस्योपदेशादिति यावत् । अयमर्थः— *कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्यत्राकाशशब्दनिर्दिष्टं न वायुमदम्बरम्, अपितु तत्पारभूतमव्याकृतम्, अतस्तस्याव्याकृतस्याप्याधारत्वेनोच्यमानमक्षरं नाव्याकृतं भवितु-मर्हतीति । नन्वाकाशशब्दनिर्दिष्टो न वायुमानिति कथमवगम्यते ? उच्यते— *यदूर्ध्वं गार्गि दिवो यदर्वाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतंच *इत्युक्ते त्रैकाल्यवर्तिनो विकारजातस्याधारतया निर्दिष्ट आकाशो न वायुमदाकाशो भवितुमर्हति; तस्यापि विकारान्तर्गतत्वात् । अतोऽत्राकाशशब्दनिर्दिष्टं भूतसूक्ष्ममिति प्रतीयते । ततस्तस्यापि भूतसूक्ष्मस्याधारभूतं किमिति पृच्छ्यते *कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । अतस्तदाधारतया निर्दिश्यमानमक्षरं न प्रधानं भवितुमर्हति । यत्तु श्रुतिप्रसिद्धात्प्रमाणान्तरप्रसिद्धं प्रथमं प्रतीयत इति, तन्न, अक्षरशब्दस्यावयवशक्त्या स्वार्थप्रतिपादने प्रमाणान्तरानपेक्षणात्; संबन्धग्रहणदशायामर्थस्वरूपं येन प्रमाणेनावगम्यते, न तत्प्रतिपादनदशायामपेक्षणीयम् ॥ ९ ॥

एवं तर्ह्यक्षरशब्दनिर्दिष्टो जीवोऽस्तु, तस्य भूतसूक्ष्मपर्यन्तस्य कृत्स्नस्याचिद्वस्तुन आधार-त्वोपपत्तेः; अस्थूलत्वाद्युच्यमानविशेषणोपपत्तेश्च *अव्यक्तमक्षरे लीयते *यस्याव्यक्तं शरीरं *यस्याक्षरं शरीरं *क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इत्यादिषु प्रत्यगात्मन्यप्यक्षरशब्द-प्रयोगदर्शनादित्यत्रोत्तरम्—

75 सा च प्रशासनात् । १ । ३ । १० ॥

सा चाम्बरान्तधृतिरस्याक्षरस्य प्रशासनादेव भवतीत्युपदिश्यते *एतस्य वा अक्षरस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवस्संवत्सरा इति विधृतास्तिष्ठन्ति *इत्यादिना । प्रशासनम्–प्रकृष्टं शासनम् । न चेदृशं स्वशासनाधीनसर्ववस्तुविधरणं बद्धमुक्तोभयावस्थस्यापि प्रत्यगात्मनस्संभवति । अतः पुरुषोत्तम एव प्रशासित्रक्षरम् ॥ १० ॥

76 अन्यभावव्यावृत्तेश्च । १ । ३ । ११ ॥

अन्यभावः–अन्यत्वम्, प्रधानादिभावः । अस्याक्षरस्य परमपुरुषादन्यत्वं वाक्यशेषे व्यावर्त्यते *तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ, नान्यदतोऽस्ति मन्तृ, नान्यदतोऽस्ति विज्ञातृ, एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च* इति । अत्र द्रष्टृत्वश्रोतृत्वाद्युपदेशादस्याक्षरस्याचेतनभूतप्रधानभावो व्यावर्त्यते; सर्वैरदृष्टस्यैव सतस्सर्वस्य द्रष्टृत्वाद्युपदेशाच्च प्रत्यगात्मभावो व्यावर्त्यते । अत इयमन्यभावव्यावृत्तिरस्याक्षरस्य परमपुरुषतां द्रढयति । एवं वाऽन्यभावव्यावृत्तिः–अन्यस्य सद्भावव्यावृत्तिरन्यभावव्यावृत्तिः; यथैतदक्षरमन्यैरदृष्टं सदन्येषां द्रष्टृ च सत्स्वव्यतिरिक्तस्य समस्तस्याधारभूतम्, एवमनेनादृष्टमेतस्य द्रष्टृ च सदेतस्याधारभूतमन्यन्नास्तीति वदन् *नान्यदतोऽस्ति द्रष्टृ इत्यादिवाक्यशेषोऽन्यस्य सद्भावं व्यावर्तयन्नस्याक्षरस्य प्रधानभावं प्रत्यगात्मभावं च प्रतिषेधति । किञ्च *एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः इति श्रौतं स्मार्तं च यागदानहोमादिकं सर्वं कर्म यस्याज्ञया प्रवर्तते; तदक्षरं परब्रह्मभूतः पुरुषोत्तम एवेति विज्ञायते । अपि च *यो वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः, अथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः * इति यदज्ञानात्संसारप्राप्तिर्यज्ज्ञानाच्चामृतत्वप्राप्तिस्तदक्षरं परं ब्रह्मैवेति सिद्धम् ॥ ११ ॥ इति अक्षराधिकरणम् ॥ ३ ॥

अथ ईक्षतिकर्माधिकरणम् ॥ ४ ॥

77 ईक्षतिकर्म व्यपदेशात्सः । १ । ३ । १२ ॥

आथर्वणिकास्सत्यकामप्रश्नेऽधीयते *यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः, यथा पादोदरस्त्वचा विनिर्मुच्यते एवं हवै स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते * इति । अत्र ध्यायतीक्षतिशब्दावेकविषयौ, ध्यानफलत्वादीक्षणस्य; *यथाक्रतुरस्मिँल्लोके पुरुषः इति न्यायेन ध्यानविषयस्यैव प्राप्यत्वात्, *परं पुरुषमित्युभयत्र कर्मभूतस्यार्थस्य प्रत्यभिज्ञानाच्च ॥ तत्र संशय्यते—

Digitization by Arya Samaj Charitable Foundation, Chennai

किमिह परं पुरुषमिति निर्दिष्टो जीवसमष्टिरूपोऽण्डाधिपतिश्चतुर्मुखः, उत सर्वेश्वरः पुरुषोत्तम इति । किं युक्तम्? समष्टिक्षेत्रज्ञ इति । कुतः? *स यो ह वैतद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयति इति प्रक्रम्यैकमात्रं प्रणवमुपासीनस्य मनुष्यलोकप्राप्तिमभिधाय, द्विमात्रमुपासीनस्य अन्तरिक्षलोकप्राप्तिमभिधाय, त्रिमात्रमुपासीनस्य प्राप्यतयाऽभिधीयमानो ब्रह्मलोकोऽन्तरिक्षात्परो जीवसमष्टिरूपस्य चतुर्मुखस्य लोक इति विज्ञायते; तद्गतेन चेक्ष्यमाणस्तल्लोकाधिपतिश्चतुर्मुख एव । *एतस्माज्जीवघनात्परात्परमितिच देहेन्द्रियादिभ्यः पराद्देहेन्द्रियादिभिस्सह घनीभूताज्जीवव्यष्टिपुरुषाद्ब्रह्मलोकवासिनस्समष्टिपुरुषस्य चतुर्मुखस्य परत्वेनोपपद्यते । अतोऽत्र निर्दिश्यमानः परः पुरुषस्समष्टिपुरुषश्चतुर्मुख एव । एवं चतुर्मुखत्वे निश्चिते अजरत्वादयो यथाकथञ्चिन्नेतव्याः ॥

इति प्राप्ते प्रचक्ष्महे—ईक्षतिकर्मव्यपदेशात्सः । ईक्षतिकर्म सः—परमात्मा । कुतः? व्यपदेशात्—व्यपदिश्यते हीक्षतिकर्म परमात्मत्वेन । तथाहि—ईक्षतिकर्मविषयतयोदाहृते श्लोके *तमोङ्कारेणैवायनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति । परं शान्तमजरमभयममृतमिति हि परमात्मन एवैतद्रूपम्, *एतदमृतमेतदभयमेतद्ब्रह्मेत्येवमादिश्रुतिभ्यः । *एतस्माज्जीवघनात्परात्परमिति च परमात्मन एव व्यपदेशः; न चतुर्मुखस्य, तस्यापि जीवघनशब्दगृहीतत्वात् । यस्य हि कर्मनिमित्तं देहित्वं स जीवघन इत्युच्यते; चतुर्मुखस्यापि तच्छ्रूयते *यो ब्रह्माणं विदधाति पूर्वमित्यादौ । यत्पुनरुक्तमन्तरिक्षलोकस्योपरि निर्दिश्यमानो ब्रह्मलोकश्चतुर्मुखलोक इति प्रतीयते, अतस्तत्रस्थश्चतुर्मुख इति; तदयुक्तम् *यत्तच्छान्तमजरममृतमभयमित्यादिनेक्षतिकर्मणः परमात्मत्वे निश्चिते सति ईक्षितुः स्थानतया निर्दिष्टो ब्रह्मलोको न क्षयिष्णुश्चतुर्मुखलोको भवितुमर्हति । किञ्च *यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोकमिति सर्वपापविनिर्मुक्तस्य प्राप्यतयोच्यमानं न चतुर्मुखस्थानम् । अत एव चोदाहरण श्लोके इममेव ब्रह्मलोकमधिकृत्य श्रूयते *यत्तत्कवयो वेदयन्त इति । कवयः—सूरयः । सूरिभिर्दृश्यं च वैष्णवं पदमेव, *तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्येवमादिभ्यः । न चान्तरिक्षात्परश्चतुर्मुखलोकः, मध्ये स्वर्गलोकादीनां बहूनां सद्भावात् । अतः *एतद्वै सत्यकाम परं चापरं ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायनेनैकतरमन्वेतीति प्रतिवचने यदपरं कार्यं ब्रह्म निर्दिष्टं तदैहिकामुष्मिकत्वेन द्विधा विभज्यैकमात्रं प्रणवमुपासीनानामैहिकं मनुष्यलोकावाप्तिरूपं फलमभिधाय, द्विमात्रमुपासीनानामामुष्मिकमन्तरिक्षशब्दोपलक्षितं फलं चाभिधाय, त्रिमात्रेण परब्रह्मवाचिना प्रणवेन परं पुरुषं ध्यायतां परमेव ब्रह्म प्राप्यतयोपदिशतीति सर्वं समञ्जसम् । अत ईक्षतिकर्म परमात्मा ॥ १२ ॥ इति ईक्षतिकर्माधिकरणम् ॥ ४ ॥

अथ दहराधिकरणम् ॥ ५ ॥

78 दहर उत्तरेभ्यः । १ । ३ । १३ ॥

इदमामनन्ति च्छन्दोगाः *अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् *इति । तत्र सन्देहः–किमसौ हृदयपुण्डरीकमध्यवर्ती दहराकाशो महाभूतविशेषः, उत प्रत्यगात्मा, अथ परमात्मेति । किं तावद्युक्तम्? महाभूतविशेष इति । कुतः? आकाशशब्दस्य भूताकाशे ब्रह्मणि च प्रसिद्धत्वेऽपि भूताकाशे प्रसिद्धिप्रकर्षात्, *तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यन्वेष्टव्यान्तरस्याधारतया प्रतीतेश्च ॥

इत्येवं प्राप्तेऽभिधीयते–दहर उत्तरेभ्यः । दहराकाशः परं ब्रह्म; कुतः? उत्तरेभ्यो वाक्यगतेभ्यो हेतुभ्यः । एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः इति निरुपाधिकात्मत्वमपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसङ्कल्पत्वं चेति दहराकाशे श्रूयमाणा गुणाः दहराकाशं परं ब्रह्मेति ज्ञापयन्ति । *अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिना *यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते इत्यन्तेन दहराकाशवेदिनस्सत्यसङ्कल्पत्वप्राप्तिश्चोच्यमाना दहराकाशं परं ब्रह्मेत्यवगमयति । *यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्युपमानोपमेयभावश्च दहराकाशस्य भूताकाशत्वे नोपपद्यते । हृदयावच्छेदनिबन्धन उपमानोपमेयभाव इति चेत्, तथा सति हृदयावच्छिन्नस्य द्यावापृथिव्यादिसर्वाश्रयत्वं नोपपद्यते ॥

ननुच दहराकाशस्य परमात्मत्वेऽपि बाह्याकाशोपमेयत्वं न संभवति *ज्यायान्पृथिव्या ज्यायानन्तरिक्षादित्यादौ सर्वस्माज्ज्यायस्त्वश्रवणात् । नैवम्, दहराकाशस्य हृदयपुण्डरीकमध्यवर्तित्वप्राप्ताल्पत्वनिवृत्तिपरत्वादस्य वाक्यस्य; यथा अधिकजवेऽपि सवितरि 'इषुवद्गच्छति सविता' इति वचनं गतिमान्द्यनिवृत्तिपरम् । अथ स्यात्—*एष आत्माऽपहतपाप्मेत्यादिना दहराकाशो न निर्दिश्यते, * दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमिति दहराकाशान्तर्वर्तिनस्ततोऽन्यस्यान्वेष्टव्यत्वेन प्रकृतत्वादिह *एष आत्माऽपहतपाप्मेति तस्यैवान्वेष्टव्यस्य निर्देष्टुं युक्तत्वात्; स्यादेतदेवम्, यदि श्रुतिरेव दहराकाशं तदन्तर्वर्तिनं च न व्यभाङ्क्ष्यत्; व्यभाङ्क्षीत्तु सा; तथाहि *अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमिति ब्रह्मपुरशब्देनोपास्यतया सन्निहितपरब्रह्मणः पुरत्वेनोपासकशरीरं निर्दिश्य तन्मध्यवर्ति च तदवयवभूतं पुण्डरीकाकारमल्पपरिमाणं हृदयं परस्य ब्रह्मणो वेश्मतयाऽभिधाय सर्वज्ञं सर्वशक्तिमाश्रितवात्सल्यैकजलधिमुपासकानुग्रहाय तस्मिन् वेश्मनि सन्निहितं सूक्ष्मतया ध्येयं दहराकाशशब्देन निर्दिश्य तदन्तर्वर्ति चापहतपाप्मत्वादि स्वभावतो निरस्तनिखिलहेयत्वसत्यकामत्वादिस्वाभाविकानवधिकातिशयकल्याणगुणजातं च ध्येयं *तदन्वेष्टव्यमित्युपदिश्यते । अत्र *तदन्वेष्टव्यमिति तच्छब्देन दहराकाशम्, तदन्तर्वर्ति गुणजातं च परामृश्य तदुभयमन्वेष्टव्यमित्युपदिश्यते; *यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्मेत्यनूद्य तस्मिन् दहरपुण्डरीकवेश्मनि यो दहराकाशः, यच्च तदन्तर्वर्तिगुणजातम्, तदुभयमन्वेष्टव्यमिति विधीयत इत्यर्थः । दहराकाशशब्दनिर्दिष्टस्य परब्रह्मत्वं *तस्मिन्यदन्तः इति निर्दिष्टस्यच तद्गुणत्वम्, तच्छब्देनोभयं परामृश्योभयस्याप्यन्वेष्टव्यतया विधानं

Digitization by Arya Samaj Charitable Foundation, Chennai

च कथमवगम्यत इति चेत्; तदवहितमनाश्शृणु—*यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः इति दहराकाशस्यातिमहत्तामभिधाय *उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि * इति प्रकृतमेव दहराकाशमस्मिन्निति निर्दिश्य तस्य सर्वजगदाधारत्वमभिधाय, *यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्त्समाहितम् इति पुनरप्यस्मिन्निति तमेव दहराकाशं परामृश्य, तस्मिन्नस्योपासकस्येहलोके यद्भोग्यजातमस्ति, यच्च मनोरथमात्रगोचरमिह नास्ति, सर्वं तद्भोग्यजातमस्मिन्दहराकाशे समाहितमिति निरतिशयभोग्यत्वं दहराकाशस्याभिधाय, तस्य दहराकाशस्य देहावयवभूतहृदयान्तर्वर्तित्वेऽपि देहस्य जराप्रध्वंसादौ सत्यपि परमकारणतयाऽतिसूक्ष्मत्वेन निर्विकारत्वमुक्त्वा, तत एव *एतत्सत्यं ब्रह्मपुरमिति तमेव दहराकाशं सत्यभूतं ब्रह्माख्यं पुरं निखिलजगदावासभूतमित्युपपाद्य, *अस्मिन्कामास्समाहिताः इति दहराकाशमस्मिन्निति निर्दिश्य, काम्यभूतांश्च गुणान्कामा इति निर्दिश्य, तेषां दहराकाशान्तर्वर्तित्वमुक्त्वा, तदेव दहराकाशस्य काम्यभूतकल्याणगुणविशिष्टत्वं तस्यात्मत्वंच *एष आत्माऽपहतपाप्मेत्यादिना *सत्यसङ्कल्पः इत्यन्तेन स्फुटीकृत्य *यथा ह्येवेह प्रजा अन्वाविशन्तीत्यारभ्य *तेषां सर्वेषु लोकेष्वकामचारो भवतीत्यन्तेन तदिदं गुणाष्टकं तद्विशिष्टं दहराकाशशब्दनिर्दिष्टमात्मानं चाविदुषामेतद्व्यतिरिक्तभोग्यसिद्धये च कर्म कुर्वतामन्तवत्फलावाप्तिमसत्यसङ्कल्पत्वं चाभिधाय *अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिना दहराकाशशब्दनिर्दिष्टमात्मानं तदन्तर्वर्तिनश्च काम्यभूतानपहतपाप्मत्वादिकान्गुणान्विजानतामुदारगुणसागरस्य तस्य परमपुरुषस्य प्रसादादेव सर्वकामावाप्तिस्सत्यसङ्कल्पता चोच्यते। अतो दहराकाशः परं ब्रह्म, तदन्तर्वर्ति चापहतपाप्मत्वादि काम्यगुणजातम्, तदुभयमन्वेष्टव्यं विजिज्ञासितव्यमिति चोच्यत इति निश्चीयते। तदेतद्वाक्यकारोऽपि स्पष्टयति *तस्मिन्यदन्तरिति कामव्यपदेशः इत्यादिना। अत एतेभ्यो हेतुभ्यो दहराकाशः परमेव ब्रह्म ॥ १३ ॥

79 गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च । १ । ३ । १४ ॥

इतश्च दहराकाशः परं ब्रह्म; *तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः इति एतमिति प्रकृतं दहराकाशं निर्दिश्य तत्राहरहस्सर्वेषां क्षेत्रज्ञानां गमनम्, गन्तव्यस्य तस्य दहराकाशस्य ब्रह्मलोकशब्दनिर्देशश्च दहराकाशस्य परब्रह्मतां गमयतः। कथमनयोरस्य परब्रह्मत्वसाधकत्वमित्यत आह—तथाहि दृष्टमिति। परस्मिन्ब्रह्मणि सर्वेषां क्षेत्रज्ञानामहरहस्सुषुप्तिकाले गमनमन्यत्राभिधियमानं दृष्टम्— *एवमेव खलु सोम्येमास्सर्वाः प्रजास्सति संपद्य न विदुस्सति संपत्स्यामह इति* इति, *सत आगम्य न विदुस्सत आगच्छामह इतीति च। तथा ब्रह्मलोकशब्दश्च परस्मिन्ब्रह्मणि दृष्टः *एष ब्रह्मलोकः सम्राडिति होवाचेति। मा भूदन्यत्र ब्रह्मणि गमनदर्शनम्; एतदेव तु

Digitization by Arya Samaj Charitable Foundation, Chennai

दहराकाशे सर्वेषां क्षेत्रज्ञानां प्रलयकाल इव निरस्तनिखिलदुःखानां सुषुप्तिकालेऽवस्थानं श्रूयमाणमस्य परब्रह्मत्वे पर्याप्तं लिङ्गम् । तथा ब्रह्मलोकशब्दश्च समानाधिकरणवृत्त्याऽस्मिन्दहराकाशे प्रयुज्यमानोऽस्य ब्रह्मत्वे प्रयोगान्तरनिरपेक्षं पर्याप्तं लिङ्गमित्याह–लिङ्गं चेति । निषादस्थपतिन्यायाच्च षष्ठीसमासात्समानाधिकरणसमासो न्याय्यः ॥

अथवा *अहरहर्गच्छन्त्य इति न सुषुप्तिविषयं गमनमुच्यते; अपि त्वन्तरात्मत्वेन सर्वदा वर्तमानस्य दहराकाशस्य परमपुरुषार्थभूतस्योपर्युपर्यहरहर्गच्छन्त्यः –सर्वास्मिन्काले वर्तमानाः तमजानन्त्यस्तं न विन्दन्ति–न लभन्ते; यथा हिरण्यनिधिं निहितं तत्स्थानमजानानास्तदुपरि सर्वदा वर्तमाना अपि न लभन्ते, तद्वदित्यर्थः । सेयमेवमन्तरात्मत्वेन स्थितस्य दहराकाशस्योपरि तन्नियमितानां सर्वासां प्रजानामजानतीनां सर्वदा गतिरस्य दहराकाशस्य परब्रह्मतां गमयति । तथा ह्यन्यत्र परस्य ब्रह्मणोऽन्तरात्मतयाऽवस्थितस्य स्वनियाम्याभिस्स्वस्मिन्वर्तमानाभिः प्रजाभिरवेदनं दृष्टम् । यथा अन्तर्यामिब्राह्मणे *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीति, *अदृष्टो द्रष्टा अश्रुतश्श्रोतेति च । मा भूदन्यत्र दर्शनम्; स्वयमेव त्वियं निधिदृष्टान्तावगतपरमपुरुषार्थभावस्यास्य हृदयस्थस्योपरि तदाधारतयाऽहरहस्सर्वदा सर्वासां प्रजानामजानतीनां गतिरस्य परब्रह्मत्वे पर्याप्तं लिङ्गम् ॥ १४ ॥

इतश्च दहराकाशः परं ब्रह्म––

40 धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः । १ । ३ । १५ ॥

*अथ य आत्मेति प्रकृतं दहराकाशं निर्दिश्य *स सेतुर्विधृतिरेषां लोकानामसंभेदायेत्यस्मिञ्जगद्विधरणं श्रूयमाणं दहराकाशस्य परब्रह्मतां गमयति; जगद्विधरणं हि परस्य ब्रह्मणो महिमा *एष सर्वेश्वर एष सर्वभूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति, *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः इत्यादिभ्यः । स चायं तस्य परस्य ब्रह्मणो धृत्याख्यो महिमाऽस्मिन्दहराकाश उपलभ्यते; अतो दहराकाशः परं ब्रह्म ॥ १५ ॥

41 प्रसिद्धेश्च । १ । ३ । १६ ॥

आकाशशब्दश्च परस्मिन्ब्रह्मणि प्रसिद्धः *को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात् *सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते इत्यादिषु । अपहतपाप्मत्वादिगुणसनाथा प्रसिद्धिर्भूताकाशप्रसिद्धेर्बलीयसीत्यभिप्रायः ॥ १६ ॥

एवं तावद्दहराकाशस्य भूताकाशत्वं प्रतिक्षिप्तम् । अथेदानीं दहराकाशस्य प्रत्यगात्मत्वमाशङ्क्य निराकर्तुमुपक्रमते—

Digitization by Arya Samaj Charitable Foundation, Chennai

82 इतरपरामर्शात्स इति चेन्नासंभवात् । १ । ३ । १७ ॥

यदुक्तं वाक्यशेषवशाद्दहराकाशः परं ब्रह्मेति, तदयुक्तम्, वाक्यशेषे परस्मादितरस्य जीवस्यैव साक्षात्परामर्शात् *अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म * इति । यद्यपि *दहरोऽस्मिन्नन्तर आकाश इति हृदयपुण्डरीकमध्यवर्तितयोपदिष्टस्याकाशस्योपमानोपमेयभावाद्यसंभवाद्भूताकाशत्वं न संभवति, तथापि वाक्यशेषवशात्प्रत्यगात्मत्वं युक्तमाश्रयितुम् । आकाशशब्दोऽपि प्रकाशादियोगाज्जीव एव वर्तिष्यत इति चेत्; अत्रोत्तरं—नासंभवादिति । नायं जीवः; न ह्यपहतपाप्मत्वादयो गुणा जीवे संभवन्ति ॥ १७ ॥

83 उत्तराच्चेदाविर्भूतस्वरूपस्तु । १ । ३ । १८ ॥

उत्तरात्--प्रजापतिवाक्यात् ,जीवस्यैवापहतपाप्मत्वादिगुणयोगो निश्चीयत इति चेत्। एतदुक्तं भवति—प्रजापतिवाक्यं जीवपरमेव । तथाहि *य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्स विजिज्ञासितव्यस्स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानाति * इति प्रजापतिवचनमैतिह्यरूपेणोपश्रुत्यान्वेष्टव्यात्मस्वरूपजिज्ञासया प्रजापतिमुपसेदुषे मघवते प्रजापतिर्जागरितस्वप्नसुषुप्त्यवस्थं जीवात्मानं सशरीरं क्रमेण शुश्रूषुयोग्यतापरीचिक्षिषयोपदिश्य तत्रतत्र भोग्यमपश्यते परिशुद्धात्मस्वरूपोपदेशयोग्याय तस्मै मघवते *मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम् * इति शरीरस्याधिष्ठानतामात्मनश्चाधिष्ठातृतामशरीरस्य च तस्यामृतत्वस्वरूपतां चोक्त्वा *न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इति कर्मारब्धशरीरयोगिनस्तदनुगुणसुखदुःखभागित्वरूपानर्थं तद्विमोक्षे च तदभावमभिधाय *एवमेवैष संप्रासादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *इति जीवात्मनस्स्वरूपमेव शरीरवियुक्तमुपदिदेश । *स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम् *इति प्राप्यस्य परस्य ज्योतिषः पुरुषोत्तमत्वम्, निवृत्ततिरोधानस्य परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्तिम्, प्रियाप्रियवियुक्तकर्मनिमित्तशरीराद्यपुरुषार्थाननुसन्धानं चाभिधाय *स यथा प्रयोग्य आचरणे युक्त एवमस्मिन् शरीरे प्राणो युक्तः इति यथोक्तस्वरूपस्यैव संसारदशायां कर्मतन्त्रं शरीरयोगं युग्यशकटयोगदृष्टान्तेनाभिधाय *अथ यत्रैतदाकाशमनुविषण्णं चक्षुस्स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम्, अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य(दिव्यं) दैवं चक्षुरिति चक्षुरादीनां करणत्वं रूपादीनां ज्ञेयत्वमस्य च ज्ञातृत्वं प्रदर्श्य तत एव शरीरेन्द्रियेभ्योऽस्य व्यतिरेकमुपपाद्य *स

Digitization by Arya Samaj Charitable Foundation, Chennai

वा एष एतेन दिव्येन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके इति तस्यैव विधूतकर्मनिमित्तशरीरेन्द्रियस्य मनश्शब्दाभिहितेन दिव्येन स्वाभाविकेन ज्ञानेन सर्वकामाननुभवमुक्त्वा *तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आप्तास्सर्वे च कामाः * इत्येवंविधमात्मानं ज्ञानिनो जानन्तीत्यभिधाय *सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच इत्येवंविधमात्मानं विदुषस्सर्वलोकसर्वकामावाप्त्युपलक्षितं ब्रह्मानुभवं फलमभिधायोपसंहृतम् । अतस्तत्रापहतपाप्मत्वादिगुणको ज्ञातव्यतया प्रक्रान्तो जीव एवेत्यवगतम् । अतो जीवस्यापहतपाप्मत्वादयस्संभवन्ति। अतो दहरवाक्यशेषे श्रूयमाणस्य जीवस्यापहतपाप्मत्वादिगुणसंभवात्स एव दहराकाश इति निश्चीयते—इति चेदिति ।

तत्राह—आविर्भूतस्वरूपस्तु इति । पूर्वमनृततिरोहितापहतपाप्मत्वादिगुणकस्वरूपः पश्चाद्विमुक्तकर्मबन्धश्शरीरात्समुत्थितः परं ज्योतिरुपसंपन्न आविर्भूतस्वरूपस्सन्नपहतपाप्मत्वादिगुणविशिष्टस्तत्र प्रजापतिवाक्येऽभिधीयते; दहरवाक्ये त्वतिरोहितस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते। आविर्भूतस्वरूपस्यापि जीवस्यासंभावनीयास्सेतुत्वसर्वलोकविधरणत्वादयस्सत्यशब्दनिर्वचनावगतं चेतनाचेतनयोर्नियन्तृत्वं दहराकाशस्य परब्रह्मतां साधयन्ति। सेतुत्वसर्वलोकविधरणत्वादयः आविभूतस्वरूपस्यापि न संभवन्तीति *जगद्व्यापारवर्जमित्यत्रोपपादयिष्यामः ॥ १८ ॥

यद्येवं दहरवाक्ये *अथ य एष संप्रसाद इत्यादिना जीवप्रस्तावः किमर्थ इति चेत्; तत्राह—

84 अन्यार्थश्च परामर्शः । १ । ३ । १९ ॥

दहराकाशस्यैवापहतपाप्मत्वजगद्विधरणत्वादिवन्मुक्तस्य तदुपसंपत्त्याऽपहतपाप्मत्वादिकल्याणगुणविशिष्टस्वाभाविकरूपप्राप्तिकथनेन तद्धेतुत्वरूपं परमपुरुषासाधारणं गुणमुपदेष्टुं प्रजापतिवाक्योक्तस्य जीवस्यात्र परामर्शः ।प्रजापतिवाक्ये च मुक्तात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितयोक्तम् । ब्रह्मप्रेप्सोर्हि जीवात्मनस्स्वस्वरूपं च ज्ञातव्यमेव; स्वयमपि कल्याणगुण एव सन्ननवधिकातिशयासंख्येयकल्याणगुणगणं परं ब्रह्मानुभविष्यतीति ब्रह्मोपासनफलान्तर्गतत्वात्स्वरूपयाथात्म्यविज्ञानस्य । *सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् *स तत्र पर्येति जक्षत्क्रीडन् इत्यादिकं प्रजापतिवाक्ये कीर्त्यमानं फलमपि दहरविद्याफलमेव ॥ १९ ॥

85 अल्पश्रुतेरिति चेत्तदुक्तम् । १ । ३ । २० ॥

*दहरोऽस्मिन् इत्यल्पपरिमाणश्रुतिराराग्रोपमितस्य जीवस्यैवोपपद्यते, न तु सर्वस्माज्ज्यायसो ब्रह्मण इति चेत्; तत्र यदुत्तरं वक्तव्यम्, तत्पूर्वमेवोक्तं *निचाय्यत्वादेवमित्यनेन । अतो दहराकाशोऽनाघ्राताविद्याद्यशेषदोषगन्धः स्वाभाविकनिरतिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यपरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

मितोदारगुणसागरः पुरुषोत्तम एव । प्रजापतिवाक्यनिर्दिष्टस्तु *घ्नन्ति त्वेवैनं विच्छादयन्ति इत्येवमादिभिरवगतकर्मनिमित्तदेहपरिग्रहः पश्चात्परंज्योतिरुपसंपद्याविर्भूतापहतपाप्मत्वादिगुणस्वस्वरूप इति न दहराकाशः ॥ २० ॥

इतश्चैतदेवम्—

86 अनुकृतेस्तस्य च । १ । ३ । २१ ॥

तस्य—दहराकाशस्य परस्य ब्रह्मणः, अनुकारात् अयमपहतपाप्मत्वादिगुणको विमुक्तबन्धः प्रत्यगात्मा न दहराकाशः । तदनुकारः— तत्साम्यम् । तथाहि प्रत्यगात्मनो विमुक्तस्य परब्रह्मानुकारश्श्रूयते* यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ इति । अतोऽनुकर्ता प्रजापतिवाक्यनिर्दिष्टः । अनुकार्यं ब्रह्म दहराकाशः ॥ २१ ॥

Mun 3.1.3

87 अपि स्मर्यते । १ । ३ । २२ ॥

संसारिणोऽपि मुक्तावस्थायां परमसाम्यापत्तिलक्षणः परब्रह्मानुकारः स्मर्यते *इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति ॥

केचित् *अनुकृतेस्तस्यच *अपि स्मर्यते इति सूत्रद्वयमधिकरणान्तरं *तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यस्याश्श्रुतेः परब्रह्मपरत्वनिर्णयाय प्रवृत्तं वदन्ति । तत्तु *अदृश्यत्वादिगुणको धर्मोक्तेः *द्युभ्वाद्यायतनं स्वशब्दात् इत्यधिकरणद्वयेन तस्य प्रकरणस्य परब्रह्मविषयत्वप्रतिपादनात् *ज्योतिश्चरणाभिधानात् इत्यादिषु परस्य ब्रह्मणो भारूपत्वावगतेश्च पूर्वपक्षानुत्थानादयुक्तम्; सूत्राक्षरवैरूप्यं च ॥ २२ ॥ इति दहराधिकरणम् ॥ ५ ॥

अथ प्रमिताधिकरणम् ॥ ६ ॥

88 शब्दादेव प्रमितः । १ । ३ । २३ ॥

कठवल्लीषु श्रूयते *अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद्वैतत् *अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः । एतद्वैतत् *अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्रममृतम् इति । तत्र संदिह्यते—किमयमङ्गुष्ठमात्रप्रमितः प्रत्यगात्मा, उत परमात्मेति । किं युक्तम् ? प्रत्यगात्मेति । कुतः ? जीवस्यान्यत्राङ्गुष्ठमात्रत्वश्रुतेः

Digitization by Arya Samaj Charitable Foundation, Chennai

*प्राणाधिपस्संचरति स्वकर्मभिः, अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः इति। नचान्यत्रोपासनार्थतयाऽपि परमात्मनोऽङ्गुष्ठमात्रत्वं श्रूयते। एवं निश्चिते जीवत्वे ईशानत्वं शरीरेन्द्रियभोग्यभोगोपकरणापेक्षयाऽपि भविष्यति ॥ इति प्राप्ते ब्रूमः–शब्दादेव प्रमितः–अङ्गुष्ठप्रमितः परमात्मा; कुतः ? *ईशानो भूतभव्यस्येति शब्दादेव; न च भूतभव्यस्य सर्वस्येशितृत्वं कर्मपरवशस्य जीवस्योपपद्यते ॥ २३ ॥

कथं तर्हि परमात्मनोऽङ्गुष्ठमात्रत्वमित्यत्राह–

८१ हृद्यपेक्षया तु मनुष्याधिकारत्वात् । १ । ३ । २४ ॥

परमात्मन उपासनार्थमुपासकहृदये वर्तमानत्वादुपासकहृदयस्याङ्गुष्ठप्रमाणत्वात्तदपेक्षयेदमङ्गुष्ठप्रमितत्वमुपपद्यते । जीवस्याप्यङ्गुष्ठप्रमितत्वं हृदयान्तर्वर्तित्वात्तदपेक्षमेव; तस्याराग्रमात्रत्वश्रुतेः । मनुष्याणामेवोपासकत्वसंभावनया शास्त्रस्य मनुष्याधिकारत्वान्मनुष्यहृदयस्य च तत्तदङ्गुष्ठप्रमितत्वात्खरतुरगभुजगादीनामनङ्गुष्ठप्रमितत्वेऽपि न कश्चिद्दोषः । स्थितं तावदुत्तरत्र समापयिष्यते ॥ २४ ॥

अथ एतद्गर्भे देवताधिकरणम् ॥ ७ ॥

९० तदुपर्यपि बादरायणस्संभवात् । १ । ३ । २५ ॥

परस्य ब्रह्मणोऽङ्गुष्ठप्रमितत्वोपपत्तये मनुष्याधिकारं ब्रह्मोपासनशास्त्रमित्युक्तम् । तत्प्रसङ्गेनेदानीं ब्रह्मविद्यायां देवादीनामप्यधिकारोऽस्ति नास्तीति विचार्यते । किं तावद्युक्तम् ? नास्ति देवादीनामधिकार इति । कुतः ? सामर्थ्याभावात् । न ह्यशरीराणां देवादीनां विवेकविमोकादिसाधनसप्तकानुगृहीतब्रह्मोपासनोपसंहारसामर्थ्यमस्ति । नच देवादीनां सशरीरत्वे प्रमाणमुपलभामहे । यद्यपि परिनिष्पन्नेऽपि वस्तुनि व्युत्पत्तिसंभावनया वेदान्तवाक्यानि परे ब्रह्मणि प्रमाणभावमनुभवन्ति; तथापि देवादीनां विग्रहवत्त्वप्रतिपादनपरं न किंचिदपि वाक्यमुपलभ्यते । मन्त्रार्थवादास्तु कर्मविधिशेषतयाऽन्यपरत्वान्न देवादिविग्रहसाधने प्रभवन्ति । कर्मविधयश्च स्वापेक्षितोद्देश्यकारकत्वातिरेकि देवतागतं किमपि न साधयन्ति । अत एव तासामर्थित्वमपि न संभवति । अतस्सामर्थ्यार्थित्वयोरभावाद्देवादीनामनधिकार इति ॥

एवं प्राप्ते प्रचक्ष्महे–तदुपर्यपि बादरायणस्संभवात् । तदुपर्यपि–तत्–ब्रह्मोपासनम्, उपरि–देवादिष्वपि, संभवतीति भगवान्बादरायणो मन्यते, तेषामर्थित्वसामर्थ्ययोस्संभवात् । अर्थित्वं तावदाध्यात्मिकादिदुर्विषहदुःखाभितापात्परस्मिन्ब्रह्मणि च निरस्तनिखिलदोषगन्धेऽनवधिकातिशया-

Digitization by Arya Samaj Charitable Foundation, Chennai

सङ्ख्येयकल्याणगुणगणे निरतिशयभोग्यत्वादिज्ञानाच्च संभवति। सामर्थ्यमपि पटुतरदेहेन्द्रियादिमत्तया संभवति। देहेन्द्रियादिमत्त्वंच ब्रह्मादीनां सकलोपनिषत्सु सृष्टिप्रकरणेषूपासनप्रकरणेषु च श्रूयते। तथाहि *सदेव सोम्येदमग्र आसीत्...तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यारभ्य सर्वमचेतनं तेजोबन्नप्रमुखावस्थाविशेषवद्व्याकृत्य *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति सङ्कल्प्य ब्रह्मादिस्थावरान्तं चतुर्विधं भूतजातं तत्तत्कर्मोचितशरीरं तदुचितनामभाक्चायमकरोदित्युक्तम्। एवं सर्वत्र सृष्टिवाक्येषु देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधा सृष्टिराम्नायते। देवादिभेदश्च तत्तत्कर्मानुगुणब्रह्मलोकप्रभृतिचतुर्दशलोकस्थफलभोगयोग्यदेहेन्द्रियादियोगायत्तः,आत्मनां स्वतो देवादित्वाभावात्। तथा *तद्धोभये देवासुरा अनुबुबुधिरे ते होचुः...इन्द्रो हवै देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः *तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः तौ ह प्रजापतिरुवाच* इत्यादिना स्पष्टमेव शरीरेन्द्रियवत्त्वं देवादीनां प्रतीयते। कर्मविधिशेषभूतमन्त्रार्थवादेष्वपि *वज्रहस्तः पुरन्दरः *तेनेन्द्रो वज्रमुदयच्छत् इत्यादिभिः प्रतीयमानं विग्रहादिमत्त्वं प्रमाणान्तराविरुद्धं तत्प्रमेयमेव। नचानुष्ठेयार्थप्रकाशनस्तुतिपरत्वाभ्यां प्रतीयमानार्थान्तराविवक्षा शक्यते वक्तुम्; स्तुत्याद्युपयोगित्वात्तेन विना स्तुत्याद्यनुपपत्तेश्च। गुणकथनेन हि स्तुतित्वम्। गुणानामसद्भावे स्तुतित्वमेव हीयेत। नचासता गुणेन कथितेन प्ररोचना जायते। अतः कर्म प्ररोचयन्तो गुणसद्भावं बोधयन्त्येवार्थवादाः। मन्त्राश्च कर्मसु विनियुक्तास्तत्रतत्र किञ्चित्करत्वायानुष्ठेयमर्थं प्रकाशयन्तो देवतादिगतविग्रहादिगुणविशेषमभिदधत एव तत्र किञ्चित्कुर्वन्ति, अन्यथेन्द्रादिस्मृत्यनुपपत्तेः। नच निर्विशेषा देवता धियमधिरोहति। तत्र प्रमाणान्तराप्राप्तान्गुणान् स्वयमेव बोधयित्वा तैः कर्म प्ररोचयन्ति; गुणविशिष्टं वा प्रकाशयन्ति; प्राप्तांश्चानूद्य तैः प्ररोचनप्रकाशने कुर्वन्ति; विरुद्धत्वे तु तद्वाचिभिश्शब्दैरविरुद्धान्गुणान् लक्षयित्वा कुर्वन्ति। कर्मविधेश्च देवताया ऐश्वर्यमपेक्षितमेव। कामिनः कर्तव्यतया कर्म विधीयमानं स्वयं क्षणप्रध्वंसि कालान्तरभाविनः फलस्य स्वर्गादेस्साधकमपेक्षते। मन्त्रार्थवादयोश्च *वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति *यदनेन हविषाऽऽशास्ते तदश्यात्तदृध्यात्तदस्मै देवा राधन्ताम् इत्यादिषु देवतायाः कर्मणाऽऽराधितायाः फलदायित्वं तदनुगुणं चैश्वर्यं प्रतीयमानमपेक्षितत्वेन वाक्यार्थे समन्वीयते। देवपूजाभिधायिनो यजिधातोश्च यागाख्यं कर्म स्वाराध्यदेवताप्रधानं प्रतीयते। तदेवं कृत्स्नवाक्यपर्यालोचनया वाक्यादेव विध्यपेक्षितं सर्वमवगतमिति नापूर्वादिकं व्युत्पत्तिसमयानवगतं कर्मविधिष्वभिधेयतया कल्प्यतया वाऽऽश्रयितव्यम्। तथा सङ्कीर्णब्राह्मणमन्त्रार्थवादमूलेषु धर्मशास्त्रेतिहासपुराणेषु ब्रह्मादीनां देवासुरप्रभृतीनां च देहेन्द्रियादयस्स्वभावभेदाः स्थानानि भोगाः कृत्यानि चेत्येवमादयस्सुव्यक्ताः प्रतिपाद्यन्ते। अतो विग्रहादिमत्त्वाद्देवानामप्यधिकारोऽस्त्येव॥ २५॥

91 विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। १। ३। २६॥

देवादीनां विग्रहादिमत्त्वाभ्युपगमे कर्मणि विरोधः प्रसज्यते, बहुषु यागेषु युगपदेकस्ये-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्द्रस्य विग्रहवत्त्वे *अग्निमग्न आवह *इन्द्रागच्छ हरिव आगच्छेत्यादिना आहूतस्य तस्य सन्निधानानुपपत्तेः । दर्शयति चाग्न्यादीनां तत्रतत्रागमनं *कस्य वाह देवा यज्ञमागच्छन्ति कस्य वा न बहूनां यजमानानां यो वै देवताः पूर्वः परिगृह्णाति स एनाश्श्वोभूते यजते इति । अतो विग्रहादिमत्त्वे कर्मणि विरोधः प्रसज्यत इति चेत्, तन्न; अनेकप्रतिपत्तेर्दर्शनात्–दृश्यते हि सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः ॥ २६ ॥

92 शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् । १ । ३ । २७ ॥

विरोध इति वर्तते । मा भूत्कर्मणि विरोधोऽनेकशरीरप्रतिपत्तेः । शब्दे तु वैदिके विरोधः प्रसज्यते, अनित्यार्थसंयोगात् । विग्रहवत्त्वे हि सावयवत्वेनेन्द्रादेरर्थस्यानित्यत्वमनिवार्यम् । ततो देवदत्तादिशब्दवदिन्द्राद्यर्थजन्मनः प्राग्विनाशादूर्ध्वं चेन्द्रादिशब्दानां वैदिकानामर्थशून्यत्वमनित्यत्वं वा वेदस्य स्यादितिचेत्; तन्न, अतः प्रभवात्–अस्मादिन्द्रादिशब्दादेव पुनःपुनरिन्द्राद्यर्थस्य प्रभवात् । एतदुक्तं भवति–नहि देवदत्तादिशब्दवदिन्द्रादिशब्दा वैदिका व्यक्तिविशेषमात्रे सङ्केतपूर्वकाः प्रवृत्ताः; अपि तु स्वभावत एव गवादिशब्दवदाकृतिविशेषवाचित्वेन । ततश्चैकस्यामिन्द्रव्यक्तौ विनष्टायामत एव वैदिकादिन्द्रशब्दान्मनसि विपरिवर्तमानादवगततद्वाच्यभूतेन्द्राद्यर्थाकारो धाता तदाकारमेवापरमिन्द्रं सृजति; यथा कुलालो घटशब्दान्मनसि विपरिवर्तमानात्तदाकारमेव घटमिति । कथमिदवगम्यते ? प्रत्यक्षानुमानाभ्यां–श्रुतिस्मृतिभ्यामित्यर्थः । श्रुतिस्तावत् *वेदेन रूपे व्याकरोत्सतासती प्रजापतिः इति; तथा *स भूरिति व्याहरत् स भूमिमसृजत स भुव इति व्याहरत् सोऽन्तरिक्षमसृजतेत्यादि । वाचकशब्दपूर्वकं तत्तदर्थसंस्थानं स्मरन् तत्तत्संस्थानविशिष्टं तंतमर्थं सृष्टवानित्यर्थः । स्मृतिरपि *अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतस्सर्वाः प्रसूतयः ॥ इति; *सर्वेषां तु स नामानि कर्माणिच पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ इति । संस्थाः–संस्थानानि, रूपाणीति यावत् । तथा *नाम रूपंच भूतानां कृत्यानांच प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इति । अतो देवादीनां विग्रहवत्त्वेऽपि वैदिकशब्दानामानर्थक्यं, वेदस्यादिमत्त्वंच न प्रसज्यते ॥ २७ ॥

93 अत एव च नित्यत्वम् । १ । ३ । २८ ॥

यत एवेन्द्रवसिष्ठादिशब्दानां देवर्षिवाचिनां तत्तदाकारवाचित्वं, तत्तच्छब्देन तत्तदर्थस्मृतिपूर्विकाच तत्तदर्थसृष्टिः; तत एव *मन्त्रकृतो वृणीते *नम ऋषिभ्यो मन्त्रकृद्भ्यः *अयं सो अग्निरिति विश्वामित्रस्य सूक्तं भवतीत्यादिभिर्वसिष्ठादीनां मन्त्रकृत्त्वकाण्डकृत्त्वऋषित्वादौ प्रतीयमानेऽपि वेदस्य नित्यत्वमुपपद्यते । एभिरेव *मन्त्रकृतो वृणीते इत्यादिभिर्वेदशब्दैस्तत्तत्काण्डसूक्तमन्त्रकृतामृषीणामाकृतिशक्त्यादिकं परामृश्य तत्तदाकारान् तत्तच्छक्तियुक्तांश्च सृष्ट्वा प्रजापतिस्तानेव

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्तन्मन्त्रादिकरणे नियुङ्क्ते। तेऽपि प्रजापतिना आहितशक्तयस्तत्तदनुगुणं तपस्तप्त्वा नित्यसिद्धान्पूर्वपूर्ववसिष्ठादिदृष्टान् तानेव मन्त्रादीननधीत्यैव स्वरतो वर्णतश्चास्खलितान्पश्यन्ति। अतश्च वेदानां नित्यत्वमेषांच मन्त्रकृत्त्वमुपपद्यते ॥ २८ ॥

अथ स्यात्—नैमित्तिकप्रलयादिष्विन्द्राद्युत्पत्तौ वेदशब्देभ्यः पूर्वपूर्वेन्द्रादिस्मरणेन प्रजापतिना देवादिसृष्टिरुपपद्यतां नाम; प्राकृतप्रलये तु स्रष्टुः प्रजापतेर्भूताद्यहङ्कारपरिणामशब्दस्यच विनष्टत्वात्कथं प्रजापतेश्शब्दपूर्विका सृष्टिरुपपद्यते? कथन्तरां विनष्टस्य वेदस्य नित्यत्वम्? अतो वेदनित्यत्ववादिना देवादीनां विग्रहवत्त्वाभ्युपगमेऽपि लोकव्यवहारस्य प्रवाहानादिताऽऽश्रयणीयेति। अत्रोत्तरं पठति—

94 समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च। १। ३। २९ ॥

कृत्स्नोपसंहारे जगदुत्पत्त्यावृत्तावपि पूर्वोक्तात्समाननामरूपत्वादेव न कश्चिद्विरोधः। तथाहि—स भगवान्पुरुषोत्तमः प्रलयावसानसमये पूर्वसंस्थानं जगत्स्मरन् *बहु स्यामिति सङ्कल्प्य, भोग्यभोक्तृजातं स्वस्मिन् शक्तिमात्रावशेषं प्रलीनं विभज्य, महदादिब्रह्माण्डं हिरण्यगर्भपर्यन्तं यथापूर्वं सृष्ट्वा, वेदांश्च पूर्वानुपूर्वीविशेषसंस्थितानाविष्कृत्य, हिरण्यगर्भायोपदिश्य, पूर्ववदेव। देवाद्याकारजगत्सर्गे तं नियुज्य, स्वयमपि तदन्तरात्मतयाऽवतस्थे। अतो यथोक्तं सर्वमुपपन्नम्। एतदेव च वेदस्यापौरुषेयत्वं नित्यत्वं च, यत्पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यत्वम्। तदस्मासु सर्वेश्वरेऽपि समानम्। इयांस्तु विशेषः—संस्कारानपेक्षमेव स्वयमेवानुसन्धत्ते पुरुषोत्तमः। कुत इदं यथोक्तमवगम्यत इति चेत्; तत्राह—दर्शनात् स्मृतेश्च। दर्शनं तावत् *यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति। स्मृतिरपि मानवी *आसीदिदं तमोभूतम् इत्यारभ्य *सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीर्यमपासृजत्॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥ इति। तथा पौराणिकी *तत्र सुप्तस्य देवस्य नाभौ पद्ममजायत। तस्मिन्पद्मे महाभाग वेदवेदाङ्गपारगः॥ ब्रह्मोत्पन्नस्स तेनोक्तः प्रजास्सृज महामते॥ तथा *परो नारायणो देवस्तस्माज्जातश्चतुर्मुखः इति। तथा *आदिसर्गमहं वक्ष्ये, इत्यारभ्योच्यते—*सृष्ट्वा नारं तोयमन्तस्स्थितोऽहं येन स्यान्मे नाम नारायणेति। कल्पेकल्पे तत्र शयामि भूयस्सुप्तस्य मे नाभिजं स्याद्यथाऽब्जम्॥ एवंभूतस्य मे देवि नाभिपद्मे चतुर्मुखः। उत्पन्नस्स मया चोक्तः प्रजास्सृज महामते ॥ इति ॥

अतो देवादीनामप्यर्थित्वसामर्थ्ययोगाद्ब्रह्मविद्यायामधिकारोऽस्तीति सिद्धम् ॥ २९ ॥

इति देवताधिकरणम् ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ प्रमिताधिकरणगर्भे मध्वधिकरणम् ॥ ८ ॥

95 मध्वादिष्वसंभवादनधिकारं जैमिनिः। १। ३। ३०॥

ब्रह्मविद्यायां देवादीनामप्यधिकारोऽस्तीत्युक्तम्। इदमिदानीं चिन्त्यते–येषूपासनेषु या देवता एवोपास्यास्तेषु तासामधिकारोऽस्ति नेति। किं प्राप्तम्? नास्त्यधिकारस्तेषु मध्वादिष्विति जैमिनिर्मन्यते। कुतः? असंभवात्–न ह्यादित्यवस्वादिभिरुपास्या आदित्यवस्वादयोऽन्ये संभवन्ति। न च वस्वादीनां सतां वस्वादित्वं प्राप्यं भवति, प्राप्तत्वात्। मधुविद्यायामृग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यस्य रश्मिद्वारेण प्राप्तस्य रसस्याश्रयतया लब्धमधुव्यपदेशस्यादित्यस्यांशानां वस्वादिभिर्भुज्यमानानामुपास्यत्वं वस्वादित्वं च प्राप्यं श्रूयते *असौ वा आदित्यो देवमधु इत्युपक्रम्य *तद्यत्प्रथमममृतं तद्वसव उपजीवन्तीत्युक्त्वा *स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति इत्यादिना ॥ ३० ॥

96 ज्योतिषि भावाच्च। १। ३। ३१॥

*तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ज्योतिषि–परस्मिन्ब्रह्मणि उपासनं देवानां श्रूयते। देवमनुष्योभयसाधारणे परब्रह्मोपासने देवानामुपासकत्वकथनं देवानामितरोपासननिवृत्तिं द्योतयति। अत एषु वस्वादीनामनधिकारः ॥ ३१ ॥

इति प्राप्तेऽभिधीयते—

97 भावं तु बादरायणोऽस्ति हि। १। ३। ३२॥

आदित्यवस्वादीनामपि तेष्वधिकारभावं भगवान्बादरायणो मन्यते। अस्ति ह्यादित्यवस्वादीनामपि स्वावस्थब्रह्मोपासनेन वस्वादित्वप्राप्तिपूर्वकब्रह्मप्रेप्सासंभवः। इदानीं वस्वादीनामपि सतां कल्पान्तरेऽपि वस्वादित्वप्राप्तिश्चापेक्षिता भवति। अत्र हि कार्यकारणोभयावस्थब्रह्मोपासनं विधीयते *असौ वा आदित्यो देवमधु* इत्यारभ्य *अथ तत ऊर्ध्व उदेत्य* इत्यतः प्रागादित्यवस्वादिकार्यविशेषावस्थं ब्रह्मोपास्यमुपदिश्यते; *अथ तत ऊर्ध्व उदेत्य* इत्यादिना आदित्यान्तरात्मतयाऽवस्थितं कारणावस्थमेव ब्रह्मोपास्यमुपदिश्यते। तदेवं कार्यकारणोभयावस्थं ब्रह्मोपासीनः कल्पान्तरे वस्वादित्वं प्राप्य तदन्ते कारणं परं ब्रह्मैवाप्नोति। *न ह वा अस्मा उदेति न निम्रोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद इति कृत्स्नाया मधुविद्याया ब्रह्मोपनिषत्त्वश्रवणाद्ब्रह्मप्राप्तिपर्यन्तवस्वादित्वफलस्य श्रवणाच्च वस्वादिभोग्यभूतादित्यांशस्य विधीयमानमुपासनं तदवस्थस्यैव ब्रह्मण इत्यवगम्यते। अत एवंविधमुपासनमादित्यवस्वादीनामपि संभवति। एवञ्च

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मण एवोपास्यत्वात् *तं देवा ज्योतिषां ज्योतिरित्यप्युपपद्यते । तदाह वृत्तिकारः *अस्ति हि मध्वादिषु संभवो ब्रह्मण एव सर्वत्र निचाय्यत्वात् इति ॥ ३२ ॥ इति मध्वधिकरणम् ॥ ८ ॥

अथ अपशूद्राधिकरणम् ॥ ९ ॥

९४ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि । १ । ३ । ३३ ॥

ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति नवेति विचार्यते; किं युक्तम्? अस्तीति । कुतः? अर्थित्वसामर्थ्यप्रयुक्तत्वादधिकारस्य, शूद्रस्यापि तत्संभवात् । यद्यप्यग्निविद्यासाध्येषु कर्मस्वनग्निविद्यत्वाच्छूद्रस्यानधिकारः; तथापि मनोवृत्तिमात्रत्वाद्ब्रह्मोपासनस्य तत्राधिकारोऽस्त्येव । शास्त्रीयक्रियापेक्षत्वेऽप्युपासनस्य तत्तद्वर्णाश्रमोचितक्रियाया एवापेक्षितत्वाच्छूद्रस्यापि स्ववर्णोचितपूर्ववर्णशुश्रूषैव क्रिया भविष्यति । *तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः इत्यप्यग्निविद्यासाध्ययज्ञादिकर्मानधिकार एव न्यायसिद्धोऽनूद्यते । नन्वनधीतवेदस्याश्रुतवेदान्तस्य ब्रह्मस्वरूपतदुपासनप्रकारानभिज्ञस्य कथं ब्रह्मोपासनं संभवति? उच्यते—अनधीतवेदस्याश्रुतवेदान्तवाक्यस्यापीतिहासपुराणश्रवणेनापि ब्रह्मस्वरूपतदुपासनज्ञानं संभवति । अस्ति च शूद्रस्यापीतिहासपुराणश्रवणानुज्ञा *श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः इत्यादौ । दृश्यन्ते चेतिहासपुराणेषु विदुरादयो ब्रह्मनिष्ठाः । तथोपनिषत्स्वपि संवर्गविद्यायां शूद्रस्यापि ब्रह्मविद्याधिकारः प्रतीयते—शुश्रूषुं हि जानश्रुतिमाचार्यो रैक्वश्शूद्रेत्यामन्त्र्य तस्मै ब्रह्मविद्यामुपदिशति—*आजहारेमाश्शूद्रानेनैव मुखेनालापयिष्यथाः इत्यादिना । अतश्शूद्रस्याप्यधिकारस्संभवति ॥

इति प्राप्त उच्यते—न शूद्रस्याधिकारस्संभवति, सामर्थ्याभावात् । नहि ब्रह्मस्वरूपतदुपासनप्रकारमजानतस्तदङ्गभूतवेदानुवचनयज्ञादिष्वनधिकृतस्योपासनोपसंहारसामर्थ्यसंभवः । असमर्थस्य चार्थित्वसद्भावेऽप्यधिकारो न संभवति । असामर्थ्यं च वेदाध्ययनाभावात् । यथैव हि त्रैवर्णिकविषयाध्ययनविधिसिद्धस्वाध्यायसंपाद्यज्ञानलाभेन कर्मविधयो ज्ञानतदुपायादीनपरान्न स्वीकुर्वन्ति; तथा ब्रह्मोपासनविधयोऽपि । अतोऽध्ययनविधिसिद्धस्वाध्यायाधिगतज्ञानस्यैव ब्रह्मोपासनोपायत्वाच्छूद्रस्य ब्रह्मोपासनसामर्थ्यासंभवः । इतिहासपुराणे अपि वेदोपबृंहणं कुर्वती एवोपायभावमनुभवतः; न स्वातन्त्र्येण । शूद्रस्येतिहासपुराणश्रवणानुज्ञानं, पापक्षयादिफलार्थम्; नोपासनार्थम् । विदुरादयस्तु भवान्तराधिगतज्ञानाप्रमोषात् ज्ञानवन्तः प्रारब्धकर्मवशाच्चेदृशजन्मयोगिन इति तेषां ब्रह्मनिष्ठत्वम् ॥

यत्तु संवर्गविद्यायां शुश्रूषोश्शूद्रेति संबोधनं शूद्रस्याधिकारं सूचयतीति; तन्नेत्याह—शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि । शुश्रूषोर्जानश्रुतेः पौत्रायणस्य ब्रह्मज्ञानवैकल्येन हंसोक्तानादरवाक्यश्रवणात्तदैव ब्रह्मविदो रैक्वस्य सकाशं प्रत्याद्रवणाच्छुगस्य सञ्जातेति हि सूच्यते; अतस्स

Digitization by Arya Samaj Charitable Foundation, Chennai

शूद्रेत्यामन्त्र्यते, न चतुर्थवर्णत्वेन । शोचतीति हि शूद्रः; *शुचेर्दश्च इति रप्रत्यये धातोश्च दीर्घे चकारस्य च दकारे शूद्र इति भवति । अतश्शोचितृत्वमेवास्य शूद्रशब्दप्रयोगेन सूच्यते; न जातियोगः । जानश्रुतिः किल पौत्रायणो बहुद्रव्यप्रदो बह्वन्नप्रदश्च बभूव । तस्य धार्मिकाग्रेसरस्य धर्मेण प्रीतयोः कयोश्चिन्महात्मनोरस्य ब्रह्मजिज्ञासामुत्पिपादयिषतोः हंसरूपेण निशायामस्याविदूरे गच्छतोरन्यतर इतरमुवाच— *भो भोयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीत् *इति । एवं जानश्रुतिप्रशंसारूपं वाक्यमुपश्रुत्य परो हंसः प्रत्युवाच— *कम्वर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थ *इति । कं सन्तमेनं जानश्रुतिं सयुग्वानं रैक्कं ब्रह्मज्ञमिव गुणश्रेष्ठमेतदात्थ; स ब्रह्मज्ञो रैक्क एव लोके गुणवत्तरः । महता धर्मेण संयुक्तस्याप्यस्य जानश्रुतेरब्रह्मज्ञस्य को गुणः, यद्गुणजनितं तेजो रैक्कतेज इव मां दहेदित्यर्थः । एवमुक्तेन परेण कोऽसौ रैक्क इति पृष्टः लोके यत्किंचित्साध्वनुष्ठितं कर्म, यच्च सर्वचेतनगतं विज्ञानम्, तदुभयं यदीयज्ञानकर्मान्तर्भूतम्, स रैक्क इत्याह । तदेतद्धंसवाक्यं ब्रह्मज्ञानविधुरतया आत्मनिन्दागर्भं तद्वत्तया च रैक्कप्रशंसारूपं जानश्रुतिरुपश्रुत्य तत्क्षणादेव क्षत्तारं रैक्कान्वेषणाय प्रेष्य तस्मिन्विदित्वा आगते स्वयमपि रैक्कमुपसद्य गवां षट्छतं निष्कमश्वतरीरथं च रैक्कायोपहृत्य रैक्कं प्रार्थयामास *अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से इति । त्वदुपास्यां परां देवतां ममानुशाधीत्यर्थः । स च रैक्कस्स्वयोगमहिमविदितलोकत्रयो जानश्रुतेर्ब्रह्मज्ञानविधुरतानिमित्तानादरगर्भहंसवाक्यश्रवणेन शोकाविष्टतां तदनन्तरमेव ब्रह्मजिज्ञासयोद्योगं च विदित्वाऽस्य ब्रह्मविद्यायोग्यतामभिज्ञाय चिरकालसेवां विना द्रव्यप्रदानेन शुश्रूषमाणस्यास्य यावच्छक्तिप्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीति मत्वा तमनुगृह्णन् तस्य शोकाविष्टतामुपदेशयोग्यताख्यापिकां शूद्रशब्देनामन्त्रणेन ज्ञापयन्निदमाह— *अहहारे त्वा शूद्र तवैव सह गोभिरस्तु इति । सह गोभिरयं रथस्तवैवास्तु; नैतावता मह्यं दत्तेन ब्रह्मजिज्ञासया शोकाविष्टस्य तव ब्रह्मविद्या प्रतिष्ठिता भवतीत्यर्थः । स च जानश्रुतिर्भूयोऽपि स्वशक्त्यनुगुणमेव गवादिकं धनं कन्यां च प्रदायोपससाद । स रैक्कः पुनरपि तस्य योग्यतामेव ख्यापयन् शूद्रशब्देनामन्त्र्याह— *आजहारेमाश्शूद्रानेनैव मुखेनालापयिष्यथाः इति । इमानि धनानि शक्त्यनुगुणान्याजहर्थ; अनेनैव द्वारेण चिरसेवया विनाऽपि मां त्वदभिलषितं ब्रह्मोपदेशरूपवाक्यमालापयिष्यसीत्युक्त्वा तस्मा उपदिदेश । अतश्शूद्रशब्देन विद्योपदेशयोग्यताख्यापनार्थं शोक एवास्य सूचितः; न चतुर्थवर्णत्वम् ॥ ३३ ॥

99 क्षत्रियत्वगतेश्च । १ । ३ । ३४ ॥

*बहुदायीति दानपतित्वेन *बहुपाक्यः इत्यादिना *सर्वत एवमेतदन्नमत्स्यन्तीत्यन्तेन बहुतरपक्वान्नप्रदायित्वप्रतीतेः *स ह सञ्जिहान एव क्षत्तारमुवाचेति क्षत्तृप्रेषणाद्बहुग्रामप्रदानावगतजनपदाधिपत्याच्चास्य जानश्रुतेः क्षत्रियत्वप्रतीतेश्च न चतुर्थवर्णत्वम् ॥ ३४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेवमुपक्रमगताख्यायिकायां क्षत्रियत्वप्रतीतिरुक्ता; उपसंहारगताख्यायिकायामपि क्षत्रियत्वमस्य प्रतीयत इत्याह—

100 उत्तरत्र चैत्ररथेन लिङ्गात् । १ । ३ । ३५ ॥

अस्य जानश्रुतेरुपदिश्यमानायामस्यामेव संवर्गविद्यायामुत्तरत्र कीर्त्यमानेनाभिप्रतारिनाम्ना चैत्ररथेन क्षत्रियेणास्य क्षत्रियत्वं गम्यते । कथम् ? *अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे इत्यादिना *ब्रह्मचारिन्निदमुपास्महे इत्यन्तेन कापेयाभिप्रतरिणोर्भिक्षमाणस्य ब्रह्मचारिणश्च संवर्गविद्यासंबन्धित्वं प्रतीयते । तेषु चाभिप्रतारी क्षत्रियः, इतरौ ब्राह्मणौ । अतोऽस्यां विद्यायां ब्राह्मणस्य तदितरेषु च क्षत्रियस्यैवान्वयो दृश्यते; न शूद्रस्य । अतोऽस्यां विद्यायामन्वितद्विकाद्ब्राह्मणादन्यस्य जानश्रुतेरपि क्षत्रियत्वमेव युक्तम्; न चतुर्थवर्णत्वम् । नन्वस्मिन्प्रकरणेऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च न श्रुतम्; तत्कथमस्याभिप्रतारिणश्चैत्ररथत्वम् ? कथं वा क्षत्रियत्वम् ? तत्राह—लिङ्गादिति । *अथह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिम् इत्यभिप्रतारिणः कापेयसाहचर्याल्लिङ्गादस्याभिप्रतारिणः कापेयसंबन्धः प्रतीयते । अन्यत्र च *एतेन वै चैत्ररथं कापेया अयाजयन् इति कापेयसंबन्धिनश्चैत्ररथत्वं श्रूयते; तथा चैत्ररथस्य क्षत्रियत्वं *तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायत इति । अतोऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च गम्यते ॥ ३५ ॥

तदेवं न्यायविरोधिनि शूद्रस्याधिकारे लिङ्गं नोपलभ्यत इत्युक्तम्। इदानीं न्यायसिद्धश्शूद्रस्यानधिकारश्श्रुतिस्मृतिभिरनुगृह्यत इत्याह—

101 संस्कारपरामर्शात्तदभावाभिलापाच्च । १ । ३ । ३६ ॥

ब्रह्मविद्योपदेशप्रदेशषूपनयनसंस्कारः परामृश्यते— *उप त्वा नेष्ये *तं होपनिन्ये इत्यादिषु । शूद्रस्य चोपनयनादिसंस्काराभावोऽभिलप्यते *न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति *चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हतीत्यादिषु ॥ ३६ ॥

102 तदभावनिर्धारणे च प्रवृत्तेः । १ । ३ । ३७ ॥

*नैतदब्राह्मणो विवक्तुमर्हति समिध सोम्याहरेति शुश्रूषोर्जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव विद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः ॥ ३७ ॥

103 श्रवणाध्ययनार्थप्रतिषेधात् । १ । ३ । ३८ ॥

शूद्रस्य वेदश्रवणतदध्ययनतदर्थानुष्ठानानि प्रतिषिध्यन्ते *पद्यु ह वा एतच्छमशानं

Digitization by Arya Samaj Charitable Foundation, Chennai

यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यम् *तस्माच्छूद्रो बहुपशुरयज्ञीयः इति । बहुपशुः पशुसदृश इत्यर्थः। अनुपशृण्वतोऽध्ययनतदर्थज्ञानतदर्थानुष्ठानानि न संभवन्ति; अतस्तान्यपि प्रतिषिद्धान्येव ॥ ३८ ॥

104 स्मृतेश्च । १ । ३ । ३९ ॥

स्मर्यते च श्रवणादिनिषेधः *अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः इति, *न चास्योपदिशेद्धर्मं नचास्य व्रतमादिशेत् इति च । अतश्शूद्रस्यानधिकार इति सिद्धम् ॥

ये तु निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः, अन्यत्सर्वं मिथ्याभूतम्, बन्धश्चापारमार्थिकः, स च वाक्यजन्यवस्तुयाथात्म्यज्ञानमात्रनिवर्त्यः, तन्निवृत्तिरेव मोक्षः इति वदन्ति; तैर्ब्रह्मज्ञाने शूद्रादेरनधिकारो वक्तुं न शक्यते; अनुपनीतस्य अनधीतवेदस्याश्रुतवेदान्तवाक्यस्यापि यस्मात्कस्मादपि निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थोऽन्यत्सर्वं तस्मिन्परिकल्पितं मिथ्याभूतमिति वाक्याद्वस्तुयाथात्म्यज्ञानोत्पत्तेः, तावतैव बन्धनिवृत्तेश्च । न च तत्त्वमस्यादिवाक्येनैव ज्ञानोत्पत्तिः कार्या, न वाक्यान्तरेणेति नियन्तुं शक्यम्; ज्ञानस्यापुरुषतन्त्रत्वात्, सत्यां सामग्र्यामनिच्छतोऽपि ज्ञानोत्पत्तेः । न च वेदवाक्यादेव वस्तुयाथात्म्यज्ञाने सति बन्धनिवृत्तिर्भवतीति शक्यं वक्तुम्, येन केनापि वस्तुयाथात्म्यज्ञाने सति भ्रान्तिनिवृत्तेः; पौरुषेयादपि निर्विशेषचिन्मात्रं ब्रह्म परमार्थोऽन्यत्सर्वं मिथ्याभूतमिति वाक्यात् ज्ञानोत्पत्तेस्तावतैव भ्रमनिवृत्तेश्च । यथा पौरुषेयादप्याप्तवाक्याच्छुक्तिकारजतादिभ्रान्तिर्ब्राह्मणस्य शूद्रादेरपि निवर्तते, तद्वदेव शूद्रस्यापि वेदवित्संप्रदायागतवाक्याद्वस्तुयाथात्म्यज्ञानेन जगद्भ्रमनिवृत्तिरपि भविष्यति । *नचास्योपदिशेद्धर्ममित्यादिना वेदविदश्शूद्रादिभ्यो न वदन्तीति च न शक्यं वक्तुम्, तत्त्वमस्यादिवाक्यावगतब्रह्मात्मभावानां वेदशिरसि वर्तमानतया दग्धाखिलाधिकारत्वेन निषेधशास्त्रकिङ्करत्वाभावात्; अतिक्रान्तनिषेधैर्वा कैश्चिदुक्ताद्वाक्याच्छूद्रादेः ज्ञानमुत्पद्यत एव । न च वाच्यं-शुक्तिकादौ रजतादिभ्रमनिवृत्तिवत्पौरुषेयवाक्यजन्यतत्त्वज्ञानसमनन्तरं शूद्रस्य जगद्भ्रमो न निवर्तत इति; तत्त्वमस्यादिवाक्यश्रवणसमनन्तरं ब्राह्मणस्यापि जगद्भ्रमानिवृत्तेः । निदिध्यासनेन द्वैतवासनायां निरस्तायामेव तत्त्वमस्यादिवाक्यं निवर्तकज्ञानमुत्पादयतीति चेत्; पौरुषेयमपि वाक्यं शूद्रादेस्तथैवेति न कश्चिद्विशेषः । निदिध्यासनं हि नाम ब्रह्मात्मभावाभिधायि वाक्यं यदर्थप्रतिपादनयोग्यम्, तदर्थभावना; सैव विपरीतवासनां निवर्तयतीति दृष्टार्थत्वं निदिध्यासनविधेर्ब्रूषे । वेदानुवचनादीन्यपि विविदिषोत्पत्तावेवोपयुज्यन्त इति शूद्रस्यापि विविदिषायां जातायां पौरुषेयवाक्यान्निदिध्यासनादिभिर्विपरीतवासनायां निरस्तायां ज्ञानमुत्पत्स्यते; तेनैवापारमार्थिको बन्धो निवर्तिष्यते । अथवा तर्कानुगृहीतात्प्रत्यक्षादनुमानाच्च निर्विशेषस्वप्रकाशचिन्मात्रप्रत्यग्वस्तुन्यज्ञानसाक्षित्वं, तत्कृतविविधविचित्रज्ञातृज्ञेयविकल्परूपं कृत्स्नं जगच्चाध्यस्तमिति निश्चित्यैवंभूतपरिशुद्धप्रत्यग्वस्तुन्यनवरतभावनया विपरीतवासनां निरस्य तदेव प्रत्यग्वस्तु साक्षात्कृत्य

Digitization by Arya Samaj Charitable Foundation, Chennai

शूद्रादयोऽपि विमोक्ष्यन्त इति मिथ्याभूतविचित्रैश्वर्यविचित्रसृष्ट्याद्यलौकिकानन्तविशेषावलम्बिना वेदान्तवाक्येन न किञ्चित्प्रयोजनमिह दृश्यत इति शूद्रादीनामेव ब्रह्मविद्यायामधिकारस्सुशोभनः। अनेनैव न्यायेन ब्राह्मणादीनामपि ब्रह्मवेदनसिद्धेरुपनिषच्च तपस्विनी दत्तजलाञ्जलिस्स्यात् । न च वाच्यं नैसर्गिकलोकव्यवहारे भ्राम्यतोऽस्य केनचिदयं लौकिकव्यवहारो भ्रमः, परमार्थस्त्वेवमिति समर्पिते सत्येव प्रत्यक्षानुमानवृत्तबुभुत्सा जायत इति तत्समर्पिका श्रुतिरप्यास्थेयेति; यतो भवभयभीतानां साङ्ख्यादय एव प्रत्यक्षानुमानाभ्यां वस्तुनिरूपणं कुर्वन्तः प्रत्यक्षानुमानवृत्तबुभुत्सां जनयन्ति; बुभुत्सायां च जातायां प्रत्यक्षानुमानाभ्यामेव विविक्तस्वभावाभ्यां नित्यशुद्धस्वप्रकाशाद्वितीयकूटस्थचैतन्यमेव सत्, अन्यत्सर्वं तस्मिन्नध्यस्तमिति सुविवेचम्। एवंभूते स्वप्रकाशे वस्तुनि श्रुतिसमधिगम्यं विशेषान्तरं च नाभ्युपगम्यते; अध्यस्तातद्रूपनिवर्तिनी हि श्रुतिरपि त्वन्मते । न च सत आत्मन आनन्दरूपताज्ञानायोपनिषदास्थेया, चिद्रूपताया एव सकलेतरातद्रूपव्यावृत्ताया आनन्दरूपत्वात्। यस्य तु मोक्षसाधनतया वेदान्तवाक्यैर्विहितं ज्ञानमुपासनरूपम्, तच्च परब्रह्मभूतपरमपुरुषप्रीणनम्, तच्च शास्त्रैकसमधिगम्यम्, उपासनशास्त्रं चोपनयनादिसंस्कृताधीतस्वाध्यायजनितं ज्ञानं विवेकविमोकादिसाधनानुगृहीतमेव स्वोपायतया स्वीकरोति, एवंरूपोपासनप्रीतः पुरुषोत्तम उपासकं स्वाभाविकात्मयाथात्म्यज्ञानदानेन कर्मजनिताज्ञानं नाशयन्बन्धान्मोचयतीति पक्षः; तस्य यथोक्तया नीत्या शूद्रादेरनधिकार उपपद्यते ॥ ३९ ॥ इति अपशूद्राधिकरणम् ॥ ९ ॥

॥ अथ प्रमिताधिकरणशेषः ॥ ६ ॥

तदेवं प्रसक्तानुप्रसक्ताधिकारकथां परिसमाप्य प्रकृतस्याङ्गुष्ठप्रमितस्य भूतभव्येशितृत्वावगतपरब्रह्मभावोत्तम्भनं हेत्वन्तरमाह—

105 कम्पनात् । १ । ३ । ४० ॥

*अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति *अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा इत्यनयोर्वाक्ययोर्मध्ये *यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ इति कृत्स्नस्य जगतोऽग्निसूर्यादीनां चास्मिन्नङ्गुष्ठमात्रे पुरुषे प्राणशब्दनिर्दिष्टे स्थितानां सर्वेषां ततो निस्सृतानां तस्मात्सञ्जातमहाभयनिमित्तम् एजनं—कम्पनं श्रूयते। तच्छासनातिवृत्तौ किं भविष्यतीति महतो भयाद्वज्रादिवोद्यतात्कृत्स्नं जगत्कम्पत इत्यर्थः। *भयादस्याग्निस्तपतीत्यनेनैकार्थ्यात् *महद्भयं वज्रमुद्यतमिति पञ्चम्यर्थे प्रथमा । अयञ्च परस्य ब्रह्मणस्स्वभावः *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः *भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः, भीषाऽस्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चमः इति परस्य ब्रह्मणः पुरुषोत्तमस्यैवंविधैश्वर्याविगतेः ॥ ४० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इतश्चाङ्गुष्ठप्रमितः पुरुषोत्तमः—

106 ज्योतिर्दर्शनात् । १ । ३ । ४१ ॥

तयोरेवाङ्गुष्ठप्रमितविषययोर्वाक्ययोर्मध्ये परब्रह्मासाधारणं सर्वतेजसां छादकं सर्वतेजसां कारणभूतमनुग्राहकं चाङ्गुष्ठप्रमितस्य ज्योतिर्दृश्यते– *न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ इति । अयमेव श्लोक आथर्वणे परं ब्रह्माधिकृत्य श्रूयते । परज्योतिष्ट्वं च सर्वत्र परस्य ब्रह्मणश्श्रूयते । यथा *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् *अथ यदतः परो दिवो ज्योतिर्दीप्यते इत्यादिषु । अतोऽङ्गुष्ठप्रमितः परं ब्रह्म ॥४१॥ इति प्रमिताधिकरणम् ॥६॥

अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम् ॥ १० ॥

107 आकाशोऽर्थान्तरत्वादिव्यपदेशात् । १ । ३ । ४२ ॥

छान्दोग्ये श्रूयते *आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा इति । तत्र संशयः—किमयमाकाशशब्दनिर्दिष्टो मुक्तात्मा, उत परमात्मेति । किं युक्तम् ? मुक्तात्मेति । कुतः ? *अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि ॥ इति मुक्तस्यानन्तरप्रकृतत्वात्, *ते यदन्तरा इति च नामरूपविनिर्मुक्तस्य तस्याभिधानात्, *नामरूपयोर्निर्वहिता इति च स एव पूर्वावस्थयोपलिलक्षयिषितः; स एव हि देवादिरूपाणि नामानि च पूर्वमबिभृत । तस्यैव नामरूपविनिर्मुक्ता सांप्रतिक्यवस्था *तद्ब्रह्म तदमृतमित्युच्यते । आकाशशब्दश्च तस्मिन्नप्यसङ्कुचितप्रकाशयोगादुपपद्यते । ननु दहरवाक्यशेषत्वादस्य स एव दहराकाशोऽयमिति प्रतीयते, तस्य च परमात्मत्वं निर्णीतम् । मैवम्, प्रजापतिवाक्यव्यवधानात् । प्रजापतिवाक्ये च प्रत्यगात्मनो मुक्त्यवस्थान्तं रूपमभिहितम् । अनन्तरं च *विधूय पापमिति स एव मुक्तावस्थः प्रस्तुतः । अतोऽत्राकाशो मुक्तात्मा ॥

इति प्राप्त उच्यते—आकाशोऽर्थान्तरत्वादिव्यपदेशात् इति । आकाशः परं ब्रह्म; कुतः ? अर्थान्तरत्वादिव्यपदेशात् । अर्थान्तरत्वव्यपदेशस्तावत् *आकाशो ह वै नामरूपयोर्निर्वहिता इति नामरूपयोर्निर्वोढृत्वं बद्धमुक्तोभयावस्थात्प्रत्यगात्मनोऽर्थान्तरत्वमाकाशस्योपपादयति । बद्धावस्थस्स्वयं कर्मवशान्नामरूपे भजमानो न नामरूपे निर्वोढुं शक्नुयात्; मुक्तावस्थस्य जगद्व्यापारासंभवात् न नितरां नामरूपनिर्वोढृत्वम्; ईश्वरस्य तु सकलजगन्निर्माणधुरन्धरस्य नामरूपयोर्निर्वोढृत्वं श्रुत्यैव प्रतिपन्नम् *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि *यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं

Digitization by Arya Samaj Charitable Foundation, Chennai

तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते *सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते इत्यादिषु। अतो निर्वाह्यनामरूपात्प्रत्यगात्मनो नामरूपयोर्निर्वोढाऽयमाकाशोऽर्थान्तरभूतः परमेव ब्रह्म। तदेवोपपादयति *ते यदन्तरा इति। यस्मादयमाकाशो नामरूपे अन्तरा—ताभ्यामस्पृष्टोऽर्थान्तरभूतः, तस्मात्तयोर्निर्वोढा—अपहतपाप्मत्वात्सत्यसङ्कल्पत्वाच्च निर्वहितेत्यर्थः। आदिशब्देन ब्रह्मत्वात्मत्वामृतत्वानि गृह्यन्ते। निरुपाधिकबृहत्त्वादयो हि परमात्मन एव संभवन्ति; तेनात्राकाशः परमेव ब्रह्म। यत्पुनरुक्तं *धूत्वा शरीरमिति मुक्तोऽनन्तरप्रकृत इति, तन्न, *ब्रह्मलोकमभिसंभवामीति परस्यैव ब्रह्मणोऽनन्तरप्रकृतत्वात्। यद्यप्यभिसंभवितुर्मुक्तस्याभिसंभाव्यतया परं ब्रह्म निर्दिष्टम्, तथाप्यभिसंभवितुर्मुक्तस्य नामरूपनिर्वोढृत्वाद्यसंभवादभिसंभाव्यं परमेव ब्रह्म तत्र प्रत्येतव्यम्। किञ्च आकाशशब्देन प्रकृतस्य दहराकाशस्यात्र प्रत्यभिज्ञानात्, प्रजापतिवाक्यस्याप्युपासकस्वरूपकथनार्थत्वादुपास्य एव दहराकाशः प्राप्यतयेहोपसंह्रियत इति युक्तम्। आकाशशब्दश्च प्रत्यगात्मनि न क्वचिद्दृष्टचरः। अतोऽत्राकाशः परं ब्रह्म ॥ ४२ ॥

अथ स्यात्—प्रत्यगात्मनोऽर्थान्तरभूतमात्मान्तरमेव नास्ति, ऐक्योपदेशात्, द्वैतप्रतिषेधाच्च। शुद्धावस्थ एव हि प्रत्यगात्मा परमात्मा परं ब्रह्म परमेश्वर इति च व्यपदिश्यते। अतः प्रकृतान्मुक्तात्मनोऽभिसंभवितुर्नार्थान्तरमभिसंभाव्यो ब्रह्मलोकः; अतो नामरूपयोर्निर्वहिता आकाशोऽपि स एव भवितुमर्हतीति। अत उत्तरं पठति—

108 सुषुप्त्युत्क्रान्त्योर्भेदेन। १। ३। ४३ ॥

व्यपदेशादिति वर्तते, सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोऽर्थान्तरत्वेन परमात्मनो व्यपदेशात् प्रत्यगात्मनोऽर्थान्तरभूतः परमात्माऽस्त्येव। तथाहि—वाजसनेयके *कतम आत्मा योऽयं विज्ञानमयः प्राणेषु इति प्रकृतस्य प्रत्यगात्मनस्सुषुप्त्यवस्थायामकिञ्चिज्ज्ञस्य सर्वज्ञेन परमात्मना परिष्वङ्ग आम्नायते— *प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति; तथोत्क्रान्तावपि *प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्यातीति। न च स्वपत उत्क्रामतो वाऽस्य किञ्चिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन सता परिष्वङ्गान्वारोहौ संभवतः; न च क्षेत्रज्ञान्तरेण, तस्यापि सर्वज्ञत्वासंभवात् ॥४३॥

इतश्च प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मेत्याह—

109 पत्यादिशब्देभ्यः। १। ३। ४४ ॥

अयं परिष्वञ्जकः परमात्मा उत्तरत्र पत्यादिशब्दैर्व्यपदिश्यते— *सर्वस्याधिपतिस्सर्वस्य वशी सर्वस्येशानः, स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्, एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय। तमेतं वेदानुवचनेन ब्राह्मणा

Digitization by Arya Samaj Charitable Foundation, Chennai

विविदिषन्ति...एतमेव विदित्वा मुनिर्भवति, एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति *स वा एष महानज आत्माऽन्नादो वसुदानः *अजरोऽमृतोऽभयो ब्रह्मेति। एते च पतित्वजगद्विधरणत्वसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेऽपि न कथञ्चित्संभवन्ति। अतो मुक्तात्मनोऽर्थान्तरभूतो नामरूपयोर्निर्वहिता आकाशः। ऐक्योपदेशस्तु सर्वस्य चिदचिदात्मकस्य ब्रह्मकार्यत्वेन तदात्मकत्वायत्त इति *सर्वं खल्विदं ब्रह्म तज्जलान् इत्यादिभिर्वाक्यैः प्रतिपाद्यत इति पूर्वमेव समर्थितम्। द्वैतप्रतिषेधश्च तत एवेत्यनवद्यम् ॥ ४४ ॥ इति अर्थान्तरत्वादिव्यपदेशाधिकरणम् ॥ १० ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

श्रीमते रामानुजाय नमः

प्रथमाध्याये-चतुर्थः-पादः-आनुमानिकाधिकरणम् ॥ १ ॥

110 आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च । १ । ४ । १ ॥

उक्तं परमपुरुषार्थलक्षणमोक्षसाधनतया जिज्ञास्यं जगज्जन्मादिकारणं ब्रह्माचिद्वस्तुनः प्रधानादेश्चेतनाच्च बद्धमुक्तोभयावस्थाद्विलक्षणं निरस्तसमस्तहेयगन्धं सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पं समस्तकल्याणगुणात्मकं सर्वान्तरात्मभूतं निरङ्कुशैश्वर्यमिति। इदानीं कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधानपुरुषादिप्रतिपादनमुखेन प्रधानकारणत्वप्रतिपादनच्छायानुसारीण्यपि कानिचिद्वाक्यानि कासुचिच्छाखासु सन्तीत्याशङ्क्य ब्रह्मैककारणत्वस्थेम्ने तन्निराक्रियते॥ कठवल्लीष्वाम्नायते *इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥ इति। तत्र सन्देहः–किं कापिलतन्त्रसिद्धमब्रह्मात्मकं प्रधानमिहाव्यक्तशब्देनोच्यते, उत नेति। किं युक्तम्? प्रधानमिति। कुतः? *महतः परमव्यक्तमव्यक्तात्पुरुषः परः इति तन्त्रसिद्धतत्त्वप्रक्रियाप्रत्यभिज्ञानेन तस्यैव प्रतीतेः, *पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः इति पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्च। अतोऽव्यक्तं कारणमिति प्राप्तम्। तदिदमुक्तम्–आनुमानिकमप्येकेषामिति चेदिति। एकेषां शाखिनां शाखास्वानुमानिकं प्रधानमपि कारणमाम्नायत इति चेत्।

अत्रोत्तरं–नेति। नाव्यक्तशब्देनाब्रह्मात्मकं प्रधानमिहाभिधीयते। कुतः? शरीररूपकविन्यस्तगृहीतेः–शरीराख्यरूपकविन्यस्तस्य अव्यक्तशब्देन गृहीतेः। आत्मशरीरबुद्धिमनइन्द्रियविषयेषु रथिरथादिभावेन रूपितेषु रथरूपणेन विन्यस्तस्य शरीरस्यात्राव्यक्तशब्देन ग्रहणादित्यर्थः। एतदुक्तं भवति–पूर्वत्र हि *आत्मानं रथिनं विद्धि शरीरं रथमेव च। बुद्धिं तु सारथिं विद्धि मनः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। इत्यादिना, *सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् इत्यन्तेन संसाराध्वनः पारं वैष्णवं पदं प्रेप्सन्तमुपासकं रथित्वेन तच्छरीरादीनि च रथरथाङ्गत्वेन रूपयित्वा, यस्यैते रथादयो वशे तिष्ठन्ति, स एवाध्वनः पारं वैष्णवं पदमाप्नोतीत्युक्त्वा, तेषु रथादिरूपितशरीरादिषु यानि येभ्यो वशीकार्यतायां प्रधानानि, तान्युच्यन्ते *इन्द्रियेभ्यः पराः इत्यादिना। तत्र हयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषयाः वशीकार्यत्वे पराः, वश्येन्द्रियस्यापि विषयसन्निधाविन्द्रियाणां दुर्निग्रहत्वात्। तेभ्योऽपि परं प्रग्रहरूपितं मनः, मनसि विषयप्रवणे विषयासन्निधानस्याप्यकिञ्चित्करत्वात्। तस्मादपि सारथित्वरूपिता बुद्धिः परा, अध्यवसायाभावे मनसोऽप्यकिञ्चित्करत्वात्। तस्या अपि रथित्वरूपित आत्मा कर्तृत्वेन प्राधान्यात्परः; सर्वस्य चास्यात्मेच्छायत्तत्वात्, आत्मैव महानिति च विशेष्यते। तस्मादपि रथरूपितं शरीरं परम्, तदायत्तत्वाज्जीवात्मनस्सकलपुरुषार्थसाधनप्रवृत्तीनाम्। तस्मादपि परस्सर्वान्तरात्मभूतोऽन्तर्याम्यध्वनः पारभूतः परमपुरुषः; यथोक्तस्यात्मपर्यन्तस्य समस्तस्य तत्सङ्कल्पायत्तप्रवृत्तित्वात्। स खल्वन्तर्यामितयोपासनस्यापि निर्वर्तकः। *परात्तु तच्छ्रुतेरिति हि जीवात्मनः कर्तृत्वं परमपुरुषायत्तमिति वक्ष्यते। वशीकार्योपासननिर्वृत्त्युपायकाष्ठाभूतः परमप्राप्यश्च स एव। तदिदमुच्यते *पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिरिति। तथा चान्तर्यामिब्राह्मणे, *य आत्मनि तिष्ठन्नित्यादिभिस्सर्वं साक्षात्कुर्वन्सर्वं नियमयतीत्युक्त्वा *नान्योऽतोऽस्ति द्रष्टेति नियन्त्रन्तरं निषिध्यते। भगवद्गीतासु च *अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥ इति। दैवमत्र पुरुषोत्तम एव *सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं चेति वचनात्। तस्य च वशीकरणं तच्छरणागतिरेव। यथाह *ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ तमेव शरणं गच्छ इति। तदेवम् *आत्मानं रथिनं विद्धीत्यादिना रथ्यादिरूपकविन्यस्ता इन्द्रियादयः *इन्द्रियेभ्यः परा ह्यर्थाः इत्यत्र स्वशब्दैरेव प्रत्यभिज्ञायन्ते, न रथरूपितं शरीरमिति परिशेषात्तदव्यक्तशब्देनोच्यत इति निश्चीयते। अतः कापिलतन्त्रसिद्धस्य प्रधानस्य प्रसङ्ग एव नास्ति। नचात्र तत्तन्त्रसिद्धप्रक्रियाप्रत्यभिज्ञा, *इन्द्रियेभ्यः परा ह्यर्था इतीन्द्रियेभ्योऽर्थानां शब्दादीनां परत्वकीर्तनात्। नहि शब्दादय इन्द्रियाणां कारणभूतास्तद्दर्शने। *अर्थेभ्यश्च परं मनः इत्यपि न तत्तन्त्रसङ्गतम्, अकारणत्वादेव। तथा *बुद्धेरात्मा महान्परः इत्यप्यसङ्गतम्, बुद्धिशब्देन महत्तत्त्वस्याभिधानाभ्युपगमात्। नहि महतो महान्परस्संभवति। महत आत्मशब्देन विशेषणं च न सङ्गच्छते। अतो रूपकविन्यस्तानामेव ग्रहणम्। दर्शयति च तदेव *एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥ *यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेत् ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि॥ इति अजितबाह्याभ्यन्तरकरणैरस्य परमपुरुषस्य दुर्दर्शत्वमभिधाय हयादिरूपितानामिन्द्रियादीनां वशीकारप्रकारोऽयमुच्यते। *यच्छेद्वाङ्मनसी—वाचं मनसि नियच्छेत्, वाक्पूर्वकाणि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च मनसि नियच्छेदित्यर्थः। वाक्छब्दे द्वितीयायाः *सुपां सुलुक् इति लुक्। मनसीति सप्तम्याश्छान्दसो दीर्घः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्यच्छेत् ज्ञान आत्मनि–तन्मनो बुद्धौ नियच्छेत्। ज्ञानशब्देनात्र पूर्वोक्ता बुद्धिरभिधीयते। ज्ञान आत्मनीति व्यधिकरणे सप्तम्यौ। आत्मनि वर्तमाने ज्ञाने नियच्छेदित्यर्थः। ज्ञानमात्मनि महति नियच्छेत्–बुद्धिं कर्तारि महत्यात्मनि नियच्छेत्। तद्यच्छेच्छान्त आत्मनि–तं कर्तारं परस्मिन्ब्रह्मणि सर्वान्तर्यामिणि नियच्छेत्। व्यत्ययेन तदिति नपुंसकलिङ्गता। एवंभूतेन रथिना वैष्णवं पदं गन्तव्यमित्यर्थः ॥ १ ॥

अव्यक्तशब्देन कथं व्यक्तस्य शरीरस्याभिधानम्? तत्राह—

111 सूक्ष्मं तु तदर्हत्वात्। १। ४। २॥

भूतसूक्ष्ममव्याकृतं ह्यवस्थाविशेषमापन्नं शरीरं भवति; तदव्याकृतमिह शरीरावस्थमव्यक्तशब्देनोच्यते। तदर्हत्वात्–तस्याव्याकृतस्याचिद्वस्तुन एव विकारापन्नस्य रथवत्पुरुषार्थसाधनप्रवृत्त्यर्हत्वात् ॥ २ ॥

यदि भूतसूक्ष्ममव्याकृतमभ्युपगम्यते; कापिलतन्त्रसिद्धोपादाने कः प्रद्वेषः? तत्रापि हि भूतकारणमेवाव्यक्तमित्युच्यते; तत्राह—

112 तदधीनत्वादर्थवत्। १। ४। ३॥

परमकारणभूतपरमपुरुषाधीनत्वात्प्रयोजनवद्भूतसूक्ष्मम्। एतदुक्तं भवति–न वयमव्यक्तं तत्परिणामविशेषांश्च स्वरूपेण नाभ्युपगच्छामः; अपि तु परमपुरुषशरीरतया तदात्मकत्वविरहेण। तदात्मकत्वेनैव हि प्रकृत्यादयस्स्वप्रयोजनं साधयन्ति; अन्यथा स्वरूपस्थितिप्रवृत्तिभेदास्तेषां न स्युः। तथाऽनभ्युपगमादेव तन्त्रसिद्धप्रक्रियानिरसनमिति। श्रुतिस्मृत्योर्हि जगदुत्पत्तिप्रलयवादेषु परमपुरुषमहिमवादेषु च प्रकृतिविकृतिपुरुषास्तदात्मकास्सङ्कीर्त्यन्ते; यथा *पृथिव्यप्सु लीयते इत्यारभ्य *तन्मात्राणि भूतादौ लीयन्ते, भूतादिर्महति लीयते, महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति। तथा *यस्य पृथिवी शरीरं यस्यापश्शरीरं यस्य तेजश्शरीरं यस्य वायुश्शरीरं यस्याकाशश्शरीरं यस्याहङ्कारश्शरीरं यस्य बुद्धिश्शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युश्शरीरम् एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः। तथा *भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ इति, *व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव चेति, *प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि। परमात्म च सर्वेषामाधारः परमेश्वरः। विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥ इति च ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

113 ज्ञेयत्वावचनाच्च । १ । ४ । ४ ॥

यदि तन्त्रसिद्धमिहाव्यक्तमविवक्षिष्यत्, तदाऽस्य ज्ञेयत्वमवक्ष्यत्; व्यक्ताव्यक्तज्ञविज्ञानात् मोक्षं वदद्भिस्तान्त्रिकैस्तेषां सर्वेषां ज्ञेयत्वाभ्युपगमात् । न चास्य ज्ञेयत्वमुच्यते; अतो न तन्त्रसिद्धस्येह ग्रहणम् ॥ ४ ॥

114 वदतीति चेन्न प्राज्ञो हि प्रकरणात् । १ । ४ । ५ ॥

*अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥ इत्यव्यक्तस्य ज्ञेयत्वमनन्तरमेव वदतीयं श्रुतिरिति चेत्, तन्न; प्राज्ञः-परमपुरुष एव ह्यत्र श्लोके निचाय्यत्वेन प्रतिपाद्यते *विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् *एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥ इति प्राज्ञस्यैव प्रकृतत्वात् । अत एव *पुरुषान्न परं किञ्चिदिति न पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधः । तस्य च परमपुरुषस्याशब्दत्वादयो धर्माः *यत्तदद्रेश्यमग्राह्यमित्यादिश्रुतिप्रसिद्धाः । *महतः परमित्यपि *बुद्धेरात्मा महान्परः इति पूर्वप्रकृताज्जीवात्मनः परत्वमेवोच्यते ॥५॥

115 त्रयाणामेव चैवमुपन्यासः प्रश्नश्च । १ । ४ । ६ ॥

अस्मिन्प्रकरणे ह्युपायोपेयोपेतॄणां त्रयाणमेव चैवमुपन्यासः—ज्ञेयत्वेनोपन्यासः, तद्विषयश्च प्रश्नो दृश्यते, नान्यस्याव्यक्तादेः । तथाहि—नचिकेता मुमुक्षुस्सन्मृत्युप्रदत्ते वरत्रये प्रथमेन वरेणात्मनः पुरुषार्थयोग्यतापादिनीमात्मनि पितुस्सुमनस्कतां प्रतिलभ्य द्वितीयेन वरेण मोक्षोपायभूतां नाचिकेताग्निविद्यां वव्रे—*स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्ते एतद्द्वितीयेन वृणे वरेण ॥ इति । स्वर्गशब्देनात्र परमपुरुषार्थलक्षणो मोक्षोऽभिधीयते, *अमृतत्वं भजन्ते इति तत्रस्थस्य जननमरणाभावश्रवणादुत्तरत्र क्षयिफलकर्मनिन्दादर्शनाच्च; *त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू इति च प्रतिवचनात् । तृतीयेन वरेण मोक्षस्वरूपप्रश्नद्वारेणोपेयस्वरूपमुपेतृस्वरूपमुपायभूतकर्मानुगृहीतोपासनस्वरूपं च पृष्टम्—*येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥ इति । एवं मोक्षे पृष्टे तदुपदेशयोग्यतां परीक्ष्योपदिदेश—*तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ इति । तदेवं सामान्येनोपदिष्टे नचिकेताः प्रीतस्सन् *देवं मत्वा इत्युपास्यतया निर्दिष्टस्य प्राप्यभूतस्य देवस्य *अध्यात्मयोगाधिगमेन इति वेदितव्यतया निर्दिष्टस्य प्राप्तुः प्रत्यगात्मनश्च *मत्वा धीरो हर्षशोकौ जहाति इति निर्दिष्टस्य ब्रह्मोपासनस्य च स्वरूपविशोधनाय पुनः पप्रच्छ—*अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्यत्र भूताद्भव्याच्च यत्तत्पश्यसि तद्वद ॥ इति । एवं सकलेतरातीतानागतवर्तमानसाध्यसाधनसाधकविलक्षणे त्रये पृष्टे प्रथमं प्रणवं प्रशस्य तद्वाच्यं प्राप्यस्वरूपं तदन्तर्गतं च प्राप्तृस्वरूपं वाचकरूपं चोपायं पुनरपि सामान्येन ख्यापयन्प्रणवं तावदुपदिदेश—*सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥ इति । एवमुपदिश्य पुनरपि प्रणवं प्रशस्य प्रथमं तावत्प्राप्तुः प्रत्यगात्मनस्स्वरूपमाह—*न जायते म्रियते वा विपश्चित् इत्यादिना । प्राप्यस्य परस्य ब्रह्मणो विष्णोस्स्वरूपम् *अणोरणीयान् इत्यादिना *क इत्था वेद यत्र सः इत्यन्तेनोपदिशन्मध्ये *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन इत्यादिनोपायभूतस्योपासनस्य भक्तिरूपतामप्याह। *ऋतं पिबन्ताविति चोपास्यस्योपासकेन सहावस्थानात्सूपासतामुक्त्वा *आत्मानं रथिनं विद्धि इत्यादिना *दुर्गं पथस्तत्कवयो वदन्ति इत्यन्तेनोपासनप्रकारमुपासीनस्य च वैष्णवपरमपदप्राप्तिमभिधाय *अशब्दमस्पर्शम् इत्यादिनोपसंहृतम् । अतस्त्रयाणामेवात्र ज्ञेयत्वेनोपन्यासः प्रश्नश्च; तस्मान्नेह तान्त्रिकस्याव्यक्तस्य ग्रहणम् ॥ ६ ॥

116 महद्वच्च । १ । ४ । ७ ॥

यथा *बुद्धेरात्मा महान्परः इत्यत्रात्मशब्दसामानाधिकरण्यान्न तन्त्रसिद्धं महत्तत्त्वं गृह्यते; एवमव्यक्तमप्यात्मनः परत्वेनाभिधानान्न कापिलतन्त्रसिद्धं गृह्यत इति स्थितम् ॥ ७ ॥ इति आनुमानिकाधिकरणम् ॥ १ ॥

अथ चमसाधिकरणम् ॥ २ ॥

117 चमसवदविशेषात् । १ । ४ । ८ ॥

अत्रापि तन्त्रसिद्धप्रक्रिया निरस्यते, न ब्रह्मात्मकानां प्रकृतिमहदहङ्कारादीनां स्वरूपम्, श्रुतिस्मृतिभ्यां ब्रह्मात्मकानां तेषां प्रतिपादनात् । यथा आथर्वणिका अधीयते—*विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः । सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती सा जनित्री भूतभाविनी । सिताऽसिता च रक्ता च सर्वकामदुघा विभोः । पिबन्त्येनामविषमामविज्ञाताः कुमारकाः । एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगाम् ॥ ध्यानक्रियाभ्यां भगवान्भुङ्क्तेऽसौ प्रसभं विभुः । सर्वसाधारणीं दोग्ध्रीं पीड्यमानां तु यज्वभिः ॥ *चतुर्विंशतिसङ्ख्यातमव्यक्तं व्यक्तमुच्यते इति । अत्र प्रकृत्यादीनां स्वरूपमभिहितम् । यदात्मकाश्चैते प्रकृत्यादयः, स परमपुरुषोऽपि *तं षड्विंशकमित्याहुस्सप्तविंशमथापरे । पुरुषं निर्गुणं साङ्ख्यमथर्वशिरसो विदुः ॥ इति प्रतिपाद्यते । अपरे चाथर्वणिकाः *अष्टौ प्रकृतयष्षोडश विकाराः इत्यधीयते; श्वेताश्वतराश्चैवं प्रकृतिपुरुषेश्वरस्वरूपमामनन्ति *संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अनीशश्चात्मा बध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्वपा(शैः)पैः *ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येकाभोक्तृभोगार्थयुक्ता । अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥ *क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः ॥ इति; तथा *छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति । अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ इति; तथोत्तरत्रापि *प्रधानक्षेत्रज्ञपतिर्गुणेशस्संसारमोक्षस्थितिबन्धहेतुः इति । स्मृतिरपि *प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ पुरुषः प्रकृतिस्थोऽपि भुङ्क्ते प्रकृतिजान् गुणान् । कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ *सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ तथा *सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ *मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्धि परिवर्तते ॥ इति । तस्माद्ब्रह्मात्मकत्वेन कापिलतन्त्रसिद्धाः प्रकृत्यादयो निरस्यन्ते । श्वेताश्वतरोपनिषदि श्रूयते *अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ इति । तत्र सन्देहः—किमस्मिन्मन्त्रे केवला तन्त्रसिद्धा प्रकृतिरभिधीयते, उत ब्रह्मात्मिकेति । किं युक्तम् ? केवलेति । कुतः ? *अजामेकामित्यस्याः प्रकृतेरकार्यत्वश्रवणात्, *बह्वीः प्रजास्सृजमानां सरूपाः इति स्वातन्त्र्येण सरूपाणां बह्वीनां प्रजानां स्रष्टृत्वश्रवणाच्च—इति ॥

एवं प्राप्तेऽभिधीयते—चमसवदविशेषात् । न जायत इत्यजेत्यजात्वमात्रप्रतिपादनात्तन्त्रसिद्धाब्रह्मात्मकाजाग्रहणे विशेषाप्रतीतेः; चमसवत्—यथा *अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः इत्यस्मिन्मन्त्रे चमसस्य भक्षणसाधनत्वमात्रं चमसशब्देन प्रतीयत इति न तावन्मात्रेण चमसविशेषप्रतीतिः, यौगिकशब्दानामर्थप्रकरणादिभिर्विनाऽर्थविशेषनिश्चयायोगात् । तत्र *यथेदं तच्छिरः एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः इत्यादिना वाक्यशेषेण शिरसश्चमसत्वनिश्चयः । तथाऽत्राप्यर्थप्रकरणादिभिरेवाजा निर्णेतव्या; नचात्र तन्त्रसिद्धाजाग्रहणहेतवोऽर्थप्रकरणादयो दृश्यन्ते; न चास्यास्स्वातन्त्र्येण स्रष्टृत्वं प्रतीयते, *बह्वीः प्रजास्सृजमानामिति स्रष्टृत्वमात्रप्रतीतेः । अतोऽनेन मन्त्रेण नाब्रह्मात्मिकाऽजाऽभिधीयते ॥ ८ ॥

ब्रह्मात्मकाजाग्रहण एव विशेषहेतुरस्तीत्याह—

118 ज्योतिरुपक्रमा तु तथा ह्यधीयत एके । १ । ४ । ९ ॥

तुशब्दोऽवधारणार्थः; ज्योतिरुपक्रमैवैषाऽजा । ज्योतिः—ब्रह्म *तं देवा ज्योतिषां ज्योतिः

Digitization by Arya Samaj Charitable Foundation, Chennai

*अथ यदतः परो दिवो ज्योतिर्दीप्यते इत्यादिश्रुतिप्रसिद्धेः। ज्योतिरुपक्रमा–ब्रह्मकारणिकेत्यर्थः। तथा ह्यधीयत एके–हीति हेतौ, यस्मादस्या अजाया ब्रह्मकारणकत्वमेके शाखिनः तैत्तिरीया अधीयते– *अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः इति हृदयगुहायामुपास्यत्वेन सन्निहितं ब्रह्माभिधाय *सप्त प्राणाः प्रभवन्ति तस्मात् इत्यादिना सर्वेषां लोकानां ब्रह्मादीनां च तत उत्पत्तिमभिधाय सर्वकारणीभूताऽजा तत उत्पन्नाऽभिधीयते *अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥ इति। सर्वस्य तद्व्यतिरिक्तस्य वस्तुजातस्य तत उत्पत्त्या तदात्मकत्वोपदेशे प्रक्रियमाणेऽभिधीयमानत्वात्प्राण-समुद्रपर्वतादिवदेषाऽप्यजा बह्वीनां सरूपाणां प्रजानां स्रष्ट्री कर्मवश्येनात्मना भुज्यमाना अन्येन विदुषाऽऽत्मना त्यज्यमाना च ब्रह्मण उत्पन्ना ब्रह्मात्मिकाऽवगन्तव्येत्यर्थः। अतो वाक्यशेषाच्चमस-विशेषवच्छाखान्तरीयादेतत्सरूपात्प्रत्यभिज्ञायमानार्थाद्वाक्यान्नियमिताऽजा ब्रह्मात्मिकेति निश्चीयते। इहापि प्रकरणोपक्रमे *किं कारणं ब्रह्मेत्यारभ्य *ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निरूढाम्* इति परब्रह्मशक्तिरूपाया अजाया अवगतेः, उपरिष्टाच्च *अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः *मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् *यो योनिंयोनिमधितिष्ठत्येकः इति च तस्या एव प्रतीतेर्नास्मिन्मन्त्रे तन्त्रसिद्धस्वतन्त्रप्रकृतिप्रतिपत्तिगन्धः॥

कथं तर्हि ज्योतिरुपक्रमाया लोहितशुक्लकृष्णरूपाया अस्याः प्रकृतेरजात्वम्, अजाया वा कथं ज्योतिरुपक्रमात्वमित्यत्राह—

119 कल्पनोपदेशाच्च मध्वादिवदविरोधः। १। ४। १०॥

प्रसक्ताशङ्कानिवृत्त्यर्थश्चशब्दः। अस्याः प्रकृतेरजात्वं ज्योतिरुपक्रमात्वं च न विरुध्यते; कुतः ? कल्पनोपदेशात्। कल्पनं क्लृप्तिः सृष्टिः; जगत्सृष्ट्युपदेशादित्यर्थः। यथा *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् इति कल्पनं सृष्टिः। अत्रापि *अस्मान्मायी सृजते विश्वमेतत् इति जगत्सृष्टिरुपदिश्यते। स्वेनाविभक्तादस्मात्सूक्ष्मावस्थात्कारणान्मायी सर्वेश्वरस्सर्वं जगत्सृजतीत्यर्थः। अनेन कल्पनोपदेशेनास्याः प्रकृतेः कार्यकारणरूपेणावस्थाद्वयान्वयोऽवगम्यते। सा हि प्रलयवेलायां ब्रह्मतापन्ना अविभक्तनामरूपा सूक्ष्मरूपेणावतिष्ठते; सृष्टिवेलायां तूद्भूतसत्त्वादिगुणा विभक्तनामरूपाऽव्यक्तादिशब्दवाच्या तेजोबन्नादिरूपेण च परिणता लोहितशुक्लकृष्णाकारा चावतिष्ठते। अतः कारणावस्थाऽजा, कार्यावस्था ज्योतिरुपक्रमेति न विरोधः। मध्वादिवत्- यथेश्वरेणादित्यस्य कारणावस्थायामेकस्यैवावस्थितस्य कार्यावस्थायामृग्यजुस्सामाथर्वप्रतिपाद्यकर्मनिष्पाद्यरसाश्रयतया वस्वादिदेवताभोग्यत्वाय मधुत्वकल्पनमुदयास्तमयकल्पनं च न विरुध्यते। तदुक्तं मधुविद्यायाम् *असौ वा आदित्यो देवमधु इत्यारभ्य *अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये

Digitization by Arya Samaj Charitable Foundation, Chennai

स्थाता इत्यन्तेन। एकलः—एकस्वभावः। अतोऽनेन मन्त्रेण ब्रह्मात्मिकाऽजैवाभिधीयते, न कापिल-तन्त्रसिद्धेति सिद्धम्॥

अन्ये त्वस्मिन्मन्त्रे तेजोबन्नलक्षणाऽजैकाभिधीयत इति ब्रुवते। ते प्रष्टव्याः—किं तेजोबन्नान्येव तेजोबन्नात्मिकाऽजैका? उत तेजोबन्नरूपं ब्रह्मैव? किं वा तेजोबन्नकारणभूता काचित्? इति। प्रथमे कल्पे तेजोबन्नानामनेकत्वात् *अजामेकामिति विरुध्यते। न च वाच्यं तेजोबन्नानामनेकत्वेऽपि त्रिवृत्करणेनैकतापत्तिरिति। त्रिवृत्करणेऽपि बहुत्वानपगमात्, *इमास्तिस्रो देवताः *तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इति प्रत्येकं त्रिवृत्करणोपदेशात्। द्वितीयः कल्पो विकल्प्यः— किं तेजोबन्न-रूपेण विकृतं ब्रह्मेवाजैका? किंवा स्वरूपेणावस्थितमविकृतमिति। प्रथमः कल्पो बहुत्वानपायादेव निरस्तः। द्वितीयेऽपि *लोहितशुक्लकृष्णामिति विरुध्यते। स्वरूपेणावस्थितं ब्रह्म तेजोबन्नलक्षणमिति वक्तुमपि न शक्यते। तृतीये कल्पेऽप्यजाशब्देन तेजोबन्नानि निर्दिश्य तैस्तत्कारणावस्थोपस्थापनीये-त्यास्थेयम्। ततो वरमजाशब्देन तेजोबन्नकारणावस्थायाः श्रुतिसिद्धाया एवाभिधानम्। यत्पुनरस्याः प्रकृतेरजाशब्देन च्छागत्वपरिकल्पनमुपदिश्यत इति; तदप्यसङ्गतम्, निष्प्रयोजनत्वात्। यथा *आत्मानं रथिनं विद्धि इत्यादिषु ब्रह्मप्राप्त्युपायताख्यापनाय शरीरादिषु रथादिरूपणं क्रियते; यथा चादित्ये वस्वादीनां भोग्यत्वख्यापनाय मधुत्वकल्पनं क्रियते; तद्वदस्यां प्रकृतौ च्छागत्वप-रिकल्पनं क्वोपयुज्यते? न केवलमुपयोगाभाव एव, विरोधश्च; कृत्स्नजगत्कारणभूतायाः स्वस्मिन्न-नादिकालसंबद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनभूतायाः अचेतनायाः अत्यल्पप्रजासर्गकरागन्तुकसङ्गमचेतनविशेषैकरूपात्यल्पप्रयोजनसाधनस्वपरित्यागाहेतुभूतस्वसंबन्धि-परित्यागसमर्थचेतनविशेषरूपच्छागस्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव। *अजामेकाम् *अजो ह्येकः *अजोऽन्यः इत्यत्राजाशब्दस्य विरूपार्थकल्पनं च न शोभनम्। सर्वत्र च्छागत्वं परिकल्प्यत इति चेत्, *जहात्येनां भुक्तभोगामजोऽन्यः इति विदुष आत्यन्तिकप्रकृतिपरित्यागं कुर्वतोऽनेन वाऽन्येनवा पुनरपि संबन्धयोग्यच्छागत्वपरिकल्पनमत्यन्तविरुद्धम्॥ १०॥

इति चमसाधिकरणम्॥ २॥

अथ संख्योपसंग्रहाधिकरणम्॥ ३॥

120 न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च। १। ४। ११॥

वाजसनेयिनस्समामनन्ति *यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेवस्मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम्॥ इति। किमयं मन्त्रः कापिलतन्त्रसिद्धतत्त्वप्रतिपादनपरः, उत नेति संदिह्यते। किं युक्तम्? तन्त्रसिद्धतत्त्वप्रतिपादनपर इति। कुतः? पञ्चशब्दविशेषितात्पञ्चजनशब्दा-त्पञ्चविंशतितत्त्वप्रतीतेः। एतदुक्तं भवति *पञ्चजना इति समासस्समाहारविषयः। पञ्चानां जनानां समूहाः पञ्चजनाः; पञ्चपूल्य इतिवत्। पञ्चजना इति लिङ्गव्यत्ययश्छान्दसः। ते च समूहाः कतीत्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

पेक्षायां पञ्चजनशब्दविशेषणेन प्रथमेन पञ्चशब्देन समूहाः पञ्चेति प्रतीयन्ते; यथा पञ्च पञ्चपूल्य इति । अतः *पञ्च पञ्चजनाः इति पञ्चविंशतिपदार्थावगतौ ते कतम इत्यपेक्षायां मोक्षाधिकारात् मुमुक्षुभिः ज्ञातव्यतया स्मृतिप्रसिद्धाः प्रकृत्यादय एव ज्ञायन्ते । *मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ इति हि कापिलानां प्रसिद्धिः । अतस्तन्त्रसिद्धतत्त्वप्रतिपादनपरः ॥

इति प्राप्ते प्रचक्ष्महे—न सङ्ख्योपसङ्ग्रहादपीति । *पञ्च पञ्चजनाः इति पञ्चविंशतिसङ्ख्योपसङ्ग्रहादपि न तन्त्रसिद्धतत्त्वप्रतीतिः । कुतः ? नानाभावात्—एषां पञ्चसङ्ख्याविशेषितानां पञ्चजनानां तन्त्रसिद्धेभ्यस्तत्त्वेभ्यः पृथग्भावात् । *यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः इत्येतेषां यच्छब्दनिर्दिष्टब्रह्माश्रयतया ब्रह्मात्मकत्वं हि प्रतीयते, *तमेवमन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् इत्यत्र तमिति परामर्शेन यच्छब्दनिर्दिष्टं ब्रह्मेत्यवगम्यते । अतस्तेभ्यः पृथग्भूताः पञ्चजना इति न तन्त्रसिद्धा एते । अतिरेकाच्च–तन्त्रसिद्धेभ्यस्तत्त्वेभ्योऽत्र तत्त्वातिरेकोऽपि भवति; यच्छब्दनिर्दिष्ट आत्मा आकाशश्चात्रातिरिच्येते । अतः *तं षड्विंशकमित्याहुस्सप्तविंशमथापरे इति श्रुतिप्रसिद्धसर्वतत्त्वाश्रयभूतस्सर्वेश्वरः परमपुरुषोऽत्राभिधीयते । न सङ्ख्योपसङ्ग्रहादपीत्यपिशब्दस्य *पञ्च पञ्चजनाः इत्यत्र पञ्चविंशतितत्त्वप्रतिपत्तिरेव न संभवतीत्यभिप्रायः । कथम् ? पञ्चभिरारब्धसमूहपञ्चकासंभवात् । नहि तन्त्रसिद्धतत्त्वेषु पञ्चसु पञ्चस्वनुगतं तत्सङ्ख्यानिवेशनिमित्तं जात्याद्यस्ति । नच वाच्यं—पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, पञ्च महाभूतानि, पञ्च तन्मात्राणि, अवशिष्टानि पञ्चेत्यवान्तरसङ्ख्यानिवेशनिमित्तमस्त्येवेति; आकाशस्य पृथङ्निर्देशेन पञ्चभिरारब्धमहाभूतसमूहासिद्धेः । अतः* पञ्चजनाः इत्ययं समासो न समाहारविषयः; अयं तु *दिक्सङ्ख्ये संज्ञायामिति संज्ञाविषयः; अन्यथा पञ्चजना इति लिङ्गव्यत्ययश्च । पञ्चजना नाम केचित्सन्ति; तेच पञ्चसङ्ख्यया विशेष्यन्ते, पञ्च पञ्चजनाः इति; सप्त सप्तर्षय इतिवत् ॥ ११ ॥

के पुनस्ते पञ्चजनाः इत्यत आह—

121 प्राणादयो वाक्यशेषात् । १ । ४ । १२ ॥

*प्राणस्य प्राणमुत चक्षुषश्चक्षुरुश्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः इति वाक्यशेषाद्ब्रह्माश्रयाः प्राणादय एव पञ्च पञ्चजनाः इति विज्ञायन्ते ॥ १२ ॥

अथ स्यात्—काण्वानां माध्यन्दिनानां च *यस्मिन् पञ्च पञ्चजनाः इत्ययं मन्त्रस्समानः; *प्राणस्य प्राणम् इत्यादिवाक्यशेषे काण्वानामन्नस्य पाठो न विद्यते; तेषां पञ्च पञ्चजनाः प्राणादय इति न शक्यं वक्तुमिति; अत्रोत्तरम्—

Digitization by Arya Samaj Charitable Foundation, Chennai

122 ज्योतिषैकेषामसत्यन्ने । १ । ४ । १३ ॥

एकेषां—काण्वानां पाठे असत्यन्ने ज्योतिषा पञ्चजनाः इन्द्रियाणीति ज्ञायन्ते; तेषां वाक्यशेषः प्रदर्शनार्थः। एतदुक्तं भवति—*यस्मिन् पञ्च पञ्चजनाः इत्यस्मात्पूर्वस्मिन्मन्त्रे *तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् इति ज्योतिषां ज्योतिष्ट्वेन ब्रह्मण्यभिधीयमाने ब्रह्माधीनस्वकार्याणि कानिचिज्ज्योतींषि प्रतिपन्नानि; तानि च विषयाणां प्रकाशकानीन्द्रियाणीति *यस्मिन् पञ्च पञ्चजनाः इत्यनिर्धारितविशेषनिर्देशेनावगम्यन्ते इति। *प्राणस्येति प्राणशब्देन स्पर्शनेन्द्रियं गृह्यते, वायुसंबन्धित्वात्स्पर्शनेन्द्रियस्य; मुख्यप्राणस्य ज्योतिश्शब्देन प्रदर्शनायोगात्। चक्षुष इति चक्षुरिन्द्रियम्, श्रोत्रस्येति श्रोत्रेन्द्रियम्, अन्नस्येति घ्राणरसनयोस्तन्त्रेणोपादानम्, अन्नशब्दोदितपृथिवीसंबन्धित्वात् घ्राणेन्द्रियमनेन गृह्यते; अद्यतेऽनेनेत्यन्नमिति रसनेन्द्रियमपि गृह्यते। मनस इति मनः। घ्राणरसनयोस्तन्त्रेणोपादानमिति पञ्चत्वमप्यविरुद्धम्। प्रकाशकानि मनःपर्यन्तानीन्द्रियाणि पञ्चजनशब्दनिर्दिष्टानि; तदविरोधाय घ्राणरसनयोस्तन्त्रेणोपादानम्। तदेवम् *यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः इति पञ्चजनशब्दनिर्दिष्टानीन्द्रियाण्याकाशशब्दप्रदर्शितानि महाभूतानि च ब्रह्मणि प्रतिष्ठितानीति सर्वतत्त्वानां ब्रह्माश्रयत्वप्रतिपादनान्न तन्त्रसिद्धपञ्चविंशतितत्त्वप्रसङ्गः। अतस्सर्वत्र वेदान्ते सङ्ख्योपसङ्ग्रहे तदभावे वा न कापिलतन्त्रसिद्धतत्त्वप्रतीतिरिति सिद्धम् ॥ १३ ॥

इति सङ्ख्योपसङ्ग्रहाधिकरणम् ॥ ३ ॥

अथ कारणत्वाधिकरणम् ॥ ४ ॥

123 कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः । १ । ४ । १४ ॥

पुनः प्रधानकारणवादी प्रत्यवतिष्ठते—न वेदान्तेष्वेकस्मात्सृष्टिराम्नायत इति जगतो ब्रह्मैककारणत्वं न युज्यते वक्तुम्। तथाहि *सदेव सोम्येदमग्र आसीदिति सत्पूर्विका सृष्टिराम्नायते; *असद्वा इदमग्र आसीदित्यसत्पूर्विका च; अन्यत्र *असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवदिति च। अतो वेदान्तेषु स्रष्टुरव्यवस्थितेजगतो ब्रह्मैककारणत्वं न निश्चेतुं शक्यम्; प्रत्युत प्रधानकारणत्वमेव निश्चेतुं शक्यते, *तद्धेदं तर्ह्यव्याकृतमासीदित्यव्याकृते प्रधाने जगतः प्रलयमभिधाय *तन्नामरूपाभ्यां व्याक्रियतेत्यव्याकृतादेव जगतस्सृष्टिश्चाभिधीयते। अव्याकृतं ह्यव्यक्तम्, नामरूपाभ्यां न व्याक्रियते—न व्यज्यत इत्यर्थः। अव्यक्तं प्रधानमेव। अस्य च स्वरूपनित्यत्वेन परिणामाश्रयत्वेन च जगत्कारणवादिवाक्यगतौ सदसच्छब्दौ ब्रह्मणीवास्मिन्न विरोत्स्येते। एवमव्याकृतकारणत्वे निश्चिते सतीक्षणादयः कारणगतास्सृष्टयौन्मुख्याभिप्रायेण योजयितव्याः। ब्रह्मात्मशब्दावपि बृहत्त्वव्यापित्वाभ्यां प्रधान एव वर्तेते। अतः स्मृतिन्यायप्रसिद्धं प्रधानमेव जगत्कारणं वेदान्तवाक्यैः प्रतिपाद्यते ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इति प्राप्ते प्रचक्ष्महे—कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः। चशब्दस्तुशब्दार्थे; सर्वज्ञात्सर्वेश्वरात्सत्यसङ्कल्पान्निरस्तनिखिलदोषगन्धात्परस्माद्ब्रह्मण एव जगदुत्पद्यत इति निश्चेतुं शक्यते। कुतः? आकाशादिषु कारणत्वेन यथाव्यपदिष्टस्योक्तेः–सर्वज्ञत्वादिविशिष्टत्वेन* जन्माद्यस्य यतः इत्येवमादिषु प्रतिपादितं ब्रह्म यथाव्यपदिष्टमित्युच्यते, तस्यैकस्यैवाकाशादिषु कारणत्वेनोक्तेः *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *तत्तेजोऽसृजतेत्यादिषु सर्वज्ञं ब्रह्मैव कारणत्वेनोच्यते। तथाहि *सत्यं ज्ञानमनन्तं ब्रह्म *सोऽश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता इति प्रकृतं विपश्चिदेव ब्रह्म *तस्माद्वा एतस्मादिति परामृश्यते। तथा * तदैक्षत बहु स्यामिति निर्दिष्टं सर्वज्ञं ब्रह्मैव *तत्तेऽजोऽसृजतेति परामृश्यते। एवं सर्वत्र सृष्टिवाक्येषु द्रष्टव्यम्। अतो ब्रह्मैककारणं जगदिति निश्चीयते ॥ १४ ॥

ननु *असद्वा इदमग्र आसीदित्यसदेव कारणत्वेन व्यपदिश्यते; तत्कथमिव सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मण एव कारणत्वं निश्चीयत इत्यत आह—

124 समाकर्षात्। १। ४। १५ ॥

*असद्वा इदमग्र आसीदित्यत्रापि विपश्चिदानन्दमयं सत्यसङ्कल्पं ब्रह्मैव समाकृष्यते। कथम्? *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः *सोऽकामयत, बहु स्यां प्रजायेयेति *इदं सर्वमसृजत, यदिदं किंच, तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत् इत्यादिना ब्राह्मणेनानन्दमयं ब्रह्म सत्यसङ्कल्पं सर्वस्य स्रष्टृ सर्वानुप्रवेशेन सर्वात्मभूतमभिधाय *तदप्येष श्लोको भवतीत्युक्तस्यार्थस्य सर्वस्य साक्षित्वेनोदाहृतोऽयं श्लोकः *असद्वा इदमग्र आसीदिति। तथोत्तरत्र *भीषाऽस्माद्वातः पवते इत्यादिना तदेव ब्रह्म समाकृष्य सर्वस्य प्रशासितृत्व-निरतिशयानन्दत्वादयोऽभिधीयन्ते। अतोऽयं मन्त्रस्तद्विषय एव। तदानीं नामरूपविभागाभावेन तत्संबन्धितयाऽस्तित्वाभावाद्ब्रह्मैवासच्छब्देनोच्यते। *असदेवेदमग्र आसीदित्यत्राप्ययमेव निर्वाहः। यदुक्तं *तद्धेदं तर्ह्यव्याकृतमासीदिति प्रधानमेव जगत्कारणत्वेनाभिधीयत इति; नेत्युच्यते, तत्राप्य-व्याकृतशब्देनाव्याकृतशरीरं ब्रह्मैवाभिधीयते; *स एष इह प्रविष्ट आनखाग्रेभ्यः पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मन आत्मेत्येवोपासीत* इत्यत्र, स एषः इति तच्छब्देनाव्याकृतशब्दनिर्दिष्टस्यान्तः प्रविश्य प्रशासितृत्वेनानुकर्षात्, *तत्सृष्ट्वा, तदेवानुप्राविशत् *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति स्रष्टुस्सर्वज्ञस्य परस्य ब्रह्मणः कार्यानुप्रवेशनामरूपव्याकरणप्रसिद्धेश्च। *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मेति नियमनार्थत्वादनुप्रवेशस्य प्रधानस्याचेतनस्यैवंरूपोऽनुप्रवेशो न संभवति। अतः अव्याकृतम्—अव्याकृतशरीरं ब्रह्म *तन्नामरूपाभ्यां व्याक्रियतेति तदेवाविभक्त-नामरूपं ब्रह्म सर्वज्ञं सत्यसङ्कल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियतेत्युच्यते। एवं च सतीक्षणादयो मुख्या एव भवन्ति। ब्रह्मात्मशब्दावपि निरतिशयबृहत्त्वनियमनार्थव्यापित्वाभावेन प्रधाने न कथंचिदुपपद्येते। अतो ब्रह्मैककारणं जगदिति स्थितम् ॥ १५ ॥ इति कारणत्वाधिकरणम् ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ जगद्वाचित्वाधिकरणम् ॥ ५ ॥

125 जगद्वाचित्वात्। १। ४। १६ ॥

पुनरपि साङ्ख्यः प्रत्यवतिष्ठते—यद्यपि वेदान्तवाक्यानि चेतनं जगत्कारणत्वेन प्रतिपादयन्ति; तथापि तन्त्रसिद्धप्रधानपुरुषातिरिक्तं वस्तु जगत्कारणं वेद्यतया न तेभ्यः प्रतीयते। तथाहि—भोक्तारमेव पुरुषं कारणं वेद्यतयाऽधीयते कौषीतकिनो बालाक्यजातशत्रुसंवादे *ब्रह्म ते ब्रवाणि इत्युपक्रम्य *यो वै बालक एतेषां पुरुषाणां कर्ता यस्य [चै]वैतत्कर्म स वै वेदितव्यः इति। उपक्रमे वक्तव्यतया बालाकिनोपाक्षिप्तं ब्रह्माजानते तस्मा एवाजातशत्रुणा *स वै वेदितव्यः इति ब्रह्मोपदिश्यते। *यस्य वैतत्कर्मेति कर्मसंबन्धात्प्रकृत्यध्यक्षो भोक्ता पुरुषो वेदितव्यतयोपदिष्टं ब्रह्मेति निश्चीयते, नार्थान्तरम्, तस्य कर्मसंबन्धानभ्युपगमात्। कर्मच पुण्यापुण्यलक्षणं क्षेत्रज्ञस्यैव संभवति। नच वाच्यम्, क्रियत इति कर्मेति व्युत्पत्त्या प्रत्यक्षादिप्रमाणोपस्थापितं जगदेतत्कर्मेति निर्दिश्यते, यस्यैतत्कृत्स्नं जगत्कर्म, स वेदितव्य इति क्षेत्रज्ञादर्थान्तरमेव प्रतीयते इति; *यो वै बालक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्मेति पृथङ्निर्देशवैयर्थ्यात्, कर्मशब्दस्य च लोकवेदयोः पुण्यपापरूप एव कर्मणि प्रसिद्धेः; तत्तद्भोक्तृकर्मनिमित्तत्वाज्जगदुत्पत्तेरेतेषां पुरुषाणां कर्तेति च भोक्तुरेवोपपद्यते। तदयमर्थः—एतेषामादित्यमण्डलाद्यधिकरणानां क्षेत्रज्ञभोग्यभोगोपकरणभूतानां पुरुषाणां यः कारणभूतः, एतत्कारणभावहेतुभूतं पुण्यापुण्यलक्षणं च कर्म यस्य, स वै वेदितव्यः—तत्स्वरूपं प्रकृतेर्विविक्तं वेदितव्यम्—इति। तथोत्तरत्र *तौ ह सुप्तं पुरुषमीयतुः तं यष्टिना चिक्षेपेति सुप्तपुरुषागमनयष्टिघातोत्थापनादीनि च भोक्तृप्रतिपादन एव लिङ्गानि। तथोपरिष्टादपि भोक्तैव प्रतिपाद्यते *तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एनं भुञ्जन्ति इति। तथा *क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कुत एतदागात् *इति पृष्टमर्थमजानते तस्मै स्वयमेवाजातशत्रुरुवाच *हिता नाम नाड्यस्तासु तदा भवति यदा सुप्तस्स्वप्नं न कथंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिस्सहाप्येति मनस्सर्वैर्ध्यानैस्सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतस्सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः इति। सुषुप्त्याधारतया स्वप्नसुषुप्तिजागरितावस्थासु वर्तमानं वागादिकरणाप्ययोद्गमस्थानमेव जीवात्मानम् *अथास्मिन् प्राण एवैकधा भवति इत्युक्तवान्। अस्मिन् जीवात्मनि प्राणभृत्त्वनिबन्धनोऽयं प्राणशब्दः; *स यदा प्रतिबुध्यते इति प्राणशब्दनिर्दिष्टस्य प्रबोधश्रवणात्; मुख्यप्राणस्येश्वरस्य च सुषुप्तिप्रबोधयोरसंभवात्। अथवा *अस्मिन्प्राणे इति व्यधिकरणे सप्तम्यौ; अस्मिन्नात्मनि वर्तमाने प्राण एवैकधा भवति वागादिकरणग्राम इति। प्राणशब्दस्य मुख्यप्राणपरत्वेऽपि जीव एवास्मिन्प्रकरणे प्रतिपाद्यते, स्वतः प्राणस्य जीवोपकरणत्वात्। अतो वक्तव्यतयोपक्रान्तं ब्रह्म पुरुष एवेति तद्व्यतिरिक्तेश्वरासिद्धिः। कारणगताश्वे-

Digitization by Arya Samaj Charitable Foundation, Chennai

क्षणादयश्चेतनधर्मा अस्मिन्नेवोपपद्यन्त इत्येतदधिष्ठितं प्रधानमेव जगत्कारणम् ॥

इति प्राप्ते प्रचक्ष्महे—जगद्वाचित्वात् । अत्र पुण्यापुण्यपरवशः क्षुद्रः क्षेत्रज्ञस्स्वस्मिन् प्रकृतिधर्माध्यासेन तत्परिणामहेतुभूतः पुरुषो नाभिधीयते; अपितु निरस्तसमस्ताविद्यादिदोषगन्धोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणनिधिर्निखिलजगदेककारणभूतः पुरुषोत्तमोऽभिधीयते । कुतः? *यस्य वैतत्कर्मेत्यत्रैतच्छब्दान्वितस्य कर्मशब्दस्य परमपुरुषकार्यभूतजगद्वाचित्वात् । एतच्छब्दो ह्यर्थप्रकरणादिभिरसङ्कुचितवृत्तिरविशेषेण प्रत्यक्षादिप्रमाणोपस्थापितनिखिलचिदचिन्मिश्रजगद्विषयः । नच पुण्यापुण्यलक्षणं कर्मात्र कर्मशब्दाभिधेयम्, *ब्रह्म ते ब्रवाणीत्युपक्रम्य ब्रह्मत्वेन बालाकिना निर्दिष्टानामादित्यमण्डलाद्यधिकरणानां पुरुषाणामब्रह्मत्वेन *मृषा वै खलु मा संवादयिष्ठाः इति तमब्रह्मवादिनमपोद्य तेनाविदितब्रह्मज्ञानायाजातशत्रुणेदं वाक्यमवतारितं *यो वै बालके इत्यादि । पुण्यापुण्यलक्षणकर्मसंबन्धिन आदित्याद्यधिकरणास्तत्सजातीयाश्च पुरुषास्तेनैव विदिता इति तदविदितपुरुषविशेषज्ञापनपरोऽयं कर्मशब्दो न पुण्यापुण्यमात्रवाची; क्रियामात्रवाची वा; अपि तु कृत्स्नस्य जगतः कार्यत्ववाची । एवमेव खल्वविदितोऽर्थ उपदिष्टो भवति । पुरुषस्य कर्मसंबन्धोपलक्षितस्वाभाविकस्वरूपस्याज्ञातस्य वेदितव्यत्वोपदेशे च लक्षणा; कर्मसंबन्धमात्रस्यैव वेदितव्यस्वरूपलक्षणत्वाद्यस्य कर्म स वेदितव्य इत्येतावतैव तत्सिद्धेः, *यस्य वैतत्कर्मेत्येतच्छब्दवैयर्थ्यं च । *य एतेषां कर्ता यस्य वैतत्कर्मेति पृथङ्निर्देशस्य चायमभिप्रायः—ये त्वया ब्रह्मत्वेन निर्दिष्टाः पुरुषाः, तेषां यः कर्ता, ते यत्कार्यभूताः, किं विशिष्याभिधीयते, कृत्स्नं जगद्यस्य कार्यम्, उत्कृष्टा अपकृष्टाश्चेतना अचेतनाश्च सर्वे पदार्था यत्कार्यत्वे तुल्याः, स परमकारणभूतः पुरुषोत्तमो वेदितव्यः—इति । जगदुत्पत्तेर्जीवकर्मनिबन्धनत्वेऽपि न जीवस्स्वभोग्यभोगोपकरणादेस्स्वयमुत्पादकः, अपि तु स्वकर्मानुगुण्येनेश्वरसृष्टं सर्वं भुङ्क्ते; अतो न तस्य पुरुषान्प्रति कर्तृत्वमुपपद्यते । अतस्सर्ववेदान्तेषु परमकारणतया प्रसिद्धं परं ब्रह्मैवात्र वेदितव्यतयोपदिश्यते ॥ १६ ॥

126 जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् । १ । ४ । १७ ॥

अथ यदुक्तम्, जीवलिङ्गान्मुख्यप्राणसङ्कीर्तनाच्च लिङ्गाद्भोक्तैवास्मिन्प्रकरणे प्रतिपाद्यते, न परमात्मेति; तद्व्याख्यातम्—तस्य निर्वाहः प्रतर्दनविद्यायामभिहितः । एतदुक्तं भवति—यत्रोपक्रमोपसंहारपर्यालोचनया ब्रह्मपरं वाक्यमिति निश्चितम्, तत्रान्यलिङ्गानि तदनुरोधेन वर्णनीयानीति तत्र प्रतिपादितम् । अत्राप्युपक्रमे *ब्रह्म ते ब्रवाणीति ब्रह्मोपक्षिप्तम्; मध्ये च *यस्य वैतत्कर्मेति निर्दिष्टं न पुरुषमात्रम्, अपि तु निखिलजगदेककारणं ब्रह्मैवेत्युक्तम् । उपसंहारे च *सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेति ब्रह्मोपासनैकान्तं सर्वपापापहतिपूर्वकं स्वाराज्यं च फलं श्रुतम्; अतोऽस्य वाक्यस्य ब्रह्मपरत्वनिश्चयेन जीवमुख्यप्राण-

Digitization by Arya Samaj Charitable Foundation, Chennai

लिङ्गान्यपि तत्परतया वर्णनीयानीति । प्रातर्दने ह्युपासात्रैविध्येन जीवमुख्यप्राणलिङ्गानां ब्रह्मपरत्वमुक्तम्; अत्रापि *अथास्मिन्प्राण एवैकधा भवतीति सामानाधिकरण्यसंभवे वैयधिकरण्यसमाश्रयणायोगाद्ब्रह्मण्येव प्राणशब्दप्रयोगनिश्चयेन च प्राणशरीरकब्रह्मोपासनार्थं प्राणसङ्कीर्तनं लिङ्गं युज्यते ॥१७॥

जीवलिङ्गानां पुनः कथं ब्रह्मपरत्वमित्यत्राह—

127 अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके । १ । ४ । १८ ॥

तुशब्दो जीवसङ्कीर्तनेन वाक्यस्य तत्परत्वसंभावनाव्यावृत्त्यर्थः । अन्यार्थं जीवसङ्कीर्तनं जीवातिरिक्तब्रह्मस्वरूपप्रतिबोधनार्थमिति जैमिनिराचार्यो मन्यते । कुतः ? प्रश्नव्याख्यानाभ्याम्; प्रश्नस्तावत् *तौ ह सुप्तं पुरुषमीयतुरित्यादिना सुप्तस्य प्रबुद्धप्राणस्यैव प्राणनामभिरामन्त्रणाश्रवणयष्टिघातोत्थापनाभ्यां प्राणादिव्यतिरिक्तं जीवं प्रतिबोध्य पुनर्जीवव्यतिरिक्तब्रह्मप्रतिबोधनपरो दृश्यते *क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कुत एतदागात् इति । व्याख्यानमपि *यदा सुप्तस्स्वप्नं न कथञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः इति जीवादर्थान्तरभूतपरमात्मपरमेव । सुषुप्तस्य हि जीवस्य यत्रोषितस्य जागरितस्वप्नदशासंबन्धिविचित्रसुखदःखानुभवकालुष्यविरहेण संप्रसन्नस्य स्वस्थतापत्तिः, पुनरप्यस्य यस्माद्भोगाय निष्क्रमणम्, सोऽयं परमात्मा । तथाहि *सता सोम्य तदा संपन्नो भवति *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् इति सुषुप्त्याधारतया प्रसिद्धो जीवादर्थान्तरभूतः प्राज्ञः परमात्मा । अतः प्रश्नप्रतिवचनाभ्यां जीवसङ्कीर्तनं जीवादर्थान्तरभूतपरमात्मप्रतिपादनार्थमिति निश्चीयते । यदुक्तं प्रश्नव्याख्याने जीवपरे, सुषुप्तिस्थानं च नाड्य एव, करणग्रामश्च प्राणशब्दनिर्दिष्टे जीव एवैकधा भवतीति; तदयुक्तम्, नाडीनां स्वप्नस्थानत्वात् , उक्तरीत्या ब्रह्मण एव सुषुप्तिस्थानत्वाच्च । प्राणशब्दनिर्दिष्टे ब्रह्मण्येव जीवस्य तदुपकरणभूतवागादिकरणग्रामस्य चैकतापत्तिविभागवचनाच्च । अपि चैवमेके—वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे सुषुप्ताद्विज्ञानमयाद्भेदेन तदाश्रयभूतं परमात्मानमामनन्ति *य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागात् *यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदैतेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते इति । आकाशशब्दश्च परमात्मनि प्रसिद्धः *दहरोऽस्मिन्नन्तर आकाशः इति । अतोऽत्र जीवसङ्कीर्तनं तस्मादर्थान्तरभूतस्य प्राज्ञस्य परस्य ब्रह्मणः प्रतिबोधनार्थमित्यवगम्यते । तस्मादस्मिन्वाक्ये पुरुषादर्थान्तरभूतस्य निखिलजगत्कारणस्य परस्यैव ब्रह्मणो वेदितव्यतयाऽभिधानान्न तन्त्रसिद्धस्य पुरुषस्य तदधिष्ठितस्य वा प्रधानस्य कारणत्वं क्वचिदपि वेदान्ते प्रतीयत इति [सिद्धम्] स्थितम् ॥ १८ ॥ इति जगद्वाचित्वाधिकरणम् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ वाक्यान्वयाधिकरणम् ॥ ६ ॥

128 वाक्यान्वयात् । १ । ४ । १९ ॥

अत्रापि कापिलतन्त्रसिद्धपुरुषतत्त्वावेदनपरं वाक्यं क्वचिद्दृश्यत इति तदतिरिक्त ईश्वरो नाम न कश्चित्संभवतीत्याशङ्क्य निराकरोति । बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते *न वा अरे पत्युः कामाय पतिः प्रियो भवति इत्यारभ्य *न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम् * इति । तत्र संशयः—किमस्मिन्वाक्ये द्रष्टव्यतयोपदिश्यमानस्तन्त्रसिद्धः पुरुष एव ? अथवा सर्वज्ञस्सत्यसङ्कल्पस्सर्वेश्वरः ? इति । किं युक्तम् ? पुरुष इति । कुतः ? आदिमध्यावसानेषु पुरुषस्यैव प्रतीतेः । उपक्रमे तावत्पतिजायापुत्रवित्तपश्वादिप्रियत्वयोगाज्जीवात्मैव प्रतीयते; मध्येऽपि *विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति इत्युत्पत्तिविनाशयोगात्स एवावगम्यते; तथाऽन्ते च *विज्ञातारमरे केन विजानीयात् इति स एव ज्ञाता क्षेत्रज्ञ एव प्रतीयते, नेश्वरः । अतस्तन्त्रसिद्धपुरुषप्रतिपादनपरमिदं वाक्यमिति निश्चीयते । ननु *अमृतत्वस्य तु नाशाऽस्ति वित्तेनेत्युपक्रमादमृतत्वप्राप्त्युपायोपदेशपरमिदं वाक्यमित्यवगम्यते । तत्कथं पुरुषप्रतिपादनपरत्वमस्य वाक्यस्य ? तदुच्यते—अत एव ह्यत्र पुरुषप्रतिपादनम् । तन्त्रे ह्यचिद्धर्माध्यासवियुक्तपुरुषस्वरूपयाथात्म्यविज्ञानमेवामृतत्वहेतुत्वेनोच्यते । अतो जीवात्मनः प्रकृतिवियुक्तं स्वरूपमिहामृतत्वाय *आत्मा वा अरे द्रष्टव्यः इत्यादिनोपदिश्यते । सर्वेषामात्मनां प्रकृतिवियुक्तं स्वरूपमेकरूपमिति प्रकृतिवियुक्तस्वात्मयाथात्म्यविज्ञानेन सर्व एवात्मानो विदिता भवन्तीत्यात्मविज्ञानेन सर्वविज्ञानमुपपन्नम्; देवादिस्थावरान्तेषु सर्वेषु भूतेष्वात्मस्वरूपस्य ज्ञानैकप्रकारत्वात् *इदं सर्वं यदयमात्मा इत्यैकात्म्योपदेशः; देवाद्याकाराणामनात्माकारत्वात् *सर्वं तं परादात् इत्यादिनाऽन्यत्वनिषेधश्च; *यत्र हि द्वैतमिव भवतीति च नानात्वनिषेधेनैकस्वरूपे ह्यात्मनि देवादिप्रकृतिपरिणामभेदेन नानात्वं मिथ्येत्युच्यते; *तस्य ह वा एतस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदः इत्याद्यपि प्रकृतेरधिष्ठातृत्वेन पुरुषनिमित्तत्वाज्जगदुत्पत्तेरुपपद्यते । एवमस्मिन्वाक्ये पुरुषपरे निश्चिते सति तदैकार्थ्यात्सर्वे वेदान्तास्तन्त्रसिद्धं पुरुषमेवाभिदधतीति तदधिष्ठिता प्रकृतिरेव जगदुपादानम्, नेश्वरः इति ॥

एवं प्राप्ते प्रचक्ष्महे—वाक्यान्वयात् इति । सर्वेश्वर एवास्मिन्वाक्ये प्रतीयते । कुतः ? एवमेव हि वाक्यावयवानामन्योन्यान्वयस्समञ्जसो भवति । *अमृतत्वस्य तु नाशाऽस्ति वित्तेनेति याज्ञवल्क्येनाभिहिते *येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहि* इत्यमृतत्वानुपायतया वित्ताद्यनादरेणामृतत्वप्राप्त्युपायमेव प्रार्थयमानायै मैत्रेय्यै तदुपायतया द्रष्टव्यत्वेनोपदिष्टोऽयमात्मा परमात्मैव, *तमेव विदित्वाऽतिमृत्युमेति *तमेवं विद्वानमृत इह भवति नान्यः पन्थाः इत्यादिभिरमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनात् । परमपुरुषविभूतिभूतस्य प्राप्तु-

Digitization by Arya Samaj Charitable Foundation, Chennai

रात्मनस्स्वरूपयाथात्म्यमपवर्गसाधनपरमपुरुषवेदनोपयोगितयाऽवगन्तव्यम्; न स्वत एवोपायत्वेन । अतोऽत्र परमात्मैवामृतत्वोपायतया *द्रष्टव्यः इत्यादिनोपदिश्यते। तथा *तस्य ह वा एतस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदः इत्यादिना कृत्स्नस्य जगतः कारणत्वमुच्यमानं परमपुरुषादन्यस्य कर्मपरवशस्य मुक्तस्य निर्व्यापारस्य च पुरुषमात्रस्य न संभवति। तथा *आत्मनो वा अरे दर्शनेने-त्यादिना एकविज्ञानेन सर्वविज्ञानमभिधीयमानं सर्वात्मभूते परमात्मन्येवावकल्पते। यच्चैतदेकरूप-त्वादात्मनामेकात्मविज्ञानेन सर्वात्मविज्ञानमुच्यत इति; तदयुक्तम्, अचेतनप्रपञ्चज्ञानाभावेन सर्वविज्ञानाभावात्। प्रतिज्ञोपपादनाय च *इदं ब्रह्मेदं क्षत्रमित्युपक्रम्य *इदं सर्वं यदयमात्मेति प्रत्यक्षादिसिद्धं चिदचिन्मिश्रं प्रपञ्चम् इदमिति निर्दिश्य, एतदयमात्मेत्यैकात्म्योपदेशश्च परमात्मन एवोपपद्यते। नहीदंशब्दवाच्यं चिदचिन्मिश्रं जगत्पुरुषेणाचित्संसृष्टेन तद्वियुक्तेन स्वरूपेण वाऽवस्थि-तेन चैक्यमुपगच्छति। अत एव *सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद इति व्यतिरिक्तत्वेन सर्व-वेदननिन्दा च; तथा प्रथमे च मैत्रेयीब्राह्मणे *महद्भूतमनन्तमपारमिति श्रुता महत्त्वादयो गुणाः परमात्मन एव संभवन्ति। अतस्स एवात्र प्रतिपाद्यते।

यत्तूक्तं पतिजायापुत्रवित्तपश्वादिप्रियान्वयिनो जीवात्मन उपक्रमे त्वन्वेष्टव्यतया प्रति-पादनात्तद्विषयमेवेदं वाक्यमिति; तदयुक्तम्, *आत्मनस्तु कामायेत्यात्मशब्देन जीवात्मसंशब्दने तस्य *आत्मा वा अरे द्रष्टव्य इत्येननानन्वयप्रसङ्गात्, *आत्मा वा अरे द्रष्टव्य इत्यात्मनो द्रष्टव्यत्वोपयोगितया *आत्मनस्तु कामायेत्युपदिष्टमिति प्रतीयते। आत्मनस्तु कामाय—आत्मनः कामसंपत्तये; काम्यन्त इति कामाः; आत्मन इष्टसंपत्तय इति यावत्। नच जीवात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्तीत्युक्ते सति तस्य जीवस्य स्वरूपमन्वेष्टव्यं भवति। प्रियमेव ह्यन्वेष्टव्यम्; नतु प्रियं प्रति शेषिण प्रियवियुक्तं स्वरूपम्। यस्मादात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्ति, तस्मात्पत्यादि प्रियं परित्यज्य तद्वियुक्तमात्मस्वरूपमन्वेष्टव्यमित्यसङ्गतं भवति। प्रत्युत न पत्या-दिशेषतया पत्यादीनां प्रियत्वम्; अपि त्वात्मनश्शेषतयापत्यादीनां प्रियत्वमित्युक्ते स्वशेषतया त एवोपादेयास्स्युः। *आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यस्य परेणानन्वये वाक्यभेदः प्रसज्यते। अभ्युपगम्यमानेऽपि वाक्यभेदे पूर्ववाक्यस्य न किञ्चित्प्रयोजनं दृश्यते। अतः पत्यादि सर्वं प्रियं परित्यज्यात्मन एवान्वेष्टव्यत्वं यथा प्रतीयते, तथा वाक्यार्थोवणनीयः। सोऽयमुच्यते—*अमृतत्वस्य तु नाशाऽस्ति वित्तेनेति वित्तादीनां नित्यनिर्दोषनिरतिशयानन्दरूपामृतत्वप्राप्त्यनुपायतामुक्त्वा वित्तपुत्रपतिजायादीनां सातिशयदुःखमिश्रकादाचित्कप्रियत्वमनुभूयमानं न पत्यादिस्वरूपप्रयुक्तम्, अपितु निरतिशयानन्दस्वभावपरमात्मप्रयुक्तम्। अतो य एव स्वयं निरतिशयानन्दस्सन्नन्येषामपि प्रियत्वलेशास्पदत्वमापादयति, स परमात्मैव द्रष्टव्य इत्युपदिश्यते।

तदयमर्थः—*न वा अरे पत्युः कामाय पतिः प्रियो भवति—न हि पतिजायापुत्रवित्तादयो मत्प्रयोजनायाहमस्य प्रियस्यामिति स्वसङ्कल्पात्प्रिया भवन्ति; अपि त्वात्मनः कामाय—परमात्मन-स्स्वाराधकप्रियप्रतिलम्भनरूपेष्टनिर्वृत्तय इत्यर्थः। परमात्मा हि कर्मभिराराधितस्तत्तत्कर्मानुगुणं प्रतिनियतदेशकालस्वरूपपरिमाणमाराधकानां तत्तद्वस्तुगतं प्रियत्वमापादयति *एष ह्येवानन्दयातीति

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रुतेः । न तु तत्तद्वस्तु स्वरूपेण प्रियमप्रियं वा । यथोक्तं—*तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते ॥ तस्माद्दुःखात्मकं नास्ति न च ...सुखात्मकम् ॥ इति । *आत्मनस्तु कामायेत्यस्य जीवात्मपरत्वेऽपि *आत्मा वा अरे द्रष्टव्य इति तु परमात्मविषयमेव । तत्रायमर्थः—यस्मात्पत्यादीनामिष्टसंपत्तये तत्परवशेन पत्यादयः प्रियत्वेन नोपादीयन्ते, अपि त्वात्मेष्टसंपत्तये स्वतन्त्रेण स्वप्रियत्वेनोपादीयन्ते; तस्माद्य एवात्मनो निरुपाधिकनिर्दोषनिरवधिकप्रियः परमात्मा; स एव हि द्रष्टव्यः; न दुःखमिश्राल्पसुखदुःखोदर्काः परायत्ततत्तत्स्वभावाः पतिजायापुत्रवित्तादयो विषयाः इति । अस्मिंस्तु प्रकरणे जीवात्मवाचिशब्देनापि परमात्मन एवाभिधानात् *आत्मनस्तु कामाय, *आत्मा वा अरे द्रष्टव्यः इति पूर्वोक्तप्रक्रिययोभयत्रात्मशब्दावेकविषयौ ॥ १९ ॥

मतान्तरेणापि जीवशब्देन परमात्माभिधानोपपादनायाह—

129 प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः । १ । ४ । २० ॥

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गम्, यज्जीवात्मवाचिशब्दैः परमात्मनोऽभिधानम् इत्याश्मरथ्य आचार्यो मन्यते स्म । यद्ययं जीवः परमात्मकार्यतया परमात्मैव न भवेत्, तदा तद्व्यतिरिक्ततया परमात्मविज्ञानादेतद्विज्ञानं न सेत्स्यति । *आत्मा वा इदमेक एवाग्र आसीदिति प्राक्सृष्टेरेकत्वावधारणात्, *यथा सुदीप्तात्पावकाद्विस्फुलिङ्गास्सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥ इत्यादिभिर्ब्रह्मणो जीवानामुत्पत्तिश्रवणात्तस्मिन्नेव लयश्रवणाच्च जीवानां ब्रह्मकार्यत्वेन ब्रह्मणैक्यमवगम्यते । अतो जीवशब्देन परमात्माभिधानमिति ॥ २० ॥

130 उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः । १ । ४ । २१ ॥

यदुक्तं जीवस्य ब्रह्मकार्यतया ब्रह्मणैक्येनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनार्थं ब्रह्मणो जीवशब्देन प्रतिपादनमिति, तदयुक्तं *न जायते म्रियते वा विपश्चिदित्यादिनाऽजत्वश्रुतेर्जीवात्मनां प्राचीनकर्मफलभोगाय जगत्सृष्ट्यभ्युपगमाच्च, अन्यथा विषमसृष्ट्यनुपपत्तेश्च, ब्रह्मकार्यस्य जीवस्य ब्रह्मतापत्तिलक्षणो मोक्ष आकाशादिवदर्जनीय इति तदुपायविधानानुष्ठानानर्थक्याच्च, घटादिवत्कारणप्राप्तेर्विनाशरूपत्वेन मोक्षस्यापुरुषार्थत्वाच्च । जीवात्मन उत्पत्तिप्रलयवादोपपत्तिरुत्तरत्र प्रपञ्चयिष्यते । अतः *एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ इत्युत्क्रमिष्यतः परमात्मभावाज्जीवशब्देन परमात्मनोऽभिधानमित्यौडुलोमिराचार्यो मन्यते स्म ॥ २१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

131 अवस्थितेरिति काशकृत्स्नः । १ । ४ । २२ ॥

यदुक्तमुत्क्रमिष्यतो जीवस्य ब्रह्मभावाद्ब्रह्मणस्तच्छब्देनाभिधानमिति; तदप्ययुक्तम्, विकल्पासहत्वात् । अस्य जीवात्मन उत्क्रान्तेः पूर्वमनेवंभावः किं स्वाभाविकः, उतौपाधिकः तत्रापि पारमार्थिकः, अपारमार्थिको वेति । स्वाभाविकत्वे ब्रह्मभावो नोपपद्यते, भेदस्य स्वरूपप्रयुक्तत्वेन स्वरूपे विद्यमाने तदनपायात् । अथ भेदेन सह स्वरूपमप्यपैतीति, तथा सति विनष्टत्वादेव तस्य न ब्रह्मभावः, अपुरुषार्थत्वादिदोषप्रसङ्गश्च । पारमार्थिकौपाधिकत्वे प्रागपि ब्रह्मैवेति उत्क्रमिष्यत एवंभावादिति विशेषो न युज्यते वक्तुम् । अस्मिन्पक्षे ह्युपाधिब्रह्मव्यतिरेकेण वस्त्वन्तराभावान्निरवयवस्य ब्रह्मण उपाधिना च्छेदाद्यसंभवाच्चोपाधिगत एव भेद इत्युत्क्रान्तेः प्रागपि ब्रह्मैव । औपाधिकस्य भेदस्यापारमार्थिकत्वे कस्यायमुत्क्रान्तौ ब्रह्मभाव इति वक्तव्यम् । ब्रह्मण एवाविद्योपाधितिरोहितस्वस्वरूपस्येति चेन्न; नित्यमुक्तस्वप्रकाशज्ञानस्वरूपस्याविद्योपाधितिरोधानासंभवात् । तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्तिः । प्रकाश एव वस्तुस्वरूपमित्यङ्गीकारे तिरोधानाभावस्स्वरूपनाशो वा स्यात् । अतो नित्याविर्भूतस्वस्वरूपत्वात्तस्योत्क्रान्तौ ब्रह्मभावे न कश्चिद्विशेष इति उत्क्रमिष्यत इति विशेषणं व्यर्थमेव । *अस्माच्छरीरात्समुत्थायेति पूर्वमनेवंरूपस्य न तदानीं ब्रह्मतापत्तिमाह; अपितु पूर्वसिद्धस्वरूपस्याविर्भावम् । तथाहि वक्ष्यते *संपद्याविर्भावस्स्वेन शब्दात् इत्यादिभिः । अतः *अनेन जीवेनात्मनाऽनुप्रविश्य *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः *योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *इति स्वशरीरभूते जीवात्मन्यात्मतयाऽवस्थितेर्जीवशब्देन ब्रह्मप्रतिपादनमिति काशकृत्स्न आचार्यो मन्यते स्म । जीवशब्दश्च जीवस्य परमात्मपर्यन्तस्यैव वाचको न जीवमात्रस्येति पूर्वमेवोक्तम् *नामरूपे व्याकरवाणीत्यत्र । एवमात्मशरीरभावेन तादात्म्योपपादने परस्य ब्रह्मणोऽपहतपाप्मत्वसर्वज्ञत्वादिगोचराः जीवस्याविदुषश्शोचतो ब्रह्मोपासनान्मोक्षवादिन्यः, जगत्सृष्टिप्रलयाभिधायिन्यः, जगतो ब्रह्मतादात्म्योपदेशपराश्च सर्वाश्श्रुतयस्सम्यगुपपादिता भवन्तीति काशकृत्स्नीयमेव मतं सूत्रकारस्स्वीकृतवान् ।

अयमत्र वाक्यार्थः— अमृतत्वोपाये मैत्रेय्या पृष्टे याज्ञवल्क्यः— *आत्मा वा अरे द्रष्टव्यः इत्यादिना परमात्मोपासनममृतत्वोपायमुक्त्वा, *आत्मनि खल्वरे दृष्टे इत्यादिनोपास्यलक्षणम् दुन्दुभ्यादिदृष्टान्तैश्चोपासनोपकरणभूतमनःप्रभृतिकरणनियमनं च सामान्येनाभिधाय, *स यथाऽऽर्द्रैधाग्नेः इत्यादिना *स यथा सर्वासामपां समुद्र एकायनम् इत्यादिना चोपास्यभूतस्य परस्य ब्रह्मणो निखिलजगदेककारणत्वम्सकलविषयप्रवृत्तिमूलकरणग्रामनियमनं च विस्तीर्णमुपदिश्य *स यथा सैन्धवघनः इत्यादिनाऽमृतत्वोपायप्रवृत्तिप्रोत्साहनाय जीवात्मस्वरूपेणावस्थितस्य परमात्मनोऽपरिच्छिन्नज्ञानैकाकारतामुपपाद्य, तस्यैवापरिच्छिन्नज्ञानैकाकारस्य संसारदशायां

Digitization by Arya Samaj Charitable Foundation, Chennai

भूतपरिणामानुवृत्तिं *विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति इत्यभिधाय, *न प्रेत्य संज्ञाऽस्ति इति मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञानसङ्कोचाभावेन भूतसङ्घातेनैकीकृत्यात्मनि देवादिरूपज्ञानाभावमुक्त्वा, पुनरपि *यत्र हि द्वैतमिव भवति इत्यादिना अब्रह्मात्मकत्वेन नानाभूतवस्तुदर्शनमज्ञानकृतमिति निरस्तनिखिलाज्ञानस्य ब्रह्मात्मकं कृत्स्नं जगदनुभवतो ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेन भेददर्शनं निरस्य, *येनेदं सर्वं विजानाति तं केन विजानीयात् इतिच जीवात्मा स्वात्मतयाऽवस्थितेन येन परमात्मना आहितज्ञानस्सन्निदं सर्वं विजानाति, अयं तं केन विजानीयात्, न केनापीति परमात्मनो दुरवगमत्वमुपपाद्य, *स एष नेतिनेति इत्यादिना अयं सर्वेश्वरस्स्वेतरसमस्तचिदचिद्वस्तुविलक्षणस्वरूप एव सर्वशरीरस्सर्वस्यात्मतयाऽवस्थित इति स्वशरीरभूतचिदचिद्वस्तुगतैर्दोषैर्न संस्पृश्यत इत्यभिधाय, *विज्ञातारमरे केन विजानीयादित्युक्तानुशासनाऽसि मैत्रेय्येतावदरे खल्वमृतत्वम्* इति समस्तवस्तुविसजातीयं निखिलजगदेककारणभूतं सर्वस्य विज्ञातारं पुरुषोत्तममुक्तप्रकारादुपासनादृते केन विजानीयादितीदमेवोपासनममृतत्वोपायः; ब्रह्मप्राप्तिरेव चामृतत्वमभिधीयते—इत्युक्तवान् । अतः परं ब्रह्मैवास्मिन्वाक्ये प्रतिपाद्यत इति परमेव ब्रह्म जगत्कारणम्, न पुरुषस्तदधिष्ठिता च प्रकृतिरिति स्थितम् ॥ २२ ॥ इति वाक्यान्वयाधिकरणम् ॥ ६ ॥

अथ प्रकृत्यधिकरणम् ॥ ७ ॥

132 प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् । १ । ४ । २३ ॥

एवं निरीश्वरसाङ्ख्ये निरस्ते सति सेश्वरसाङ्ख्यः प्रत्यवतिष्ठते—यद्यपीक्षणादिगुणयोगात्सर्वज्ञमीश्वरं जगत्कारणत्वेन वेदान्ताः प्रतिपादयन्ति । तथापि वेदान्तैरेव जगदुपादानतया प्रधानमेव प्रदिपाद्यत इति प्रतीयते । नहि वेदान्तास्सर्वज्ञस्यापरिणामिनोऽधिष्ठातुरीश्वरस्याधिष्ठेयेनाचेतनेन परिणामिना प्रधानेन विना जगतः कारणत्वमवगमयन्ति । तथा ह्यपरिणामिनमेनं प्रकृतिं चैतदधिष्ठितां परिणामिनीमधीयते—*निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् *स वा एष महानज आत्माऽजरोऽमरः *विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् *ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः । सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती सा जनित्री भूतभाविनी ॥ इति । तथा प्रकृतिमुपादानभूतामधिष्ठायैवेश्वरो विश्वं जगत्सृजतीति श्रूयते *अस्मान्मायी सृजते विश्वमेतत् *मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् इति । स्मृतिरपि *मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् इति । एवमश्रुतेऽपि प्रधानोपादानत्वे ब्रह्मणो जगत्कारणत्वश्रुत्यन्यथानुपपत्त्यैव प्रधानस्वरूपं तस्येश्वराधिष्ठितस्य जगदुपादानत्वं च सिद्ध्यति । एवमेव हि लोके निमित्तोपादानयोरत्यन्तभेदो दृश्यते । मृत्सुवर्णादेरचेतनस्य घटकटकाद्युपादानत्वं चेतनस्य कुलालसुवर्णकारादेर्निमित्तत्वं च नियतमुपलभ्यते । कार्यनिष्पत्तिश्च नियमेनानेककारकसव्यपेक्षा दृष्टा । एवं निमित्तोपादानयोर्भेदनियमं कार्यनिष्पत्तेरनेककारकसव्यपेक्षत्वनियमं चातिक्रम्यैकमेव ब्रह्मोपादानं निमित्तं च प्रतिपादयितुं न प्रभवन्ति वेदान्तवाक्यानि । अतो ब्रह्म निमित्तकारणमेव, नोपादानम् । उपादानं तु तद-

Digitization by Arya Samaj Charitable Foundation, Chennai

धिष्ठितं प्रधानमेवेति ॥

एवं प्राप्तेऽभिधीयते—प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति । प्रकृतिश्च—उपादानं च । न निमित्तकारणमात्रं ब्रह्म, उपादानकारणं च ब्रह्मैवेत्यर्थः । कुतः ? प्रतिज्ञादृष्टान्तानुपरोधात् । एवमेव हि प्रतिज्ञादृष्टान्तौ नोपरुध्येते । प्रतिज्ञा तावत् *स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानविषया । दृष्टान्तश्च *यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् *यथा सोम्यैकेन लोहमणिना *यथा सोम्यैकेन नखनिकृन्तनेन इति कारणविज्ञानात्कार्यविज्ञानविषयः । यदि निमित्तकारणमेव जगतो ब्रह्म, तदा तद्विज्ञानान्न समस्तं जगद्विज्ञातं स्यात् । नहि कुलालादिविज्ञानेन घटादिर्विज्ञायते । अतः प्रतिज्ञादृष्टान्तयोर्बाध एव । ब्रह्मण एवोपादानत्वे उपादानभूतमृत्पिण्डलोहमणिनखनिकृन्तनविज्ञानेन घटमणिककटकमकुटवासीपरश्वथादितत्कार्यविज्ञानवन्निखिलजगदुपादानभूते ब्रह्मणि विज्ञाते तत्कार्यं निखिलं जगद्विज्ञातं स्यात् । कारणमेवावस्थान्तरापन्नं कार्यम्, न द्रव्यान्तरमिति कार्यकारणरूपेणावस्थितमृत्तद्विकारादिनिदर्शनेन प्रतिज्ञासमर्थनाद्ब्रह्म जगदुपादानं चेति निश्चीयते । यत्तु निमित्तोपादानयोर्भेदश्श्रुत्यैव प्रतीयत इति; तदसत्, निमित्तोपादानयोरैक्यप्रतीतेः *उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवतीति । आदिश्यते प्रशिष्यतेऽनेनेत्यादेशः, *एतस्य वा अक्षरस्य प्रशासने गार्गि इत्यादिश्रुतेः । साधकतमत्वेन कर्ता विवक्षितः । तमादेष्टारमप्राक्ष्यः, येनाश्रुतं श्रुतं भवति—येनादेष्ट्राऽधिष्ठात्रा श्रुतेनाश्रुतमपि श्रुतं भवतीति निमित्तोपादानयोरैक्यं प्रतीयते; *सदेव सोम्येदमग्र आसीदेकमेवेति प्राक्सृष्टेरेकत्वावधारणादद्वितीयपदेनाधिष्ठात्रन्तरनिवारणाच्च । नन्वेवं सति *विकारजननीम् *गौरनाद्यन्तवती इत्यादिभिः प्रकृतेराद्यन्तविरहेण नित्यत्वं जगदुपादानत्वं च श्रूयमाणं कथमुपपद्यते ? तदुच्यते—तत्राप्यविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृतिशब्देनाभिधीयते, ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् । तथाहि श्रुतयः *सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद *यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् इत्याद्याः; *सर्वं खल्विदं ब्रह्म *ऐतदात्म्यमिदं सर्वमिति कार्यावस्थं कारणावस्थं च सर्वं जगद्ब्रह्मात्मकमिति श्रवणाच्च ।

एतदुक्तं भवति—*यः पृथिवीमन्तरे सञ्चरन्यस्य पृथिवी शरीरं यं पृथिवी न वेद इत्यारभ्य *योऽव्यक्तमन्तरे सञ्चरन्यस्याव्यक्तं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यमक्षरं न वेद *यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति इत्यारभ्य *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति [च] सर्वचिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतं परं ब्रह्म कदाचिद्विभक्तनामरूपम्, कदाचिच्चाविभक्तनामरूपम्; यदा विभक्तनामरूपं तदा तदेव बहुत्वेन कार्यत्वेन चोच्यते; यदा चाविभक्तनामरूपं तदैकमद्वितीयं कारणमिति च । एवं सर्वदा चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणोऽविभक्तनामरूपा या कारणावस्था सा *गौरनाद्यन्तवती *विकारजननीमज्ञाम् *अजामेकाम् इत्यादिभिरभिधीयते इति । ननु च *महानव्यक्ते

Digitization by Arya Samaj Charitable Foundation, Chennai

लीयते अव्यक्तमक्षरे लीयते इति प्रलयश्रुतेरव्यक्तस्योत्पत्तिप्रलयौ प्रतीयेते; तथा च महाभारते *तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम *अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते इति। नैष दोषः, अचिद्वस्तुशरीरस्य ब्रह्मणोऽव्यक्तशब्दवाच्यायास्त्रिगुणावस्थायाः कार्यत्वात्। *यदा तमस्तन्न दिवा न रात्रिः इति कृत्स्नप्रलयदशायामपि ब्रह्मात्मकस्यातिसूक्ष्मस्याचिद्वस्तुनस्स्थित्यभिधानाज्जगत्कारणस्य परस्य ब्रह्मणः प्रकारभूतमतिसूक्ष्मं चाचिद्वस्तु नित्यमेवेति तत्प्रकारं ब्रह्मैव *गौरनाद्यन्तवतीत्यादिष्वभिधीयते। अत एव च *अक्षरं तमसि लीयते तमः परे देव एकी भवतीति तमस एकीभावमात्रमेव श्रूयते; न तु लयः। एकीभाव इति तमोभिधानातिसूक्ष्माचित्प्रकारस्य ब्रह्मणोऽविभक्तनामरूपतयाऽवस्थानमभिधीयते। *तम आसीत्तमसा गूढमग्रे प्रकेतं तमसस्तन्महिनाजायतैकम् इत्याद्यप्येतदेव वदति। तथा च मानवं वचः *आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ इति। *अस्मान्मायी सृजते विश्वमेतत् इत्याद्यनन्तरमेवोपपादयिष्यते; ब्रह्मणोऽपरिणामित्वश्रुतयश्च। यत्त्वेकस्य निमित्तत्वमुपादानत्वं च न संभवति, एककारकनिष्पाद्यत्वं च कार्यस्य; लोके तथा नियमदर्शनात्। अतोऽग्निना सिञ्चेदितिवद्वेदान्तवाक्यान्येकस्मादेवोत्पत्तिं प्रतिपादयितुं न प्रभवन्तीति। अत्रोच्यते—सकलेतरविलक्षणस्य परस्य ब्रह्मणस्सर्वशक्तेस्सर्वज्ञस्यैकस्यैव सर्वमुपपद्यते। मृदादेरचेतनस्य ज्ञानाभावेनाधिष्ठातृत्वायोगादधिष्ठातुः कुलालादेर्विचित्रपरिणामशक्तिविरहादसत्यसङ्कल्पतया च तथा दर्शननियमः। अतो ब्रह्मैव जगतो निमित्तमुपादानं च॥२३॥

133 अभिध्योपदेशाच्च। १। ४। २४॥

इतश्चोभयं ब्रह्मैव, *सोऽकामयत बहु स्यां प्रजायेयेति *तदैक्षत बहु स्यां प्रजायेय इति स्रष्टुर्ब्रह्मणस्स्वस्यैव बहुभवनसङ्कल्पोपदेशात्। विचित्रचिदचिद्रूपेणाहमेव बहु स्यां तथा प्रजायेयेति सङ्कल्पपूर्विका हि सृष्टिरुपदिश्यते॥ २४॥

134 साक्षाच्चोभयाम्नानात्। १। ४। २५॥

न केवलं प्रतिज्ञादृष्टान्ताभिध्योपदेशादिभिरयमर्थो निश्चीयते, ब्रह्मण एव निमित्तत्वमुपादानत्वं च साक्षादाम्नायते *किं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदुतयद्ध्यतिष्ठद्भुवनानि धारयन्। ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्॥ इति। अत्र हि स्रष्टुर्ब्रह्मणः किमुपादानं कानि चोपकरणानीति लोकदृष्ट्या पृष्टे सकलेतरविलक्षणस्य ब्रह्मणस्सर्वशक्तियोगो न विरुद्ध इति ब्रह्मैवोपादानमुपकरणानि चेति परिहृतम्। अतश्चोभयं ब्रह्म॥ २५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

135 आत्मकृतेः । १ । ४ । २६ ॥

*सोऽकामयत बहु स्यां प्रजायेयेति सिसृक्षुत्वेन प्रकृतस्य ब्रह्मणः *तदात्मानं स्वयमकुरुतेति सृष्टेः कर्मत्वं कर्तृत्वं च प्रतीयत इत्यात्मन एव बहुत्वकरणात्तस्यैव निमित्तत्वमुपादानत्वं च प्रतीयते । अविभक्तनामरूप आत्मा कर्ता, स एव विभक्तनामरूपः कार्यमिति कर्तृत्वकर्मत्वयोर्न विरोधः । स्वयमेवात्मानं तथाऽकुरुतेति निमित्तमुपादानं च ॥ २६ ॥

*सत्यं ज्ञानमनन्तं ब्रह्म *आनन्दो ब्रह्म *अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः *निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् *स वा एष महानज आत्माऽजरोऽमरः इति स्वभावतो निरस्तसमस्तचेतनाचेतनवर्तिदोषगन्धस्य निरतिशयज्ञानानन्दैकतानस्य परस्य ब्रह्मणो विचित्रानन्तापुरुषार्थास्पदचिदचिन्मिश्रप्रपञ्चरूपेणात्मनो बहुभवनसङ्कल्पपूर्वकं बहुत्वकरणं कथमुपपद्यत इत्याशङ्क्याह—

136 परिणामात् । १ । ४ । २७ ॥

परिणामस्वाभाव्यात्; नात्रोपदिश्यमानस्य परिणामस्य परस्मिन्ब्रह्मणि दोषावहत्वं स्वभावः, प्रत्युत निरङ्कुशैश्वर्यावहत्वमेवेत्यभिप्रायः । एवमेव हि परिणाम उपदिश्यते । अशेषहेयप्रत्यनीककल्याणैकतानं स्वेतरसमस्तवस्तुविलक्षणं सर्वज्ञं सत्यसङ्कल्पमवाप्तसमस्तकाममनवधिकातिशयानन्दं स्वलीलोपकरणभूतसमस्तचिदचिद्वस्तुजातशरीरतया तदात्मभूतं परं ब्रह्म स्वशरीरभूते प्रपञ्चे तन्मात्राहङ्कारादिकारणपरम्परया तमश्शब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति, तमसि च स्वशरीरतयाऽपि पृथङ्निर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतामापन्ने सति, तथाभूततमश्शरीरं ब्रह्म पूर्ववद्विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चशरीरं स्यामिति सङ्कल्प्याप्ययक्रमेण जगच्छरीरतया आत्मानं परिणमयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः । तथैव बृहदारण्यके कृत्स्नस्य जगतो ब्रह्मशरीरत्वं ब्रह्मणस्तदात्मत्वं चाम्नायते *यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः इत्यारभ्य *यस्यापश्शरीरम् *यस्याग्निश्शरीरम् *यस्यान्तरिक्षं शरीरम् *यस्य वायुश्शरीरम् *यस्य द्यौश्शरीरम् *यस्यादित्यश्शरीरम् *यस्य दिशश्शरीरम् *यस्य चन्द्रतारकं शरीरम् *यस्याकाशश्शरीरम् *यस्य तमश्शरीरम् *यस्य तेजश्शरीरम् *यस्य सर्वाणि भूतानि शरीरम् *यस्य प्राणश्शरीरम् *यस्य वाक्छरीरम् *यस्य चक्षुश्शरीरम् *यस्य श्रोत्रं शरीरम् *यस्य मनश्शरीरम् *यस्य त्वक्छरीरम् *यस्य विज्ञानं शरीरम् *यस्य रेतश्शरीरम् इत्येवमन्तेन काण्वपाठे; माध्यन्दिने तु पाठे विज्ञानस्थाने *यस्यात्मा शरीरमिति विशेषः; लोकयज्ञवेदानां परमात्मशरीरत्वमधिकम् । सुबालोपनिषदि च पृथिव्यादीनां तत्त्वानां परमात्मशरीरत्वमभिधाय वाजसनेयकेऽनुक्तानामपि तत्त्वानां शरीरत्वं ब्रह्मण आत्मत्वं च

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रूयते *यस्य बुद्धिश्शरीरम् *यस्याहङ्कारश्शरीरम् *यस्य चित्तं शरीरम् *यस्याव्यक्तं शरीरम् *यस्याक्षरं शरीरम् *यो मृत्युमन्तरे सञ्चरन्यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति । अत्र मृत्युशब्देन परमसूक्ष्ममचिद्वस्तु तमश्शब्दवाच्यमभिधीयते, *अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इति तस्यामेवोपनिषदि क्रमप्रत्यभिज्ञानात् । सर्वेषामात्मनां ज्ञानावरणानर्थमूलत्वेन तदेव हि तमो मृत्युशब्दव्यपदेश्यम् । सुबालोपनिषद्येव ब्रह्मशरीरतया तदात्मकानां तत्त्वानां ब्रह्मण्येव प्रलय आम्नायते *पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्ते तेजो वायौ लीयते वायुराकाशे लीयते आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव एकी भवति *इति । अविभागापत्तिदशायामपि चिदचिद्वस्त्वतिसूक्ष्मं सकर्मसंस्कारं तिष्ठतीत्युत्तरत्र वक्ष्यते *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति ।

एवं स्वस्माद्विभागव्यपदेशानर्हतया परमात्मनैकीभूतात्यन्तसूक्ष्मचिदचिद्वस्तुशरीरादेकस्मादेवाद्वितीयान्निरतिशयानन्दात्सर्वज्ञात्सत्यसङ्कल्पाद्ब्रह्मणो नामरूपविभागार्हस्थूलचिदचिद्वस्तुशरीरतया बहुभवनसङ्कल्पपूर्वको जगदाकारेण परिणामश्श्रूयते । *सत्यं ज्ञानमनन्तं ब्रह्म *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः *एष ह्येवानन्दयाति *सोऽकामयत, बहुस्यां प्रजायेयेति, स तपोऽतप्यत, स तपस्तप्त्वा, इदं सर्वमसृजत, यदिदं किञ्च, तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, निरुक्तं चानिरुक्तंच, निलयनं चानिलयनं च, विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवत् इति । अत्र तपश्शब्देन प्राचीनजगदाकारपर्यालोचनरूपं ज्ञानमभिधीयते, *यस्य ज्ञानमयं तपः इत्यादिश्रुतेः । प्राक्सृष्टं जगत्संस्थानमालोच्येदानीमपि तत्संस्थानं जगदसृजदित्यर्थः । तथैव हि ब्रह्म सर्वेषु कल्पेष्वेकरूपमेव जगत्सृजति *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, दिवं च पृथिवीं चान्तरिक्षमथो सुवः *यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानितान्येव तथा भावा युगादिषु ॥ इति श्रुतिस्मृतिभ्यः ।

तदयमर्थः— स्वयमपरिच्छिन्नज्ञानानन्दस्वभावोऽत्यन्तसूक्ष्मतयाऽसत्कल्पस्वलीलोपकरणचिदचिद्वस्तुशरीरतया तन्मयः परमात्मा विचित्रानन्तक्रीडनकोपादित्सया स्वशरीरभूतप्रकृतिपुरुषसमष्टिपरम्परया महाभूतपर्यन्तमात्मानं तत्तच्छरीरकं परिणमय्य तन्मयः पुनस्सत्त्यच्छब्दवाच्यविचित्रचिदचिन्मिश्रदेवादिस्थावरान्तजगद्रूपोऽभवदिति । *तदेवानुप्राविशत्, तदनुप्रविश्येति कारणावस्थायामात्मतयाऽवस्थितः परमात्मैव कार्यरूपेण विक्रियमाणद्रव्यस्याप्यात्मतयाऽवस्थाय तत्तदभवदित्युच्यते । एवं परमात्मचिदचित्सङ्घातरूपजगदाकारपरिणामे परमात्मशरीरभूतचिदंशगतास्सर्व एवापुरुषार्थाः; तथाभूताचिदंशगताश्च सर्वे विकाराः; परमात्मनि कार्यत्वं तदवस्थयोस्तयोर्नियन्तृत्वेनात्मत्वम्; परमात्मा तु तयोस्स्वशरीरभूतयोर्नियन्तृतयाऽऽत्मभूतस्तद्गतापुरुषार्थैर्विकारैश्च न स्पृश्यते; अपरिच्छिन्नज्ञानानन्दमयस्सर्वदैकरूप एव जगत्परिवर्तनलीलयाऽवतिष्ठते । तदेतदाह *सत्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

चानृतं च सत्यमभवदिति । विचित्रचिदचिद्रूपेण विक्रियमाणमपि ब्रह्म सत्यमेवाभवत्—निरस्तनिखिलदोषगन्धमपरिच्छिन्नज्ञानानन्दमेकरूपमेवाभवदित्यर्थः । सर्वाणि चिदचिद्वस्तूनि सूक्ष्मदशापन्नानि स्थूलदशापन्नानि च परस्य ब्रह्मणो लीलोपकरणानि; सृष्ट्यादयश्च लीलेति भगवद्द्वैपायनपराशरादिभिरुक्तम् *अव्यक्तादिविशेषान्तं परिणामर्द्धिसंयुतम् । क्रीडा हरेरिदं सर्वं क्षरमित्युपधार्यताम् ॥ *क्रीडतो बालकस्येव चेष्टां तस्य निशामय *बालः क्रीडनकैरिव इत्यादिभिः । वक्ष्यतिच *लोकवत्तु लीलाकैवल्यमिति । *अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः इति ब्रह्मणि जगद्रूपतया विक्रियमाणेऽपि तत्प्रकारभूताचिदंशगतास्सर्वे विकारास्तत्प्रकारभूतक्षेत्रज्ञगताश्चापुरुषार्था इति विवेक्तुं प्रकृतिपुरुषयोर्ब्रह्मशरीरभूतयोस्तदानीं तथा निर्देशानर्हातिसूक्ष्मदशापत्त्या ब्रह्मणैकीभूतयोरपि भेदेन व्यपदेशः, *तदात्मानं स्वयमकुरुतेत्यादिभिरैकार्थ्यात् । तथाच मानवं वचः *सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ इति । अत एव ब्रह्मणो निर्दोषत्वनिर्विकारत्वश्रुतयश्चोपपन्नाः । अतो ब्रह्मैव जगतो निमित्तमुपादानञ्च ॥ २७ ॥

137 योनिश्च हि गीयते । १ । ४ । २८ ॥

इतश्च जगतो निमित्तमुपादानञ्च ब्रह्म, यस्माद्योनित्वेनाप्यभिधीयते *कर्तारमीशं पुरुषं ब्रह्मयोनिम् इति, *यद्भूतयोनिं परिपश्यन्ति धीराः इति च । योनिशब्दश्चोपादानवचन इति *यथोर्णनाभिस्सृजते गृह्णते चेति वाक्यशेषादवगम्यते ॥ २८ ॥ इति प्रकृत्यधिकरणम् ॥ ७ ॥

अथ सर्वव्याख्यानाधिकरणम् ॥ ८ ॥

138 एतेन सर्वे व्याख्याता व्याख्याताः । १ । ४ । २९ ॥

एतेन—पादचतुष्टयोक्तन्यायकलापेन, सर्ववेदान्तेषु जगत्कारणप्रतिपादनपरास्सर्वे वाक्यविशेषाश्चेतनाचेतनविलक्षणसर्वज्ञसर्वशक्तिब्रह्मप्रतिपादनपरा व्याख्याताः । व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ॥ २९ ॥ इति सर्वव्याख्यानाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

॥ समाप्तश्चाध्यायः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः

द्वितीयाध्याये—प्रथमः पादः-स्मृत्यधिकरणम् ॥ १ ॥

139 स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ।२।१।१ ॥

प्रथमेऽध्याये प्रत्यक्षादिप्रमाणगोचरादचेतनात्तत्संसृष्टात्तद्वियुक्ताच्च चेतनादर्थान्तरभूतं निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धमनन्तज्ञानानन्दैकतानमपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वान्तरात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तम् । अनन्तरमस्यार्थस्य संभावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोऽध्याय आरभ्यते ॥

प्रथमं तावत्कपिलस्मृतिविरोधाद्वेदान्तानामतत्परत्वमाशङ्क्य तन्निराक्रियते । कथं स्मृतिविरोधाच्छ्रुतेरन्यपरत्वम् ? उक्तं हि *विरोधे त्वनपेक्षं स्यात्* इति श्रुतिविरुद्धायास्स्मृतेरनादरणीयत्वम् । सत्यम्, *औदुम्बरीं स्पृष्ट्वोद्गायेत् *इत्यादिषु स्वत एवार्थनिश्चयसंभवात्तद्विरुद्धा स्मृतिरनादरणीयैव; इहतु वेदान्तवेद्यतत्त्वस्य दुरवबोधत्वेन परमर्षिप्रणीतस्मृतिविरोधे सत्ययमर्थ इति निश्चयायोगात् स्मृत्या श्रुतेरतत्परत्वोपपादनमविरुद्धम् ।

एतदुक्तं भवति—प्राचीनभागोदितनिखिलाभ्युदयसाधनभूताग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता श्रुतिस्मृतीतिहासपुराणेषु *ऋषिं प्रसूतं कपिलम् *इत्यादिवाक्यैराप्तत्वेन सङ्कीर्तितेन परमर्षिणा कपिलेन परमनिःश्रेयसतत्साधनावबोधित्वेनोपनिबद्धस्मृत्युपबृंहणेन विना अल्पश्रुतैर्मन्दमतिभिर्वेदान्तार्थनिश्चयायोगाद्यथाश्रुतार्थग्रहणे चाप्तप्रणीतायास्साङ्ख्यस्मृतेस्सकलाया एवानवकाशप्रसङ्गाच्च स्मृतिप्रसिद्ध एवार्थो वेदान्तवेद्य इति बलादभ्युपगमनीयमिति । न च वाच्यं मन्वादिस्मृतीनां ब्रह्मैककारणत्ववादिनीनामेवं सत्यनवकाशत्वदोषप्रसङ्ग इति; धर्मप्रतिपादनपरप्राचीनभागोपबृंहण एव सावकाशत्वात् । अस्यास्तु कृत्स्नायास्तत्त्वप्रतिपादनपरत्वात्तथाऽनभ्युपगमे निरवकाशत्वमेव स्यात् । तदिदमाशङ्कते स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति ॥

तत्रोत्तरं—नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति । अन्या हि मन्वादिस्मृतयो ब्रह्मैककारणतां वदन्ति । यथाऽऽह मनुः *आसीदिदं तमोभूतम् इत्यारभ्य,

*ततस्स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥

*सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥

इति । भगवद्गीतासु च *अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा *अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते इति च । महाभारते *कुतस्सृष्टमिदं सर्वं जगत् स्थावरजङ्गमम् । प्रलये च कमभ्येति तन्मे ब्रूहि पितामह ॥ इति पृष्ट आह *नारायणो जगन्मूर्तिरनन्तात्मा सनातनः इति । तथा *तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम इति, *अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते इति च । आह

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवान्पराशरः *विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः॥ इति। आह चापस्तम्बः *पूः प्राणिनस्सर्वे एव गुहाशयस्य अहन्यमानस्य विकल्मषस्य इत्यारभ्य *तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकस्स नित्यः *इति। यदि कपिलस्मृत्या वेदान्तवाक्यार्थव्यवस्था स्यात्, तदैतासां सर्वासां स्मृतीनामनवकाशत्वरूपो महान् दोषः प्रसज्येत।

अयमर्थः—यद्यपि वेदान्तवाक्यानामतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसंभावनाभूमिभूतार्थप्रतिपादनपरत्वात्तदर्थवैशद्यायाल्पश्रुतानां प्रतिपत्तॄणां तदुपबृंहणमपेक्षितम्। तथाऽपि तदर्थानुसारिणीनामाप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानामनवकाशत्वं मा प्रसाङ्क्षीदिति श्रुतिविरुद्धार्था कपिलस्मृतिरुपेक्षणीया। उपबृंहणं च श्रुतिप्रतिपन्नार्थविशदीकरणम्; तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्तुम्। नचैतासां स्मृतीनां प्राचीनभागोदितधर्मांशविशदीकरणेन सावकाशत्वम्; परब्रह्मभूतपरमपुरुषाराधनत्वेन धर्मान्विदधतीनामेतासामाराध्यभूतपरमपुरुषप्रतिपादनाभावे सति तदाराधनभूतधर्मप्रतिपादनासंभवात्। तथाहि परमपुरुषाराधनरूपता सर्वेषां कर्मणां स्मर्यते—

*यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥

*ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु। ब्रह्मलोकमवाप्नोति न चेहावर्तते पुनः॥

*यैस्स्वकर्मपरैर्नाथ नरैराराधितो भवान्। ते तरन्त्यखिलामेतां मायामात्मविमुक्तये॥ इति। न चैहिकामुष्मिकसांसारिकफलसाधनकर्मप्रतिपादनेनैतासां सावकाशत्वम्। यतस्तेषामपि कर्मणां परमपुरुषाराधनत्वमेव स्वरूपम्; यथोक्तं

*येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥ इति।

तथा *यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत। हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्॥ इति। यदुक्तम् *ऋषिं प्रसूतं कपिलमिति कपिलस्याप्ततया सङ्कीर्तनात्तत्स्मृत्यनुसारेण वेदान्तार्थव्यवस्थापनं न्याय्यमिति; तदसत्, बृहस्पतेश्श्रुतिस्मृतिषु सर्वेषामतिशयितज्ञानानां निदर्शनत्वेन सङ्कीर्तनात्तत्प्रणीतेन लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसक्तेरिति॥ १॥

अथ स्यात्, कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धेस्तत्स्मृत्यनुसारेण वेदान्तार्थो व्यवस्थापयितव्य इति; अत उत्तरं पठति—

140 इतरेषां चानुपलब्धेः। २। १। २॥

चशब्दस्तुशब्दार्थश्चोदिताशङ्कानिवृत्त्यर्थः। इतरेषां—मन्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वयाथात्म्यानां निखिलजगद्भेषजभूतस्ववाक्यतया *यद्वै किञ्च मनुरवदत्तद्भेषजम्*

Digitization by Arya Samaj Charitable Foundation, Chennai

इति श्रुतिप्रसिद्धानां कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेश्श्रुतिविरुद्धा कपिलोपलब्धिर्भ्रान्तिमूलेति न तया यथोक्तो वेदान्तार्थश्चालयितुं शक्य इति सिद्धम् ॥ २ ॥ इति स्मृत्यधिकरणम् ॥ १ ॥

अथ योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

141 एतेन योगः प्रत्युक्तः । २ । १ । ३ ॥

एतेन--कापिलस्मृतिनिराकरणेन, योगस्मृतिरपि प्रत्युक्ता । का पुनरत्राधिकाशङ्का, यन्निराकरणाय न्यायातिदेशः ? योगस्मृतावपीश्वराभ्युपगमान्मोक्षसाधनतया वेदान्तविहितयोगस्य चाभिधानाद्वक्तुर्हिरण्यगर्भस्य सर्ववेदान्तप्रवर्तनाधिकृतत्वाच्च तत्स्मृत्या वेदान्तोपबृंहणं न्याय्यमिति । परिहारस्तु--अब्रह्मात्मकप्रधानकारणवादान्निमित्तकारणमात्रेश्वराभ्युपगमाद्ध्यानात्मकस्य योगस्य ध्येयैकनिरूपणीयस्य ध्येयभूतयोरात्मेश्वरयोर्ब्रह्मात्मकत्वजगदुपादानतादिसर्वकल्याणगुणात्मकत्वविरहेणावैदिकत्वाद्वक्तुर्हिरण्यगर्भस्यापि क्षेत्रज्ञभूतस्य कदाचिद्रजस्तमोभिभवसंभवाच्च योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवद्भ्रान्तिमूलेति न तया वेदान्तोपबृंहणं न्याय्यमिति ॥ ३ ॥ इति योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

अथ विलक्षणत्वाधिकरणम् ॥ ३ ॥

142 न विलक्षणत्वादस्य तथात्वं च शब्दात् । २ । १ । ४ ॥

पुनरपि स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते—यत्साङ्ख्यस्मृतिनिराकरणेन जगतो ब्रह्मकार्यत्वमुक्तम्, तन्नोपपद्यते; अस्य प्रत्यक्षादिभिरचेतनत्वेनाशुद्धत्वेनानीश्वरत्वेन दुःखात्मकत्वेन चोपलभ्यमानस्य चिदचिदात्मकस्य जगतः भवदभ्युपेतात्सर्वज्ञात्सर्वेश्वराद्धेयप्रत्यनीकादानन्दैकतानाद्ब्रह्मणो विलक्षणत्वात् । न कवलं प्रत्यक्षादिभिरेव जगतो वैलक्षण्यमुपलभ्यते; शब्दाच्च तथात्वं—विलक्षणत्वम्, उपलभ्यते—*विज्ञानं चाविज्ञानं च *एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः *समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः *अनीशश्चात्मा बध्यत भोक्तृभावात् *इत्यादिभिः कायस्य हि जगतोऽचेतनत्वदुःखित्वादयो निर्दिश्यन्ते । यद्धि यत्कार्यम्, तत्तस्मादविलक्षणम्, यथा मृत्सुवर्णादिकार्यं घटरुचकादि । अतो ब्रह्मविलक्षणस्यास्य जगतस्तत्कार्यत्वं न संभवतीति साङ्ख्यस्मृत्यनुरोधेन कार्यसलक्षणं प्रधानमेव कारणं भवितुमर्हति । अवश्यं च शास्त्रस्यानन्यापेक्षस्यातीन्द्रियार्थगोचरत्वेऽपि तर्कोऽनुसरणीयः; यतस्सर्वेषां प्रमाणानां क्वचित्क्वचिद्विषये तर्कानुगृहीतानामेवार्थनिश्चयहेतुत्वम् । तर्को हि नाम—अर्थस्वभावविषयेण वा सामग्रीविषयेण वा निरूपणेनार्थविशेषे प्रमाणं व्यवस्थापयत्तदितिकर्तव्यतारूपमूहापरपर्यायं ज्ञानम् । तदपेक्षा च सर्वेषां प्रमाणानां समाना । शास्त्रस्य तु विशेषेणाकाङ्क्षासन्निधियोग्यताज्ञानाधीनप्रमाण-

Digitization by Arya Samaj Charitable Foundation, Chennai

भावस्य सर्वत्रैव तर्कानुग्राहापेक्षा। उक्तंच मनुना *यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इति। तदेव हि तर्कानुगृहीतशास्त्रार्थप्रतिष्ठापनं श्रुत्या च *मन्तव्यः * इत्युच्यते ।

अथोच्येत--श्रुत्या जगतो ब्रह्मैककारणत्वे निश्चिते सति तत्कार्यस्यापि जगतश्चैतन्यानुवृत्तिरभ्युपगम्यते। यथा चेतनस्य सुषुप्तिमूर्च्छादिषु चैतन्यानुपलम्भः; तथा घटादिष्वपि सदेव चैतन्यमनुद्भूतम्; अत एव चेतनाचेतनविभागः—इति। नैतदुपपद्यते, यतो नित्यानुपलब्धिरसद्भावमेव साधयति। अत एव चैतन्यशक्तियोगोऽपि तेषु निरस्तः। यस्य हि क्वचित्कदाचिदपि यत्कार्यानुपलब्धिः, तस्य तत्कार्यशक्तिं ब्रुवाणो वन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम्। किञ्च वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चये सति घटादीनां चैतन्यशक्तेश्चैतन्यस्य वाऽनुद्भूतस्य सद्भावनिश्चयः, तन्निश्चये सति वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इतीतरेतराश्रयत्वम्।

विलक्षणयोर्हि कार्यकारणभावः प्रतिपादयितुमेव न शक्यते। किं पुनः प्रकृतिविकारयोस्सालक्षण्यमभिप्रेतम्, यदभावाज्जगतो ब्रह्मोपादानताप्रतिपादनासंभवं ब्रूषे? न तावत्सर्वधर्मसारूप्यम्, कार्यकारणभावानुपपत्तेः। नहि मृत्पिण्डकार्येषु घटशरावादिषु पिण्डत्वाद्यनुवृत्तिर्दृश्यते। अथ येनकेनचिद्धर्मेण सारूप्यम्, तज्जगद्ब्रह्मणोरपि सत्तादिलक्षणं संभवति। तदुच्यते--येन स्वभावेन कारणभूतं वस्तु वस्त्वन्तराद्व्यावृत्तम्, तस्य स्वभावस्य तत्कार्येऽप्यनुवृत्तिः कार्यस्य कारणसालक्षण्यम्। येन ह्याकारेण मृदादिभ्यो हिरण्यं व्यावर्तते, तदाकारानुवृत्तिस्तत्कार्येषु कुण्डलादिषु दृश्यते। ब्रह्म च हेयप्रत्यनीकज्ञानानन्दैश्वर्यस्वभावम्, जगच्च तत्प्रत्यनीकस्वभावमिति न तदुपादानम्। ननु च वैलक्षण्येऽपि कार्यकारणभावो दृश्यते, यथा चेतनात्पुरुषादचेतनानि केशनखदन्तलोमानि जायन्ते; यथा चाचेतनाद्गोमयाच्चेतनो वृश्चिको जायते; चेतनाच्चोर्णनाभेरचेतनस्तन्तुः। नैतदेवम्, यतस्तत्राप्यचेतनांश एव कार्यकारणभावः ॥ ४ ॥

अथ स्यात्—अचेतनत्वेनाभिमतानामपि चैतन्ययोगश्श्रुतिषु श्राव्यते *तं पृथिव्यब्रवीत्, *आपो वा अकामयन्त *ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्माणं जग्मुः * इति। नदीसमुद्रपर्वतादीनामपि चेतनत्वं पौराणिका आतिष्ठन्ते; अतो न वैलक्षण्यमिति। अत उत्तरं पठति—

143 अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । २ । १ । ५ ॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः; पृथिव्याद्यभिमानिन्यो देवताः *तं पृथिव्यब्रवीदित्यादिषु पृथिव्यादिशब्दैर्व्यपदिश्यन्ते। कुतः? विशेषानुगतिभ्याम्। विशेषः—विशेषणम्, देवताशब्देन विशेष्य पृथिव्यादयोऽभिधीयन्ते; *हन्ताहमिमास्तिस्रो देवताः इति तेजोऽबन्नानि देवताशब्देन विशेष्यन्ते; *सर्वा हवै देवता अहंश्रेयसे विवदमानाः *ते देवाः प्राणे निःश्रेयसं विदित्वा* इति च। अनुगतिः—अनुप्रवेशः; *अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्, वायुः प्राणो भूत्वा नासिके प्राविशत्* इत्यादिना वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशश्श्रूयते। अतो जगतोऽचेतन-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वेन विलक्षणत्वाद्ब्रह्मकार्यत्वानुपपत्तेस्तर्कानुगृहीतस्मृत्यनुरोधेन जगतः प्रधानोपादानत्वं वेदान्तैः प्रतिपाद्यते ॥ ५ ॥

इति प्राप्तेऽभिधीयते—

144 दृश्यते तु । २ । १ । ६ ॥

तुशब्दात्पक्षो विपरिवर्तते; यदुक्तं जगतो ब्रह्मविलक्षणत्वेन ब्रह्मोपादानत्वं न संभवतीति; तदयुक्तम्, विलक्षणयोरपि कार्यकारणभावदर्शनात् । दृश्यते हि माक्षिकादेर्विलक्षणस्य क्रिम्यादेस्तस्मादुत्पत्तिः । ननूक्तमचेतनांश एव कार्यकारणभावात्तत्र सालक्षण्यम् । सत्यमुक्तम्; न तावता कार्यकारणयोर्भवदभिमतसालक्षण्यसिद्धिः । यथाकथञ्चित्सालक्षण्ये सर्वस्य सर्वसालक्षण्येन सर्वस्मात्सर्वोत्पत्तिप्रसङ्गभयाद्वस्तुनो वस्त्वन्तराद्व्यावृत्तिहेतुभूतस्याकारस्यानुवृत्तिस्सालक्षण्यं भवताऽभ्युपेतम् । स तु नियमो माक्षिकादिभ्यः क्रिम्याद्युत्पत्तौ न दृश्यत इति ब्रह्मविलक्षणस्यापि जगतो ब्रह्मकार्यत्वं नानुपपन्नम् । नहि मृद्धिरण्यघटमकुटादिष्विव वस्त्वन्तरव्यावृत्तिहेतुभूतासाधारणाकारानुवृत्तिः माक्षिकगोमयाक्रिमिवृश्चिकादिषु दृश्यते ॥ ६ ॥

145 असदिति चेन्न, प्रतिषेधमात्रत्वात् । २ । १ । ७ ॥

यदि कार्यभूताज्जगतः कारणभूतं ब्रह्म विलक्षणम्, तर्हि कार्यकारणयोर्द्रव्यान्तरत्वेन कारणे परस्मिन्ब्रह्मणि कार्यं जगन्न विद्यत इत्यसत एव जगत उत्पत्तिः प्रसज्यत इति चेत्; नैतदेवम्, कार्यकारणयोस्सालक्षण्यनियमप्रतिषेधमात्रमेव हि पूर्वसूत्रेऽभिप्रेतम्, न तु कारणात्कार्यस्य द्रव्यान्तरत्वम् । कारणभूतं ब्रह्मैव स्वस्माद्विलक्षणजगदाकारेण परिणमत इत्येतत्तु न परित्यक्तम् । क्रिमिमाक्षिकयोरपि हि सति च वैलक्षण्ये कुण्डलहिरण्ययोरिव द्रव्यैक्यमस्त्येव ॥ ७ ॥

अत्र चोदयति—

146 अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । २ । १ । ८ ॥

अपीतावित्यपीतिपूर्वकसृष्ट्यादेः प्रदर्शनार्थम्, *सदेव सोम्येदमग्र आसीत् *आत्मा वा इदमेक एवाग्र आसीत् इत्यादिष्वप्ययावस्थोपदेशपूर्वकत्वदर्शनात्सृष्ट्यादेः । यदि कार्यकारणयोर्द्रव्यैक्यमभ्युपेतम्, तदा कार्यस्य जगतो ब्रह्मण्यप्ययसृष्ट्यादिषु सत्सु ब्रह्मण एव तत्तदवस्थान्वय इति कार्यगतास्सर्वे एवापुरुषार्थाः ब्रह्मणि प्रसज्येरन्, सुवर्ण इव कुण्डलगता विशेषाः । ततश्च वेदान्तवाक्यं सर्वमसमञ्जसं स्यात्, *यस्सर्वज्ञस्सर्ववित् *अपहतपाप्मा विजरो विमृत्युः *न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते *तयोरन्यः पिप्पलं स्वाद्वत्ति *अनीशश्चात्मा बध्यते भोक्तृभावात् *अनीशया शोचति मुह्यमानः* इत्येकस्मिन्नेव वस्तुन्येषां परस्परविरुद्धानां प्रसक्तेः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथोच्येत—चिदचिद्वस्तुशरीरकस्य परस्यैव ब्रह्मणः कार्यकारणभावाच्छरीरभूतचिदचिद्वस्तुगतत्वाच्च दोषाणाम्, न शरीरिणि ब्रह्मणि कार्यावस्थे कारणावस्थे च प्रसङ्गः इति। तदयुक्तम्, जगद्ब्रह्मणोश्शरीरशरीरिभावस्यैवासंभवात्; संभवे च ब्रह्मणि शरीरसंबन्धनिबन्धनदोषाणामनिवार्यत्वात्। न हि चिदचिद्वस्तुनोर्ब्रह्मणश्शरीरत्वं संभवति। शरीरं हि नाम कर्मफलरूपसुखदुःखभोगसाधनभूतेन्द्रियाश्रयः पञ्चवृत्तिप्राणाधीनधारणः पृथिव्यादिभूतसङ्घातविशेषः; तथाविधस्यैव लोकवेदयोश्शरीरत्वप्रसिद्धेः। परमात्मनश्च *अपहतपाप्मा विजरः *अनश्नन्नन्यो अभिचाकशीति *अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः *अप्राणो ह्यमनाः* इत्यादिभिः कर्मतत्फलभोगयोरभावादिन्द्रियाधीनभोगत्वाभावात्प्राणवत्त्वाभावाच्च न तं प्रति चेतनाचेतनयोश्शरीरत्वम्। नचाचेतनव्यष्टिरूपतृणकाष्ठादीनां समष्टिरूपस्य भूतसूक्ष्मस्य चेन्द्रियाश्रयत्वादि संभवति। भूतसूक्ष्मस्य पृथिव्यादिसङ्घातत्वं च न विद्यते। चेतनस्य तु ज्ञानैकाकारस्य सर्वमेतन्न संभवतीति नतरां शरीरत्वसंभवः। नच भोगायतनत्वं शरीरत्वमिति शरीरत्वसंभवः; भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः। यत्र वर्तमानस्यैव सुखदुःखोपभोगः, तदेव भोगायतनमिति चेन्न; परकायप्रवेशजन्मसुखदुःखोपभोगायतनस्य परकायस्य प्रविष्टशरीरत्वाप्रसिद्धेः। ईश्वरस्य तु स्वतस्सिद्धनित्यानिरतिशयानन्दस्य भोगं प्रति चिदचितोरायतनत्वनियमो न संभवति।

एतेन भोगसाधनमात्रस्य शरीरत्वं प्रत्युक्तम्। अथ मतम्, यदिच्छाधीनस्वरूपस्थितिप्रवृत्ति यत् तत्तस्य शरीरमिति, सर्वस्येश्वरेच्छाधीनस्वरूपस्थितिप्रवृत्तित्वेनेश्वरशरीरत्वं संभवतीति; तदपि न साधीयः, शरीरतया प्रसिद्धेषु तत्तच्चेतनेच्छायत्तस्वरूपत्वाभावात्, रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात्, मृतशरीरस्य तदायत्तस्थितित्वाभावाच्च, सालभञ्जिकादिषु चेतनेच्छाधीनस्वरूपस्थितिप्रवृत्तिषु तच्छरीरत्वाप्रसिद्धेश्च। चेतनस्य नित्यस्येश्वरेच्छायत्तस्वरूपत्वाभावाच्च, न तच्छरीरत्वसंभवः। नच यद्यदेकनियाम्यम्, यदेकधार्यम्, यस्यैवं शेषभूतम्, तत्तस्य शरीरमिति वाच्यम्; क्रियादिषु व्यभिचारात्। *अशरीरं शरीरेषु *अपाणिपादो जवनो ग्रहीता* इत्यादिभिश्चेश्वरस्य शरीराभावः प्रतिपाद्यते। अतो जगद्ब्रह्मणोश्शरीरशरीरिभावस्यासंभवात्तत्संभवे च ब्रह्मणि दोषप्रसङ्गाद्ब्रह्मकारणवादे वेदान्तवाक्यानामसामञ्जस्यमिति॥ ८॥

अत्रोत्तरम्—

147 **न तु दृष्टान्तभावात्। २। १। ९॥**

नैवमसामञ्जस्यम्, एकस्यैवावस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थितेर्दृष्टान्तस्य विद्यमानत्वात्। तुशब्दोऽत्र हेयसंबन्धगन्धस्यासंभावनीयतां द्योतयति। एतदुक्तं भवति—चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणस्सङ्कोचविकासात्मककार्यकारणभावावस्थाद्वयान्वयेऽपि न कश्चिद्विरोधः; यतस्सङ्कोचविकासौ परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ; शरीरगतास्तु दोषा नात्मनि प्रसज्यन्ते;

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मगताश्च गुणा न शरीरे; यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां शरीरगता बालत्वयुवत्वस्थविरत्वादयो नात्मनि संबध्यन्ते; आत्मगताश्च ज्ञानसुखादयो न शरीरे। अथ च देवो जातो, मनुष्यो जातः, तथा स एव बालो युवा स्थविरश्च इति व्यपदेशश्च मुख्यः। भूतसूक्ष्मशरीरस्यैव क्षेत्रज्ञस्य देवमनुष्यादिभाव इति *तदन्तरप्रतिपत्तौ* इति वक्ष्यत इति।

यत्पुनरुक्तं चिदचिदात्मकस्य जगतस्स्थूलस्य सूक्ष्मस्य च परमात्मानं प्रति शरीरभावो नोपपद्यत इति; तदनाकलितसम्यङ्न्यायानुगृहीतवेदान्तवाक्यगणस्य स्वमतिपरिकल्पितकुतर्कविजृम्भितम्। सर्वे एव हि वेदान्ताः स्थूलस्य सूक्ष्मस्य चेतनस्याचेतनस्य समस्तस्य च परमात्मानं प्रति शरीरत्वं श्रावयन्ति। वाजसनेयके तावत्काण्वशाखायां माध्यन्दिनशाखायां चान्तर्यामिब्राह्मणे *यः पृथिव्यां तिष्ठन्...यस्य पृथिवी शरीरम्* इत्यारभ्य पृथिव्यादिसमस्तमचिद्वस्तु, *यो विज्ञाने तिष्ठन्....यस्य विज्ञानं शरीरम् *य आत्मनि तिष्ठन्...यस्यात्मा शरीरम्* इति चेतनं च पृथक्पृथङ्निर्दिश्य तस्यतस्य परमात्मशरीरत्वमभिधीयते। सुबालोपनिषदि च *यः पृथिवीमन्तरे सञ्चरन्यस्य पृथिवी शरीरमित्यारभ्य तद्वदेव चिदचितोस्सर्वावस्थयोः परमात्मशरीरत्वमभिधाय *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः* इति तस्य सर्वभूतानि प्रत्यात्मत्वमभिधीयते। स्मरन्ति च *जगत्सर्वं शरीरं ते *यदम्बु वैष्णवः कायः *तत्सर्वं वै हरेस्तनुः *तानि सर्वाणि तद्वपुः *सोऽभिध्याय शरीरात्स्वात्* इत्यादि। भूतसूक्ष्मात्स्वाच्छरीरादित्यर्थः।

लोके च शरीरशब्दो घटादिशब्दवदेकाकारद्रव्यनियतवृत्तिमनासादितः क्रिमिकीटपतङ्गसर्पनरपशुप्रभृतिष्वत्यन्तविलक्षणाकारेषु द्रव्येष्वगौणः प्रयुज्यमानो दृश्यते। तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापनं सर्वप्रयोगानुगुण्येनैव कार्यम्। त्वदुक्तं च कर्मफलभोगहेतुरित्यादिकं प्रवृत्तिनिमित्तलक्षणं न सर्वप्रयोगानुगुणम्, यथोक्तेष्वीश्वरशरीरतयाऽभिहितेषु पृथिव्यादिष्वव्याप्तेः। किञ्च ईश्वरस्येच्छाविग्रहेषु, मुक्तानां च *स एकधा भवतीत्यादिवाक्यावगतेषु विग्रहेषु तल्लक्षणमव्याप्तम्, कर्मफलभोगनिमित्तत्वाभावात्तेषाम्। परमपुरुषेच्छाविग्रहाश्च न पृथिव्यादिभूतसङ्घातविशेषाः, *न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः* इति स्मृतेः। अतो भूतसङ्घातरूपत्वं च शरीरस्याव्याप्तम्। पञ्चवृत्तिप्राणाधीनधारणत्वं च स्थावरशरीरेष्वव्याप्तम्। स्थावरेषु हि प्राणसद्भावेऽपि तस्य पञ्चधा अवस्थाय शरीरस्य धारकत्वेनावस्थानं नास्ति। अहल्यादीनां कर्मनिमित्तशिलाकाष्ठादिशरीरेष्विन्द्रियाश्रयत्वं सुखदुःखहेतुत्वं चाव्याप्तम्।

अतो यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम्, तच्छेषतैकस्वरूपं च, तत्तस्य शरीरमिति शरीरलक्षणमास्थेयम्। रुग्णशरीरादिषु नियमनाद्यदर्शनं विद्यमानाया एव नियमनशक्तेः प्रतिबन्धकृतम्, अग्न्यादेश्शक्तिप्रतिबन्धादौष्ण्याद्यदर्शनवत्। मृतशरीरं च चेतनवियोगसमय एव विशरितुमारब्धम्; क्षणान्तरे च विशीर्यते। पूर्वं शरीरतया परिक्लृप्तसङ्घातै-

Digitization by Arya Samaj Charitable Foundation, Chennai

कदेशत्वेन च तत्र शरीरत्वव्यवहारः । अतस्सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं तस्य शरीरम् । *अशरीरं शरीरेषु* इत्यादि च कर्मनिमित्त-शरीरप्रतिषेधपरम्, यथोक्तसर्वशरीरत्वश्रवणात् । उपरितनाधिकरणेषु चैतदुपपादयिष्यते । *अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्* *नतु दृष्टान्तभावात्* इति सूत्रद्वयेन *इतरव्यपदेशात्* इत्यधिकरणसिद्धोऽर्थस्स्मारितः ॥ ९ ॥

148 स्वपक्षदोषाच्च । २ । १ । १० ॥

न केवलं ब्रह्मकारणवादस्य निर्दोषतयैतत्समाश्रयणम्; प्रधानकारणवादस्य दुष्टत्वाच्च तत्परित्यज्यैतदेव समाश्रयणीयम् । प्रधानकारणवादे हि जगत्प्रवृत्तिर्नोपपद्यते । तत्र हि निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य प्रकृतिसन्निधानेन प्रकृतिधर्माध्यासनिबन्धना जगत्प्रवृत्तिः । निर्विकारस्य चिन्मात्ररूपस्य प्रकृतिधर्माध्यासहेतुभूतं प्रकृतिसन्निधानं किंरूपमिति विवेचनीयम् । किं प्रकृतेस्सद्भाव एव ? उत तद्गतः कश्चिद्विकारः ? अथ पुरुषगत एव कश्चिद्विकारः ? न तावत्पुरुषगतः, अनभ्युपगमात् । नापि प्रकृतेर्विकारः, तस्याध्यासकार्यतयाऽभ्युपेतस्याध्यासहेतुत्वासंभवात्; सद्भावमात्रस्य सान्निधानत्वे मुक्तस्याप्यध्यासप्रसङ्ग इति त्वत्पक्षे जगत्प्रवृत्तिर्नोपपद्यते । अयमर्थस्साङ्ख्यपक्षप्रतिक्षेपसमये *अभ्युपगमेऽप्यर्थाभावात्* इत्यादिना प्रपञ्चयिष्यते ॥ १० ॥

149 तर्काप्रतिष्ठानादपि । २ । १ । ११ ॥

तर्कस्याप्रतिष्ठितत्वादपि श्रुतिमूलो ब्रह्मकारणवाद एव समाश्रयणीयः; न प्रधानकारणवादः । शाक्योलूक्याक्षपादक्षपणकपिलपतञ्जलितर्काणामन्योन्यव्याघातात्तर्कस्याप्रतिष्ठितत्वं गम्यते ॥ ११ ॥

150 अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः । २ । १ । १२ ॥

इदानीं विद्यमानानां शाक्यादीनां तर्कानुदूष्यान्यथा प्रधानकारणवादमतिक्रान्ततदुपदर्शितदूषणत्वेनानुमास्यामह इति चेत्; एवमपि पुरुषबुद्धिमूलतर्कैकावलम्बनस्य तथैव देशान्तरकालान्तरेषु त्वदधिककुतर्ककुशलपुरुषोत्प्रेक्षिततर्कदूष्यत्वसंभावनया तर्काप्रतिष्ठानदोषादनिर्मोक्षो दुर्वारः । अतोऽतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणम्; तदुपबृंहणायैव तर्क उपादेयः; तथा चाह *आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इति । वेदाख्यशास्त्राविरोधिनेत्यर्थः । अतो वेदविरोधित्वेन वेदार्थविशदीकरणरूपवेदोपबृंहणतर्कोपादानाय साङ्ख्यस्मृतिर्नादरणीया ॥ १२ ॥ इति विलक्षणत्वाधिकरणम् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

151 एतेन शिष्टापरिग्रहा अपि व्याख्याताः । २ । । १ । १३ ॥

शिष्टाः– परिशिष्टाः, न विद्यते वेदपरिग्रहो येषामित्यपरिग्रहाः; शिष्टाश्चापरिग्रहाश्च शिष्टापरिग्रहाः; एतेन–वेदापरिगृहीतसाङ्ख्यपक्षक्षपणेन, परिशिष्टाश्च वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्याः । परमाणुकारणवादेऽमीषां सर्वेषां संवादात्कारणवस्तुविषयस्य तर्कस्याप्रतिष्ठितत्वं न शक्यते वक्तुमित्यधिकाशङ्का । तावन्मात्रसंवादेऽपि तर्कमूलत्वाविशेषात्परमाणुस्वरूपेऽपि शून्यात्मकत्वाशून्यात्मकत्वज्ञानात्मकत्वार्थात्मकत्वक्षणिकत्वनित्यत्वैकान्तत्वानेकान्तत्वसत्यासत्यात्मकत्वादिविसंवाददर्शनाच्चाप्रतिष्ठितत्वमेवेति परिहारः॥१३॥ इति शिष्टापरिग्रहाधिकरणम्॥४॥

अथ भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

152 भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् । २ । १ । १४ ॥

पुनरपि साङ्ख्यः प्रत्यवतिष्ठते––यदुक्तं, स्थूलसूक्ष्मचिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणः कार्यकारणरूपत्वाज्जीवब्रह्मणोस्स्वभावविभाग उपपद्यत इति; स तु विभागो न संभवति, ब्रह्मणस्सशरीरत्वे तस्य भोक्तृत्वापत्तेः, सशरीरत्वे जीवस्येवेश्वरस्यापि सशरीरत्वप्रयुक्तसुखदुःखयोर्भोक्तृत्वस्यावर्जनीयत्वात् । ननु च *संभोगप्राप्तिरिति चेन्न वैशेष्यादित्यत्रेश्वरस्य भोगप्रसङ्गपरिहार उक्तः नैवम्; तत्र ह्युपास्यतया हृदयायतने सन्निहितस्य शरीरान्तर्वर्तित्वमात्रेण भोगप्रसङ्गो न विद्यत इत्युक्तम्, इह तु जीववद्ब्रह्मणोऽपि सशरीरत्वे तद्वदेव सुखदुःखयोर्भोक्तृत्वप्रसङ्गो दुर्वार इत्युच्यते। दृश्यते हि सशरीराणां जीवानां शरीरगतबालत्वस्थविरत्वादिविकारासंभवेऽपि शरीरधातुसाम्यवैषम्यनिमित्तसुखदुःखयोगः । श्रुतिश्च *न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः* इति । अतस्सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागासंभवात्केवलब्रह्मकारणवादे मृत्सुवर्णादिवज्जगद्गतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवाद एव ज्यायानिति चेत्;

अत्रोत्तरं––स्याल्लोकवतदिति। स्यादेव विभागो जीवेश्वरस्वभावयोः। नहि जीवस्य शरीरधातुसाम्यवैषम्यनिमित्तं सुखदुःखयोर्भोक्तृत्वं सशरीरत्वकृतम्, अपि तु पुण्यपापरूपकर्मकृतम् । *न ह वै सशरीरस्येत्यपि कर्मारब्धदेहविषयम्, *स एकधा भवति त्रिधा भवति *स यदि पितृलोककामो भवति *स तत्र पर्येति जक्षत्क्रीडन्रममाणः* इति कर्मबन्धविनिर्मुक्तस्याविर्भूतस्वरूपस्य सशरीरस्यैवापुरुषार्थगन्धाभावात् । अपहतपाप्मनस्तु परमात्मनः स्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरत्वेऽपि कर्मसंबन्धगन्धो नास्तीति नतरामपुरुषार्थगन्धप्रसङ्गः। लोकवत्–यथा लोके राजशासनानुवर्तिनां तदतिव-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्तिनां च राजानुग्रहनिग्रहकृतसुखदुःखयोगेऽपि न शरीरित्वमात्रेण शासके राज्यपि शासनानुवृत्त्यतिवृत्तिनिमित्तसुखदुःखयोर्भोक्तृत्वप्रसङ्गः। यथाऽऽह द्रमिडभाष्यकारः *यथा लोके राजा प्रचुरदन्दशूके घोरेऽनर्थसङ्कटेऽपि प्रदेशे वर्तमानो व्यजनाद्यवधूतदेहो दोषैर्न स्पृश्यते, अभिप्रेतांश्च लोकान् परिपालयति, भोगांश्च गन्धादीनविश्वजनोपभोग्यान्धारयति, तथाऽसौ लोकेश्वरो भ्रमत्स्वसामर्थ्यचामरो दोषैर्न स्पृश्यते, रक्षति च लोकान्ब्रह्मलोकादीन्, भोगांश्चाविश्वजनोपभोग्यान्धारयति* इति। मृत्सुवर्णादिवद्ब्रह्मस्वरूपपरिणामस्तु नैवाभ्युपगम्यते, अविकारत्वनिर्दोषत्वादिश्रुतेः ॥

यत्तु परैर्ब्रह्मकारणवादे भोक्तृभोग्यविभागाभावमाशङ्क्य समुद्रफेनतरङ्गदृष्टान्तेन विभागप्रतिपादनपरं सूत्रं व्याख्यातम्; तदयुक्तम्, अन्तर्भावितशक्त्यविद्योपाधिकाद्ब्रह्मणस्सृष्टिमभ्युपगच्छतामेवमाक्षेपपरिहारयोरसङ्गतत्वात्, कारणान्तर्गतशक्त्यविद्योपाध्युपहितस्य भोक्तृत्वादुपाधेश्च भोग्यत्वात्; विलक्षणयोस्तयोः परस्परभावापत्तिर्हि न संभवति। स्वरूपपरिणामस्तु तैरपि नाभ्युपेयते, *न कर्माविभागादिति चेन्नानादित्वादिति क्षेत्रज्ञानां तद्गतकर्मणां चानादित्वप्रतिपादनात्। स्वरूपपरिणामाभ्युपगमेऽपि भोक्तृभोग्याविभागाशङ्का कस्यचिदपि न जायते, मृत्सुवर्णादिपरिणामरूपघटशरावकटकमकुटादिविभागवद्भोक्तृभोग्यविभागोपपत्तेः। स्वरूपपरिणामे च ब्रह्मण एव भोक्तृभोग्यत्वापत्तिरिति पुनरप्यसामञ्जस्यमेव ॥ १४ ॥ इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

अथ आरम्भणाधिकरणम् ॥ ६ ॥

153 तदनन्यत्वमारम्भणशब्दादिभ्यः । २ । १ । १५ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् इत्यादिषु कारणभूताद्ब्रह्मणः कार्यभूतस्य जगतोऽनन्यत्वमभ्युपगम्य ब्रह्मणो जगत्कारणत्वमुपपादितम्, इदानीं तदेवानन्यत्वमाक्षिप्य समाधीयते।

तत्र काणादाः प्राहुः—न कारणात्कार्यस्यानन्यत्वं संभवति, विलक्षणबुद्धिबोध्यत्वात्—न खलु तन्तुपटमृत्पिण्डघटादिषु कार्यकारणविषया बुद्धिरेकरूपा। शब्दभेदाच्च— न हि तन्तवः पट इत्युच्यन्ते, पटो वा तन्तव इति। कार्यभेदाच्च—नहि मृत्पिण्डेनोदकमाह्रियते, घटेन वा कुड्यं निर्मीयते। कालभेदाच्च—पूर्वकालं च कारणम्, अपरकालं च कार्यम्। आकारभेदाच्च—पिण्डाकारं कारणम्, कार्यं च पृथुबुध्नोदराकारम्; तथा सत्यामेव मृदि घटो नष्ट इति व्यवह्रियते। सङ्ख्याभेदश्च दृश्यते—बहवस्तन्तवः, एकश्च पटः। कारकव्यापारवैयर्थ्यश्च—कारणमेव चेत्कार्यं किं कारकव्यापारसाध्यं स्यात्? सत्यपि कार्ये कार्योपयोगितया कारकव्यापारेण भवितव्यं चेत्, सर्वदा कारकव्यापारेण नोपरन्तव्यम्। सर्वस्य सर्वदा सत्त्वेन नित्यानित्यविभागश्च न स्यात्। अथ कार्यं सदेव पूर्वमनभिव्यक्तं कारकव्यापारेणाभिव्यज्यते, अतः कारकव्यापारार्थत्वं, नित्यानित्यविभागश्चोच्यते; तदसत्, अभिव्यक्तेरभिव्यक्त्यन्तरापेक्षत्वे अनवस्थानात् अनपेक्षत्वे कार्यस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

नित्योपलब्धिप्रसङ्गात्तदुत्पत्त्यभ्युपगमे चासत्कार्यवादप्रसङ्गात्। किञ्च कारकव्यापारस्याभिव्यञ्जकत्वे घटार्थेन कारकव्यापारेण करकादेरप्यभिव्यक्तिः प्रसज्यते, संप्रतिपन्नाभिव्यञ्जकभावेषु दीपादिष्वभिव्यङ्ग्यविशेषनियमादर्शनात्; नहि घटार्थमारोपितः प्रदीपः करकादीन्नाभिव्यनक्ति। अतोऽसतः कार्यस्योत्पत्तिहेतुत्वेनैव कारकव्यापारार्थवत्त्वम्, अतश्च सत्कार्यवादासिद्धिः। न च नियतकारणोपादानं सत एव कार्यत्वं साधयति; कारणशक्तिनियमादेव तदुपपत्तेः। नन्वसत्कार्यवादिनोऽपि कारकव्यापारो नोपपद्यते; प्रागुत्पत्तेः कार्यस्यासत्त्वात् कार्यादन्यत्र कारकव्यापारेण भवितव्यम्; तत्रान्यत्वाविशेषात्तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्यते। नैवम्, यत्कार्योत्पादनशक्तं यत्कारणम्, तद्गतकारकव्यापारेण तत्कार्योत्पत्तिसिद्धेः।

अत्राहुः—कारणादनन्यत्कार्यम्। नहि परमार्थतः कारणव्यतिरिक्तं कार्यं नाम वस्त्वस्ति, अविद्यानिबन्धनत्वात्सकलकार्यतद्व्यवहारयोः। अतो यथा कारणभूतान्मृद्द्रव्याद्घटादिषु विकारेषूपलभ्यमानाद्व्यतिरिक्तं घटशरावादिकार्यं व्यवहारमात्रालम्बनं मिथ्या, कारणभूतं मृद्द्रव्यमेव सत्यम्; तथा निर्विशेषसन्मात्रात्कारणभूताद्ब्रह्मणोऽन्योऽहङ्कारादिव्यवहारालम्बनः कृत्स्नः प्रपञ्चो मिथ्या, कारणभूतं सन्मात्रं ब्रह्मैव सत्यम्। तस्मात्कारणव्यतिरिक्तं कार्यं नास्तीति कारणादनन्यत्कार्यम्। नच वाच्यं शुक्तिकारजतादीनामिव घटादिकार्याणामसत्यत्वाप्रसिद्धेर्दृष्टान्तानुपपत्तिरिति। यतस्तत्रापि युक्त्या मृद्द्रव्यमात्रमेव सत्यतया व्यवस्थाप्यते; तदतिरिक्तं तु युक्त्या बाध्यते। का पुनरत्र युक्तिः? मृद्द्रव्यमात्रस्यानुवर्तमानत्वम्, तदतिरिक्तस्य च व्यावर्तमानत्वम्। रज्जुसर्पादिषु ह्यनुवर्तमानस्याधिष्ठानभूतस्य रज्ज्वादेस्सत्यता, व्यावर्तमानस्य च सर्पभूदलनाम्बुधारादेरसत्यता दृष्टा; तथाऽनुवर्तमानमधिष्ठानभूतं मृद्द्रव्यमेव सत्यम्, व्यावर्तमानास्तु घटशरावादयोऽसत्यभूताः। किञ्च सत आत्मनो विनाशाभावादसतश्च शशविषाणादेरुपलब्ध्यभावादुपलब्धिविनाशयोगि कार्यं सदसद्भ्यामनिर्वचनीयमिति गम्यते। अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव। तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धम्।

किञ्च कार्यमुत्पादयन्मृदादि कारणद्रव्यं किमविकृतमेव कार्यमुत्पादयति, उत कञ्चन विशेषमापन्नम्? न तावदविकृतमुत्पादयति, सर्वदोत्पादकत्वप्रसङ्गात्। नापि विशेषान्तरमापन्नम्, विशेषान्तरापत्तेरपि विशेषान्तरापत्तिपूर्वकत्वेन भवितव्यम्, तस्या अपि तथेत्यनवस्थानात्। अविकृतमेव देशकालनिमित्तविशेषसंबद्धं कार्यमुत्पादयतीति चेन्न। देशादिविशेषसंबन्धोऽपि ह्यविकृतस्य विशेषान्तरमापन्नस्य च पूर्ववन्न संभवति। नच वाच्यं मृत्सुवर्णदुग्धादिभ्यो घटरुचकदध्यादीनामुत्पत्तिर्दृश्यते; शुक्तिकारजतादिवद्देशकालादिप्रतिपन्नोपाधौ बाधश्च न दृश्यते, अतः प्रतीतिशरणानां कारणात्कार्योत्पत्तिरवश्याश्रयणीयेति; विकल्पासहत्वात्—किं हेमादिमात्रमेव स्वस्तिकादेरारम्भकम्? उत रुचकादि? अथ रुचकाद्याश्रयो हेमादि? न तावद्धेमादिमात्रमारम्भकम्; हेमव्यतिरिक्तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यस्याभावात्, स्वात्मानं प्रत्यात्मन आरम्भकत्वासंभवाच्च। हेमव्यतिरिक्तं स्वस्तिकं दृश्यत इति चेत्; न हेमव्यतिरिक्तं तत्, हेमप्रत्यभिज्ञानात्तदतिरिक्तवस्त्वन्तरानुपलब्धेश्च। बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरत्वं साधितमिति चेन्न, अनिरूपितवस्त्ववलम्बनानां बुद्धिशब्दान्तरादीनां शुक्तिकारजतशब्दबुद्ध्यादिवद्भ्रान्तिमूलत्वेन वस्त्वन्तरसद्भावस्यासाधकत्वात्। नापि रुचकादि स्वस्तिकादेरारम्भकम्, स्वस्तिके हि रुचकं पट इव तन्तवो भवताऽपि नोपलभ्यते। नापि रुचकाश्रयभूतं हेम, रुचकाश्रयाकारेण हेम्नस्स्वस्तिकेऽनुपलब्धेः।

अतो मृदादिकारणातिरिक्तस्य कार्यस्यासत्यत्वदर्शनाद्ब्रह्मव्यतिरिक्तं कृत्स्नं जगत् कार्यत्वेन मिथ्याभूतम्। तदिदं ब्रह्मव्यतिरिक्तमिथ्यात्वसुखप्रतिपत्तये काल्पनिकमृदादिसत्यत्वमाश्रित्य कार्यस्यासत्यत्वं प्रतिपादितम्। परमार्थतस्तु मृत्सुवर्णादिकारणमपि घटरुचकादिकार्यवन्मिथ्याभूतम्, ब्रह्मकार्यत्वाविशेषात्। *ऐतदात्म्यमिदं सर्वं तत्सत्यम् *नेह नानास्ति किञ्चन *मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति *यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् *इन्द्रो मायाभिः पुरुरूप ईयते* इत्येवमादिभिश्श्रुतिभिश्च ब्रह्मव्यतिरिक्तस्य मिथ्यात्वमवगम्यते। नचागमावगतार्थस्य प्रत्यक्षविरोधश्शङ्कनीयः; यथोक्तप्रकारेण कार्यस्य सर्वस्य मिथ्यात्वावगमात्, प्रत्यक्षस्य सन्मात्रविषयत्वाच्च। विरोधे सत्यप्यसंभावितदोषस्य चरमभाविनस्स्वरूपसद्भावादौ प्रत्यक्षाद्यपेक्षत्वेऽपि प्रमितौ निराकाङ्क्षस्य निरवकाशस्य शास्त्रस्य बलीयस्त्वात्। अतः कारणभूताद्ब्रह्मणोऽन्यत्सर्वं मिथ्या।

नच प्रपञ्चमिथ्यात्वेन जीवमिथ्यात्वमाशङ्कनीयम्, ब्रह्मण एव जीवभावात्। ब्रह्मैव हि सर्वशरीरेषु जीवभावमनुभवति *अनेन जीवेनात्मनाऽनुप्रविश्य *एको देवस्सर्वभूतेषु गूढः *एको देवो बहुधा निविष्टः *एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते *नान्योऽतोऽस्ति द्रष्टा* इत्येवमादिभ्यः। नन्वेकमेव ब्रह्म सर्वशरीरेषु जीवभावमनुभवति चेत्; पादे मे वेदना, शिरसि मे सुखमितिवत्सर्वशरीरेषु सुखदुःखप्रतिसन्धानं स्यात्; जीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात्।

अत्र केचिदद्वितीयत्वं ब्रह्मणोऽभ्युपयन्त एवैवं समादधते—एकस्यैव ब्रह्मणः प्रतिबिम्बभूतानां जीवानां सुखित्वदुःखित्वादय एकस्यैव मुखस्य प्रतिबिम्बानां मणिकृपाणदर्पणादिषूपलभ्यमानानामल्पत्वमहत्त्वमलिनत्वविमलत्वादिवत्तत्तदुपाधिवशात् व्यवस्थाप्यन्ते। ननु *अनेन जीवेनात्मनाऽनुप्रविश्येत्यादिश्रुतेर्न जीवा ब्रह्मणो भिद्यन्त इत्युक्तम्; सत्यम्, परमार्थतः; काल्पनिकं तु भेदमाश्रित्येयं व्यवस्थोच्यते। कस्य पुनः कल्पना ? न तावद्ब्रह्मणः, तस्य परिशुद्धज्ञानात्मनः कल्पनाशून्यत्वात्। नापि जीवानाम्, इतरेतराश्रयत्वप्रसङ्गात्—कल्पनाधीनो हि जीवभावः, जीवाश्रया च कल्पनेति। नैतदेवम्, अविद्याजीवभावयोर्बीजाङ्कुरन्यायेनानादित्वात्। किञ्च—प्रासादनिगरणादिवदनुपपन्नतैकवेषायामवस्तुभूतायामविद्यायां नेतरेतराश्रयत्वादयो वस्तुदोषा अनवक्लृप्तिमावहन्ति। वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां स्वतो विशुद्धत्वेऽपि कृपाणादिगतमुखप्रति-

Digitization by Arya Samaj Charitable Foundation, Chennai

बिम्बश्यामतादिवदौपाधिकाशुद्धिसंभवादविद्याश्रयत्वोपपत्तेः काल्पनिकत्वोपपत्तिः । प्रतिबिम्बगत-श्यामतादिवज्जीवगताशुद्धिरपि भ्रान्तिरेव, अन्यथाऽनिर्मोक्षत्वप्रसङ्गात् । जीवानां भ्रमस्य प्रवाहानादित्वान्न तद्धेतुरन्वेषणीयः—इति ॥

तदेतदविदिताद्वैतयाथात्म्यानां भेदवादश्रद्धालुजनसबहुमानावलोकनलिप्साविजृम्भितम् । तथा हि—जीवस्याकल्पितस्वाभाविकरूपेणाविद्याश्रयत्वे ब्रह्मण एवाविद्याश्रयत्वमुक्तं स्यात् । तद-तिरिक्तेन तस्मिन्कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । न खल्वद्वैतवादि-नस्तदुभयव्यतिरिक्तमाकारमभ्युपगच्छन्ति । कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमिति चेत्, तन्न, स्वरूपस्याखण्डैकरसस्याविद्यामन्तरेण विशिष्टरूपत्वासिद्धेः; अविद्याश्रयाकार एव हि निरूप्यते । किञ्च बन्धमोक्षादिव्यवस्थासिद्ध्यर्थं हि जीवाज्ञानवादाश्रयणम्, सा तु व्यवस्था जीवाज्ञानपक्षेऽपि न सिध्यति । अविद्याविनाश एव हि मोक्षः । तत्रैकस्मिन्मुक्ते अविद्याविनाशादितरेऽपि विमुच्येरन् । अन्यस्यामुक्तत्वादविद्या तिष्ठतीति चेत्, तर्ह्येकस्याप्यमुक्तिस्स्यात्, अविद्याया अविनष्टत्वात् । प्रति-जीवमविद्याभेदः कल्प्यते, तत्र यस्याविद्या विनष्टा, स मोक्ष्यते, यस्य त्वविनष्टा, स भन्त्स्यत इति चेत्, तन्न, प्रतिजीवमिति जीवभेदमाश्रित्य ब्रूषे, स जीवभेदः किं स्वाभाविकः ? उताविद्याकल्पितः ? न तावत्स्वाभाविकः, अनभ्युपगमात्; भेदसिद्ध्यर्थस्य चाविद्याकल्पनस्य व्यर्थत्वात् । अथाविद्या-कल्पितः, तत्रेयं जीवभेदकल्पिकाऽविद्या किं ब्रह्मणः, उत जीवानाम् । ब्रह्मण इति चेत्, आगतोऽसि मदीयं मार्गम् । अथ जीवानाम्, किमस्या जीवभेदकॢप्तिसिद्ध्यर्थतां विस्मरसि ? अथ प्रतिजीवं बद्धमुक्तव्यवस्थासिद्ध्यर्थं या अविद्याः कल्प्यन्ते, ताभिरेव जीवेभेदोऽपीति मनुषे, जीवेभेदसिद्धौ तास्सिद्ध्यन्ति, तासु सिद्धासु जीवभेदसिद्धिरितीतरेतराश्रयत्वम् । नचात्र बीजाङ्कुरन्यायस्सिध्यति । बीजाङ्कुरेषु ह्यन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकम् । इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते, तानेवाश्रित्य तासां सिद्धिरित्यशकनीयता । अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्त-रोत्तरजीवकल्पनां मन्यसे, तथा सति जीवानां भङ्गुरत्वमकृताभ्यागमकृतविप्रणाशादिप्रसङ्गश्च । अत एव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावकल्पनमित्यपि निरस्तम् । अविद्या-प्रवाहेऽभ्युपगम्यमाने तत्कल्पितजीवभावस्यापि तद्वत्प्रवाहानादिता स्यात्; न ध्रुवरूपता । आमोक्षाच्च जीवस्य ध्रुवत्वमिष्टं न सिध्येत् ॥

यच्चोक्तमविद्याया अवस्तुरूपत्वेनानुपपन्नतैकवेषाया नेतरेतराश्रयत्वादयो वस्तुदोषा अनवकॢप्तिमावहन्तीति, तथा सति मुक्तान् परञ्च ब्रह्माश्रयेदविद्या । शुद्धविद्यास्वरूपत्वादशुद्धिरूपा न तत्र प्रसजतीति चेत्, किमुपपत्त्यनुवर्तिन्यविद्या ? एवं तर्ह्युक्ताभिरुपपत्तिभिर्जीवानपि नाश्रयेत् ।

किञ्च जीवाश्रयाया अविद्यायास्तत्त्वज्ञानोदयान्नाशे सति जीवो नश्येद्वा ? न वा ? यदि

Digitization by Arya Samaj Charitable Foundation, Chennai

नश्येत्, स्वरूपोच्छित्तिलक्षणो मोक्षस्स्यात्; नो चेदविद्यानाशेऽप्यनिर्मोक्षः, ब्रह्मस्वरूपव्यतिरिक्त-जीवत्वावस्थानात् । यच्चोक्तं मणिकृपाणदर्पणादिषूपलभ्यमानमुखमलिनत्वविमलत्वादिवच्छुद्ध्यशुद्ध्यादिव्यवस्थोपपत्तिरिति; तत्रेदं विमर्शनीयम्—अल्पत्वमलिनत्वादय औपाधिका दोषाः कदा नश्येयुरिति? कृपाणाद्युपाध्यपगम इति चेत्, किं तदाऽल्पत्वाद्याश्रयः प्रतिबिम्बं तिष्ठति वा, न वा? तिष्ठति चेत्, तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः । नश्यति चेत्, तद्वदेव जीव-नाशात्स्वरूपोच्छित्तिलक्षणो मोक्षस्स्यात् । किञ्च यस्य ह्यपुरुषार्थरूपदोषप्रतिभासः, तस्य तदुच्छेदः पुरुषार्थः; तत्र किमौपाधिकदोषप्रतिभासो बिम्बस्थानीयस्य ब्रह्मणः? उत प्रतिबिम्बस्थानीयस्य जीवस्य? उतान्यस्य कस्यचित्? आद्ययोः कल्पयोर्दृष्टान्तोऽयं न सङ्गच्छते, मुखस्य मुखप्रति-बिम्बस्य चाल्पत्वादिदोषप्रतिभासशून्यत्वात् । नहि मुखं तत्प्रतिबिम्बं वा चेतयते । ब्रह्मणो दोषप्रति-भासे ब्रह्माविद्याप्रसङ्गश्च । तृतीयोऽपि कल्पो न कल्पते, जीवब्रह्मव्यतिरिक्तस्य द्रष्टुरभावात् ।

किञ्च अविद्याकल्प्यस्य जीवस्य कल्पकः क इति निरूपणीयम् । न तावदविद्या, अचेतनत्वात् । नापि जीवः; आत्माश्रयदोषप्रसङ्गात्; शुक्तिकारजतादिवदविद्याकल्प्यत्वाच्च जीवभावस्य । ब्रह्मैव कल्पकमिति चेत्, ब्रह्माज्ञानमेवायातम् । किञ्च ब्रह्माज्ञानानभ्युपगमे किं ब्रह्म जीवान्पश्यति वा? न वा? न पश्यति चेत्, ईक्षापूर्विका विचित्रसृष्टिर्नामरूपव्याकरणमित्यादि ब्रह्मणो न स्यात् । अथ पश्यति, अखण्डैकरसं ब्रह्म नाविद्यामन्तरेण जीवान्पश्यतीति ब्रह्माज्ञानप्रसङ्गः ।

अत एव मायाविद्याविभागवादोऽपि निरस्तः । अज्ञानमन्तरेण हि मायिनोऽपि ब्रह्मणो जीवदर्शित्वं न स्यात् । नच मायावी परानदृष्ट्वा मोहयितुमलम् । नापि माया मायाविनो दर्शन-साधनम्, दृष्टेषु परेषु तन्मोहनसाधनमात्रत्वात्तस्याः । अथ ब्रह्मणो माया तस्य जीवदर्शित्वं कुर्वती जीवमोहनस्य हेतुरिति मन्यसे; तर्हि परिशुद्धस्याखण्डैकरसस्वप्रकाशस्य ब्रह्मणः परदर्शनं कुर्वती माया मायापरपर्याया अविद्यैव स्यात् । अथ मतम्—विपरीतदर्शनहेतुरविद्या, माया तु मिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेन दर्शयन्ती न ब्रह्मणो विपरीतदर्शनहेतुः । अतस्तस्या नाविद्यात्वमिति । नैवम्—चन्द्रैकत्वे ज्ञायमाने द्विचन्द्रदर्शनहेतोरप्यविद्यात्वात् । यदि च ब्रह्म मिथ्यात्वेनैव स्वव्य-तिरिक्तं जानाति, न तर्हि तन्मोहयति । न ह्यनुन्मत्तो मिथ्यात्वेन ज्ञातान्मोहयितुमीहते । अथा-पुरुषार्थापरमार्थदर्शनहेतुरविद्या, माया तु ब्रह्मणो नापुरुषार्थदर्शनहेतुः; अतोऽस्या नाविद्यात्वमिति मतम्; तन्न, द्विचन्द्रज्ञानस्य दुःखहेतुत्वाभावेनापुरुषार्थत्वाभावेऽपि तद्धेतुरविद्यैव, तन्निरसने च प्रयस्यन्ति । यदि च नापुरुषार्थदर्शनकरी माया, तर्ह्यनुच्छेद्यतया नित्या ब्रह्मस्वरूपानुबन्धिनी स्यात् । अस्तु को दोष इति चेत्, द्वैतदर्शनमेव दोषः । *यत्र हि द्वैतमिव भवति...यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्* इत्याद्यद्वैतश्रुतयः प्रकुप्येयुः । परमार्थविषया अद्वैतश्रुतयः; माया-यास्त्वपरमार्थत्वादविरोध इति चेत्, अपरिच्छिन्नानन्दैकस्वरूपस्य ब्रह्मणोऽपरमार्थभूतमायादर्शनं तद्वत्ता चाविद्यामन्तरेण नोपपद्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च अपरमार्थभूतया नित्यया मायया किं प्रयोजनं ब्रह्मणः ? जीवमोहनमिति चेत्, अपुरुषार्थेन मोहनेन किं प्रयोजनम् ? क्रीडेति चेत्, अपरिच्छिन्नानन्दस्य किं क्रीडया ? परिपूर्णभोगानामेव क्रीडा पुरुषार्थत्वेन लोके दृष्टेति चेत्, नैवमिहोपपद्यते; न ह्यपरमार्थभूतैः क्रीडोपकरणैरपरमार्थतया प्रतिभासमानैर्निष्पन्नयाऽपरमार्थभूतया क्रीडयाऽपरमार्थभूतेन च तत्प्रतिभासेनानुन्मत्तानां क्रीडारसो निष्पद्यते । मायाश्रयतयाऽभिमतब्रह्मव्यतिरेकेणाविद्याश्रयस्य जीवस्य कल्पनासंभवश्च पूर्ववदेव द्रष्टव्यः ॥

अतो ब्रह्मैवानाद्यविद्याशबलं स्वगतनानात्वं पश्यतीत्यद्वितीयत्वं ब्रह्मणोऽभ्युपयद्भिरभ्युपेत्यम् । यत्तु बन्धमोक्षव्यवस्था नोपपद्यत इति, न तद्ब्रह्माज्ञानवादिनश्चोद्यम्, एकस्यैव ब्रह्मणोऽज्ञस्य स्वाज्ञाननिवृत्त्या मोक्ष्यमाणत्वाद्बद्धमुक्तादिव्यवस्थाया एवाभावात्, व्यवह्रियमाणायाश्च बद्धमुक्तशिष्याचार्यादिव्यवस्थायाः काल्पनिकत्वात्, स्वप्नदर्शिन इव चैकस्यैवाविद्यया सर्वकल्पनोपपत्तेः; स्वप्नदृशा ह्येकेन दृष्टाश्शिष्याचार्यादयस्तदविद्याकल्पिता एव । अत एव बह्वविद्याकल्पनमपि न युक्तिमत् । पारमार्थिकी बन्धमोक्षव्यवस्था स्वपरव्यवस्था च जीवाज्ञानवादिनाऽपि नाभ्युपेयते । अपारमार्थिकी त्वेकस्यैवाविद्ययोपपद्यते । प्रयोगश्च—बन्धमोक्षव्यवस्था स्वपरव्यवस्थाश्च स्वाविद्याकल्पिताः, अपारमार्थिकत्वात्, स्वप्नदृष्टव्यवस्थावदिति । शरीरान्तराण्यपि मयैवात्मवन्ति, शरीरत्वात्, एतच्छरीरवत् । शरीरान्तराण्यपि मदविद्याकल्पितानि, शरीरत्वात्, कार्यत्वात्, जडत्वात्, कल्पितत्वाद्वा; एतच्छरीरवत् । विवादाध्यासितं चेतनजातमहमेव, चेतनत्वात्, यदनहम् तदचेतनं दृष्टम्, यथा घटः । अतस्स्वपरविभागो बद्धमुक्तशिष्याचार्यादिव्यवस्थाश्चैकस्याविद्याकल्पिताः ॥

द्वैतवादिनाऽपि बद्धमुक्तव्यवस्था दुरुपपादा; अतीतानां कल्पनामानन्त्यादेकैकस्मिन्कल्पे एकैकमुक्तावपि सर्वेषां मोक्षसंभवादमुक्तानुपपत्तेः । अनन्तत्वादात्मनाममुक्ताश्च सन्तीति चेत्, किमिदमनन्तत्वम् ? असङ्ख्येयत्वमिति चेन्न, भूयस्त्वादल्पज्ञैरसङ्ख्येयत्वेऽपीश्वरस्य सर्वज्ञस्य सङ्ख्येया एव । तस्याप्यशक्यत्वे सर्वज्ञत्वं न स्यात्; आत्मनां निस्सङ्ख्यत्वादीश्वरस्याविद्यमानसङ्ख्यावेदनाभावो नासार्वज्ञ्यमावहतीति चेत्, भिन्नत्वे सङ्ख्याविधुरत्वं नोपपद्यते । आत्मानस्सङ्ख्यावन्तः, भिन्नत्वात्, माषसर्षपघटपटादिवत् । भिन्नत्वे चात्मनां घटादिवज्जडत्वमनात्मत्वं क्षयित्वं च प्रसज्यते । ब्रह्मणश्चानन्तत्वं न स्यात् । अनन्तत्वं नाम परिच्छेदरहितत्वम् । भेदवादे च वस्त्वन्तराद्विलक्षणत्वेन ब्रह्मणो वस्तुतः परिच्छेदरहितत्वं न शक्यते वक्तुम्; वस्त्वन्तरभाव एव हि वस्तुतः परिच्छेदः । वस्तुतः परिच्छिन्नस्य देशतः कालतश्चापरिच्छिन्नत्वं च न युज्यते; वस्त्वन्तराद्विलक्षणत्वेन वस्तुतः परिच्छिन्ना एव घटादयो देशतः कालतश्च परिछिन्ना हि दृष्टाः; तथा सर्वे चेतनाः ब्रह्म च वस्तुतः परिच्छिन्ना देशकालाभ्यामपि परिच्छिद्यन्ते । एवञ्च *सत्यं ज्ञानमनन्तमित्यादिभिस्सर्वप्रकारपरिच्छेदरहितत्वं वदद्भिर्विरोधः । उत्पत्तिविनाशादयश्च जीवानां ब्रह्मणश्च प्रसज्येरन् । कालपरिच्छेद एव ह्युत्पत्तिविनाशभागित्वम् । अत एकस्यैवापरिच्छिन्नस्य ब्रह्मणोऽविद्याविजृम्भितं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् । सुखदुःख-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिसन्धानव्यवस्थादयोऽपि स्वाप्नव्यवस्थावदविद्यास्वाभाव्यादुपपद्यन्ते। तस्मादेकमेव नित्यमुक्त-स्वप्रकाशस्वभावमनाद्यविद्यावशाज्जगदाकारेण विवर्तत इति परमार्थतो ब्रह्मव्यतिरिक्ताभावात्तदनन्यत्वं जगतः—इति ॥

अत्रोच्यते—निर्विशेषस्वप्रकाशमात्रं ब्रह्मानाद्यविद्यातिरोहितस्वस्वरूपं स्वगतनानात्वं पश्य-तीत्येतत् प्रकाशस्वरूपस्य निरंशस्य प्रकाशनिवृत्तिरूपतिरोधाने स्वरूपनाशप्रसङ्गेन तिरोधाना-संभवादिभ्यस्सकलप्रमाणविरुद्धं स्ववचनविरुद्धं चेति पूर्वमेवोक्तम्। यत्पुनरुक्तं कारणव्यतिरिक्तं कार्यं युक्तिबाधितत्वेन शुक्तिकारजतादिवद्भ्रम इति; तदयुक्तम्, युक्तेरभावात्। यत्त्वनुवर्तमानस्य कारणमात्रस्य सत्यत्वम्, व्यावर्तमानानां घटशरावादिकार्याणामसत्यत्वमिति; तदप्यन्यत्र दृष्टस्या-न्यत्र व्यावर्तमानता न बाधिकेत्यादिभिः पूर्वमेव परिहृतम्। यच्चोपलभ्यमानत्वविनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन कार्यस्य मृषात्वमिति; तदसत्, उपलब्धिविनाशयोगो हि न मिथ्यात्वं साधयति, किंत्वनित्यत्वम्। यद्देशकालसंबन्धितया यदुपलब्धम्, तद्देशकालसंबन्धितया बाधितत्वमेव हि तस्य मिथ्यात्वे हेतुः। देशान्तरकालान्तरसंबन्धितयोपलब्धस्यान्यदेशकालसंबन्धित्वेन बाधितत्वं देशान्तरकालान्तराव्याप्तिमात्रं साधयति, न तु मिथ्यात्वम्। प्रतिप्रयोगश्च—घटादि कार्यं सत्यम्, देशकालादिप्रतिपन्नोपाधावबाधितत्वात्, आत्मवत्।

यच्चोक्तं कारणस्वरूपादविकृताद्विकृताच्च कार्योत्पत्तिर्न संभवतीति; तदसत्, देशकालादि-सहकारिसमवहितात्कारणात्कार्योत्पत्तिसंभवात्। तत्समवधानं च विकृतस्याविकृतस्य च न संभव-तीति यदुक्तम्; तदयुक्तम्; पूर्वमविकृतस्यैव कालादिसमवधानसंभवात्। अविकृतत्वाविशेषात् पूर्वमपि देशकालादिसमवधानं प्रसज्यत इति चेन्न; देशकालादिसमवधानस्य कारणान्तरायत्तस्यैतदायत्त-त्वाभावात्। अतो देशकालादिसमवधानरूपविशेषमापन्नं कारणं कार्यमुत्पादयतीति न किञ्चिदव-हीनम्। कारणस्य च कार्यं प्रत्यारम्भकत्वमबाधितं दृश्यमानं न केनापि प्रकारेणापह्नोतुं शक्यते ॥

यत्तु हेमादिमात्रस्य, रुचकादिकार्यस्यैतदाश्रयस्य वा हेमादेरारम्भकत्वं न संभवतीति; तदयुक्तम्, हेमादिमात्रस्यैव यथोक्तपरिकरयुक्तस्यारम्भकत्वसंभवात्। न चारम्भकहेमव्यतिरिक्तं कार्यं न दृश्यत इति वक्तुं शक्यम्; हेमातिरिक्तस्य स्वस्तिकस्य दर्शनात्, बुद्धिशब्दान्तरादि-भिर्वस्त्वन्तरस्य साधितत्वाच्च। नचायं शुक्तिकारजतादिवद्भ्रमः, उत्पत्तिविनाशयोरन्तराल उपलभ्य-मानस्य तद्देशकालसंबन्धितया बाधादर्शनात्। नचास्या उपलब्धेर्बाधिका काचिदपि युक्तिर्दृश्यते। प्रागनुपलब्धस्वस्तिकोपलब्धिवेलायामपि हेमप्रत्यभिज्ञा स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेरविरुद्धा। श्रुतिभिस्तु प्रपञ्चमिथ्यात्वसाधनं पूर्वमेव निरस्तम्। यच्चान्यदत्र प्रत्यक्षाविरोधादि प्रतिवक्तव्यम्, तदपि सर्वं पूर्वमेव सूक्तम्।

यच्चोक्तमेकेनात्मना सर्वाणि शरीराण्यात्मवन्तीति; तदसत्, एकस्यैव सर्वशरीरप्रयुक्त-सुखदुःखप्रतिसन्धानप्रसङ्गात्। सौभरिप्रभृतिषु ह्यात्मैकत्वेनानेकशरीरप्रयुक्तसुखादिप्रतिसन्धानमेकस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

दृश्यते। न चाहमर्थस्य ज्ञातृत्वात्तद्भेदात्प्रतिसन्धानाभावो, नात्मभेदादिति वक्तुं शक्यम्; आत्मा ज्ञातैव, स चाहमर्थ एव, अन्तःकरणभूतस्त्वहङ्कारो जडत्वात्करणत्वाच्च शरीरेन्द्रियादिवन्न ज्ञातेत्युपपादितत्वात्। यच्च शरीरत्वजडत्वकार्यत्वकल्पितत्वैस्सर्वशरीराणामेकस्याविद्याकल्पितत्वमुक्तम्; तदपि सर्वशरीराणामविद्याकल्पितत्वस्यैवाभावादयुक्तम्। तदभावश्चाबाधितस्य सत्यत्वोपपादनात्। यच्च चेतनादन्यस्य जडत्वदर्शनात्सर्वचेतनानामनन्यत्वमुक्तम्, तदपि सुखदुःखव्यवस्थया भेदोपपादनादेव निरस्तम्। यत्तु मयैवात्मवन्ति, मदविद्याकल्पितानि अहमेव सर्वं चेतनजातमित्यहमर्थस्यैक्यमुपपादितम्, तदज्ञातस्वसिद्धान्तस्य भ्रान्तिजल्पितम्; अहंत्वमाद्यर्थविलक्षणं चिन्मात्रं ह्यात्मा त्वन्मते ॥

किञ्च निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्येति वदतो मोक्षार्थश्रवणादिप्रयत्नो निष्फलः; अविद्याकार्यत्वात्; शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवत्। मोक्षार्थप्रयत्नो व्यर्थः; कल्पिताचार्यायत्तज्ञानकार्यत्वात्, शुकप्रह्लादवामदेवादिप्रयत्नवत्। तत्त्वमस्यादिवाक्यजन्यज्ञानं न बन्धनिवर्तकम्, अविद्याकल्पितवाक्यजन्यत्वात्, स्वयमविद्यात्मकत्वात्, अविद्याकल्पितज्ञात्राश्रयत्वात्, कल्पिताचार्यायत्तश्रवणजन्यत्वाद्वा, स्वाप्नबन्धनिवर्तनवाक्यजन्यज्ञानवत्। किञ्च निर्विशेषचिन्मात्रं ब्रह्म मिथ्या, अविद्याकार्यज्ञानगम्यत्वात्, अविद्याकल्पितज्ञात्राश्रयज्ञानगम्यत्वात्, अविद्यात्मकज्ञानगम्यत्वाद्वा, यदेवं तत्तथा, यथा स्वाप्नगन्धर्वनगरादिः। नच निर्विशेषचिन्मात्रं ब्रह्म स्वयं प्रकाशते, येन न प्रमाणान्तरमपेक्षते। यस्त्वात्मसाक्षिकं स्वयंप्रकाशज्ञानं दृश्यते, तत्तु ज्ञेयविशेषसिद्धिरूपं ज्ञातृगतमेव दृश्यत इति पूर्वमेवोक्तम्। यानि च तस्य निर्विशेषत्वसाधकानि यौक्तिकानि ज्ञानान्युपन्यस्तानि, तानि चानन्तरोक्तैरविद्याकार्यत्वादित्यादिभिरनुमानैर्निरस्तानि। नच निर्विशेषस्य चिन्मात्रस्याज्ञानसाक्षित्वमहङ्कारादिजगद्भ्रमश्चोपपद्यते। साक्षित्वभ्रमादयोऽपि हि ज्ञातृविशेषगता दृष्टाः; न ज्ञप्तिमात्रगताः। नच तस्य प्रकाशत्वं स्वायत्तप्रकाशता वा सिध्यति। प्रकाशो हि कस्यचित्पुरुषस्य कञ्चनार्थविशेषं प्रति सिद्धिरूपो दृश्यते। तत एव हि तस्य स्वयंप्रकाशतोपपाद्यते भवद्भिरपि। नचातादृशस्य निर्विशेषस्य प्रकाशता संभवति ॥

यः पुनः स्वगोष्ठीष्वपरमार्थादपि परमार्थकार्यं दृश्यत इत्युद्घोषः, सोऽपि तानि कार्याणि सर्वाण्यबाधितकल्पानि व्यावहारिकसत्यानि; वस्तुतस्त्वविद्यात्मकान्येवेति स्वाभ्युपगमादेव निरस्तः। अस्माभिरपि सर्वत्र परमार्थादेव कारणात्सर्वकार्योत्पत्तिमुपपादयद्भिः पूर्वमेव निरस्तः। नच त्वयैषामनुमानानां श्रुतिविरोधो वक्तुं शक्यते, श्रुतेरप्यविद्यात्मकत्वेन चोक्तदृष्टान्तेभ्यो विशेषाभावात् ॥

यत्तु ब्रह्मणोऽपारमार्थिकज्ञानगम्यत्वेऽपि पश्चात्तनबाधादर्शनाद्ब्रह्म सत्यमेवेति; तदसत्, दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति पश्चात्तनबाधादर्शनस्याकिञ्चित्करत्वात्; यथा शून्यमेव तत्त्वमिति वाक्यजन्यज्ञानस्य पश्चात्तनबाधादर्शनेऽपि दोषमूलत्वनिश्चयादेव तदर्थस्यासत्यत्वम्। किञ्च *नेह नानाऽस्ति किञ्चन *विज्ञानमानन्दं ब्रह्मेति विज्ञानमात्रातिरिक्तस्य कृत्स्नस्य वस्तुजातस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

निषेधकत्वेन सर्वस्मात्परत्वात्पश्चात्तनबाधादर्शनमुच्यते; शून्यमेव तत्त्वमिति तस्याप्यभावं वदतस्त-स्मात्परत्वेन पश्चात्तनबाधो दृश्यते । सर्वशून्यत्वातिरेकिनिषेधासंभवात्तस्यैव पश्चात्तनबाधादर्शनम् । दोषमूलत्वं तु प्रत्यक्षादीनां वेदान्तजन्मनस्सर्वशून्यज्ञानस्याप्यविशिष्टम् ।

अतस्सर्वं विज्ञानजातं पारमार्थिकज्ञातृगतम्, स्वयं च परमार्थभूतमर्थविशेषसिद्धिरूपम्; तत्र किञ्चित् ज्ञानं दोषमूलम्; दोषश्च परमार्थः; किञ्चिच्च निर्दोषं पारमार्थिकसामग्रीजन्यमिति यावन्नाभ्यु-पेयते, न तावत्सत्यमिथ्यार्थव्यवस्था लोकव्यवहारश्च सेत्स्यति । लोकव्यवहारो हि पारमार्थिको भ्रान्तिरूपश्च पारमार्थिकज्ञातृगतार्थविशेषसिद्धिरूपप्रकाशपूर्वकः; निर्विशेषसन्मात्रस्य तु पारमार्थिक-स्यापारमार्थिकस्य च प्रतिभासादेर्हेतुत्वासंभवात् लोकव्यवहारो न संभवति । यच्च तैर्निरधिष्ठान-भ्रमासंभवात्सर्वाध्यासाधिष्ठानस्य सन्मात्रस्य पारमार्थिकत्वमुक्तम्, तदपि दोषदोषाश्रयत्वज्ञातृत्व-ज्ञानानामपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेर्निरस्तम् । अथ अधिष्ठा-नापारमार्थ्येऽपि न क्वचिद्भ्रमो दृष्ट इति सन्मात्रस्य पारमार्थिकत्वमवश्याश्रयणीयमिति मन्यसे, हन्त तर्हि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येऽपि न क्वचिद्भ्रमो दृष्ट इति दर्शनानुगुण्येन तेषामपि पारमार्थ्यमवश्याश्रयणीयमिति न कश्चिद्विशेषोऽन्यत्र तत्संरम्भात् ॥

यत्तु भेदपक्षेऽप्यतीतकल्पानामानन्त्यात्सर्वेषामात्मनां मुक्तत्वेन बद्धासंभवाद्बद्धमुक्त-व्यवस्था न संभवतीति, तदात्मानन्त्येन परिहृतम् । यच्चात्मनां भिन्नत्वे माषसर्षपघटपटादिवत्स-ङ्ख्यावत्त्वमवर्जनीयमिति, तत्र घटादीनामप्यनन्तत्वाद्दृष्टान्तस्साध्यविकलस्स्यात् । दशघटास्सहस्रं माषा इति सङ्ख्यावत्त्वं दृश्यत इति चेत्, सत्यं, तत्तु न घटादिस्वरूपगतम्, अपितु देशकालाद्युपाधिम-द्घटादिगतम्; तादृशं तु सङ्ख्यावत्त्वमात्मनामभ्युपगच्छामः । नच तावता सर्वमुक्तिप्रसङ्गः; आत्म-स्वरूपानन्त्यात् । यत्तु आत्मनां भिन्नत्वे घटादिवज्जडत्वानात्मत्वक्षयित्वप्रसङ्ग इति; तदयुक्तं, एक-जातीयानां भेदस्य तज्जातीयानां जात्यन्तरीयस्वानापादकत्वात् । नहि घटानां भेदः तेषां पटत्व-मापादयति । यत्तु भिन्नत्वे वस्तुतः परिच्छेदाद्देशकालाभ्यामपि परिच्छेदो ब्रह्मणः प्रसज्यत इत्य-नन्तत्वं ब्रह्मणो न सिध्यतीति; तदयुक्तं, वस्तुतः परिच्छिन्नानामपि देशकालपरिच्छेदस्य न्यूना-धिकभावेनानियमदर्शनात्; देशकालसंबन्धेयत्तायाः प्रमाणान्तरायत्तनिर्णयत्वेन ब्रह्मणस्सर्वदेशकाल-संबन्धस्यापि प्रमाणान्तरादापततो विरोधाभावात् । वस्तुतः परिच्छेदमात्रादपि सर्वप्रकारपरिच्छेद-रहितत्वाभावादानन्त्यासिद्धिरिति चेत्, तद्भवतोऽप्यविद्याविलक्षणत्वं ब्रह्मणोऽभ्युपयतस्समानम् । अतस्ततोऽविद्याविलक्षणत्वाभ्युपगमात् ब्रह्मणोऽपि भिन्नत्वेन भेदप्रयुक्ता दोषास्सर्वे तवापि प्रसज्येरन् । यद्यविद्याविलक्षणत्वं नाभ्युपेयते; तर्ह्यविद्यात्मकमेव ब्रह्म स्यात् । *सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षण-वाक्यमपि तत एवापार्थकं स्यात् । भेदतत्त्वानभ्युपगमे हि स्वपक्षपरपक्षसाधनदूषणादिविवेकाभावात्सर्व-मसमञ्जसं स्यात् । आनन्त्यप्रसिद्धिश्च देशकालपरिच्छेदरहितत्वमात्रेण; न वस्तुतोऽपि परिच्छेदर-हितत्वेन, तथाविधस्य शशविषाणायमानस्यानुपलब्धेः । भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मणस्सर्वप्रकारत्वात् स्वतः परतोऽपि परिच्छेदो न विद्यते । तदेवं कारणाद्भिन्नस्य कार्यस्य सत्यत्वाद्ब्रह्मकार्यं कृत्स्नं जगद्ब्रह्मणोऽन्यदेव ॥

इति प्राप्ते प्रचक्ष्महे—तदनन्यत्वमारम्भणशब्दादिभ्यः । तस्मात् परमकारणाद्ब्रह्मणः, अनन्यत्वं जगतः आरम्भणशब्दादिभ्यः तदुपपादयद्भ्योऽवगम्यते । आरम्भणशब्दः आदिर्येषां वाक्यानाम्, तान्यारम्भणशब्दादीनि—*वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत *अनेन जीवेनात्मनानुप्रविश्य *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः...ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो* इत्येतानि; प्रकरणान्तरस्थान्यप्येवंजातीयकान्यत्राभिप्रेतानि । एतानि हि वाक्यानि चिदचिदात्मकस्य जगतः परस्माद्ब्रह्मणोऽनन्यत्वमुपपादयन्ति । तथा हि—*स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कृत्स्नं जगतो ब्रह्मैककारणत्वम्, कारणात्कार्यस्यानन्यत्वं च हृदि निधाय कारणभूतब्रह्मविज्ञानेन कार्यभूतस्य सर्वस्य विज्ञाने प्रतिज्ञाते सति कृत्स्नस्य ब्रह्मैककारणतामजानता शिष्येण *कथं नु भगवस्स आदेशः* इत्यन्यज्ञानेनान्यज्ञाततासंभवं चोदितो, जगतो ब्रह्मैककारणतामुपदेक्ष्यन्, लौकिकप्रतीतिसिद्धं कारणात्कार्यस्यानन्यत्वं तावत् *यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्* इति दर्शयति । यथैकमृत्पिण्डारब्धानां घटशरावादीनां तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः । अत्र काणादवादेन कारणात्कार्यस्य द्रव्यान्तरत्वमाशङ्क्य लोकप्रतीत्यैव कारणात्कार्यस्यानन्यतामुपपादयति *वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्* इति । आरभ्यते आलभ्यते स्पृश्यते इत्यारम्भणम्; *कृत्यल्युटो बहुलम्* इति कर्मणि ल्युट् । वाचा—वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः । 'घटेनोदकमाहर' इत्यादिवाक्पूर्वको ह्युदकाहरणादिव्यवहारः; तस्य व्यवहारस्य सिद्धये, तेनैव मृद्द्रव्येण पृथुबुध्नोदरत्वादिलक्षणो विकारः—संस्थानविशेषः, तत्प्रयुक्तं च घट इत्यादिनामधेयम्, स्पृश्यते—उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं मृद्द्रव्यमेव संस्थानान्तरनामधेयान्तरभाग्भवति । अतो घटाद्यपि मृत्तिकेत्येव सत्यम्—मृत्तिकाद्रव्यमित्येव सत्यम्, प्रमाणेनोपलभ्यत इत्यर्थः, नतु द्रव्यान्तरत्वेन । अतस्तस्यैव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभाक्त्वमात्रेण बुद्धिशब्दान्तरादय उपपद्यन्ते; यथैकस्यैव देवदत्तस्यावस्थाभेदैः बालो युवा स्थविर इति बुद्धिशब्दान्तरादयः कार्यविशेषाश्च दृश्यन्ते ॥

यदुक्तं सत्यामेव मृदि घटो नष्ट इति व्यवहारात्कारणादन्यत्कार्यमिति, तदुत्पत्तिविनाशादीनां कारणभूतस्यैव द्रव्यस्यावस्थाविशेषत्वाभ्युपगमादेव परिहृतम् । तत्तदवस्थस्यैकस्यैव द्रव्यस्य तेते शब्दास्तानितानि च कार्याणीति युक्तम् । द्रव्यस्य तत्तदवस्थत्वं कारकव्यापारायत्तमिति तस्यार्थवत्त्वम् । अभिव्यक्त्यनुबन्धीनि चोद्यानि तस्या अनभ्युपगमादेव परिहृतानि । उत्पत्त्यभ्युपगमेऽपि सत्कार्यवादो न विरुध्यते; सत एवोत्पत्तेः । विप्रतिषिद्धमिदमभिधीयते—पूर्वमेव सत्,

Digitization by Arya Samaj Charitable Foundation, Chennai

तदुत्पद्यते चेति । अज्ञातोत्पत्तिविनाशयाथात्म्यस्येदं चोद्यम्; द्रव्यस्योत्तरोत्तरसंस्थानयोगः पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः, स्वावस्थस्य तूत्पत्तिः। अतस्सर्वावस्थस्य द्रव्यस्य सत्त्वात्सत्कार्यवादो न विरुध्यते। संस्थानस्यासत उत्पत्तावसत्कार्यवादप्रसङ्ग इति चेत्, असत्कार्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः; उत्पत्तिमत्त्वे चानवस्था। अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यम्। कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदेकत्वावस्थाप्रहाणेन बहुत्वावस्था, तत्प्रहाणेनैकत्वावस्था चेति न कश्चिद्विरोधः ॥

तथा *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सदेवेदम् इदानीं विभक्तनामरूपत्वेन नानारूपं जगत् अग्रे नामरूपविभागाभावेनैकमेवासीत्, सर्वशक्तित्वेनाधिष्ठात्रन्तरासहतया अद्वितीयं चेत्यनन्यत्वमत्रोपपादितम्। तथा *तदैक्षत बहु स्यां प्रजायेयेति स्रक्ष्यमाणतेजःप्रभृतिविविधविचित्रस्थिरत्रसरूपजगत्त्वेनात्मनो बहुभवनं सङ्कल्प्य जगत्सर्गाभिधानात्कार्यभूतस्य जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमवसीयते। सच्छब्दवाच्यस्य परस्य ब्रह्मणस्सर्वज्ञस्य सत्यसङ्कल्पस्य निरवद्यस्यैव सदेवेदमिति निर्देशार्हजगत्त्वम्, सच्छब्दवाच्यस्यैव जगतो नामरूपविभागाभावेनैकत्वमधिष्ठात्रन्तरनिरपेक्षत्वम्, पुनरपि तस्यैव विचित्रस्थिरत्रसरूपजगत्त्वेन बहुभवनसङ्कल्परूपेक्षणम्, यथासङ्कल्पं सर्गश्च कथमुपपद्यत इत्याशङ्क्याह *सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतम् *इत्यादि। *तिस्रो देवता इति कृत्स्नमचिद्वस्तु निर्दिश्य स्वात्मकजीवानुप्रवेशेनैतद्विचित्रनामरूपभाक्करवाणीत्युक्तम्। अनेन जीवेनात्मना—मदात्मकजीवेन आत्मतयाऽनुप्रविश्यैतद्विचित्रनामरूपभाक्करवाणीत्यर्थः। स्वात्मनो जीवस्य चात्मतयाऽनुप्रवेशकृतं नामरूपभाक्त्वमित्युक्तं भवति। *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्* इति श्रुत्यन्तरेण स्पष्टं सजीवं जगत्परेण ब्रह्मणा आत्मतयाऽनुप्रविष्टमिति ॥

तदेतत्कार्यावस्थस्य च कारणावस्थस्य च चिदचिद्वस्तुनः स्थूलस्य सूक्ष्मस्य च परब्रह्मशरीरत्वम्, परस्य च ब्रह्मण आत्मत्वमन्तर्यामिब्राह्मणादिषु सिद्धं स्मारितम्। अनेन पूर्वोक्ता शङ्का निरस्ता। अचिद्वस्तुनि सजीवे ब्रह्मण्यात्मतयाऽवस्थिते नामरूपव्याकरणवचनाच्चिदचिद्वस्तुशरीरकं ब्रह्मैव जगच्छब्दवाच्यमिति *सदेवेदमग्र एकमेवासीदित्यादि सर्वमुपपन्नतरम्। शरीरभूतचिदचिद्वस्तुगतास्सर्वे विकाराश्चापुरुषार्थाश्चेति ब्रह्मणो निरवद्यत्वं कल्याणगुणाकरत्वं च सुस्थितम्। तदेतत् *अधिकं तु भेदनिर्देशात् *इत्यनन्तरमेव वक्ष्यति। तथा *ऐतदात्म्यमिदं सर्वमिति कृत्स्नस्य चेतनाचेतनस्य ब्रह्मतादात्म्यमुपदिशति। तदेव च *तत्त्वमसीति निगमयति। तथा प्रकरणान्तरस्थेष्वपि वाक्येषु *सर्वं खल्विदं ब्रह्म *आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् *इदं सर्वं यदयमात्मा *ब्रह्मैवेदं सर्वम् *आत्मैवेदं सर्वम्* इत्यनन्यत्वं प्रतीयते। तथाऽन्यत्वं च निषिध्यते *सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद *नेह नानास्ति किञ्चन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति *इति। तथा *यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं

Digitization by Arya Samaj Charitable Foundation, Chennai

पश्येत्* इत्यविदुषो द्वैतदर्शनं विदुषश्चाद्वैतदर्शनं प्रतिपादयदनन्यत्वमेव तात्त्विकमिति प्रतिपादयति। तदेवमारम्भणशब्दादिभ्यो जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमुपपाद्यते ।

अत्रेदं तत्त्वम्—चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्वशब्दाभिधेयम्। तत्कदाचित्स्वशरीरतयाऽपि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरम्। तत्कारणावस्थं ब्रह्म। कदाचिच्च विभक्तनामरूपव्यवहारार्हस्थूलदशापन्नचिदचिद्वस्तुशरीरम्। तच्च कार्यावस्थमिति कारणात्परस्माद्ब्रह्मणः कार्यरूपं जगदनन्यत्। शरीरभूतचिदचिद्वस्तुनः शरीरिणो ब्रह्मणश्च कारणावस्थायां कार्यावस्थायां च श्रुतिशतसिद्धया स्वभावव्यवस्थया गुणदोषव्यवस्था च *नतु दृष्टान्तभावात्* इत्यत्रोक्ता ॥

ये तु कार्यकारणयोरनन्यत्वं कार्यस्य मिथ्यात्वाश्रयणेन वर्णयन्ति, न तेषां कार्यकारणयोरनन्यत्वं सिध्यति, सत्यमिथ्यार्थयोरैक्यानुपपत्तेः; तथा सति ब्रह्मणो मिथ्यात्वं जगतस्सत्यत्वं वा स्यात् ॥ [ब्रह्माज्ञानवादिमतदूषणमिदम् ॥]

येच कार्यमपि पारमार्थिकमभ्युपयन्त एव जीवब्रह्मणोरौपाधिकमन्यत्वम्, स्वाभाविकं चानन्यत्वम्, अचिद्ब्रह्मणोस्तु द्वयमपि स्वाभाविकमिति वदन्ति; तेषामुपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावान्निरवयवस्याखण्डितस्य ब्रह्मण एवोपाधिसंबन्धाद्ब्रह्मस्वरूपस्यैव हेयाकारपरिणामात्, शक्तिपरिणामाभ्युपगमे शक्तिब्रह्मणोरनन्यत्वाच्च जीवब्रह्मणोः कर्मवश्यत्वापहतपाप्मत्वादिव्यवस्थावादिन्योऽचिद्ब्रह्मणोश्च परिणामापरिणामवादिन्यश्श्रुतयो व्याकुप्येयुः ॥ [भास्करमतदूषणमिदम् ॥]

ये पुनः निरस्तनिखिलभोक्तृत्वादिविकल्पविप्लवं सर्वशक्तियुक्तं सन्मात्रद्रव्यमेव कारणं ब्रह्म; तच्च प्रलयवेलायां शान्ताशेषसुखदुःखानुभवविशेषं स्वप्रकाशमपि सुषुप्तात्मवदचिदविलक्षणमवस्थितम्; सृष्टिवेलायां मृत्तिकाद्रव्यमिव घटशरावादिरूपम्, समुद्र इव च फेनतरङ्गबुद्बुदादिरूपो भोक्तृभोग्यनियन्तृरूपेणांशत्रयावस्थमवतिष्ठते; अतो भोक्तृभोग्यनियन्तृत्वानि तत्प्रयुक्ताश्च गुणदोषाः शरावत्वघटत्वमणिकत्ववत्तद्गतकार्यभेदवच्च व्यवतिष्ठन्ते; भोक्तृभोग्यनियन्तॄणां सदात्मनैकत्वं च घटशरावमणिकादीनां मृदात्मनैकत्ववदुपपद्यते; अतस्सन्मात्रद्रव्यमेव सर्वावस्थावस्थितमिति ब्रह्मणोऽनन्यज्जगदातिष्ठन्ते; तेषां सकलश्रुतिस्मृतीतिहासपुराणन्यायविरोधः ।

सर्वा हि श्रुतयः सस्मृतीतिहासपुराणास्सर्वेश्वरेश्वरं सदैव सर्वज्ञं सर्वशक्तिं सत्यसङ्कल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति; न पुनरीश्वरादपि परमीश्वरांशि सन्मात्रम्। तथा हि—*सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् *तदैक्षत बहु स्यां प्रजायेयेति *ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्राक्षत्राणीन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति *आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् स ऐक्षत लोकान्नु सृजा इति *एको ह वै नारायण आसीत् न ब्रह्मा

Digitization by Arya Samaj Charitable Foundation, Chennai

नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्थस्य* इत्यादिभिः परमकारणं सर्वेश्वरेश्वरो नारायण एवेत्यवगम्यते । सद्ब्रह्मात्मशब्दा हि तुल्यप्रकरणस्थास्तत्तुल्यप्रकरणस्थेन नारायणशब्देन विशेषितास्तमेवावगमयन्ति । *तमीश्वराणां परमं महेश्वरम् *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः* इतीश्वरस्यैव कारणत्वं श्रूयते ॥

स्मृतिरपि मानवी *ततस्स्वयंभूर्भगवान्* इति प्रकृत्य, *सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ इति ।

इतिहासपुराणान्यपि पुरुषोत्तममेव परमकारणमभिदधति—*नारायणो जगन्मूर्तिरनन्तात्मा सनातनः···स सिसृक्षुस्सहस्रांशादसृजत्पुरुषान् द्विधा *विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्* इत्यादिषु ॥

नचेश्वरस्सन्मात्रमेवेति वक्तुं शक्यम्, तस्य तदंशत्वाभ्युपगमात्सविशेषत्वाच्च । नच तस्य ज्ञानानन्दाद्यनन्तकल्याणगुणयोगः कादाचित्क इति वक्तुं शक्यते, तेषां स्वाभाविकत्वेन सदातनत्वात् । *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *यस्सर्वज्ञस्सर्ववित्* इत्यादिभ्यः । ज्ञानानन्दादिशक्तियोग एवास्य स्वाभाविक इति मा वोचः, शक्तिः स्वाभाविकी, ज्ञानबलक्रिया च स्वाभाविकी इति पृथङ्निर्देशाल्लक्षणाप्रसङ्गाच्च । नच पाचकादिवत् सर्वज्ञः इत्यादिषु शक्तिमात्रे कृत्प्रत्यय इति वक्तुं शक्यम्, कृत्प्रत्ययमात्रस्य शक्तावस्मरणात्, *शक्तौ हस्तिकवाटयोः* इत्यादिषु केषाञ्चिदेव कृत्प्रत्ययानां शक्तिविषयत्वस्मरणात् । पाचकादिषु त्वगत्या लक्षणा समाश्रीयते । किञ्च ईश्वरस्य तदंशविशेषत्वात्तस्य चांशित्वे तरङ्गात्समुद्रस्येवांशादंशिनोऽधिकत्वात्, *तमीश्वराणां परमं महेश्वरम् *न तत्समश्चाभ्यधिकश्च दृश्यते* इत्यादीनीश्वरविषयाणि परश्शतानि वचांसि बाध्येरन् । किञ्च सन्मात्रस्य सर्वात्मकत्वे अंशित्वे च ईश्वरस्य तदंशविशेषत्वात् तस्य सर्वात्मकत्वांशित्वोपदेशा व्याहन्येरन् । नहि मणिकात्मकत्वं तदंशत्वं वा घटशरावादेः । स्वांशेषु सर्वेषु सन्मात्रस्य पूर्णत्वेनेश्वरांशेऽपि तस्य पूर्णत्वात् तदात्मकानि तदंशाश्चेतराणि वस्तूनीति चेन्न, घटेऽपि सन्मात्रस्य पूर्णत्वादीश्वरस्यापि घटात्मकत्वतदंशत्वप्रसङ्गात् । नच सन्मात्रस्य घटोऽस्ति, पटोस्तीति वस्तुधर्मतयाऽवगतस्य द्रव्यत्वं कारणत्वं वोपपद्यते । व्यवहारयोग्यता हि सत्त्वम् । विरोधिव्यवहारयोग्यता तद्व्यवहारयोग्यस्यासत्त्वम् । द्रव्यमेव सदित्यभ्युपगमे क्रियादीनामसत्त्वप्रसङ्गः । क्रियादिषु काशकुशावलम्बनेनापि सर्वत्रैकरूपा सत्ता दुरुपपादा । सदात्मनाच सर्वस्याभिन्नत्वे सर्वज्ञत्वेन सर्वस्वभावप्रतिसन्धानात्सर्वगुणदोषसङ्करप्रसङ्गश्च पूर्वमेवोक्तः । अतो यथोक्तप्रकारमेवानन्यत्वम् ॥ [यादवप्रकाशमतदूषणमिदम्] ॥ १५ ॥

अथोच्येत—एकस्यैवावस्थान्तरयोगेऽपि बुद्धिशब्दान्तरादयो बालत्वयुवत्वादिषु दृश्यन्ते, मृदारुहिरण्यादिषु द्रव्यान्तरत्वेऽपि दृश्यन्ते, तत्र मृद्घटादिषु कार्यकारणेषु बुद्धिशब्दान्तरादयोऽ-

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्थानिबन्धना एवेति कुतो निर्णीयत इति । तत्रोत्तरम्—

154 भावे चोपलब्धेः । २ । १ । १६ ॥

कुण्डलादिकार्यसद्भावे च कारणभूतहिरण्यस्योपलब्धेः—'इदं कुण्डलं हिरण्यम्' इति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः । नचैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादय उपलभ्यन्ते । अतो बालयुवादिवत्कारणभूतमेव द्रव्यमवस्थान्तरापन्नं कार्यमिति गीयते; द्रव्यान्तरवादिनाऽप्यभ्युपेते-नावस्थान्तरयोगेन बुद्धिशब्दान्तरादिषूपपन्नेष्वनुपलब्धद्रव्यान्तरकल्पनानुपपत्तेश्च । नच जातिनि-बन्धनेयं प्रत्यभिज्ञा, जात्याश्रयभूतद्रव्यान्तरानुपलब्धेः; एकमेव हेमजातीयं द्रव्यं कार्यकारणो-भयावस्थं दृश्यते । नच द्रव्यभेदे समवायिकारणानुवृत्त्या कार्ये प्रतिसन्धानमिति वक्तुं शक्यम्, द्रव्यान्तरत्वे सत्याश्रयानुवृत्तिमात्रेण तदाश्रितद्रव्यान्तरे प्रतिसन्धानानुपपत्तेः । गोमयादिकार्ये वृश्चिकादौ गोमयादिप्रतिसन्धानं न दृश्यत इति चेन्न, तत्राप्याद्यकारणभूतपृथिवीद्रव्यप्रत्य-भिज्ञानात् । अग्निकार्ये धूमे अग्निप्रत्यभिज्ञानं न दृश्यत इति चेत्, भवतु न तत्र प्रत्यभिज्ञानम्; तथाऽपि न दोषः, अग्नेर्निमित्तकारणमात्रत्वात् । अग्निसंयुक्तार्द्रेन्धनाद्धि धूमो जायते । गन्धैक्या च्चार्द्रेन्धनकार्यमेव धूमः । अतः कार्यभावे च तदेवेदमित्युपलब्धेर्बुद्धिशब्दान्तरादयोऽवस्थाभेदमात्र-निबन्धना इत्यवगम्यते । तस्मात्कारणादनन्यत्कार्यम् ॥ १६ ॥

इतश्च—

155 सत्त्वाच्चापरस्य । २ । १ । १७ ॥

अपरस्य—कार्यस्य कारणे सत्त्वाच्च कारणात्कार्यस्यानन्यत्वम् । लोकवेदयोर्हि कार्यमेव कारणतया व्यपदिश्यते; यथा लोके सर्वमिदं घटशरावादिकं पूर्वाह्णे मृत्तिकैवासीदिति; वेदे च *सदेव सोम्येदमग्र आसीदिति ॥ १७ ॥

156 असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषा-द्युक्तेश्शब्दान्तराच्च । २ । १ । १८ ॥

यदुक्तं कारणे कार्यस्य सत्त्वं लोकवेदाभ्यामवगम्यत इति; तदयुक्तम्, असद्व्यपदेशात् - *असदेवेदमग्र आसीत् *असद्वा इदमग्र आसीत् *इदं वा अग्रे नैव किञ्चनासीत्* इति; लोके च सर्वमिदं घटशरावादिकं पूर्वाह्णे नासीदिति । अतो यथोक्तं नोपपद्यत इति चेत्; तन्न, धर्मान्तरेण तथा व्यपदेशात् । स खल्वसद्व्यपदेशस्तस्यैव कार्यद्रव्यस्य पूर्वकाले धर्मान्तरेण—संस्थानान्तरेण; न भवदभिप्रेतेन तुच्छत्वेन । सत्त्वासत्त्वे हि द्रव्यधर्मावित्युक्तम् । तत्र सत्त्वधर्माद्धर्मान्तरमसत्त्वम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

इदंशब्दनिर्दिष्टस्य जगतस्सत्त्वधर्मो नामरूपे; असत्त्वधर्मस्तु तद्विरोधिनी सूक्ष्मावस्था । अतो जगतो नामरूपयुक्तस्य तद्विरोधिसूक्ष्मदशापत्तिरसत्त्वम् । कथमिदमवगम्यते ? वाक्यशेषाद्युक्तेः शब्दान्तराच्च— वाक्यशेषस्तावत् *इदं वा अग्रे नैव किञ्चनासीत्* इत्यत्र *तदसदेव सन्मनोऽकुरुत स्यामिति* इति । अनेन वाक्यशेषगतेन मनस्कारलिङ्गेनासच्छब्दार्थे तुच्छातिरिक्ते निश्चिते तदैकार्थ्यात् *असदेवेदमित्यादिष्वप्यसच्छब्दस्यायमेवार्थ इति निश्चीयते । युक्तेश्चासत्त्वस्य धर्मान्तरत्वमवगम्यते । युक्तिर्हि सत्त्वासत्त्वे पदार्थधर्माववगमयति । मृद्द्रव्यस्य पृथुबुध्नोदराकारयोगो घटोऽस्तीति व्यवहारहेतुः; तस्यैव तद्विरोध्यवस्थान्तरयोगो घटो नास्तीति व्यवहारहेतुः । तत्र कपालाद्यवस्थायास्तद्विरोधित्वेन सैव घटावस्थस्य नास्तीति व्यवहारहेतुः । नच तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते; नच कल्प्यते, तावतैवाभावव्यवहारोपपत्तेः । तथा शब्दान्तराच्च पूर्वकाले धर्मान्तरयोग एवावगम्यते । शब्दान्तरञ्च पूर्वोदाहृतं *सदेव सोम्येदमग्र आसीदित्यादिकम् । तत्र हि *कुतस्तु खलु सोम्यैवं स्यात्* इति तुच्छत्वमाक्षिप्य *सदेव सोम्येदमग्र आसीदिति स्थापितम् *तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत* इति सुस्पष्टमुक्तम् ॥ १८ ॥

इदानीं कार्यस्य कारणादनन्यत्वे निदर्शनद्वयं द्वाभ्यां सूत्राभ्यां दर्शयति—

157 पटवच्च । २ । १ । १९ ॥

यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपकार्यान्तरादिकं भजन्ते; तद्वद्ब्रह्मापि ॥ १९ ॥

158 यथाच प्राणादिः । २ । १ । २० ॥

यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते; तद्वद्ब्रह्मैकमेव विचित्रस्थिरत्रसरूपं जगद्भवतीति परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वं जगतस्सिद्धम् ॥ २० ॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

अथ इतरव्यपदेशाधिकरणम् ॥ ७ ॥

159 इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २ । १ । २१ ॥

जगतो ब्रह्मानन्यत्वं प्रतिपादयद्भिः *तत्त्वमसि *अयमात्मा ब्रह्म* इत्यादिभिर्जीवस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तम् । तत्रेदं चोद्यते—यदीतरस्य जीवस्य ब्रह्मभावोऽमीभिर्वाक्यैर्व्यपदिश्यते, तदा ब्रह्मणः सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तस्यात्मनो हितरूपजगदकरणमहितरूपजगत्करणमित्यादयो दोषाः प्रसज्येरन् । आध्यात्मिकाधिदैविकाधिभौतिकानन्तदुःखाकरं चेदं जगत्; नचेदृशे

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वानर्थे स्वाधीनो बुद्धिमान् प्रवर्तते। जीवाद्ब्रह्मणो भेदवादिन्यश्श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः; भेदे सत्यनन्यत्वासिद्धेः॥

औपाधिकभेदविषया भेदश्रुतयः, स्वाभाविकाभेदविषयाश्चाभेदश्रुतय इति चेत्; तत्रेदं वक्तव्यम्—स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति वा? न वा? न जानाति चेत्, सर्वज्ञत्वहानिः; जानाति चेत्, स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्या॥

जीवब्रह्मणोरज्ञानकृतो भेदः, तद्विषया भेदश्रुतिरिति चेत्, तत्रापि जीवाज्ञानपक्षे पूर्वोक्तो विकल्पस्तत्फलं च तदवस्थम्। ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न संभवति। अज्ञानेन प्रकाशस्तिरोहितश्चेत्; तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषसहस्रं प्रागेवोदीरितम्। अत इदमसङ्गतं ब्रह्मणो जगत्कारणत्वम्॥ २१॥

इति प्राप्तेऽभिधीयते—

160 अधिकं तु भेदनिर्देशात्। २। १। २२॥

तुशब्दः पक्षं व्यावर्तयति; आध्यात्मिकादिदुःखयोगार्हात्प्रत्यगात्मनः अधिकम्—अर्थान्तरभूतं ब्रह्म। कुतः? भेदनिर्देशात्—प्रत्यगात्मनो हि भेदेन निर्दिश्यते परं ब्रह्म *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः *पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति *स कारणं करणाधिपाधिपः *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति *ज्ञाज्ञौ द्वावजावीशनीशौ *प्राज्ञेनात्मना संपरिष्वक्तः *प्राज्ञेनात्मनाऽन्वारूढः *अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः *प्रधानक्षेत्रज्ञपतिर्गुणेशः *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् *योऽव्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः* इत्यादिभिः॥ २२॥

161 अश्मादिवच्च तदनुपपत्तिः। २। १। २३॥

अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानां सततविकारास्पदानामचिद्विशेषाणां निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते, तथा चेतनस्याप्यनन्तदुःखयोगार्हस्य खद्योतकल्पस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

अपहतपाप्मा इत्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः। सामानाधिकरण्यनिर्देशः *यस्यात्मा शरीरमित्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वाद्ब्रह्मणो जीवशरीरतया तदात्मत्वेनावस्थितेर्जीवप्रकारब्रह्मप्रतिपादनपरश्चैतदविरोधी, प्रत्युतैतस्यार्थस्योपपादकश्चेति *अवस्थितेरिति काशकृत्स्नः* इत्यादिभिरसकृदुपपादितम्। अतस्सर्वावस्थं ब्रह्म चिदचिद्वस्तुशरीरमिति सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्; तदेव ब्रह्म स्थूलचिदचिद्वस्तुशरीरं जगदाख्यं कार्यमिति जगद्ब्रह्मणोस्सामानाधिकरण्योपपत्तिः,जगतो ब्रह्मकार्यत्वम् ,ब्रह्मणोऽनन्यत्वम् ,अचिद्वस्तुनो जीवस्य च ब्रह्मणश्च परिणामित्वदुःखित्वकल्याणगुणाकरत्वस्वभावासङ्करस्सर्वश्रुत्यविरोधश्च भवति। *सदेव सोम्येदमग्र आसीदेकमेवेत्यविभागावस्थायामप्यचिद्युक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानमवश्याभ्युपगन्तव्यम्, *वैषम्यनैर्घृण्ये न सापेक्षत्वात्। *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च* इति सूत्रद्वयोदितत्वात्तदानीमपि सूक्ष्मरूपेणावस्थानस्य। अविभागस्तु नामरूपविभागाभावादुपपद्यते। अतो ब्रह्मकारणत्वं संभवत्येव॥

ये पुनरस्यैव जीवस्याविद्याविद्युक्तावस्थामभिप्रेत्येमं भेदं वर्णयन्ति, तेषामिदं सर्वमसङ्गतं स्यात्; न हि तदवस्थस्य सर्वज्ञत्वं, सर्वेश्वरत्वं, समस्तकारणत्वं, सर्वात्मत्वं सर्वनियन्तृत्वमित्यादीनि सन्ति। अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते। [तस्य सर्वस्याविद्यापरिकल्पितत्वात्।] तत्सर्वं ह्यविद्यापरिकल्पितं त्वन्मते। नचाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतादिभेदवत्परस्परभेदोऽत्र सूत्रकारेण *अधिकं तु भेदनिर्देशादित्यादिषु प्रतिपाद्यते। ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य वेदान्तवेद्यत्वम्, तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते। *अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् *न तु दृष्टान्तभावात्* इति सूत्रद्वयमेतदधिकरणसिद्धमनुवदति; तत्र हि विलक्षणयोः कार्यकारणभावसंभव एवाधिकरणार्थः। *असदिति चेन्न प्रतिषेधमात्रत्वादिति च पूर्वाधिकरणस्थमनुवदति॥२३॥इति इतरव्यपदेशाधिकरणम् ॥७॥

अथ उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

162 उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि। २। १। २४॥

परस्य ब्रह्मणस्सर्वज्ञस्य सत्यसङ्कल्पस्य स्थूलसूक्ष्मावस्थसर्वचेतनाचेतनवस्तुशरीरतया सर्वप्रकारत्वेन सर्वात्मत्वं सकलेतरविलक्षणत्वं चाविरुद्धमिति स्थापितम्। इदानीं सत्यसङ्कल्पस्य परस्य ब्रह्मणः सङ्कल्पमात्रेण विचित्रजगत्सृष्टियोगो न विरुद्ध इति स्थाप्यते। ननु च परिमितशक्तीनां कारककलापोपसंहारसापेक्षत्वदर्शनेन सर्वशक्तेर्ब्रह्मणः कारककलापानुपसंहारेण जगत्कारणत्वविरोधः कथमाशङ्क्यते? उच्यते—लोके तत्तत्कार्यजननशक्तियुक्तस्यापि तत्तदुपकरणापेक्षित्वदर्शनात्सर्वशक्तियुक्तस्य परस्य ब्रह्मणोऽपि तत्तदुपकरणविरहिणः स्रष्टृत्वं नोपपद्यत इति कस्यचि-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्मन्दधियश्शङ्का जायत इति सा निराक्रियते । घटपटादिकारणभूतानां कुलालकुविन्दादीनां तज्जननसामर्थ्ये सत्यपि कानिचिदुपकरणान्युपसंहृत्यैव जनयितृत्वं दृश्यते । तज्जननाशक्ताः कारककलापोपसंहारेऽपि जनयितुं न शक्नुवन्ति; शक्ताः पुनः कारककलापोपसंहारे जनयन्तीत्येतावानेव विशेषः । ब्रह्मणोऽपि सर्वशक्तेः सर्वस्य जनयितृत्वं तदुपकरणानामनुपसंहारे नोपपद्यते । प्राक्सृष्टेश्चासहायत्वं *सदेव सोम्येदमग्र आसीत् *एको ह वै नारायण आसीत्* इत्यादिषु प्रतीयते । अतस्स्रष्टृत्वं नोपपद्यत इत्येवं प्राप्तम् । तदिदमाशङ्कते—उपसंहारदर्शनान्नेतिचेदिति ॥

परिहरति—न क्षीरवद्धीति । न सर्वेषां कार्यजननशक्तानामुपसंहारसापेक्षत्वमस्ति; यथा क्षीरजलादेर्दधिहिमजननशक्तस्य तज्जनने । एवं ब्रह्मणोऽपि स्वयमेव सर्वजननशक्तेस्सर्वस्य जनयितृत्वमुपपद्यते । हीति प्रसिद्धवन्निर्देशश्चोद्यस्य मन्दताख्यापनाय । क्षीरादिष्वातञ्चनाद्यपेक्षा न दध्यादिभावाय; अपि तु शैघ्र्यार्थं रसविशेषार्थं च ॥ २४ ॥

163 देवादिवदपि लोके । २ । १ । २५ ॥

यथा देवादयः स्वेस्वे लोके सङ्कल्पमात्रेण स्वापेक्षितानि सृजन्ति; तथाऽसौ पुरुषोत्तमः कृत्स्नं जगत्सङ्कल्पमात्रेण सृजति । देवादीनां वेदावगतशक्तीनां दृष्टान्ततयोपादानम्, ब्रह्मणो वेदावगतशक्तेस्सुखग्रहणायेति प्रतिपत्तव्यम् ॥ २५ ॥ इति उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

अथ कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

164 कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा । २ । १ । २६ ॥

*सदेव सोम्येदमग्र आसीत् *इदं वा अग्रे नैव किञ्चनासीत् *आत्मा वा इदमेक एवाग्र आसीत्* इत्यादिषु कारणावस्थायां ब्रह्मैकमेव निरवयवमासीदिति कारणावस्थायां निरस्तचिदचिद्विभागतया निरवयवं ब्रह्मैवासीदित्युक्तम् । तदविभागमेकं निरवयवमेव ब्रह्म *बहु स्यामिति सङ्कल्प्य आकाशवाय्वादिविभागं ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञविभागं चाभवदिति चोक्तम् । एवं सति-तदेव परं ब्रह्म कृत्स्नं कार्यत्वेनोपयुक्तमित्यभ्युपगन्तव्यम् । अथ चिदंशः क्षेत्रज्ञविभागविभक्तः, अचिदंशश्चाकाशादिविभागविभक्त इत्युच्यते, तदा *सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् *ब्रह्मैकमेव *आत्मैक एव* इत्येवमादयः कारणभूतस्य ब्रह्मणो निरवयवत्ववादिनश्शब्दाः कुप्येयुः—बाधिता भवेयुः । यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्, स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते; तथापि शरीरांशस्यापि कार्यत्वाभ्युपगमादुक्तदोषो दुर्वारः । तस्य निरवयवस्य बहुभवनं च नोपपद्यते । कार्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते । तस्मादसमञ्जसमिवाभाति । अतो ब्रह्मकारणत्वं नोपपद्यते ॥ २६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्याक्षिप्ते समाधत्ते—

165 श्रुतेस्तु शब्दमूलत्वात्। २। १। २७॥

तुशब्द उक्तदोषं व्यावर्तयति। नैवमसामञ्जस्यम्; कुतः? श्रुतेः। श्रुतिस्तावन्निरवयवत्वं ब्रह्मणस्ततो विचित्रसर्गं चाह। श्रौतेऽर्थे यथाश्रुति प्रतिपत्तव्यमित्यर्थः। ननुच श्रुतिरपि अग्निना सिञ्चेदितिवत्परस्परान्वयायोग्यमर्थं प्रतिपादयितुं न समर्था; अत आह—शब्दमूलत्वादिति। शब्दैकप्रमाणकत्वेन सकलेतरवस्तुविसजातीयत्वादस्यार्थस्य विचित्रशक्तियोगो न विरुद्ध्यत इति न सामान्यतो दृष्टं साधनं दूषणं वा अर्हति ब्रह्म॥ २७॥

166 आत्मनि चैवं विचित्राश्च हि। २। १। २८॥

किंच—एवं वस्त्वन्तरसंबन्धिनो धर्मस्य वस्त्वन्तरे चारोपणे सति, अचेतने घटादौ दृष्टा धर्मास्तद्विसजातीये चेतने नित्य आत्मन्यपि प्रसज्यन्ते। तदप्रसक्तिश्च भावस्वभाववैचित्र्यादित्याह—विचित्राश्च हीति। यथा अग्निजलादीनामन्योन्यविसजातीयानामौष्ण्यादिशक्तयश्च विसजातीया दृश्यन्ते; तद्वल्लोकदृष्टविसजातीये परे ब्रह्मणि तत्रतत्रादृष्टास्सहस्रशः शक्तयस्सन्तीति न किञ्चिदनुपपन्नम्। यथोक्तं भगवता पराशरेण—*निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥ इति सामान्यदृष्ट्या परिचोद्य *शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः। भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता॥ इति। श्रुतिश्च *किं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदुतयदध्यतिष्ठद्भुवनानि धारयन्॥ ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्॥ इति। सामान्यतो दृष्टं चोद्यं सर्ववस्तुविलक्षणे परे ब्रह्मणि नावतरतीत्यर्थः॥ २८॥

इतश्च—

167 स्वपक्षदोषाच्च। २। १। २९॥

स्वपक्षे—प्रधानादिकारणवादे, लौकिकवस्तुविसजातीयत्वाभावेन प्रधानादेः लोकदृष्टा दोषास्तत्र भवेयुरिति सकलेतरविलक्षणं ब्रह्मैव कारणमभ्युपगन्तव्यम्। प्रधानं च निरवयवम्; तस्य निरवयवस्य कथमिव महदादिविचित्रजगदारम्भ उपपद्यते? सत्त्वं रजस्तम इति तस्यावयवा विद्यन्त इति चेत्, तत्रेदं विवेचनीयम्; किं सत्त्वरजस्तमसां समूहः प्रधानम्? उत सत्त्वरजस्तमोभिरारब्धं प्रधानम्? अनन्तरे कल्पे प्रधानं कारणमिति स्वाभ्युपगमविरोधः; स्वाभ्युपेतसङ्ख्याविरोधश्च; तेषामपि निरवयवानां कार्यारम्भविरोधश्च। समूहपक्षे च तेषां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

मानानां न स्थूलद्रव्यारम्भकत्वसिद्धिः । परमाणुकारणवादेऽपि तथैव अणवो निरंशा निष्प्रदेशाः प्रदेशभेदमनपेक्ष्य परस्परं संयुज्यमाना अपि न स्थूलकार्यारम्भाय प्रभवेयुः ॥ २९ ॥

168 सर्वोपेता च तद्दर्शनात् । २ । १ । ३० ॥

सकलेतरवस्तुविसजातीया परा देवता सर्वशक्त्युपेता च । तथैव परां देवतां दर्शयन्ति हि श्रुतयः—— *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च,* तथा, *अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः इति सकलेतरविसजातीयतां परस्या देवतायाः प्रतिपाद्य *सत्यकामस्सत्यसङ्कल्पः* इति सर्वशक्तियोगं प्रतिपादयन्ति । तथा *मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः* इति च ॥ ३० ॥

169 विकरणत्वान्नेति चेत्तदुक्तम् । २ । १ । ३१ ॥

यद्यप्येकमेव ब्रह्म सकलेतरविलक्षणं सर्वशक्तिः तथापि *न तस्य कार्यं करणं च विद्यते* इति करणविरहिणस्तस्य न कार्यारम्भस्संभवतीति चेत्, तत्रोत्तरं *शब्दमूलत्वात् *विचित्राश्च हि* इत्युक्तम् । शब्दैकप्रमाणकं सकलेतरविलक्षणं तत्तत्करणविरहेणापि तत्तत्कार्यसमर्थमित्यर्थः । तथाच श्रुतिः—— *पश्यत्यचक्षुस्स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीता* इत्येवमाद्या ॥ ३१ ॥

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

अथ प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

170 न प्रयोजनवत्त्वात् । २ । १ । ३२ ॥

यद्यपीश्वरः प्राक्सृष्टेरेक एव सन् सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः स्वयमेव विचित्रं जगत्स्रष्टुं शक्नोति । तथापीश्वरकारणत्वं न संभवति, प्रयोजनवत्त्वाद्विचित्रसृष्टेः, ईश्वरस्य च प्रयोजनाभावात् । बुद्धिपूर्वकारिणामारम्भे द्विविधं हि प्रयोजनं—स्वार्थः परार्थो वा । नहि परस्य ब्रह्मणस्स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किंचन प्रयोजनमनवाप्तमवाप्यते । नापि परार्थः, अवाप्तकामस्य परार्थता हि परानुग्रहेण भवति; नचेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत्करुणावान् सृजति; प्रत्युत सुखैकतानमेव जनयेज्जगत्करुणया सृजन् । अतः प्रयोजनाभावाद्ब्रह्मणः कारणत्वं नोपपद्यत इति ॥ ३२ ॥

एवं प्राप्ते प्रचक्ष्महे——

Digitization by Arya Samaj Charitable Foundation, Chennai

171 लोकवत्तु लीलाकैवल्यम् । २ । १ । ३३ ॥

अवाप्तसमस्तकामस्य परिपूर्णस्य स्वसङ्कल्पविकार्यविविधविचित्रचिदचिन्मिश्रजगत्सर्गे लीलैव केवला प्रयोजनम्, लोकवत्—यथा लोके सप्तद्वीपामेव मेदिनीमधितिष्ठतस्संपूर्णशौयवीर्यपराक्रमस्यापि महाराजस्य केवललीलैकप्रयोजनाः कन्तुकाद्यारम्भा दृश्यन्ते; तथैव परस्यापि ब्रह्मणः स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति निरवद्यम् ॥ ३३ ॥

172 वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति । २ । १ । ३४ ॥

यद्यपि परमपुरुषस्य सकलेतरचिदचिद्वस्तुविलक्षणस्याचिन्त्यशक्तियोगात्प्राक्सृष्टेरेकस्य निरवयवस्यापि विचित्रचिदचिन्मिश्रजगत्सृष्टिस्संभाव्येत; तथाऽपि देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत । अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति । तत्रोत्तरं—न सापेक्षत्वादिति । न प्रसज्येयातां वैषम्यनैर्घृण्ये । कुतः ? सापेक्षत्वात्—सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेः । देवादीनां क्षेत्रज्ञानां देवादिशरीरयोगं तत्तत्कर्मसापेक्षं दर्शयन्ति हि श्रुतिस्मृतयः— *साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा* । तथा भगवता पराशरेणापि देवादिवैचित्र्यहेतुः सृज्यमानानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेत्युक्तं— *निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि । प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वैव नान्यत्किंचिदपेक्षते । नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम् ॥ इति । स्वशक्त्या—स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति ॥ ३४ ॥

173 न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ।२ । १ । ३५॥

प्राक्सृष्टेः क्षेत्रज्ञा नाम न सन्ति; कुतः ? अविभागश्रवणात्, *सदेव सोम्येदमग्र आसीदिति; अतस्तदानीं तदभावात्तत्कर्म न विद्यते; कथं तदपेक्षं सृष्टिवैषम्यमित्युच्यत इति चेत्; न, अनादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च । तदनादित्वेऽप्यविभाग उपपद्यते च; यतस्तत् क्षेत्रज्ञवस्तु परित्यक्तनामरूपं ब्रह्मशरीरतयाऽपि पृथग्व्यपदेशानर्हमतिसूक्ष्मम् । तथाऽनभ्युपगमे अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च । उपलभ्यते च तेषामनादित्वं— *न जायते म्रियते वा विपश्चित्* इति । सृष्टिप्रवाहानादित्वं च *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्* इत्यादौ । *तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत* इति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम् । स्मृतावपि *प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि* इति । अतस्सर्वविलक्षणत्वात्सर्वशक्तित्वात्, लीलैकप्रयोजनत्वात्, क्षेत्रज्ञकर्मानुगुण्येन विचित्रसृष्टियोगाद्ब्रह्मैव जगत्कारणम् ॥ ३५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

174 सर्वधर्मोपपत्तेश्च । २ । १ । ३६ ॥

प्रधानपरमाण्वादीनां कारणत्वे यद्धर्मवैकल्यमुक्तं, वक्ष्यमाणं च तस्य सर्वस्य धर्मजातस्य कारणत्वोपपादिनो ब्रह्मण्युपपत्तेश्च ब्रह्मैव जगत्कारणमिति स्थितम् ॥३६॥ इति प्रयोजनवत्त्वाधिकरणम् ॥१०॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

श्रीमते रामानुजाय नमः

द्वितीयाध्याये—द्वितीयः पादः–रचनानुपपत्त्यधिकरणम् ॥ १ ॥

175 रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च । २ । २ । १ ॥

उक्तं जगज्जन्मादिकारणं परं ब्रह्मेति; तत्र परैरुद्भाविताश्च दोषाः परिहृताः । इदानीं स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते । इतरथा कस्यचिन्मन्दधियस्तेषां पक्षाणां युक्त्याभासमूलतामजानतः प्रामाणिकत्वशङ्कया वैदिकपक्षे किंचिच्छ्रद्धावैकल्यं जायेतापि । अतः परपक्षप्रतिक्षेपायानन्तरः पादः प्रवर्तते । तत्र प्रथमं तावत्कापिलमतं निरस्यते, वैदिकानुमतसत्कार्यवादाद्यर्थसङ्ग्रहेणैतस्य सत्पक्षनिक्षेपसंभावनाभ्रमहेतुत्वातिरेकात् । *ईक्षतेर्नाशब्दम्* इत्यादिभिः वैदिकवाक्यानामतत्परत्वमात्रमुक्तम्; अत्रैव तत्पक्षस्वरूपप्रतिक्षेपः क्रियत इति न पौनरुक्त्याशङ्का ।

एषा हि साङ्ख्यानां दर्शनस्थितिः— *मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ।। इति तत्त्वसङ्ग्रहः । मूलप्रकृतिर्नाम सुखदुःखमोहात्मकानि लाघवप्रकाशचलनोपष्टम्भनगौरवावरणकार्याण्यत्यन्तातीन्द्रियाणि कार्यैकनिरूपणविवेकान्यन्यूनानतिरेकाणि समतामुपेतानि सत्त्वरजस्तमांसि द्रव्याणि । सा च सत्वरजस्तमसां साम्यरूपा प्रकृतिरेका स्वयमचेतनाऽनेकचेतनभोगापवर्गार्था नित्या सर्वगता सततविक्रिया न कस्यचिद्विकृतिः, अपितु परमकारणमेव । महदाद्यास्तद्विकृतयोऽन्येषां च प्रकृतयस्सप्त- महानहङ्कारः शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तत्राहङ्कारस्त्रिधा—-वैकारिकस्तैजसो भूतादिश्च, क्रमात्सात्विको राजसस्तामसश्च । तत्र वैकारिकस्सात्त्विक इन्द्रियादिः; भूतादिस्तामसो महाभूतहेतुभूततन्मात्रहेतुः; तैजसो राजसस्तूभयोरनुग्राहकः । आकाशादीनि पञ्च महाभूतानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि मन इति केवलविकाराः षोडश । पुरुषस्तु निष्परिणामत्वेन न कस्यचित्प्रकृतिः, न कस्यचिद्विकृतिः; तत एव निर्धर्मकश्चैतन्यमात्रवपुर्नित्यो निष्क्रियस्सर्वगतः प्रतिशरीरं भिन्नश्च । निर्विकारत्वान्निष्क्रियत्वाच्च तस्य कर्तृत्वं भोक्तृत्वं च न संभवति । एवंभूतेऽपि तत्त्वे मूढाः प्रकृतिपुरुषसन्निधिमात्रेण पुरुषस्य चैतन्यं प्रकृतावध्यस्य प्रकृतेश्च कर्तृत्वं स्फटिकमणाविव जपाकुसुमस्यारुणिमानं पुरुषेऽध्यस्य 'अहं कर्ता भोक्ता' इति मन्यन्ते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एवमज्ञानाद्भोगः, तत्त्वज्ञानाच्चापवर्गः। तदेतत्प्रत्यक्षानुमानागमैस्साधयन्ति। तत्र प्रत्यक्षसिद्धेषु पदार्थेषु नातीव विवादपदमस्ति। आगमोऽपि कपिलादिसर्वज्ञज्ञानमूल इति सोऽपि प्रथमे काण्डे प्रमाणलक्षणे निरस्तप्रायः। यदिदं प्रधानमेव जगत्कारणमित्यनुमानम्, तन्निरसनेन तन्मतं सर्वं निरस्तं भवतीति तदेव निरस्यते॥

ते चैवं वर्णयन्ति—कृत्स्नस्य जगत एकमूलत्वमवश्याभ्युपगमनीयम्, अनेकेभ्यः कार्योत्पत्त्यभ्युपगमे कारणानवस्थानात्। तन्तुप्रभृतयो ह्यवयवाः स्वांशभूतैष्षड्भिः पार्श्वैः परस्परं संयुज्यमाना अवयविनमुत्पादयन्ति; तेच तन्त्वादयः स्वावयवैस्तथाभूतैरुत्पाद्यन्ते; तेच तथाभूतैः स्वावयवैरिति परमाणुभिरपि स्वकीयैष्षड्भिः पार्श्वैस्संयुज्यमानैरेव स्वकार्योत्पादनमभ्युपेतव्यम्; अन्यथा प्रथिमानुपपत्तेः। परमाणवोऽप्यंशित्वेन स्वांशैस्तथैवोत्पाद्यन्ते, तेच स्वांशैरिति न क्वचित्कारणव्यवस्थितिः। अतः कारणव्यवस्थासिद्ध्यर्थमेकद्रव्यं विविधविचित्रपरिणामशक्तियुक्तं स्वयमप्रच्युतस्वरूपमेव महदाद्यनन्तावस्थाश्रयः कारणमाश्रयणीयम्। तच्चैकं कारणं गुणत्रयसाम्यरूपं प्रधानमिति तत्कल्पने हेतूनुपन्यस्यन्ति— *भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य॥ कारणमस्त्यव्यक्तम्* इति। अयमर्थः—विश्वरूपमेव वैश्वरूप्यम्, विचित्रसन्निवेशं तनुभुवनादि कृत्स्नं जगत्। तच्च जगद्विचित्रसन्निवेशत्वेन कार्यभूतं तत्सरूपाव्यक्तकारणकम्। कुतः? कार्यत्वात्। कार्यस्य हि सर्वस्य तत्सरूपात्कारणविशेषाद्विभागस्तस्मिन्नेवाविभागश्च दृश्यते। यथा घटमकुटादेः कार्यस्य तत्सरूपान्मृत्सुवर्णादेः कारणाद्विभागस्तस्मिन्नेव चाविभागः। अतो विश्वरूपस्य जगतस्तत्सरूपात्प्रधानादुत्पत्तिस्तस्मिन्नेव लयश्चेति प्रधानकारणकमेव जगत्। गुणत्रयसाम्यरूपं प्रधानमेव जगत्सरूपं कारणम्; सत्त्वरजस्तमोमयसुखदुःखमोहात्मकत्वाज्जगतः। यथा मृदात्मनो घटस्य मृद्द्रव्यमेव कारणम्। तदेव हि तदुत्पत्त्याख्यप्रवृत्तिशक्तिमत्, तथा दर्शनात्। अव्यक्तस्य गुणसाम्यरूपस्य देशतः कालतश्चापरिमितस्यैव कारणत्वं भेदानां महदहङ्कारतन्मात्रादीनां परिमितत्वादवगम्यते। महदादीनि च घटादिवत्परिमितानि कृत्स्नजगदुत्पत्तौ न प्रभवन्ति, अतस्त्रिगुणं जगद्गुणत्रयसाम्यरूपप्रधानैककारणमिति निश्चीयते॥

अत्रोच्यते—रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च। अनुमीयत इत्यनुमानम्। न भवदुक्तं प्रधानं विचित्रजगद्रचनासमर्थम्, अचेतनत्वे सति तत्स्वभावाभिज्ञानधिष्ठितत्वात्; यदेवं तत्तथा, यथा रथप्रासादादिनिर्माणे केवलदार्वादिकम्। दार्वादेरचेतनस्य तज्ज्ञानधिष्ठितस्य कार्यारम्भानुपपत्तेर्दर्शनात्, तज्ज्ञाधिष्ठितस्य कार्यारम्भप्रवृत्तेर्दर्शनाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणमित्युक्तं भवति। चकारादन्वयस्यानैकान्त्यं समुच्चिनोति। न ह्यन्वितं शौक्ल्यगोत्वादि कारणत्वव्याप्तम्। न च वाच्यं मा भूदन्वितानामपि शौक्ल्यादिधर्माणां कारणत्वम्, द्रव्यस्य तु हेमादेः कार्येऽन्वितस्य कारणत्वव्याप्तिरस्त्येव; सत्त्वादीन्यपि द्रव्याणि कार्येऽन्वितानि कारणत्वव्याप्तानीति। यतस्सत्त्वादयो द्रव्यधर्माः, न तु द्रव्यस्वरूपम्। सत्त्वादयो हि पृथिव्यादिद्रव्यगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभाव-

Digitization by Arya Samaj Charitable Foundation, Chennai

विशेषा एव । न तु मृद्धिरण्यादिवद्द्रव्यतया कार्यान्विता उपलभ्यन्ते । गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः । यच्च कारणव्यवस्थासिद्धये जगतः एकमूलत्वमुक्तम्, तदपि सत्त्वादीनामनेकत्वान्नोपपद्यते । अत एव कारणव्यवस्था च न सिद्ध्यति । साम्यावस्थास्सत्त्वादय एव हि प्रधानमिति त्वन्मतम् । अतः कारणबहुत्वादनवस्था तदवस्थैव । न च तेषामपरिमितत्वेन व्यवस्थासिद्धिः, अपरिमितत्वे हि त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावाद्वैषम्यासिद्धेः कार्यारम्भासंभवात्, कार्यारम्भायैव परिमितत्वमवश्याश्रयणीयम् ॥ १ ॥

यत्र रथादिषु स्पष्टं चेतनाधिष्ठितत्वं दृष्टम्, तद्व्यतिरिक्तं सर्वं पक्षीकृतमित्याह—

176 पयोम्बुवच्चेत्तत्रापि । २ । २ । २ ॥

यदुक्तं प्रधानस्य प्राज्ञानधिष्ठितस्य विचित्रजगद्रचनानुपपत्तिरिति; तन्न, यतः पयोम्बुवत्प्रवृत्तिरुपपद्यते । पयसस्तावद्दधिभावेन परिणममानस्यानन्यापेक्षस्याद्यपरिस्पन्दप्रभृतिपरिणामपरम्परा स्वत एवोपलभ्यते । यथा च वारिदविमुक्तस्याम्बुन एकरसस्य नारिकेलतालचूतकपित्थनिम्बतिन्त्रिण्यादिविचित्ररसरूपेण परिणामप्रवृत्तिः स्वत एव दृश्यते । तथा प्रधानस्यापि परिणामस्वभावस्यान्यानाधिष्ठितस्यैव प्रतिसर्गावस्थायां सदृशपरिणामेनावस्थितस्य सर्गावस्थायां गुणवैषम्यनिमित्तविचित्रपरिणाम उपपद्यते । यथोक्तं *परिणामतस्सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्* इति । तदेवमव्यक्तमनन्यापेक्षं प्रवर्तत इति चेत्, अत उत्तरं—तत्रापीति । यत् क्षीरजलादि दृष्टान्ततया निदर्शितम्, तत्रापि प्राज्ञानधिष्ठाने प्रवृत्तिर्नोपपद्यते; तदपि पूर्वत्र पक्षीकृतमित्यभिप्रायः । *उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि* इत्यत्र दृष्टपरिकरान्तररहितस्यापि स्वासाधारणपरिणाम उपपद्यत इत्येतावदुक्तम्, न प्राज्ञाधिष्ठितत्वं पराकृतम्, *योऽप्सु तिष्ठन्* इत्यादिश्रुतेः ॥ २ ॥

177 व्यतिरेकानवस्थितेश्चानपेक्षत्वात् । २ । २ । ३ ॥

इतश्च सत्यसङ्कल्पेश्वराधिष्ठानानपेक्षपरिणामित्वे सर्गव्यतिरेकेण प्रतिसर्गावस्थयाऽनवस्थितिप्रसङ्गाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् । प्राज्ञाधिष्ठितत्वे तस्य सत्यसङ्कल्पत्वेन सर्गप्रतिसर्गविचित्रसृष्टिव्यवस्थासिद्धिः । न च वाच्यं प्राज्ञाधिष्ठितत्वेऽपि तस्यावाप्तसमस्तकामस्य परिपूर्णस्यानवधिकातिशयानन्दस्य निरवद्यस्य निरञ्जनस्य सर्गप्रतिसर्गव्यवस्थाहेत्वभावाद्विषमसृष्टौ निर्दयत्वप्रसङ्गाच्च समानोऽयं दोष इति । परिपूर्णस्यापि लीलार्थप्रवृत्तिसंभवात्, सर्वज्ञस्य तस्य परिणामविशेषापन्नप्रकृतिदर्शनरूपसर्गप्रतिसर्गविशेषहेतोस्संभवात्, क्षेत्रज्ञकर्मणामेव विषमसृष्टिव्यवस्थापकत्वाच्च । नन्वेवं क्षेत्रज्ञपुण्यापुण्यरूकर्मभिरेव सर्वा व्यवस्थास्सिध्यन्तीति कृतमीश्वरेणाधिष्ठात्रा । पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृता प्रकृतिरेव पुरुषार्थानुरूपं तथातथा व्यवस्थया परिणंस्यते । यथा

Digitization by Arya Samaj Charitable Foundation, Chennai

विषादिदूषितानामन्नपानादीनामौषधविशेषाप्यायितानां च सुखदुःखहेतुभूतः परिणामविशेषो देशकालव्यवस्थया दृश्यते । अतस्सर्गप्रतिसर्गव्यवस्था, देवादिविषमसृष्टिः, कैवल्यव्यवस्था च सर्वप्रकारपरिणामशक्तियुक्तस्य प्रधानस्यैवोपपद्यत इति ।

अनभिज्ञो भवान् पुण्यापुण्यकर्मस्वरूपयोः । पुण्यापुण्यस्वरूपे हि शास्त्रैकसमधिगम्ये । शास्त्रं चानादिनिधनाविच्छिन्नपाठसंप्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः । तच्च परमपुरुषाराधनतद्विपर्ययरूपे कर्मणी पुण्यापुण्ये, तदनुग्रहनिग्रहायत्ते च तत्फले सुखदुःखे इति वदति । तथाऽऽह द्रमिडाचार्यः *फलसंविभक्तसया हि कर्मभिरात्मानं पिप्रीषन्ति स प्रीतोऽलं फलायेति शास्त्रमर्यादा* इति । तथाच श्रुतिः *इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः* इति । तथाच भगवता स्वयमेवोक्तं— *यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ इति, *तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ इति च ॥

स भगवान् पुरुषोत्तमोऽवाप्तसमस्तकामस्सर्वज्ञस्सर्वेश्वरस्सत्यसङ्कल्पः, स्वमाहात्म्यानुगुणलीलाप्रवृत्तः, एतानि कर्माणि समीचीनान्येतान्यसमीचीनानीति कर्मद्वैविध्यं संविधाय, तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य, स्वशासनावबोधि शास्त्रं च प्रदर्श्य, तदुपसंहारार्थं चान्तरात्मतयाऽनुप्रविश्यानुमन्तृतया च नियच्छंस्तिष्ठति । क्षेत्रज्ञास्तु तदाहितशक्तयस्तत्प्रदिष्टकरणकलेबरादिकास्तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते । ततश्च पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते । शासनातिवर्तिनं च तद्विपर्ययैर्योजयति । अतः स्वातन्त्र्यादिवैकल्यचोद्यानि नावकाशं लभन्ते । दया हि नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता । सा च स्वशासनातिवृत्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते; प्रत्युतापुंस्त्वमेवावहति । तन्निग्रह एव तत्र गुणः; अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसङ्गात् । स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेणानाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते । यथोक्तं— *तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ इति । अतः प्राज्ञानधिष्ठितं प्रधानं न कारणम् ॥ ३ ॥

अथ स्यात्—यद्यपि प्राज्ञानधिष्ठितायाः प्रकृतेः परिस्पन्दप्रवृत्तिरपि न संभवतीत्युक्तम्, तथाऽप्यनपेक्षाया एव परिणामप्रवृत्तिः संभवति, तथा दर्शनात्; धेन्वादिनोपयुक्तं हि तृणोदकादि स्वयमेव क्षीराद्याकारेण परिणममानं दृश्यते । अतः प्रकृतिरपि स्वयमेव जगदाकारेण परिणंस्यत इति । तत्राह—

Digitization by Arya Samaj Charitable Foundation, Chennai

178 अन्यत्राभावाच्च न तृणादिवत् । २ । २ । ४ ॥

नैतदुपपद्यते, तृणादेः प्राज्ञानधिष्ठितस्य परिणामाभावाद्दृष्टान्तासिद्धेः । कथमसिद्धिः ? अन्यत्राभावात्—यदि हि तृणोदकादिकमनडुदाद्युपयुक्त प्रहीणं वा क्षीराकारेण पर्यणंस्यत; ततः प्राज्ञानधिष्ठितमेव परिणमत इति वक्तुमशक्ष्यत । नचैतदस्ति; अतो धेन्वाद्युपयुक्तं प्राज्ञ एव क्षीरीकरोति । *पयोम्बुवच्चेत्तत्रापीत्युक्तमेवात्र प्रपञ्चितं तत्रैव व्यभिचारप्रदर्शनाय ॥ ४ ॥

179 पुरुषाश्मवदिति चेत्तथाऽपि । २ । २ । ५ ॥

अथोच्येत—यद्यपि चैतन्यमात्रवपुः पुरुषो निष्क्रियः, प्रधानमपि दृक्छक्तिविकलम्; तथाऽपि पुरुषसन्निधानादचेतनं प्रधानं प्रवर्तते, तथा दर्शनात् । गमनशक्तिविकलदृक्छक्तियुक्तपङ्गुसन्निधानात्तच्चैतन्योपकृतो दृक्छक्तिविकलः प्रवृत्तिशक्तोऽन्धः प्रवर्तते; अयस्कान्ताश्मसन्निधानाच्चायः प्रवर्तते । एवं प्रकृतिपुरुषसंयोगकृतो जगत्सर्गः प्रवर्तते । यथोक्तं* पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतस्सर्गः ॥ इति । पुरुषस्य प्रधानोपभोगार्थं कैवल्यार्थं च पुरुषसन्निधानात्प्रधानं सर्गादौ प्रवर्तत इत्यर्थः । अत्रोत्तरं—तथाऽपीति । एवमपि प्रधानस्य प्रवृत्त्यसंभवस्तदवस्थ एव, पङ्गोर्गमनशक्तिविकलस्यापि मार्गदर्शनतदुपदेशादयः कादाचित्का विशेषाः सहस्रशस्सन्ति; अन्धोऽपि चेतनस्संस्तदुपदेशाद्यवगमेन प्रवर्तते; तथा अयस्कान्तमणेरप्ययस्समीपागमनादयस्सन्ति । पुरुषस्य तु निष्क्रियस्य न तादृशा विकारास्संभवन्ति । सन्निधानमात्रस्य नित्यत्वेन नित्यसर्गप्रसङ्गः, नित्यमुक्तत्वेन बन्धाभावोऽपवर्गाभावश्च ॥ ५ ॥

180 अङ्गित्वानुपपत्तेश्च । २ । २ । ६ ॥

गुणानामुत्कर्षनिकर्षनिबन्धनाङ्गाङ्गिभावाद्धि जगत्प्रवृत्तिः *प्रतिप्रतिगुणाश्रयविशेषात्* इति वदद्भिर्भवद्भिरभ्युपगम्यते । प्रतिसर्गावस्थायां तु साम्यावस्थानां सत्त्वरजस्तमसामन्योन्याधिक्यन्यूनत्वाभावादङ्गाङ्गिभावानुपपत्तेर्न जगत्सर्ग उपपद्यते । तदाऽपि वैषम्याभ्युपगमे नित्यसर्गप्रसङ्गः । अतश्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् ॥ ६ ॥

181 अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् । २ । २ । ७ ॥

दूषितप्रकारातिरिक्तप्रकारान्तरेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात्त एव दोषाः प्रादुःष्युः । अतो न कथंचिदप्यनुमानेन प्रधानसिद्धिः ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

182 अभ्युपगमेऽप्यर्थाभावात् । २ । २ । ८ ॥

अनुमानेन प्रधानसिद्ध्यभ्युपगमेऽपि प्रधानेन प्रयोजनाभावान्न तदनुमातव्यम्। *पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्येति प्रधानस्य प्रयोजनं पुरुषभोगापवर्गाविभिमतौ, तौ च न संभवतः। पुरुषस्य चैतन्यमात्रवपुषो निष्क्रियस्य निर्विकारस्य निर्मलस्य तत एव नित्यमुक्तस्वरूपस्य प्रकृतिदर्शनरूपो भोगस्तद्वियोगरूपोऽपवर्गश्च न संभवति। एवंरूपस्यैव प्रकृतिसन्निधानात्तत्परिणामविशेषसुखदुःखदर्शनरूपभोगसंभावनायां प्रकृतिसन्निधानस्य नित्यत्वेन कदाचिदप्यपवर्गो न सेत्स्यति ॥ ८ ॥

183 विप्रतिषेधाच्चासमञ्जसम् । २ । २ । ९ ॥

विप्रतिषिद्धं चेदं साङ्ख्यानां दर्शनम्। तथा हि—प्रकृतेः परार्थत्वेन दृश्यत्वेन भोग्यत्वेन च प्रकृतेर्भोक्तारमधिष्ठातारं द्रष्टारं साक्षिणं च पुरुषमभ्युपगम्य प्रकृत्यैव साधनभूतया तस्य कैवल्यमपि प्राप्यं वदन्त एव तस्य नित्यनिर्विकारचैतन्यमात्रस्वरूपतया अकर्तृत्वं, कैवल्यं च स्वरूपमेवाहुः; तत एव बन्धमोक्षसाधनानुष्ठानं मोक्षश्च प्रकृतेरेवेत्याहुः; एवंभूतनिर्विकारोदासीनपुरुषसन्निधानात्प्रकृतेरितरेतराध्यासेन सर्गादिप्रवृत्तिं पुरुषभोगापवर्गार्थत्वं चाहुः— *सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ इति। *पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य* इत्युक्त्वैवमाहुः— *तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ इति। तथा *तस्मात्तत्संयोगादचेतनं चेतनावादिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतस्सर्गः ॥ इति। साक्षित्वद्रष्टृत्वभोक्तृत्वादयो नित्यनिर्विकारस्याकर्तुरुदासीनस्य कैवल्यैकस्वरूपस्य न संभवन्ति। एवंरूपस्य तस्याध्यासमूलभ्रमोऽपि न संभवति, अध्यासभ्रमयोरपि विकारत्वात्। प्रकृतेश्च तौ न संभवतः, तयोश्चेतनधर्मत्वात्। अध्यासो हि नाम चेतनस्यान्यस्मिन्नन्यधर्मानुसन्धानम्। स च चेतनधर्मो विकारश्च। नच पुरुषस्य प्रकृतिसन्निधिमात्रेणाध्यासादयस्संभवन्ति, निर्विकारत्वादेव। संभवन्ति चेत्, नित्यं प्रसज्येरन्। सन्निधेरकिञ्चित्करत्वञ्च *नविलक्षणत्वादित्यत्र प्रतिपादितम्। प्रकृतिरेव संसरति बध्यते मुच्यते चेत्; कथं नित्यमुक्तस्य पुरुषस्योपकारिणी सेत्युच्यते ? वदन्ति हि *नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ इति ॥

तथा प्रकृतिर्येन पुरुषेण यथास्वभावा दृष्टा, तस्मात्पुरुषात्तदानीमेव निवर्तत इति चाहुः— *रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात्। पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥ प्रकृतेस्सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति। या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ इति।

Digitization by Arya Samaj Charitable Foundation, Chennai

तदप्यसङ्गतम्, पुरुषो हि नित्यमुक्तत्वान्निर्विकारत्वान्न तां कदाचिदपि पश्यति, नाध्यस्यति च। स्वयं च स्वात्मानं न पश्यति, अचेतनत्वात्। पुरुषस्य स्वात्मदर्शनं स्वदर्शनमिति नाध्यस्यति च, स्वयमचेतनत्वात्; पुरुषस्य च दर्शनरूपविकारासंभवात्। अथ सन्निधिमात्रमेव दर्शनमित्युच्यते; सन्निधेर्नित्यत्वेन नित्यदर्शनप्रसङ्ग इत्युक्तम्। स्वरूपातिरिक्तकादाचित्कसन्निधिरपि नित्यनिर्विकारस्य नोपपद्यते। किंच मोक्षहेतुस्तु स्वसन्निधानरूपमेव दर्शनं चेत्; बन्धहेतुरपि तदेवेति नित्यवद्बन्धो मोक्षश्च स्याताम्। अयथादर्शनं बन्धहेतुः, यथावत्स्वरूपदर्शनं मोक्षहेतुरिति चेत्; उभयविधस्यापि दर्शनस्य सन्निधानरूपतानतिरेकात्सदोभयप्रसङ्ग एव। सन्निधेरनित्यत्वे तस्य हेतुरन्वेषणीयः, तस्यापीत्यनवस्था। अथैतद्दोषपरिजिहीर्षया स्वरूपसद्भाव एव सन्निधिरिति, तदा स्वरूपस्य नित्यत्वेन नित्यवद्बन्धमोक्षौ। अत एवमादेर्विप्रतिषेधात्साङ्ख्यानां दर्शनमसमञ्जसम्॥

येऽपि कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्माविद्यासाक्षित्वेनापारमार्थिकबन्धमोक्षभागिति वदन्ति, तेषामप्युक्तनीत्याऽविद्यासाक्षित्वाध्यासाद्यसंभवादसामञ्जस्यमेव; इयांस्तु विशेषः—साङ्ख्याः जननमरणप्रतिनियमादिव्यवस्थासिद्ध्यर्थं पुरुषबहुत्वमिच्छन्ति, ते तु तदपि नेच्छन्तीति सुतरामसामञ्जस्यम्। यत्तु प्रकृतेः पारमार्थ्यापारमार्थ्यविभागेन वैषम्यमुक्तम्, तदयुक्तम्; पारमार्थिकत्वेऽप्यपारमार्थिकत्वेऽपि नित्यनिर्विकारस्वप्रकाशैकरसचिन्मात्रस्य स्वव्यतिरिक्तसाक्षित्वाद्यनुपपत्तेः। अपारमार्थिकत्वे तु तस्याः दृश्यत्वबाध्यत्वाभ्युपगमात् सुतरामसङ्गतम्। औपाधिकभेदवादेऽपि उपाधिसंबन्धिनो ब्रह्मणोऽयमेव स्वभाव इत्युपाधिसंबन्धाद्यनुपपत्तेरसामञ्जस्यं पूर्वमेवोक्तम्॥ ९॥ इति रचनानुपपत्त्यधिकरणम्॥ १॥

अथ महद्दीर्घाधिकरणम्॥ २॥

184 महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्। २। २। १०॥

प्रधानकारणवादस्य युक्त्याभासमूलतया विप्रतिषिद्धत्वाच्चासामञ्जस्यमुक्तम्; संप्रति परमाणुकारणवादस्याप्यसामञ्जस्यं प्रतिपाद्यते—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामिति। असमञ्जसमिति वर्तते। वाशब्दश्चार्थे। ह्रस्वपरिमण्डलाभ्यां—द्व्यणुकपरमाणुभ्यां, महद्दीर्घवत्—त्र्यणुकोत्पत्तिवादवत्, अन्यच्च तदभ्युपगतं सर्वमसमञ्जसम्; परमाणुभ्यो द्व्यणुकादिक्रमेण जगदुत्पत्तिवादवदन्यदप्यसमञ्जसमित्यर्थः। तथा हि—तन्तुप्रभृतयो ह्यवयवाः स्वांशैःषड्भिः पार्श्वैस्संयुज्यमानाः अवयविनमुत्पादयन्ति, परमाणवोऽपि स्वकीयैः षड्भिः पार्श्वैस्संयुज्यमाना एव द्व्यणुकादीनामुत्पादका भवेयुः, अन्यथा परमाणूनां प्रदेशभेदाभावे सति सहस्रपरमाणुसंयोगेऽप्येकस्मात्परमाणोरनतिरिक्तपरिमाणतया अणुत्वह्रस्वत्वमहत्त्वदीर्घत्वाद्यसिद्धिः स्यात्। प्रदेशभेदाभ्युपगमे परमाणवोऽपि सांशाः स्वकीयैरंशैः, ते च स्वकीयैरंशैरित्यनवस्था। नच वाच्यम् अवयवाल्पत्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

महत्त्वाभ्यां हि सर्षपमहीधरयोर्वैषम्यम्; परमाणोरप्यनन्तावयवत्वे अवयवानन्त्यसाम्यात्सर्षपमहीधरयोः वैषम्यासिद्धेः अवयवापकर्षकाष्ठाऽवश्याभ्युपगमनीयेति । परमाणूनां प्रदेशभेदाभावे सत्येकपरमाणुपरिमाणातिरेकिप्रथिमा न जायेतेति सर्षपमहीधरयोरेवासिद्धेः। किं कुर्म इति चेत्; वैदिकः पक्षः परिगृह्यताम् ।

यत्तु परैः ब्रह्मकारणवाददूषणपरिहारपरमिदं सूत्रं व्याख्यातम्; तदसङ्गतं, पुनरुक्तं च । ब्रह्मकारणवादे परोक्तान् दोषान् पूर्वस्मिन् पादे परिहृत्य परपक्षप्रतिक्षेपो ह्यस्मिन् पादे क्रियते । चेतनाद्ब्रह्मणो जगदुत्पत्तिसंभवश्च *न विलक्षणत्वादित्यत्रैव प्रपञ्चितः । अतो ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसमित्येव सूत्रार्थः ॥ १० ॥

किमत्रान्यदसमञ्जसमित्यत आह—

185 उभयथाऽपि न कर्मातस्तदभावः । २ । २ । ११ ॥

परमाणुकारणवादे हि परमाणुगतकर्मजनिततत्संयोगपूर्वकद्व्यणुकादिक्रमेण जगदुत्पत्तिरिष्यते । तत्र निखिलजगदुत्पत्तिकारणभूतं परमाणुगतमाद्यं कर्मादृष्टकारितमित्यभ्युपगम्यते *अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि* इति । तदिदं परमाणुगतं कर्म स्वगतादृष्टकारितम्, आत्मगतादृष्टकारितं वा ? उभयथाऽपि न संभवति; क्षेत्रज्ञपुण्यपापानुष्ठानजनितस्यादृष्टस्य परमाणुगतत्वासंभवात् । संभवे च सदोत्पादकत्वप्रसङ्गः । आत्मगतस्य चादृष्टस्य परमाणुगतकर्मोत्पत्तिहेतुत्वं न संभवति । अथादृष्टवदात्मसंयोगादणुषु कर्मोत्पत्तिः, तदा तस्यादृष्टप्रवाहस्य नित्यत्वेन नित्यसर्गप्रसङ्गः ।

नन्वदृष्टं विपाकापेक्षं फलायालम् । कानिचिददृष्टानि तदानीमेव विपच्यन्ते, कानिचिज्जन्मान्तरे, कानिचित्कल्पान्तरे । अतो विपाकापेक्षत्वान्न सर्वदोत्पादकत्वप्रसङ्ग इति। नैतत्, अनन्तैरात्मभिरसङ्केतपूर्वकमयुगपदनुष्ठितानेकविधकर्मजनितानामदृष्टानामेकस्मिन्काले एकरूपविपाकस्याप्रामाणिकत्वात् । अत एव युगपत्सर्वसंहारो द्विपरार्धकालमविपाकेनावस्थानं च न सङ्गच्छते । नचेश्वरेच्छाहितविशेषादृष्टसंयोगादणुषु कर्म, आनुमानिकेश्वरासिद्धेः *शास्त्रयोनित्वादित्यत्रोपपादितत्वात् । अतो जगदुत्पत्तेरणुगतकर्मपूर्वकत्वाभावः ॥ ११ ॥

186 समवायाभ्युपगमाच्च साम्यादनवस्थितेः । २ । २ । १२ ॥

समवायाभ्युपगमाच्चासमञ्जसम् । कुतः ? साम्यादनवस्थितेः—समवायस्याप्यवयविजातिगुणवदुपपादकान्तरापेक्षासाम्यादुपपादकान्तरस्यापि तथेत्यनवस्थितेरसमञ्जसमेव । एतदुक्तं भवति—अयुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुर्यस्संबन्धः, स समवाय इति समवायोऽभ्युपगम्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अपृथक्स्थित्युपलब्धीनां जात्यादीनां तथाभावस्य निर्वाहकत्वेन चेत्समवायोऽभ्युपगम्यते, समवायस्यापि तत्साम्यात्तथाभावहेतुरन्वेषणीयः, तस्यापि तथेत्यनवस्थितिः। समवायस्य तदपृथक्सिद्धत्वं स्वभाव इति परिकल्प्यते चेत्, जातिगुणानामेवैष स्वभावः परिकल्पनीयः, न पुनरदृष्टचरं समवायमभ्युपगम्य तस्यैष स्वभाव इति कल्पयितुं युक्तमिति ॥ १२ ॥

समवायस्य नित्यत्वे अनित्यत्वे चायं दोषस्समानः; नित्यत्वे दोषान्तरं चाह—

187 नित्यमेव च भावात्। २। २। १३ ॥

समवायस्य संबन्धत्वात्संबन्धस्य नित्यत्वे संबन्धिनो जगतश्च नित्यमेव भावादसमञ्जसम्॥१३॥

188 रूपादिमत्त्वाच्च विपर्ययो दर्शनात्। २। २। १४ ॥

परमाणूनां पार्थिवाप्यतैजसवायवीयानां चतुर्विधानां रूपरसगन्धस्पर्शवत्त्वाभ्युपगमादभिमतनित्यत्वसूक्ष्मत्वनिरवयवत्वादिविपर्ययेणानित्यत्वस्थूलत्वसावयवत्वादि प्रसज्यते, रूपादिमतां घटादीनामनित्यत्वतथाविधकारणान्तरारब्धत्वादिदर्शनात्। नहि दर्शनानुगुण्येनादृष्टोऽर्थः कल्प्यमानः स्वाभिमतविशेषे व्यवस्थापयितुं शक्यः। दर्शनानुगुण्येन हि परमाणूनां रूपादिमत्त्वं त्वया कल्प्यते। अतोऽप्यसमञ्जसम् ॥ १४ ॥

अथैतद्दोषपरिजिहीर्षया परमाणूनां रूपादिमत्त्वं नाभ्युपगम्यते, तत्राह—

189 उभयथा च दोषात्। २। २। १५ ॥

न केवलं परमाणूनां रूपादिमत्त्वाभ्युपगम एव दोषः, रूपादिविरहेऽपि कारणगुणपूर्वकत्वात्कार्यगुणानां पृथिव्वादयो रूपादिशून्यास्स्युः। तत्परिजिहीर्षया रूपादिमत्त्वाभ्युपगमे पूर्वोक्तदोष इत्युभयथा च दोषादसमञ्जसम् ॥ १५ ॥

190 अपरिग्रहाच्चात्यन्तमनपेक्षा। २। २। १६ ॥

कापिलपक्षस्य श्रुतिन्यायविरोधपरित्यक्तस्यापि सत्कार्यवादादिना क्वचिदंशे वैदिकैः परिग्रहोऽस्ति, अस्य तु काणादपक्षस्य केनाप्यंशेनापरिग्रहादनुपपन्नत्वाच्चात्यन्तमनपेक्षैव निःश्रेयसार्थिभिः कार्या ॥ १६ ॥ इति महद्दीर्घाधिकरणम् ॥ २ ॥

अथ समुदायाधिकरणम् ॥ ३ ॥

191 समुदाय उभयहेतुकेऽपि तदप्राप्तिः। २। २। १७ ॥

परमाणुकारणवादिनो वैशेषिका निरस्ताः; सौगताश्च जगतः परमाणुकारणत्वमभ्युपगच्छन्तीत्यनन्तरं तन्मतेऽपि जगदुत्पत्तितद्व्यवहारादिकं नोपपद्यत इत्युच्यते। ते चतुर्विधाः—केचि-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्पार्थिवाप्यतैजसवायवीयपरमाणुसङ्घातरूपान् भूतभौतिकान् बाह्यांश्चित्तचैत्तरूपांश्चाभ्यन्तरानर्थान् प्रत्यक्षानुमानसिद्धानभ्युपयन्ति; अन्ये तु बाह्यार्थान् सर्वान् पृथिव्यादीन्विज्ञानानुमेयान्वदन्ति; अपरे त्वर्थशून्यं विज्ञानमेव परमार्थसत्, बाह्यार्थस्तु स्वाप्नार्थकल्पा इत्याहुः; त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते, उक्तभूतभौतिकचित्तचैत्तव्यतिरिक्तमात्माकाशादिकं स्वरूपेणैव नानुमन्वते; अन्ये तु सर्वशून्यत्वमेव सङ्गिरन्ते।

तत्र ये बाह्यार्थास्तित्ववादिनः, ते तावन्निरस्यन्ते। ते चैवं मन्यन्ते—रूपरसस्पर्शगन्धस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावाश्चाप्याः, रूपस्पर्शस्वभावाश्च तैजसाः,स्पर्शस्वभावाश्च वायवीयाः पृथिव्यप्तेजोवायुरूपेण संहन्यन्ते, तेभ्यश्च पृथिव्यादिभ्यः शरीरेन्द्रियविषयरूपसङ्घाता भवन्ति; तत्र च शरीरान्तर्वर्ती ग्राहकाभिमानारूढो विज्ञानसन्तान एवात्मत्वेनावतिष्ठते; तत एव सर्वो लौकिको व्यवहारः प्रवर्तत इति ॥

तत्राभिधीयते—समुदाय उभयहेतुकेऽपि तदप्राप्तिः। योऽयमणुहेतुकः पृथिव्यादिभूतात्मकस्समुदायः, यश्च पृथिव्यादिहेतुकश्शरीरेन्द्रियविषयरूपस्समुदायः, तस्मिन्नुभयहेतुकेऽपि समुदाये तत्प्राप्तिर्नोपपद्यते—जगदात्मकसमुदायोत्पत्तिर्नोपपद्यत इत्यर्थः। परमाणूनां पृथिव्यादिभूतानां च क्षणिकत्वाभ्युपगमात्, क्षणध्वंसिनः परमाणवो भूतानि च कदा संहतौ व्याप्रियन्ते? कदा वा संहन्यन्ते? कदा विज्ञानविषयभूताः? कदा च हानोपादानादिव्यवहारास्पदतां भजन्ते? को वा विज्ञानात्मा कं च विषयं स्पृशति? कश्च विज्ञानात्मा कमर्थं कदा वेदयते? कं वा विदितमर्थं कश्च कदोपादत्ते? स्प्रष्टा हि नष्टः, स्पृष्टश्च नष्टः; तथा वेदिता विदितश्च नष्टः; कथं चान्येन स्पृष्टमन्यो वेदयते? कथंचान्येन विदितमर्थमन्य उपादत्ते? सन्तानानामेकत्वेऽपि सन्तानिभ्यस्तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमान्न तन्निबन्धनं व्यवहारादिकमुपपद्यते। अहमर्थ एवात्मा, सच ज्ञातैवेति चोपपादितं पुरस्तात् ॥१७॥

192 इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्।२।२।१८॥

अविद्यादीनामितरेतरहेतुत्वेनोपपन्नं सङ्घातभावादिकमिति चेत्। एतदुक्तं भवति—यद्यपि क्षणिकास्सर्वे भावाः, तथाऽप्यविद्ययैतत्सर्वमुपपद्यते। अविद्या हि नाम विपरीतबुद्धिः क्षणिकादिषु स्थिरत्वादिगोचरा। तया संस्काराख्या रागद्वेषादयो जायन्ते; ततश्चित्ताभिज्वलनरूपं विज्ञानम्; ततश्च नामाख्याश्चित्तचैत्ताः; ततश्च पृथिव्यादिकं [च] रूपिद्रव्यम्; ततष्षडायतनाख्यमिन्द्रियषट्कम्; ततः स्पर्शाख्यः कायः; ततो वेदनादयः; ततश्च पुनरप्यविद्यादयो यथोक्ता इत्यनादिरियमविद्यादिकाऽन्योन्यमूला चक्रपरिवृत्तिः। एतच्च सर्वं पृथिव्यादिभूतभौतिकसङ्घातमन्तरेण नोपपद्यते। अतस्सङ्घातभावादिकमुपपन्नमिति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्रोत्तरं—न सङ्घातभावानिमित्तत्वादिति। नैतदुपपद्यते, एषामविद्यादीनां पृथिव्यादिभूतभौतिकसङ्घातभावं प्रत्यनिमित्तत्वात्। न खल्वस्थिरादिषु स्थिरत्वादिबुद्ध्यात्मिकाऽविद्या तन्निमित्ता रागद्वेषादयो वाऽर्थान्तरस्य क्षणिकस्य संहतिहेतुतां प्रतिपद्यन्ते। शुक्तिकारजतादिबुद्धिर्हि न शुक्त्याद्यर्थसंहतिहेतुर्भवति। किंच यस्य क्षणिके स्थिरत्वबुद्धिः, स तदैव नष्ट इति कस्य रागादय उत्पद्यन्ते? संस्काराश्रयं स्थिरमेकं द्रव्यमनभ्युपगच्छतां संस्कारानुवृत्तिरपि न शक्या कल्पयितुम्॥ १८॥

193 उत्तरोत्पादे च पूर्वनिरोधात्। २। २। १९॥

इतश्च क्षणिकत्वपक्षे जगदुत्पत्तिर्नोपपद्यते; उत्तरक्षणोत्पत्तिवेलायां पूर्वक्षणस्य विनष्टत्वात्, तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः। अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत; अथ पूर्वक्षणवर्तित्वमेव हेतुत्वमित्युच्यते, एवं तर्हि कश्चिदेव घटक्षणस्तदुत्तरकालभाविनां सर्वेषामेव गोमहिषाश्वकुड्यपाषाणादीनां त्रैलोक्यवर्तिनां हेतुस्स्यात्। अथैकजातीयस्यैव पूर्वक्षणवर्तिनो हेतुत्वमिष्यते, तथाऽपि सर्वदेशवर्तिनामुत्तरक्षणभाविनां घटानामेक एव पूर्वक्षणवर्तिघटो हेतुस्स्यात्। अथैकस्यैव हेतुरेक इति मनुषे, तथाऽपि कस्यैकस्य को हेतुरिति न ज्ञायते। अथ यस्मिन् देशे यो घटक्षणः स्थितः, तद्देशसंबन्धिन एवोत्तरघटक्षणस्य स हेतुरिति, किं देशस्य स्थिरत्वं मनुषे? किञ्च चक्षुरादिसंप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेऽनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं संभवति॥ १९॥

194 असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा। २। २। २०॥

असत्यपि हेतौ कार्यमुत्पद्यते चेत्; सर्वं सर्वत्र सर्वदोत्पद्येतेत्युक्तम्। न केवलमुत्पत्तिविरोध एव; प्रतिज्ञा च भवतामुपरुध्येत, अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ हेतव इति वः प्रतिज्ञा; अधिपतिः इन्द्रियम्। अथ प्रतिज्ञानुपरोधाय घटक्षणे स्थित एव घटक्षणान्तरोत्पत्तिरिष्यते, तथा च सति द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्येनोपलब्धिः प्रसज्येत, नच तथोपलभ्यते; क्षणिकत्वप्रतिज्ञा चैवं हीयेत। क्षणिकत्वं स्थितमेवेति चेत्, इन्द्रियसंप्रयोगज्ञानयोर्यौगपद्यं प्रसज्येत॥ २०॥

195 प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। २। २। २१॥

एवं तावदसत उत्पत्तिर्निरस्ता; सतो निरन्वयविनाशोऽपि नोपपद्यत इत्युच्यते। क्षणिकत्ववादिभिर्मुद्गराभिघाताद्यनन्तरभावितयोपलब्धियोग्यस्सदृशसन्तानावसानरूपः स्थूलो यः, सदृशसन्ताने प्रतिक्षणभावी चोपलब्ध्यनर्हस्सूक्ष्मश्च यो निरन्वयो विनाशः प्रतिसङ्ख्यानिरोधाप्रतिसङ्ख्यानिरोधशब्दाभ्यामभिधीयेते, तौ न संभवत इत्यर्थः। कुतः? अविच्छेदात्—सतो निरन्वयविच्छेदासंभवात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

असंभवश्च, सत उत्पत्तिविनाशौ नामावस्थान्तरापत्तिरेव; अवस्थायोगि तु द्रव्यमेकमेव स्थिरमिति कारणादनन्यत्वं कार्यस्योपपादयद्भिरस्माभिः *तदनन्यत्वमित्यत्र प्रतिपादितः। निर्वाणस्य दीपस्य निरन्वयविनाशदर्शनादन्यत्रापि विनाशो निरन्वयोऽनुमीयत इति चेन्न, घटशरावादौ मृदादिद्रव्यानुवृत्त्युपलब्ध्या सतो द्रव्यस्यावस्थान्तरापत्तिरेव विनाश इति निश्चिते सति प्रदीपादौ सूक्ष्मदशापत्त्याऽप्यनुपलम्भोपपत्तेः तत्राप्यवस्थान्तरापत्तिकल्पनस्यैव युक्तत्वात् ॥ २१ ॥

196 उभयथा च दोषात् । २ । २ । २२ ॥

क्षणिकत्ववादिभिरभ्युपेता तुच्छादुत्पत्तिः उत्पन्नस्य तुच्छतापत्तिश्च न संभवतीत्युक्तम्; तदुभयप्रकाराभ्युपगतौ दोषश्च भवति। तुच्छादुत्पत्तौ तुच्छात्मकमेव कार्यं स्यात्; यद्धि यस्मादुत्पद्यते, तत्तदात्मकं दृष्टम्; यथा मृत्सुवर्णादेरुत्पन्नं मणिकमकुटादि मृत्सुवर्णाद्यात्मकं दृष्टम्; नच जगत्तुच्छात्मकं भवद्भिरभ्युपगम्यते; नच प्रतीयते। सतो निरन्वयविनाशे सत्येकक्षणादूर्ध्वं कृत्स्नस्य जगतस्तुच्छतापत्तिरेव स्यात्; पश्चात्तुच्छाज्जगदुत्पत्तौ अनन्तरोक्त तुच्छात्मकत्वमेव स्यात्। अत उभयथाऽपि दोषान्न भवदुक्तप्रकारावुत्पत्तिनिरोधौ ॥ २२ ॥

197 आकाशे चाविशेषात् । २ । २ । २३ ॥

बाह्याभ्यन्तरवस्तुनः स्थिरत्वप्रतिपादनाय प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधयोस्तुच्छरूपता निराकृता। तत्प्रसङ्गेन ताभ्यां सह तुच्छत्वेन सौगतैः परिगणितस्याकाशस्यापि तुच्छता प्रतिक्षिप्यते। आकाशे च निरुपाख्यता न युक्ता, भावरूपत्वेनाभ्युपगतपृथिव्यादिवदाकाशस्यापि अबाधितप्रतीतिसिद्धत्वाविशेषात्। प्रतीयते ह्याकाशः, अत्र श्येनः पतति, अत्र गृध्र इति श्येनादिपतनदेशत्वेन। नच पृथिव्याद्यभावमात्रमाकाश इति वक्तुं शक्यम्, विकल्पासहत्वात्। पृथिव्यादेः प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावो वा आकाशः? सर्वथाऽप्याकाशप्रतीत्यनुपपत्तिस्स्यात्। प्रागभावप्रध्वंसाभावयोराकाशत्वे पृथिव्यादिषु वर्तमानेषु आकाशप्रतीत्ययोगात् निराकाशं जगत्स्यात्। इतरेतराभावस्याकाशत्वेऽपि इतरेतराभावस्य तत्तद्वस्तुगतत्वेन तेषामन्तराले आकाशप्रतीतिर्न स्यात्। अत्यन्ताभावस्तु पृथिव्यादीनां न संभवति। अभावस्य विद्यमानपदार्थावस्थाविशेषत्वोपपादनाच्चाकाशस्याभावरूपत्वेऽपि न निरुपाख्यत्वम्। अण्डान्तर्वर्तिन आकाशस्य त्रिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वेऽप्यविरोधः ॥ २३ ॥

198 अनुस्मृतेश्च । २ । २ । २४ ॥

पूर्वप्रस्तुतं वस्तुनः स्थिरत्वमेवोपपाद्यते। अनुस्मरणं—पूर्वानुभूतवस्तुविषयं ज्ञानम्, प्रत्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

भिज्ञानमित्यर्थः। तदेवेदमिति सर्वं वस्तुजातमतीतकालानुभूतं प्रत्यभिज्ञायते। नच भवद्भिर्ज्वालादिष्विव सादृश्यनिबन्धनोऽयमेकत्वव्यामोह इति वक्तुं शक्यम्; व्यामुह्यतो ज्ञातुरेकस्यानभ्युपगमात्। न ह्यन्यानुभूतेनैकत्वं सादृश्यं वा स्वानुभूतस्यान्योऽनुसन्धत्ते। अतो भिन्नकालवस्त्वाश्रयसादृश्यानुभवनिबन्धनमेकत्वव्यामोहं वदद्भिर्ज्ञातुरेकत्वमवश्याश्रयणीयम्। नच ज्ञेयेष्वपि घटादिषु ज्वालादिष्विव भेदसाधनप्रमाणमुपलभामहे, येन सादृश्यनिबन्धनां प्रत्यभिज्ञां कल्पयेम।

यदपि चेदमुच्यते प्रत्यक्षानुमानाभ्यां घटादेः क्षणिकत्वं सिध्यति। प्रत्यक्षं तावद्वर्तमानार्थविषयमवर्तमानाद्वस्तुनो व्यावृत्तं स्वविषयमवगमयति, नीलमिव पीतात्। एवं च भूतभविष्यद्भ्यः वर्तमानस्य वस्त्वन्तरत्वमवगतं भवति। अनुमानमपि—अर्थक्रियाकारित्वात् सत्त्वाच्च घटादिः क्षणिकः, यदक्षणिकं शशविषाणादि, तदनर्थक्रियाकार्यसच्च। तथा अन्त्यघटक्षणसत्त्वात्पूर्वघटक्षणसत्त्वानि विनाशीनि, घटक्षणसत्त्वात्, अन्त्यघटक्षणसत्त्ववदिति। तच्च कार्यकारणभावानुपपत्त्यादिभिः पूर्वमेव निरस्तम्। किञ्च प्रत्यक्षगम्या वर्तमानस्यावर्तमानाद्व्यावृत्तिर्न वर्तमानस्य वस्त्वन्तरत्वमवगमयति; अपितु वर्तमानकालयोगितामात्रम्। नच तावता वस्त्वन्तरत्वं सिध्यति, तस्यैव कालान्तरयोगसंभवात्।

यत्तु सत्त्वादर्थक्रियाकारित्वाच्चेति क्षणिकत्वे हेतुद्वयमुक्तम्, तदभिमतविपरीतसाधनत्वाद्विरुद्धम्। सत्त्वादर्थक्रियाकारित्वाद्वा घटादि स्थास्नु, यदस्थास्नु तदसदनर्थक्रियाकारि च, यथा शशविषाणमित्यपि हि वक्तुं शक्यम्। किञ्च अर्थक्रियाकारित्वमक्षणिकत्वमेव साधयेत्। क्षणध्वंसिनो हि व्यापारासंभवादर्थक्रियाकारित्वं न संभवतीत्युक्तम्। तथाऽन्त्यघटक्षणस्य हेतुतो नाशदर्शनादितरेऽपि घटक्षणा हेत्वपेक्षविनाशास्स्युरित्यामुद्गरादिहेतूपनिपातात् स्थास्नुत्वमेव। नच वाच्यं न मुद्गरादयो विनाशहेतवः, अपितु कपालादिविसदृशसन्तानोत्पत्तिहेतव इति; कपालत्वावांस्थापत्तिरेव घटादीनां विनाश इत्युपपादितत्वात्। कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेऽपि विनाशस्य विनाशहेतुत्वमेव मुद्गरादेरानन्तर्याद्युक्तम्।

अतः प्रत्यभिज्ञया स्थिरत्वमवगम्यमानं न केनापि प्रकारेणापह्नोतुं शक्यम्। पूर्वापरकालसंबन्धस्यैक्यविषयायाः प्रत्यभिज्ञाया अन्यविषयत्वं ब्रुवन्नीलादिज्ञानानामपि नीलादेरर्थान्तरविषयत्वं ब्रूयात्। किञ्च प्रमातृप्रमेययोः क्षणिकत्वं वदद्भिर्व्याप्त्यवधारणतत्स्मरणपूर्वकानुमानाभ्युपगमोऽपि दुश्शकः। तथा इदं क्षणिकमित्यादिप्रतिज्ञापूर्वकहेतूपन्यासादिक्रमपि नोपपद्यते भवताम्, प्रतिज्ञोपक्रमक्षण एव वक्तुर्विनष्टत्वात्; न ह्यन्येनोपक्रान्तमजानद्भिरन्यैस्समापयितुं शक्यम्॥ २४॥

199 नासतोऽदृष्टत्वात्। २। २। २५॥

एवं तावद्वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्ववादिनोस्साधारणानि दूषणान्युक्तानि। तत्र यदुक्तं संप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेऽनवस्थिततत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं संभवतीति;

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र सौत्रान्तिकः प्रत्यवतिष्ठते— न ज्ञानकालेऽनवस्थानमर्थस्य ज्ञानाविषयत्वहेतुः; ज्ञानोत्पत्तिहेतुत्वमेव हि ज्ञानविषयत्वम् । नचैतावता चक्षुरादेः ज्ञानविषयत्वप्रसङ्गः, स्वाकारसमर्पणेन ज्ञानहेतोरेव ज्ञानविषयत्वाभ्युपगमात् । ज्ञाने स्वाकारं समर्प्य विनष्टोऽप्यर्थो ज्ञानगतेन नीलाद्याकारेणानुमीयते । नच पूर्वपूर्वज्ञानेनोत्तरोत्तरज्ञानाकारसिद्धिः, नीलज्ञानसन्ततौ पीतज्ञानानुत्पत्तिप्रसङ्गात् । अतोऽर्थकृतमेव ज्ञानवैचित्र्यमिति । अत्रोच्यते—नासतोऽदृष्टत्वादिति । योऽयं ज्ञाने नीलादिराकार उपलभ्यते, स विनष्टस्यासतोऽर्थस्याकारो भवितुं नार्हति । कुतः ? अदृष्टत्वात्—न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे संक्रमणं दृष्टम् । प्रतिबिम्बादिकमपि स्थिरस्यैव भवति । तत्रापि न धर्ममात्रस्य । अतोऽर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमर्थस्य ज्ञानकालेऽवस्थानादेव भवति ॥ २५ ॥

पुनरपि साधारणं दूषणमाह—

200 उदासीनानामपि चैवं सिद्धिः । २ । २ । २६ ॥

एवं क्षणिकत्वासदुत्पत्त्यहेतुकविनाशाद्यभ्युपगमे उदासीनानाम्—अनुद्युञ्जानानामपि सर्वार्थसिद्धिः स्यात् । इष्टप्राप्तिरनिष्टनिवृत्तिर्वा प्रयत्नादिभिस्साध्यते । क्षणध्वंसे हि सर्वेषां भावानां पूर्वपूर्वं वस्तु तद्गतो वा विशेषः संस्कारादिको विद्यादिर्वा उत्तरत्र न कश्चिदनुवर्तत इति प्रयत्नादिसाध्यं न किञ्चिदस्ति । एवं सत्यहेतुसाध्यत्वात्सर्वसिद्धीनामुदासीनानामप्यैहिकामुष्मिकफलं मोक्षश्च सिद्ध्येत् ॥ २६ ॥ इति समुदायाधिकरणम् ॥ ३ ॥

अथ उपलब्ध्यधिकरणम् ॥ ४ ॥

201 नाभाव उपलब्धेः । २ । २ । २७ ॥

विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते—यदुक्तमर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमिति; तन्नोपपद्यते, अर्थवत् ज्ञानानामेव साकाराणां स्वयमेव विचित्रत्वात् । तच्च स्वरूपवैचित्र्यं वासनावशादेवोपपद्यते । वासना च विलक्षणप्रत्ययप्रवाह एव । यद्धटाकारज्ञानं कपालाकारज्ञानस्योत्पादकम्, तस्य तथाविधस्योत्पादकं तत्पूर्वघटज्ञानम्; तस्य च तथाविधस्योत्पादकं ततःपूर्वघटज्ञानम् इत्येवंरूपः प्रवाह एव वासनेत्युच्यते । कथं बहिष्ठसर्षपमहीधरादेराकार आन्तरस्य ज्ञानस्येत्युच्यते ? इत्थम्—अर्थस्यापि व्यवहारयोग्यत्वं ज्ञानप्रकाशायत्तम्, अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात् । प्रकाशमानस्य च ज्ञानस्य साकारत्वमवश्याश्रयणीयम्, निराकारस्य प्रकाशायोगात् । एकश्चायमाकार उपलभ्यमानो ज्ञानस्यैव । तस्य च बहिर्वदवभासोऽपि भ्रमकृतः । ज्ञानार्थयोस्सहोपलम्भनियमाच्च ज्ञानादव्यतिरिक्तोऽर्थः । किञ्च बाह्यमर्थमभ्युपयद्भिरपि घटपटादिविज्ञानेषु ज्ञानस्य तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेण नोपपद्यत इत्यवश्यं ज्ञानेऽर्थसरूपं रूपमास्थेयम् । तावतैव सर्वव्यवहारोपपत्तेः तद्व्यतिरिक्तार्थकल्पना निष्प्रामाणिका । अतो विज्ञानमात्रमेव तत्त्वम्, न बाह्यार्थोऽस्तीति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्राप्ते प्रचक्ष्महे—नाभाव उपलब्धेरिति। ज्ञानातिरिक्तस्यार्थस्याभावो वक्तुं न शक्यते; कुतः? उपलब्धेः—ज्ञातुरात्मनोऽर्थविशेषव्यवहारयोग्यतापादनरूपेण ज्ञानस्योपलब्धेः। एवमेव हि सर्वे लौकिकाः प्रतियन्ति घटमहं जानामीति। एवंरूपेण सकर्मकण सकर्तृकेन ज्ञाधात्वर्थेन सर्वलोकसाक्षिकमपरोक्षमवभासमानेनैव ज्ञानमात्रमेव परमार्थ इति साधयन्तस्सर्वलोकोपहासोपकरणं भवन्तीति वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम्। यत्तु *सहोपलम्भनियमादभेदो नीलतद्धियोरिति, तत् स्ववचनविरुद्धम्, साहित्यस्यार्थभेदहेतुकत्वात्। तदर्थव्यवहारयोग्यतैकस्वरूपस्य ज्ञानस्य तेन सहोपलम्भनियमस्तस्मादवैलक्षण्यसाधनमिति च हास्यम्। निरन्वयविनाशिनां ज्ञानानामनुवर्तमानस्थिराकारविरहाद्वासना च दुरुपपादा। विनष्टेन पूर्वज्ञानेनानुत्पन्नमुत्तरज्ञानं कथं वास्यते? अतो ज्ञानवैचित्र्यमप्यर्थवैचित्र्यकृतमेव। तत्तदर्थव्यवहारयोग्यतापादनरूपतया साक्षात्प्रतीयमानस्य ज्ञानस्य तत्तदर्थसंबन्धायत्तं तत्तदसाधारण्यम्। संबन्धश्च संयोगलक्षणः। ज्ञानमपि हि द्रव्यमेव। प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धमित्युक्तम्। अतो न बाह्यार्थाभावः ॥ २७ ॥

यत्परैः स्वप्नज्ञानदृष्टान्तेन जागरितज्ञानानामपि निरालम्बनत्वमुक्तम्; तत्राह—

202 वैधर्म्याच्च न स्वप्नादिवत् । २ । २ । २८ ॥

स्वप्नज्ञानवैधर्म्याज्जागरितज्ञानानामर्थशून्यत्वं न युज्यते वक्तुम्। स्वप्नज्ञानानि हि निद्रादिदोषदुष्टकरणजन्यानि, बाधितानि च; जागरितज्ञानानि तु तद्विपरीतानीति तेषां न तत्साम्यम्। सर्वेषां च ज्ञानानामर्थशून्यत्वे भवद्भिस्साध्योऽप्यर्थो न सिध्यति, निरालम्बनानुमानस्याप्यर्थशून्यत्वात्। तस्यार्थवत्त्वे ज्ञानत्वस्यानैकान्त्यात् सुतरामर्थशून्यत्वासिद्धिः ॥ २८ ॥

203 न भावोऽनुपलब्धेः । २ । २ । २९ ॥

न केवलस्यार्थशून्यस्य ज्ञानस्य भावस्संभवति; कुतः? क्वचिदप्यनुपलब्धेः। न ह्यकर्तृकस्याकर्मकस्य वा ज्ञानस्य क्वचिदुपलब्धिः। स्वप्नज्ञानादिष्वपि नार्थशून्यत्वमिति ख्यातिनिरूपणे प्रतिपादितम् ॥ २९ ॥ इति उपलब्ध्यधिकरणम् ॥ ४ ॥

अथ सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

204 सर्वथाऽनुपपत्तेश्च । २ । २ । ३० ॥

अत्र सर्वशून्यवादी माध्यमिकः प्रत्यवतिष्ठते। शून्यवाद एव हि सुगतमतकाष्ठा। शिष्यबुद्धियोग्यतानुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः। विज्ञानं बाह्यार्थाश्च सर्वे न सन्ति,

Digitization by Arya Samaj Charitable Foundation, Chennai

शून्यमेव तत्त्वम्; अभावापत्तिरेव च मोक्ष इत्येव बुद्धस्याभिप्रायः। तदेव हि युक्तम्, शून्यस्याहेतुसाध्यतया स्वतस्सिद्धेः। सत एव हि हेतुरन्वेषणीयः। तच्च सत् भावादभावाच्च नोत्पद्यते; भावात्तावन्न कस्यचिदुत्पत्तिर्दृष्टा; न हि घटादिरनुपमृदिते पिण्डादिके जायते। नाप्यभावादुत्पत्तिस्संभवति, नष्टे पिण्डादिके ह्यभावादुत्पद्यमानं घटादिकमभावात्मकमेव स्यात्। तथा स्वतः परतश्चोत्पत्तिर्न संभवति। स्वतः स्वोत्पत्तावात्माश्रयदोषप्रसङ्गात्, प्रयोजनाभावाच्च। परतः परोत्पत्तौ परत्वाविशेषात् सर्वेषां सर्वेभ्य उत्पत्तिप्रसङ्गः। जन्माभावादेव विनाशस्याप्यभावः। अतः शून्यमेव तत्त्वम्। अतो जन्मविनाशसदसदादयो भ्रान्तिमात्रम्। न च निरधिष्ठानभ्रमासंभवाद्भ्रमाधिष्ठानं किञ्चित्पारमार्थिकं तत्त्वमाश्रयितव्यम्, दोषदोषाश्रयत्वज्ञातृत्वाद्यपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः। अतः शून्यमेव तत्त्वम् ॥

इति प्राप्त उच्यते—सर्वथाऽनुपपत्तेश्चेति। सर्वथाऽनुपपत्तेस्सर्वशून्यत्वं च भवदभिप्रेतं न संभवति। किं भवान् सर्वं सदिति वा प्रतिजानीते, असदिति वा, अन्यथा वा? सर्वथा तवाभिप्रेतं तुच्छत्वं न संभवति; लोके भावाभावशब्दयोस्तत्प्रतीत्योश्च विद्यमानस्यैव वस्तुनोऽवस्थाविशेषगोचरत्वस्य प्रतिपादितत्वात्। अतस्सर्वं शून्यमिति प्रतिजानता सर्वं सदिति प्रतिजानतेव सर्वस्य विद्यमानस्यावस्थाविशेषयोगितैव प्रतिज्ञाता भवतीति भवदभिमता तुच्छता न कुतश्चिदपि सिध्यति। किञ्च कुतश्चित्प्रमाणाच्छून्यत्वमुपलभ्य शून्यत्वं सिषाधयिषता तस्य प्रमाणस्य सत्यत्वमभ्युपेत्यम्; तस्यासत्यत्वे सर्वं सत्यं स्यादिति सर्वथा सर्वशून्यत्वं चानुपपन्नम् ॥३०॥ इति सर्वथानुपपत्त्यधिकरणम् ॥५॥

अथ एकस्मिन्नसंभवाधिकरणम् ॥ ६ ॥

205 नैकस्मिन्नसंभवात् । २ । २ । ३१ ॥

निरस्तास्सौगताः। जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षः प्रतिक्षिप्यते। ते किल मन्यन्ते—जीवाजीवात्मकं जगदेतन्निरीश्वरम्; तच्च षड्द्रव्यात्मकम्। तानि च द्रव्याणि जीवधर्माधर्मपुद्गलकालाकाशाख्यानि। तत्र जीवाः—बद्धाः, योगसिद्धाः, मुक्ताश्चेति त्रिविधाः। धर्मो नाम गतिमतां गतिहेतुभूतो द्रव्यविशेषो जगद्व्यापी। अधर्मश्च स्थितिहेतुभूतो व्यापी। पुद्गलो नाम वर्णगन्धरसस्पर्शवद्द्रव्यम्। तच्च द्विविधम्—परमाणुरूपं, तत्सङ्घातरूपं च पवनज्वलनसलिलधरणीतनुभुवनादिकम्। कालस्तु अभूदस्ति भविष्यतीति व्यवहारहेतुरणुरूपो द्रव्यविशेषः। आकाशोऽप्येकोऽनन्तप्रदेशश्च। तेषु चाणुव्यतिरिक्तद्रव्याणि पञ्च अस्तिकाया इति च संगृह्यन्ते—जीवास्तिकायः; धर्मास्तिकायः, अधर्मास्तिकायः, पुद्गलास्तिकायः, आकाशास्तिकायः इति। अनेकदेशवर्तिनि द्रव्येऽस्तिकायशब्दः प्रयुज्यते ॥

जीवानां मोक्षोपयोगिनमपरमपि संग्रहं कुर्वन्ति—जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः इति। मोक्षसङ्ग्रहेण मोक्षोपायश्च गृहीतः। स च सम्यग्ज्ञानदर्शनचारित्ररूपः। तत्र जीवस्तु ज्ञान-

Digitization by Arya Samaj Charitable Foundation, Chennai

दर्शनसुखवीर्यगुणः। अजीवश्च जीवभोग्यवस्तुजातम्। आस्रवः तद्भोगोपकरणभूतमिन्द्रियादिकम्। बन्धश्चाष्टविधः——घातिकर्मचतुष्टयमघातिकर्मचतुष्टयं चेति। तत्राद्यं जीवगुणानां स्वाभाविकानां ज्ञानदर्शनवीर्यसुखानां प्रतिघातकरम्। अपरं शरीरसंस्थानतदभिमानतत्स्थितितत्प्रयुक्तसुखदुःखोपेक्षाहेतुभूतम्। निर्जरं मोक्षसाधनमर्हदुपदेशावगतं तपः। संवरो नामेन्द्रियनिरोधः समाधिरूपः। मोक्षस्तु निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः। पृथिव्यादिहेतुभूताश्चाणवो वैशेषिकादीनामिव न चतुर्विधाः। अपित्वेकस्वभावाः। पृथिव्यादिभेदस्तु परिणामकृतः। सर्वं च वस्तुजातं सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्ति——स्यादस्ति, स्यान्नास्ति, स्यादस्तिच नास्तिच, स्यादवक्तव्यम्, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यंच, स्यादस्तिच नास्ति चावक्तव्यं चेति सर्वत्र सप्तभङ्गीनयावतारात्। सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वाद्युपपादयन्ति; पर्यायात्मना च तद्विपरीतम्। पर्यायाश्च द्रव्यस्यावस्थाविशेषाः। तेषां च भावाभावरूपत्वात्सत्त्वासत्त्वादिकं सर्वमुपपन्नमिति ॥

अत्राभिधीयते——नैकस्मिन्नसंभवादिति। नैतदुपपद्यते; कुतः? एकस्मिन्नसंभवात्——एकस्मिन्वस्तुनि अस्तित्वनास्तित्वादेर्विरुद्धस्य च्छायातपवद्युगपदसंभवात्। एतदुक्तं भवति——द्रव्यस्य तद्विशेषणभूतपर्यायशब्दाभिधेयावस्थाविशेषस्य च पृथक्पदार्थत्वान्नैकस्मिन्विरुद्धधर्मसमावेशस्संभवतीति। तथा हि——एकेनास्तित्वादिनाऽवस्थाविशेषेण विशिष्टस्य तदानीमेव न तद्विपरीत नास्तित्वादिविशिष्टत्वं संभवति। उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वम्, तद्विपरीतं च नित्यत्वं तस्मिन् कथं समवैति? विरोधिधर्माश्रयत्वं च भिन्नत्वम्, तद्विपरीतं चाभिन्नत्वं कथं वा तस्मिन् समवैति? यथाऽश्वत्वमहिषत्वयोर्युगपदेकस्मिन्नसंभवः। अयमर्थः पूर्वमेव भेदाभेदवादिनिरसनसमये *तत्तु समन्वयादित्यत्र प्रपञ्चितः। कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्याः; न च परिहर्तव्याः। कालोऽस्ति नास्तीति व्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः। जात्यादयो हि द्रव्यविशेषणतयैव प्रतीयन्त इति पूर्वमेवोक्तम्। कथं पुनरेकमेव ब्रह्म सर्वात्मकमिति श्रोत्रियैरुच्यते? सर्वचेतनाचेतनशरीरत्वात्सर्वज्ञस्य सर्वशक्तेस्सत्यसङ्कल्पस्य पुरुषोत्तमस्येत्युक्तम्। शरीरशरीरिणोस्तद्धर्माणाश्चात्यन्तवैलक्षण्यमप्युक्तम् किञ्च जीवादीनां षण्णां द्रव्याणामेकद्रव्यपर्यायत्वाभावात्तेषु द्रव्यैकत्वेन पर्यायात्मना चैकत्वानेकत्वादयो दुरुपपादाः। अथोच्येत——षडेतानि द्रव्याणि स्वकीयैः पर्यायैः स्वेनस्वेन चात्मना तथा भवन्तीति। एवमपि सर्वमनैकान्तिकमित्यभ्युपगमविरोधः, अन्योन्यतादात्म्याभावात्। अतो न युक्तमिदं जैनमतम्। ईश्वरानधिष्ठितपरमाणुकारणवादे पूर्वोक्तदोषास्तथैवावतिष्ठन्ते ॥ ३१ ॥

206 एवं चात्माकार्त्स्न्यम्। २। २। ३२ ॥

एवं भवदभ्युपगमे सति आत्मनश्चाकार्त्स्न्यं प्रसज्यते। जीवोऽसङ्ख्यातप्रदेशो देहपरिमाण इति हि भवतां स्थितिः। तत्र हस्त्यादिशरीरेऽवस्थितस्यात्मनस्ततो न्यूनपरिमाणे पिपीलिकादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

शरीरे प्रविशतोऽल्पदेशव्यापित्वेनाकार्त्स्न्यं प्रसज्यते—अपरिपूर्णता प्रसज्यत इत्यर्थः ॥ ३२ ॥

अथ सङ्कोचविकासधर्मतया आत्मनः पर्यायशब्दाभिधेयावस्थान्तरापत्त्या विरोधः परिह्रियत इत्युच्येत; तत्राह—

207 न च पर्यायादप्यविरोधो विकारादिभ्यः । २ । २ । ३३ ॥

न च सङ्कोचविकासरूपावस्थन्तरापत्त्या विरोधः परिहर्तुं शक्यते, विकारतत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेर्घटादितुल्यत्वप्रसङ्गात् ॥ ३३ ॥

208 अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः । २ । २ । ३४ ॥

जीवस्य यदन्त्यं परिमाणं मोक्षावस्थागतम्, तस्य पश्चाद्देहान्तरपरिग्रहाभावादवस्थितत्वादात्मनश्च मोक्षावस्थस्य तत्परिमाणस्य चोभयोर्नित्यत्वात्तदेव आत्मनः स्वाभाविकं परिमाणमिति पूर्वमपि तस्मादविशेषः स्यात् । अतो देहपरिमाणत्वमात्मनो न स्यादित्यसङ्गतमेवेदमार्हतमतम् । ॥ ३४ ॥ इति एकस्मिन्नसंभवाधिकरणम् ॥ ६ ॥

अथ पशुपत्याधिकरणम् ॥ ७ ॥

209 पत्युरसामञ्जस्यात् । २ । २ । ३५ ॥

कपिलकणादसुगतार्हतमतानामसामञ्जस्यात् वेदबाह्यत्वाच्च निश्श्रेयसार्थिभिरनादरणीयत्वमुक्तम्; इदानीं पशुपतिमतस्य वेदविरोधादसामञ्जस्याच्च अनादरणीयतोच्यते । तन्मतानुसारिणश्चतुर्विधाः—कापालाः कालामुखाः पाशुपताः शैवाश्चेति । सर्वे चैते वेदविरुद्धां तत्त्वप्रक्रियाम् ऐहिकामुष्मिकनिश्श्रेयससाधनकल्पनाश्च कल्पयन्ति । निमित्तोपादानयोर्भेदं, निमित्तकारणं च पशुपतिमाचक्षते । तथा निश्श्रेयससाधनमपि मुद्रिकाषट्कधारणादिकम् । यथाऽऽहुः कापालाः—*मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ॥ *कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः । भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥ आभिर्मुद्रितदेहस्तु न भूय इह जायते ॥ इत्यादिकम् । तथा कालामुखा अपि कपालपात्रभोजनशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवपूजादिकमैहिकामुष्मिकसकलफलसाधनमभिदधति । *रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके । कपालं भस्मना स्नानम्* इत्यादि च प्रसिद्धं शैवागमेषु । तथा केनचित्क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिमुत्तमाश्रमप्राप्तिं चाहुः—*दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् । कापालं व्रतमास्थाय यतिर्भवति मानवः ॥ इति ॥

तत्रेदमुच्यते—पत्युरसामञ्जस्यादिति । *नैकस्मिन्नसंभवादित्यतो नेत्यनुवर्तते । पत्युः—पशुपतेः, मतं नादरणीयम्; कुतः? असामञ्जस्यात् । असामञ्जस्यं च अन्योन्यव्याघातात् वेदविरो-

Digitization by Arya Samaj Charitable Foundation, Chennai

धाच्च । मुद्रिकाषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापनतत्स्थदेवतार्चनगूढाचारश्मशानभस्मस्नानप्रणवपूर्वाभिध्यानान्यन्योन्यविरुद्धानि । वेदविरुद्धं चेदं तत्त्वपरिकल्पनमुपासनमाचारश्च । वेदाः खलु परं ब्रह्म नारायणमेव जगन्निमित्तमुपादानं च वदन्ति—*नारायण परं ब्रह्म तत्त्वं नारायणः परः । नारायण परो ज्योतिरात्मा नारायणः परः *तदैक्षत बहु स्यां प्रजायेयेति *सोऽकामयत बहु स्यां प्रजायेयेति *तदात्मानं स्वयमकुरुत* इत्यादयः । परब्रह्मभूतपरमपुरुषवेदनमेव च मोक्षसाधनमुपासनं वदन्ति—*वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसस्तु पारे *तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते* इत्यादिना एकतां गतास्सर्वे वेदान्ताः । तदितिकर्तव्यताभूतं कर्म च वेदविहितवर्णाश्रमसंबन्धि यज्ञादिकमेव वदन्ति—*तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन *एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति* इत्यादयः । केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्धतत्त्वपराः केषुचिदुपासनादिविधिपरेषु वाक्येषु श्रुताः प्रजापतिशिवेन्द्राकाशप्राणादिशब्दा इति *शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यत्र प्रतिपादितम् । तथा *एको ह वै नारायण आसीन्न ब्रह्मा नेशानः, इत्यारभ्य *स एकाकी न रमेत* इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव समानप्रकरणस्थाः *सदेव सोम्येदमग्र इत्यादिषु साधारणाः सद्ब्रह्मात्मादिशब्दाः प्रतिपादयन्तीति *जन्माद्यस्य यतः इत्यत्र प्रतिपादितम् । अतो वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्पशुपतिमतमनादरणीयमेव ॥ ३५ ॥

210 अधिष्ठानानुपपत्तेश्च । २ । २ । ३६ ॥

वेदबाह्यानामनुमानाद्धि केवलनिमित्तेश्वरकल्पना । तथा सति दृष्टानुसारेण कुलालादिवदधिष्ठानं कर्तव्यम्; न च कुलालादेर्मृदाद्यधिष्ठानवत्पशुपतेर्निमित्तभूतस्य प्रधानाधिष्ठानमुपपद्यते, अशरीरत्वात्; सशरीराणामेव हि कुलालादीनामधिष्ठानशक्तिर्दृष्टा । न चेश्वरस्य सशरीरत्वमभ्युपगन्तव्यम्; तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च *शास्त्रयोनित्वादित्यत्र दोषस्योक्तत्वात् ॥ ३६ ॥

211 करणवच्चेन्न भोगादिभ्यः । २ । २ । ३७ ॥

यथा भोक्तुर्जीवस्य करणकलेबराद्यधिष्ठानमशरीरस्यैव दृश्यते; तद्वन्महेश्वरस्याप्यशरीरस्य च प्रधानाधिष्ठानमुपपद्यत इति चेन्न; भोगादिभ्यः—पुण्यपापरूपकर्मफलभोगार्थं पुण्यपापरूपादृष्टकारितं हि तदधिष्ठानम्; तद्वत्पशुपतेरपि पुण्यपापरूपादृष्टवत्तया तत्फलभोगादि सर्वं प्रसज्येत; अतो नाधिष्ठानसभवः ॥ ३७ ॥

212 अन्तवत्त्वमसर्वज्ञता वा । २ । २ । ३८ ॥

वाशब्दश्चार्थे; पशुपतेः पुण्यपापरूपादृष्टवत्त्वे जीववदन्तवत्त्वं सृष्टिसंहाराद्यास्पदत्वमसर्वज्ञता

Digitization by Arya Samaj Charitable Foundation, Chennai

च स्यादित्यनादरणीयमेवेदं मतम्। *विरोधे त्वनपेक्षं स्यात्* इत्यादिना वेदविरुद्धस्यानादरणीयत्वे सिद्धेऽपि पशुपतिमतस्य वेदविरुद्धताख्यापनार्थं *पत्युरसामञ्जस्यादिति पुनरारम्भः। यद्यपि पाशुपतशैवयोर्वेदाविरोधिन इव केचन धर्माः प्रतीयन्ते; तथाऽपि वेदविरुद्धनिमित्तोपादानभेद-कल्पनापरावरतत्त्वव्यत्ययकल्पनामूलत्वात् सर्वमसमञ्जसमेवेति असामञ्जस्यादित्युक्तम् ॥ ३८ ॥

इति पशुपत्यधिकरणम् ॥ ७ ॥

अथ उत्पत्त्यसंभवाधिकरणम् ॥ ८ ॥

213 उत्पत्त्यसंभवात् । २ । २ । ३९ ॥

कपिलादितन्त्रसामान्याद्भगवदभिहितपरमनिःश्रेयससाधनाववोधिनि पञ्चरात्रतन्त्रेऽप्य-प्रामाण्यमाशङ्क्य निराक्रियते। तत्रैवमाशङ्क्यते—परमकारणात्परब्रह्मभूताद्वासुदेवात्सङ्कर्षणो नाम जीवो जायते, सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते, तस्मादनिरुद्धसंज्ञोऽहङ्कारो जायत इति हि भागवतप्रक्रिया। अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते; श्रुतयो हि जीवस्यानादित्वं वदन्ति *न जायते म्रियते वा विपश्चित्* इत्याद्याः ॥ ३९ ॥

214 न च कर्तुः करणम् । २ । २ । ४० ॥

*सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते इति कर्तुः जीवात्, करणस्य मनस उत्पत्तिर्न संभवति, *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च* इति परस्मादेव ब्रह्मणो मनसोऽप्युत्पत्तिश्रुतेः। अतः श्रुतिविरुद्धार्थप्रतिपादनादस्यापि तन्त्रस्य प्रामाण्यं प्रतिषिद्ध्यत इति ॥ ४० ॥

एवं प्राप्ते प्रचक्ष्महे—

215 विज्ञानादिभावे वा तदप्रतिषेधः । २ । २ । ४१ ॥

वाशब्दात्पक्षो विपरिवर्तते; विज्ञानं चादि चेति परब्रह्म विज्ञानादि। सङ्कर्षणप्रद्युम्ना-निरुद्धानामपि परब्रह्मभावे सति तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिध्यते। एतदुक्तं भवति—भागवतप्रक्रियामजानतामिदं चोद्यं यज्जीवोत्पत्तिर्विरुद्धाऽभिहितेति। वासुदेवाख्यं परं ब्रह्मैवाश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया चतुर्धाऽवतिष्ठत इति हि तत्प्रक्रिया। यथा पौष्करसंहितायां *कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते। क्रमागतैस्स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत् ॥ इत्यादि। तच्च चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति सात्त्वतसंहितायामुक्तं *ब्राह्म-णानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम्। विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ॥ इति। तद्धि वासु-देवाख्यं परं ब्रह्म संपूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैः ज्ञानपूर्वेण

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्मणा अभ्यर्चितं सम्यक्प्राप्यते । विभवार्चनाद्व्यूहं प्राप्य व्यूहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदन्ति । विभवो हि नाम रामकृष्णादिप्रादुर्भावगणः । व्यूहो वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपश्चतुर्व्यूहः । सूक्ष्मं तु केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परब्रह्म । यथा पौष्करे *यस्मात्सम्यक्परं ब्रह्म वासुदेवाख्यमव्ययम् । अस्मादवाप्यते शास्त्रात् ज्ञानपूर्वेण कर्मणा ॥ इत्यादि । अतस्सङ्कर्षणादीनामपि परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वात् *अजायमानो बहुधा विजायत इति श्रुतिसिद्धस्यैवाश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसङ्ग्रहरूपजन्मनोऽभिधानात्तदभिधायिशास्त्रप्रामाण्यस्याप्रतिषेध इति । तत्र जीवमनोहङ्कारतत्त्वानामधिष्ठातारः सङ्कर्षणप्रद्युम्नानिरुद्धा इति तेषामेव जीवादिशब्दैरभिधानमविरुद्धम्; यथा आकाशप्राणादिशब्दैः ब्रह्मणोऽभिधानम् ॥ ४१ ॥

216 विप्रतिषेधाच्च । २ । २ । ४२ ॥

विप्रतिषिद्धा हि जीवोत्पत्तिस्तस्मिन्नपि तन्त्रे; यथोक्तं परमसंहितायाम्—*अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥ व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥ इति । एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनाज्जीवस्वरूपोत्पत्तिः पञ्चरात्रतन्त्रे प्रतिषिद्धैव । जन्ममरणादिव्यवहारस्तु लोकवेदयोर्जीवस्य यथोपपद्यते, तथा *नात्मा श्रुतेरित्यत्र वक्ष्यते । अतो जीवस्योत्पत्तिस्तत्रापि प्रतिषिद्धैवेति जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्का दूरोत्सारिता ।

यश्चैष केषांचिदुद्घोषः *साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवान्* इति साङ्गेषु वेदेषु पुरुषार्थनिष्ठा न लब्धेति वचनाद्वेदविरुद्धमेवेदं तन्त्रमिति, सोऽप्यनाघ्रातवेदवचसामनाकलिततदुपबृंहणन्यायकलापानां श्रद्धामात्रविजृम्भितः । यथा *प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्* इति अनुदितहोमनिन्दा उदितहोमप्रशंसार्थेत्युक्तम्; यथा च भूमविद्याप्रक्रमे नारदेन *ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमम्* इत्यारभ्य सर्वं विद्यास्थानमभिधाय *सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्* इति भूमविद्याव्यतिरिक्तासु सर्वासु विद्यास्वात्मवेदनालाभवचनं वक्ष्यमाणभूमविद्याप्रशंसार्थं कृतम् । अथवा अस्य नारदस्य साङ्गेषु वेदेषु यत्परतत्त्वं प्रतिपाद्यते, तदलाभनिमित्तोऽयं वादः; एवमेव शाण्डिल्यस्येति, पश्चाद्वेदान्तवेद्यवासुदेवाख्यपरब्रह्मतत्त्वाभिधानादवगम्यते ॥

तथा वेदार्थस्य दुर्ज्ञानतया सुखावबोधार्थश्शास्त्रारम्भः परमसंहितायामुच्यते । *अधीता भगवन् वेदास्साङ्गोपाङ्गास्सविस्तराः । श्रुतानि च मयाऽङ्गानि वाकोवाक्ययुतानि च । नचैतेषु समस्तेषु संशयेन विना क्वचित् । श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ॥ इति, *वेदान्तेषु यथा सारं संगृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् संचिक्षेप यथासुखम् ॥ इति च । अतस्स भगवान्वेदैकवेद्यः परब्रह्माभिधानो वासुदेवो निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितो-

Digitization by Arya Samaj Charitable Foundation, Chennai

दारगुणसागरस्सत्यसङ्कल्पश्चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयाऽवस्थितान् धर्मार्थकाममोक्षाख्यपुरुषार्थाभिमुखान् भक्तानवलोक्यापारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः स्वस्वरूपस्वविभूतिस्वाराधनतत्फलयाथात्म्यावबोधिनो वेदान् ऋग्यजुस्सामाथर्वभेदभिन्नानपरिमितशाखान् विध्यर्थवादमन्त्ररूपान् स्वेतरसकलसुरनरदुरवगाहांश्चावधार्य तदर्थयाथात्म्यावबोधि पञ्चरात्रशास्त्रं स्वयमेव निरमिमीतेति निरवद्यम् ॥

यत्तु परैस्सूत्रचतुष्टयं कस्यचिद्विरुद्धांशस्य प्रामाण्यनिषेधपरं व्याख्यातम्; तत् सूत्राक्षराननुगुणम्, सूत्रकाराभिप्रायविरुद्धं च। तथा हि—सूत्रकारेण वेदान्तन्यायाभिधायीनि सूत्राण्यभिधाय वेदोपबृंहणाय च भारतसंहितां शतसहस्रिकां कुर्वता मोक्षधर्मे ज्ञानकाण्डेऽभिहितं *गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः। य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः॥ इत्यारभ्य महता प्रबन्धेन पञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य, *इदं शतसहस्राद्धि भारताख्यानविस्तरात्। आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम्। नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा। आरण्यकं च वेदेभ्य ओषधीभ्यो यथाऽमृतम्॥ *इदं महोपनिषदं चतुर्वेदसमन्वितम्। साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्॥ इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्। ऋग्यजुस्सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा। भविष्यति प्रमाणं वा एतदेवानुशासनम्॥ इति। साङ्ख्ययोगशब्दाभ्यां ज्ञानयोगकर्मयोगावभिहितौ; यथोक्तं—*ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्* इति। भीष्मपर्वण्यपि—*ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः। अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः। सात्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः॥ इति। कथमेवं ब्रुवाणो बादरायणो वेदविदग्रेसरो वेदान्तवेद्यपरब्रह्मभूतवासुदेवोपासनार्चनादिप्रतिपादनपरस्य सात्त्वतशास्त्रस्याप्रामाण्यं ब्रूयात्?

ननु च *साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा। ...किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने *इत्यादिना साङ्ख्यादीनामप्यादरणीयतोच्यते। शारीरके तु साङ्ख्यादीनि प्रतिषिध्यन्ते। अत इदमपि तन्त्रं तत्तुल्यम्। नेत्युच्यते, यतस्तत्रापीममेव शारीरकोक्तं न्यायमवतारयति। *किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वेति प्रश्नस्यायमर्थः—किं साङ्ख्ययोगपाशुपतवेदपञ्चरात्राण्येकतत्त्वप्रतिपादनपराणि, पृथक्तत्त्वप्रतिपादनपराणि वा? यदैकतत्त्वप्रतिपादनपराणि, किं तदेकं तत्त्वम्? यदा तु पृथक्तत्त्वप्रतिपादनपराणि, तदैषां परस्परं विरुद्धार्थप्रतिपादनपरत्वाद्वस्तुनि विकल्पासंभवाच्चैकमेव प्रमाणमङ्गीकरणीयम्, किं तदेकम्? इति। अस्योत्तरं ब्रुवन् *ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै। साङ्ख्यस्य वक्ता कपिलः* इत्यारभ्य साङ्ख्ययोगपाशुपतानां कपिलहिरण्यगर्भपशुपतिकृतत्वेन पौरुषेयत्वं प्रतिपाद्य *अवान्तरतपा नाम वेदाचार्यस्स उच्यते* इति वेदानामपौरुषेयत्वमभिधाय *पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्* इति पञ्चरात्रतन्त्रस्य वक्ता नारायणः स्वयमेवेत्युक्तवान्।

एवं वदतश्चायमाशयः—पौरुषेयाणां हि तन्त्राणां परस्परविरुद्धवस्तुवादितया अपौरुषेय-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वेन निरस्तप्रमादादिनिखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च यथावस्थितवस्तुनि प्रामाण्यं दुर्लभम्; वेदवेद्यश्च परब्रह्मभूतो नारायणः; अतस्तत्तत्तन्त्राभिहितप्रधानपुरुषपशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वमभ्युपगमनीयमिति। तदिदमाह च *सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते। यथागमं यथान्यायं निष्ठा नारायणः प्रभुः ॥ इति। यथागमं यथान्यायमिति न्यायानुगृहीततत्तदागमोक्तं वस्तु परामृशतो नारायण एव सर्वस्य वस्तुनो निष्ठेति दृश्यते, अब्रह्मात्मकतया तत्तत्तन्त्राभिहितानां तत्त्वानां *सर्वं खल्विदं ब्रह्म *विश्वं नारायणः* इत्यादिना सर्वस्य ब्रह्मात्मकतामनुसन्दधानस्य नारायण एव निष्ठेति प्रतीयत इत्यर्थः। अतो वेदान्तवेद्यः परब्रह्मभूतो नारायणः स्वयमेव पञ्चरात्रस्य कृत्स्नस्य वक्तेति, तत्स्वरूपतदुपासनाभिधायि तत्तन्त्रमिति च तस्मिन्नितरतन्त्रसामान्यं न केनचिदुद्भावयितुं शक्यम्। अतस्तत्रैवेदमुच्यते—*एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च। परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते॥ इति। साङ्ख्यं च योगश्च साङ्ख्ययोगम्, वेदाश्चारण्यकानि च वेदारण्यकम्, परस्पराङ्गान्येतानि एकतत्त्वप्रतिपादनपरतयैकीभूतानि एकं पञ्चरात्रमिति कथ्यते।

एतदुक्तं भवति—साङ्ख्योक्तानि पञ्चविंशतितत्त्वानि, योगोक्तं च यमनियमाद्यात्मकं योगम्, वेदोदितकर्मस्वरूपाण्यङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वं, योगस्य च ब्रह्मोपासनप्रकारत्वं कर्मणां च तदाराधनरूपतामभिदधाति ब्रह्मस्वरूपं प्रतिपादयन्त्यारण्यकानि। एतदेव परेण ब्रह्मणा नारायणेन स्वयमेव पञ्चरात्रतन्त्रे विशदीकृतमिति। शारीरके च साङ्ख्योक्ततत्त्वानामब्रह्मात्मकतामात्रं निराकृतम्; न स्वरूपम्। योगपाशुपतयोश्चेश्वरस्य केवलनिमित्तकारणता, परावरतत्त्वविपरीतकल्पना, वेदबहिष्कृताचारो निराकृतः; न योगस्वरूपम्, पशुपतिस्वरूपं च। अतः *साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा। आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः॥ इत्यपि तत्तदभिहिततत्तत्स्वरूपमात्रमङ्गीकार्यम्; जिनसुगताभिहिततत्त्ववत् सर्वं न बहिष्कार्यमित्युच्यते, *यथागमं यथान्यायं निष्ठा नारायणः प्रभुरित्यनेनैकार्थ्यात् ॥ ४२ ॥ इति उत्पत्त्यसंभवाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

श्रीमते रामानुजाय नमः

द्वितीयाध्याये—तृतीयःपादः—वियदधिकरणम् ॥ १ ॥

217 न वियदश्रुतेः । २ । ३ । १ ॥

साङ्ख्यादिवेदबाह्यतन्त्राणां न्यायाभासमूलतया विप्रतिषेधाच्चासामञ्जस्यमुक्तम्; इदानीं स्वपक्षस्य विप्रतिषेधादिदोषगन्धाभावख्यापनाय ब्रह्मकार्यतयाऽभिमतचिदचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते। तत्र वियदुत्पद्यते, न वेति संशय्यते। किं युक्तम्? न वियदुत्पद्यत इति। कुतः? अश्रुतेः; संभावितस्य हि श्रवणसंभवः; असंभावितस्य तु गगनकुसुमवियदुत्पत्त्यादेः शब्दा-

Digitization by Arya Samaj Charitable Foundation, Chennai

भिधेयत्वं न संभवति । न खलु निरवयवस्य सर्वगतस्याकाशस्य आत्मन इवोत्पत्तिर्निरूपयितुं शक्यते । अत एव चोत्पत्त्यसंभवात् छान्दोग्ये सृष्टिप्रकरणे तेजःप्रभृतीनामेवोत्पत्तिराम्नायते—*तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति । तैत्तिरीयकाथर्वणादिषु *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुर्ज्योतिरापः* इत्यादिषु श्रूयमाणा वियदुत्पत्तिः अर्थविरोधाद्बाध्यत इति ॥ १ ॥

एवं प्राप्तेऽभिधीयते—

218 अस्ति तु । २ । ३ । २ ॥

अस्ति त्वाकाशस्योत्पत्तिः । अतीन्द्रियार्थविषया हि श्रुतिः प्रमाणान्तराप्रतीतामपि वियदुत्पत्तिं प्रतिपादयितुं समर्थैव । न च श्रुतिप्रतिपन्नेऽर्थे तद्विरोधिनिरवयवत्वादिहेतुकमनुत्पत्त्यनुमानमुदेतुमलम्; आत्मनोऽनुत्पत्तिर्न निरवयवत्वप्रयुक्तेति वक्ष्यते ॥ २ ॥

पुनश्चोदयति—

219 गौण्यसंभवाच्छब्दाच्च । २ । ३ । ३ ॥

*तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इत्यादिवियदुत्पत्तिश्रुतिर्गौणीति कल्पयितुं युक्तम्, *तत्तेजोऽसृजतेति सिसृक्षोः ब्रह्मणः प्रथमं तेज उत्पद्यत इति तेजउत्पत्तिप्राथम्येन वियदुत्पत्तिप्रतिपादनासंभवात्, *वायुश्चान्तरिक्षं चैतदमृतम्* इति वियतोऽमृतत्वशब्दाच्च ॥ ३ ॥

कथमेकस्य संभूतशब्दस्य आकाशापेक्षया गौणत्वम्, अग्न्याद्यपेक्षया मुख्यत्वमिति चेत्, तत्राह—

220 स्याच्चैकस्य ब्रह्मशब्दवत् । २ । ३ । ४ ॥

एकस्यैव *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इत्याकाशे मुख्यत्वासंभवात् गौणतया प्रयुक्तस्य संभूतशब्दस्य *वायोरग्निः* इत्यादिष्वनुषक्तस्य मुख्यत्वं स्यादेव; ब्रह्मशब्दवत्—यथा ब्रह्मशब्दः, *तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते इत्यत्र प्रधाने गौणतया प्रयुक्तस्तस्मिन्नेव प्रकरणे *तपसा चीयते ब्रह्म ततोऽन्नमभिजायते* इति ब्रह्मणि मुख्यतया प्रयुज्यते; तद्वत् । अनुषङ्गे च श्रवणावृत्ताविवाभिधानावृत्तिर्विद्यत एवेत्यर्थः ॥ ४ ॥

परिहरति—

221 प्रतिज्ञाहानिरव्यतिरेकात् । २ । ३ । ५ ॥

छान्दोग्यश्रुत्यनुसारेणान्यासां वियदुत्पत्तिवादिनीनां श्रुतीनां गौणत्वं कल्पयितुं न युज्यते । यतः छान्दोग्यश्रुत्यैव वियदुत्पत्तिरङ्गीकृता; *येनाश्रुतं श्रुतमित्यादिना ब्रह्मविज्ञानेन सर्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

विज्ञानप्रतिज्ञानात् । तस्या हि प्रतिज्ञायाः अहानिराकाशस्यापि ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति ॥ ५ ॥

222 शब्देभ्यः । २ । ३ । ६ ॥

इतश्च वियदुत्पत्तिः छान्दोग्ये प्रतीयते, *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक्सृष्टेरेकत्वावधारणशब्दात्; *ऐतदात्म्यमिदं सर्वमित्येवमादिशब्देभ्यश्च कार्यत्वेन ब्रह्मणोऽव्यतिरेकप्रतीतेः । न च *तत्तेजोऽसृजतेति तेजस उत्पत्तिश्रुतिर्वियदुत्पत्तिं वारयति । वियदुत्पत्त्यवचनमात्रेण तेजसः प्रतीयमानं प्राथम्यं श्रुत्यन्तरप्रतिपन्नां वियदुत्पत्तिं न निवारयितुमलम् ॥ ६ ॥

223 यावद्विकारं तु विभागो लोकवत् । २ । ३ । ७ ॥

तुशब्दश्चार्थे; *ऐतदात्म्यमिदं सर्वमित्यादिभिराकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणो विभागः--उत्पत्तिरप्युक्तैव । लोकवत्--यथा लोके एते सर्वे देवदत्तपुत्राः इत्यभिधाय तेषु केषांचित्तत उत्पत्तिवचनेन सर्वेषामुत्पत्तिरुक्ता स्यात्, तद्वत् । एवं च सति *वायुश्चान्तरिक्षं चैतदमृतमिति सुराणामिव चिरकालस्थायित्वाभिप्रायम् ॥ ७ ॥

224 एतेन मातरिश्वा व्याख्यातः । २ । ३ । ८ ॥

अनेनैव हेतुना मातरिश्वनो वायोरप्युत्पत्तिर्व्याख्याता । वियन्मातरिश्वनोः पृथग्योगकरणं *तेजोऽतस्तथा ह्याहेति मातरिश्वपरामर्शार्थम् ॥ ८ ॥

225 असंभवस्तु सतोऽनुपपत्तेः । २ । ३ । ९ ॥

तुशब्दोऽवधारणार्थः । असंभवः—अनुत्पत्तिः; सतः--ब्रह्मण एव; तद्व्यतिरिक्तस्य कस्यचिदप्यनुत्पत्तिर्न संभवति, अनुपपत्तेः । एतदुक्तं भवति--वियन्मातरिश्वनोरुत्पत्तिप्रतिपादनमुदाहरणार्थम्; उत्पत्त्यसंभवस्तु सतः परमकारणस्य परस्यैव ब्रह्मणः । तद्व्यतिरिक्तस्य कृत्स्नस्याव्यक्तमहदहङ्कारतन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्यैकविज्ञानेन सर्वविज्ञानप्रतिज्ञादिभिरवगतकार्यभावस्यानुत्पत्तिर्नोपपद्यत इति ॥ ९ ॥ इति वियदधिकरणम् ॥ १ ॥

अथ तेजोधिकरणम् ॥ २ ॥

226 तेजोऽतस्तथा ह्याह । २ । ३ । १० ॥

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य ब्रह्मकार्यत्वमुक्तम् । इदानीं व्यवहितकार्याणां किं केवलात्तत्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

दनन्तरकारणभूताद्वस्तुन उत्पत्तिः, आहोस्वित्तत्तद्रूपाद्ब्रह्मण इति चिन्त्यते। किं युक्तम्? केवलात्तत्तद्वस्तुन इति। कुतः? तेजस्तावत् अतः--मातरिश्वन एवोत्पद्यते। *वायोरग्निः* इति ह्याह ॥ १० ॥

227 आपः। २। ३। ११ ॥

आपोऽपि अतः—तेजस एवोत्पद्यन्ते, *अग्नेरापः *तदपोऽसृजत* इति ह्याह ॥ ११ ॥

228 पृथिवी। २। ३। १२ ॥

पृथिवी अद्भ्य उत्पद्यते—*अद्भ्यः पृथिवी, *ता अन्नमसृजन्त* इति ह्याह ॥ १२ ॥
नन्वन्नशब्देन कथं पृथिव्यभिधीयते? अत आह—

229 अधिकाररूपशब्दान्तरेभ्यः। २। ३। १३ ॥

महाभूतसृष्ट्यधिकारात्पृथिव्येवान्नशब्देनोक्तेति प्रतीयते। अदनीयस्य सर्वस्य पृथिवीविकारत्वात् कारणे कार्यशब्दः। तथा वाक्यशेषे भूतानां रूपसंशब्दने, *यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य* इत्यप्तेजसोस्सजातीयमेवान्नशब्दवाच्यं प्रतीयते। शब्दान्तरं च समानप्रकरणे *अग्नेरापः, अद्भ्यः पृथिवी* इति श्रूयते। अतः पृथिव्येवान्नशब्देनोच्यत इत्यद्भ्य एव पृथिवी जायते। उदाहृतास्तेजःप्रभृतयः प्रदर्शनार्थाः। महदादयोऽपि स्वानन्तरवस्तुन एवोत्पद्यन्ते, यथाश्रुत्यभ्युपगमाविरोधात्। *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी *तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *तत्तेजोऽसृजत* इत्यादयो ब्रह्मणः परम्परया कारणत्वेऽप्युपपद्यन्त इति ॥ १३ ॥
एवं प्राप्ते प्रचक्ष्महे—

230 तदभिध्यानादेव तु तल्लिङ्गात्सः। २। ३। १४ ॥

तुशब्दात्पक्षो व्यावृत्तः। महदादिकार्याणामपि तत्तदनन्तरवस्तुशरीरकस्स एव पुरुषोत्तमः कारणम्; कुतः? तदभिध्यानरूपात्तल्लिङ्गात्। अभिध्यानं--बहु स्यामिति सङ्कल्पः, *तत्तेज ऐक्षत बहु स्यां प्रजायेयेति *ता आप ऐक्षन्त बह्वयस्स्याम प्रजायेमहि* इत्यात्मनो बहुभवनसङ्कल्परूपेक्षणश्रवणान्महदहङ्काराकाशादीनामपि कारणानां तथाविधेक्षापूर्विकैव स्वकार्यसृष्टिरिति गम्यते; तथाविधं चेक्षणं तत्तच्छरीरकस्य परस्यैव ब्रह्मण उपपद्यते। श्रूयते च सर्वशरीरकत्वेन सर्वात्मकत्वं परस्य ब्रह्मणोऽन्तर्यामिब्राह्मणे *यः पृथिव्यां तिष्ठन् *योऽप्सु तिष्ठन् *यस्तेजसि तिष्ठन् *यो वायौ तिष्ठन् *य आकाशे तिष्ठन् *इत्यादि। सुबालोपनिषदि च *यस्य पृथिवी शरीरम्* इत्यारभ्य *यस्याहङ्कारश्शरीरम् *यस्य बुद्धिश्शरीरम् *यस्याव्यक्तं शरीरम्* इत्यादि ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यच्चोक्तम् *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चेत्यादिषु श्रूयमाणा ब्रह्मणः प्राणादिसृष्टिः परम्परयाऽप्युपपद्यत इति; अत्रोच्यते—

231 विपर्ययेण तु क्रमोऽत उपपद्यते च । २ । ३ । १५ ॥

तुशब्दोऽवधारणार्थः। अव्यक्तमहदहङ्काराकाशादिक्रमाद्विपर्ययेण यस्सर्वेषां कार्याणां ब्रह्मानन्तर्यरूपः क्रमः *एतस्माज्जायते प्राण इत्यादिषु प्रतीयते, स च क्रमस्तत्तद्रूपाद्ब्रह्मणस्तत्तत्कार्योत्पत्तेरेवोपपद्यते। परम्परया कारणत्वे ह्यानन्तर्यश्रवणमुपरुध्येत। अतः *एतस्माज्जायते इत्यादिक्रमपि सर्वस्य ब्रह्मणः साक्षात्संभवस्योत्तम्भनम् ॥ १५ ॥

232 अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् । २ । ३ । १६ ॥

विज्ञानसाधनत्वादिन्द्रियाणि विज्ञानमित्युच्यन्ते। यदुक्तम् *एतस्माज्जायते इत्यादिना सर्वस्य ब्रह्मणोऽनन्तरकार्यत्वं श्राव्यते; अतश्चानेन वाक्येन सर्वस्य साक्षाद्ब्रह्मण उत्पत्तिरभिध्यानलिङ्गावगतोत्तभ्यत इति; तन्नोपपद्यते, क्रमविशेषपरत्वादस्य वाक्यस्य; अत्रापि सर्वेषां क्रमप्रतीतेः। खादिषु तावत् श्रुत्यन्तरसिद्धः क्रमोऽत्रापि प्रतीयते; तैस्सहपाठलिङ्गाद्भूतप्राणयोरन्तराले विज्ञानमनसी अपि क्रमेणोत्पद्येते इति प्रतीयते। अतस्सर्वस्य साक्षाद्ब्रह्मण एव संभवस्योत्तम्भनमिदं वाक्यं न भवतीति चेत्; तन्न, अविशेषात्—*एतस्माज्जायते प्राण इत्यनेनाविशेषात्। विज्ञानमनसोः खादीनां च *एतस्माज्जायते इत्यनेन साक्षात्संभवरूपसंबन्धस्याभिधेयस्य सर्वेषां प्राणादिपृथिव्यन्तानामविशिष्टत्वात् स एव विधेयः, न क्रमः। श्रुत्यन्तरसिद्धक्रमविरोधाच्च नेदं क्रमपरम्, *पृथिव्यप्सु प्रलीयते* इत्यारभ्य *तमः परे देव एकीभवतीत्यन्तेन क्रमान्तरप्रतीतेः। अतोऽव्यक्तादिशरीरकात्परस्माद्ब्रह्मण एव सर्वकार्याणामुत्पत्तिः। तेजःप्रभृतयश्च शब्दास्तदात्मभूतं ब्रह्मैवाभिदधति ॥१६॥

नन्वेवं सर्वशब्दानां ब्रह्मवाचित्वे सति तैस्तैश्शब्दैः तत्तद्वस्तुव्यपदेशो व्युत्पत्तिसिद्ध उपरुद्ध्येत; तत्राह—

233 चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् । २ । ३ । १७ ॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः। निखिलजङ्गमस्थावरव्यपाश्रयस्तत्तच्छब्दव्यपदेशः भाक्तः— वाच्यैकदेशे भज्यत इत्यर्थः। समस्तवस्तुप्रकारिणो ब्रह्मणः प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वाद्वेदान्तश्रवणात्प्राक्प्रकार्यप्रतीतेः, प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्य, लोके तत्तद्वस्तुमात्रे वाच्यैकदेशे तेते शब्दाः भङ्क्त्वाभङ्क्त्वा व्यपदिश्यन्ते। अथवा तेजःप्रभृति-

Digitization by Arya Samaj Charitable Foundation, Chennai

भिश्शब्दैस्तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैर्ब्रह्मणो व्यपदेशो भाक्तस्स्यात्—अमुख्यस्स्यादित्याशङ्क्य, चराचरव्यपाश्रयस्तु इत्याद्युच्यते। चराचरव्यपाश्रयः तद्व्यपदेशः—तद्वाचिशब्दः, चराचरवाचिशब्दो ब्रह्मण्यभाक्तः—मुख्य एव; कुतः ? ब्रह्मभावभावित्वात्सर्वशब्दानां वाचकभावस्य; नामरूपव्याकरणश्रुत्या हि तथाऽवगतम् ॥ १७ ॥ इति तेजोधिकरणम् ॥ २ ॥

अथ आत्माधिकरणम् ॥ ३ ॥

234 नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः । २ । ३ । १८ ॥

वियदादेः कृत्स्नस्य परस्माद्ब्रह्मण उत्पत्तिरुक्ता। इदानीं जीवस्याप्युत्पत्तिरस्ति नेति संशय्यते । किं युक्तम् ? अस्तीति, कुतः ? एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः, प्राक्सृष्टेरेकत्वावधारणाच्च। वियदादेरिव जीवस्याप्युत्पत्तिवादिन्यः श्रुतयश्च सन्ति—*यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम् *प्रजापतिः प्रजा असृजत *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः *यतो वा इमानि भूतानि जायन्ते* इति। एवं सचेतनस्य जगत उत्पत्तिवचनात् जीवस्याप्युत्पत्तिः प्रतीयते। न च वाच्यं ब्रह्मणो नित्यत्वात् तत्त्वमस्यादिभिश्च जीवस्य ब्रह्मत्वावगमाज्जीवस्य नित्यत्वमिति; *ऐतदात्म्यमिदं सर्वम् *सर्वं खल्विदं ब्रह्म* इत्येवमादिभिर्वियदादेरपि ब्रह्मत्वावगमात्तस्यापि नित्यत्वप्रसक्तेः। अतो जीवोऽपि वियदादिवदुत्पद्यत इति ॥

एवं प्राप्तेऽभिधीयते—नात्मा श्रुतेरिति। नात्मोत्पद्यते; कुतः ? श्रुतेः—*न जायते म्रियते वा विपश्चित् *ज्ञाज्ञौ द्वावजौ* इत्यादिभिर्जीवस्योत्पत्तिप्रतिषेधो हि श्रूयते। आत्मनो नित्यत्वं च ताभ्यः—श्रुतिभ्य एवावगम्यते *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् * अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे* इत्यादिभ्यः। अतश्च नात्मोत्पद्यते। कथं तर्ह्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपद्यते ? इत्थमुपपद्यते—जीवस्यापि कार्यत्वात् कार्यकारणयोरनन्यत्वाच्च। एवं तर्हि वियदादिवदुत्पत्तिमत्त्वमङ्गीकृतं स्यात्; नेत्युच्यते। कार्यत्वं हि नामैकस्य द्रव्यस्यावस्थान्तरापत्तिः; तज्जीवस्याप्यस्त्येव। इयांस्तु विशेषः—वियदादेरचेतनस्य यादृशोऽन्यथाभावो न तादृशो जीवस्य; ज्ञानसङ्कोचविकासलक्षणो जीवस्यान्यथाभावः; वियदादेस्तु स्वरूपान्यथाभावलक्षणः। सेयं स्वरूपान्यथाभावलक्षणोत्पत्तिर्जीवे प्रतिषिध्यते ॥

एतदुक्तं भवति—भोग्यभोक्तृनियन्तॄन् विविक्तस्वभावान् प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य, भोग्यगतमुत्पत्त्यादिकं भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य, तस्य नित्यत्वं, निरवद्यत्वं, सर्वदा सर्वज्ञत्वं, सत्यसङ्कल्पत्वं, करणाधिपाधिपत्वं, विश्वस्य पतित्वं च प्रतिपाद्य, सर्वावस्थयोश्चिदचितोस्तं प्रति शरीरत्वं, तस्य चात्मत्वं प्रतिपादितम्। अतस्सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म। तत्कदाचित्स्वस्माद्विभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति; तत्कारणावस्थं ब्रह्म। कदाचिच्च विभक्तनामरूपस्थूलचिदचिद-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वस्तुशरीरम्; तच्च कार्यावस्थम् । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । चिदंशस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति । उभयप्रकारविशिष्टे नियन्त्रंशे तदवस्थतदुभयविशिष्टतारूपविकारो भवति; कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः । अत एवैकस्यावस्थान्तरापत्तिरूपविकारापेक्षया *येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो *यथा सोम्यैकेनेत्यादिना निदर्शितः । ईदृशज्ञानसङ्कोच-विकासकरतत्तद्देहसंबन्धवियोगाभिप्रायाः जीवस्योत्पत्तिमरणवादिन्यः, *प्रजापतिः प्रजा असृजत* इत्याद्याः श्रुतयः । अचिदंशवत्स्वरूपान्यथात्वाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो नित्यत्ववादि-न्यश्च *न जायते म्रियते इत्याद्याः, *नित्यो नित्यानामित्याद्याश्च श्रुतयः । स्वरूपान्यथात्वज्ञान-सङ्कोचविकासरूपोभयविधानिष्टविकाराभावाभिप्रायाः *सवा एष महानज आत्माऽजरोऽमरोऽमृतो ब्रह्म *नित्यो नित्यानामित्याद्याः परविषयाः श्रुतयः । एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणं च नामरूपविभागाभावादुपपद्यते । *तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत* इति हि नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे वदतीति ॥

ये त्वविद्योपाधिकं जीवत्वं वदन्ति, ये च पारमार्थिकोपाधिकृतम्, ये च सन्मात्रस्वरूपं ब्रह्म स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधाऽवस्थितं वदन्ति; सर्वेऽप्येते अविद्याशक्तेरुपाधिशक्ते-र्भोक्तृभोग्यनियन्तृशक्तीनां च प्रलयकालेऽवस्थानेऽपि तदानीमेकत्वावधारणं नामरूपविभागाभावा-देवोपपादयन्ति । *वैषम्यनैर्घृण्ये न सापेक्षत्वात् *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च* इति सूत्राभ्यां जीवभेदस्य तत्कर्मप्रवाहस्य चानादित्वाभ्युपगमाच्च । इयान्वि-शेषः—एकस्यानाद्यविद्यया ब्रह्म स्वयमेव मुह्यति; अन्यस्य पारमार्थिकानाद्युपाधिना ब्रह्मस्वरूपमेव बध्यते, उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्; अपरस्य ब्रह्मैव विचित्राकारेण परिणमते, कर्म-फलानि चानिष्टानि भुङ्क्ते; नियन्त्रंशस्य भोक्तृत्वाभावेऽपि सर्वज्ञत्वात्स्वस्मादभिन्नं भोक्तारमनुसंद-धातीति स्वयमेव भुङ्क्ते । अस्माकं तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म कार्यकारणोभया-वस्थावस्थितमपि सर्वदा निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरमवतिष्ठते । प्रकारभूतचिदचिद्वस्तुगताः अपुरुषार्थाः स्वरूपान्यथाभावाश्चेति सर्वं समञ्जसम् ॥ १८ ॥ इति आत्माधिकरणम् ॥ ३ ॥

अथ ज्ञाधिकरणम् ॥ ४ ॥

235 ज्ञोऽत एव । २ । ३ । १९ ॥

वियदादिवज्जीवो नोत्पद्यत इत्युक्तम्, तत्प्रसङ्गेन जीवस्वरूपं निरूप्यते । किं सुगत-कपिलाभिमतचिन्मात्रमेवात्मनस्स्वरूपम्; उत कणभुगभिमतपाषाणकल्पस्वरूपमचित्स्वभावमेवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

गन्तुकचैतन्यगुणकम्; अथ ज्ञातृत्वमेवास्य स्वरूपमिति। किं युक्तम्? चिन्मात्रमिति; कुतः? तथा श्रुतेः। अन्तर्यामिब्राह्मणे हि *य आत्मनि तिष्ठन्निति माध्यन्दिनीयपर्यायस्य स्थाने *यो विज्ञाने तिष्ठन्निति काण्वा अधीयते। तथा *विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि चेति कर्तुरात्मनो विज्ञानमेव स्वरूपं श्रूयते। स्मृतिषु च *ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः* इत्यादिष्वात्मनो ज्ञानस्वरूपत्वं प्रतीयते। अपरस्तु—जीवात्मनो ज्ञानत्वे ज्ञातृत्वे च स्वाभाविकेऽभ्युपगम्यमाने तस्य सर्वगतस्य सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्, करणानां च वैयर्थ्यात्, सुषुप्तिमूर्च्छादिषु सतोऽप्यात्मनश्चैतन्यानुपलब्धेर्जाग्रतस्सामग्र्यां सत्यां ज्ञानोत्पत्तिदर्शनादस्य न ज्ञानं स्वरूपम्; नापि ज्ञातृत्वम्; आगन्तुकमेव चैतन्यम्; सर्वगतत्वं चात्मनोऽवश्याभ्युपेत्यम्, सर्वत्र कार्योपलब्धेः सर्वत्रात्मनस्सन्निधानाभ्युपगमाच्छरीरगमनेनैव कार्यसंभवे सति गतिकल्पनायां प्रमाणाभावाच्च। श्रुतिरपि सुषुप्तिवेलायां ज्ञानाभावं दर्शयति—*नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि* इति। तथा मोक्षदशायां ज्ञानाभावं दर्शयति—*न प्रेत्य संज्ञाऽस्ति* इति। *ज्ञानस्वरूपमित्यादिप्रयोगस्तु ज्ञानस्य तदसाधारणगुणत्वेन लाक्षणिक इति॥

एवं प्राप्ते प्रचक्ष्महे—ज्ञोऽत एव। ज्ञ एव—अयमात्मा ज्ञातृस्वरूप एव, न ज्ञानमात्रम्; नापि जडस्वरूपः; कुतः? अत एव—श्रुतेरेवेत्यर्थः। *नात्मा श्रुतेरिति प्रकृता श्रुतिः अत इति शब्देन परामृश्यते। तथा छान्दोग्ये प्रजापतिवाक्ये मुक्तामुक्तात्मस्वरूपकथने *अथ यो वेदेदं जिघ्राणीति स आत्मा *मनसैवैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके *सत्यकामस्सत्यसङ्कल्पः *नोपजनं स्मरन्निदं शरीरम्। अन्यत्रापि *न पश्यो मृत्युं पश्यति,* तथा वाजसनेयके *कतम आत्मेति पृष्ट्वा *योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इति; तथा *विज्ञातारमरे केन विजानीयात् *जानात्येवायं पुरुषः; तथा *एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः, *एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः* इति॥ १९॥

यत्तूक्तं ज्ञातृत्वे स्वाभाविके सति सर्वगतस्य तस्य सर्वदा सर्वत्रोपलब्धिः प्रसज्यत इति; तत्रोच्यते—

236 उत्क्रान्तिगत्यागतीनाम्।२।३।२०॥

नायं सर्वगतः, अपि त्वणुरेवायमात्मा; कुतः? उत्क्रान्तिगत्यागतीनां श्रुतेः। उत्क्रान्तिस्तावच्छ्रूयते *तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः* इति। गतिरपि *ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति* इति। आगतिरपि *तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे* इति। विभुत्वे ह्येता उत्क्रान्त्यादयो नोपपद्येरन्॥ २०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

237 स्वात्मना चोत्तरयोः । २ । ३ । २१ ॥

चशब्दोऽवधारणे। यद्यपि शरीरवियोगरूपत्वेनोत्क्रान्तः स्थितस्याप्यात्मनः कथंचिदुपपद्यते; गत्यागती तु न कथंचिदुपपद्येते। अतस्ते स्वात्मनैव संपाद्ये ॥ २१ ॥

238 नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् । २ । ३ । २२ ॥

योऽयं विज्ञानमयः प्राणेषु इति जीवं प्रस्तुत्य *स वा एष महानज आत्मा* इति महत्त्वश्रुतेः नाणुर्जीव इति चेन्न। इतराधिकारात्—जीवादितरस्य प्राज्ञस्य तत्राधिकारात्। यद्यप्युपक्रमे जीवः प्रस्तुतः; तथाऽपि *यस्यानुवित्तः प्रतिबुद्ध आत्मा* इति मध्ये परः प्रतिपाद्यत इति तत्संबन्धीदं महत्त्वम्; न जीवस्य ॥ २२ ॥

239 स्वशब्दोन्मानाभ्यां च । २ । ३ । २३ ॥

साक्षादणुशब्द एव श्रूयते *एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश* इति। उद्धृत्य मानमुन्मानम्; अणुसदृशं वस्तूद्धृत्य तन्मानत्वं जीवस्य श्रूयते *वालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवस्स विज्ञेयः* इति; *आराग्रमात्रो ह्यवरोऽपि दृष्टः* इति च। अतोऽणुरेवायमात्मा ॥ २३ ॥

अथ स्यात्—आत्मनोऽणुत्वे सकलशरीरव्यापिनी वेदना नोपपद्यत इति; तत्र मतान्तरेण परिहारमाह—

240 अविरोधश्चन्दनवत् । २ । ३ । २४ ॥

यथा हरिचन्दनबिन्दुर्देहैकदेशवर्त्यपि सकलदेहव्यापिनमाह्लादं जनयति, तद्वदात्माऽपि देहैकदेशवर्ती सकलदेशवर्तिनीं वेदनामनुभवति ॥ २४ ॥

241 अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि । २ । ३ । २५ ॥

हरिचन्दनबिन्द्वादेर्देहदेशविशेषावस्थितिविशेषात्तथाभावः, आत्मनस्तु तन्न विद्यत इति चेन्न; आत्मनोऽपि देहदेशविशेषे स्थित्यभ्युपगमात्। हृदयदेशे ह्यात्मनः स्थितिः श्रूयते *हृदि ह्ययमात्मा तत्रैकशतं नाडीनाम्* इति; तथा *कतम आत्मेति प्रकृत्य *योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः* इति। आत्मनो देशविशेषस्थितिख्यापनाय चन्दनदृष्टान्तः प्रदर्शितः; न तु चन्दनस्य देशविशेषापेक्षा ॥ २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एकदेशवर्तिनस्सकलदेहव्यापिकार्यकरत्वप्रकारं स्वमतेनाह—

242 गुणाद्वाऽऽलोकवत् । २ । ३ । २६ ॥

वाशब्दो मतान्तरव्यावृत्त्यर्थः। आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः; आलोकवत्—यथा मणिद्युमणिप्रभृतीनामेकदेशवर्तिनामालोकोऽनेकदेशव्यापी दृश्यते, तद्वद्धृदयस्थस्यात्मनो ज्ञानं सकलदेहं व्याप्य वर्तते। ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य स्वाश्रयादन्यत्र वृत्तिर्मणिप्रभावदुपपद्यत इति प्रथमसूत्रे स्थापितम् ॥ २६ ॥

ननूक्तं ज्ञानमात्रमेवात्मेति; तत्कथं ज्ञानस्य स्वरूपव्यतिरिक्तगुणत्वमुच्यते; तत्राह—

243 व्यतिरेको गन्धवत्तथा च दर्शयति । २ । ३ । २७ ॥

यथा पृथिव्याः गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकः, तथा जानामीति ज्ञातृगुणत्वेन प्रतीयमानस्य ज्ञानस्यात्मनो व्यतिरेकस्सिद्धः। दर्शयति च श्रुतिः *जानात्येवायं पुरुष इति ॥ २७ ॥

244 पृथगुपदेशात् । २ । ३ । २८ ॥

स्वशब्देनैव विज्ञानं विज्ञातुः पृथगुपदिश्यते *न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इति ॥ २८ ॥

यत्तूक्तं *यो विज्ञाने तिष्ठन् *विज्ञानं यज्ञं तनुते *ज्ञानस्वरूपमत्यन्तनिर्मलम्* इत्यादिषु ज्ञानमेवात्मेति व्यपदिश्यत इति, तत्राह—

245 तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् । २ । ३ । २९ ॥

तुशब्दश्चोद्यं व्यावर्तयति। तद्गुणसारत्वात्—विज्ञानगुणसारत्वात् आत्मनो विज्ञानमिति व्यपदेशः। विज्ञानमेवास्य सारभूतो गुणः, यथा प्राज्ञस्यानन्दस्सारभूतो गुण इति प्राज्ञ आनन्दशब्देन व्यपदिश्यते—*यदेष आकाश आनन्दो न स्यात् *आनन्दो ब्रह्मेति व्यजानात्* इति। प्राज्ञस्य ह्यानन्दस्सारभूतो गुणः—*स एको ब्रह्मण आनन्दः *आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चन* इति। यथा वा *सत्यं ज्ञानमनन्तं ब्रह्मेति विपश्चितः प्राज्ञस्य ज्ञानशब्देन व्यपदेशः। *सह ब्रह्मणा विपश्चिता *यस्सर्वज्ञः* इत्यादिषु प्राज्ञस्य ज्ञानं सारभूतो गुण इति विज्ञायते ॥ २९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

246 यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् । २ । ३ । ३० ॥

विज्ञानस्य यावदात्मभाविधर्मत्वात्तेन तद्व्यपदेशो न दोषः; तथाच खण्डादयो यावत्स्वरूपभाविगोत्वादिधर्मशब्देन गौरिति व्यपदिश्यमाना दृश्यन्ते; स्वरूपनिरूपणधर्मत्वादित्यर्थः । चकारात् ज्ञानवदात्मनोऽपि स्वप्रकाशत्वेन विज्ञानमिति व्यपदेशो न दोष इति समुच्चिनोति ॥ ३० ॥

यच्चोक्तं सुषुप्त्यादिषु ज्ञानाभावात् ज्ञानस्य न स्वरूपानुबन्धिधर्मत्वमिति, तत्राह—

247 पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् । २ । ३ । ३१ ॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः । अस्य—ज्ञानस्य सुषुप्त्यादिष्वपि विद्यमानस्य जागर्यादिष्वभिव्यक्तेस्संभवात् स्वरूपानुबन्धिधर्मत्वोपपत्तिः । पुंस्त्वादिवत्—यथा पुंस्त्वाद्यसाधारणस्य धातोर्बाल्यावस्थायां सतोऽप्यनभिव्यक्तस्य युवत्वेऽभिव्यक्तौ पुंसस्तद्वत्ता न कादाचित्की भवति । सप्तधातुमयत्वं हि शरीरस्य स्वरूपानुबन्धि—*तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम्* इति शरीरस्वरूपव्यपदेशात् । सुषुप्त्यादिष्वप्यहमर्थः प्रकाशत इति प्रागेवोक्तम् । तस्य विद्यमानस्य ज्ञानस्य विषयगोचरत्वं जागर्यादावुपलभ्यते । एते चात्मनो ज्ञातृत्वादयो धर्माः प्रागेवोपपादिताः । अतो ज्ञातृत्वमेव जीवात्मनः स्वरूपम् । स चायमात्माऽणुपरिमाणः । *न प्रेत्य संज्ञाऽस्ति* इत्यपि न मुक्तस्य ज्ञानाभाव उच्यते; अपि तु *एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति* इति संसारदशायां यद्भूतानुविधायित्वप्रयुक्तं जन्मनाशादिदर्शनम्, तन्मुक्तस्य न विद्यते, *न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः ॥ *नोपजनं स्मरन्निदं शरीरम् *मनसैतान् कामान् पश्यन् रमते* इत्यादिश्रुत्यैकार्थ्यात् ॥ ३१ ॥

संप्रति ज्ञानात्मवादे तस्य सर्वगतत्वे दूषणमाह—

248 नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । २ । ३ । ३२ ॥

अन्यथा—सर्वगतत्वपक्षे तस्य ज्ञानमात्रत्वपक्षे च नित्यमुपलब्ध्यनुपलब्धी सहैव प्रसज्येयाताम्; अन्यतरनियमो वा—उपलब्धिरेव वा नित्यं स्यात्, अनुपलब्धिरेव वा । एतदुक्तं भवति—लोके तावद्वर्तमानयोरात्मोपलब्ध्यनुपलब्ध्योरयं ज्ञानात्मा सर्वगतो हेतुस्स्यात्; उपलब्धेरेव वा, अनुपलब्धेरेव वा । उभयहेतुत्वे सर्वदा सर्वत्रोभयं प्रसज्येत । यद्युपलब्धेरेव, सर्वस्य सर्वदा सर्वत्रानुपलम्भो न स्यात् । अथानुपलब्धेरेव, सर्वदा सर्वत्रोपलब्धिर्न स्यादिति । अस्माकं शरीरस्यान्तरेवावस्थितत्वादात्मनस्तत्रैवोपलब्धिर्नान्यत्रेति व्यवस्थासिद्धिः । करणायत्तोपलब्धेरपि सर्वेषामात्मनां सर्वगतत्वेन सर्वैः करणैस्सर्वदा संयुक्तत्वाददृष्टादेरप्यनियमादुक्तदोषस्समानः ॥ ३२ ॥ इति ज्ञाधिकरणम् ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ कर्त्रधिकरणम् ॥ ५ ॥

249 कर्ता शास्त्रार्थवत्त्वात् । २ । ३ । ३३ ॥

अयमात्मा ज्ञाता, स चाणुपरिमाण इत्युक्तम्; इदानीं किं स एव कर्ता; उत स्वयमकर्तैव सन्नचेतनानां गुणानां कर्तृत्वमात्मन्यध्यस्यतीति चिन्त्यते। किमत्र युक्तम्? अकर्तैवात्मेति। कुतः? आत्मनो ह्यकर्तृत्वम्, गुणानामेव च कर्तृत्वमध्यात्मशास्त्रेषु श्रूयते। तथा हि कठवल्लीषु जीवस्य *न जायते म्रियते इत्यादिना जन्मजरामरणादिकं सर्वं प्रकृतिधर्मं प्रतिषिध्य हननादिषु क्रियासु कर्तृत्वमपि प्रतिषिध्यते—*हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ इति। हन्तारमात्मानं जानन्न जानात्यात्मानमित्यर्थः। तथा च भगवता स्वयमेव जीवस्याकर्तृत्वं स्वरूपम्, कर्तृत्वाभिमानस्तु व्यामोह इत्युच्यते—*प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥ *नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति *कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥ इति च। अतः पुरुषस्य भोक्तृत्वमेव, प्रकृतेरेव तु कर्तृत्वमिति॥

एवं प्राप्ते प्रचक्ष्महे—कर्ता शास्त्रार्थवत्त्वादिति। आत्मैव कर्ता; न गुणाः। कस्मात्? शास्त्रार्थवत्त्वात्। शास्त्राणि हि यजेत स्वर्गकामः, मुमुक्षुर्ब्रह्मोपासीतेत्येवमादीनि स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते। न ह्यचेतनस्य कर्तृत्वेऽन्यो नियुज्यते। शासनाच्च शास्त्रम्; शासनं च प्रवर्तनम्; शास्त्रस्य च प्रवर्तकत्वं बोधजननद्वारेण; अचेतनं च प्रधानं न बोधयितुं शक्यम्। अतः शास्त्राणामर्थवत्त्वं भोक्तुश्चेतनस्यैव कर्तृत्वे भवेत्। तदुक्तं *शास्त्रफलं प्रयोक्तरीति। यदुक्तं *हन्ता चेन्मन्यते इत्यादिना हननक्रियायामकर्तृत्वमात्मनः श्रूयत इति; तदात्मनो नित्यत्वेन हन्तव्यत्वाभावादुच्यते। यच्च *प्रकृतेः क्रियामाणानीत्यादिना गुणानामेव कर्तृत्वं स्मर्यत इति; तत्सांसारिकप्रवृत्तिष्वस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता; न स्वरूपप्रयुक्तेति प्राप्ताप्राप्तविवेकेन गुणानामेव कर्तृतेत्युच्यते। तथा च तत्रैवोच्यते *कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु* इति। तथा तत्रैवात्मनश्च कर्तृत्वमभ्युपेत्योच्यते *तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ इति। *अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥ इत्यधिष्ठानादिदैवपर्यन्तसापेक्षे सत्यात्मनः कर्तृत्वे य आत्मानमेव केवलं कर्तारं मन्यते, न स पश्यतीत्यर्थः॥ ३३॥

250 उपादानाद्विहारोपदेशाच्च । २ । ३ । ३४ ॥

*स यथा महाराजः इति प्रकृत्य, *एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते* इति प्राणानामुपादाने विहारे च कर्तृत्वमुपदिश्यते॥ ३४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

251 व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः । २ । ३ । ३५ ॥

विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपिच इति लौकिकवैदिकक्रियासु कर्तृत्वव्यपदेशाच्च कर्ता। विज्ञानशब्देन नात्मनो व्यपदेशः; अपि त्वन्तःकरणस्य बुद्धेरिति चेत्; एवं सति निर्देशविपर्ययस्स्यात्—बुद्धेः करणत्वाद्विज्ञानेनेति करणविभक्तिनिर्देशस्स्यात् ॥ ३५ ॥

252 उपलब्धिवदनियमः । २ । ३ । ३६ ॥

आत्मनोऽकर्तृत्वे दोष उच्यते। यथाऽऽत्मनो विभुत्वे नित्योपलब्ध्यनुपलब्धिप्रसङ्ग इत्यादिनोपलब्धेरनियम उक्तः; तद्वदात्मनोऽकर्तृत्वे प्रकृतेश्च कर्तृत्वे तस्यास्सर्वपुरुषसाधारणत्वात्सर्वाणि कर्माणि सर्वेषां भोगाय स्युः; नैव वा कस्य चित्। आत्मनो विभुत्वाभ्युपगमात्सन्निधानमपि सर्वेषामविशिष्टम्। अत एव चान्तःकरणादीनामपि नियमो नोपपद्यते, यदायत्ता व्यवस्था स्यात् ॥ ३६ ॥

253 शक्तिविपर्ययात् । २ । ३ । ३७ ॥

बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वानुपपत्तेर्भोक्तृत्वशक्तिरपि तस्या एव स्यादित्यात्मनो भोक्तृत्वशक्तिर्हीयेत। भोक्तृत्वं च बुद्धेरेव संपद्यत इति आत्मसद्भावे प्रमाणाभावश्च स्यात्। *पुरुषोऽस्ति भोक्तृभावात्* इति हि तेषामभ्युपगमः ॥ ३७ ॥

254 समाध्यभावाच्च । २ । ३ । ३८ ॥

बुद्धेः कर्तृत्वे मोक्षसाधनभूतसमाधावपि सैव कर्त्री स्यात्। स च समाधिः प्रकृतेरन्योऽस्मीत्येवंरूपः; न च प्रकृतेरन्योऽस्मीति प्रकृतिस्समाधातुमलम्। अतोऽप्यात्मैव कर्ता ॥ ३८ ॥

नन्वात्मनः कर्तृत्वेऽभ्युपगम्यमाने सर्वदा कर्तृत्वान्नोपरमेतेत्यत्राह—

255 यथा च तक्षोभयथा । २ । ३ । ३९ ॥

वागादिकरणसंपन्नोऽप्यात्मा यदेच्छति, तदा करोतिः; यदा तु नेच्छति, तदा न करोति। यथा तक्षा वास्यादिकरणसन्निधानेऽपि इच्छानुगुण्येन करोति, न करोति च। बुद्धेस्त्वचेतनायाः कर्तृत्वे तस्याः भोगवाञ्छादिनियमकारणाभावात्सर्वदा कर्तृत्वमेव स्यात् ॥ ३९ ॥ इति कर्त्रधिकरणम् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ परायत्ताधिकरणम् ॥ ६ ॥

256 परात्तु तच्छ्रुतेः । २ । ३ । ४० ॥

इदं जीवस्य कर्तृत्वं किं स्वातन्त्र्येण, उत परमात्मायत्तमिति । किं प्राप्तम् ? स्वातन्त्र्येणेति । परमात्मायत्तत्वे हि विधिनिषेधशास्त्रानर्थक्यं प्रसज्येत । यो हि स्वबुद्ध्या प्रवृत्तिनिवृत्त्यारम्भशक्तः; स एव नियोज्यो भवति । अतस्स्वातन्त्र्येणास्य कर्तृत्वम् ॥ इति प्राप्तेऽभिधीयते—परात्तु तच्छ्रुतेरिति । तुशब्दः पक्षं व्यावर्तयति; तत्--कर्तृत्वम्, अस्य जीवस्य परात्--परमात्मन एव हेतोर्भवति । कुतः ? श्रुतेः—*अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः* इति । स्मृतिरपि *सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च *ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ इति ॥ ४० ॥

नन्वेवं विधिनिषेधशास्त्रानर्थक्यं प्रसज्येतेत्युक्तम्; तत्राह—

257 कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः । २ । ३ । ४१ ॥

सर्वासु क्रियासु पुरुषेण कृतं प्रयत्नम्—उद्योगम् अपेक्ष्यान्तर्यामी परमात्मा तदनुमतिदानेन प्रवर्तयति । परमात्मानुमतिमन्तरेणास्य प्रवृत्तिर्नोपपद्यत इत्यर्थः । कुत एतत् ? विहितप्रतिषिद्धावैयर्थ्यादिभ्यः—आदिशब्देनानुग्रहनिग्रहादयो गृह्यन्ते । यथा द्वयोस्साधारणे धने परस्वत्वापादनमन्यतरानुमतिमन्तरेण नोपपद्यते; अथापीतरानुमतेः स्वेनैव कृतमिति तत्फलं स्वस्यैव भवति । पापकर्मसु निवर्तनशक्तस्याप्यनुमन्तृत्वं न निर्दयत्वमावहतीति साङ्ख्यसमयनिरूपणे प्रतिपादितम् । नन्वेवम् *एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषति* इत्युन्निनीषयाऽधोनिनीषया च स्वयमेव साध्वसाधुनी कर्मणी कारयतीत्येतन्नोपपद्यते । उच्यते--एतन्न सर्वसाधारणम्, यस्त्वतिमात्रपरमपुरुषानुकूल्ये व्यवसितः प्रवर्तते; तमनुगृह्णन् भगवान् स्वयमेव स्वप्राप्त्युपायेष्वतिकल्याणेषु कर्मस्वेव रुचिं जनयति । यश्चातिमात्रप्रातिकूल्ये व्यवसितः प्रवर्तते तं निगृह्णन् स्वप्राप्तिविरोधिष्वधोगतिसाधनेषु कर्मसु सञ्जयति । यथोक्तं भगवता स्वयमेव--*अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ इत्यारभ्य *तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ इति । तथा *असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्* इत्यादि, *मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः* इत्यन्तमुक्त्वा *तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ इत्युक्तम् ॥ ४१ ॥ इति परायत्ताधिकरणम् ॥ ६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ अंशाधिकरणम् ॥ ७ ॥

258 अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके । २ । ३ । ४२ ॥

जीवस्य कर्तृत्वं परमपुरुषायत्तमित्युक्तम्; इदानीं किमयं जीवः परस्मादत्यन्तभिन्नः, उत परमेव ब्रह्म भ्रान्तम्, उत ब्रह्मैवोपाध्यवच्छिन्नम्, अथ ब्रह्मांश इति संशय्यते। श्रुतिविप्रतिपत्तेस्संशयः। ननु *तदनन्यत्वमारम्भणशब्दादिभ्यः *अधिकं तु भेदनिर्देशात्* इत्यत्रैवायमर्थो निर्णीतः। सत्यम्, स एव नानात्वैकत्वश्रुतिविप्रतिपत्त्या आक्षिप्य जीवस्य ब्रह्मांशत्वोपपादनेन विशेषतो निर्णीयते। यावद्धि जीवस्य ब्रह्मांशत्वं न निर्णीतम्, तावज्जीवस्य ब्रह्मणोऽनन्यत्वं, ब्रह्मणस्तस्मादधिकत्वं च न प्रतितिष्ठति। किं तावत्प्राप्तम्? अत्यन्तभिन्न इति। कुतः? *ज्ञाज्ञौ द्वावजावीशनीशौ* इत्यादिभेदनिर्देशात्। ज्ञाज्ञयोरभेदश्रुतयस्तु, अग्निना सिञ्चेदितिवद्विरुद्धार्थप्रतिपादनादौपचारिक्यः। ब्रह्मणोंऽशो जीव इत्यपि न साधीयः, एकवस्त्वेकदेशवाची ह्यंशशब्दः। जीवस्य ब्रह्मैकदेशत्वे तद्गता दोषा ब्रह्मणि भवेयुः। न च ब्रह्मखण्डो जीव इत्यंशत्वोपपत्तिः, खण्डनानर्हत्वाद्ब्रह्मणः, प्रागुक्तदोषप्रसङ्गाच्च। तस्मादत्यन्तभिन्नस्य च तदंशत्वं दुरुपपादम्। यद्वा भ्रान्तं ब्रह्मैव जीवः, कुतः? *तत्त्वमसि *अयमात्मा ब्रह्मेत्यादिब्रह्मात्मभावोपदेशात्। नानात्ववादिन्यस्तु प्रत्यक्षादिसिद्धार्थानुवादित्वादनन्यथासिद्धाद्वैतोपदेशपराभिः श्रुतिभिः प्रत्यक्षादय इवाविद्यान्तर्गताः ख्याप्यन्ते। अथवा ब्रह्मैवानाद्युपाध्यवच्छिन्नं जीवः। कुतः? तत एव ब्रह्मात्मभावोपदेशात्। न चायमुपाधिर्भ्रान्तिपरिकल्पित इति वक्तुं शक्यम्, बन्धमोक्षादिव्यवस्थानुपपत्तेरिति ॥

एवं प्राप्तेऽभिधीयते ब्रह्मांश इति। कुतः? नानाव्यपदेशात्, अन्यथा च—एकत्वेन व्यपदेशात्। उभयथा हि व्यपदेशो दृश्यते। नानात्वव्यपदेशस्तावत्स्रष्टृत्वसृज्यत्वनियन्तृत्वनियाम्यत्वसर्वज्ञत्वाज्ञत्वस्वाधीनत्वपराधीनत्वशुद्धत्वाशुद्धत्वकल्याणगुणाकरत्वतद्विपरीतत्वपतित्वशेषत्वादिभिर्दृश्यते। अन्यथा च अभेदन व्यपदेशोऽपि *तत्त्वमसि *अयमात्मा ब्रह्मेत्यादिभिर्दृश्यते। अपि दाशकितवादित्वमधीयत एके–*ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवाः* इत्याथर्वणिका ब्रह्मणो दाशकितवादित्वमप्यधीयते। ततश्च सर्वजीवव्यापित्वेनाभेदो व्यपदिश्यत इत्यर्थः। एवमुभयव्यपदेशमुख्यत्वसिद्धये जीवोऽयं ब्रह्मणोंऽश इत्यभ्युपगन्तव्यः।

न च भेदव्यपदेशानां प्रत्यक्षादिप्रसिद्धार्थत्वेनान्यथासिद्धत्वम्; ब्रह्मसृज्यत्वतन्नियाम्यत्वतच्छरीरत्वतच्छेषत्वतदाधारत्वतत्पाल्यत्वतत्संहार्यत्वतदुपासकत्वतत्प्रसादलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थभाक्त्वादयस्तत्कृतश्च जीवब्रह्मणोर्भेदः प्रत्यक्षाद्यगोचरत्वेनानन्यथासिद्धः। अतो न जगत्सृष्ट्यादिवादिनीनां प्रमाणान्तरसिद्धभेदानुवादेन मिथ्यार्थोपदेशपरत्वम्। नचाखण्डैकरसचिन्मात्रस्वरूपेण ब्रह्मणा आत्मनोऽतद्भावानुसन्धानम्, बहुभवनसङ्कल्पपूर्वकवियदादिसृष्टिं, जीवभावेन तत्प्रवेशं,

Digitization by Arya Samaj Charitable Foundation, Chennai

विचित्रनामरूपव्याकरणं, तत्कृतानन्तविषयानुभवनिमित्तसुखदुःखभागित्वम्, अभोक्तृत्वेन तत्र स्थित्वा तन्नियमनेनान्तर्यामित्वं, जीवभूतस्य स्वस्य कारणब्रह्मात्मभावानुसन्धानं, संसारमोक्षं, तदुपदेशशास्त्रं च कुर्वाणेन भ्रमितव्यमित्युपदिश्यते; तथा सत्युन्मत्तप्रलपितत्वापातात्। उपाध्यवच्छिन्नं ब्रह्म जीव इत्यपि न साधीयः, पूर्वनिर्दिष्टनियन्तृत्वनियाम्यत्वादिव्यपदेशबाधादेव। नहि देवदत्तादेरेकस्यैव गृहाद्युपाधिभेदान्नियन्तृनियाम्यभावादिसिद्धिः। अत उभयव्यपदेशोपपत्तये जीवोऽयं ब्रह्मणोंऽश इत्यभ्युपेत्यम् ॥ ४२ ॥

259 मन्त्रवर्णात् । २ । ३ । ४३ ॥

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि इति मन्त्रवर्णाच्च ब्रह्मांशो जीवः। अंशवाची हि पादशब्दः। *विश्वा भूतानीति जीवानां बहुत्वाद्बहुवचनं मन्त्रे। सूत्रेऽपि अंश इत्येकवचनं जात्यभिप्रायम्; *नात्मा श्रुतेरित्यत्राप्येकवचनं जात्यभिप्रायम्; *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्* इत्यादिश्रुतिभ्य ईश्वराद्भेदस्यात्मनां बहुत्वनित्यत्वयोश्चाभिधीयमानत्वात्। एवं नित्यानामात्मनां बहुत्वे प्रामाणिके सति ज्ञानस्वरूपत्वेन सर्वेषामेकरूपत्वेऽपि भेदकाकारः आत्मयाथात्म्यवेदनक्षमैरवगम्यते। *असन्ततेश्चाव्यतिकरः* इत्यनन्तरमेव चात्मबहुत्वं वक्ष्यति ॥ ४३ ॥

260 अपि स्मर्यते । २ । ३ । ४४ ॥

ममैवांशो जीवलोके जीवभूतस्सनातनः इति जीवस्य पुरुषोत्तमांशत्वं स्मर्यते; अतश्चायमंशः ॥ ४४ ॥

अंशत्वेऽपि जीवस्य ब्रह्मैकदेशत्वेन जीवगता दोषा ब्रह्मण एवेत्याशङ्क्याह—

261 प्रकाशादिवत्तु नैवं परः । २ । ३ । ४५ ॥

तुशब्दश्चोद्यं व्यावर्तयति। प्रकाशादिवज्जीवः परमात्मनोंऽशः, यथाऽग्न्यादित्यादेर्भास्वतो भारूपः प्रकाशोंऽशो भवति, यथा गवाश्वशुक्लकृष्णादीनां गोत्वादिविशिष्टानां वस्तूनां गोत्वादीनि विशेषणान्यंशाः, यथा वा देहिनो देवमनुष्यादिर्देहोंऽशः; तद्वत्। एकवस्त्वेकदेशत्वं ह्यंशत्वम्। विशिष्टस्यैकस्य वस्तुनो विशेषणमंश एव। तथा च विवेचकाः विशिष्टे वस्तुनि विशेषणांशोऽयम्, विशेष्यांशोऽयमिति व्यपदिशन्ति। विशेषणविशेष्ययोरंशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते। एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं, स्वभावभेदश्चोपपद्यते। तदिदमुच्यते—नैवं पर इति। यथाभूतो जीवः, न तथाभूतः परः। यथैव हि प्रभायाः प्रभावानन्यथाभूतः तथा प्रभास्थानीयात् स्वांशाज्जीवादंशी

Digitization by Arya Samaj Charitable Foundation, Chennai

परोऽप्यर्थान्तरभूत इत्यर्थः। एवं जीवपरयोर्विशेषणविशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशाः प्रवर्तन्ते; अभेदनिर्देशास्तु पृथक्सिद्धचनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते। *तत्त्वमसि *अयमात्मा ब्रह्मेत्यादिषु, तच्छब्दब्रह्मशब्दवत् त्वमयमात्मेतिशब्दा अपि, जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वादित्ययमर्थः प्रागेव प्रपञ्चितः॥ ४५॥

262 स्मरन्ति च। २। ३। ४६॥

एवं प्रभाप्रभावद्रूपेण शक्तिशक्तिमद्रूपेण शरीरात्मभावेन चांशांशिभावं जगद्ब्रह्मणोः पराशरादयः स्मरन्ति *एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्॥ *यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज। तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः॥ इत्यादिना। चकाराच्छ्रुतयोऽपि— *यस्यात्मा शरीरम्* इत्यादिना आत्मशरीरभावेनांशांशित्वं वदन्तीत्युच्यते॥ ४६॥

एवं ब्रह्मणोंऽशत्वे, ब्रह्मप्रवर्त्यत्वे, ज्ञत्वे च सर्वेषां समाने केषांचिद्वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा, केषांचित्तत्परिहारः, केषांचिद्दर्शनस्पर्शनाद्यनुज्ञा, केषांचित्तत्परिहारश्च, शास्त्रेषु कथमुपपद्यत इत्याशङ्क्याह—

263 अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्। २। ३। ४७॥

सर्वेषां ब्रह्मांशत्वादिनैकरूपत्वे सत्यपि ब्राह्मणक्षत्रियवैश्यशूद्रादिरूपशुच्यशुचिदेहसंबन्धनिबन्धनावनुज्ञापरिहारावुपपद्येते। ज्योतिरादिवत्— यथाऽग्नेरग्नित्वेनैकरूपत्वेऽपि श्रोत्रियागारादग्निराह्रियते; श्मशानादेस्तु परिह्रियते; यथा चान्नादि श्रोत्रियादेरनुज्ञायते; अभिशस्तादेस्तु परिह्रियते॥ ४७॥

264 असन्ततेश्चाव्यतिकरः। २। ३। ४८॥

ब्रह्मांशत्वादिनैकरूपत्वे सत्यपि जीवानामन्योन्यभेदादणुत्वेन प्रतिशरीरं भिन्नत्वाच्च भोगव्यतिकरोऽपि न भवति। भ्रान्तब्रह्मजीववादे चोपहितब्रह्मजीववादे च जीवपरयोर्जीवानां च भोगव्यतिकरादयस्सर्वे दोषास्सन्तीत्यभिप्रायेण स्वपक्षे भोगव्यतिकराभाव उक्तः॥ ४८॥

ननु भ्रान्तब्रह्मजीववादेऽप्यविद्याकृतोपाधिभेदाद्भोगव्यवस्थादय उपपद्यन्ते; अत आह—

265 आभास एव च। २। ३। ४९॥

अखण्डैकरसप्रकाशमात्रस्वरूपस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनहेतुराभास एव। प्रकाशैकस्वरूपस्य प्रकाशतिरोधानं, प्रकाशनाश एवेति प्रागेवोपपादितम्। *आभासा एव इति वा

Digitization by Arya Samaj Charitable Foundation, Chennai

पाठः; तथा सति हेतव आभासाः, चकारात् *पृथगात्मानं प्रेरितारं च मत्वा *ज्ञाज्ञौ द्वौ *तयोरन्यः पिप्पलं स्वाद्वत्ति* इत्यादिश्रुतिविरोधश्च । अविद्यापरिकल्पितोपाधिभेदेऽपि सर्वोपाधिभिरुपहितस्वरूपस्यैकत्वाभ्युपगमात् भोगव्यतिकरस्तदवस्थ एव ॥ ४९ ॥

पारमार्थिकोपाध्युपहितब्रह्मजीववादेऽप्युपाधिभेदहेतुभूतानाद्यदृष्टवशाद्व्यवस्था भविष्यतीत्याशङ्क्याह—

266 अदृष्टानियमात् । २ । ३ । ५० ॥

उपाधिपरम्पराहेतुभूतस्याद्दष्टस्यापि ब्रह्मस्वरूपाश्रयत्वेन नियमहेत्वभावादव्यवस्थैव, उपाधिभिरदृष्टैश्च स्वसंबन्धेन ब्रह्मस्वरूपच्छेदासंभवात् ॥ ५० ॥

267 अभिसन्ध्यादिष्वपि चैवम् । २ । ३ । ५१ ॥

अदृष्टहेतुभूताभिसन्ध्यादिष्वप्युक्तादेव हेतोरनियम एव ॥ ५१ ॥

268 प्रदेशभेदादिति चेन्नान्तर्भावात् । २ । ३ । ५२ ॥

यद्यप्येकमेव ब्रह्मस्वरूपम्, तच्छेदानर्हं नानाविधोपाधिभिस्संबध्यते; तथाऽप्युपाधिसंबन्धिब्रह्मप्रदेशभेदादुपपद्यत एव भोगव्यवस्थेति चेत्; तन्न, उपाधीनां तत्रतत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्व्यतिकरस्तदवस्थ एव । प्रदेशभेदेन संबन्धेऽपि सर्वस्य ब्रह्मप्रदेशत्वात्तत्तत्प्रदेशसंबन्धि दुःखं ब्रह्मण एव स्यात् । पूर्वत्र *नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा *उपलब्धिवदनियमः* इत्याभ्यां सूत्राभ्यां वेदबाह्यानां सर्वगतजीववादिनां दोष उक्तः; अत्र तु *आभास एव चेत्यादिभिस्सूत्रैर्वेदावलम्बिनामात्मैकत्ववादिनां दोष उच्यते ॥ ५२ ॥ इति अंशाधिकरणम् ॥ ७ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

श्रीमते रामानुजाय नमः

द्वितीयाध्याये–चतुर्थः पादः–प्राणोत्पत्त्यधिकरणम् ॥

269 तथा प्राणाः । २ । ४ । १ ॥

ब्रह्मव्यतिरिक्तस्य वियदादेः कृत्स्नस्य कार्यत्वेनोत्पत्तावुक्तायां जीवस्य कार्यत्वेऽपि स्वरूपान्यथाभावलक्षणोत्पत्तिरपोदिता । तत्प्रसङ्गेन जीवस्वरूपं शोधितम् । संप्रति जीवोपकरणानामिन्द्रियाणां प्राणस्य चोत्पत्त्यादिप्रकारो विशोध्यते । तत्र किमिन्द्रियाणां कार्यत्वं जीववत्; उत वियदादिवदिति चिन्त्यते । किं युक्तम् ? जीववदेवेत्याह पूर्वपक्षी तथा प्राणाः इति । प्राणाः—इन्द्रियाणि । यथा जीवो नोत्पद्यते; तथेन्द्रियाण्यपि नोत्पद्यन्ते । कुतः ? श्रुतेः । यथा जीवस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

नुत्पत्तिः श्रुतेरवगम्यते; तथा प्राणानामप्यनुत्पत्तिः श्रुतेरेवावगम्यते । तथा प्राणा इति प्रमाणमप्यतिदिश्यते । का पुनरत्र श्रुतिः ? *असद्वा इदमग्र आसीत् तदाहुः किं तदासीदिति ऋषयो वा व ते अग्रे सदासीत् तदाहुः के ते ऋषय इति प्राणा वा व ऋषयः* इति जगदुत्पत्तेः प्रागिन्द्रियाणां सद्भावः श्रूयते । प्राणशब्दे बहुवचनादिन्द्रियाण्येवेति निश्चीयते । नचेयं श्रुतिः *वायुश्चान्तरिक्षं चैतदमृतम् *सैषाऽनस्तमिता देवता यद्वायुः* इतिवच्चिरकालावस्थायित्वेन परिणतुं शक्या, *असद्वा इदमग्र आसीत्* इति कृत्स्नप्रपञ्चप्रलयवेलायामप्यवस्थितत्वश्रवणात् । उत्पत्तिवादिन्यस्तु जीवोत्पत्तिवादिन्य इव नेतव्या इति ॥

एवं प्राप्तेऽभिधीयते—वियदादिवदेव प्राणाश्चोत्पद्यन्ते । कुतः ? *सदेव सोम्येदमग्र आसीत् *आत्मा वा इदमेक एवाग्र आसीदित्यादिषु प्राक्सृष्टेरेकत्वावधारणात्, *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च* इतीन्द्रियाणामुत्पत्तिश्रवणाच्च, प्रागवस्थानासंभवात् । नचात्मोत्पत्तिवादवदिन्द्रियोत्पत्तिवादाः परिणेतुं शक्याः, आत्मवदुत्पत्तिप्रतिषेधश्रुतीनां नित्यत्वश्रुतीनां चादर्शनात् । *असद्वा इदमग्र आसीदित्यादिवाक्येऽपि प्राणशब्देन परमात्मैव निर्दिश्यते, सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते* इति प्राणशब्दस्य परमात्मन्यपि प्रसिद्धेः । *प्राणा वा व ऋषयः* इति ऋषिशब्दश्च सर्वज्ञे तस्मिन्नेव युज्यते; न त्वचेतनेष्विन्द्रियेषु ॥ १ ॥

ऋषयः, प्राणा इति च बहुवचनश्रुतिः कथमुपपद्यत इति चेत्, तत्राह—

270 गौण्यसंभवात्तत्प्राक्छ्रुतेश्च । २ । ४ । २ ॥

बहुवचनश्रुतिर्गौणी, बह्वर्थासंभवात्; तस्यैव परमात्मनः सृष्टेः प्रागवस्थानश्रुतेरेव ॥ २ ॥

271 तत्पूर्वकत्वाद्वाचः । २ । ४ । ३ ॥

इतश्च प्राणशब्दः परमात्मवचनः; वाचः—परमात्मव्यतिरिक्तविषयस्य नामधेयस्य वाग्विषयभूतवियदादिसृष्टिपूर्वकत्वात् । *तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत* इति नामरूपभाजामभावात्तदानीं वागादीन्द्रियकार्याभावाच्च तानि न सन्तीत्यर्थः ॥ ३ ॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

अथ सप्तगत्यधिकरणम् ॥ २ ॥

272 सप्त गतेर्विशेषितत्वाच्च । २ । ४ । ४ ॥

तानीन्द्रियाणि किं सप्तैव स्युः, अथवैकादशेति चिन्त्यते । श्रुतिविप्रतिपत्तेस्संशयः । किं प्राप्तम्; सप्तेति । कुतः ? गतेर्विशेषितत्वाच्च । गतिस्तावज्जायमानेन म्रियमाणेन च जीवेन सह लोकेषु सञ्चरणरूपा सप्तानामेव श्रूयते *सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहितास्सप्तसप्त* इति । वीप्सा पुरुषभेदाभिप्राया । विशेषिताश्च ते गतिमन्तः प्राणाः स्वरूपतः *यदा पञ्चावतिष्ठन्ते ज्ञानानि

Digitization by Arya Samaj Charitable Foundation, Chennai

मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ।। इति । शरीरान्तस्संचरणं विहाय मोक्षार्थे-गमनं परमा गतिः । एवं जीवेन सह जन्ममरणयोस्सप्तानामेव गतिश्रवणात् योगदशायां ज्ञानानीति विशेषितत्वाच्च जीवस्य करणानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणबुद्धिमनांसि सप्तैवेति गम्यते । यानि त्वितराणि विषयाणां ग्राहकत्वेन *अष्टौ ग्रहाः *सप्त वै शीर्षण्याः प्राणाः द्वाववाञ्चौ* इत्यादिषु चतुर्दशपर्यन्तानि प्राणप्रतिपादकवाक्येषु वाक्पाणिपादपायूपस्थाहङ्कारचित्ताख्यानीन्द्रियाणि प्रतीयन्ते, तेषां जीवेन सह गतिश्रवणाभावाज्जीवस्याल्पाल्पोपकारकत्वमात्रेणौपचारिकः प्राणव्यपदेशः ।।४।।

इति प्राप्ते प्रचक्ष्महे—

273 हस्तादयस्तु स्थितेऽतो नैवम् । २ । ४ । ५ ॥

न सप्तैवेन्द्रियाणि, अपि त्वेकादश; हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्, कार्यभेदाच्च । दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्यभेद आदानादिः; अतस्तेऽपि सन्त्येव । अतो नैवम्—अतो हस्तादयो न सन्तीत्येवं न मन्तव्यमित्यर्थः । अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इत्येकादशेन्द्रियाणि । अतः *दशेमे पुरुषे प्राणाः आत्मैकादशः* इत्यात्मशब्देन मनोऽभिधीयते । *इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः *तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश । एकादशं मनश्चात्र* इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसङ्ख्या स्थिता । अधिकसङ्ख्यावादाः मनोवृत्तिभेदाभिप्रायाः; न्यूनव्यपदेशास्तु तत्रतत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ताः ।। ५ ।। इति सप्तगत्यधिकरणम् ॥ २ ॥

अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥

274 अणवश्च । २ । ४ । ६ ॥

त एते सर्व एव समाः सर्वेऽनन्ताः इत्यानन्त्यश्रवणाद्विभुत्वं प्राणानाम्; इति प्राप्तेऽभिधीयते— *प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति* इत्युत्क्रान्त्यादिश्रवणात्परिमितत्वे सिद्धे सत्युत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणाः । आनन्त्यश्रुतिस्तु *अथ यो हैताननन्तानुपास्ते* इत्युपासनश्रवणादुपास्यप्राणविशेषणभूतकार्यबाहुल्याभिप्राया ।। ६ ।।

275 श्रेष्ठश्च । २ । ४ । ७ ॥

प्राणसंवादे शरीरस्थितिहेतुत्वेन श्रेष्ठतया निर्णीतो मुख्यप्राणः *आनीदवातं स्वधया तदेकम्* इति महाप्रलयसमये स्वकार्यभूतप्राणनसद्भावश्रवणात्, *एतस्माज्जायते* इति जन्मश्रवणस्य जीवजन्मश्रवणवदुपपत्तेर्नोत्पद्यत इत्याशङ्क्य प्राक्सृष्टेरेकत्वावधारणादिविरोधात्, *एतस्माज्जायते प्राणः* इति पृथिव्यादितुल्योत्पत्तिश्रवणात्, उत्पत्तिनिषेधाभावाच्च, जायत एव श्रेष्ठश्च

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राण इत्युच्यते । *आनीदवातमिति तु न जैवं श्रेष्ठं प्राणमभिप्रेत्योच्यते; अपि तु परस्य ब्रह्मण एकस्यैव विद्यमानत्वमुच्यते, अवातमिति तत्रैव श्रवणात् । पूर्वेणैव तुल्यन्यायत्वेऽपि पृथग्योगकरणमुत्तरचिन्तार्थम् ॥ ७ ॥ इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

अथ वायुक्रियाधिकरणम् ॥ ४ ॥

276 न वायुक्रिये पृथगुपदेशात् । २ । ४ । ८ ॥

सोऽयं श्रेष्ठः प्राणः किं महाभूतद्वितीयवायुमात्रम्; तस्य वा स्पन्दरूपक्रिया; अथवा वायुरेव कश्चन विशेषमापन्नः ? इति विशये, वायुरेवेति प्राप्तम्, *यः प्राणस्स वायुः* इति व्यपदेशात् । यद्वा वायुमात्रे प्राणत्वप्रसिद्ध्यभावादुच्छ्वासनिश्श्वासादिवायुक्रियायां प्राणशब्दप्रसिद्धेश्च तत्क्रियैव ॥ इति प्राप्ते, न वायुमात्रम्, नच तत्क्रियेत्युच्यते । कुतः ? पृथगुपदेशात्— *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुः* इति । तत एव पृथगुपदेशात् वायुक्रियाऽपि न भवति प्राणः; न हि तेजःप्रभृतीनां क्रिया तैस्सह पृथग्द्रव्यतयोपदिश्यते । *यः प्राणस्स वायुरिति तु वायुरेवावस्थान्तरमापन्नः प्राणः; न तेजःप्रभृतिवत्तत्त्वान्तरमिति ज्ञापनार्थम् । उच्छ्वासनिश्श्वासादावपि प्राणः स्पन्दत इति क्रियावति द्रव्य एव प्राणशब्दप्रसिद्धिः; न क्रियामात्रे ॥ ८ ॥

किमयं प्राणो वायोर्विकारस्सन्नग्निवद्भूतान्तरम् ? नेत्याह—

277 चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः । २ । ४ । ९ ॥

नायं भूतविशेषः; अपि तु चक्षुरादिवज्जीवोपकरणविशेषः । तच्चोपकरणत्वमुपकरणभूतैरिन्द्रियैस्सहशिष्ट्यादिभ्योऽवगम्यते । चक्षुरादिभिस्सहायं प्राणः शिष्यते प्राणसंवादादिषु तत्सजातीयत्वे हि तैस्सह शासनं युज्यते । प्राणशब्दपरिगृहीतेषु करणेष्वस्य विशिष्याभिधानमादिशब्देन गृह्यते; *अथ ह य एवायं मुख्यः प्राणः *योऽयं मध्यमः प्राणः* इत्यादिषु विशिष्याभिधानात् ॥ ९ ॥

चक्षुरादिवदस्यापि करणत्वे तद्वदस्यापि जीवं प्रत्युपकारविशेषरूपक्रियया भवितव्यम्; सा तु न दृश्यते; अतो नायं चक्षुरादिवद्भवितुमर्हतीति चेत्, तत्राह—

278 अकरणत्वाच्च न दोषस्तथा हि दर्शयति । २ । ४ । १० ॥

अकरणत्वात्—करणं क्रिया, अक्रियत्वात्, अस्य प्राणस्य जीवं प्रत्युपकारविशेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते, स नास्ति; यत उपकारविशेषरूपां शरीरेन्द्रियधारणादिरूपां

Digitization by Arya Samaj Charitable Foundation, Chennai

क्रियां दर्शयति श्रुतिः—*यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः* इत्युक्त्वा वागाद्युत्क्रमणेऽपि शरीरस्येन्द्रियान्तराणां च स्थितिं दर्शयित्वा प्राणोत्क्रमणे शरीरेन्द्रियशैथिल्याभिधानात् । अतः प्राणापानव्यानोदानसमानाकारेण पञ्चधाऽवस्थितोऽयं प्राणः शरीरेन्द्रियधारणादिना जीवस्योपकरोतीति चक्षुरादिवत्करणत्वम् ॥ १० ॥

नन्वेवं नामभेदात्कार्यभेदाच्च प्राणापानादयस्तत्त्वान्तराणि स्युः; तत्राह—

279 पञ्चवृत्तिर्मनोवद्व्यपदिश्यते । २ । ४ । ११ ॥

यथा कामादिवृत्तिभेदे तत्कार्यभेदेऽपि न कामादिकं मनसस्तत्त्वान्तरं, *कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव* इति वचनात् । एवं *प्राणोऽपानो व्यान उदानस्समान इत्येतत्सर्वं प्राण एव* इति वचनात् अपानादयोऽपि प्राणस्यैव वृत्तिविशेषाः; न तत्त्वान्तरमित्यवगम्यते ॥ ११ ॥ इति वायुक्रियाधिकरणम् ॥ ४ ॥

॥ अथ श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

280 अणुश्च । २ । ४ । १२ ॥

अणुश्चायम्, पूर्ववदुत्क्रान्त्यादिश्रवणात् *तमुत्क्रामन्तं प्राणोऽनूत्क्रामति* इत्यादिषु । अधिकाशङ्का तु *सम एभिस्त्रिभिर्लोकैस्समोऽनेन सर्वेण *प्राणे सर्वं प्रतिष्ठितम् *सर्वं हीदं प्राणेनावृतम्* इत्यादिश्रवणात् महापरिमाण इति । परिहारस्तु—उत्क्रान्त्यादिश्रवणात्परिच्छिन्नत्वे निश्चिते सर्वस्य प्राणिजातस्य प्राणायत्तस्थितित्वेन वैभववादोपपत्तिरिति ॥१२॥ इति श्रेष्ठाणुत्वाधिकरणम्॥५॥

अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

281 ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् । २ । ४ । १३ ॥

सश्रेष्ठानां प्राणानां ब्रह्मण उत्पत्तिरियत्तापरिमाणं चोक्तम् । तेषां प्राणानामग्न्यादिदेवताधिष्ठितत्वं च पूर्वमेव *अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामित्यनेन सूत्रेण प्रसङ्गादुपपादितम् । जीवस्य च स्वभोगसाधनानामेषामधिष्ठातृत्वं लोकसिद्धम्; *एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते* इत्यादिश्रुतिसिद्धं च । तदिदं जीवस्याग्न्यादिदेवतानां च प्राणविषयमधिष्ठानं किं स्वायत्तम्, उत परमात्मायत्तमिति विशये नैरपेक्ष्यात्स्वायत्तम् ॥

इति प्राप्त उच्यते—ज्योतिराद्यधिष्ठानमिति । प्राणवता—जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां प्राणविषयमधिष्ठानम्, तदामननात्—तस्य परमात्मनः आमननाद्भवति । आम-

Digitization by Arya Samaj Charitable Foundation, Chennai

ननम्—आभिमुख्येन मननम्, परमात्मनस्सङ्कल्पादेव भवतीत्यर्थः।कुत एतत्? शब्दात्—इन्द्रियाणां साभिमानिदेवतानां जीवात्मनश्च स्वकार्येषु परमपुरुषमननायत्तत्वशास्त्रात्। यथाऽन्तर्यामिब्राह्मणादिषु *योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निश्शरीरं योऽग्निमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः *यो वायौ तिष्ठन् *य आदित्ये तिष्ठन् *य आत्मनि तिष्ठन् *यश्चक्षुषि तिष्ठन्* इत्यादि। यथा च *भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः, भीषाऽस्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चमः* इति। तथा *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः* इत्यादि ॥ १३ ॥

282 तस्य च नित्यत्वात्। २। ४। १४॥

सर्वेषां परमात्माधिष्ठितत्वस्य नित्यत्वात्, स्वरूपानुबन्धित्वेन नियतत्वाच्च तत्सङ्कल्पादेवैषामधिष्ठातृत्वमवर्जनीयम्। *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्* इत्यादिना परमपुरुषस्य नियन्तृत्वेन सर्वचिदचिद्वस्त्वनुप्रवेशः स्वरूपानुबन्धी श्रूयते। स्मर्यते च *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्* इति ॥ १४ ॥ इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६॥

अथ इन्द्रियाधिकरणम् ॥ ७ ॥

283 त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्। २। ४। १५॥

किं सर्वे प्राणशब्दनिर्दिष्टा इन्द्रियाणि, उत श्रेष्ठप्राणव्यतिरिक्ता एवेति विशये प्राणशब्दवाच्यत्वात्, करणत्वाच्च सर्व एवेन्द्रियाणि। इति प्राप्त उच्यते—श्रेष्ठव्यतिरिक्ता एव प्राणा इन्द्रियाणि।कुतः? श्रेष्ठादन्येष्वेव प्राणेषु तद्व्यपदेशात्। *इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः* इत्यादिभिर्हि चक्षुरादिषु समनस्केष्वेव इन्द्रियशब्दो व्यपदिश्यते ॥ १५ ॥

284 भेदश्रुतेर्वैलक्षण्याच्च। २। ४। १६॥

एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च इत्यादिष्विन्द्रियेभ्यः प्राणस्य पृथक्छ्रवणात्प्राणव्यतिरिक्तानामेवेन्द्रियत्वमवगम्यते। मनसः पृथक्छ्रवणेऽपि तस्यान्यत्रेन्द्रियान्तर्भाव उक्तः *मनष्षष्ठानीन्द्रियाणि* इत्यादौ। वैलक्षण्यं च चक्षुरादिभ्यः श्रेष्ठप्राणस्योपलभ्यते; सुषुप्तौ हि प्राणस्य वृत्तिरुपलभ्यते, चक्षुरादीनां तु वृत्तिर्नोपलभ्यते। कार्यं च चक्षुर्वागादीनां समनस्कानां ज्ञानकर्मसाधनत्वम्; प्राणस्य तु शरीरेन्द्रियधारणम्।प्राणाधीनधारणत्वात्त्विन्द्रियेषु प्राणशब्दव्यपदेशः।तथा च श्रुतिः *त एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्ते* इति। रूपमभवन्—शरीरमभवन्, तदधीनप्रवृत्तयोऽभवन्नित्यर्थः ॥ १६ ॥ इति इन्द्रियाधिकरणम् ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

285 संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्।२।४।१७॥

भूतेन्द्रियादीनां समष्टिसृष्टिः, जीवानां कर्तृत्वं च परस्माद्ब्रह्मण इत्युक्तं पुरस्तात्। जीवानां स्वेन्द्रियाधिष्ठानं च परायत्तमिति चानन्तरं स्थिरीकरणाय स्मारितम्। या त्वियं नामरूपव्याकरणात्मिका प्रपञ्चव्यष्टिसृष्टिः, सा किं समष्टिजीवरूपस्य हिरण्यगर्भस्यैव कर्म? उत तेजःप्रभृतिशरीरकस्य परस्याबादिसृष्टिवद्धिरण्यगर्भशरीरकस्य परस्य ब्रह्मणः? इतीदानीं चिन्त्यते। किं युक्तम्? समष्टिजीवस्येति; कुतः? *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति जीवकर्तृकत्वश्रवणात्। न हि परा देवता स्वेन रूपेण नामरूपे व्याकरवाणीत्यैक्षत; अपितु स्वांशभूतेन जीवरूपेण, *अनेन जीवेनात्मनेति वचनात्। नन्वेवं चारेणानुप्रविश्य परबलं सङ्कलयानीतिवत् *व्याकरवाणीत्युत्तमपुरुषः कर्तृस्थक्रियश्च प्रविशतिर्लाक्षणिकस्स्यात्। नैवम्, तत्र राजचारयोः स्वरूपभेदाल्लाक्षणिकत्वम्, इह तु जीवस्यापि स्वांशत्वेन स्वरूपत्वात्तेन रूपेण प्रवेशो व्याकरणं चात्मन एवेति न लाक्षणिकत्वप्रसङ्गः। नच सहयोगलक्षणेयं तृतीया, कारकविभक्तौ संभवन्त्यामुपपदविभक्तेरन्याय्यत्वात्। नच करणे तृतीया, ब्रह्मकर्तृकयोः प्रवेशव्याकरणयोर्जीवस्य साधकतमत्वाभावात्। नच जीवस्य कर्तृत्वं प्रवेशमात्रे पर्यवस्यति, नामरूपव्याकरणं तु ब्रह्मण एवेति शक्यं वक्तुम्; क्त्वाप्रत्ययेन समानकर्तृकत्वप्रतीतेः। जीवस्य स्वांशत्वेन स्वरूपत्वेऽपि परस्वरूपव्यावृत्त्यर्थः *अनेन जीवेनेति पराक्त्वेन परामर्शः। अतो हिरण्यगर्भकर्तृकेयं नामरूपव्याक्रिया। अतएव च स्मृतिषु चतुर्मुखकर्तृकसृष्टिप्रकरणे नामरूपव्याकरणं सङ्कीर्त्यते *नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार सः॥ इत्यादि॥

एवं प्राप्तेऽभिधीयते—संज्ञामूर्तिक्लृप्तिस्तु इति। तुशब्दः पक्षं व्यावतयति। संज्ञामूर्तिक्लृप्तिः—नामरूपव्याकरणम्। तत् त्रिवृत्कुर्वतः परस्यैव ब्रह्मणः, तस्यैव नामरूपव्याकरणोपदेशात्। त्रिवृत्करणं कुर्वत एव हि नामरूपव्याकरणमुपदिश्यते, *सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतंत्रिवृतमेकैकां करवाणि* इति समानकर्तृकत्वप्रतीतेः। त्रिवृत्करणं तु चतुर्मुखस्याण्डान्तर्वर्तिनो न संभवति, त्रिवृत्कृतैस्तेजोबन्नैर्ह्यण्डमुत्पाद्यते। चतुर्मुखस्य चाण्डे संभवः स्मर्यते— *तस्मिन्नण्डेऽभवद्ब्रह्मा सर्वलोकपितामहः* इति। अतस्त्रिवृत्करणं परस्यैव ब्रह्मणः; तत्समानकर्तृकं नामरूपव्याकरणं च तस्यैवेति विज्ञायते। कथं तर्हि *अनेन जीवेनेति सङ्गच्छते? *आत्मना जीवेनेति सामानाधिकरण्यात् जीवशरीरकं परं ब्रह्मैव जीवशब्देनाभिधीयते; यथा *तत्तेज ऐक्षत *तदपोऽसृजत *ता आप ऐक्षन्त *ता अन्नमसृजन्त* इति तेजःप्रभृतिशरीरकं परमेव ब्रह्माभिधीयते। अतो जीवसमष्टिभूतहिरण्यगर्भशरीरकस्य परस्यैव ब्रह्मणः कर्म नामरूप-

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याकरणम् । एवं च *प्रविश्य नामरूपे व्याकरवाणीति प्रविशतिरुत्तमपुरुषश्चाक्लिष्टौ मुख्यार्थावेव भवतः । प्रवेशव्याकरणयोस्समानकर्तृकत्वमप्युपपद्यते । चतुर्मुखशरीरकस्य परस्यैव ब्रह्मणः कर्म देवादिविचित्रसृष्टिरिति चतुर्मुखकर्तृकसृष्टिप्रकरणे नामरूपव्याक्रियोपदेशश्चोपपद्यते । अतः *सेयं देवतेत्यादिवाक्यस्यायमर्थः–-इमाः—तेजोऽबन्नरूपास्तिस्रो देवताः, अनेन जीवेन—जीवसमष्टिविशिष्टेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि—देवादिविचित्रसृष्टिं तन्नामधेयानि च करवाणि । तदर्थमन्योन्यसंसर्गमप्राप्तानामेषां तेजोबन्नानां विशेषसृष्टयसमर्थानां तत्सामर्थ्यायैकैकां त्रिवृतंत्रिवृतं करवाणीति । अतः परस्यैव ब्रह्मणः कर्मेदं नामरूपव्याकरणम् ॥ १७ ॥

अथ स्यात्—नामरूपव्याकरणस्य त्रिवृत्करणेनैककर्तृकत्वात्परमात्मकर्तृकमिति न शक्यते वक्तुम्, त्रिवृत्करणस्यापि जीवकर्तृकत्वसंभवात् । अण्डसृष्टयुत्तरकालं हि चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते— *यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति *अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः* इत्यादिना । तथा पूर्वस्मिन्नपि वाक्ये *यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य* इत्यादिना चतुर्मुखसृष्टाग्न्यादित्यचन्द्रविद्युत्सु त्रिवृत्करणं प्रदर्श्यते । नामरूपव्याकरणोत्तरकालं च त्रिवृत्करणं श्रूयते *सेयं देवतेमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतंत्रिवृतमेकैकामकरोत्* इति । तत्राह—

286 मांसादि भौम यथाशब्दमितरयोश्च । २ । ४ । १८ ॥

यदुक्तमण्डसृष्टयुत्तरकालं चतुर्मुखसृष्टदेवतादिविषयोऽयं *तासां त्रिवृतंत्रिवृतमेकैकामकरोदिति त्रिवृत्करणोपदेश इति; तन्नोपपद्यते; *अन्नमशितं त्रेधा विधीयते इत्यत्र मांसमनसोः पुरीषादणुत्वेनाणीयस्त्वेन च व्यपदिष्टयोः कारणानुविधायित्वेनाप्यतैजसत्वप्रसङ्गात्; *आपः पीताः इत्यत्रापि मूत्रप्राणयोः स्थविष्ठाणीयसोः पार्थिवत्वतैजसत्वप्रसङ्गाच्च । नचैवमिष्यते; मांसादि हि भौममिष्यते— पुरीषवन्मांसमनसी अपि भौमे—-पार्थिवे इष्येते, *अन्नमशितं त्रेधेति प्रक्रमात् । यथाशब्दमितरयोश्च—इतरयोरपि *आपः पीताः *तेजोऽशितमिति पर्याययोर्यथाशब्दं विकारा इष्यन्ते । *आपः पीतास्त्रेधा विधीयन्त इत्यपामेव त्रेधा परिणामः शब्दात्प्रतीयते; तथा *तेजोऽशितं त्रेधा विधीयत इत्यपि तेजस एव त्रेधा परिणामः शब्दात्प्रतीयते । अतः पुरीषमांसमनांसि पृथिवीविकाराः, मूत्रलोहितप्राणाः अब्विकाराः, अस्थिमज्जावाचस्तेजोविकारा इति प्रतिपत्तव्यम्; *अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वाक्* इति वाक्यशेषाविरोधाच्च । अतः *तासां त्रिवृतंत्रिवृतमेकैकामकरोदित्युक्तस्त्रिवृत्करणप्रकारः *अन्नमशितमित्यादिना न प्रदर्श्यते; तथा सति मनःप्राणवाचां त्रयाणामप्यणीयस्त्वेन तैजसत्वात् *अन्नमयं हि सोम्य मनः* इत्यादिर्विरुध्यते । प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानाम् *अन्नमशितमित्यादिनैकैकस्य त्रेधा परिणाम

Digitization by Arya Samaj Charitable Foundation, Chennai

उच्यते । अण्डसृष्टेः प्रागेव च तेजोबन्नानां त्रिवृत्करणेन भवितव्यम्, अत्रिवृत्कृतानां तेषां कार्यारम्भासामर्थ्यात् । अन्योन्यसंयुक्तानामेव हि कार्यारम्भसामर्थ्यम्; तदेव च त्रिवृत्करणम् । तथा च स्मर्यते *नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना । नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥ इति । अत एव च *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतंत्रिवृतमेकैकामकरोत्* इति पाठक्रमोऽर्थक्रमेण बाध्यते । अण्डान्तर्वर्तिष्वग्न्यादित्यादिषु त्रिवृत्करणप्रदर्शनं श्वेतकेतोश्शुश्रूषोरण्डान्तवर्तित्वेन तस्य बहिष्ठवस्तुषु त्रिवृत्करणप्रदर्शनायोगात्त्रिवृत्कृतानां कार्येषु अग्न्यादित्यादिषु क्रियते॥ ॥ १८ ॥

स्यादेतत्; *अन्नमशितम् *आपः पीताः *तेजोऽशितम्* इति त्रिवृत्कृतानामन्नादीनामेकैकस्य तेजोबन्नात्मकत्वेन त्रिरूपस्य कथमन्नमापस्तेज इत्येकैकरूपेण व्यपदेश उपपद्यत इति; तत्राह—

287 वैशेष्यात्तु तद्वादस्तद्वादः । २ । ४ । १९ ॥

वैशेष्यं—विशेषभावः । त्रिवृत्करणेन त्रिरूपेऽप्येकैकस्मिन्नन्नाद्याधिक्यात्तत्रतत्रान्नादिवादः । द्विरुक्तिरध्यायसमाप्तिं द्योतयति ॥ १९ ॥ इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः

तृतीयाध्याये—प्रथमः पादः—तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

288 तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । ३ । १ । १ ॥

अतिक्रान्ताध्यायद्वयेन निखिलजगदेककारणं निरस्तनिखिलदोषगन्धमपरिमितोदारगुणसागरं सकलेतरविलक्षणं परं ब्रह्म मुमुक्षुभिरुपास्यतया वेदान्ताः प्रतिपादयन्तीत्ययमर्थः स्मृतिन्यायविरोधपरिहारपरपक्षप्रतिक्षेपवेदान्तवाक्यपरस्परविरोधपरिहाररूपकार्यस्वरूपसंशोधनैस्तद्दुर्धर्षणत्वहेतुभिस्सह स्थापितः । अतोऽध्यायद्वयेन ब्रह्मणस्स्वरूपं प्रतिपादितम् । उत्तरेणेदानीं तत्प्राप्त्युपायैस्सह प्राप्तिप्रकारश्चिन्तयितुमिष्यते । तत्र तृतीयाध्याये उपायभूतोपासनविषया चिन्ता वर्तते । उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यम्, प्राप्यतृष्णा चेति, तत्सिद्ध्यर्थं जीवस्य लोकान्तरेषु संचरतो जाग्रतस्स्वपतस्सुषुप्तस्य मूर्च्छतश्च दोषाः, परस्य च ब्रह्मणस्तद्रहितता, कल्याणगुणाकरत्वं च प्रथमद्वितीययोः पादयोः प्रतिपाद्यन्ते । तत्र देहाद्देहान्तरं गच्छन्नयं जीवो देहान्तरारम्भहेतुभिर्भूतसूक्ष्मैस्संपरिष्वक्त एव गच्छति, उत नेति चिन्तायां यत्रयत्र जीवो याति तत्रतत्र भूतसूक्ष्माणां सुलभत्वादसंपरिष्वक्तो यातीति प्राप्तम् । पश्चादपि पूर्वपक्षबीजान्युपन्यस्य निरसिष्यति ॥

तत्र सिद्धान्तमाह—तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त इति । *संज्ञामूर्तिक्लृप्तिरिति (2.4.17.) मूर्तिशब्देन देहः प्रस्तुतः; स तच्छब्देन परामृश्यते । तदन्तरप्रतिपत्तौ—देहान्तरगमने भूतसूक्ष्मैस्संपरिष्वक्तो जीवो रंहति—गच्छतीत्यर्थः । कुतः ? प्रश्ननिरूपणाभ्यां—प्रश्नप्रतिवचनाभ्याम् । पञ्चाग्निविद्यायामेवं प्रश्नप्रतिवचने आम्नायेते—श्वेतकेतुं किलारुणेयं पाञ्चालः प्रवाहणः कर्मिणां गन्तव्यदेशं, पुनरावृत्तिप्रकारं, देवयानपितृयाणपथव्यावर्तने, अमुष्य लोकस्याप्रापूरं च वेत्थेति पृष्ट्वेदमपि पप्रच्छ—*वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति* इति । (ch 5.3.3.) तत इमं पश्चिमं प्रश्नं प्रतिब्रुवंश्च द्युलोकमग्नित्वेन रूपयित्वा *तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवति* इत्यादिना देवाख्याः जीवस्य प्राणाः अग्नित्वेन रूपिते द्युलोके श्रद्धाख्यं वस्तु प्रक्षिपन्ति; सा च श्रद्धा सोमराजाख्यामृतमयदेहरूपेण परिणमते । तं चामृतमयं देहं त एव प्राणाः पर्जन्येऽग्नित्वेन रूपिते प्रक्षिपन्ति; स च देहस्तत्र प्रक्षिप्तो वर्षं भवति । तच्च वर्षं त एव प्राणाः पृथिव्यामग्नित्वरूपितायां प्रक्षिपन्ति; तच्च तत्र प्रक्षिप्तमन्नं भवति । तच्चान्नं त एव पुरुषेऽग्नित्वरूपिते प्रक्षिपन्ति; तच्च तत्र रेतो भवति । तच्च त एव योषायामग्नित्वरूपितायां प्रक्षिपन्ति; तच्च तत्र प्रक्षिप्तं गर्भो भवतीत्युक्त्वा आह—*इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति* इति । एवं पञ्चम्यामाहुतौ हुतायामापः पुरुषशब्दाभिलप्या भवन्तीत्यर्थः । एवमुक्ते पूर्वास्वप्याहुतिष्वनुवर्तमानानामेवापां सूक्ष्मरूपाणामिदानीं पुरुषाकारत्वं भवतीत्युक्तं भवति । अत एवं प्रश्नप्रतिवचनाभ्यां देहहेतुभूतभूतसूक्ष्मैस्सह तत्रतत्र यातीति गम्यते ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु *आपः पुरुषवचस इत्युक्ते अपां पुरुषाकारपरिणामप्रतीतेर्गच्छता जीवेन तासामेव परिष्वङ्गः प्रतीयते। अतः कथं सर्वेषां भूतसूक्ष्माणां परिष्वङ्ग इति ? तत्राह—

289 त्र्यात्मकत्वात्तु भूयस्त्वात्। ३। १। २॥

तुशब्दश्चोद्यं व्यावर्तयति। देहारम्भकाणामपां केवलानां न देहारम्भसंभवः। देहाद्यारम्भाय हि *तासां त्रिवृतंत्रिवृतमेकैकामिति त्रिवृत्करणम्। केवलानामपां श्रवणं तुं तासां भूयस्त्वात्। देहे च लोहितादिभूयस्त्वेनारम्भकेष्वपां भूयस्त्वं गम्यते ॥ २ ॥

290 प्राणगतेश्च। ३। १। ३॥

इतश्च भूतसूक्ष्मपरिष्वक्तस्य गमनमिति गम्यते। उत्क्रामति जीवे प्राणानां तदनुगतिश्श्रूयते—*तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति* इति। स्मर्यते च—*मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति। शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ इति। नच निराश्रयाणां गतिरुपपद्यत इति तदाश्रयभूतानां भूतसूक्ष्माणामपि गतिरभ्युपगन्तव्या ॥ ३ ॥

291 अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्। ३। १। ४॥

यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्यम् इत्यादिना प्राणानजीवमरणकाले अग्न्यादिष्वप्ययश्रवणान्न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेति चेत्, न, भाक्तत्वात् अग्न्यादिष्वप्ययश्रवणस्य। कथं भाक्तत्वम् ? *ओषधीर्लोमानि वनस्पतीन् केशाः* इत्यनपियद्भिर्लोमादिभिस्सह श्रवणात्। अतश्चक्षुराद्यप्ययश्रुतिरधिष्ठातृदेवतापक्रमणपरा ॥ ४ ॥

292 प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः। ३। १। ५॥

यदुक्तमद्भिस्सूक्ष्माभिर्भूतान्तरसंसृष्टाभिः परिष्वक्तो जीवो गच्छतीति प्रश्नप्रतिवचनाभ्यामवगम्यत इति; तन्नोपपद्यते, द्युलोकाग्निविषये प्रथमे होमे अपां होम्यत्वाश्रवणात्। *तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति* इति श्रद्धैव होम्यत्वेन श्रुता। श्रद्धा नाम जीवस्य मनोवृत्तिविशेषत्वेन प्रसिद्धा। अतो नापस्तत्र होम्या इति चेत्, न, यतः ताः—आप एव श्रद्धाशब्देन तत्राभिधीयन्ते; कुतः ? प्रश्नप्रतिवचनोपपत्तेः। *वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नस्य प्रतिवचनोपक्रमे हि श्रद्धा द्युलोकाग्नौ होम्यत्वेन श्रुता। तत्र यदि श्रद्धाशब्देनापो नोच्येरन्, ततोऽन्यथा प्रश्नोऽन्यथा प्रतिवचनमित्यसङ्गत स्यात्। *इति तु पञ्चम्यामाहुतावापः पुरुषवचसः इति प्रतिवचननिगमनं च श्रद्धाया अप्त्वमेव सूचयति। *वेत्थ यथेति हि प्रश्नगतः प्रकारः, *इति तु

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चम्यामितीतिशब्देन परिहारे निगम्यते। श्रद्धासोमराजवर्षान्नरेतोगर्भरूपेणापां परिणाममुक्त्वा ह्येवमापः पुरुषवचस इति निगम्यते। श्रद्धाशब्दस्य चाप्सु वैदिकप्रयोगो दृश्यते—*अपः प्रणयति श्रद्धा वा आपः* इति। *श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवति* इति सोमाकारेण परिणामश्चापामेवोपपद्यते। अतो भूतान्तरसंसृष्टाभिरद्भिस्संपरिष्वक्तो जीवो रंहतीत्युपपन्नम् ॥ ५ ॥

293 अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः। ३। १। ६॥

यत्पुनरुक्तमद्भिस्संपरिष्वक्तो जीवो यातीत्ययमर्थः एतस्माद्वाक्यादवगम्यत इति; तन्नोपपद्यते, अस्मिन्वाक्ये जीवस्याश्रवणात्। अत्र हि श्रद्धादय एवाम्ब्ववस्थाविशेषा होम्यत्वेन श्रुताः; न तु जीवस्तत्परिष्वक्त इति चेत्; तन्न, इष्टादिकारिणां प्रतीतेः—अस्मिन्नेव वाक्ये ह्युत्तरत्र ब्रह्मज्ञानविधुरेष्टापूर्तदत्तकारिणो द्युलोकं प्राप्य सोमराजानो भवन्ति; पुण्यकर्मावसाने च पुनरागत्य गर्भं प्राप्नुवन्तीत्युच्यते *अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति* इत्यारभ्य *पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति *तस्मिन्यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते *योयो ह्यन्नमत्ति योयो रेतस्सिञ्चति तद्भूय एव भवति* इति। अत्रापि द्युलोकाग्नौ * श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवति* इति तदेकार्थत्वाच्छ्रद्धावस्थदेहविशिष्टस्सोमरूपदेहविशिष्टो भवतीत्युक्तमिति गम्यते। देहस्य जीवविशेषणतैकस्वरूपस्य वाचकः शब्दो विशेष्ये जीव एव पर्यवस्यति। अतस्संपरिष्वक्तो जीवो यातीत्युपपद्यते ॥ ६ ॥

ननुच *तं देवा भक्षयन्तीति देवैर्भक्ष्यमाणत्ववचनात् *सोमो राजेति न जीव उच्यते, जीवस्यानदनीयत्वात्; तत्राह—

294 भाक्तं वाऽनात्मवित्वात्तथा हि दर्शयति। ३। १। ७॥

वाशब्दश्चोद्यं व्यावर्तयति। इष्टादिकारिणोऽनात्मवित्त्वात्स देवानां भोगोपकरणत्वेनेहामुत्र च वर्तते। इहेष्टादिना तदाराधनं कुर्वन्नुपकरोति। आराधनप्रीतैर्देवैर्दत्तममुं लोकं प्राप्य तत्र तत्समानभोगस्तदुपकरणं भवति। *यथा पशुरेवं स देवानाम्* इत्यनात्मविदो देवानामुपकरणत्वं दर्शयति श्रुतिः। स्मृतिरप्यात्मविदां ब्रह्मप्राप्तिमनात्मविदां च देवभोग्यत्वं दर्शयति—*देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि* इति। अतो जीवस्य देवानां भोगोपकरणत्वाभिप्रायमन्नत्वेन भक्ष्यत्ववचनम्; अतस्तद्भाक्तम्। तेन तृप्तिरेव च देवानां भक्षणमिति श्रूयते *न ह वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति* इति। तस्माद्भूतसूक्ष्मैस्संपरिष्वक्तो जीवो रंहतीति सिद्धम् ॥ ७ ॥ इति तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ कृतात्ययाधिकरणम् ॥ २ ॥

295 कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च । ३ । १ । ८ ॥

केवलेष्टापूर्तदत्तकारिणां धूमादिना पितृयाणेन पथा गमनं कर्मफलावसाने पुनरावर्तनं चाम्नातं *यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते *इति। तत्र प्रत्यवरोहन् जीवः किमनुशयवान् प्रत्यवरोहति, उत नेति संशय्यते। किं युक्तम् ? कर्मणः कृत्स्नस्योपभुक्तत्वात् नानुशयवानिति प्राप्तम्। अनुशयो ह्युपभुक्तशिष्टं कर्म। तच्च कृत्स्नफलोपभोगे सति नावशिष्यते। *यावत्सम्पातमुषित्वेति वचनात् कृत्स्नोपभोगश्च ज्ञायते। संपतन्त्यनेन स्वर्गं लोकमिति संपातः कर्मोच्यते। श्रुत्यन्तरं च *प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥ इति ॥

एवं प्राप्तेऽभिधीयते—अनुशयवान् प्रत्यवरोहतीति। कुतः ? दृष्टस्मृतिभ्यां—श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्—*तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा* इति प्रत्यवरूढान् प्रति श्रूयते। अमुष्माल्लोकात्प्रत्यवरूढेषु रमणीयकर्माणो रमणीयां ब्राह्मणादियोनिं प्रतिपद्यन्ते; कपूयचरणाः कुत्सितकर्माणः कुत्सितां श्वसूकरचण्डालादियोनिं प्रतिपद्यन्त इति प्रत्यवरूढानां पुण्यपापकर्मयोगं दर्शयति। स्मृतिरपि—*वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुरश्रुतवित्तवृत्तसुखमेधसो (हि) जन्म प्रतिपद्यन्ते विष्वञ्चो विपरीता नश्यन्ति* इति। तथा *ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते तच्चक्रवदुभयोर्लोकयोस्सुख एव वर्तते *इति। *यावत्संपातमिति फलदानप्रवृत्तकर्मविशेषविषयम्; *यत्किंचेह करोत्ययम्* इतीदमपि तद्विषयमेव। अभुक्तफलानामकृतप्रायश्चित्तानां च कर्मणां कर्मान्तरफलानुभवान्नाशोऽप्यनुपपन्नः। अतोऽमुं लोकं गतास्सानुशया एव यथेतमनेवं च पुनर्निवर्तन्ते—आरोहणप्रकारेण प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः। आरोहणं हि धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण; अवरोहणं तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघक्रमेण। तत्राकाशावरोहणाद्यथेतम्; वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्चानेवम् ॥ ८ ॥

296 चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः । ३ । १ । ९ ॥

*रमणीयचरणाः *कपूयचरणा इति न चरणशब्देन पुण्यपापरूपं कर्माभिधीयते, चरणशब्दस्य लोकवेदयोराचारे प्रसिद्धेः। लौकिकाः खलु चरणमाचारः शीलं वृत्तमिति पर्यायानभिमन्यन्ते; वेदे च *यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि *यान्यस्माकं सुचरितानि, तानि

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वयोपास्यानि* इति चरणकर्मणी भेदेन व्यपदिश्येते। अतः चरणात्—शीलात् योनिविशेषप्राप्तिः, नानुशयादिति चेत्; तन्न, चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनिराचार्यो मन्यते, केवलादाचारात्सुखदुःखप्राप्त्यसंभवात्। सुखदुःखे हि पुण्यपापरूपकर्मफले ॥ ९ ॥

297 आनर्थक्यमिति चेन्न तदपेक्षत्वात्। ३। १। १०॥

एवं तर्ह्यफलत्वादाचारस्य स्मृतिविहितस्यानर्थक्यमेवेति चेत्; तन्न, तदपेक्षत्वात्पुण्यस्य कर्मणः। आचारवत एव पुण्यकर्मस्वधिकारः, *सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु *आचारहीनं न पुनन्ति वेदाः* इत्यादिवचनेभ्यः। अतश्चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनेरभिप्रायः ॥ १० ॥

298 सुकृतदुष्कृते एवेति तु बादरिः। ३। १। ११ ॥

पुण्यं कर्माचरति, पापं कर्माचरतीति कर्मणि चरतेः प्रयोगात्, पृथङ्निर्देशस्य च प्रत्यक्षश्रुतिसिद्धाचारानुमितश्रुतिसिद्धविषयत्वेन गोबलीवर्दन्यायेनोपपत्तेः, मुख्ये संभवति न लक्षणा न्याय्येति सुकृतदुष्कृते एव चरणशब्दाभिधेये इति बादरिराचार्यो मन्यते। अत्र बादरिमतमेव स्वमतम्। आचारानुमितश्रुतिविहितसन्ध्यावन्दनादेः कर्मान्तराधिकारसंपादनं फलमिति तु स्वीकृतम्। अतस्सानुशया एव प्रत्यवरोहन्ति ॥ ११ ॥ इति कृतात्ययाधिकरणम् ॥ २ ॥

अथ अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

299 अनिष्टादिकारिणामपि च श्रुतम्। ३। १। १२ ॥

केवलेष्टापूर्तदत्तकारिणश्चन्द्रमसं गत्वा सानुशया एव निवर्तन्त इत्युक्तम्। इदानीमनिष्टादिकारिणोऽपि चन्द्रमसं गच्छन्ति, नेति चिन्त्यते। ये विहितं न कुर्वन्ति, निषिद्धं च कुर्वन्ति, त उभयेऽपि पापकर्माणोऽनिष्टादिकारिणः। किं युक्तम्? तेऽपि चन्द्रमसं गच्छन्तीति। कुतः? तेषामपि हि तद्गमनं श्रुतम्, *ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति* इत्यविशेषेण सर्वेषामेव गतिश्रवणात् ॥ १२ ॥

एवं तर्हि सुकृतदुष्कृतकारिणोरुभयोरप्यविशिष्टैव गतिस्स्यात्; नेत्याह—

300 संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्। ३। १। १३ ॥

तुशब्दश्शङ्कां व्यावर्तयति। इतरेषाम् अनिष्टादिकारिणां चन्द्रारोहावरोहौ संयमने—यमशासने तत्प्रयुक्तयातना अनुभूयैव, नान्यथा; कुतः? तद्गतिदर्शनात्—दृश्यते हि पापकर्मणां

Digitization by Arya Samaj Charitable Foundation, Chennai

यमवश्यतया तद्गमनम् *अयं लोको नास्ति न पर इति मानी पुनःपुनर्वशमापद्यते मे *वैवस्वतं संगमनं जनानां यमं राजानम्* इत्यादिषु ॥ १३ ॥

301 स्मरन्ति च । ३ । १ । १४ ॥

स्मरन्ति च सर्वेषां यमवश्यतां पराशरादयः—*सर्वे चैते वशं यान्ति यमस्य भगवन्किल* इत्यादिषु ॥ १४ ॥

302 अपि सप्त । ३ । १ । १५ ॥

पापकर्मणां गन्तव्यत्वेन रौरवादीन् सप्त नरकानपि स्मरन्ति ॥ १५ ॥

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः, अत आह—

303 तत्रापि तद्व्यापारादविरोधः । ३ । १ । १६ ॥

तेष्वपि सप्तसु यमाज्ञयैव गमनादविरोधः। अतोऽनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चाच्चन्द्रारोहावरोहौ स्तः ॥ १६ ॥

इति प्राप्त उच्यते—

304 विद्याकर्मणोरिति तु प्रकृतत्वात् । ३ । १ । १७ ॥

तुशब्दः पक्षव्यावृत्त्यर्थः। अनिष्टादिकारिणामपि चन्द्रप्राप्तिरस्तीत्येतन्नोपपद्यते; कुतः? विद्याकर्मणोरिति—विद्याकर्मणोः फलभोगार्थत्वाद्देवयानपितृयाणयोः। एतदुक्तं भवति—अनिष्टादिकारिणां यथा विद्याविधुरत्वाद्देवयानेन पथा गमनं न संभवति; तद्वदेवेष्टापूर्तदत्तविधुरत्वात्पितृयाणेन चन्द्रगमनमपि न संभवतीति। देवयानपितृयाणयोः विद्याविषयत्वं पुण्यकर्मविषयत्वं च कथमवगम्यत इति चेत्; प्रकृतत्वात्तयोः। प्रकृता हि देवयाने विद्या, पितृयाणे च कर्म; *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते* इत्युक्त्वा *तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः* इत्यादिना देवयानवचनात्, *अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते* इत्युक्त्वा *ते धूममभिसंभवन्ति* इत्यादिना पितृयाणवचनाच्च। *ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति* इत्येतदपि वचनं य इष्टादिकारिणः ते सर्वे इति परिणेयम् ॥ १७ ॥

ननु पापकर्मणां चन्द्रगमनाभावे पञ्चमाहुत्यसंभवाच्छरीरारम्भ एव नोपपद्यते; *पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति* इति हि शरीरारम्भश्श्रूयते, सा चाहुतिश्चन्द्रप्राप्तिपूर्विकेति दर्शितम्; अतश्शरीरारम्भायैव तेषामपि चन्द्रारोहावरोहाववश्याभ्युपेत्यावित्यत आह—

Digitization by Arya Samaj Charitable Foundation, Chennai

305 न तृतीये तथोपलब्धेः । ३ । १ । १८ ।

तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा; कुतः ? तथोपलब्धेः—तृतीयस्थानशब्देन केवलपापकर्माण उच्यन्ते, तेषां देहारम्भे पञ्चमाहुत्यनेपक्षत्वमुपलभ्यते *वेत्थ यथा केनासौ लोको न संपूर्यते* इत्यस्य प्रश्नस्य प्रतिवचने *अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते* इति तृतीयस्थानस्य द्युलोकारोहावरोहाभावेन द्युलोकासंपूर्तिवचनादस्य तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । पञ्चम्यामाहुताविति चापां पञ्चमाग्निसंबन्धस्य पुरुषवचस्त्वहेतुत्वमात्रं प्रतिपादयति, नान्यन्निवारयति, अवधारणाश्रवणात् ॥ १८ ॥

306 स्मर्यतेऽपि च लोके । ३ । १ । १९ ॥

पुण्यकर्मणामपि केषाश्चित्पञ्चमाहुत्यनपेक्षया देहारम्भो लोके स्मर्यते द्रौपदीधृष्टद्युम्नप्रभृतीनाम् ॥ १९ ॥

307 दर्शनाच्च । ३ । १ । २० ॥

श्रुतावपि दृश्यते केषाश्चित्पञ्चमाहुत्यनपेक्षया देहारम्भः *तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जम्* इति । एषूद्भिज्जस्वेदजयोः भूतयोः पञ्चमाहुतिमन्तरेणोत्पत्तिर्दृश्यते ॥ २० ॥

ननु स्वेदजानामत्र न सङ्कीर्तनमस्ति *त्रीण्येव बीजानीति वचनात्; तत्राह—

308 तृतीयशब्दावरोधस्संशोकजस्य । ३ । १ । २१ ॥

संशोकजस्य—स्वेदजस्यापि *आण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः-सङ्ग्रहो विद्यत इत्यर्थः; अतः केवलपापकर्मणां चन्द्रप्राप्तिर्न संभवति ॥ २१ ॥ इति अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

309 तत्स्वाभाव्यापत्तिरुपपत्तेः । ३ । १ । २२ ॥

इष्टादिकारिणो भूतसूक्ष्मपरिष्वक्तास्सानुशयाश्चन्द्रमसोऽवरोहन्तीत्युक्तम्; अवरोहप्रकारश्च *अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशम् आकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं

Digitization by Arya Samaj Charitable Foundation, Chennai

भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति* इति वचनात्; *यथेतमनेवञ्चेत्युक्तम्। तत्रास्याकाशादिप्रतिपत्तौ देवमनुष्यादिभाववदाकाशादिभावः, उत तत्सादृश्यापत्तिमात्रमिति विशये श्रद्धावस्थस्य सोमभाववदविशेषादाकाशादिभावः।

इति प्राप्ते तत्स्वाभाव्यापत्तिरेवेत्युच्यते। तत्स्वाभाव्यापत्तिः--तत्सादृश्यापत्तिरित्यर्थः। कुत एतत्? उपपत्तेः—सोमभावमनुष्यभावादौ हि सुखदुःखोपभोगाय तद्भावः; अत्र त्वाकाशादौ सुखदुःखोपभोगाभावात्तद्भावानुपपत्तेस्तदापत्तिवचनं तत्संसर्गकृततत्सादृश्यापत्त्यभिप्रायम् ॥ २२ ॥ इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

अथ नातिचिराधिकरणम् ॥ ५ ॥

310 नातिचिरेण विशेषात् । ३ । १ । २३ ॥

आकाशप्राप्तिप्रभृति यावद्व्रीह्यादिप्राप्ति किं तत्रतत्र नातिचिरं तिष्ठति, उतानियम इति विशये नियमहेत्वभावादनियम इति प्राप्ते उच्यते—नातिचिरेणेति। कुतः? विशेषात्—उत्तरत्र व्रीह्यादिप्राप्तौ *अतो वै खलु दुर्निष्प्रपतरम्* इति विशिष्य कृच्छ्रनिष्क्रमणत्वाभिधानात् पूर्वत्र ह्याकाशादिप्राप्तावचिरनिष्क्रमणं गम्यते। दुर्निष्प्रपतरमिति च्छान्दसस्तशब्दलोपः; दुर्निष्प्रप(त)तरं—दुःखनिष्क्रमणतरमित्यर्थः ॥ २३ ॥ इति नातिचिराधिकरणम् ॥ ५ ॥

अथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

311 अन्याधिष्ठिते पूर्ववदभिलापात् । ३ । १ । २४ ॥

अवरोहन्तो जीवाः व्रीह्यादिभावेन जायन्त इति श्रूयते *मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते* इति। ते किमन्यैर्भोक्तृभिर्व्रीह्यादिशरीरैरधिष्ठितान् व्रीह्यादीनाश्लिष्यन्ति, उत ते भोक्तारो व्रीह्यादिशरीरा जायन्त इति विशये *जायन्त इति वचनात् देवो जायते मनुष्यो जायत इतिवद्व्रीह्यादिशरीरा एव; इति प्राप्त उच्यते—अन्याधिष्ठिते इति। जीवान्तरेणाधिष्ठिते व्रीह्यादिशरीरे तेषां संश्लेषमात्रमेव। कुतः? पूर्ववदभिलापात्—आकाशादिमेघपर्यन्तवत्केवलतद्भावाभिलापात्। यत्र हि भोक्तृत्वमभिप्रेतम्; तत्र तत्साधनभूतं कर्माभिलप्यते *रमणीयचरणाः....कपूयचरणाः* इति। इह चाकाशादिवन्नाभिलप्यते कर्म, फलप्रदाने प्रवृत्तस्य स्वर्गोपभोग्यफलस्येष्टादेः कर्मणः स्वर्गोपभोगादेव समाप्तत्वात्, अनारब्धस्य *रमणीयचरणाः... कपूयचरणाः इति वक्ष्यमाणत्वात्, मध्ये कर्मान्तराभावाच्च। अत आकाशादिभाववचनवद्व्रीह्यादिभावेन जन्मवचनमौपचारिकम् ॥ २४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

312 अशुद्धमिति चेन्न शब्दात् । ३ । १ । २५ ॥

नैतदस्ति यदन्याधिष्ठिते व्रीह्यादिशरीरे संश्लेषमात्रम्, भोक्तृत्वहेत्वभावान्न व्रीह्यादिभावेन जन्म, इति; भोक्तृत्वहेतुसद्भावात् । स्वर्गोपभोग्यफलमिष्टादिकमैवाशुद्धम्––पापमिश्रम्, अग्नीषोमीयादिहिंसायुक्तत्वात् । हिंसा च *न हिंस्यात्सर्वा भूतानि* इति निषिद्धत्वात्पापमेव । नचात्र पदाहवनीयादिवदुत्सर्गापवादभावस्संभवति, भिन्नविषयत्वात् । अग्नीषोमीयहिंसाविधिर्हिंसायाः क्रतूपकारकत्वं बोधयति; *न हिंस्यादिति तु हिंसायाः प्रत्यवायफलत्वम् । अथोच्येत––अग्नीषोमीयादिषु विधितः प्रवृत्तेर्न तद्विषयं निषेधविधिरास्कन्दति, रागप्राप्तविषयत्वात्तस्येति; नैवम्, इहापि रागप्राप्तेरविशिष्टत्वात् । *स्वर्गकामो यजेतेत्येवमादौ हि कामिनः कर्तव्यतया यागाद्युपदेशाद्यागादेः स्वर्गादिसाधनत्वमवगम्य फलरागत एव यागादौ प्रवर्तते । अग्नीषोमीयादिष्वपि तेषां फलसाधनभूतस्य यागादेरुपकारकत्वं शास्त्रादवगम्य रागादेव प्रवर्तते । लौकिक्यामपि हिंसायां केनचित्प्रमाणेन हिंसायाः स्वसमीहितसाधनत्वमवगम्य रागात्प्रवर्तत इति न कश्चन विशेषः । तथा नित्येष्वपि कर्मसु *सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्* इत्यादिवचनात्फलसाधनत्वमवगम्य रागादेव प्रवृत्तिरिति तेषामप्यशुद्धियुक्तत्वम् । अत इष्टादीनां पापमिश्रत्वेनाशुद्धियुक्तानां स्वर्गेऽनुभाव्यं फलं स्वर्गेऽनुभूय हिंसांशस्य फलं व्रीह्यादिस्थावरभावेनानुभूयते । स्थावरभावं च पापफलं स्मरन्ति *शरीरजैः कर्मदोषैर्याति स्थावरतां नरः* इति । अतो व्रीह्यादिभावेन भोगायानुशयिनो जायन्त इति चेत्; तन्न । कुतः ? शब्दात्––अग्नीषोमीयादेस्संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात् । पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति *हिरण्यशरीर ऊर्ध्वः स्वर्गं लोकमेति* इत्यादिकम् । अतिशयिताभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा; प्रत्युत रक्षणमेव । तथा च मन्त्रवर्णः––*न वा उ वे तन्म्रियसे न रिष्यसि, देवाँ इदेषि पथिभिस्सुगेभिः; यत्र यन्ति सुकृतो नापि दुष्कृतः, तत्र त्वा देवस्सविता दधातु* इति । चिकित्सकं च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति, पूजयन्ति च तज्ज्ञाः ॥ २५ ॥

313 रेतस्सिग्योगोऽथ । ३ । १ । २६ ॥

इतश्चौपचारिकं व्रीह्यादिजन्मवचनम्, व्रीह्यादिभाववचनानन्तरं *योयो ह्यन्नमत्ति योयो रेतस्सिञ्चति तद्भूय एव भवति* इति रेतस्सिग्भावोऽनुशयिनां श्रूयमाणो यथा तद्योगमात्रं प्रतिपादयति; तद्वद्व्रीह्यादिभावोऽपीत्यर्थः ॥ २६ ॥

314 योनेश्शरीरम् । ३ । १ । २७ ॥

योनिप्राप्तेः पश्चादेवानुशयिनां शरीरप्राप्तिः, तत्रैव सुखदुःखोपभोगसद्भावात् । ततः प्रागाकाशादिप्राप्तिप्रभृति तद्योगमात्रमेवेत्यर्थः ॥ २७ ॥ इति अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः

तृतीयाध्याये—द्वितीयः पादः—सन्ध्याधिकरणम् ॥ १ ॥

315 सन्ध्ये सृष्टिराह हि । ३ । २ । १ ॥

एवं कर्मानुरूपगमनागमनजन्मादियोगेन जाग्रतो जीवस्य दुःखित्वं ख्यापितम्; इदानीमस्य स्वप्नावस्था परीक्ष्यते। स्वप्नमधिकृत्य श्रूयते *न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथस्सृजते न तत्रानन्दा मुदः प्रमुदो भवन्ति अथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यस्सृजते स हि कर्ता* इति। तत्र संशयः—किमियं रथादिसृष्टिर्जीवेनैव क्रियते, आहोस्विदीश्वरेणेति। किं युक्तम्? सन्ध्ये सृष्टिर्जीवेनेति। कुतः? सन्ध्यं स्वप्नस्थानमुच्यते, *सन्ध्यं तृतीयं स्वप्नस्थानमिति वचनात्; सा तु जीवेनैव क्रियते; *सृजते स हि कर्तेत्याह हि। स्वप्नदृग्जीव एव तत्र प्रतीयते ॥ १ ॥

(Handwritten margin notes: Br 4.3.10; Br 4.3.9)

316 निर्मातारं चैके पुत्रादयश्च । ३ । २ । २ ॥

(Handwritten note: And some (recensions state the individual soul to be) the creator of (the objects of desire there placed for) sons etc.; Ka 5.8)

किञ्च, एनं जीवं स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते *य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः* इति। पुत्रादयश्च तत्र काम्यमानतया कामशब्देन निर्दिश्यन्ते; नेच्छामात्रम्; पूर्वत्र हि *सर्वान् कामान् छन्दतः प्रार्थयस्व *शतायुषः पुत्रपौत्रान् वृणीष्व* इति पुत्रादय एव कामाः प्रकृताः। अतो रथादीन् जीवः स्वप्ने सृजति। जीवस्य च सत्यसङ्कल्पत्वं प्रजापतिवाक्ये श्रुतम्; अत उपकरणाद्यभावेऽपि सृष्टिरुपपद्यते ॥ २ ॥

(Handwritten note: Ka 1.25)

इति प्राप्तेऽभिधीयते—

317 मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । ३ । २ । ३ ॥

(Handwritten note: But it is mere maya, on account of the (soul's) true nature not being manifest fully.)

तुशब्दः पक्षं व्यावर्तयति। स्वप्ने रथपुष्करिण्याद्यर्थजातं मायामात्रं—परमपुरुषसृष्टमित्यर्थः। मायाशब्दो ह्याश्चर्यवाची। *जनकस्य कुले जाता देवमायेव निर्मिता* इत्यादिषु तथा दर्शनात्। अत्रापि, *न तत्र रथा न रथयोगा न पन्थानः—सकलेतरपुरुषानुभाव्यतया न भवन्तीत्यर्थः; अथ रथान् रथयोगान्पथः सृजते—स्वप्नदृगनुभाव्यतया तत्कालमात्रावसानान् सृजत इत्याश्चर्यरूपत्वमेवाह। एवंविधाश्चर्यरूपा सृष्टिस्सत्यसङ्कल्पस्य परमपुरुषस्यैवोपपद्यते, न जीवस्य। तस्य सत्यसङ्कल्पत्वादियुक्तस्यापि संसारदशायां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वान्न जीवस्य तथाविधाश्चर्यसृष्टिरुपपद्यते। *कामंकामं पुरुषो निर्मिमाण इति च परमपुरुषमेव निर्मातारमाह, *य एषु सुप्तेषु जागर्ति *तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिन् लोकाश्श्रिताःसर्वे तदु नात्येति कश्चन ॥ इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणस्वभावप्रतीतेः। *अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता* इति

(Handwritten note: maya used in the sense of wonder (not illusion))

Digitization by Arya Samaj Charitable Foundation, Chennai

च तया श्रुत्यैकार्थ्यात्परमपुरुषमेव कर्तारमाह ॥ ३ ॥

स्वाभाविकं चेज्जीवस्यापहतपाप्मत्वादिकम्, कुतस्तन्नाभिव्यज्यत इत्यत आह—

318 पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ । ३ । २ । ४ ॥

But according to the wish of the Lord, it is covered, for from Him are its (souls) bondage & freedom.

तुशब्दश्शङ्काव्यावृत्त्यर्थः; पराभिध्यानात्—परमपुरुषसङ्कल्पात्, अस्य जीवस्य स्वाभाविकं रूपं तिरोहितम्; अनादिकर्मपरम्परया कृतापराधस्य ह्यस्य स्वाभाविकं कल्याणरूपं परमपुरुषस्तिरोधापयति; ततः तत्सङ्कल्पादेव हि अस्य—जीवस्य बन्धमोक्षौ श्रुतौ *यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ- Tai. 2.7
निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति, यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति *एष ह्येवानन्दयाति *भीषाऽस्माद्वातः पवते* इत्यादिषु ॥ ४ ॥

319 देहयोगाद्वा सोऽपि । ३ । २ । ५ ॥

and that (covering of the soul's true nature results) also from its connection with the body.

सोऽपि—तिरोभावो देहयोगद्वारेण वा भवति, सूक्ष्माचिच्छक्तियोगद्वारेण वा; सृष्टिकाले देहावस्थेनाचिद्वस्तुना संयोगाद्भवति, प्रलयकाले नामरूपविभागानर्हातिसूक्ष्माचिद्वस्तुयोगात्। अतोऽनभिव्यक्तस्वरूपत्वात्स्वप्ने जीवो न रथादीन् सङ्कल्पमात्रेण स्रष्टुं शक्नोति। *तस्मिँल्लोकाः- Ka 6.1
श्रितास्सर्वे तदु नात्यति कश्चनेति सर्वेषु सुप्तेषु जागरण सवलोकाश्रयत्वमित्यादयो हि परमपुरुषस्यैव संभवन्ति। अतो जीवानामल्पाल्पकर्मानुगुणफलानुभवार्थं तावन्मात्रकालावसानान् तदेकानुभाव्यानर्थानुत्पादयति ॥ ५ ॥

320 सूचकश्च हि श्रुतेराचक्षते च तद्विदः । ३ । २ । ६ ॥

But it serves as an omen according to the Sruti; (and) expert dream readers also say (thus)

इतश्च स्वाप्ना अर्था न जीवसङ्कल्पपूर्वकाः; यतः स्वप्नोऽभ्युदयानभ्युदययोस्सूचकः श्रुतेरवगम्यते—*यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्न- ch 5.2.8
निदर्शने ॥ इति; *अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति* इत्यादेश्च। स्वप्नाध्यायविदश्च स्वप्नं शुभाशुभयोस्सूचकमाचक्षते। सूचकत्वं च स्वसङ्कल्पायत्तस्य नोपपद्यते; तथाचाशुभस्यानिष्टत्वाच्छुभस्य सूचकमेव सृष्ट्वा पश्येत्। अतः स्वप्ने सृष्टिरीश्वरेणैव कृता ॥ ६ ॥ इति सन्ध्याधिकरणम् ॥ १ ॥

अथ तदभावाधिकरणम् ॥ २ ॥

321 तदभावो नाडीषु तच्छ्रुतेरात्मनि च । ३ । २ । ७ ॥

इदानीं सुषुप्तिस्थानं परीक्ष्यते। इदमाम्नायते *अथ यत्रैतत्सुप्तस्समस्तस्संप्रसन्नः स्वप्नं न

Digitization by Arya Samaj Charitable Foundation, Chennai

विजानाति आसु तदा नाडीषु सुप्तो भवति* इति; तथा *अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते* इति; तथा *यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति* इति। एवं नाड्यः पुरीतद्ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयते; किमेषां विकल्पः समुच्चयो वेति विशये निरपेक्षत्वप्रतीतेः युगपदनेकस्थानवृत्त्यसंभवाच्च विकल्पः॥ इति प्राप्त उच्यते—तदभाव इति। तदभावः—स्वप्नाभावः सुषुप्तिः नाडीषु पुरीतत्यात्मनि च भवति; एषां स्थानानां समुच्चय इत्यर्थः। कुतः? तच्छ्रुतेः—त्रयाणां स्थानत्वश्रुतेः। न च कार्यभेदेन समुच्चये संभवति पाक्षिकबाधगर्भविकल्पो न्याय्यः। संभवति च प्रासादखट्वापर्यङ्कवन्नाड्यादीनां कार्यभेदः। तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ; ब्रह्म तु पर्यङ्कस्थानीयम्। अतो ब्रह्मैव साक्षात्सुषुप्तिस्थानम्॥ ७॥

322 अतः प्रबोधोऽस्मात्। ३। २। ८॥

यतो ब्रह्मैव साक्षात्सुषुप्तिस्थानम्, अतः अस्मात् ब्रह्मणः एषां जीवानां प्रबोधः श्रूयमाण उपपद्यते *सत आगम्य न विदुः सत आगच्छामहे* इत्यादिषु॥ ८॥ इति तदभावाधिकरणम्॥ २॥

अथ कर्मानुस्मृतिशब्दविध्यधिकरणम्॥ ३॥

323 स एव तु कर्मानुस्मृतिशब्दविधिभ्यः। ३। २। ९॥

किं सुषुप्त एव प्रबोधसमये उत्तिष्ठति, उतान्य इति संशये, अस्य सकलोपाधिविनिर्मुक्तस्य ब्रह्मणि संपन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरेन्द्रियादिसंबन्धाभावादन्य इति प्राप्त उच्यते—स एव तु–इति। तुशब्दः पक्षं व्यावर्तयति; स एवोत्तिष्ठति; कुतः? कर्मानुस्मृतिशब्दविधिभ्यः। कर्म तावत्—सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक्तेनैव भोक्तव्यम्। अनुस्मृतिरपि–य एवाहं सुप्तः, स एव प्रबुद्धोऽस्मीति। शब्दोऽपि सुषुप्तप्रबुद्धस्य एवेति दर्शयति *त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति* इति। विधयश्च मोक्षार्थास्सुषुप्तस्य मुक्तत्वेऽनर्थकास्स्युः। न चासौ सर्वोपाधिविनिर्मुक्त आविर्भूतस्वरूपः *तद्यत्रैतत्सुषुप्तः* इति सुषुप्तं प्रकृत्य, *नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि* इति वचनात्। मुक्तस्य च *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *स तत्र पर्येति जक्षत्क्रीडन् रममाणः *स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति *सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः* इति सर्वज्ञत्वादि श्रूयते। अतस्सुषुप्तस्संसरन्नेव आयत्तसर्वकरणो ज्ञानभोगाद्यशक्तो विश्रमस्थानं परमात्मानमुपसंपद्याश्वस्तः पुनर्भोगायोत्तिष्ठति॥९॥
इति कर्मानुस्मृतिशब्दविध्यधिकरणम्॥ ३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ मुग्धाधिकरणम् ॥ ४ ॥

324 मुग्धेऽर्धसंपत्तिः परिशेषात् । ३ । २ । १० ॥

मुग्धमधिकृत्य चिन्त्यते; किमियं मूर्च्छा सुषुप्त्यादिष्वन्यतमावस्था, उतावस्थान्तरमिति विशये सुषुप्त्यादीनामन्यतमावस्थायामेव मूर्च्छाप्रसिद्ध्युपपत्तेरवस्थान्तरकल्पने प्रमाणाभावादन्यतमावस्था, इति प्राप्त उच्यते—मुग्धेऽर्धसंपत्तिरिति । मुग्धे पुरुषे या तस्यावस्था, सा मरणायार्धसंपत्तिः । कुतः ? परिशेषात्—न तावत्स्वप्नजागरौ, ज्ञानाभावात्; निमित्तवैरूप्यादाकारवैरूप्याच्च न सुषुप्तिमरणे । निमित्तं हि मूर्च्छाया अभिघातादिः । पारिशेष्यान्मरणायार्धसंपत्तिर्मूर्च्छा । मरणं हि सर्वप्राणदेहसंबन्धोपरतिः; सूक्ष्मप्राणदेहसंबन्धावस्थितिर्मूर्च्छा ॥ १० ॥ इति मुग्धाधिकरणम् ॥ ४ ॥

अथ उभयलिङ्गाधिकरणम् ॥ ५ ॥

325 न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि । ३ । २ । ११ ॥

दोषदर्शनाद्वैराग्योदयाय जीवस्यावस्थाविशेषा निरूपिताः । इदानीं ब्रह्मप्राप्तितृष्णाजननाय प्राप्यस्य ब्रह्मणो निर्दोषत्वकल्याणगुणात्मकत्वप्रतिपादनायारभते । तत्र जागरस्वप्नसुषुप्तिमुग्ध्युत्क्रान्तिषु स्थानेषु तत्तत्स्थानप्रयुक्ता जीवस्य ये दोषाः, ते तदन्तर्यामिणः परस्य ब्रह्मणोऽपि तत्रतत्रावस्थितस्य सन्ति, नेति विचार्यते । किं युक्तम् ? सन्तीति । कुतः ? तत्तदवस्थशरीरेऽवस्थानात् । ननु *संभोगप्राप्तिरिति चेन्न वैशेष्यात् *स्थित्यदनाभ्यां चेत्यादिषु परस्याकर्मवश्यत्वेन दोषाभाव उक्तः, तत्कथमकर्मवश्यस्य परस्य ब्रह्मणस्तत्तत्स्थानसंबन्धाद्दोष उच्यते ? इत्थमुच्यते—कर्माण्यपि देहसंबन्धमापादयन्त्यपुरुषार्थजननानि भवन्तीति * देहयोगाद्वेत्यत्रोक्तम् । तच्च देहसंबन्धस्यापुरुषार्थत्वेन भवति । इतरथा कर्माण्येव दुःखं जनयिष्यन्ति; किं देहसंबन्धेन ? अतोऽकर्मवश्यत्वे सत्यपि नानाविधाशुचिदेहसंबन्धोऽपुरुषार्थ एव । अतस्तन्नियमनार्थं स्वेच्छया तत्प्रवेशेऽप्यपुरुषार्थसंबन्धोऽवर्जनीयः । पूयशोणितादिमज्जनं हि स्वेच्छाकारितमप्यपुरुषार्थ एव । अतो यद्यपि जगदेककारणं सर्वज्ञत्वादिकल्याणगुणाकरं च ब्रह्म; तथाऽपि *यः पृथिव्यां तिष्ठन् *य आत्मनि तिष्ठन् *यश्चक्षुषि तिष्ठन् *यो रेतसि तिष्ठन्* इत्यादिवचनात् तत्रतत्रावस्थितस्य तत्तत्संबन्धरूपापुरुषार्थास्सन्तीति ॥

एवं प्राप्ते प्रचक्ष्महे—न स्थानतोऽपि परस्येति । न पृथिव्यात्मादिस्थानतोऽपि परस्य ब्रह्मणः अपुरुषार्थगन्धस्संभवति । कुतः ? उभयलिङ्गं सर्वत्र हि—यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्म उभयलिङ्गम्—उभयलक्षणमभिधीयते; निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वलक्षणोपेतमित्यर्थः । *अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः *समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः *तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे ॥ *समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्* इत्यादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रुतिस्मृतिभ्यः उभयलक्षणं हि ब्रह्मावगतम् ॥ ११ ॥

326 भेदादिति चेन्न प्रत्येकमतद्वचनात् । ३ । २ । १२ ॥

यथा जीवस्य प्रजापतिवाक्यावगतापहतपाप्मत्वाद्युभयलिङ्गस्यापि देवादिदेहयोगरूपावस्थाभेदादपुरुषार्थयोगः, तथाऽन्तर्यामिणः परस्यापि स्वतोऽपहतपाप्मत्वाद्युभयलिङ्गस्य तत्तद्देवादिशरीरयोगरूपावस्थाभेदादपुरुषार्थयोगोऽवर्जनाय इति चेत्, तन्न; प्रत्येकमतद्वचनात्-- *यः पृथिव्यां तिष्ठन् *य आत्मनि तिष्ठन्नित्यादिषु प्रतिपर्यायं *स त आत्माऽन्तर्याम्यमृतः* इत्यन्तर्यामिणोऽमृतत्ववचनेन तत्रतत्र स्वेच्छया नियमनं कुर्वतस्तत्तत्संबन्धप्रयुक्तापुरुषार्थप्रतिषेधात् । जीवस्य तु तत्स्वरूपं तिरोहितमिति *पराभिध्यानात्तु तिरोहितमित्यत्रोक्तम् । ननु स्वेच्छया कुर्वतोऽपि तत्तद्वस्तुस्वभावायत्तापुरुषार्थसंबन्धोऽवर्जनीय इत्युक्तम्; नैतद्युक्तम्; न ह्यचिद्वस्त्वपि स्वभावतोऽपुरुषार्थस्वरूपम्; कर्मवश्यानां तु कर्मस्वभावानुगुण्येन परमपुरुषसङ्कल्पादेकमेव वस्तु कालभेदेन पुरुषभेदेन च सुखाय दुःखाय च भवति; वस्तुस्वरूपप्रयुक्ते तु ताद्रूप्ये सर्वं सर्वदा सर्वस्य सुखायैव दुःखायैव वा स्यात्; न चैवं दृश्यते । तथा चोक्तं-- *नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम । वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च । कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः । तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते । तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ॥ इति । अतो जीवस्य कर्मवश्यत्वात्तत्तत्कर्मानुगुण्येन तत्तद्वस्तुसंबन्ध एवापुरुषार्थस्स्यात्; परस्य तु ब्रह्मणः स्वाधीनस्य स एव संबन्धस्तत्तद्विचित्रनियमनरूपलीलारसायैव स्यात् ॥ १२ ॥

327 अपि चैवमेके । ३ । २ । १३ ॥

अपि च एके शाखिनः एकस्मिन्नेव देहसंयोगे जीवस्यापुरुषार्थं परस्य तु तदभावं नियमनरूपैश्वर्यायत्तदीप्तियोगं च स्वशब्देनाधीयते *द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ॥ इति ॥ १३ ॥

अथ स्यात्-- *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकजीवानुप्रवेशपूर्वकं नामरूपव्याकरणमिति ब्रह्मणोऽपि तदात्मभूतस्य देवमनुष्यादिरूपत्वं तन्नामभाक्त्वं चास्ति, ततश्च *ब्राह्मणो यजेतेत्यादिविधिनिषेधशास्त्रगोचरत्वेन कर्मवश्यत्वमवर्जनीयमिति; तत्राह--

328 अरूपवदेव हि तत्प्रधानत्वात् । ३ । २ । १४ ॥

देवादिशरीरानुप्रवेशे तेनतेन रूपेण युक्तमप्यरूपवदेव तत्-ब्रह्म रूपरहिततुल्यमेव; जीववच्छरीरित्वनिबन्धनं कर्मवश्यत्वमस्य न विद्यत इत्यर्थः । कुतः? निर्वाहकत्वेन प्रधानत्वात् । *आकाशो

Digitization by Arya Samaj Charitable Foundation, Chennai

ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति सर्वानुप्रवेशेऽपि नामरूपकार्यास्पर्शेन नामरूपयोर्निर्वोढृत्वमेव ब्रह्मणः प्रतिपादयति। ननु तच्छरीरकत्वेन तदन्तर्यामित्वे कथमरूपवदिति रूपसंबन्धरहिततुल्यत्वमुच्यते ? इत्थम्–यथा जीवस्य तत्तज्जन्यसुखदुःखभाक्त्वेन तत्तद्रूपसंबन्धः, तथा तदभावात्परस्यारूपवत्त्वम्। विधिनिषेधशास्त्राण्यपि कर्मवश्यमेवाधिकुर्वन्ति। तस्मादरूपतुल्यमेव परं ब्रह्म। ततश्चान्तर्यामिरूपेणावस्थितमपि ब्रह्म निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वरूपोभयलिङ्गमेव ॥१४॥

ननु च *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिर्निर्विशेषप्रकाशैकस्वरूपं ब्रह्मावगम्यते, अन्यत्तु सर्वज्ञत्वसत्यसङ्कल्पत्वजगत्कारणत्वसर्वान्तरात्मत्वसत्यकामत्वादिकं *नेतिनेति* इत्यादिभिः प्रतिषिध्यमानत्वेन मिथ्याभूतमित्यवगन्तव्यम्। तत्कथं कल्याणगुणाकरत्वनिरस्तनिखिलदोषत्वरूपोभयलिङ्गत्वं ब्रह्मणः ? इत्यत आह––

329 प्रकाशवच्चावैयर्थ्यात्। ३। २। १५ ॥

यथा *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यावैयर्थ्यात्प्रकाशस्वरूपत्वं ब्रह्मणोऽभ्युपगम्यते; तथा सत्यसङ्कल्पत्वसर्वज्ञत्वजगत्कारणत्वसर्वात्मकत्वनिरस्तानिखिलाविद्यादिदोषत्वाद्यभिधायिवाक्यावैयर्थ्यादुभयलिङ्गमेव ब्रह्म ॥ १५ ॥

330 आह च तन्मात्रम्। ३। २। १६ ॥

किञ्च *सत्यं ज्ञानमनन्तयित्यादिवाक्यं ब्रह्मणः प्रकाशस्वरूपतामात्रं प्रतिपादयति, नान्यत्सत्यसङ्कल्पत्वादिकं वाक्यान्तरावगतं निषेधति। *नेति नेतीति च निषेधस्य विषयोऽनन्तरमेव वक्ष्यते ॥ १६ ॥

331 दर्शयति चाथो अपि स्मर्यते। ३। २। १७ ॥

दर्शयति च वेदान्तगणः कल्याणगुणाकरत्वं निरस्तनिखिलदोषत्वं च *तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्। स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ *यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः *भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः *स एको ब्रह्मण आनन्दः *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चनेति *निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्* इत्यादि। स्मर्यते च *यो मामजमनादिं च वेत्ति लोकमहेश्वरम् *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् *मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ॥ *उत्तमः पुरुष-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः *सर्वज्ञस्सर्वकृत्सर्वशक्ति-ज्ञानबलर्द्धिमान् । अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोऽनादिमान्वशी । क्लमतन्द्रीभयक्रोधकामादिभिर-संयुतः । निरवद्यः परः प्राप्तेर्निरधिष्ठोऽक्षरः क्रमः इत्यादि । अतस्सर्वत्रावस्थितस्यापि ब्रह्मण उभय-लिङ्गत्वात्तत्तत्स्थानप्रयुक्ता दोषा न परं ब्रह्म स्पृशन्ति ॥ १७ ॥

332 अत एव चोपमा सूर्यकादिवत् । ३ । २ । १८ ॥

यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वम्, अत एव जलदर्पणादिप्रतिबिम्बितसूर्यादिवत्परमात्मा तत्रतत्रावस्थितोऽपि निर्दोष इति शास्त्रेषूपमा क्रियते— *आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथाऽऽत्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥ एक एव हि भूतात्मा भूतेभूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ इत्यादिषु ॥१८॥

अत्र चोदयति--

333 अम्बुवदग्रहणात्तु न तथात्वम् । ३ । २ । १९ ॥

तुशब्दश्चोद्य द्योतयति । अम्बुवदिति सप्तम्यन्तात् वतिः । अम्बुदर्पणादिषु यथा सूर्य-मुखादयो गृह्यन्ते; न तथा पृथिव्यादिषु स्थानेषु परमात्मा गृह्यते । अम्ब्वादिषु हि सूर्यादयो भ्रान्त्या तत्रस्था इव गृह्यन्ते, न परमार्थतस्तत्रस्थाः । इह तु *यः पृथिव्यां तिष्ठन् *योऽप्सु तिष्ठन् *य आत्मनि तिष्ठन्नित्येवमादिना परमार्थत एव परमात्मा पृथिव्यादिषु स्थितो गृह्यते । अतस्सूर्या-देरम्बुदर्पणादिप्रयुक्तदोषाननुषङ्गस्तत्रतत्र स्थित्यभावादेव । अतो न तथात्वं--दार्ष्टान्तिकस्य न दृष्टान्ततुल्यत्वमित्यर्थः ॥ १९ ॥

परिहरति--

334 वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च । ३ । २ । २० ॥

पृथिव्यादिस्थानान्तर्भावात्स्थानिनः परस्य ब्रह्मणः स्वरूपतो गुणतश्च पृथिव्यादिस्थान-गतवृद्धिह्रासादिदोषभाक्त्वमात्रं सूर्यादिदृष्टान्तेन निवर्त्यते । कथमिदमवगम्यते ? उभयसामञ्ज-स्यादेवम्--उभयदृष्टान्तसामञ्जस्यादेवमिति निश्चीयते । *आकाशमेकं हि यथा घटादिषु पृथग्भवेत् *जलाधारेष्विवांशुमान्*इति दोषवत्स्वनेकेषु वस्तुषु वस्तुतोऽवस्थितस्याकाशस्य,वस्तुतोऽनवस्थितस्यां-शुमतश्चोभयस्य दृष्टान्तस्योपादानं हि परमात्मनः पृथिव्यादिगतदोषभाक्त्वनिवर्तनमात्रे प्रतिपाद्ये समञ्जसं भवति । घटकरकादिषु यथा वृद्धिह्रासभाक्षु पृथक्पृथक्संयुज्यमानमप्याकाशं वृद्धिह्रासादि-दोषैर्न स्पृश्यते; यथा च जलाधारेषु विषमेषु दृश्यमानोंऽशुमान् तद्गतवृद्धिह्रासादिभिर्न स्पृश्यते;

Digitization by Arya Samaj Charitable Foundation, Chennai

तथाऽयं परमात्मा पृथिव्यादिषु नानाकारेष्वचेतनेषु चेतनेषु च स्थितस्तत्तद्गतवृद्धिह्रासादिदोषैरसंस्पृष्टस्सर्वत्र वर्तमानोऽप्येक एवास्पृष्टदोषगन्धः कल्याणगुणाकर एव। एतदुक्तं भवति—यथा जलादिषु वस्तुतोऽनवस्थितस्यांशुमतो हेत्वभावाज्जलादिदोषानभिष्वङ्गः, तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोषप्रत्यनीकाकारतया दोषहेत्वभावान्न दोषसंबन्ध* इति। दर्शनाच्च—दृश्यते चैवं सर्वात्मना साधर्म्याभावेऽपि विवक्षितांशसाधर्म्याद्दृष्टान्तोपादानं, सिंह इव माणवक इत्यादौ। अतः स्वभावतो निरस्तनिखिलाज्ञानादिदोषगन्धस्य समस्तकल्याणगुणाकरस्य पृथिव्यादिस्थानतोऽपि न दोषसंभवः॥ २०॥

अथ स्यात्—*द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेति प्रकृत्य समस्तं स्थूलसूक्ष्मरूपं प्रपञ्चं ब्रह्मणो रूपत्वेन परामृश्य *तस्य वैतस्य पुरुषस्य रूपं यथा माहारजनं वासः* इत्यादिना आकारविशेषं चाभिधाय *अथात आदेशो नेतिनेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति* इति सर्वं प्रकृतं ब्रह्मणः प्रकारमितिशब्देन परामृश्य तत्सर्वं प्रतिषिध्य सर्वविशेषाधिष्ठानं सन्मात्रमेव ब्रह्म; विशेषास्त्वेवंविधं स्वस्वरूपमजानता ब्रह्मणा कल्पिता इति दर्शयति; अतः कथमुभयलिङ्गत्वं ब्रह्मण इति। अत्राह—

335 प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः। ३। २। २१॥

नैतदुपपद्यते—यद्ब्रह्मणः प्रकृतविशेषवत्त्वं *नेतिनेतीति प्रतिषिध्यत इति, तथा सति भ्रान्तजल्पितायमानत्वात्। न हि ब्रह्मणो विशेषणतया प्रमाणान्तराप्रज्ञातं सर्वं तद्विशेषणत्वेनोपदिश्य पुनस्तदेवानुन्मत्तः प्रतिषेधति। यद्यपि निर्दिश्यमानेषु केचन पदार्थाः प्रमाणान्तरप्रसिद्धाः, तथाऽपि तेषां ब्रह्मणः प्रकारत्वमप्रज्ञातमेव; इतरेषां तु स्वरूपं ब्रह्मणः प्रकारत्वं चाज्ञातम्। अतस्तेषामनुवादासंभवादत्रैवोपदिश्यन्ते। अतस्तन्निषेधो नोपपद्यते। यस्मादेवं, तस्मात्प्रकृतैतावत्त्वं ब्रह्मणः प्रतिषेधतीदं वाक्यम्। ये ब्रह्मणो विशेषाः प्रकृताः; तद्विशिष्टतया ब्रह्मणः प्रतीयमानेयत्ता *नेतिनेतीति प्रतिषिध्यते। नेतिनेति—नैवं नैवम्, उक्तप्रकारमात्रविशिष्टं न भवति ब्रह्म; उक्तप्रकारविशिष्टतया या ब्रह्मण इयत्ता प्रकृता; साऽत्र इतिशब्देन परामृश्यत इत्यर्थः। यतश्च निषेधानन्तरं ब्रह्मणो भूयो गुणजातं ब्रवीति, अतश्च प्रकृतविशेषणयोगित्वमात्रं ब्रह्मणः प्रतिषेधति। ब्रवीति हि भूयो गुणजातं—*न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्* इति। अयमर्थः—इति नेति यद्ब्रह्म प्रतिपादितम्, तस्मादेतस्मादन्यद्वस्तु परं न ह्यस्ति; ब्रह्मणोऽन्यत् स्वरूपतो गुणतश्चोत्कृष्टं नास्तीत्यर्थः। तस्य च ब्रह्मणः सत्यस्य सत्यमिति नामधेयम्। तस्य च निर्वचनं *प्राणा वै सत्यं तेषामेष सत्यमिति। प्राणशब्देन प्राणसाहचर्याज्जीवाः परामृश्यन्ते। ते तावत्सत्यम्, वियदादिवत्स्वरूपान्यथाभावरूपपरिणामाभावात्। तेषामेष सत्यम्—तेभ्योऽप्येष परमपुरुषस्सत्यम्। जीवानां कर्मानुगुण्येन ज्ञानसङ्कोचविकासौ विद्येते; परमपुरुषस्य त्वपहतपाप्मनस्तौ न

Digitization by Arya Samaj Charitable Foundation, Chennai

विद्येते; अतस्तेभ्योऽप्येष सत्यम् । अतश्चैवं वाक्यशेषोदितगुणजातयोगात् *नेतिनेतीति ब्रह्मणस्सविशेषत्वं न प्रतिषिध्यते; अपि तु पूर्वप्रकृतेयत्तामात्रम् । अत उभयलिङ्गमेव परं ब्रह्म ॥ २१ ॥

ब्रह्मणः प्रमाणान्तरागोचरत्वेन तत्संबन्धितया मूर्तामूर्तादिरूपानुवादेन तन्निषेधासंभवात्प्रकृतेयत्ताप्रतिषेध उक्तः; तदेव प्रमाणान्तरागोचरत्वं द्रढयति–

336 तदव्यक्तमाह हि । ३ । २ । २२ ॥

तत्--ब्रह्म प्रमाणान्तरेण न व्यज्यते; आह हि शास्त्रं--*न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् *न चक्षुषा गृह्यते नापि वाचा* इत्यादि ॥ २२ ॥

हेत्वन्तरं चाह–

337 अपि संराधने प्रत्यक्षानुमानाभ्याम् । ३ । २ । २३ ॥

अपि च संराधने—सम्यक्प्रीणने भक्तिरूपापन्ने निदिध्यासन एवास्य साक्षात्कारः, नान्यत्रेति श्रुतिस्मृतिभ्यामवगम्यते । *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ *ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः* इति श्रुतिः । स्मृतिरपि *नाहं वेदैर्न तपसा न दानेन न चेज्यया *भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ इति । भक्तिरूपापन्नमेवोपासनं संराधनं तस्य प्रीणनमिति पूर्वमेवोक्तम् । अतो निदिध्यासनाय ब्रह्मस्वरूपमुपदिशत् *द्वे वाव ब्रह्मणः इत्यादिशास्त्रं ब्रह्मणो मूर्तामूर्तरूपद्वयादिविशिष्टतां प्रागसिद्धां नानुवदितुं क्षमम् ॥ २३ ॥

338 प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् । ३ । २ । २४ ॥

इतश्च प्रकृतैतावत्त्वमेव प्रतिषेधति; न मूर्तामूर्तादिविशिष्टत्वम्; यतस्साक्षात्कृतपरब्रह्मस्वरूपाणां वामदेवादीनां दर्शने प्रकाशादिवत्—ज्ञानानन्दादिस्वरूपवन्मूर्तामूर्तादिप्रपञ्चविशिष्टताया अपि ब्रह्मगुणत्वावैशेष्यं प्रतीयते *तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च* इत्यादि । ब्रह्मस्वरूपभूतप्रकाशानन्दादिश्च तेषां वामदेवादीनां संराधनात्मके कर्मण्यभ्यासादुपलभ्यते । तद्वाभ्यस्तसंराधनानां तेषां मूर्तामूर्तादिविशिष्टत्वमप्यविशेषेण प्रतीयत इत्यर्थः ॥ २४ ॥

उक्तं ब्रह्मण उभयलिङ्गत्वमुपसंहरति—

339 अतोऽनन्तेन तथा हि लिङ्गम् । ३ । २ । २५ ॥

अतः—उक्तैर्हेतुभिर्ब्रह्मणः अनन्तेन कल्याणगुणगणेन विशिष्टत्वं सिद्धम् । तथा हि सत्युभयलिङ्गं ब्रह्मोपपन्नं भवति ॥ २५ ॥ इति उभयलिङ्गाधिकरणम् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ अहिकुण्डलाधिकरणम् ॥ ६ ॥

340 उभयव्यपदेशात्त्वहिकुण्डलवत् । ३ । २ । २६ ॥

मूर्तामूर्तात्मकस्य अचित्प्रपञ्चस्य ब्रह्मणो रूपत्वं *द्वे वा व ब्रह्मणो रूपे इत्यादिनोपदिश्यते । *अथात आदेशो नेतिनेतीति मूर्तामूर्ताचिद्वस्तुरूपतया ब्रह्मण इयत्ता प्रतिषिध्यते । *न ह्येतस्मादिति नेत्यन्यत्परमस्तीति ब्रह्मणोऽन्यदुत्कृष्टं न ह्यस्तीति प्रतिपादितम् । तदुपपादनाय * अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्* इति प्राणशब्दनिर्दिष्टेभ्यश्चेतनेभ्योऽप्येष सत्यमिति कदाचिदपि ज्ञानादिसङ्कोचाभावादुक्तम् । तथा *प्रधानक्षेत्रज्ञपतिर्गुणेशः *पतिं विश्वस्यात्मेश्वरम् *नित्यो नित्यानां चेतनश्चेतनानाम्* इत्यादिश्रुतेश्चायमर्थोऽवगम्यते । तस्याचिद्वस्तुनो ब्रह्मरूपत्वप्रकार इदानीं चिन्त्यते, ब्रह्मणो निर्दोषत्वसिद्धयर्थम् । किमस्याचिद्वस्तुनो ब्रह्मरूपत्वमहिकुण्डलन्यायेन, उत प्रभाप्रभावतोरिवैकजातियोगेन, उत जीवस्येव विशेषणविशेष्यतयां शांशिभावेनेति । इह स्थाप्यमानं विशेषणविशेष्यभावमङ्गीकृत्य *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् *तदनन्यत्वमारम्भणशब्दादिभ्यः इत्यत्र सूक्ष्मचिदचिद्वस्तुविशिष्टाद्ब्रह्मणः स्थूलचिदचिद्वस्तुविशिष्टस्योत्पत्तिरनन्यत्वं चोक्तम् । किं युक्तम् ? अहिकुण्डलवदिति; कुतः ? उभयव्यपदेशात्––*ब्रह्मैवेदं सर्वम् *आत्मैवेदं सर्वमिति तादात्म्यव्यपदेशात्, *हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्येत्यादिभेदव्यपदेशाच्च । अहेः कुण्डलभावर्जुभाववत् तस्यैव ब्रह्मणस्संस्थानविशेषा एवाचिद्वस्तूनि ॥ २६ ॥

341 प्रकाशाश्रयवद्वा तेजस्त्वात् । ३ । २ । २७ ॥

वाशब्दः पक्षव्यावृत्त्यर्थः; ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोऽपरिणामित्ववादिन्योऽपि बाधिता भवेयुः । अतो यथा तेजस्त्वेन प्रभातदाश्रययोर्भिन्नयोरपि तादात्म्यम्; एवमचित्प्रपञ्चस्य ब्रह्मणो रूपत्वमित्यर्थः ॥ २७ ॥

342 पूर्ववद्वा । ३ । २ । २८ ॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः । एकस्यैव द्रव्यस्यावस्थाविशेषयोगेऽपि ब्रह्मस्वरूपस्यैवाचिद्द्रव्यरूपत्वादुक्तदोषादनिर्मोक्षः । अथ प्रभातदाश्रययोरिवाचिद्ब्रह्मणो ब्रह्मत्वजातियोगमात्रम्; एवं तद्यश्वत्वगोत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोधः । पूर्ववदेव – *अंशो नानाव्यपदेशात् *प्रकाशादिवत्तु नैवं परः* इति जीववत्पृथक्सिद्धयनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वम् । विशिष्टवस्त्वेकदेशत्वेनाभेदव्यवहारो मुख्यः; विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन भेदव्यवहारो मुख्यः; ब्रह्मणो निर्दोषत्वं च रक्षितम् । तदेवं प्रकाश-

Digitization by Arya Samaj Charitable Foundation, Chennai

जातिगुणशरीराणां मणिव्यक्तिगुण्यात्मनः प्रत्यपृथक्सिद्धिलक्षणविशेषणतया यथांशत्वम्; तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वम् ॥ २८ ॥

343 प्रतिषेधाच्च । ३ । २ । २९ ॥

*स वा एष महानज आत्माऽजरोऽमरः *नास्य जरयैतज्जीर्यति* इत्यादिभिः ब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यत्वेनैवांशांशिभाव इत्यर्थः । अतस्सूक्ष्मचिदचिद्वस्तुविशिष्टं कारणभूतं ब्रह्म, स्थूलचिदचिद्वस्तुविशिष्टं कार्यभूतं ब्रह्मेति कारणात्कार्यस्यानन्यत्वम्, कारणभूतब्रह्मविज्ञानेन कार्यस्य ज्ञाततेत्यादि सर्वमुपपन्नम्; ब्रह्मणो निर्दोषत्वं च रक्षितम् । ब्रह्मणो निर्दोषत्वेन कल्याणगुणाकरत्वेन चोभयलिङ्गत्वमपि सिद्धम् ॥ २९ ॥ इति अहिकुण्डलाधिकरणम् ॥ ६ ॥

अथ पराधिकरणम् ॥ ७ ॥

344 परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः । ३ । २ । ३० ॥

इदानीमस्मात्परस्माज्जगन्निमित्तोपादानरूपपरमकारणात्परब्रह्मणः परमपि किञ्चित्तत्वमस्तीति कैश्चिद्धेत्वाभासैराशङ्क्य निराक्रियते, अस्योपास्यस्य निर्दोषत्वानवधिकातिशयासङ्ख्येयकल्याणगुणाकरत्वस्थेम्ने । तत्रेयमाशङ्का—यदिदं परं ब्रह्मोभयलिङ्गम्; एतस्मान्निखिलजगत्कारणात्परमपि किञ्चित्तत्त्वमस्ति । कथम्? *अथ य आत्मा स सेतुर्विधृतिः* इत्यस्य परस्य सेतुत्वव्यपदेशात्, सेतुशब्दस्य च लोके कूलान्तरप्राप्तिहेतौ प्रसिद्धेरितोऽन्यदनेन प्राप्तव्यमस्तीति गम्यते । तथा *एतं सेतुं तीर्त्वाऽन्धस्सन्ननन्धो भवति* इति तरितव्यता चास्याभिधीयते; अतश्चान्यत्प्राप्यमस्ति । उन्मानव्यपदेशाच्च—उन्मितं—परिमितम् इदं परं ब्रह्म, *चतुष्पाद्ब्रह्म *षोडशकलम्* इत्युन्मानव्यपदेशात् । सचायमुन्मानव्यपदेशस्तेन सेतुना प्राप्यस्यानुन्मितस्यास्तितां द्योतयति । तथा संबन्धव्यपदेशश्च सेतुसेतुमतोः प्रापकत्वप्राप्यत्वलक्षणो दृश्यते *अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् *अमृतस्यैष सेतुः* इति । अतश्च परात्परमस्ति । भेदेन च परात्परं व्यपदिश्यते *परात्परं पुरुषमुपैति *परात्परं यन्महतो महान्तम्* इतिच । तथा *तेनेदं पूर्णं पुरुषेण सर्वम् *ततो यदुत्तरतरं तदरूपमनामयम्* इति । अत एभ्यो हेतुभ्यः परस्माद्ब्रह्मणः परमपि किञ्चिदस्तीति गम्यत इति ॥ ३० ॥

एवं प्राप्तेऽभिधीयते —

345 सामान्यात्तु । ३ । २ । ३१ ॥

तुशब्दः पक्षं व्यावर्तयति । यत्तावदुक्तं सेतुव्यपदेशात्परात्परमस्तीति; तन्नोपपद्यते । न ह्ययमत्र किञ्चित्प्राप्यं प्रति सेतुरुच्यते, *एषां लोकानामसंभेदायेति सेतुसामान्येन सर्वलोकासङ्कर-

Digitization by Arya Samaj Charitable Foundation, Chennai

करत्वश्रुतेः। सिनोति—बध्नाति स्वस्मिन् सर्वं चिदचिद्वस्तुजातमसङ्कीर्णमिति सेतुरुच्यते। *एतं सेतुं तीर्त्वेति तरतिश्च प्राप्तिवचनः। यथा *वेदान्तं तरतीति ॥ ३१ ॥

346 बुद्ध्यर्थः पादवत्। ३। २। ३२ ॥

योऽयं *चतुष्पाद्ब्रह्म *षोडशकलम् *पादोऽस्य विश्वा भूतानीत्युन्मानव्यपदेशः; स बुद्ध्यर्थः—उपासनार्थः; *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिर्जगत्कारणस्य ब्रह्मणोऽपरिच्छिन्नत्वावगमात्स्वत उन्मितत्वासंभवात्। जगत्कारणत्वं हि तस्यैव श्रूयते— *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *सोऽकामयत, बहु स्यां प्रजायेयेति* इति। अतो यथा *वाक्पादः प्राणः पादः चक्षुः पादो मनः पादः* इत्यादिना ब्रह्मणो वागादिपादव्यपदेश उपासनार्थः, एवमयमपि ॥ ३२ ॥

स्वयमनुन्मितस्य कथमुपासनार्थतयाऽप्युन्मानसंभवः; तत्राह—

347 स्थानविशेषात्प्रकाशादिवत्। ३। २। ३३ ॥

प्रतिपन्नवागादिस्थानविशेषरूपोपाधिभेदात्तत्संबन्धितयोन्मितत्वानुसन्धानं संभवति; यथा प्रकाशाकाशादेर्विततस्य वातायनघटादिस्थानभेदैः परिच्छिद्यानुसन्धानसंभव इत्यर्थः ॥ ३३ ॥

348 उपपत्तेश्च। ३। २। ३४ ॥

यदुक्तम् *अमृतस्यैष सेतुरिति प्राप्यप्रापकसंबन्धव्यपदेशात्प्रापकात्परं प्राप्यमस्तीति; तन्न, प्राप्यस्य परमपुरुषस्य स्वप्राप्तौ स्वस्यैवोपायत्वोपपत्तेः। *नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥ इत्यनन्योपायत्वश्रवणात् ॥ ३४ ॥

349 तथाऽन्यप्रतिषेधात्। ३। २। ३५ ॥

यत्पुनरुक्तं *ततो यदुत्तरतरं *परात्परं पुरुषम् *अक्षरात्परतः परः* इत्यादिभेदव्यपदेशात्परात्परमस्तीति; तन्नोपपद्यते, तत्रैव ततोऽन्यस्य परस्य प्रतिषेधात्, *यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्* इति। यस्मादपरं परं नास्ति किञ्चित्—न केनापि प्रकारेण परमस्तीत्यर्थः। तथाऽन्यत्रापि *न ह्येतस्मादिति नेत्यन्यत्परमस्ति* इति—इति नेति निर्दिष्टादेतस्माद्ब्रह्मणोऽन्यत्परं न ह्यस्तीत्यर्थः। तथा *न तस्येशे कश्चन तस्य नाम महद्यशः* इति। तद्धि जगदुपादानकारणतयाऽनन्तरमुक्तं *सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, *स आपः प्रदुघे उभे इमे* इत्यादिना। *अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टौ* इति च जगत्कारणं पुरुषमेनं प्रत्यभिज्ञापयति। *ततो यदुत्तरतरमिति किमुच्यत इति चेत्; पूर्वत्र *वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ इति परस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मणो महापुरुषस्य वेदनमेवामृतत्वसाधनम्, नान्योऽमृतत्वस्य पन्था इत्युपदिश्य तदुपपादनाय *यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ इति पुरुषस्य परत्वं, तद्व्यतिरिक्तस्य परत्वासंभवञ्च प्रतिपाद्य, *ततो यदुत्तरतरं तदरूपमनामयम्। य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति* इति पूर्वोक्तमर्थं हेतुतो निगमयति—यदुत्तरतरं पुरुषतत्त्वम्, तदेवारूपमनामयं यतः, ततो य एतत्पुरुषतत्त्वं विदुः, त एवामृता भवन्ति, अथेतरे दुःखमेवापि यन्ति—इति। अन्यथोपक्रमविरोधोऽनन्तरोक्तिविरोधश्च। *परात्परं पुरुषमुपैति दिव्यम्* इति पूर्वत्र *अक्षरात्परतः परः* इति, अक्षरात्-अव्याकृतात् यः परः-समष्टिपुरुषः; तस्मात्परो योऽदृश्यत्वादिगुणकस्सर्वज्ञः परमपुरुषः, स एवेहापि परात्पर इति समष्टिपुरुषात्परत्वेनोच्यते ॥ ३५ ॥

350 अनेन सर्वगतत्वमायामशब्दादिभ्यः। ३। २। ३६॥

अनेन-ब्रह्मणा, सर्वगतत्वम्-सर्वस्य जगतो व्याप्तत्वम्, आयामशब्दादिभ्यः—सर्वव्याप्तिवाचिशब्देभ्योऽवगम्यमानमस्मात्परं नास्तीत्यवगमयति। आयामशब्दस्तावत् *तेनेदं पूर्णं पुरुषेण सर्वम् *यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ *नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः*। आदिशब्दात् * ब्रह्मैवेदं सर्वम् *आत्मैवेदं सर्वमित्यादयो गृह्यन्ते। अत इदं परं ब्रह्मैव सर्वस्मात्परम् ॥ ३६ ॥ इति पराधिकरणम् ॥७॥

अथ फलाधिकरणम् ॥ ८ ॥

351 फलमत उपपत्तेः। ३। २। ३७॥

उक्तमुपासिसिषोपजननार्थं जीवस्य सर्वावस्थासु सदोषत्वं, प्राप्यस्य च परमपुरुषस्य निर्दोषत्वं, कल्याणगुणाकरत्वं, सर्वस्मात्परत्वंच। अतः परमुपासनं विवक्षन्नुपासीनानां परस्मादेवास्मात्पुरुषात्तत्प्राप्तिरूपमपवर्गाख्यं फलमिति संप्रति ब्रूते। तुल्यन्यायतया शास्त्रीयमैहिकामुष्मिकमपि फलम् अत एव परस्मात्पुरुषाद्भवतीति सामान्येन फलमत इत्युच्यते। कुत एतत्? उपपत्तेः—स एव हि सर्वज्ञस्सर्वशक्तिर्महोदारो यागदानहोमादिभिरुपासनेन चाराधित ऐहिकामुष्मिकभोगजातं स्वस्वरूपावाप्तिरूपमपवर्गं च दातुमीष्टे। न ह्यचेतनं कर्म क्षणध्वंसि कालान्तरभाविफलसाधनं भवितुमर्हति ॥ ३७ ॥

352 श्रुतत्वाच्च। ३। २। ३८॥

*स वा एष महानज आत्माऽन्नादो वसुदानः *एष ह्येवानन्दयाति* इति भोगापवर्गरूपं फलमयमेव ददातीति हि श्रूयते ॥ ३८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

संप्रति पूर्वपक्षमाह--

353 धर्मं जैमिनिरत एव । ३ । २ । ३९ ॥

अत एव-उपपत्तेः, शास्त्राच्च, यागदानहोमोपासनरूपधर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते। लोके हि कृष्यादिकं मर्दनादिकं च कर्म साक्षाद्वा, परंपरया वा स्वयमेव फलसाधनं दृष्टम्; एवं वेदेऽपि यागदानहोमादीनां साक्षात्फलसाधनत्वाभावेऽपि परंपरया अपूर्वद्वारेण फलसाधनत्वमुपपद्यते। तथा *यजेत स्वर्गकामः* इत्यादिशास्त्रमपि सिषाधयिषितस्वर्गस्य कर्तव्यतया यागाद्यभिदधदन्यथानुपपत्त्या अपूर्वद्वारेण फलसाधनत्वमवगमयति ॥ ३९ ॥

354 पूर्वं तु बादरायणो हेतुव्यपदेशात् । ३ । २ । ४० ॥

तुशब्दः पक्षव्यावृत्त्यर्थः। पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं भगवान्बादरायणो मन्यते। कुतः? हेतुव्यपदेशात्— *यज-देवपूजायामिति देवताराधनभूतयागाद्याराध्यभूताग्निवाय्वादिदेवतानामेव तत्तत्फलहेतुतया तस्मिंस्तस्मिन्नपि वाक्ये व्यपदेशात्। *वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति* इत्यादिषु कामिनस्सिषाधयिषितफलसाधनत्वप्रकारोपदेशोऽपि विध्यपेक्षित एवेति नातत्परत्वशङ्का युक्ता। एवमपेक्षितेऽपि फलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागमश्रुतापूर्वादिपरिकल्पनं च प्रामाणिका न सहन्ते। लिङादयोऽपि देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां शब्दानुशासनानुमतामभिदधति; नान्यदलौकिकमिति प्रागेवोक्तम्। तदेवं *वायुर्वै क्षेपिष्ठा देवतेत्यादिशब्दाद्वाय्वादीनां फलप्रदत्वमवगम्यते। वाय्वाद्यात्मना च परमपुरुष एवाराध्यतया फलप्रदायित्वेन चावतिष्ठत इति श्रूयते *इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः, तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः* इति। अन्तर्यामिब्राह्मणे च *यो वायौ तिष्ठन्यस्य वायुश्शरीरम् *योऽग्नौ तिष्ठन् *य आदित्ये तिष्ठन्* इत्यादि श्रूयते। स्मर्यते च *यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान् ॥ इति, *अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति। प्रभुरिति--फलप्रदायीत्यर्थः। *देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि, *यान्ति मद्याजिनोऽपि माम्* इति च। लोके च कृष्यादिभिर्विचित्ररूपान् द्रव्यविशेषान् संपाद्य तैः राजानं भृत्यद्वारेण साक्षाद्वाऽर्चयन्ति; अर्चितश्च राजा तत्तदर्चनानुगुणं फलं प्रयच्छन् दृश्यते। वेदान्तास्त्वतिपतितसकलेतरप्रमाणसंभावनाभूमिं निरस्तसमस्ताविद्यादिदोषगन्धं स्वाभाविकानवधिकातिशयापरिमितोदारगुणसागरं पुरुषोत्तमं प्रतिपाद्य, तदाराधनरूपाणि च यागदानहोमात्मकानि, स्तुतिनमस्कारकीर्तनार्चनध्यानानि च तदाराधनानि, आराधितात्परस्मात्पुरुषाद्भोगापवर्गरूपं फलं च, वदन्तीति सर्वं समञ्जसम् ॥ ४० ॥ इति फलाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः

तृतीयाध्याये—तृतीयः पादः—सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

355 सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । ३ । ३ । १ ॥

उक्तं ब्रह्मोपासिसिसिषोपजननाय वक्तव्यं ब्रह्मणः फलदायित्वपर्यन्तम्। इदानीं ब्रह्मोपासनानां गुणोपसंहारविकल्पनिर्णयाय विद्याभेदाभेदचिन्ता प्रस्तूयते। प्रथमं तावदेकस्या वैश्वानरविद्यादिकायाः अनेकशाखासु श्रूयमाणायाः किमेकविद्यात्वम्, उत विद्याभेद इति चिन्त्यते। अविशेषपुनश्श्रवणस्य प्रकरणान्तरस्य च भेदकत्वाच्छाखान्तरे चोभयोरवर्जनीयत्वाद्विद्याभेद इति प्राप्तम्। अत एव *तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्* इति शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियम उपपद्यते। विद्यैक्ये हि विद्याङ्गस्य शिरोव्रतस्यान्येषामपि शाखिनां प्राप्तेर्नियमो नोपपद्यते।

एवं प्राप्त उच्यते—सर्ववेदान्तप्रत्ययमेकमुपासनमिति। कुतः? चोदनाद्यविशेषात्—चोदना तावत् *उपासीत *विद्यात्* इत्येवंजातीयको धात्वर्थविशेषविधिः। आदिशब्देन *एकं वा संयोग-रूपचोदनाख्याविशेषात्* इति कर्मकाण्डशाखान्तराधिकरणसूत्रोक्तास्संयोगरूपाख्या गृह्यन्ते। एषां चोदनादीनामविशेषात् सैवेयं विद्येति शाखान्तरे प्रत्यभिज्ञायते। तथाहि—छान्दोग्यवाजसनेयकयोः *वैश्वानरमुपास्ते* इति चोदना तावदेकरूपा; वेद्यैकनिरूपणीयस्वरूपस्य विदिपर्यायस्योपासेर्वेद्य-भूतवैश्वानरैक्याद्रूपमप्यविशिष्टम्; आख्या च वैश्वानरविद्येत्यविशिष्टा। अत एभिः प्रत्यभिज्ञाना-च्छाखान्तरेऽपि विद्यैक्यम् ॥ १ ॥

यत्तूक्तमविशेषपुनश्श्रवणात्प्रकरणान्तराच्च विधेयभेदप्रतीतेर्न विद्यैक्यमिति, तदनुभाष्य परिहरति—

356 भेदान्नेति चेदेकस्यामपि। ३। ३। २ ॥

अविशेषपुनश्श्रुत्या प्रकरणान्तराच्च विधेयभेदान्न विद्यैक्यमिति चेत्; एकस्यामपि विद्यायां प्रतिपत्तृभेदात्पुनश्श्रुतिः प्रकरणान्तरं चोपपद्यते। यत्र ह्येकस्मिन् प्रतिपत्तरि पुनश्श्रुतिः प्रकरणान्तरं च विद्यते; तत्रान्यथानुपपत्त्या विधेयभेदाद्विद्याभेदः, प्रतिपत्तृभेदे तु तत्प्रतिपत्त्यर्थतया पुनश्श्रुत्या-द्युपपत्तेस्तत्र न विधेयान्तरसंभवः ॥ २ ॥

यच्चोक्तं शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियमदर्शनाद्विद्याभेदः प्रतीयत इति, तत्राह—

357 स्वाध्यायस्य तथात्वेहि समाचारेऽधिकाराच्च सववच्च तन्नियमः ।३।३।३॥

नैतदस्ति—शिरोव्रतोपदेशनियमदर्शनं विद्याभेदं द्योतयतीति, शिरोव्रतस्य विद्याङ्गत्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

भावात् । स्वाध्यायस्य तथात्वे हि तन्नियमः––स्वाध्यायस्य तथात्वसिद्ध्यर्थं––तज्जन्यसंस्कार-भाक्त्वसिद्ध्यर्थं हि शिरोव्रतोपदेशनियमः; न विद्यायाः । कुत एतत् ? *नैतदचीर्णव्रतोऽधीयीत* इति तस्याध्ययनसंयोगात् । समाचारेऽधिकाराच्च––समाचाराख्ये ग्रन्थे *इदमपि वेदव्रतेन व्याख्यातम्* इत्यतिदेशात् । *तेषामेवैतां ब्रह्मविद्यां वदेत–वेदविद्यामित्यर्थः । सवच्च तन्नियमः––यथाहि सवहोमास्सप्त सूर्यादयश्शतोदनपर्यन्ता आथर्वणिकैकाग्निसंबन्धिनस्तत्रैव भवन्ति; न त्रेताग्निषु ॥३॥

358 दर्शयति च । ३ । ३ । ४ ॥

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम् । तथाहि छान्दोग्ये *तस्मिन्यदन्तस्त-दन्वेष्टव्यम्* इत्युक्त्वा *किं तदत्र विद्यते यदन्वेष्टव्यम्* इति प्रश्नपूर्वकम् अपहतपाप्मत्वादि-गुणाष्टकविशिष्टः परमात्मा तास्मिन्नुपास्य इत्युक्तम् । तैत्तिरीयके तु च्छान्दोग्यस्थं प्रतिनिर्देशमुपजीव्य *तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्* इति गुणाष्टकविशिष्टस्य परमात्मन उपासनमुच्यते । तदुभयत्र विद्यैकत्वेन गुणोपसंहारादेवोपपद्यते ॥ ४ ॥

तदेवं शाखान्तराधिकरणन्यायसिद्धं विद्यैक्यं स्थिरीकृत्य तत्प्रयोजनमाह––

359 उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च । ३ । ३ । ५ ॥

एवं सर्ववेदान्तेषु समाने सत्युपासने वेदान्तान्तराम्नातानां गुणानां वेदान्तान्तर उपसंहारः कर्तव्यः; कुतः ? विधिशेषवदर्थाभेदात्––यथैकस्मिन्वेदान्ते श्रुतो वैश्वानरदहरादिविधिशेषो गुणस्त-द्विद्यासंबन्धात्तदुपकाररूपप्रयोजनसिद्ध्यर्थमनुष्ठीयते; तथा वेदान्तान्तरोदितोऽपि तद्विद्यासंबन्धित्वेन तदुपकाराविशेषादुपसंहर्तव्य इत्यर्थः । चशब्दोऽवधारणे ॥ ५ ॥ इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

अथ अन्यथात्वाधिकरणम् ॥ २ ॥

360 अन्यथात्वं शब्दादिति चेन्नाविशेषात् । ३ । ३ । ६ ॥

एवं चोदनाद्यविशेषाद्विद्यैकत्वम्, एकत्वे च गुणोपसंहारः कर्तव्य इत्युक्तम् । अतः परं काश्चन विद्या अधिकृत्य प्रत्यभिज्ञाहेतुभूतचोदनाद्यविशेषोऽस्ति, नेति निरूप्य निर्णीयते ।

अस्त्युद्गीथविद्या वाजिनां छन्दोगानां च । वाजिनां तावत् *द्वया ह प्राजापत्या देवा-श्चासुराश्च* इत्यारभ्य *ते ह देवा ऊचुः हन्तासुरान्यज्ञ उद्गीथेनात्ययाम* इत्युद्गीथेनासुरविध्वंसनं प्रतिज्ञायोद्गीथे वागादिमनःपर्यन्तदृष्टौ असुरैरभिभवमुक्त्वा *अथ हेममासन्यं प्राणमूचुः* इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा *भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद*

Digitization by Arya Samaj Charitable Foundation, Chennai

इति शत्रुपराजयफलायोद्गीथे प्राणदृष्टिर्विहिता । एवं छन्दोगानामपि *देवासुरा ह वै यत्र संयेतिरे* इत्यारभ्य *तद्ध देवा उद्गीथमाजहुरनेनैनानभिहनिष्यामः* इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्ध-देवोद्गीथे वागादिदृष्टौ दोषमभिधाय *अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे* इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा *यथाऽश्मानमाखणमृत्वा विध्वंसते एवं हैव स विध्वंसते य एवंविदि पापं कामयते* इति शत्रुपराभवाय उद्गीथे प्राणदृष्टिर्विहिता । वेदनविषय-विधिप्रत्ययाश्रवणेऽपि फलसाधनत्वश्रवणाद्वेदनविषयो विधिः कल्प्यते । उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलत्वेऽप्यार्थवादिकमपि फलं तदविरुद्धं ग्राह्यमेवेति देवताधिकरणे प्रतिपादितम् । तत्र संशय्यते—किमत्र विद्यैक्यम्, उत नेति । किं युक्तम् ? विद्यैक्यमिति । कुतः ? उभयत्रोद्गीथ-स्यैवाध्यस्तप्राणभावस्योपास्यत्वश्रवणाच्चोदनाद्यविशेषात् । फलसंयोगस्तावच्छत्रुपरिभवरूपो न विशिष्यते । रूपमप्यध्यस्तप्राणभावोद्गीथाख्योपास्यैक्यादविशिष्टम् । चोदना च विदिधात्वर्थगता अविशिष्टा । आख्या चोद्गीथविद्येत्यविशिष्टा ॥

अत्र राद्धान्तिच्छायया परिचोद्य परिहरति—अन्यथात्वं शब्दादिति चेन्नाविशेषादिति । यदुक्तं विद्यैक्यमिति, तन्नोपपद्यते, रूपभेदात्; रूपान्यथात्वं हि शब्दादेव प्रतीयते । वाजसनेयके हि *अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्* इत्युद्गानस्य कर्तरि प्राणदृष्ट्याऽसुरपराभवमुक्त्वा *य एवं वेद* इति कर्तर्येव प्राणदृष्टिरेवंशब्दादवगम्यते । छान्दोग्ये *अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे* इत्युद्गानस्य कर्मण्युद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा *य एवंविदि पापं कामयते* इत्येवंशब्दात्कर्मण्येवोद्गीथे प्राणदृष्टिर्विहिता । अत एकत्र कर्तरि प्राणदृष्टिशब्दादन्यत्र कर्मणि प्राणदृष्टिशब्दाच्च रूपान्यथात्वं स्पष्टम् । रूपान्यथात्वे च विधेयभेदे सति केवलचोदनाद्यविशेषोऽकिञ्चित्कर इति विद्याभेद इति चेत्; तन्न, अविशेषात्—अविशेषेण ह्युभयत्र उद्गीथसाधनकपरपरिभव उपक्रमे प्रतीयते; वाजसनेयके *ते ह देवा ऊचुर्हन्ता-सुरान्यज्ञ उद्गीथेनात्ययाम* इत्युपक्रमे श्रूयते; छान्दोग्येऽपि *तद्ध देवा उद्गीथमाजहुरनेनैनान-भिहनिष्यामः* इति । अत उपक्रमाविरोधाय *तेभ्य एष प्राण उदगायत्* इत्यध्यस्तप्राणभाव उद्गीथ उद्गानकर्मभूत एव पाकादिष्वोदनादिवत्सौकर्यातिशयविवक्षया कर्तृत्वेनोच्यते; अन्यथो-पक्रमगत उद्गीथशब्दः कर्तरि लाक्षणिकः स्यात् । अतो विद्यैक्यम् ॥ ६ ॥

इति प्राप्ते प्रचक्ष्महे—

361 न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् । ३ । ३ । ७ ॥

नवेति पक्षं व्यावर्तयति; नचैतदस्ति, यद्विद्यैक्यमिति । कुतः ? प्रकरणभेदात् *ओमित्येत-दक्षरमुद्गीथमुपासीत* इति प्रकृतमुद्गीथावयवं प्रणवं प्रस्तुत्य *एतस्य वा अक्षरस्योपव्याख्यानं भवति

Digitization by Arya Samaj Charitable Foundation, Chennai

देवासुरा हवै यत्र संयेतिरे इत्यारभ्य, *अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे* इत्युद्गीथावयवभूतप्रणवविषयमुपासनं छन्दोगा अधीयते। वाजिनस्तु तादृशप्राचीनप्रकरणाभावात् *हन्तासुरान्यज्ञ उद्गीथेनात्ययाम* इति कृत्स्नमुद्गीथं प्रस्तुत्य *अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गाय *इत्यादिकृत्स्नोद्गीथविषयमधीयते। अतः प्रकरणभेदेन विधेयभेदः, विधेयभेदे च रूपभेद इति न विद्यैक्यम्। किञ्च *अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे* इति पूर्वप्रकृत उद्गीथावयवभूतः प्रणव एवाध्यस्तप्राणभावश्छन्दोगानामुपास्यः। वाजिनां तु कृत्स्नस्योद्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति; *अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्* इत्युद्गातरि प्राणाध्यासं निर्दिश्य *य एवं वेद* इत्युद्गातैवाध्यस्तप्राणभाव उपास्यो विधीयते। अतश्च रूपभेदः। नचोद्गातर्युपास्ये विहिते *उद्गीथेनात्ययाम* इत्याख्यायिकोपक्रम-विरोधश्शङ्कनीयः; उद्गातुरुपासने उद्गीथस्योद्गानकर्मभूतस्यावश्यापेक्षितत्वात्तस्यापि परपरिभवाख्यं फलं प्रति हेतुत्वात्। अतो रूपभेदाद्विद्याभेद इति चोदनाद्यविशेषेऽपि न विद्यैक्यम्। परोवरीय-स्त्वादिवत्—यथैकस्यामपि शाखायामुद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात् परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरभूतम् ॥ ७ ॥

362 संज्ञातश्चेत्तदुक्तमस्ति तु तदपि। ३। ३। ८॥

उद्गीथविद्येति संज्ञैक्यात् तत्—विद्यैक्यमुक्तं चेत्; तत्—संज्ञैक्यं विधेयभेदेऽप्यस्त्येव। यथा अग्निहोत्रसंज्ञा नित्याग्निहोत्रे, कुण्डपायिनामयनाग्निहोत्रे च; यथा चोद्गीथविद्येति छान्दोग्ये प्रथम-प्रपाठकोदितासु बह्वीषु विद्यासु ॥ ८ ॥

363 व्याप्तेश्च समञ्जसम्। ३। ३। ९॥

छान्दोग्ये प्रथमप्रपाठके उत्तरास्वपि विद्यासूद्गीथावयवस्य प्रणवस्य प्रथमप्रस्तुतस्यो-पास्यत्वेन व्याप्तेश्च तन्मध्यगतस्य *तद्ध देवा उद्गीथमाजह्रुः* इत्युद्गीथशब्दस्य प्रणवविषयत्वमेव समञ्जसम्। अवयवे च समुदायशब्दः पटो दग्ध इत्यादिषु दृश्यते। अतश्चोद्गीथावयवभूतः प्रणव एवोद्गीथशब्दनिर्दिष्ट इति स एव प्राणदृष्ट्योपास्यश्छान्दोग्ये प्रतिपत्तव्यः। वाजसनेयके तु कृत्स्नोद्गीथविषय उद्गीथशब्द इति कृत्स्नोद्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति विद्यानानात्वं सिद्धम् ॥ ९ ॥ इति अन्यथात्वाधिकरणम् ॥ २ ॥

अथ सर्वाभेदाधिकरणम् ॥ ३ ॥

364 सर्वाभेदादन्यत्रेमे। ३। ३। १०॥

छान्दोग्यवाजसनेयकयोः प्राणविद्या आम्नायते *यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च

Digitization by Arya Samaj Charitable Foundation, Chennai

ह व श्रेष्ठश्च भवति प्राणो हवा व ज्येष्ठश्च श्रेष्ठश्च* इत्यादि। तत्र ज्यैष्ठ्यश्रैष्ठ्यगुणकं प्राणमुपास्यं प्रतिपाद्य वाक्चक्षुश्श्रोत्रमनस्सु वसिष्ठत्वप्रतिष्ठात्वसंपत्त्यायतनत्वाख्यान् गुणान् प्रतिपाद्य वागादीनां देहस्य च प्राणायत्तस्थितित्वेन तदायत्ततत्तत्कार्यत्वेन च प्राणस्य श्रैष्ठ्यं प्रतिपाद्य वागादिसंबन्धितया श्रुतान्वसिष्ठत्वादीन् गुणांश्च प्राणसंबन्धितया प्रतिपादयति। एवं छान्दोग्यवाजसनेयकयोर्ज्यैष्ठ्य-श्रैष्ठ्यगुणको वसिष्ठत्वादिगुणकश्च प्राण उपास्यः प्रतिपाद्यते। कौषीतकिनां तु प्राणविद्यायां तथैव ज्यैष्ठ्यश्रैष्ठ्यगुणकः प्राण उपास्यः प्रतिपादितः; न पुनर्वसिष्ठत्वादयो वागादिसंबन्धिनो गुणाः प्राणसंबन्धितया प्रतिपादिताः। तत्र संशयः——किमत्र विद्या भिद्यते, उत नेति। किं युक्तम्? भिद्यत इति। कुतः? रूपभेदात्। यद्यप्युभयत्र प्राण एव ज्यैष्ठ्यश्रैष्ठ्यगुणक उपास्यः। तथाप्येकत्र वसिष्ठत्वादिभिरपि गुणैर्युक्तः प्राण उपास्यः प्रतीयते; इतरत्र तु तद्विधुर इत्युपास्यरूपभेदाद्विद्याभेदः।

इति प्राप्ते ब्रूमः——सर्वाभेदादन्यत्रेमे। नात्र विद्याभेदः, अन्यत्र कौषीतकिनां प्राणविद्यायामपि इमे—वसिष्ठत्वादयो गुणा उपास्यास्सन्ति। कुतः? सर्वाभेदात्——प्रतिज्ञातप्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात्। तथाहि—छन्दोगवाजसनेयिनां प्राणविद्यायाम् *एता ह वै देवता अहंश्रेयसे व्यूदिरे *अहंश्रेयसे विवदमानाः इति चोपक्रम्य वागाद्येकैकापक्रमणे अन्येषां सप्राणानामिन्द्रियाणां शरीरस्य च स्थितिं तत्तत्कार्यं चाविकलं प्रतिपाद्य प्राणोत्क्रमणे सर्वेषां विशरणमकार्यकरत्वं चाभिधाय सर्वेषां प्राणाधीनस्थितित्वतदधीनकार्यत्वाभ्यां प्राणस्य ज्यैष्ठ्यमुपपादितम्। एवमुपपादितं वागादिकार्यस्य प्राणाधीनत्वम् *अथ हैनं वागुवाच यदहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसि* इत्यादिना वागादिभिरनूद्यते। कौषीतकिनां प्राणविद्यायामपि प्राणज्यैष्ठ्य-श्रैष्ठ्यप्रतिपादनाय वागादिषु वसिष्ठत्वादयः प्रतिपादिताः। *अथ हेमा देवताः प्रजापतिं पितरमेत्याब्रुवन् को वै नः श्रेष्ठः* इत्यादिना वागादिगता गुणा वागादयश्च देहश्च प्राणाधीना इति प्राणस्य ज्यैष्ठ्यमुपपादितम्। वागादिभिः स्वस्वगुणानां वसिष्ठत्वादीनां प्राणाधीनत्वानुवादमात्रं तु न कृतम्। नैतावता रूपभेदः, वागादीनां वसिष्ठत्वादिगुणान्वितानां प्राणाधीनकार्यत्वोपपादनेनैव प्राणस्य वागादिवसिष्ठत्वादिगुणहेतुत्वस्य सिद्धत्वात्। तदेव हि प्राणस्य वसिष्ठत्वादिगुणयोगित्वम्, यद्वागादिवसिष्ठत्वादिहेतुत्वम्। अतोऽत्रापि वसिष्ठत्वादिगुणयोगात्प्राणो ज्येष्ठः प्रतिपन्न इति नास्ति विद्याभेदः ॥ १० ॥ इति सर्वाभेदाधिकरणम् ॥ ३ ॥

अथ आनन्दाद्यधिकरणम् ॥ ४ ॥

———

प्राणविद्याङ्गविषयमन्यदपि निरूपणमनन्तरमेव करिष्यते। यथा प्राणस्य वसिष्ठत्वाद्यनुसन्धानेन विना ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानानुपपत्तेरनुक्तानामपि वसिष्ठत्वादीनां कौषीतकिप्राणविद्यायां प्राप्तिः; तथा ब्रह्मस्वरूपानुसन्धानं यैर्गुणैर्विना नोपपद्यते, ते ब्रह्मविद्यासु सर्वास्वप्यनुसन्धेया इत्ययमर्थः प्रतिपाद्यते——

Digitization by Arya Samaj Charitable Foundation, Chennai

365 आनन्दादयः प्रधानस्य। ३। ३। ११॥

अत्र ब्रह्मस्वरूपगुणानां सर्वासु परविद्यासूपसंहारोऽस्ति, नेति विचार्यते। अप्रकरणाधीतानामुपसंहारे प्रमाणाभावात्प्रकरणश्रुतानामेवोपसंहार इत्येवं प्राप्ते ब्रूमः––आनन्दादयः प्रधानस्य। अभेदादिति वर्तते। प्रधानस्य गुणिनो ब्रह्मणस्सर्वेषूपासनेष्वभेदात्, गुण्यपृथग्भावाद्गुणानां, सर्वत्रानन्दादयस्तद्गुणा उपसंहर्तव्याः॥ ११॥

एवं तर्हि गुण्यपृथग्भावादेवानन्दादिवत्प्रियशिरस्त्वादयोऽपि *तस्य प्रियमेव शिरः* इत्यादौ ब्रह्मगुणत्वेन श्रुतास्सर्वत्र प्रसज्येरन्; नेत्याह––

366 प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे। ३। ३। १२॥

ब्रह्मस्वरूपगुणानां प्राप्तावुच्यमानायां प्रियशिरस्त्वादीनामप्राप्तिः, तेषामब्रह्मगुणत्वात्; ब्रह्मणः पुरुषविधत्वरूपणमात्रान्तर्गतत्वात्प्रियशिरस्त्वादीनाम्। अन्यथा शिरःपक्षपुच्छाद्यवयवभेदे सति ब्रह्मणोऽप्युपचयापचयौ प्रसज्येयाताम्। तथा च सति *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि विरुध्यते॥ १२॥

नन्वेवमेव ब्रह्मसंबन्धिनामैश्वर्यगाम्भीर्यौदार्यकारुण्यादीनां गुणानामनन्तानां गुण्यपृथक्स्थितत्वमात्रेण तत्राश्रुतानामप्युपसंहारे सर्वे सर्वत्र प्रसज्येरन्, आनन्त्यादुपसंहाराशक्तिश्च; तत्राह––

367 इतरे त्वर्थसामान्यात्। ३। ३। १३॥

तुशब्दश्चोद्यं व्यावर्तयति। इतरेतु–आनन्दादयः अर्थसामान्यात्सर्वत्रानुवर्तन्ते। ये त्वर्थसमानाः–अर्थस्वरूपनिरूपणधर्मत्वेनार्थप्रतीत्यनुबन्धिनः; तेऽर्थस्वरूपवत्सर्वत्रानुवर्तन्ते। ते च गुणास्सत्यज्ञानानन्दामलत्वानन्तत्वानि। *यतो वा इमानीत्यादिना जगत्कारणतयोपलक्षितं ब्रह्म *सत्यं ज्ञानमनन्तं ब्रह्म *आनन्दो ब्रह्मेत्यानन्दादिभिर्हि स्वरूपतो निरूप्यते। अत उपास्यब्रह्मस्वरूपावगमाय सर्वासु विद्यास्वानन्दादयोऽनुवर्तन्ते। ये तु निरूपितस्वरूपस्य ब्रह्मणः कारुण्यादयो गुणाः प्रतिपन्नाः; तेषां गुण्यपृथक्स्थितत्वेऽपि प्रतीत्यनुबन्धित्वाभावात्, ये यत्र श्रुताः, ते तत्रोपसंहार्या इति निरवद्यम्॥ १३॥

यद्युपचयापचयप्रसङ्गात्प्रियशिरस्त्वादयो ब्रह्मणः पुरुषविधत्वरूपणमात्रार्थाः, न तु ब्रह्मगुणाः; तर्ह्यतथारूपस्य ब्रह्मणस्तथात्वेन रूपणं किमर्थं क्रियते? अतथाभूतस्य हि तथात्वरूपणे केनचित्प्रयोजनेन भवितव्यम्; यथा *आत्मानं रथिनं विद्धि* इत्यादिनोपासकस्य तदुपकरणानां च रथिरथादित्वरूपणम् उपासनोपकरणभूतशरीरेन्द्रियादिवशीकरणार्थं क्रियत इत्युक्तम्। नचेह तथाविधं किञ्चित्प्रयोजनं दृश्यत इति बलाद्ब्रह्मगुणत्वं प्रियशिरस्त्वादीनामभ्युपेत्यम्। तत्राह––

Digitization by Arya Samaj Charitable Foundation, Chennai

368 आध्यानाय प्रयोजनाभावात् । ३ । ३ । १४ ॥

प्रयोजनान्तराभावादाध्यानायायं रूपणोपदेशः क्रियते । आध्यानम् अनुचिन्तनम्, उपासनमुच्यते । *ब्रह्मविदाप्नोति परमित्यत्रोपदिष्टाध्यानरूपवेदनसिद्ध्ये ह्यानन्दमयब्रह्मप्रतिपत्त्यर्थमानन्दमयं ब्रह्म प्रियमोदादिरूपेण विभज्य शिरःपक्षादित्वेन रूपयित्वोपदिश्यत । यथाऽन्नमयः पुरुषः अयं देहः शिरःपक्षादिभिः *तस्येदमेव शिरः* इत्यादिना बुद्धावारोप्यते; यथा च प्राणमयमनोमयविज्ञानमयाः *तस्य प्राण एव शिरः* इत्यादिना प्राणाद्यवयवैर्बुद्धावारोप्यन्ते; एवमेभ्योऽर्थान्तरभूतस्तदन्तरात्मा आनन्दमयोऽपि प्रियमोदादिभिरेकदेशैः शिरःप्रभृतित्वेन रूपितैराध्यानाय बुद्धावारोप्यते । एवमानन्दमयोपलक्षणत्वात्प्रियशिरस्त्वादीनां न सर्वदा आनन्दमयप्रतीतावनुवर्तन्ते ॥ १४ ॥

369 आत्मशब्दाच्च । ३ । ३ । १५ ॥

अन्योऽन्तर आत्माऽऽनन्दमयः इत्यात्मशब्देन निर्देशादात्मनश्च शिरःपक्षपुच्छासंभवात्प्रियशिरस्त्वादयस्तस्य सुखप्रतिपत्त्यर्थं रूपणमात्रमिति गम्यते ॥ १५ ॥

ननु *अन्योऽन्तर आत्मा प्राणमयः *अन्योऽन्तर आत्मा मनोमयः* इत्यात्मशब्दस्यानात्मस्वपि पूर्वं प्रयुक्तत्वात् *अन्योऽन्तर आत्माऽऽनन्दमय इत्यात्मशब्दस्य परमात्मविषयत्वं कथं निश्चीयते ? तत्राह—

370 आत्मगृहीतिरितरवदुत्तरात् । ३ । ३ । १६ ॥

*अन्योऽन्तर आत्माऽऽनन्दमय इत्यत्रात्मशब्देन परमात्मन एव ग्रहणम्; इतरवत्—यथेतरत्र *आत्मा वा इदमेक एवाग्र आसीत्, स ईक्षत लोकान्नु सृजै* इत्यादिष्वात्मशब्देन परमात्मन एव ग्रहणम्; तद्वत् । कुत एतत् ? उत्तरात्— *सोऽकामयत, बहु स्यां प्रजायेयेत्यानन्दमयविषयादुत्तराद्वाक्यात् ॥ १६ ॥

371 अन्वयादिति चेत्स्यादवधारणात् । ३ । ३ । १७ ॥

पूर्वत्र प्राणमयादिष्वनात्मस्वात्मशब्दान्वयदर्शनान्नोत्तरान्निश्चेतुं शक्यत इति चेत्; स्यादवधारणात्—स्यादेव निश्चयः; कुतः ? अवधारणात्—पूर्वत्रापि *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः* इति परमात्मन एव बुद्ध्याऽवधारितत्वात् अन्नमयादन्तरे प्राणमये प्रथमं परमात्मबुद्धिरवतीर्णा; तदनन्तरं च प्राणमयादन्तरे मनोमये; ततो विज्ञानमये; तत आनन्दमये प्रक्रान्ता परमात्मबुद्धिस्तदन्तराभावादुत्तराच्च *सोऽकामयतेति वाक्यात्प्रतिष्ठितेत्युपक्रमेऽप्यपरमात्मनि परमात्मबुद्ध्या आत्मशब्दान्वयः इति निरवद्यम् ॥ १७ ॥ इति आनन्दाद्यधिकरणम् ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ कार्याख्यानाधिकरणम् ॥ ५ ॥

372 कार्याख्यानादपूर्वम् । ३ । ३ । १८ ॥

पूर्वप्रस्तुतप्राणविद्याशेषभूतमिदानीं चिन्त्यते । छान्दोग्यवाजसनेयकयोः ज्येष्ठं च श्रेष्ठं च प्राणमुपास्यमुक्त्वा प्राणस्य वासस्त्वेनापोऽभिधीयन्ते । छान्दोग्ये तावत् *स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो भवति* इति । वाजसनेयके *किं मे वासः* इति प्राणेन पृष्टा वागादयः ऊचुः *आपो वास इति तद्विद्वांसश्श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते *तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते* इति । तत्र संशयः– किमत्राचमनं विधीयते, उतापां प्राणवासस्त्वानुसन्धानमिति । *अशिष्यन्नाचामेदशित्वा चाचामेदि-त्याचमने विधिप्रत्ययश्रवणात्, *एतमेव तदनमनग्नं कुरुत इति वेदने विधिप्रत्ययाभावादनग्नता-सङ्कीर्तनस्य स्तुत्यर्थतयाऽन्वयोपपत्तेश्च, भोजनाङ्गस्याचमनस्य स्मृत्याचारप्राप्तत्वेन विधिप्रत्यय-बलात्प्राणविद्याङ्गमाचमनान्तरं विधीयते ।

इति प्राप्ते ब्रूमः—आचमनीयानामपां प्राणस्य वासस्त्वानुसन्धानमेवेह अपूर्वम्—अप्राप्तं विधीयते, कार्याख्यानात्—अप्राप्ताख्यानात्; अप्राप्ताख्याने शब्दस्यार्थवत्त्वादित्यर्थः । एतदुक्तं भवति— *किं मे वासः *आपो वासः *अद्भिः परिदधति *एतमेव तदनमनग्नं कुरुते* इत्यु-पक्रमोपसंहारयोर्वाक्यस्यापां प्राणवासोदृष्टिपरत्वप्रतीतेराचमनस्य स्मृत्याचारप्राप्तत्वादाचमनमनूद्याच-मनीयास्वप्सु प्राणवासस्त्वानुसन्धानं विधीयत इति । अत एव च्छान्दोग्ये *तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति* इत्यद्भिः परिधानमेवोक्तम्; नाचमनम् ॥ १८ ॥ इति कार्याख्यानाधि-करणम् ॥ ५ ॥

अथ समानाधिकरणम् ॥ ६ ॥

373 समान एवं चाभेदात् । ३ । ३ । १९ ॥

वाजसनेयके अग्निरहस्ये शाण्डिल्यविद्याऽऽम्नाता *सत्यं ब्रह्मेत्युपासीत अथ खलु क्रतु-मयोऽयं पुरुषः* इत्यारभ्य *स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशा-त्मानमिति । तथा तस्मिन्नेव बृहदारण्यके पुनरपि शाण्डिल्यविद्याऽऽम्नायते *मनोमयोऽयं पुरुषो भास्सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्या-धिपतिस्सर्वमिदं प्रशास्ति यदिदं किञ्चेति । तत्र संशयः—किमत्र विद्या भिद्यते, उत नेति । संयोगचोदनाख्यानामविशेषेऽपि वशित्वाद्युपास्यगुणभेदेन रूपभेदाद्विद्याभेद इति प्राप्त उच्यते— समान एवमिति । यथाऽग्निरहस्ये मनोमयप्राणशरीरभारूपसत्यसङ्कल्पत्वगुणगणः श्रुतः; एवं

Digitization by Arya Samaj Charitable Foundation, Chennai

बृहदारण्यकेऽपि मनोमयत्वादिके समाने सत्यधिकस्य वशित्वादेश्च सत्यसङ्कल्पत्वगुणाभेदान्न रूपभेदः; अतो विद्यैक्यम् ॥ १९ ॥ इति समानाधिकरणम् ॥ ६ ॥

अथ संबन्धाधिकरणम् ॥ ७ ॥

374 संबन्धादेवमन्यत्रापि । ३ । ३ । २० ॥

बृहदारण्यके श्रूयते—*सत्यं ब्रह्मेत्युपक्रम्य *तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्* इत्युपक्रम्य आदित्यमण्डलेऽक्षणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा *तस्योपनिषदहरित्यधिदैवतम् *तस्योपनिषदहमित्यध्यात्मम्* इति द्वे उपनिषदौ रहस्यनामनी उपासनशेषतयाम्नायेते । ते किं यथाश्रुतस्थानविशेषनियतत्वेन व्यवस्थिते, उतोभयत्रोभे अनियमेनेति संशये, सत्यस्य व्याहृतिशरीरस्यैवोपास्यस्य ब्रह्मणो द्वयोः स्थानयोस्संबन्धादुपास्यैक्येन रूपाभेदात्संयोगाद्यभेदाच्च विद्यैक्यादनियमेनेति प्राप्तम् । तदिदमुच्यते संबन्धादेवमन्यत्रापीति । यथा मनोमयत्वादिगुणविशिष्टस्यैकत्वादुपास्यैक्येन रूपाभेदाद्विद्यैक्याद्गुणोपसंहारः; एवमन्यत्राक्ष्यादित्यसंबन्धिनो ब्रह्मणस्सत्यस्यैकत्वेन विद्यैक्यादुभयोरुभयत्रोपसंहारः ॥२०॥

इत्येवं प्राप्ते प्रचक्ष्महे—

375 न वा विशेषात् । ३ । ३ । २१ ॥

न वैतदस्ति यद्विद्यैक्यादुपसंहार इति । कुतः ? विशेषात्—उपास्यरूपविशेषात् । ब्रह्मण एकत्वेऽप्येकत्रादित्यमण्डलस्थतया उपास्यत्वम्, इतरत्राक्ष्याधारतयोपास्यत्वमिति स्थानसंबन्धित्वभेदेन रूपभेदाद्विद्याभेदः । नैवं शाण्डिल्यविद्यायाः उपास्यस्थानं भिद्यते, उभयत्र हृदयाधारत्वेनोपास्यत्वात् । अतो व्यवस्थिते इति ॥ २१ ॥

376 दर्शयति च । ३ । ३ । २२ ॥

दर्शयति चाक्ष्याधारादित्याधारयोर्गुणानुपसंहारं *तस्यैतस्य तदेव रूपं यदमुष्य रूपम्* इत्यादिना रूपाद्यतिदेशेन । स्वतो ह्यप्राप्तावतिदेशेन प्राप्त्यपेक्षा ॥२२॥ इति सम्बन्धाधिकरणम् ॥ ७ ॥

अथ सम्भृत्यधिकरणम् ॥ ८ ॥

377 संभृतिद्युव्याप्त्यपि चातः । ३ । ३ । २३ ॥

तैत्तिरीयके राणायनीयानां खिलेषु च *ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान । ब्रह्म भूतानां प्रथमोऽत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥ इति ब्रह्मणि ज्येष्ठानां वीर्याणां संभृतिः, द्युव्याप्तिश्चेत्यादिगुणजातमाम्नातम् । तेषामुपासनविशेषमनारभ्याधीतानां गुणानां

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वासु विद्यासूपसंहारे प्राप्त उच्यते—

संभृतिद्युव्याप्त्यपीति । संभृतिद्युव्याप्तीति समाहारद्वन्द्वत्वादेकवद्भावः । संभृत्यादिकमनारभ्याधीतमपि अत एव स्थानभेदाद्व्यवस्थाप्यम्; न सर्वत्रोपसंहर्तव्यम् । कथमनारभ्याधीतानां स्थानविशेषनियतत्वम्; स्वसामर्थ्यादिति ब्रूमः । द्युव्याप्तिस्तावद्धृदयाद्यल्पस्थानगोचरासु विद्यासु नोपसंहर्तुं शक्या; संभृत्यादयोऽपि तत्सहचारिणस्तत्तुल्यदेशा इत्यल्पस्थानविषयासु विद्यास्वनुपसंहार्याः । शाण्डिल्यदहरादिविद्यास्वल्पस्थानविषयासु *ज्यायान् पृथिव्याः *यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः* इत्यादयस्तत्रतत्राशक्योपसंहाराः मनोमयत्वापहतपाप्मत्वादिविशिष्टस्योपास्यस्य माहात्म्यप्रतिपादनपराः ॥ २३ ॥ इति संभृत्यधिकरणम् ॥ ८ ॥

अथ पुरुषविद्याधिकरणम् ॥ ९ ॥

378 पुरुषविद्यायामपि चेतरेषामनाम्नानात् । ३ । ३ । २४ ॥

तैत्तिरीयके पुरुषविद्याऽऽम्नायते *तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः* इत्यादिका । छान्दोग्येऽपि पुरुषविद्याऽऽम्नायते *पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि* इत्यादिका । तत्र संशयः—किमत्र विद्या भिद्यते, उत नेति । पुरुषविद्येति नामैक्यात्पुरुषावयवेषु यज्ञावयवकल्पनसाम्येन रूपैक्यात् तैत्तिरीयके फलसंयोगाश्रवणात् *प्र ह षोडशं वर्षशतं जीवति* इति च्छान्दोग्ये श्रुतस्यैव पुरुषविद्याफलत्वात्फलसंयोगस्याप्यविशेषाद्विद्यैक्यम् ॥

इति प्राप्त उच्यते—उभयत्राम्नातयोर्विद्ययोः पुरुषविद्यात्वेऽपि विद्याभेदोऽस्त्येव । कुतः ? इतरेषामनाम्नानात्—एकस्यां शाखायामाम्नातानां गुणानामन्यत्रानाम्नानात् । तथा हि *यत्सायं प्रातर्मध्यन्दिनं च तानि सवनानि* इत्यादयस्तैत्तिरीयके आम्नाताः छान्दोग्ये सवनत्वेन नाम्नायन्ते; त्रेधा विभक्तं पुरुषायुषं छान्दोग्ये सवनत्वेन कल्प्यते । छान्दोग्ये श्रुतानामशिशिषादीनां दीक्षादित्वकल्पनं तैत्तिरीयके न कृतम् । यजमानपत्न्यादिपरिकल्पनं चान्यथा । अतो रूपमुभयत्र भिद्यते । तथा फलसंयोगोऽपि भिद्यते; तैत्तिरीयके हि पूर्वानुवाके *ब्रह्मणे त्वामहस ओमित्यात्मानं युञ्जीत* इति ब्रह्मविद्यामभिधाय तत्फलत्वेन *ब्रह्मणो महिमानमाप्नोति* इत्युक्त्वा *तस्यैवं विदुषः* इत्यादिना आम्नाता पुरुषविद्याऽस्यैव ब्रह्मविदुषो यज्ञत्वकल्पनमिति गम्यते ॥

अतो ब्रह्मविद्याङ्गत्वाद्ब्रह्मप्राप्तिरेवात्र फलम्; *फलवत्सन्निधावफलं तदङ्गमिति न्यायात्तैत्तिरीयकाम्नाता पुरुषविद्या ब्रह्मविद्याङ्गमिति गम्यते। छान्दोग्ये त्वायुःप्राप्तिफला पुरुषविद्येत्युक्तम् । अतो रूपसंयोगयोर्भेदाद्विद्याभेद इत्येकत्राम्नातानां गुणानामितरत्रानुपसंहारः ॥ २४ ॥ इति पुरुषविद्याधिकरणम् ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ वेधाद्यधिकरणम् ॥ १० ॥

379 वेधाद्यर्थभेदात् । ३ । ३ । २५ ॥

आथर्वणिका उपनिषदारम्भे *शुक्रं प्रविध्य हृदयं प्रविध्य* इत्यादीन्मन्त्रानधीयते; सामगाश्च रहस्यब्राह्मणारम्भे *देव सवितः प्रसुव यज्ञं प्रसुव* इत्याद्यामनन्ति; काठकास्तैत्तिरीयकायश्च *शं नो मित्रश्शं वरुणः* इत्यादिकम्; शाट्यायनिनश्च *श्वेतोऽश्वो हरिनीलोऽसि* इत्यादिकम्; ऐतरेयिणस्तु महाव्रतब्राह्मणमधीयते* इन्द्रो ह वै वृत्रं हत्वा महानभवत्* इत्यादि; कौषीतकिनोऽपि महाव्रतब्राह्मणमेव *प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महाव्रतम्* इति; वाजसनेयिनस्तु प्रवर्ग्यब्राह्मणं *देवा ह वै सत्रं निषेदुः* इत्यादि। तत्र संशयः—किमुपनिषदारम्भेष्वधीताः *शुक्रं प्रविध्य *शं नो मित्रः* इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्याङ्गम्, उत नेति। किं युक्तम्? विद्याङ्गमिति। कुतः? सन्निधिसमाम्नानात् विद्याङ्गत्वप्रतीतेः। यद्यपि *शुक्रं प्रविध्येत्यादीनां मन्त्राणां प्रवर्ग्यादेश्च कर्मणः श्रुतिलिङ्गवाक्यैर्बलवद्भिर्यथायथं कर्मसु विनियोगोऽवगम्यते; तथाऽपि *शं नो मित्रः *सह नाववतु* इत्यादेर्मन्त्रस्यान्यत्र विनियोगाभावाद्विद्याधिकाराच्च विद्याङ्गत्वमवर्जनीयमिति सर्वासु विद्यासु इमे मन्त्राः उपसंहर्तव्याः।

एवं प्राप्ते प्रचक्ष्महे—वेधाद्यर्थभेदात् *शुक्रं प्रविध्य हृदयं प्रविध्य *ऋतं वदिष्यामि सत्यं वदिष्यामि *ऋतमवादिषं सत्यमवादिषम् *तेजस्वि नावधीतमस्तु मा विद्विषावहै* इत्यादिभिर्लिङ्गैरभिचाराध्ययनादिष्वेषां विनियोगावगमान्न विद्याङ्गत्वम्। एतदुक्तं भवति—यथा *हृदयं प्रविध्येत्यादिमन्त्रसामर्थ्यात् शुक्रं प्रविध्येत्यादीनामभिचारादिशेषत्वमवगम्यते; एवमेव *ऋतं वदिष्यामि *तेजस्वि नावधीतमस्तु* इत्यादिमन्त्रसामर्थ्यादेव स्वाध्यायशेषत्वं *शं नो मित्र इत्यादिमन्त्राणामवगम्यते; अतो न तेषां विद्याङ्गत्वमिति। शुक्रं प्रविध्येत्यादीनां प्रवर्ग्यादिब्राह्मणानां चेह पाठो दिवाकीर्त्यत्वारण्येऽनुवाक्यत्वकृतः ॥ २५ ॥ इति वेधाद्यधिकरणम् ॥१०॥

अथ हान्यधिकरणम् ॥ ११ ॥

380 हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् । ३ । ३ । २६ ॥

छन्दोगा आमनन्ति—*अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि ॥ इति; आथर्वणिकाश्च *तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति* इति; शाट्यायनिनस्तु *तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम्* इत्यादि; कौषीतकिनस्तु *तत्सुकृतदुष्कृते धूनुते तस्य प्रिया

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञातयस्सुकृतमुपयन्ति अप्रिया दुष्कृतम्* इति । एवं क्वचित्पुण्यपापयोर्हानिः, क्वचित्प्रियाप्रियेषु तत्प्राप्तिः, क्वचिदुभयं च श्रुतम् । तदुभयमेकैकविद्यायां श्रुतमपि सर्वविद्याङ्गमास्थेयम्, सर्वब्रह्मविद्यानिष्ठस्यापि ब्रह्म प्राप्नुवतः पुण्यपापप्रहाणस्यावश्यंभावित्वात् प्रहीणविषयत्वाच्चोपायनस्य । तच्चिन्तनं च विधीयमानं सर्वविद्याङ्गं भवितुमर्हति । तत्रेदं विचार्यते—हानिचिन्तनमुपायनचिन्तनमुभयचिन्तनं च विकल्प्येरन्, उपसंह्रियेरन्वा ? किं युक्तम् ? विकल्प्येरन्निति । कुतः ? पृथगाम्नानसामर्थ्यात् । समुच्चये हि सर्वत्रोभयानुसन्धानं स्यात्, तच्च कौषीतकीवाक्येनैव सिद्धमित्यन्यत्राम्नानमनर्थकमेव स्यात् । अतोऽनेकत्राम्नानस्य विकल्प एव प्रयोजनम् । नचाध्येतृभेदेन परिहर्तुं शक्यमनेकत्राम्नानम्; अविशेषपुनश्श्रवणं ह्यध्येतृभेदपरिहार्यम्; अत्र तु हानिरेव द्वयोश्शाखयोः, उपायनमेव चैकस्याम् । न च विद्याभेदेन व्यवस्थापयितुं शक्यम्, सर्वशेषभूतमिदमनुसन्धानमित्युक्तत्वात् ॥

अत्रेदमुच्यते—हानौ तूपायनशब्दशेषत्वादिति । तुशब्दः पक्षं व्यावर्तयति । हानाविति प्रदर्शनार्थम्; केवलायां हानौ केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यंभावी । कुतः ? उपायनशब्दशेषत्वात्—उपायनशब्दस्य हानिवाक्यशेषत्वात् । उपायनवाक्यस्य हि हानिवाक्यशेषत्वमेवोचितम्, विदुषा त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वादुपायनवाक्यस्य । प्रदेशान्तराम्नातस्य वाक्यस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्ता उपन्यस्यन्ते—कुशाच्छन्दस्स्तुत्युपगानवदिति । कालापिनः *कुशा वानस्पत्याः* इत्यामनन्ति; शाट्यायनिनां तु* औदुम्बर्यः कुशाः* इति वाक्यं सामान्येन वानस्पत्यत्वेनावगताः कुशाः औदुम्बर्य इति विशिंषत्तद्वाक्यशेषतामापद्यते । तथा *देवासुराणां छन्दोभिः* इत्यादिना अविशेषेण देवासुराणां छन्दसां प्रसङ्गे *देवच्छन्दांसि पूर्वम्* इति वचनं क्रमविशेषं प्रतिपादयत्तद्वाक्यशेषतां गच्छति । तथा *हिरण्येन षोडशिनः स्तोत्रमुपाकरोति* इत्यविशेषेण प्राप्ते, *समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति* इति विशेषविषयं वाक्यं तद्वाक्यशेषतां भजते । तथा *ऋत्विज उपगायन्ति* इत्यविशेषप्राप्तस्य *नाध्वर्युरुपगायेत्* इति वाक्यमनध्वर्युविषयतामवगमयत्तद्वाक्यशेषत्वमृच्छति । एवं सामान्येनावगतमर्थं विशेषे व्यवस्थापयितुं क्षमस्य वाक्यस्य तच्छेषत्वमनभ्युपगच्छद्भिस्तयोरर्थयोर्विकल्पस्समाश्रयितव्यः; स च संभवन्त्यां गतौ न युज्यते । तदुक्तं पूर्वस्मिन् काण्डे *अपि तु वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात्* इति । तदेवं केवलहानोपायनवाक्ययोरेकवाक्यत्वात्केवलस्य हानस्य केवलस्य चोपायनस्याभावाद्विकल्पो नोपपद्यते । कौषीतकिनामुभयाम्नानमविशेषपुनश्श्रवणत्वेन प्रतिपत्तृभेदादविरुद्धम् ॥ २६ ॥ इति हान्यधिकरणम् ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ साम्परायाधिकरणम् ॥ १२ ॥

381 साम्पराये तर्तव्याभावात्तथा ह्यन्ये । ३ । ३ । २७ ॥

सुकृतदुष्कृतयोर्हानमुपायनं च सर्वासु विद्यासु चिन्तनीयमित्युक्तम् ; तद्धानं किं देहवियोगकाले, देहादुत्क्रान्तस्याध्वनि च, उत देहवियोगकाल एवेति विशये उभयत्रेति युक्तम्, उभयधा श्रुतत्वात् । एवं हि कौषीतकिनस्समामनन्ति *स एतं देवयानं पन्थानमापद्याग्निलोकं गच्छति* इत्युपक्रम्य *स आगच्छति विरजां नदीं तां मनसाऽत्येति तत्सुकृतदुष्कृते धूनुते* इति । अत्र वाक्ये अध्वनि सुकृतदुष्कृतहानिः प्रतीयते । ताण्डिनस्तु *अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि ॥ इति । अत्र तु देहवियोगकाल इति प्रतीयते । शाट्यायनकेऽपि *तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम्* इति पुत्रेषु दायसंक्रान्तिसमकालं सुकृतदुष्कृतसंक्रमणं श्रूयमाणं देहवियोगकाल इति गम्यते । अतस्सुकृतदुष्कृतयोरेकदेशो देहवियोगकाले हीयते; शेषस्त्वध्वनि ।

इति प्राप्त उच्यते—साम्पराये इति । साम्पराये—देहादपक्रमणकाले एव विदुषस्सुकृतदुष्कृते निरवशेषं हीयेते । कुतः ? तर्तव्याभावात्—विदुषो देहवियोगात्पश्चात्सुकृतदुष्कृताभ्यां तरितव्यभोगाभावात् । विद्याफलभूतब्रह्मप्राप्तिव्यतिरेकेण हि सुकृतदुष्कृताभ्यां भोक्तव्ये सुखदुःखे न विद्येते । तथा ह्यन्ये देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरिक्तसुखदुःखोपभोगाभावमधीयते *अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः *एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये* इति ॥ २७ ॥

382 छन्दत उभयाविरोधात् । ३ । ३ । २८ ॥

एवमर्थस्वाभाव्यात्सुकृतदुष्कृतहानिकालेऽवधृते सत्युभयाविरोधेन—श्रुतेरर्थस्वभावस्य चाविरोधेन, छन्दतः-यथेष्टं पदानामन्वयो वर्णनीयः । कौषीतकीवाक्ये *तत्सुकृतदुष्कृते धूनुते* इति चरमश्रुतो वाक्यावयवः * एतं देवयानं पन्थानमापद्य* इति प्रथमश्रुतावयवात्प्रागनुगमयितव्य इत्यर्थः ॥ २८ ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

383 गतेरर्थवत्त्वमुभयधाऽन्यथा हि विरोधः । ३ । ३ । २९ ॥

सुकृतदुष्कृतयोरेकदेशस्य देहवियोगकाले हानिः, शेषस्य च पश्चादिति उभयधा कर्मक्षये सत्येव गतेरर्थवत्त्वम्—देवयानगतिश्रुतेरर्थवत्त्वमित्यर्थः । अन्यथा हि विरोधः—देहवियोगकाल एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि विनाशस्स्यात् ; तथा सति केवलस्यात्मनो गमनं नोपपद्यते । अत

Digitization by Arya Samaj Charitable Foundation, Chennai

उत्क्रान्तिसमये विदुषो निश्शेषकर्मक्षयो नोपपन्नः ॥ २९ ॥

अत्रोत्तरम्—

384 उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् । ३ । ३ । ३० ॥

उपपन्न एवोत्क्रान्तिकाले सर्वकर्मक्षयः । कथम् ? तल्लक्षणार्थोपलब्धेः—क्षीणकर्मणोऽप्याविर्भूतस्वरूपस्य देहसंबन्धलक्षणार्थोपलब्धेः । *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *स तत्र पर्येति जक्षत्क्रीडन्रममाणः *स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति *स एकधा भवति त्रिधा भवति* इत्यादिषु देहसंबन्धाख्योऽर्थो ह्युपलभ्यते । अतः क्षीणकर्मणोऽपि सूक्ष्मशरीरयुक्तस्य देवयानेन गमनमुपपद्यते । कथं सूक्ष्मशरीरमप्यारम्भककर्मविनाशेऽवतिष्ठत इति चेत्, विद्यामाहात्म्यादिति ब्रूमः । विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकाऽपि प्राकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्वकर्मणां च निरवशेषक्षयेऽपि स्वफलभूतब्रह्मप्राप्तिप्रदानाय देवयानेन पथैनं गमयितुं सूक्ष्मशरीरं स्थापयति । लोकवत्—यथा लोके सस्यादिसमृद्ध्यर्थमारब्धे तटाकादिके तद्धेतुषु तदिच्छादिषु विनष्टेष्वपि तदेव तटाकादिकमशिथिलं कुर्वन्तस्तत्र पानीयपानादि कुर्वन्ति; तद्वत् ॥ ३० ॥

अथ स्यात्—ज्ञानिनां साक्षात्कृतपरतत्त्वानां देहपातसमये कर्मणो निरवशेषक्षयाद्देहपातादूर्ध्वं सूक्ष्मशरीरमात्रं गत्यर्थमनुवर्तते, सुखदुःखानुभवो न विद्यत इति यदुक्तम्, तन्नोपपद्यते; वसिष्ठावान्तरतपःप्रभृतीनां साक्षात्कृतपरतत्त्वानां देहपातादूर्ध्वं देहान्तरसङ्गमः, पुत्रजन्मविपत्त्यादिनिमित्तसुखदुःखानुभवश्च दृश्यत इति । अत उत्तरं पठति—

385 यावदधिकारमवस्थितिराधिकारिकाणाम् । ३ । ३ । ३१ ॥

नास्माभिस्सर्वेषां ज्ञानिनां देहपातसमये सुकृतदुष्कृतयोर्विनाश उक्तः; अपितु येषां ज्ञानिनां देहपातानन्तरमर्चिरादिका गतिः प्राप्ता, तेषां देहपातसमये सुकृतदुष्कृतहानिरुक्ता । वसिष्ठादीनां त्वाधिकारिकाणां न देहपातानन्तरमर्चिरादिगतिप्राप्तिः, प्रारब्धस्याधिकारस्यासमाप्तत्वात् । तेषां कर्मविशेषेणाधिकारविशेषं प्राप्तानां यावदधिकारसमाप्ति तदारम्भकं कर्म न क्षीयते । प्रारब्धस्य हि कर्मणो भोगादेव क्षयः । अत आधिकारिकाणां तदारम्भकं कर्म यावदधिकारमवतिष्ठते । अतस्तेषां न देहपातादनन्तरमर्चिरादिगतिप्राप्तिः ॥ ३१ ॥ इति साम्परायाधिकरणम् ॥ १२ ॥

अथ अनियमाधिकरणम् ॥ १३ ॥

386 अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् । ३ । ३ । ३२ ॥

उपकोसलादिषु येषूपासनेष्वर्चिरादिगतिः श्रूयते; किं तन्निष्ठानामेव तया ब्रह्मप्राप्तिः, उत

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वेषां ब्रह्मोपासननिष्ठानामिति संशये, इतरेष्वनाम्नानात्, *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते *श्रद्धां सत्यमुपासते* इतीतरसकलब्रह्मविद्योपस्थापकत्वे प्रमाणाभावाच्च तन्निष्ठानामेवेति प्राप्ते अभिधीयते--अनियम इति । सर्वेषां--सर्वोपासननिष्ठानां तयैव गन्तव्यत्वात् तन्निष्ठानामेवेति नियमो नास्ति । सर्वेषां तयैव गमने हि सति शब्दानुमानाभ्यां—श्रुतिस्मृतिभ्यामविरोधः, अन्यथा विरोध एवेत्यर्थः । श्रुतिस्तावत् छान्दोग्यवाजसनेयकयोः पञ्चाग्निविद्यायामर्चिरादिमार्गेण सर्वब्रह्मोपासननिष्ठानां गमनमाह *य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवन्ति* इति वाजसनेयके; *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति* इति छान्दोग्ये; *य इत्थं विदुः* इति पञ्चाग्निविद्यानिष्ठान् *ये चेमे* इत्यादिना श्रद्धापूर्वकं ब्रह्मोपासीनांश्चोद्दिश्यार्चिरादिका गतिरुपदिश्यते, *सत्यं ज्ञानमनन्तं ब्रह्म *सत्यं त्वेव विजिज्ञासितव्यम्* इति सत्यशब्दस्य ब्रह्मणि प्रसिद्धेः । तपश्शब्दस्यापि तेनैकार्थ्यात्सत्यतपश्शब्दाभ्यां ब्रह्मैवाभिधीयते । *श्रद्धापूर्वकं ब्रह्मोपासनं चान्यत्र श्रुतं *सत्यं त्वेव विजिज्ञासितव्यम्* इत्युपक्रम्य *श्रद्धा त्वेव विजिज्ञासितव्या* इति । स्मृतिरपि *अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ इति सर्वेषां ब्रह्मविदामनेनैव मार्गेण गमनमित्याह । एवंजातीयकाः श्रुतिस्मृतयो बह्व्यस्सन्ति । एवं सर्वविद्यासाधारणी इयं गतिः प्राप्तैवोपकोसलविद्यादावनूद्यते ॥ ३२ ॥ इति अनियमाधिकरणम् ॥ १३ ॥

अथ अक्षरध्यधिकरणम् ॥ १४ ॥

387 अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ।३।३।३३॥

बृहदारण्यके श्रूयते *एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणमसुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः * इति । तथा आथर्वणे *अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्* इति । तत्र संशयः—किमिमे अक्षरशब्दनिर्दिष्टब्रह्मसंबन्धितया श्रुताः अस्थूलत्वादयः प्रपञ्चप्रत्यनीकतास्वरूपास्सर्वासु ब्रह्मविद्यास्वनुसन्धेयाः, उत यत्र श्रूयन्ते तत्रैवेति । किं युक्तम्? यत्र श्रुतास्तत्रैवेति । कुतः? विद्यान्तरस्य रूपभूतानां गुणानां विद्यान्तरस्य रूपत्वे प्रमाणाभावात्, प्रतिषेधरूपाणामेषामानन्दादिवत्स्वरूपावगमोपायत्वाभावाच्च । आनन्दादिभिरवगतस्वरूपे हि ब्रह्मणि स्थूलत्वादयः प्रपञ्चधर्माः प्रतिषिध्यन्ते, निरालम्बनप्रतिषेधायोगात् ॥

एवं प्राप्ते प्रचक्ष्महे--अक्षरधियां त्ववरोधः इति । अक्षरब्रह्मसंबन्धिनीनामस्थूलत्वादिधियां

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वब्रह्मविद्यास्ववरोधः––सङ्ग्रहणमित्यर्थः। कुतः? सामान्यतद्भावाभ्यां––सर्वेषूपासनेषूपास्यस्याक्षरस्य ब्रह्मणः समानत्वादस्थूलत्वादीनां तत्स्वरूपप्रतीतौ भावाच्च। एतदुक्तं भवति––असाधारणाकारेण ग्रहणं हि वस्तुनो ग्रहणम्। नच कवलमानन्दादि ब्रह्मणोऽसाधारणमाकारमुपस्थापयति, प्रत्यगात्मन्यप्यानन्दादेर्विद्यमानत्वात्। हेयप्रत्यनीको ह्यानन्दादिर्ब्रह्मणोऽसाधारणं रूपम्; प्रत्यगात्मनस्तु स्वतो हेयविरहिणोऽपि हेयसंबन्धयोग्यताऽस्ति; हेयप्रत्यनीकत्व च चिदचिदात्मकप्रपञ्चधर्मभूतस्थूलत्वादिविपरीतरूपम्। अतोऽसाधारणाकारेण ब्रह्मानुसन्दधताऽस्थूलत्वादिविशेषितज्ञानानन्दाद्याकारं ब्रह्मानुसन्धेयमिति अस्थूलत्वादीनामानन्दादिवद्ब्रह्मस्वरूपप्रतीत्यन्तर्भावात्सर्वासु ब्रह्मविद्यासु तथैव ब्रह्मानुसन्धेयमिति। गुणानां प्रधानानुवर्तित्वे दृष्टान्तमाह––औपसदवत्––इति। यथा जामदग्न्यचतूरात्रपुरोडाश्युपसद्गुणभूतः सामवेदपठितः *अग्निर्वै होत्रं वेतु* इत्यादिको मन्त्रः प्रधानानुवर्तितया याजुर्वैदिकेनोपांशुत्वेन प्रयुज्यते। तदुक्तं प्रथम काण्डे *गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः* इति ॥ ३३ ॥

नन्वेवं सर्वासु ब्रह्मविद्यासु ब्रह्मण एव गुणित्वाद्गुणानां च प्रधानानुवर्तित्वात् *सर्वकर्मा. सर्वगन्धस्सर्वरसः* इत्यादेर्गुणजातस्य प्रतिविद्यं व्यवस्थितस्याप्यव्यवस्था स्यात्; तत्राह—

३८८ इयदामननात्। ३। ३। ३४ ॥

आमननम्––आभिमुख्येन मननम्, अनुचिन्तनम्। आमननाद्धेतोरियदेव गुणजातं सर्वत्रानुसन्धेयत्वेन प्राप्तम्, यदस्थूलत्वादिविशेषितमानन्दादिकम्। येन गुणजातेन विना ब्रह्मस्वरूपस्येतरव्यावृत्तस्यानुसन्धानं न संभवति; तदेव सर्वत्रानुवर्तनीयम्; तच्चेयदेवेत्यर्थः। इतरे तु सर्वकर्मत्वादयः प्रधानानुवर्तिनोऽपि चिन्तनीयत्वेन प्रतिविद्यं व्यवस्थिताः ॥ ३४ ॥ इति अक्षरध्यधिकरणम् ॥ १४ ॥

अथ अन्तरत्वाधिकरणम् ॥ १५ ॥

३८९ अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्। ३। ३। ३५ ॥

बृहदारण्यके उषस्तप्रश्न एवमाम्नायते *यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व* इति। तस्य प्रतिवचनं *यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा* इत्यादि। अतुष्टेन तेन पुनः पृष्ट आह *न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेश्श्रोतार श्रृणुयाः न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तम्*

Digitization by Arya Samaj Charitable Foundation, Chennai

इति। तथा तदनन्तरं कहोलप्रश्ने चैवमाम्नायते *यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व* इति । प्रतिवचनं च *योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एवं हैतमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च* इत्यादि *अतोऽन्यदार्तमित्यन्तम्। तत्र संशय्यते--किमनयोर्विद्याभेदोऽस्ति, नेति। किं युक्तम्? भेद इति। कुतः? रूपभेदात्। प्रतिवचनभेदाद्रूपं भिद्यते। प्रश्नस्यैकरूप्येऽपि प्रतिवचनप्रकारो हि भेदेनोपलभ्यते। पूर्वत्र प्राणनादीनां कर्ता सर्वान्तरात्मत्वेनोच्यते; परत्राशनायापिपासादिरहितः। अतः पूर्वत्र प्राणिता देहेन्द्रियबुद्धिमनःप्राणव्यतिरिक्तः प्रत्यगात्मोच्यते; परत्र तु तदतिरिक्तोऽशनायापिपासादिरहितः परमात्मा। अतो रूपं भिद्यते। भूतग्रामवतश्च प्रत्यगात्मनस्तस्य भूतग्रामस्य सर्वस्यान्तरात्मत्वेन सर्वान्तरत्वमप्युपपन्नम्। यद्यपि प्रत्यगात्मनः सर्वान्तरत्वं भूतग्राममात्रापेक्षत्वेनापेक्षिकम्, तथापि तदेव ग्राह्यम्, अन्यथा मुख्यान्तरात्मपरिग्रहलोभात्परमात्मस्वीकारे प्रतिवचनभेदो नोपपद्यते। प्रतिवचनं हि पूर्वत्र प्रत्यगात्मविषयम्, परमात्मनः प्राणितृत्वापानितृत्वाद्यसंभवात्। परं च परमात्मविषयम्, अशनायापिपासाद्यतीतत्वात्। तदिदमाशङ्कते—अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेदिति। अन्तरा—सर्वान्तरत्वेन प्रथमप्रतिवचनं भूतग्रामवत्स्वात्मनः—भूतग्रामवान्—तदन्तरः स्वात्मा, प्रत्यगात्मा सर्वान्तर इत्युच्यत इत्यर्थः। अन्यथा *यः प्राणेन प्राणिति* योऽशनायापिपासाद्यतीतः* इति प्रतिवचनभेदानुपपत्तिरिति चेत्।

अत्रोत्तरं—नेति। न विद्याभेद इत्यर्थः। उभयत्र परविषयत्वात्प्रश्नप्रतिवचनयोः। तथाहि—*यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः* इति प्रश्नस्तावत्परमात्मविषय एव। ब्रह्मशब्दस्य परमात्मासाधारणत्वेऽपि प्रत्यगात्मन्यपि कदाचिदुपचरितप्रयोगदर्शनात्तद्व्यावृत्त्या परमात्मप्रतिपत्त्यर्थं *यत्साक्षाद्ब्रह्मेति विशेषणं क्रियते। अपरोक्षत्वमपि सर्वदेशसर्वकालसंबन्धित्वं *सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तत्वेनावगतस्य परमात्मन एवोपपद्यते। सर्वान्तरत्वमपि *यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः* इत्यारभ्य *य आत्मनि तिष्ठन्नात्मनोऽन्तरः* इति सर्वान्तर्यामिणः परमात्मन एव संभवति। प्रतिवचनमपि तथैव परमात्मविषयम्। *यः प्राणेन प्राणिति* इति निरुपाधिकं प्राणनस्य कर्तृत्वं परमात्मन एव, प्रत्यगात्मनस्सुषुप्तौ प्राणनं प्रति कर्तृत्वाभावात्। एवमजानतोषस्तेन प्राणने कर्तृत्वमात्रमुक्तं मन्वानेन प्रत्यगात्मनोऽपि साधारणत्वं प्रतिवचनस्य मत्वा अतुष्टेन पुनः पृष्टस्तं प्रति प्रत्यगात्मनो व्यावृत्तं निरुपाधिकत्वेन प्राणनस्य कर्तारं परमात्मानमाह—*न दृष्टेर्द्रष्टारं पश्येरित्यादिना। इन्द्रियाधीनानां दर्शनश्रवणमननविज्ञानानां कर्तारं प्रत्यगात्मानं प्राणनस्य कर्तृत्वेनोक्त इति न मन्वीथाः; तस्य सुषुप्तिमूर्छादौ प्राणनादेरकर्तृत्वात्। *को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्* इति सर्वप्राणिप्राणनहेतुत्वं हि परमात्मन एवान्यत्र श्रुतम्। अतः पूर्वप्रश्नप्रतिवचने परमात्मविषये। एवमुत्तरे अपि, अशनायाद्यतीतत्वस्य परमात्मासाधारणत्वात्। उभयत्र

Digitization by Arya Samaj Charitable Foundation, Chennai

*अतोऽन्यदार्तमित्युपसंहारश्चैकरूपः । प्रश्नप्रतिवचनावृत्तिस्तु कृत्स्नप्राणिप्राणनहेतोः परस्य ब्रह्मणोऽशनायाद्यतीतत्वप्रतिपादनाय । तत्र दृष्टान्तमाह—उपदेशवदिति । यथा सद्विद्यायाम् *उत तमादेशमप्राक्ष्यः* इति प्रक्रान्ते सदुपदेशे *भगवांस्त्वेव मे तद्ब्रवीत्विति *भूय एव मा भगवान् विज्ञापयतु* इति प्रश्नस्य* एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यम्* इति प्रतिवचनस्य च भूयोभूय आवृत्तिस्सतो ब्रह्मणस्तत्तन्माहात्म्यविशेषप्रतिपादनाय दृश्यते; तद्वत् । अत एकस्यैव सर्वान्तरभूतस्य ब्रह्मणः कृत्स्नप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन रूपैक्याद्विद्यैक्यम् ॥३५॥

अथ स्यात्—यद्यप्युभे प्रश्नप्रतिवचने परब्रह्मविषये; तथापि विद्याभेदोऽवर्जनीयः, एकत्र सर्वप्राणिप्राणनहेतुत्वेनोपास्यम्, इतरत्राशनायाद्यतीतत्वेनेत्युपास्यगुणभेदेन रूपभेदात्, प्रष्टृभेदाच्च; पूर्वत्र ह्युषस्तः प्रष्टा, उत्तरत्र कहोल इति; तत्राह—

390 व्यतिहारो विशिंषन्ति हीतरवत् । ३ । ३ । ३६ ॥

नात्र विद्याभेदः, प्रश्नप्रतिवचनाभ्यामेकरूपार्थविषयाभ्यामेकेन च विधिपदेनैकवाक्यत्वप्रतीतेः । प्रश्नद्वयं तावत्सर्वान्तरात्मत्वविशिष्टब्रह्मविषयम् । द्वितीये प्रश्ने *यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः* इत्येवकारश्च पूर्वत्रोषस्तेन दृष्टगुणविशिष्टब्रह्मविषयत्वं कहोलप्रश्नस्यावधारयति । प्रतिवचनं चोभयत्र *स त आत्मा सर्वान्तरः* इति सर्वान्तरात्मत्वविशिष्टब्रह्मविषयमेकरूपमेव । विधिप्रत्ययश्चोत्तरत्रैव दृश्यते *तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्* इति । एवं सर्वान्तरात्मत्वविशिष्टब्रह्मैकविषयत्वे द्वयोरवगते सत्येकस्मिन्नेव सर्वान्तरात्मत्वविशिष्टे ब्रह्मण्युपास्ये उषस्तकहोलयोरितरेतरबुद्धिव्यतिहारः कर्तव्यः । उषस्तस्य या सर्वान्तरात्मनो ब्रह्मणस्सर्वप्राणिप्राणनहेतुत्वविषया बुद्धिः सा कहोलेनापि प्रष्ट्रा कार्या; या च कहोलस्य तस्यैव ब्रह्मणोऽशनायाद्यतीतत्वविषया बुद्धिः, सा उषस्तेनापि कार्या । एवं व्यतिहारे कृते उभाभ्यां सर्वान्तरस्य ब्रह्मणो जीवव्यावृत्तिरवगता भवति । एनं सर्वान्तरात्मानं प्रत्यगात्मनो व्यावृत्तमवगमयितुं सर्वप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन विशिंषन्ति हि याज्ञवल्क्यस्य प्रतिवचनानि । अतो ब्रह्मणस्सर्वान्तरात्मत्वमेवोपास्यगुणः । प्राणनहेतुत्वादयस्तु तस्योपपादकाः; नोपास्याः ।

ननूपास्यगुणः सर्वान्तरात्मत्वमेव चेत्, प्राणनहेतुत्वस्य अशनायाद्यतीतत्वस्य च प्रष्ट्रोः व्यतिहृत्यानुसन्धानं किमर्थम् ? तदुच्यते—सर्वप्राणिप्राणनहेतुत्वेन सर्वान्तरात्मनि जीवाद्व्यावृत्ते ब्रह्मण्युषस्तेनावगते सति कहोलेन जीवस्य सर्वात्मना असंभावितेन स्वभावविशेषेण सर्वान्तरात्मा व्यावृत्तोऽनुसन्धेय इति कृत्वा पुनः प्रश्नः कृतः । याज्ञवल्क्योऽपि तदभिप्रायमभिज्ञाय प्रत्यगात्मनोऽसंभावितमशनायादिप्रत्यनीकत्वमुक्तवान् । अतश्चोपास्यस्य व्यावृत्तिप्रतीतिसिद्ध्यर्थमुभाभ्यां परस्परबुद्धिव्यतिहारः कर्तव्यः । इतरवत्—यथेतरत्र सद्विद्यायां भूयोभूयः प्रश्नैः प्रतिवचनैश्च तदेव सद्ब्रह्म

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यवच्छिद्यते; न पुनः पूर्वप्रतिपन्नाद्गुणाद्गुणान्तरविशिष्टतयोपास्यं प्रतिपाद्यते; तद्वत् ॥ ३६ ॥

तत्रापि प्रश्नप्रतिवचनभेदे सति कथमैक्यमवगम्यत इति चेत्, तत्राह–

391 सैव हि सत्यादयः । ३ । ३ । ३७ ॥

सैव हि––सच्छब्दाभिहिता परमकारणभूता परा देवतैव *सेयं देवतैक्षत *तेजः परस्यां देवतायाम्* इति प्रकृता *यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति* इत्यादिषु पर्यायेषु सर्वेषूपपाद्यते । यतः *ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा* इति प्रथमपर्यायोदितास्सत्यादयस्सर्वेषु पर्यायेषूपपाद्योपसंह्रियन्ते ॥

केचित्तु, *व्यतिहारो विशिंषन्ति हीतरवत् *सैव हि सत्यादयः इति सूत्रद्वयमधिकरणद्वयं वर्णयन्ति । तत्र पूर्वेण *त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहम्* इति वाक्ये जीवपरयोर्व्यतिहारानुसन्धानं प्रतिपाद्यत इत्युच्यत इत्याहुः । तत् *सर्वं खल्विदं ब्रह्म *ऐतदात्म्यमिदं सर्वम् *तत्त्वमसि* इत्यवगतसर्वात्मभावविषयत्वादस्य वाक्यस्य नात्र प्रतिपादनीयमपूर्वमस्तीत्यनादरणीयम् । तत्तु वक्ष्यते *आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति। नच सर्वात्मत्वानुसन्धानातिरेकेण परस्मिन् ब्रह्मणि जीवत्वानुसन्धानम्, जीवे च परब्रह्मत्वानुसन्धानं, तथ्यं संभवति । उत्तरेण च सूत्रेण *स यो ह वै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म* इत्यादिवाक्यप्रतिपादितस्य सत्योपासनस्य *तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्* इत्यादिवाक्यप्रतिपादितोपासनस्य चैक्यं प्रतिपाद्यत इति; तदप्ययुक्तम्, उत्तरवाक्ये अक्ष्यादित्यस्थानभेदेन विद्याभेदस्य पूर्वमेव *न वा विशेषादित्यनेन प्रतिपादितत्वात् । नच द्वयोरनयोर्व्याहृत्यादिशरीरकत्वेन रूपवतोः *हन्ति पाप्मानं जहाति च य एवं वेद* इति पृथक्संयोगचोदनावतोर्द्वयोरुपासनयोः *स यो ह वै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमान् लोकान्* इति संयोगरूपादिमत्तया निरपेक्षेण पूर्वेणैकेनोपासनेनाभेदस्संभवति । नच *हन्ति पाप्मानं जहाति* इति गुणफलाधिकारत्वम्, प्रमाणाभावात् । पूर्वेणैकविद्यात्वं प्रमाणमिति चेन्न, इतरेतराश्रयत्वात् । एकविद्यात्वे निश्चिते पूर्वफलस्यैव प्रधानफलत्वेनोत्तरयोः फलयोर्गुणफलत्वम्, तयोर्गुणफलत्वे निश्चिते सति संयोगभेदाभावात्पूर्वेण विद्यैक्यमितीतरेतराश्रयत्वमित्येवमादिभिर्यथोक्तप्रकारमेव सूत्रद्वयम् ॥ ३७ ॥ इति अन्तरत्वाधिकरणम् ॥१५॥

अथ कामाद्यधिकरणम् ॥ १६ ॥

392 कामादीतरत्र तत्र चायतनादिभ्यः । ३ । ३ । ३८ ॥

छान्दोग्ये श्रूयते *अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर

Digitization by Arya Samaj Charitable Foundation, Chennai

आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्* इत्यादि; वाजसनेयके च *स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः* इत्यादि । तत्र संशयः—किमनयोर्विद्याभेदः, उत नेति । किं युक्तम् ? भेद इति । कुतः ? रूपभेदात्; अपहतपाप्मत्वादिगुणाष्टकविशिष्ट आकाशः छान्दोग्ये उपास्यः प्रतीयते; वाजसनेयके त्वाकाशे शयानो वशित्वादिगुणविशिष्ट उपास्यः प्रतीयते; अतो रूपभेदाद्विद्याभेदः ।

इति प्राप्ते प्रचक्ष्महे—न भेद इति । कुतः ? रूपाभेदात्—इतरत्र तत्र च कामाद्येव हि रूपं—वाजसनेयके च्छान्दोग्ये च सत्यकामादिविशिष्टमेव ब्रह्मोपास्यमित्यर्थः । कुत एतदवगम्यते ? आयतनादिभ्यः—हृदयायतनत्वसेतुत्वविधरणत्वादिभिस्तावदुभयत्र सैव विद्येति प्रत्यभिज्ञायते । वशित्वादयश्च वाजसनेयके श्रुताः छान्दोग्यश्रुतस्य गुणाष्टकान्यतमभूतस्य सत्यसङ्कल्पत्वस्य विशेषा एवेति सत्यसङ्कल्पत्वसहचारिणां सत्यकामत्वादीनामपहतपाप्मत्वपर्यन्तानां सद्भावमवगमयन्ति । अतो रूपं न भिद्यते । संयोगोऽपि *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते *अभयं वै ब्रह्म भवति* इति ब्रह्मप्राप्तिरूपो न भिद्यते । आकाशशब्दः छान्दोग्ये परमात्मविषय इति, *दहर उत्तरेभ्यः* इत्यत्र निर्णीतम् । वाजसनेयके त्वाकाशे शयानस्य वशित्वादिश्रवणात्तस्य शयानस्य परमात्मत्वे सति तदाधाराभिधायिन आकाशशब्दस्य *तस्यान्ते सुषिरं सूक्ष्मम्* इति हृदयान्तर्गतस्य सुषिरशब्दवाच्यस्याकाशस्याभिधायकत्वमवगम्यते । अतो विद्यैक्यम् ॥ ३८ ॥

अथ स्यात्—यदुक्तं वाजसनेयके वशित्वादिभिस्सह सत्यकामत्वादिसद्भावोऽवगम्यत इति; तन्नोपपद्यते, वशित्वादीनामेव तत्र परमार्थतस्सद्भावाभावात् । तदभावश्च *मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति ॥ *एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्* इति प्रकृतेन वाक्येन *स एष नेतिनेत्यात्मा* इत्युत्तरेण चोपास्यस्य ब्रह्मणो निर्विशेषत्वप्रतीतेरवगम्यते । अतो वशित्वादयोऽपि स्थूलत्वाणुत्ववन्निषेध्या इति प्रतीयन्ते । अत एव च्छान्दोग्येऽपि सत्यकामत्वादयो न ब्रह्मणः पारमार्थिका गुणा उच्यन्ते । अतोऽपारमार्थिकत्वादेवंजातीयकानां गुणानां मोक्षार्थेषूपासनेषु लोप इति । तत्राह—

393 आदरादलोपः । ३ । ३ । ३९ ॥

ब्रह्मगुणत्वेन प्रमाणान्तराप्राप्तानां गुणानमेषां सत्यकामत्वादीनां *तस्मिन् यदन्तस्तदन्वेष्टव्यम् *एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः *सर्वस्य वशी सर्वस्येशानः *एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय* इत्यादिभिरनयोः श्रुत्योरन्यासु च मोक्षार्थोपासनोपास्यब्रह्मगुणत्वेन सादरमुपदेशादेषामलोपः; अपि तूपसंहार एव कार्यः । छान्दोग्ये तावत् *तद्य इहात्मानमनुविद्य

Digitization by Arya Samaj Charitable Foundation, Chennai

व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति* इति सत्यकामत्वादिगुणविशिष्टस्य ब्रह्मणो वेदनमभिधाय *अथ य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवति* इत्यवेदननिन्दा क्रियमाणा गुणविशिष्टवेदनस्यादरं दर्शयति । तथा वाजसनेयके *सर्वस्य वशी सर्वस्येशानः *एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः* इति भूयोभूय ऐश्वर्योपदेशाद्गुणेष्वादरः प्रतीयते । एवमन्यत्रापि । न च मातापितृसहस्रेभ्योऽपि वत्सलतरं शास्त्रं प्रतारकवदपारमार्थिकान्निरसनीयान् गुणान् प्रमाणान्तराप्रतिपन्नानादरेणोपदिश्य संसारचक्रपरिवर्तनेन पूर्वमेव बम्भ्रम्यमाणान्मुमुक्षून् भूयोऽपि भ्रमयितुमलम् । *नेह नानास्ति किञ्चन *एकधैवानुद्रष्टव्यम्* इति तु सर्वस्य ब्रह्मकार्यत्वेन तदात्मकत्वादेकधाऽनुदर्शनं विधायाब्रह्मात्मकत्वेन पूर्वसिद्धनानात्वदर्शनं निषेधतीत्ययमर्थः प्रागेव प्रपञ्चितः । *स एष नेतिनेत्यात्मा* इत्यत्र चेतिशब्देन प्रमाणान्तरप्रतिपन्नं प्रपञ्चाकारं परामृश्य न तथाविधं ब्रह्मेति सर्वात्मभूतस्य ब्रह्मणः प्रपञ्चविलक्षणत्वं प्रतिपाद्यते । तदेव चानन्तरमुपपादयति *अग्राह्यो न हि गृह्यते अशीर्यो नहि शीर्यते असङ्गो नहि सज्यते अव्यथितो न व्यथते न रिष्यति* इति । प्रमाणान्तरग्राह्यविसजातीयत्वात्प्रमाणान्तरेण न गृह्यते । विशरणीयविसजातीयत्वान्न विशीर्यते । एवमुत्तरत्रानुसन्धेयम् । छान्दोग्येऽपि *नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामास्समाहिताः* इति सर्वविसजातीयत्वं ब्रह्मणः प्रतिपाद्य तस्मिन् सत्यकामत्वादयो विधीयन्ते ॥ ३९ ॥

नन्वेवमपि *तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति स यदि पितृलोककामो भवति* इत्यादिना सत्यकामादिगुणविशिष्टवेदनस्य सांसारिकफलसंबन्धश्रवणान्मुमुक्षोर्ब्रह्मप्रेप्सोर्न सगुणं ब्रह्मोपास्यम् । परविद्याफलं च *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इतीदमेव । अतस्सत्यकामत्वादयो ब्रह्म प्रेप्सोर्नोपसंहार्याः इति । अत उत्तरं पठति--

394 उपस्थितेऽतस्तद्वचनात् । ३ । ३ । ४० ॥

उपस्थितिः--उपस्थानम्, ब्रह्मोपसंपन्ने सर्वबन्धविनिर्मुक्ते स्वेन रूपेणाभिनिष्पन्ने प्रत्यगात्मनि अत एव--उपसंपत्तेरेव हेतोस्सर्वेषु लोकेषु कामचार उच्यते *परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति* इति । तदेतच्चतुर्थे निपुणतरमुपपादयिष्यते । अतस्सर्वेषु लोकेषु कामचारस्य मुक्तोपभोग्यफलत्वात् मुमुक्षोस्सत्यकामत्वादयो गुणा उपसंहार्याः ॥ ४० ॥ इति कामाद्यधिकरणम् ॥ १६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥

395 तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् । ३ । ३ । ४१ ॥

ओमित्येतदक्षरमुद्गीथमुपासीत इत्यादीनि कर्माङ्गाश्रयाण्युपासनानि कर्माङ्गभूतोद्गीथादिमुखेन जुह्वादिमुखेन पर्णतादिवत् कर्माङ्गत्वेन निरूढानुष्ठानानीत्युद्गीथाद्युपासनसंबन्धिनो *यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति* इति वर्तमाननिर्देशस्य पर्णतादिसंबन्ध्यपापश्लोकश्रवणवत्पृथक्फलत्वकल्पनायोगात्क्रतुषु नियमेनोपसंहार्याणीति ॥

एवं प्राप्ते प्रचक्ष्महे––तन्निर्धारणानियम इति । निर्धारणं–निश्चयेन मनसोऽवस्थापनम्, ध्यानमित्यर्थः; तन्निर्धारणानियमः–कर्मसूद्गीथाद्युपासनानामनियमः; कुतः ? तद्दृष्टेः–उपलभ्यते ह्युपासनानुष्ठानानियमः *तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद* इत्यविदुषोऽप्यनुष्ठानवचनात्। नचाङ्गत्वे सत्युपासनस्यानुष्ठानानियम उपपद्यते । एवमुपासनस्यानङ्गत्वे निश्चिते सत्युपासनविधेः फलाकाङ्क्षायां रात्रिसत्रन्यायेन वीर्यवत्तरत्वं कर्मफलात्पृथग्भूतमेव फलमित्यवगम्यते। किमिदं वीर्यवत्तरत्वम् ? कर्मफलस्यैवाप्रतिबन्धः । प्रतिबध्यते हि कर्मफलं प्रबलकर्मान्तरफलेन तावन्तं कालम् ; तदभावोऽप्रतिबन्धः । स ह्यप्रतिबन्धः कर्मफलात्स्वर्गादिलक्षणात्पृथग्भूतमेव फलम् । तदिदमुच्यते–पृथग्घ्यप्रतिबन्धः फलमिति । अतः कर्माङ्गाश्रयाणामपि पृथक्फलत्वाद्गोदोहनादिवत्कर्मसूद्गीथाद्युपासनानामनियमेनोपसंहारः ॥ ४१ ॥ इति तन्निर्धारणानियमाधिकरणम् ॥ १७॥

अथ प्रदानाधिकरणम् ॥ १८ ॥

396 प्रदानवदेव तदुक्तम् । ३ । ३ । ४२ ॥

दहरविद्यायां *तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्* इति दहराकाशस्य परमात्मन उपासनमुक्त्वा, *एतांश्च सत्यान्कामानिति गुणानामपि पृथगुपासनं विहितम् । तत्र संशयः–गुणचिन्तनेऽपि तत्तद्गुणविशिष्टतया दहरस्यात्मनश्चिन्तनमावर्तनीयम्, उत नेति । दहराकाशस्यैवापहतपाप्मत्वादीनां गुणित्वात्तस्य च सकृदेवानुसन्धातुं शक्यत्वाद्गुणार्थं तच्चिन्तनं नावर्तनीयम्।

इति प्राप्त उच्यते––प्रदानवदेवेति । प्रदानवदावर्तनीयमेवेत्यर्थः । यद्यपि दहराकाश एक एवापहतपाप्मत्वादिगुणानां गुणी; स च प्रथमं चिन्तितः; तथाऽपि स्वरूपमात्राद्गुणविशिष्टाकारस्य भिन्नत्वात् *अपहतपाप्मा विजरः इत्यादिना गुणविशिष्टतया चोपास्यत्वेन विहितत्वात्पूर्वं स्वरूपेणानुसंहितस्यापहतपाप्मत्वादिविशिष्टतयाऽनुसन्धानार्थमावृत्तिः कर्तव्या । यथा *इन्द्राय राज्ञे पुरो-

Digitization by Arya Samaj Charitable Foundation, Chennai

डाशमेकादशकपालं निर्वपेत् *इन्द्रायाधिराजाय *इन्द्राय स्वराज्ञे* इतीन्द्रस्यैव राजत्वादिगुणविशिष्टत्वेऽपि तत्तद्गुणसंबन्ध्याकारस्य भिन्नत्वात्प्रदानावृत्तिः क्रियते । तदुक्तं साङ्कर्षणे *नाना वा देवता पृथक्त्वात्* इति ॥ ४२ ॥ इति प्रदानाधिकरणम् ॥ १८ ॥

अथ लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥

397 लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि । ३ । ३ । ४३ ॥

तैत्तिरीया दहरविद्यानन्तरमधीयते *सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं प्रभुम् ॥ इत्यारभ्य *सोऽक्षरः परमस्स्वराट्* इत्यन्तम् । तत्र संशयः—किं पूर्वप्रकृतविद्ययैकविद्यात्वेन तदुपास्यविशेषनिर्धारणमनेन क्रियते, उत सर्ववेदान्तोदितपरविद्योपास्यविशेषनिर्धारणमिति । किं युक्तम् ? दहरविद्योपास्यविशेषनिर्धारणमिति । कुतः ? प्रकरणात् । पूर्वस्मिन्ननुवाके दहरविद्या हि प्रकृता *दहं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ॥ इति । अस्मिंश्चानुवाके *पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्* इत्यादिना हृदयपुण्डरीकाभिधानमस्य नारायणानुवाकस्य दहरविद्योपास्यनिर्धारणार्थत्वमुपोद्बलयतीति ॥

एवं प्राप्ते प्रचक्ष्महे—लिङ्गभूयस्त्वादिति । अस्य निखिलपरविद्योपास्यविशेषनिर्धारणार्थत्वे भूयांसि लिङ्गानि दृश्यन्ते; तथा हि—परविद्यास्वक्षरशिवशम्भुपरब्रह्मपरज्योतिःपरतत्वपरमात्मादिशब्दनिर्दिष्टमुपास्यं वस्त्विह तैरेव शब्दैरनूद्य तस्य नारायणत्वं विधीयते । भूयसीषु विद्यासु श्रुताननूद्य नारायणत्वविधानभूयस्त्वं नारायण एव सर्वविद्यासूपास्यमस्थूलत्वादिविशेषितानन्दादिगुणकं परं ब्रह्मेति विशेषनिर्णये भूयः बहुतरं लिङ्गं भवति । अत्र लिङ्गशब्दः चिह्नपर्यायः । चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः । तद्धि प्रकरणाद्बलीयः । तदप्युक्तं प्रथमकाण्डे *श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात्* इति । यत्तूक्तं *पद्मकोशप्रतीकाशमित्यादिवचनं दहरशेषत्वमस्योपोद्बलयतीति; तन्न, बलीयसा प्रमाणेन सर्वविद्योपास्यनिर्धारणार्थत्वेऽवधृते सति; दहरविद्यायामपि तस्यैव नारायणस्योपास्यत्वेन तद्वचनोपपत्तः । नच *सहस्रशीर्षमित्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासिना संबन्धश्शङ्कनीयः; *तस्मिन् यदन्तस्तदुपासितव्यम्* इत्युपासिगतेन कृत्प्रत्ययेनोपास्यस्य कर्मणोऽभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः । *विश्वमेवेदं पुरुषः *तत्त्वं नारायणः परः* इत्यादिप्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वेदितव्या । *अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः *तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः, स ब्रह्मा स शिवस्सेन्द्रः सोऽक्षरः परमस्स्वराट्* इति निर्देशैस्सर्वस्मात्परो नारायण एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयते ॥ ४३ ॥ इति लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ पूर्वविकल्पाधिकरणम् ॥ २० ॥

398 पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् । ३ । ३ । ४४ ॥

वाजसनेयके अग्निरहस्ये मनश्चितादयोऽग्नयः श्रूयन्ते *मनश्चितो वाक्चितः प्राणचितः चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचितः* इति। तत्र संशयः—किमेते मनश्चितादयस्साम्पादिकत्वेन विद्यारूपा अग्नयः क्रियामयक्रत्वनुप्रवेशेन क्रियारूपाः, आहोस्विद्विद्यामयक्रत्वनुप्रवेशेन विद्यारूपा एवेति विशये, क्रियारूपत्वं तावदाह—पूर्वविकल्प इत्यादिना। चित्याग्नित्वेन संपादितानामेषां मनश्चितादीनां क्रत्वनुप्रवेशसाकाङ्क्षाणां स्वदेशे क्रतुविध्यभावात्पूर्वत्र *असद्वा इदमग्र आसीत्* इत्यादिनेष्टकचितस्याग्नेः प्रकृतत्वात् तस्य च क्रियामयक्रत्वव्यभिचारित्वेन तत्र क्रतुसन्निधानात्तत्प्रकरणगृहीता मनश्चितादयस्तेनेष्टकचितेनाग्निना विकल्प्यमानाः क्रियारूपा एव स्युः। विद्यारूपाणामपि क्रियामयक्रत्वनुप्रवेशेन क्रियारूपत्वं मानसग्रहवदुपपद्यते। यथा द्वादशाहे अविवाक्ये दशमेऽहनि मानसग्रहस्य मनोनिष्पाद्यग्रहणासादनस्तोत्रशस्त्रप्रत्याहरणभक्षणत्वेन विद्यारूपस्यापि क्रियामयक्रत्वङ्गतया क्रियारूपत्वम्; तथेहापि ॥ ४४ ॥

399 अतिदेशाच्च । ३ । ३ । ४५ ॥

इतश्चेष्टकचितेनाग्निना मनश्चितादीनां विकल्पः क्रियारूपत्वं चावगम्यते। *तेषामेकैक एव तावान् यावानसौ पूर्वः* इति पूर्वस्येष्टकचितस्याग्नेर्वीर्यं मनश्चितादिष्वतिदिश्यते; तेन तुल्यकार्यत्वाद्विकल्पः। ततश्चेष्टकचितवत्तत्क्रतुनिर्वर्तनेन तदङ्गभूताः मनश्चितादयः (क्रियामयक्रत्वनुप्रवेशेन) क्रियारूपा एवेति ॥ ४५ ॥

एवं प्राप्ते प्रचक्ष्महे—

400 विद्यैव तु निर्धारणाद्दर्शनाच्च । ३ । ३ । ४६ ॥

तुशब्दः पक्षं व्यावर्तयति; यदुक्तं मनश्चितादयः क्रियामयक्रत्वनुप्रवेशेन क्रियारूपा एवेति; नैतदस्ति; विद्यारूपा एवैते—विद्यारूपक्रत्वन्वयिन इत्यर्थः। कुतः ? निर्धारणाद्दर्शनाच्च। निर्धारणं तावत्— *ते हैते विद्याचित एव विद्यया हैवैत एवंविदश्चिता भवन्ति* इति। वाङ्मनश्चक्षुरादिव्यापाराणामिष्टकादिवच्चयनानुपपत्तेर्मनसा संपादिताग्नित्वेन विद्यारूपत्वे सिद्धेऽपि *विद्याचित एव *विद्यया हैवैते* इति चावधारणं विद्यामयक्रत्वन्वयेन विद्यारूपत्वज्ञापनार्थमिति निश्चीयते। दृश्यते चात्रैवैषां शेषी विद्यारूपः क्रतुः *ते मनसैवाधीयन्त मनसैवाचीयन्त मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन् यत्किञ्च यज्ञे कर्म क्रियते, यत्किञ्च यज्ञीयं कर्म मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमक्रियत* इति। इष्टकचितेष्वग्निषु यत्क्रियामयं यज्ञीयं कर्म क्रियते, तन्मनो-

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्वर्त्येषु मनश्चिताद्यग्निषु मनोमयमेवाक्रियतेति वचनात् क्रतुरपि विद्यामयोऽत्र प्रतीयते ॥ ४६ ॥

नन्वत्र विधिपदाश्रवणात् फलसंबन्धाप्रतीतेश्चेष्टकचिताग्न्युपस्थापितक्रियामयक्रतुप्रकरणाद्विद्यामयक्रत्वन्वयेन विद्यारूपतैषां बाध्येत; नेत्याह—

401 श्रुत्यादिबलीयस्त्वाच्च न बाधः । ३ । ३ । ४७ ॥

श्रुतिलिङ्गवाक्यानां प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतः क्रतुरेषां तदन्वयश्च दुर्बलेन प्रकरणेन बाधितुं न शक्यते । श्रुतिस्तावत् — *ते हैते विद्याचित एवेति । तां विवृणोति *विद्यया हैवैत एवंविदश्चिता भवन्तीति । विद्यया विद्यामयेन क्रतुना संबद्धा मनश्चितादयश्चिता भवन्तीत्यर्थः। *तान् हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते* इति लिङ्गम् । वाक्यं च* एवंविदे चिन्वन्ति* इति । समभिव्याहारो वाक्यम् । एवंविदे विद्यामयक्रतुमते सर्वदा सर्वाणि भूतानि चिन्वन्तीत्यर्थः । सर्वभूतकर्तृकं सर्वकालव्यापि चयनं मनसा संपादितं परिमितकर्तृकालक्रियामयेष्टकचितकार्यद्वारेण क्रत्वनुप्रवेशसंभवमलभमानं विद्यामयक्रत्वनुप्रवेशे लिङ्गं भवति ॥ ४७ ॥

यच्चेदमुक्तं—विधिप्रत्ययाश्रवणात्फलसंबन्धाप्रतीतेश्च क्रियामयात्क्रतोरन्योऽत्र विद्यामयः क्रतुर्न संभवतीति, तत्राह—

402 अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् । ३ । ३ । ४८ ॥

इष्टकचितान्वयिनः क्रियामयात्क्रतोर्विद्यामयोऽयं क्रतुः पृथक्त्वेन अनुबन्धादिभ्यः पृथक्त्वहेतुभ्योऽवगम्यते । अनुबन्धाः यज्ञानुबन्धिनो ग्रहस्तोत्रशस्त्रादयः *मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन्* इत्यादिना प्रतिपादिताः । आदिशब्देन श्रुत्यादयः पूर्वोक्ता गृह्यन्ते । श्रुत्यादिभिस्सानुबन्धैः विद्यामयक्रतुः पृथगवगम्यत इत्यर्थः । प्रज्ञान्तरपृक्त्ववत्—यथा प्रज्ञान्तरं दहरविद्यादि क्रियामयात्क्रतोः पृथग्भूतं श्रुत्यादिभिरवगम्यते, एवमयमपि । एवं चानुबन्धादिभिः पृथग्भूते विद्यामये यज्ञेऽवगते सति विधिः परिकल्प्यते । दृष्टश्चानुवादसरूपेषु कल्प्यमानो विधिः । तदुक्तं *वचनानि त्वपूर्वत्वात्* इति । फलं च *तेषामेकैक एव तावान् यावानसौ पूर्वः* इत्यतिदेशात् स्वक्रतुद्वारेणेष्टकचितस्याग्नेर्यत्फलम्, तदेव मनश्चितादीनामपि स्वक्रतुद्वारेण फलमित्यवगम्यते ॥ ४८ ॥

यत्पुनरतिदेशेन तुल्यकार्यत्वावगमात्क्रियामयक्रत्वनुप्रवेशोऽवगम्यत इत्युक्तम्, तत्राह—

403 न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः । ३ । ३ । ४९ ॥

नावश्यमतिदेशादवान्तरव्यापारस्यापि तुल्यतया भवितव्यम्, यन क्रियामयक्रत्वनुप्रवेश

Digitization by Arya Samaj Charitable Foundation, Chennai

एषां स्यात्, यस्मात्कस्माच्चित्सामान्यमात्रादतिदेशोपलब्धेः । उपलभ्यते हि *स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषः* इत्यादिषु संहर्तृत्वादिसामान्यमात्रादतिदेशः । नहि तत्र मण्डलपुरुषस्य मृत्युवत्तल्लोकापत्तिः–तद्देशप्राप्तिरपि भवति । एवमिहापि मनश्चितादीनामिष्टकचिताग्निवद्भावातिदेशमात्रेणेष्टकाचिताग्निदेशरूपक्रियामयक्रत्वनुप्रवेशेनापि न भवितव्यम् । अत इष्टकचिताग्नेः स्वक्रतुद्वारेण यत्फलम्, तदेव मनश्चितादीनामपि विद्यामयक्रतुद्वारेण फलमित्यतिदेशादवगम्यते ॥ ४९ ॥

404 परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः । ३ । ३ । ५० ॥

परेण च ब्राह्मणेनास्यापि मनश्चिताद्यभिधायिनः शब्दस्य ताद्विध्यं—तद्विधत्वम्, विद्यामयप्रतिपादित्वमवगम्यते । परेण हि ब्राह्मणेन *अयं वा व लोक एषोऽग्निचितस्तस्याप एव परिश्रिताः* इत्यादिना *स यो हैतदेवं वेद लोकं पृणानामेनं भूतमेतत्सर्वमभिसंपद्यते* इति पृथक्फला विद्यैव विधीयते, तथा वैश्वानरविद्यादौ च विद्यैव विधीयते । अतोऽग्निरहस्यस्य क्रियैकविषयत्वं नास्ति । एवं तर्हि विद्यामया मनश्चितादयो बृहदारण्यकेऽनुबद्धव्याः किमर्थमिहानुबध्यन्ते? तत्रोच्यते—भूयस्त्वात्त्वनुबन्ध इति । मनश्चितादिषु सम्पादनीयानामग्नचङ्गानां भूयस्त्वात्तत्सन्निधाविहानुबन्धः कृतः ॥ ५० ॥ इति पूर्वविकल्पाधिकरणम् ॥ २० ॥

अथ शरीरेभावाधिकरणम् ॥ २१ ॥

405 एक आत्मनश्शरीरे भावात् । ३ । ३ । ५१ ॥

सर्वासु परविद्यासूपास्योपासनस्वरूपवदुपासकस्वरूपस्यापि ज्ञातव्यत्वमुक्तं *त्रयाणामेव चैवमुपन्यासः प्रश्नश्चेति । वक्ष्यति चास्य प्रत्यगात्मनः परमात्मात्मकत्वेनानुसन्धानम् *आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति । किमयं प्रत्यगात्मा ज्ञाता कर्ता भोक्तेहामुत्र संचारक्षमोऽनुसन्धेयः, उत प्रजापतिवाक्योदितापहतपाप्मत्वादिस्वरूपः? किं युक्तम्? ज्ञातृत्वाद्याकारमात्र इत्येके मन्यन्ते । कुतः? अस्योपासकस्यात्मनः शरीरे भावात् ।आत्मनश्शरीरे वर्तमानस्य तादृशमेव रूपम् । तावतैवानुसन्धानेन तत्फलसिद्ध्युपपत्तेश्च । नहि कर्मस्वधिकृतानां स्वर्गादिफलार्थिनां ज्ञातृत्वाद्यतिरेकेण फलानुभवदशायां यादृशं रूपम्, तादृशं रूपं साधनानुष्ठानदशायामनुसन्धातव्यम् । तावतैव साधनानुष्ठानतत्फलयोस्सिद्धेरतिरिक्तानुसन्धाने प्रयोजनाभावात्; तदविशेषादिहापि तथैव । ननु चात्र *यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति* इति विशेषवचनादपहतपाप्मत्वाद्याकार एवानुसन्धातव्य इत्यवगम्यते । नैवम्, *तं यथायथोपासते* इत्युपास्यविषयत्वात्तस्य ॥ ५१ ॥

एवं प्राप्ते प्रचक्ष्महे—

Digitization by Arya Samaj Charitable Foundation, Chennai

406 व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् । ३ । ३ । ५२ ॥

न त्वेतदस्ति—यत् ज्ञातृत्वाद्याकार एवानुसन्धेय इति । अस्यात्मनस्संसारदशायाः मोक्षदशायां यो व्यतिरेकः, सोऽपहतपाप्मत्वादिकोऽनुसन्धेयः; अस्य मोक्षदशायां यादृशं रूपं, तादृग्रूप एवोपासनवेलायामात्माऽनुसन्धेय इत्यर्थः । कुतः ? तद्भावभावित्वात्तद्रूपापत्तेः; *यथा-क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति *तं यथायथोपासते तथैव भवति* इति यथो-पासनमेव हि प्राप्तिः श्रूयते । नच परस्वरूपमात्रविषयमेवेदमिति वक्तुं शक्यते, प्रत्यगात्मनोऽ-प्युपास्यभूतपरब्रह्मशरीरतयोपास्यकोटिनिक्षिप्तत्वात् । अतः प्रजापतिवाक्योदितापहतपाप्मत्वादि-गुणकप्रत्यगात्मशरीरपरमात्मोपासनस्य तथारूपमेव प्राप्यमित्युक्तं भवति । अत एव *एवं क्रतुर्ह्यमुं लोकं प्रेत्याभिसंभवितास्मि* इत्युच्यते । तस्मात्प्रत्यगात्मा प्राप्याकार एवानुसन्धेयः । उपलब्धिवत्—ब्रह्मोपलब्धिवत् यथा ब्रह्मोपलब्धिर्विहिता यथावस्थितब्रह्मस्वरूपविषया, तथाऽऽत्मोपलब्धिरपि यथावस्थितात्म स्वरूपविषयेत्यर्थः । कर्मस्वात्मस्वरूपानुसन्धानं कर्माङ्गम्; *यजेत स्वर्गकाम इति कर्मानुष्ठानमेव हि फलाय चोद्यते।देहातिरिक्तज्ञातृत्वाद्याकारात्मात्रगतिः कालान्तरभाविफलसाधनकर्मा-धिकारार्थेति तावन्मात्रमेव तत्रापेक्षितमिति न किञ्चिदपहीनम् ॥ ५२ ॥ इति शरीरेभावाधिकरणम् ॥ २१ ॥

अथ अङ्गावबद्धाधिकरणम् ॥ २२ ॥

407 अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् । ३ । ३ । ५३ ॥

*ओमित्येतदक्षरमुद्गीथमुपासीत *लोकेषु पञ्चविधं सामोपासीत *उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थम् इयमेव पृथिवी *अयं वाव लोक एषोऽग्निचितः* इत्येवमाद्याः क्रत्वङ्गाश्रया उपासना भवन्ति । ताः किं यासु शाखासु श्रूयन्ते, तास्वेव नियताः, उत सर्वासु शाखासूद्गीथादिषु संबध्यन्त इति विचारः । सर्ववेदान्तप्रत्ययत्वे स्थितेऽपि प्रतिवेदं स्वरभेदादुद्गीथा-दयो भिद्यन्त इति तत्रतत्र व्यवतिष्ठेरन्निति युक्ता शङ्का । किं युक्तम् ? व्यवतिष्ठेरन्निति । कुतः ? *उद्गीथमुपासीतेति सामान्येनोद्गीथसवन्धितया श्रुतायास्तस्यामेव शाखायां स्वरविशेषयुक्तस्यो-द्गीथविशेषस्य सन्निधानात्तस्मिन्नेव विशेषे पर्यवसानं युक्तमिति, एवमाद्यास्तास्त्वेव शाखासु व्यवतिष्ठेरन्निति ॥

एवं प्राप्ते प्रचक्ष्महे—अङ्गावबद्धास्त्विति । तुशब्दः पक्षं व्यावर्तयति । नह्युद्गीथाद्यङ्गावबद्धा उपासनास्तास्वेव शाखासु व्यवतिष्ठेरन्; अपितु प्रतिवेदं संबध्येरन्; सर्वासु शाखास्वित्यर्थः । हिशब्दो हेतौ । यस्माच्छ्रुत्यैवोद्गीथाद्यङ्गमात्रावबद्धाः, तस्माद्यत्रोद्गीथादयः, तत्र सर्वत्र संबध्यरन् । यद्यपि स्वरभेदेनोद्गीथव्यक्तयो भिद्यन्ते; तथापि सामान्येनोद्गीथश्रुत्या सर्वा व्यक्तयस्सन्निहिता इति

Digitization by Arya Samaj Charitable Foundation, Chennai

न क्वचिद्व्यवस्थायां प्रमाणमस्ति । सर्वशाखाप्रत्ययन्यायेन च सर्वासु शाखासु क्रतुरेकः । अतस्सव सु शाखास्वेकस्य क्रतोस्सन्निधानात् क्रत्वङ्गभूतोद्गीथादयोऽपि सन्निहिता इति ॥ नैकस्य सन्निधिविशेषोऽस्तीति न व्यवस्था ॥ ५३ ॥

408 मन्त्रादिवद्वाऽविरोधः । ३ । ३ । ५४ ॥

वाशब्दश्चार्थे । आदिशब्देन जातिगुणसङ्ख्यासादृश्यक्रमद्रव्यकर्माणि गृह्यन्ते । यथा मन्त्रादीनामेकैकशाखास्वाम्नातानामपि शेषिणः क्रतोस्सर्वशाखास्वेकत्वेन यथायथं श्रुत्यादिभिस्सर्वासु शाखासु विनियोगो न विरुध्यते; तद्वदिहाप्यविरोधः ॥ ५४ ॥ इति अङ्गावबद्धाधिकरणम् ॥ २२ ॥

अथ भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥

409 भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति । ३ । ३ । ५५ ।

प्राचीनशाल औपमन्यवः इत्यारभ्य वैश्वानरविद्या आम्नाता । तत्र वैश्वानरः परमात्मा त्रैलोक्यशरीर उपास्यश्श्रुतः स्वर्लोकादित्यवाय्वाकाशाप्पृथिव्यवयवः । तत्र च द्यौर्मूर्धा, आदित्यश्चक्षुः, वायुः प्राणः, आकाशस्सन्देहः—मध्यकाय इत्यर्थः, आपो वस्तिः, पृथिवी पादावित्यवयवविशेषाः । तत्र संशयः—किमस्य त्रैलोक्यशरीरस्य व्यस्तस्योपासनं कर्तव्यम्, उत व्यस्तस्य समस्तस्य च, अथ समस्तस्यैवेति । किं युक्तम् ? व्यस्तस्येति । कुतः ? उपक्रमे व्यस्तोपासनोपदेशात् । तथा ह्युपदिश्यते—औपमन्यवादयः किलोद्दालकषष्ठाः केकयमश्वपतिमुपसद्य *आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि* इति पप्रच्छुः । स च तेभ्यः प्रत्येकं स्वोपास्यान् द्युप्रभृतीनुक्तवद्भ्यो मूर्धादिषु व्यस्तेषूपासनं तत्रतत्र फलं चोक्तवान् *अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति एष वै सुतेजा आत्मा वैश्वानरः* इत्यादिना तेषुतेषूपासनेषूपास्यस्य वैश्वानरत्वं चाह । अतो व्यस्तस्योपासनं कर्तव्यम् । परत्र *यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते* इति द्युप्रभृतिप्रदेशावच्छिन्नमात्रे वैश्वानरे उक्तस्य मूर्धाद्युपासनस्य समासेनोपसंहार इत्यवगन्तव्यम् ॥

अपर आह—एवमेव समस्तस्याप्युपासनं कार्यमिति, पृथक्फलनिर्देशात् *यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति* इति । नचैतावता वाक्यभेदः । यथा भूमविद्योपक्रमे नामाद्युपासनं तत्तत्फलञ्चाभिधाय *एष तु वा अतिवदति यस्सत्येनातिवदति* इत्यादिना भूमविद्यामुपदिश्य *स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति* इति तत्फलञ्च व्यपदिशति । तत्र भूमविद्यापरत्वेऽपि वाक्यस्य नामाद्यवान्तरोपासनं तत्तत्फलं चाङ्गीक्रियते, तथा इहापीति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्राप्तेऽभिधीयते—भूम्नो ज्यायस्त्वमिति। भूम्नः—विपुलस्य, समस्तस्यैव, ज्यायस्त्वं—प्रामाणिकत्वमित्यर्थः; एकवाक्यत्वावगतेः। तथा हि *प्राचीनशाल औपमन्यवः*इत्युपक्रम्य*उद्दालको ह वै भगवन्तोऽयमारुणिस्संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छाम* इति वैश्वानरात्मबुभुत्सयौपमन्यवादयः पञ्च महर्षयः तमुद्दालकमुपेत्य तत्र वैश्वानरात्मवेदनमलभमानास्तेन च सहाश्वपतिं केकयं वैश्वानरात्मवेदिनमुपसंगम्य *आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि* इति पृष्ट्वा तत्सकाशात् परमात्मानं वैश्वानरं स्वर्लोकादिपृथिव्यन्तशरीरमुपास्यमवगम्य तत्फलं च सर्वलोकसर्वभूतसर्वात्मान्नभूतब्रह्मानुभवमवगतवन्त इत्योपसंहारतो वाक्यस्यैकत्वमवगम्यते। एवमेकवाक्यत्वेऽवगते सत्यवयवविशेषेषूपास्तिवचनं फलनिर्देशश्च समस्तोपासनैकदेशानुवादमात्रमिति निश्चीयते। क्रतुवत्—यथा *वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते* इति विहितस्यैव क्रतोरेकदेशाः *यदष्टाकपालो भवति* इत्यादिभिरनूद्यन्ते, तथा समस्तोपासनमेव न्याय्यम्, न व्यस्तोपासनम्। तथाहि दर्शयतीयं श्रुतिः व्यस्तोपासने अनर्थं ब्रुवती *मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः* इति, *अन्धोऽभविष्यो यन्मां नागमिष्यः* इत्यादिका। अत इदमप्यपास्तं, यन्नामाद्युपासनसाम्यमुक्तम्। तत्रहि नामाद्युपासनेष्वनर्थो न श्रुतः, नामाद्युपासनेभ्यो भूमोपासनस्यातिशयितफलत्वं श्रुतम् *एष तु वा अतिवदति यस्सत्येनातिवदतीति। तत एव तत्र भूमविद्यापरत्वेऽपि वाक्यस्य नामाद्युपासनानां सफलानां विवक्षितत्वम्; अन्यथाऽतिशयितफलत्वनिमित्तातिवादेन भूमविद्यास्तुत्यनुपपत्तेः। अतस्समस्तोपासनमेव न्याय्यम्॥५५॥ इति भूमज्यायस्त्वाधिकरणम्॥२३॥

अथ शब्दादिभेदाधिकरणम्॥ २४॥

410 नाना शब्दादिभेदात्। ३। ३। ५६॥

इह ब्रह्मविद्यास्सर्वाः ब्रह्मप्राप्तिरूपमोक्षैकफलाः सद्विद्याभूमविद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्यावैश्वानरविद्यानन्दमयविद्याक्षरविद्यादिका एकशाखागताश्शाखान्तरगताश्चोदाहरणम्; अन्याः प्राणाद्येकविषयफलाश्च। किमत्र विद्यैक्यम्, उत विद्याभेद इति संशय्यते। अत्रैवासां परस्परभेदे समर्थिते सत्येकस्या दहरविद्यादिकायास्सर्ववेदान्तप्रत्ययन्यायः। किं युक्तम्? विद्यैक्यमिति। कुतः? वेद्यस्य ब्रह्मण एकत्वात्; वेद्यं हि विद्याया रूपम्; अतो रूपैक्याद्विद्यैक्यमिति॥

एवं प्राप्तेऽभिधीयते—नाना इति। नानाभूता विद्याः; कुतः? शब्दादिभेदात्—आदिशब्देनाभ्याससङ्ख्यागुणप्रक्रियानामधेयानि गृह्यन्ते। शब्दान्तरादिभिरत्र विधेयभेदहेतवोऽनुबन्धभेदाः दृश्यन्ते। यद्यपि वेदोपासीतेत्यादयः शब्दाः प्रत्ययावृत्त्यभिधायिनः; प्रत्ययाश्च ब्रह्मैकविषयाः; तथाऽपि तत्तत्प्रकरणोदितजगदेककारणत्वापहतपाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः प्रत्ययावृत्तिरूपाः विद्या भिन्दन्ति। ब्रह्मप्राप्तिरूपफलसंबन्ध्युपासनविशेषाभिधायीनि च निराकाङ्क्षाणि वाक्यानि प्रतिप्रकरणं विलक्षणविद्याभिधायीनीति निश्चीयते। अस्मिन्नर्थे *शब्दान्तरे

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्मभेदः* इत्यादिभिः पूर्वकाण्डोदितैस्सूत्रैस्सिद्धेऽपि पुनरिह प्रतिपादनं वेदान्तवाक्यानि अविधेयज्ञानपराणीति कुदृष्टिनिरसनाय । अतो विद्याभेद इति स्थितम् ॥५६॥ इति शब्दादिभेदाधिकरणम् ॥ २४ ॥

अथ विकल्पाधिकरणम् ॥ २५ ॥

411 विकल्पोऽविशिष्टफलत्वात् । ३ । ३ । ५७ ॥

ब्रह्मप्राप्तिफलानां सद्विद्यादहरविद्यादीनां नानात्वमुक्तम् । इदानीमासां विद्यानामेकस्मिन् पुरुषे प्रयोजनवत्त्वेन समुच्चयोऽपि सभवति, उत प्रयोजनाभावाद्विकल्प एवेति विशये, किं युक्तम् ? समुच्चयोऽपि संभवतीति । कुतः ? एकफलानां भिन्नशास्त्रार्थानामपि समुच्चयदर्शनात् । दृश्यते ह्येकस्यैव स्वर्गादेस्साधनानामग्निहोत्रदर्शपूर्णमासादीनां तस्यैव स्वर्गस्य भूयस्त्वापेक्षयैकत्र पुरुषे समुच्चयः । एवमिहापि ब्रह्मानुभवभूयस्त्वापेक्षया समुच्चयोऽपि संभवतीति ॥

एवं प्राप्ते प्रचक्ष्महे—विकल्प एव; न समुच्चयस्संभवतीति । कुतः ? अविशिष्टफलत्वात्—सर्वासां हि ब्रह्मविद्यानामनवधिकातिशयानन्दब्रह्मानुभवः फलमविशिष्टं श्रूयते *ब्रह्मविदाप्नोति परम् *स एको ब्रह्मण आनन्दः, श्रोत्रियस्य चाकामहतस्य *यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ इत्यादिभ्यः । ब्रह्म हि स्वस्य परस्य च स्वयमनुभूयमानमनवधिकातिशयानन्दं भवति । स च तादृशो ब्रह्मानुभवः एकया विद्ययाऽवाप्यते चेत्, किमन्ययेति न समुच्चयसंभवः । स्वर्गादेर्हि देशतः कालतः स्वरूपतश्च परिमितत्वेन तत्र देशाद्यपेक्षया भूयस्त्वसंभवात्तदर्थिनस्समुच्चयस्संभवति; इह तु तद्विपरीतस्वरूपे ब्रह्मणि तन्न संभवति । सर्वाश्च विद्याः ब्रह्मानुभवविरोध्यनादिकर्माविद्यानिरसनमुखेन ब्रह्मप्राप्तिफला इत्यविशिष्टफलत्वात्सर्वासां विकल्प एव ॥ ५७ ॥

ब्रह्मप्राप्तिव्यतिरिक्तफलास्तु विद्यास्स्वर्गादिफलकर्मवद्यथेष्टं विकल्पेरन्, समुच्चीयेरन्वा, तासां परिमितफलत्वेन भूयस्त्वापेक्षासंभवात् । तदाह—

412 काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् । ३ । ३ । ५८ ॥

अपरिमितफलत्वाभावादित्यर्थः ॥ ५८ ॥ इति विकल्पाधिकरणम् ॥ २५ ॥

अथ यथाश्रयभावाधिकरणम् ॥ २६ ॥

413 अङ्गेषु यथाश्रयभावः । ३ । ३ । ५९ ॥

उद्गीथादिक्रत्वङ्गेष्वाश्रिताः *ओमित्येतदक्षरमुद्गीथमुपासीत* इत्यादिका विद्याः किमुद्गीथादिवत्क्रत्वर्थतया क्रतुषु नियमेनोपादेयाः, उत गोदोहनादिवत्पुरुषार्थतया यथाकाममिति विशय,

Digitization by Arya Samaj Charitable Foundation, Chennai

नियमेनोपादेया इति युक्तम् । ननु चासां पुरुषार्थत्वेनानियमः प्रतिपादितः *तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्* इत्यत्र । सत्यम्; तदेव द्रढयितुं कैश्चिल्लिङ्गदर्शनैर्युक्त्या चाक्षिप्यते । तत्र हि *तेनोभौ कुरुतः* इत्यनियमदर्शनात्पृथक्फलत्वमुक्तम् । उपासनाश्रयभूतोद्गीथादिवदुपासनानामप्यङ्गतयोपादाननियमे बहवो हेतव उपलभ्यन्ते । न ह्यत्र *गोदोहनेन पशुकामस्य प्रणयेत्* इत्यादिवदुपासनाविधिवाक्ये फलसंबन्धः श्रूयते; *उद्गीथमुपासीतेत्युद्गीथादिसंबन्धितयैवोपासनं प्रतीयते । *यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्* इति वर्तमानोपदेशरूपवाक्यान्तराद्धि फलसंबन्धो ज्ञायते । स्ववाक्येनैवाव्यभिचरितक्रतुसंबन्ध्युद्गीथादिसंबन्धेन निर्ज्ञातक्रत्वङ्गभावस्य वाक्यान्तरस्थवर्तमानफलसंबन्धनिर्देशोऽर्थवादमात्रं स्यात्, अपापश्लोकश्रवणादिवत् । अतो यथोद्गीथादय उपासनाश्रयाः क्रत्वङ्गतया प्रयोगविधिना नियमेनोपादीयन्ते; तथा तदाश्रिताश्चोपासनास्तन्मुखेन क्रत्वङ्गभूता इति नियमेनोपादेया एव ॥ ५९ ॥

414 शिष्टेश्च । ३ । ३ । ६० ॥

शिष्टिः शासनम्, विधानमित्यर्थः । *उद्गीथमुपासीतेत्युद्गीथाङ्गतयोपासनविधानाच्चोपादाननियमः । *गोदोहनेन पशुकामस्य प्रणयेत्* इत्यादिवद्विधिवाक्येऽधिकारान्तराश्रवणादुद्गीथाङ्गभाव एव हि विधेय इति गम्यते ॥ ६० ॥

415 समाहारात् । ३ । ३ । ६१ ॥

होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति इत्युपासनस्य समाहारनियमो दृश्यते । दुरुद्गीथं वेदनविहीनमुद्गीथम् । वेदनहानावन्येन समाधानं ब्रुवत्तस्य नियमेनोपादानं दर्शयति ॥६१॥

416 गुणसाधारण्यश्रुतेश्च । ३ । ३ । ६२ ॥

उपासनगुणस्य उपासनाश्रयस्य प्रणवस्य सोपासनस्य *तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति* इति साधारण्यश्रुतेश्चोपासनसमाहारो गम्यते । *तेनेति प्रकृतपरामर्शात्सोपासन एव प्रणवस्सर्वत्र सञ्चरति । अत उपासनस्य प्रणवसहभावनियमदर्शनाच्चोद्गीथाद्युपासनानामुद्गीथादिवन्नियमेनोपादानम् ॥ ६२ ॥

इति प्राप्त उच्यते—

417 न वा तत्सहभावाश्रुतेः । ३ । ३ । ६३ ॥

नचैतदस्ति—यदुद्गीथाद्युपासनानां क्रतुषूद्गीथादिवदुपादाननियम इति । कुतः ? तत्सह-

Digitization by Arya Samaj Charitable Foundation, Chennai

भावाश्रुतेः––उद्गीथाङ्गभावाश्रुतेरित्यर्थः। अङ्गभावे हि सहभावनियमो भवति। यद्यपि *उद्गीथमुपासीतेत्यस्मिन् पदसमुदायेऽधिकारान्तरं न प्रतीयते; तथापि तदनन्तरमेव *यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति* इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साधनभावः प्रतिपाद्यते। तेन क्रतुफलात्पृथग्भूतफलसाधनभूता विद्या *उद्गीथमुपासीतेति कर्तव्यतया विधीयते। क्रतुफलात्पृथग्भूतफलसाधनतयाऽवगतस्योपासनस्य क्रत्वङ्गभूतोद्गीथाङ्गतया विनियोगो नोपपद्यते। अथ उपासनस्याश्रयापेक्षायां सन्निहित उद्गीथ आश्रयमात्रं भवति। उद्गीथश्च क्रत्वङ्गभूत इति क्रतुप्रयुक्तोद्गीथाद्याश्रये उपासने क्रत्वधिकारिण एव क्रतोर्वीर्यवत्तरत्वेच्छानिमित्तमिदमधिकारान्तरमिति न क्रतुषु तदुपादाननियमः। वीर्यवत्तरत्वं च क्रतुफलस्य प्रबलकर्मान्तरफलेनाप्रतिबन्ध इत्युक्तम्। क्रतोरविलम्बितफलत्वमित्यर्थः। पर्णतादीनां तु *यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति विद्यायाः फलसाधनत्ववदपापश्लोकश्रवणादिफलं प्रति साक्षात्साधनभावो न श्रुत इति क्रत्वङ्गभूतजुह्वाद्यङ्गतया विनियोगाविरोधात्तदङ्गभूतानां फलान्तरसाधनभावकल्पनानुपपत्तेस्तत्र फलश्रुतिरर्थवादमात्रं स्यात्॥ ६३॥

418 दर्शनाच्च। ३। ३। ६४॥

दर्शयति च श्रुतिरुपासनोपादानानियमम् *एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति* इति ब्रह्मणो वेदनेन सर्वेषां रक्षण ब्रुवती। उद्गातृप्रभृतीनां वेदनस्यानियमे सत्येतदुपपद्यते। अनेन लिङ्गेन पूर्वोक्तानां समाहारादिलिङ्गानां प्रायिकत्वमवगम्यते। अतोऽनियम एवेति स्थितम्॥ ॥ ६४॥ इति यथाश्रयभावाधिकरणम्॥ २६॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य तृतीयः पादः॥ ३॥

श्रीमते रामानुजाय नमः

तृतीयाध्याये––चतुर्थः पादः––पुरुषार्थाधिकरणम्॥ १॥

419 पुरुषार्थोऽतश्शब्दादिति बादरायणः। ३। ४। १॥

गुणोपसंहारानुपसंहारफला विद्यैकत्वनानात्वचिन्ता कृता। इदानीं विद्यातः पुरुषार्थः, उत विद्याङ्गकात्कर्मण इति चिन्त्यते। किं युक्तम्? अतः–विद्यातः पुरुषार्थ इति भगवान् बादरायणो मन्यते। कुतः? शब्दात्––दृश्यते ह्यौपनिषदश्शब्दो विद्यातः पुरुषार्थं ब्रुवन् *ब्रह्मविदाप्नोति परम् *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्, तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय॥ *यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥ इत्यादिः॥ १॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र पूर्वपक्षी प्रत्यवतिष्ठते--

420 शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः । ३ । ४ । २ ॥

नैतदेवम् यद्विद्यातः पुरुषार्थावाप्तिश्शब्दादवगम्यत इति । न ह्येषः *ब्रह्मविदाप्नोति परमित्यादिशब्दो वेदनात्पुरुषार्थावाप्तिमवगमयति, कर्मसु कर्तृभूतस्यात्मनो याथात्म्यवेदनप्रतिपादनपरत्वात् । अतः कर्तुस्संस्कारद्वारेण विद्यायाः क्रतुशेषत्वात्तत्र फलश्रुतिरर्थवादमात्रम्; यथाऽन्येषु द्रव्यादिषु—इति जैमिनिराचार्यो मन्यते । तदुक्तं *द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादस्स्यात्* इति । ननुच कर्मसु कर्तुर्जीवादन्यो मुमुक्षुभिः प्राप्यतया वेदान्तेषु वेद्य उपदिश्यत इति प्रागेवोपपादितं— *नेतरोऽनुपपत्तेः *भेदव्यपदेशाच्च *अनुपपत्तेस्तु न शारीरः *इतरपरामर्शात्स इति चेन्नासंभवात्* इत्येवमादिभिस्सूत्रैः । तदेव ब्रह्म तत्त्वमस्यादिसामानाधिकरण्येन जीवादनतिरिक्तमित्येतदपि *अधिकं तु भेदनिर्देशात्* इत्येवमादिभिर्निरस्तम् । सामानाधिकरण्यनिर्देशश्च *ऐतदात्म्यमिदं सर्वम् *सर्वं खल्विदं ब्रह्म* इति चेतनाचेतनसाधारणः, *यः पृथिव्यां तिष्ठन् *य आत्मनि तिष्ठन्* इत्यादिनाऽवगततत्तदात्मतयाऽवस्थितिनिबन्धन इति *अवस्थितेरिति काशकृत्स्नः* इत्यादिभिरुपपादितम् । तत्कथं कर्मसु कर्तुरात्मनो याथात्म्योपदेशपरा वेदान्तशब्दा इति विद्यायाः कर्माङ्गत्वं प्रतिपाद्यते ? उच्यते—वेदान्तवाक्येष्वेव विद्यायाः कर्मप्राधान्यं सूचयद्भिर्लिङ्गैस्तदुपबृंहितसामानाधिकरण्यनिर्देशेन च वेदान्तशब्दा देहातिरिक्तजीवस्वरूपयाथात्म्योपदेशपरा इति बलादभ्युपगमनीयमिति पूर्वपक्षिणोऽभिप्रायः । ननु च कर्तृसंस्कारमुखेन विद्यायाः क्रत्वनुप्रवेशो न शक्यते वक्तुम्, कर्तुर्लौकिकवैदिकसाधारणत्वेनाव्यभिचरितक्रतुसंबन्धित्वाभावात् । नैवम्, लौकिकस्य कर्मणः कर्तुर्देहादव्यतिरिक्तत्वेऽप्युपपत्तेर्देहातिरिक्तनित्यात्मस्वरूपस्य क्रतावेवोपयोगात्तत्स्वरूपप्रतिपादनमुखेन क्रत्वनुप्रवेशो न विरुध्यते । अतो विद्यायाः क्रतुशेषत्वान्नातः पुरुषार्थः ॥ २ ॥

कानि पुनस्तानि लिङ्गानि, यदुपबृंहितसामानाधिकरण्यनिर्देशेन वेदान्तशब्दा जीवस्वरूपपरा इति निर्णीयन्ते ? तत्राह—

421 आचारदर्शनात् । ३ । ४ । ३ ॥

ब्रह्मविदां प्राधान्येन कर्मस्वेवाचारो दृश्यते अश्वपतिः केकयः किल आत्मवित्तमस्तद्विज्ञानायोपगतांस्तानृषीन् प्रत्याह—*यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि* इति । तथा जनकादयो ब्रह्मविदग्रेसराः कर्मनिष्ठाः स्मृतिषु दृश्यन्ते *कर्मणैव हि संसिद्धिमास्थिता जनकादयः *इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः* इति । अतो ब्रह्मविदां कर्मप्रधानत्वदर्शनाद्विद्यायाः कर्तृस्वरूपवेदनरूपत्वेन कर्माङ्गत्वमेवेति न विद्यातः पुरुषार्थः ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

लिङ्गमिदम्; प्राप्तिरुच्यतामित्यत्राह—

422 तच्छ्रुतेः । ३ । ४ । ४ ॥

श्रुतिरेव हि विद्यायाः कर्माङ्गत्वमाह—*यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति* इति। नेयं श्रुतिः प्रकरणादुद्गीथमात्रविषयेति व्यवस्थापयितुं शक्या; यतः प्रकरणाच्छ्रुतिर्बलीयसी; *यदेव विद्यया करोतीति विद्यामात्रविषया हीयं श्रुतिः ॥ ४ ॥

423 समन्वारम्भणात् । ३ । ४ । ५ ॥

तं विद्याकर्मणी समन्वारभेते इति विद्याकर्मणोस्साहित्यं च दृश्यते। साहित्यं चोक्तेन न्यायेन विद्यायाः कर्माङ्गत्वे सत्येव भवति ॥ ५ ॥

424 तद्वतो विधानात् । ३ । ४ । ६ ॥

विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमित्यवगम्यते। *आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे* इत्यादौ *वेदमधीत्येत्यध्ययनवतः कर्माणि विदधदर्थावबोधपर्यन्ताध्ययनवत एव विदधाति। अर्थावबोधपर्यन्तं ह्यध्ययनमिति स्थापितम्। अतो ब्रह्मविद्याऽपि कर्मसु विनियुक्तेति न पृथक्फलायावकल्पते ॥ ६ ॥

425 नियमात् । ३ । ४ । ७ ॥

इतश्च न विद्यातः पुरुषार्थः। *कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः* इत्यात्मविदः पुरुषायुषस्य सर्वस्य कर्मसु नियमेन विनियोगात्कर्मण एव फलमित्यवगम्यते। विद्या तु कर्माङ्गमिति ॥ ७ ॥

एवं प्राप्ते प्रचक्ष्महे—

426 अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् । ३ । ४ । ८ ॥

तुशब्दात्पक्षो व्यावृत्तः। विद्यात एव पुरुषार्थः। कुतः? अधिकोपदेशात्—कर्मसु कर्तुर्जीवाद्धेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरत्वेनाधिकस्यार्थान्तरभूतस्य परस्य ब्रह्मणो वेद्यतयोपदेशात्, भगवतो बादरायणस्य विद्यातः फलमित्येवमेव मतम्। लिङ्गानि तिष्ठन्तु; वेद्यतयोपदेशस्तु तावत्कर्तुः प्रत्यगात्मनोऽधिकस्यैव। कथम्? तद्दर्शनात्—प्रत्यगात्मन्यशुद्धे शुद्धेऽप्यसंभावनीयानन्तगुणाकरस्य वेद्यस्य निरस्तनिखिलहेयगन्धस्य स्वसङ्कल्पकृतजगदुदयविभव-लयलीलस्य सर्वज्ञस्य सर्वशक्तेर्वाङ्मनसापरिच्छेद्यानन्दस्य जीवाधिपस्य कृत्स्नप्रशासितुः परस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मणो वेदनोपदेशवाक्येषु दर्शनात् *अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः *तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत *यस्सर्वज्ञस्सर्ववित् *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च *स एको ब्रह्मण आनन्दः *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चनेति *एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः *स कारणं करणाधिपाधिपो नचास्य कश्चिज्जनिता नचाधिपः *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (*एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः) *भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चमः* इत्यादिषु । तस्माद्वेदनोपदेशशब्देषु कर्तुः प्रत्यगात्मनः खद्योतकल्पस्याविद्यादिहेयसंबन्धयोग्यस्य गन्धोऽपि नास्तीति परमपुरुषविषयाया विद्यायास्तत्प्राप्तिरूपममृतत्वं तत्रतत्र श्रूयमाणं फलमिति विद्यातः पुरुषार्थ इति सुष्ठूक्तम् ॥ ८ ॥

लिङ्गान्यपि निरस्यन्ते—

427 तुल्यं तु दर्शनम् । ३ । ४ । ९ ॥

यदुक्तं ब्रह्मविदां कर्मानुष्ठानदर्शनाद्विद्या कर्माङ्गमिति; तन्न, विद्याया अनङ्गत्वेऽपि तुल्यं दर्शनम्–ब्रह्मविदां कर्मानुष्ठानदर्शनमनैकान्तिकमित्यर्थः, अननुष्ठानस्यापि दर्शनात् । दृश्यते हि ब्रह्मविदां कर्मत्यागः *ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे* इत्यादौ। अतो ब्रह्मविदां कर्मत्यागदर्शनान्न विद्या कर्माङ्गम् । कथमिदमुपपद्यते ब्रह्मविदां कर्मानुष्ठानमननुष्ठानञ्च ? फलाभिसन्धिरहितस्य यज्ञादिकर्मणो ब्रह्मविद्याङ्गत्वात्तथाविधस्य कर्मणोऽनुष्ठानदर्शनमुपपद्यते । वक्ष्यतिच *सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्* इति । फलार्थस्य तस्यैव यज्ञादेः कर्मणो मोक्षैकफलब्रह्मविद्याविरोधित्वात्तस्याननुष्ठानदर्शनमुपपन्नतरम् । विद्यायाः कर्माङ्गत्वे कर्मत्यागः कथमपि नोपपद्यते ॥ ९ ॥

यदुक्तं श्रुत्यैव विद्यायाः कर्माङ्गत्वमवगम्यत इति; तत्राह—

428 असार्वत्रिकी । ३ । ४ । १० ॥

न सर्वविद्याविषयेयं श्रुतिः; अपि तूद्गीथविद्याविषयैव *यदेव विद्यया करोति* इति यच्छब्दस्यानिर्धारितविशेषस्य *उद्गीथमुपासीत* इति प्रस्तुतोद्गीथविशेषनिष्ठत्वात् । नहि यत्करोति, तद्विद्ययेति संबध्यते; यदेव विद्यया करोति, तदेव वीर्यवत्तरमिति विद्यया क्रियमाणं यच्छब्देन निर्दिश्य तस्य हि वीर्यवत्तरत्वमुच्यते ॥ १० ॥

यच्चेदमुक्तं *तं विद्याकर्मणी समन्वारभेते* इति विद्याकर्मणोस्साहित्यदर्शनाद्विद्या कर्माङ्गमिति; तत्राह—

Digitization by Arya Samaj Charitable Foundation, Chennai

429 विभागश्शतवत् । ३ । ४ । ११ ॥

तं विद्याकर्मणी समन्वारभेते इत्यत्रोक्तेन न्यायेन विद्याकर्मणोर्भिन्नफलत्वाद्विद्या स्वस्मै फलाय समन्वारभते, कर्म च स्वस्मै फलायेति विभागो द्रष्टव्यः । शतवत्––यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतम्, रत्नार्थं शतमिति विभागः प्रतीयते; तथेहापि ॥ ११ ॥

430 अध्ययनमात्रवतः । ३ । ४ । १२ ॥

यदुक्तं विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमिति; नैतद्युक्तम्, *वेदमधीत्येत्यध्ययनमात्रवतो विधानात् । नचाध्ययनविधिरेवार्थबोधे प्रवर्तयति, आधानवदध्ययनस्याक्षरराशिग्रहणमात्रे पर्यवसानात् । गृहीतस्य च स्वाध्यायस्य फलवत्कर्मावबोधित्वदर्शनात्तन्निर्णयफले तदर्थविचारे पुरुष स्वयमेव प्रवर्तते; ततः कर्मार्थी कर्मज्ञाने प्रवर्तते, मोक्षार्थी च ब्रह्मज्ञान इति न विद्या कर्माङ्गम् । यद्यप्यध्ययनविधिरेवार्थावबोधेप्रवर्तयति; तथापि न विद्या कर्माङ्गम्, अर्थज्ञानादर्थान्तरत्वाद्विद्यायाः । यथा ज्योतिष्टोमादिकर्मस्वरूपविज्ञानात्फलसाधनभूतं तत्कर्मानुष्ठानमर्थान्तरम्; तथाऽर्थज्ञानरूपाद्ब्रह्मस्वरूपविज्ञानादर्थान्तरमेव ध्यानोपासनादिशब्दवाच्या पुरुषार्थसाधनभूता विद्येति न तस्याः कर्मसंबन्धगन्धो विद्यते ॥ १२ ॥

431 नाविशेषात् । ३ । ४ । १३ ॥

यच्चोक्तं *कुर्वन्नेवेह कर्माणीत्यात्मविदं ज्ञानाद्व्यावर्त्य यावज्जीवं कर्मानुष्ठाने नियमयतीति; तन्नोपपद्यते; अविशेषात्–नह्ययं नियमः फलसाधनभूतस्वतन्त्रकर्मविषय इति विशेषहेतुरस्ति, विद्याङ्गभूतकर्मविषयतयाऽप्युपपत्तेः । *कर्मणैव हि संसिद्धिमास्थिता जनकादयः* इति च विदुषस्त्वाप्रयाणादुपासनस्यानुवर्तमानत्वात् ॥ १३ ॥

एवमर्थस्वाभाव्येन चोद्यं परिहृत्य *कुर्वन्नेवेह कर्माणीत्यस्य वाक्यस्यार्थमाह––

432 स्तुतयेऽनुमतिर्वा । ३ । ४ । १४ ॥

वाशब्दोऽवधारणार्थः; *ईशावास्यमिदं सर्वमिति विद्याप्रकरणाद्विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम् । विद्यामाहात्म्यात्सर्वदा कर्म कुर्वन्नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति । वाक्यशेषश्चैवमेव दर्शयति– *एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे* इति । अतो न कर्माङ्गं विद्या ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

433 कामकारेण चैके । ३ । ४ । १५ ॥

अपि चैवमेके शाखिनः कामकारेण ब्रह्मविद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते *किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोकः* इति । विदुषो विरक्तस्य कामकारेण गार्हस्थ्यकर्मत्यागं ब्रुवदिदं वचनं ब्रह्मविद्यायाः कर्मानङ्गत्वं दर्शयति । यज्ञादिकर्माङ्गत्वे हि विद्यायाः विद्यानिष्ठस्य कामकारेण गार्हस्थ्यत्यागो न संभवति । अतो न विद्या कर्माङ्गम् ॥ १५ ॥

434 उपमर्दं च । ३ । ४ । १६ ॥

पुण्यापुण्यरूपस्य समस्तसांसारिकदुःखमूलस्य कर्मणो ब्रह्मविद्ययोपमर्दं च प्रतिवेदान्तमधीयते *भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ इत्यादिकम् । तद्विद्यायाः कर्माङ्गत्वे न संगच्छते ॥ १६ ॥

435 ऊर्ध्वरेतस्सु च शब्दे हि । ३ । ४ । १७ ॥

ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्यादर्शनात्तेष्वग्निहोत्रदर्शपूर्णमासादिकर्माभावाच्च न विद्या कर्माङ्गम् । ननूर्ध्वरेतस आश्रमा न सन्त्येव, *यावज्जीवमग्निहोत्रं जुहोति* इत्यादिनाऽग्निहोत्रदर्शपूर्णमासादीनां यावज्जीवाधिकारश्रुतेः; श्रुतिविरुद्धानां स्मृतीनां चाप्रामाण्यात् । अत आह—शब्दे हीति । वैदिक एव हि शब्दे ते दृश्यन्ते *त्रयो धर्मस्कन्धाः *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते *एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति* इत्यादौ । यावज्जीवश्रुतिस्त्वविरक्तविषया ॥ १७ ॥

436 परामर्शं जैमिनिरचोदनाच्चापवदति हि । ३ । ४ । १८ ॥

यदिदं *त्रयो धर्मस्कन्धाः* इत्यादौ वैदिके शब्दे ऊर्ध्वरेतस आश्रमा दृश्यन्ते, अतस्ते सन्त्येवेति; नैतदुपपद्यते; यतः *त्रयो धर्मस्कन्धाः इत्यादिषु वाक्येषु तेषामाश्रमाणां परामर्शमात्रं क्रियते—अनुवादमात्रमित्यर्थः । कुत एतत् ? अचोदनात्—अविधानादित्यर्थः । न ह्यत्र विधिशब्दः श्रूयते । *त्रयो धर्मस्कन्धा इत्यादिना हि प्रकृतं प्रणवेन ब्रह्मोपासनं स्तूयते, *ब्रह्मसंस्थोऽमृतत्वमेति* इत्युपसंहारात् । अतोऽन्यार्थमनुवादमात्रमत्र क्रियते तेषामाश्रमाणाम् । *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते* इति च देवयानविधिपरत्वात्तत्रापि नाश्रमान्तरविधिसंभवः । अपि चापवदति हि श्रुतिराश्रमान्तरं *वीरहा वा एष देवानां योऽग्निमुद्वासयते* इत्यादिका । अत ऊर्ध्वरेतस आश्रमा न सन्तीति जैमिनिराचार्यो मन्यते ॥ १८

Digitization by Arya Samaj Charitable Foundation, Chennai

437 अनुष्ठेयं बादरायणस्साम्यश्रुतेः । ३ । ४ । १९ ॥

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते । कुतः ? साम्यश्रुतेः–उपादेयतयाऽभिमतगृहस्थाश्रमसाम्यं हि तेषामप्याश्रमाणां श्रूयते । *त्रयो धर्मस्कन्धा इत्यारभ्य ब्रह्मसंस्थस्तुत्यर्थतया सङ्कीर्तनं गृहस्थाश्रमस्येतरेषां च समानम् । अथ गृहस्थाश्रमस्यानुवादः प्राप्तौ सत्यामेव संभवतीति तस्य प्राप्तिरवश्याभ्युपेत्येति मतम्; तदितरेषामपि समानमन्यत्राभिनिवेशात् । नच गार्हस्थ्यधर्म एव *यज्ञोऽध्ययनं दानं तपो ब्रह्मचर्यम्* इति सर्वैश्शब्दैरभिधीयते, ब्रह्मचर्यतपसोर्गृहस्थस्यैव संभवादिति युक्तम्; *त्रयो धर्मस्कन्धा इति त्रित्वेन संगृह्य *प्रथमो...द्वितीयः...तृतीयः* इति विभागवचनानुपपत्तेः । अतः *यज्ञोऽध्ययनं दानमिति गृहस्थाश्रम उच्यते । अध्ययनशब्दो वेदाभ्यासपरः । तपश्शब्देन वैखानसपारिव्राज्ययोर्ग्रहणम्, उभयोः तपःप्रधानत्वात् । तपश्शब्दो हि कायक्लेशे रूढः; स च द्वयोरपि समानः । ब्रह्मचारिधर्म एव ब्रह्मचर्यशब्देनाभिधीयते । *ब्रह्मसंस्थोऽमृतत्वमेतीति परत्र श्रूयमाणो ब्रह्मसंस्थशब्दो यौगिकः सर्वाश्रमसाधारणः, सर्वेषामाश्रमिणां ब्रह्मसंस्थासंभवात् । ब्रह्मणि संस्था—संस्थितिः ब्रह्मसंस्थत्वम्, तच्च सर्वेषां संभवत्येव । ब्रह्मनिष्ठाविकलाः केवलाश्रमिणः पुण्यलोकभाजः; तेष्वेव ब्रह्मनिष्ठोऽमृतत्वभाग्भवति । तदेतद्विस्पष्टमुक्तं भगवता पराशरेण *प्राजापत्यं ब्राह्मणानामित्यारभ्य *ब्राह्मं संन्यासिनां स्मृतम्* इत्यन्तेन वर्णानामाश्रमाणां च केवलानां ब्रह्मलोकप्राप्त्यन्तं फलमभिधाय *एकान्तिनस्सदा ब्रह्म ध्यायिनो योगिनो हि ये । तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः ॥ इति तेष्वेव ब्रह्मनिष्ठानां ब्रह्मप्राप्तिमभिदधता । अतो गृहस्थाश्रमतुल्याः ऊर्ध्वरेतस आश्रमा अपि दृश्यन्त इति तेऽप्यनुष्ठेयाः । *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते* इति च अरण्ये इति तपःप्रधानाश्रमप्राप्त्यपेक्षत्वाद्देवयानविधानस्य तत्रापि तत्प्राप्तिरङ्गीकरणीया ॥ १९ ॥

परामर्शपक्षे विधानपक्षे च गृहस्थाश्रमतुल्यमेषामप्यनुष्ठेयत्वमित्युपपाद्य विधिरेवायमाश्रमाणां सर्वेषां, नानुवाद इत्युपपादयितुमाह—

438 विधिर्वा धारणवत् । ३ । ४ । २० ॥

वाशब्दोऽवधारणार्थः । विधिरेवायमाश्रमाणाम्; धारणवत्—यथा दिष्टाग्निहोत्रे *अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति* इत्यत्रानुवादसरूपादपि वाक्यादुपरि धारणस्याप्राप्तत्वाद्विधिराश्रीयते । तदुक्तं शेषलक्षणे *विधिस्तु धारणेऽपूर्वत्वात्* इति । तथाऽत्राप्यप्राप्तत्वाद्विधिरेवाश्रयणीयः । *ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्* इति जाबालानामाश्रमविधिमसन्तमिव कृत्वैतेष्वन्यपरेष्वपि वाक्येष्वाश्रमप्राप्तिरवश्याश्रयणीयेत्युपपादितम् । एवमाश्रमान्तर-

Digitization by Arya Samaj Charitable Foundation, Chennai

विधानाद्दणश्रुतिर्यावज्जीवश्रुतिरपवादश्रुतिश्चाविरक्तविषया एवेति वेदितव्याः । अन्याश्च ब्रह्मविदः कर्मणामाप्रयाणादवश्यकर्तव्यताविधायिन्यः श्रुतयः स्मृतयश्च स्वस्वाश्रमधर्मविषयाः । अत ऊर्ध्वरेतस्सु च ब्रह्मविद्याविधानाद्विद्यातः पुरुषार्थ इति सिद्धम् ॥ २० ॥ इति पुरुषार्थाधिकरणम् ॥ १ ॥

अथ स्तुतिमात्राधिकरणम् ॥ २ ॥

439 स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् । ३ । ४ । २१ ॥

इदमिदानीं चिन्त्यते *स एष रसानां रसतमः परमः परार्थ्योऽष्टमो यदुद्गीथः* इति एवंजातीयकानि वाक्यानि क्रत्ववयवभूतोद्गीथादिस्तुतिमात्रपराणि, आहोस्विदुद्गीथादिषु रसतमादिदृष्टिविधानार्थानीति । अत्र प्रतिपादितमुपासनपरत्वमङ्गीकृत्योपासनस्य पुरुषार्थत्वेन क्रतुषूपादानानियम उक्तः । किं युक्तम् ? स्तुतिमात्रपराणीति । कुतः ? उद्गीथाद्युपादानात् । क्रत्वङ्गभूतानि ह्युद्गीथादीन्युपादाय तेषां रसतमादित्वं प्रतिपादितम्; यथा जुह्वादीनां पृथिव्यादित्वं प्रतिपादयतो वचनस्य *इयमेव जुहूः स्वर्गो लोक आहवनीयः* इत्यादिकस्य तत्स्तुतिमात्रपरत्वम्, तथेहापि । तदिदमाशङ्कते—स्तुतिमात्रमुपादानादिति चेदिति । उद्गीथाद्युपादानात्तत्स्तुतिमात्रमेवैषां वाक्यानां विवक्षितमिति चेत् । अत्रोत्तरं—नापूर्वत्वादिति । न स्तुतिमात्रत्वमुपपद्यते; कुतः ? अपूर्वत्वात्—अप्राप्तत्वात् । न ह्युद्गीथादयो रसतमादितया प्रमाणान्तरेण प्रतिपन्नाः; येन तत्प्राशस्त्यबुद्ध्युत्पत्त्यर्थं रसतमादित्वेनानूद्येरन् । नचोद्गीथादिविधिरत्र सन्निहितः; येन *इयमेव जुहूस्स्वर्गो लोक आहवनीयः* इत्यादिवत्तदेकवाक्यत्वेन यथाकथाचन विधया तत्स्तुतिपरत्वमाश्रीयेत । अतः क्रतुवीर्यवत्तरत्वादिफलसिद्ध्यर्थमुद्गीथादिषु रसतमादिदृष्टिविधानमेव न्याय्यम् ॥ २१ ॥

440 भावशब्दाच्च । ३ । ४ । २२ ॥

*उपासीतेत्यादिभावशब्दाच्च विधिपरत्वमेव न्याय्यम् । विधिप्रत्यययुक्तो हि क्रियाशब्दो विधेयमेव स्वार्थमवगमयति । तस्मादुपासनविधानार्था एतास्श्रुतयः ॥ २२ ॥ इति स्तुतिमात्राधिकरणम् ॥ २ ॥

अथ पारिप्लवार्थाधिकरणम् ॥ ३ ॥

441 पारिप्लवार्था इति चेन्न विशेषितत्वात् । ३ । ४ । २३ ॥

*प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम *श्वेतकेतुर्हारुणेय आस *इत्येवमादीनि वेदान्तेष्वाख्यानानि किं पारिप्लवप्रयोगार्थानि, उत विद्याविशेषप्रतिपादनार्थानीति चिन्तायाम् *आख्यानानि शंसन्ति* इत्याख्यानानां पारिप्लवे विनियोगान्न विद्याप्रधानत्वं न्याय्यमिति चेत्; न सर्वाण्याख्यानानि पारिप्लवप्रयोगे विनियोगमर्हन्ति; कुतः ? विशेषितत्वाद्विनियोगस्य ।

Digitization by Arya Samaj Charitable Foundation, Chennai

*आख्यानानि शंसन्तीत्युक्त्वा तत्रैव *मनुर्वैवस्वतो राजा* इत्यादिना मन्वादीनामाख्यानानि विशेष्यन्ते; अतस्तेषामेव तत्र विनियोग इति गम्यते। तस्मान्न सर्वा वेदान्तेष्वाख्यानश्रुतयः पारिप्लवप्रयोगार्थाः; अपि तु विद्याविध्यर्थाः ॥ २३ ॥

442 तथा चैकवाक्योपबन्धात्। ३। ४। २४ ॥

आत्मा वा अरे द्रष्टव्यः इत्यादि विधिनैकवाक्यतयोपबन्धाच्चाख्यानानां विद्याविध्यर्थान्येव तानीति गम्यते; यथा *सोऽरोदीत्* इत्येवमादेः कर्मविध्यर्थत्वम्; न पारिप्लवार्थत्वम् ॥२४॥ इति पारिप्लवार्थाधिकरणम् ॥ ३ ॥

अथ अग्नीन्धनाद्यधिकरणम् ॥ ४ ॥

443 अत एव चाग्नीन्धनाद्यनपेक्षा। ३। ४। २५ ॥

स्तुतिप्रसङ्गादवान्तरसङ्गतिविशेषणार्थद्वयं चिन्तितम्। विद्यावन्त ऊर्ध्वरेतस आश्रमिणस्सन्तीत्युक्तम् *ऊर्ध्वरेतस्सु च शब्दे हीत्यादिभिस्सूत्रैः। इदानीमूर्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न संभवतीत्याशङ्क्याह—अत एव चाग्नीन्धनाद्यनपेक्षेति। यत ऊर्ध्वरेतस आश्रमिणो विद्यासंबन्धित्वेन श्रुत्या परिगृह्यन्ते *ब्रह्मसंस्थोऽमृतत्वमेति *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते *एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति *यदिच्छन्तो ब्रह्मचर्यं चरन्ति इत्यादिकया; अत एवोर्ध्वरेतस्सु विद्या अग्नीन्धनाद्यनपेक्षा—अग्नीन्धनम्—अग्न्याधानम्; आधानपूर्वकाग्निहोत्रदर्शपूर्णमासादिकर्मानपेक्षा तेषु विद्या। केवलस्वाश्रमविहितकर्मापेक्षेत्यर्थः ॥२५॥ इति अग्नीन्धनाद्यधिकरणम् ॥४॥

अथ सर्वापेक्षाधिकरणम् ॥ ५ ॥

444 सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। ३। ४। २६ ॥

यदि विद्या यज्ञाद्यनपेक्षैवामृतत्वं साधयति; तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हति; यज्ञादिश्रुतिरपि *विविदिषन्तीति शब्दात्कर्मणो वेदनाङ्गतां न प्रतिपादयतीति। अत आह—सर्वापेक्षेति। अग्निहोत्रादिसर्वकर्मापेक्षैव विद्या कर्मवत्सु गृहस्थेषु; कुतः? यज्ञादिश्रुतेः। *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन* इत्यादिना यज्ञादयो हि विद्याङ्गत्वेन श्रूयन्ते। यज्ञादिना विविदिषन्ति—वेदितुमिच्छन्ति, यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीत्यर्थः। यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिः ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपपद्यते; यथा असेर्हननसाधनत्वे सति असिना जिघांसतीति व्यपदेशः। अतो यज्ञादीनां ज्ञानसाधनत्वमवगम्यते। ज्ञानं च वाक्यार्थज्ञानादर्थान्तरभूतं ध्यानोपासनादिशब्दवाच्यं विशदतमप्रत्यक्षतापन्नस्मृतिरूपं निरतिशयप्रियमहरहरभ्यासाधेयातिशयमाप्रयाणादनुवर्तमानं मोक्षसाधनमित्युक्तमस्माभिः पूर्वमेव; वक्ष्यति

Digitization by Arya Samaj Charitable Foundation, Chennai

च *आवृत्तिरसकृदुपदेशादित्यादिना । एवंरूपं च ध्यानमहरहरनुष्ठीयमानैर्नित्यनैमित्तिककर्मभिः परमपुरुषाराधनरूपैः परमपुरुषप्रसादद्वारेण जायत इति यज्ञादिना विविदिषन्तीति शास्त्रेण प्रतिपाद्यते । अतः कर्मवत्सु गृहस्थेषु यज्ञादिनित्यनैमित्तिकसर्वकर्मापेक्षा विद्या । अश्ववत्——यथा गमनसाधनभूतोऽश्वः स्वपरिकरबन्धपरिकर्मापेक्षः; एवं मोक्षसाधनभूताऽपि विद्या नित्यनैमित्तिककर्मपरिकरापेक्षा । तदिदमाह स्वयमेव भगवान् *यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ *यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ इति ॥ २६ ॥ इति सर्वापेक्षाधिकरणम् ॥ ५ ॥

अथ शमदमाद्यधिकरणम् ॥ ६ ॥

445 शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ३ । ४ । २७ ॥

गृहस्थस्य शमदमादीन्यप्यनुष्ठेयानि, उत नेति चिन्तायाम्, आन्तरबाह्यकरणव्यापाररूपत्वात्कर्मानुष्ठानस्य, शमदमादीनां तद्विपरीतरूपत्वाच्चाननुष्ठेयानि । इति प्राप्त उच्यते—यद्यपि गृहस्थः करणव्यापाररूपकर्मसु प्रवृत्तः; तथाऽपि स विद्वान् शमदमाद्युपेतस्स्यात्; कुतः? तदङ्गतया तद्विधेः——विद्याङ्गतया तेषां विधेः *तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्* इति । विद्योत्पत्तेश्चित्तसमाधानरूपत्वेन दृष्टपरिकरत्वाच्छमादीनां, विद्यानिर्वृत्तये तेषां—शमादीनामप्यवश्यानुष्ठेयत्वाच्च तान्यप्यनुष्ठेयानि । नच करणव्यापारतद्विपर्ययरूपत्वेन कर्मणां शमदमादीनां च परस्परविरोधः; भिन्नविषयत्वात्——विहितेषु करणव्यापारः, अविहितेषु प्रयोजनशून्येषु च तदुपशम इति । नच करणव्यापाररूपकर्मसु वर्तमानस्य वासनावशाच्छमादीनामुपादेयत्वासंभवः, विहितानां कर्मणां परमपुरुषाराधनतया तत्प्रसादद्वारेण निखिलविपरीतवासनोच्छेदहेतुत्वात् । अतो गृहस्थस्य शमदमादयोऽप्यनुष्ठेयाः ॥ २७ ॥ इति शमदमाद्यधिकरणम् ॥ ६ ॥

अथ सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥

446 सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् । ३ । ४ । २८ ॥

वाजिनां छन्दोगानां च प्राणविद्यायां *न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं भवति *नह वा एवंविदि किञ्चनानन्नं भवति* इति प्राणविदः सर्वान्नानुमतिः सङ्कीर्त्यते । किमियं प्राणविद्यानिष्ठस्य सर्वान्नानुमतिः सर्वदा, उत प्राणात्ययापत्ताविति विशये, विशेषानुपादानात्सर्वदा । इति प्राप्त उच्यते——प्राणात्यय इति । चशब्दोऽवधारणे; प्राणात्ययापत्तावेवेत्यर्थः । कुतः? तद्दर्शनात्—दृश्यते ह्यन्यत्र ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्यनुज्ञा; किं पुनःप्राणविदः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उषस्तिः किल चाक्रायणो ब्रह्मविदग्रेसरो मटचीहतेषु कुरुषु दुर्भिक्षदूषितेष्विभ्यग्रामे वसन्ननशनेन प्राणसंशयमापन्नः ब्रह्मविद्यानिष्पत्तयेप्राणानामनवसादमाकाङ्क्षमाण इभ्यं कुल्माषान् खादन्तं भिक्षमाणस्तेन च उच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरपि *एतेषां मे देहि* इत्युक्त्वा तेन चेभ्येनोच्छिष्टेभ्य आदाय दत्तान् कुल्माषान् प्रतिगृह्यानुपानप्रतिग्रहमिभ्येनार्थितः *उच्छिष्टं वै मे पीतं स्यात्* इति वदंश्चाक्रायणः, किमेते कुल्माषा अनुच्छिष्टा इति इभ्येन पर्यनुयुक्तः *न वा अजीविष्यमिमानखादन्...कामो म उदपानम्* इति कुल्माषाखादने स्वस्य प्राणसंशयापत्तेस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं कामकारितं निषिद्धं स्यादित्युक्त्वा स्वखादितशेषं जायायै दत्वा तया च रक्षितानपरेद्युर्याजनेनार्जिजीषया जिगमिषुः पुनरपि प्राणसंशयमापन्नस्तानेवेभ्योच्छिष्टान् स्वोच्छिष्टभूतान् पर्युषितांश्चखाद । अतो ब्रह्मविदामपि प्राणसंशय एव सर्वान्नानुमतिदर्शनादत्राविशेषेण कीर्तितमपि प्राणविदस्सर्वान्नीनत्वं प्राणात्ययापत्तावेवेति निश्चीयते ॥ २८ ॥

447 अबाधाच्च । ३ । ४ । २९ ॥

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः इति ब्रह्मविद्योत्पत्तावाहारशुद्धिविधानाबाधादपि ब्रह्मविदां सर्वान्नीनत्वमापद्विषयमवगम्यते । एवं ब्रह्मविदामतिशयितशक्तीनामपि सर्वान्नीनत्वस्यापद्विषयत्वात्प्राणविदोऽल्पशक्तेः सर्वान्नानुमतिरापद्विषयैव ॥ २९ ॥

448 अपि स्मर्यते । ३ । ४ । ३० ॥

अपि च आपद्विषयमेव सर्वान्नीनत्वं ब्रह्मविदामन्येषां च स्मर्यते-- *प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ इति ॥ ३० ॥

449 शब्दश्चातोऽकामकारे । ३ । ४ । ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेव; अत एव सर्वेषामकामकारे शब्दः— कामकारस्य प्रतिषेधकः शब्दो वर्तते । अस्ति हि कठानां संहितायां कामकारस्य प्रतिषेधकः शब्दः *तस्माद्ब्राह्मणस्सुरां न पिबति पाप्मना नोत्सृजा इति* इति । पाप्मना संस्पृष्टो न भवानीति मत्वा ब्राह्मणः सुरां न पिबतीत्यर्थः ॥ ३१ ॥ इति सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥

अथ विहितत्वाधिकरणम् ॥ ८ ॥

450 विहितत्वाच्चाश्रमकर्मापि । ३ । ४ । ३२ ॥

यज्ञादिकर्माङ्गिका ब्रह्मविद्येत्युक्तम्; तानि च यज्ञादीनि कर्माण्यमुमुक्षुणा केवलाश्रमिणाऽप्यनुष्ठेयानि, उत नेति चिन्तायां, विद्याङ्गानां सतां केवलाश्रमशेषत्वे नित्यानित्यसंयोगविरोधः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रसज्यत इति यज्ञादीनां केवलाश्रमधर्मत्वं न संभवति । इति प्राप्त उच्यते—आश्रमकर्मापीति । आश्रमस्य कर्मापि भवति । केवलाश्रमिणाऽपि अनुष्ठेयानीत्यर्थः । कुतः ? *यावज्जीवमग्निहोत्रं जुहोति* इत्यादिना विहितत्वात्—जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः ॥ ३२ ॥

तथा विद्याङ्गतया च *तमेतं वेदानुवचनेन* इत्यादिना विहितत्वाद्विद्याशेषतयाऽप्यनुष्ठेयानीत्याह—

451 सहकारित्वेन च । ३ । ४ । ३३ ॥

विद्योत्पत्तिद्वारेण विद्यासहकारितयाऽप्यनुष्ठेयानि । अग्निहोत्रादीनामिव जीवनाधिकारस्वर्गाधिकारवत् विनियोगपृथक्त्वेनोभयार्थत्वं न विरुध्यत इत्यर्थः ॥ ३३ ॥

तद्वदेव कर्मान्तरत्वमपि नास्तीत्याह—

452 सर्वथाऽपि त एवोभयलिङ्गात् । ३ । ४ । ३४ ॥

सर्वथा—विद्यार्थत्वे आश्रमार्थत्वेऽपि, त एव यज्ञादय इति प्रतिपत्तव्यम्; न कर्मस्वरूपभेद इत्यर्थः । कुतः ? उभयलिङ्गात्—उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य विनियोगात्, कर्मस्वरूपभेदे प्रमाणाभावाच्च ॥ ३४ ॥

453 अनभिभवं च दर्शयति । ३ । ४ । ३५ ॥

धर्मेण पापमपनुदति इत्यादिभिश्च तानेव यज्ञादिधर्मान्निर्दिश्य तैर्विद्याया अनभिभवं—पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति । अहरहरनुष्ठीयमानैर्हि यज्ञादिभिर्विशुद्धेऽन्तःकरणे प्रत्यहं प्रकृष्यमाणा विद्योत्पद्यते । अतस्त एवोभयत्र यज्ञादयः ॥३५॥ इति विहितत्वाधिकरणम् ॥ ८ ॥

अथ विधुराधिकरणम् ॥ ९ ॥

454 अन्तरा चापि तु तद्दृष्टेः । ३ । ४ । ३६ ॥

चतुर्णामाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति; विद्यासहकारिण आश्रमधर्मा इति चोक्तम् । ये पुनराश्रमानन्तरा वर्तन्ते विधुरादयः; तेषां ब्रह्मविद्यायामधिकारोऽस्ति, नवेति विशये; आश्रमधर्मेतिकर्तव्यताकत्वाद्विद्यायाः, अनाश्रमिणां चाश्रमधर्माभावान्नास्त्यधिकारः । इति प्राप्त उच्यते—अन्तराचापि त्विति । तुशब्दः पक्षव्यावृत्त्यर्थः । चशब्दोऽवधारणे । अन्तरा वर्तमानानाम्—अनाश्रमिणामपि विद्यायामधिकारोऽस्त्येव । कुतः ? तद्दृष्टेः—दृश्यते हि रैक्वभीष्मसंवर्तादीनामना-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रमिणामपि ब्रह्मविद्यानिष्ठत्वम् । नचाश्रमधर्मैरेव विद्यानुग्रह इति शक्यं वक्तुम्, *यज्ञेन दानेन तपसाऽनाशकेन* इति दानादीनामाश्रमेषु अनैकान्तिकानामप्यनुग्राहकत्वदर्शनात् । यथोर्ध्वरेतस्सु विद्यानिष्ठत्वदर्शनादग्निहोत्रादिव्यतिरिक्तैरेव विद्यानुग्रहः क्रियते; तथाऽनाश्रमिष्वपि विद्यादर्शनादाश्रमानियतैर्जपोपवासदानदेवताराधनादिभिर्विद्यानुग्रहश्शक्यते कर्तुम् ॥ ३६ ॥

455 अपि स्मर्यते । ३ । ४ । ३७ ॥

अपिच अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते *जप्येनापि च संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ इति । संसिध्येत्––जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः ॥ ३७ ॥

456 विशेषानुग्रहश्च । ३ । ४ । ३८ ॥

न केवलं न्यायस्मृतिभ्यामयमर्थस्साधनीयः; श्रूयते चानाश्रमनियतैर्धर्मविशेषैर्विद्यानुग्रहः *तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्येत् इति ॥ ३८ ॥

457 अतस्त्वितरज्ज्यायो लिङ्गाच्च । ३ । ४ । ३९ ॥

तुशब्दोऽवधारणे; अतः–अनाश्रमित्वात् इतरत्––आश्रमित्वमेव ज्यायः; अनाश्रमित्वमापद्विषयम् । शक्तस्य त्वाश्रमित्वमेवोपादेयमित्यर्थः; भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वात् । लिङ्गाच्च–स्मृतेरित्यर्थः । स्मर्यते च शक्तं प्रत्याश्रमस्योपादेयत्वम् *अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः* इत्यादिना । निवृत्तब्रह्मचर्यस्य मृतभार्यस्य च अवैराग्ये सति दारालाभ आपत् ॥ ३९ ॥
इति विधुराधिकरणम् ॥ ९ ॥

अथ तद्भूताधिकरणम् ॥ १० ॥

458 तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः । ३ । ४ । ४० ॥

नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्यायामधिकारोऽस्ति, नेति चिन्तायां, विधुरादिवदनाश्रमैकान्तैर्दानादिभिर्विद्यानुग्रहसंभवादस्त्यधिकारः । इति प्राप्त उच्यते–– तद्भूतस्य तु नातद्भाव इति । तुशब्दः पक्षव्यावृत्त्यर्थः । तद्भूतस्य––नैष्ठिकाद्याश्रमनिष्ठस्य, नातद्भावः––अतथाभावः, अनाश्रमित्वेनावस्थानं न संभवति; कुतः ? तद्रूपाभावेभ्यो नियमात्–– तद्रूपाणि-तेषां नैष्ठिकादीनां रूपाणि–वेषाः, धर्मा इत्यर्थः; तेषामभावाः–तद्रूपाभावाः; तेभ्यः शास्त्रैर्नियमात् । नैष्ठिकाद्याश्रमप्रविष्टान् स्वाश्रमधर्मनिवृत्तिभ्यो नियच्छन्ति हि शास्त्राणि *ब्रह्मचार्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

चार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्* इति, *अरण्यमियात्ततो न पुनरेयात्* इति, *संन्यस्याग्निं न पुनरावर्तयेत्* इतिच। अतो विधुरादिवत् नैष्ठिकादीनामनाश्रमित्वेनावस्थानासंभवान्न तानधिकरोति ब्रह्मविद्या; जैमिनेरपीत्यविगानं दर्शयन्नुक्तं स्वाभिमतं द्रढयति ॥ ४० ॥

अथ स्यात्——नैष्ठिकादीनां ब्रह्मचर्यात्प्रच्युतानां प्रायश्चित्तादधिकारस्संभवति। अस्ति च प्रायश्चित्तमधिकारलक्षणे निरूपितम् *अवकीर्णिपशुश्च तद्वत्* इति। अतः प्रच्युतब्रह्मचर्यस्य प्रायश्चित्तसंभवात्कृतप्रायश्चित्तो ब्रह्मविद्यायामधिकरिष्यतीति; तत्राह——

459 नचाधिकारिकमपि पतनानुमानात्तदयोगात्। ३। ४। ४१॥

आधिकारलक्षणोक्तमपि प्रायश्चित्तं नैष्ठिकादीनां तद्भ्रष्टानां न संभवति; कुतः? पतनानुमानात्तदयोगात्——नैष्ठिकादीनां प्रच्युतानां पतनस्मृतेस्तस्य प्रायश्चित्तस्यासंभवात्—— *आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥ इति। अतोऽधिकारलक्षणोक्तं प्रायश्चित्तमितरब्रह्मचारिविषयम् ॥ ४१ ॥

460 उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्। ३। ४। ४२॥

नैष्ठिकादीनां ब्रह्मचर्यप्रच्यवनमुपपूर्वम्—उपपातकम्, महापातकेष्वपरिगणितत्वादिति तत्र प्रायश्चित्तस्य भावं——विद्यमानतामप्येके आचार्या मन्यन्ते। अशनवत्——यथा मध्वशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानम्; तदुक्तं स्मृतिकारैः *उत्तरेषां चैतदविरोधि* इति। गुरुकुलवासिनो यदुक्तं, तत्स्वाश्रमाविरोध्युत्तरेषामप्याश्रमिणां भवतीत्यर्थः। तद्वदिहापि ब्रह्मचर्यप्रच्यवने प्रायश्चित्तसंभवाद्ब्रह्मविद्यायोग्यताऽप्यस्ति ॥ ४२ ॥

461 बहिस्तूभयथाऽपि स्मृतेराचाराच्च। ३। ४। ४३॥

तुशब्दो मतान्तरव्यावृत्त्यर्थः। उपपातकत्वे महापातकत्वेऽप्येते बहिर्भूता एव ब्रह्मविद्याधिकारिभ्यः; ब्रह्मविद्यायामनधिकृता इत्यर्थः। कुतः? स्मृतेः—पूर्वोक्तात् पतनस्मरणात्। यद्यपि कल्मषनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो विद्यते, तथापि कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न संभवति, *प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा* इति स्मृतेरित्यर्थः। आचाराच्च—शिष्टा हि नैष्ठिकादीन् भ्रष्टान् कृतप्रायश्चित्तानपि वर्जयन्ति, तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति; अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः ॥ ४३ ॥ इति तद्भूताधिकरणम् ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ स्वाम्यधिकरणम् ॥ ११ ॥

462 स्वामिनः फलश्रुतेरित्यात्रेयः । ३ । ४ । ४४ ॥

कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि किं यजमानकर्तृकाणि, उतर्त्विक्कर्तृकाणीति चिन्तायां यजमानकर्तृकाणीत्यात्रेयो मन्यते। कुतः? फलश्रुतेः—वेदान्तविहितेषु दहराद्युपासनेषु फलोपासनयोरेकाश्रयत्वदर्शनादिह च क्रतुफलाप्रतिबन्धरूपस्योद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः। न च गोदोहनादिवदङ्गाश्रयत्वेन यजमानकर्तृकत्वासंभवः; गोदोहनादिषु ह्यध्वर्युकर्तृकप्रणयनाश्रयगोदोहनोपादानमन्यन यम्; इह तूद्गातुकर्तृकेऽप्युद्गीथे तस्योद्गीथादेः रसतमत्वानुसन्धानं यजमानेनैव कर्तुं शक्यते ॥ ४४ ॥

इति प्राप्तेऽभिधीयते—

463 आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते । ३ । ४ । ४५ ॥

आर्त्विज्यम्—ऋत्विजः कर्मोद्गीथाद्युपासनमित्यौडुलोमिराचार्यो मन्यते; कुतः? तस्मै हि–प्रयोजनाय ऋत्विक्परिक्रियते; फलसाधनभूतस्य साङ्गस्य क्रतोरुपादानायेत्यर्थः। कर्मविधिषु *ऋत्विजो वृणीते *ऋत्विग्भ्यो दक्षिणां ददाति* इति ऋत्विक्कर्तृकत्वशास्त्रेण फलसाधनभूतं साङ्गं कर्म ऋत्विग्भिरनुष्ठेयमित्यवगम्यते; तदन्तर्गतानि कायिकानि मानसानि च कर्माणि ऋत्विक्कर्तृकाण्येव; नच शक्त्यशक्ती तस्य निबन्धनम्। यद्यप्युद्गीथाद्युपासनं पुरुषार्थः, तथापि क्रत्वधिकृताधिकारत्वात्क्रतोश्च साङ्गस्य ऋत्विक्कर्तृकत्वात्, *यदेव विद्यया करोति...तदेव वीर्यवत्तरम्* इति ऋत्विक्कर्तृकक्रियोपयोगित्वेन विद्यायास्तदेककर्तृकत्वश्रवणात्, ऋत्विक्कर्तृकाण्येतानि। दहरादिषूपासनेषु ऋत्विक्कर्तृकत्वाश्रवणात्, *शास्त्रफलं प्रयोक्तरि* इति न्यायाच्च फलिकर्तृकत्वमेव ॥ ४५ ॥

इति स्वाम्यधिकरणम् ॥ ११ ॥

अथ सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥

464 सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ३ । ४ । ४६ ॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः इत्यत्र बाल्यपाण्डित्यवन्मौनमपि विधीयते, उतानूद्यत इति विशये; मौनपाण्डित्यशब्दयोः ज्ञानार्थत्वात्, *पाण्डित्यं निर्विद्येति विहितमेव ज्ञानम् *अथ मुनिरित्यनूद्यते; विधिशब्दो न ह्यत्र श्रूयत इति ॥ एवं प्राप्ते ब्रूमः—सहकार्यन्तरविधिरिति तद्वतः-विद्यावतः; विध्यादिवत्-विधीयते इति यज्ञादिस्सर्वाश्रमधर्मः शमदमादिश्च विधिशब्देनोच्यते; आदिशब्देन श्रवणमनने गृह्येते; सहकार्यन्तरविधिरित्यत्रापि विधीयत इति विधिः, सहकार्यन्तरं विधिश्चेति सहकार्यन्तरविधिः। एतदुक्तं

Digitization by Arya Samaj Charitable Foundation, Chennai

भवति—यथा *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन* इत्यादिना *शान्तो दान्त इत्यादिना च सहकारी यज्ञादिश्शमदमादिश्च विधीयते; यथाच *श्रोतव्यो मन्तव्यः* इति श्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते; तथा *तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिना पाण्डित्यं, बाल्यं, मौनमिति त्रितयं विद्यायास्सहकार्यन्तरं विधीयत इति। मौनं च पाण्डित्यादर्थान्तरमित्याह—पक्षेणेति। मुनिशब्दस्य पक्षेण प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनात् मौनं पाण्डित्यबाल्ययोर्द्वयोस्तृतीयम्। यद्यपि *अथ मुनिरित्यत्र विधिप्रत्ययो न श्रूयते; तथापि मौनस्याप्राप्तत्वाद्विधेयत्वमङ्गीकरणीयम्—अथ मुनिस्स्यादिति। इदं च मौनं श्रवणप्रतिष्ठार्थान्मननादर्थान्तरभूतमुपासनालम्बनस्य पुनःपुनस्संशीलनं तद्भावनारूपम्।

तदेवं वाक्यार्थः—ब्राह्मणः-विद्यावान् पाण्डित्यं निर्विद्य-उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा, श्रवणमननाभ्यां प्राप्तं वेदनं प्रतिलभ्येत्यर्थः। तच्च भगवद्भक्तिसहकृतसत्त्वविवृद्धिकृतम्; यथोक्तं *नाहं वेदैः* इत्यारभ्य *भक्त्या त्वनन्यया शक्यः...ज्ञातुम्* इति। श्रुतिश्च *यस्य देवे परा भक्तिः *नायमात्मा प्रवचनेन* इत्यादिका। बाल्येन तिष्ठासेत्; बाल्यस्वरूपं चानन्तरमेव वक्ष्यते। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिस्स्यात्—बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि मननशीलो भवेत्, निदिध्यासनरूपविद्यावाप्तये। एवमेव त्रितयोपादानेन लब्धविद्यो भवतीत्याह *अमौनं च मौनं च निर्विद्याथ ब्राह्मणः* इति। अमौनं मौनेतरसहकारिकलापः, तं च मौनं च यथावदुपाददानो विद्याकाष्ठां तदेकनिष्पाद्यां लभेतेत्यर्थः। *स ब्राह्मणः केन स्यात्* इति उक्तादुपायात्किमन्योऽप्युपायोऽस्तीति पृष्टे *येन स्यात्तेनेदृश एव* इति, येन मौनपर्यन्तेन ब्राह्मणस्स्यादित्युक्तम्, तेनैवेदृशस्स्यात्; न केनाप्यन्येनोपायेनेति परिहृतम्। अतस्सर्वेष्वाश्रमेषु स्थितस्य विदुषो यज्ञादिस्वाश्रमधर्मवत्पाण्डित्यादिकं मौनतृतीयं विद्यायास्सहकार्यन्तरं विधीयते। ॥ ४६ ॥

अथ स्यात्—यदि सर्वेष्वाश्रमेषु स्थितानां विदुषां तत्तदाश्रमधर्मसहकारिणी मौनतृतीयसचिवा विद्या ब्रह्मप्राप्तिसाधनमुच्यते; कथं तर्हि च्छान्दोग्ये *अभिसमावृत्य कुटुम्बे शुचौ देशे* इत्यारभ्य *स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते* इति यावदायुषं गार्हस्थ्यधर्मेण स्थितिदर्शनमुपपद्यते? अत आह—

465 कृत्स्नभावात्तु गृहिणोपसंहारः। ३। ४। ४७॥

तुशब्दश्चोद्यं व्यावर्तयति; कृत्स्नभावात्-कृत्स्नेषु भावात्, कृत्स्नेष्वाश्रमेषु विद्यायास्सद्भावात् गृहिणोऽप्यस्तीति तेनोपसंहारः; तस्मात्सर्वाश्रमधर्मप्रदर्शनार्थो गृहिणोपसंहार इत्यभिप्रायः। ॥ ४७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तथैतस्मिन्नपि वाक्ये *ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरति* इति पारिव्राज्यैकान्तधर्मं प्रतिपाद्य *तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिना पारिव्राज्यधर्मस्थितिहेतुकमौनतृतीयसहकारिविधानं प्रदर्शनार्थमित्याह—

466 मौनवदितरेषामप्युपदेशात् । ३ । ४ । ४८ ॥

सर्वैषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशः सर्वेषामाश्रमधर्माणां प्रदर्शनार्थः; कुतः ? एवं विधमौनोपदेशवदितरेषामाश्रमिणामपि *त्रयो धर्मस्कन्धाः* इत्यारभ्य *ब्रह्मसंस्थोऽमृतत्वमेति* इति ब्रह्मप्राप्त्युपदेशात् । उपपादितश्च पूर्वमेव ब्रह्मसंस्थशब्दः सर्वाश्रमिसाधारण इति । अतस्सुष्टूक्तं—यज्ञादिसर्वाश्रमधर्मवन्मौनतृतीयः पाण्डित्यादिर्विद्यासहकारित्वेन विधीयत इति । ॥ ४८ ॥ इति सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥

अथ अनाविष्काराधिकरणम् ॥ १३ ॥

467 अनाविष्कुर्वन्नन्वयात् । ३ । ४ । ४९ ॥

*तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदित्यत्र विदुषा बाल्यमुपादेयतया श्रुतम् । बालस्य भावः, कर्म वा बाल्यम् । बालभावस्य वयोवस्थाविशेषस्यानुपादेयत्वात्कर्मैवेह गृह्यते । तत्र किं बालस्य कर्म कामचारादिकं सर्वं विदुषोपादेयम्, उत डम्भादिरहितत्वमेवेति विशये विशेषाभावात्सर्वमुपादेयम्; नियमशास्त्राणि च विशेषविधिनाऽनेन बाध्यन्त इति ॥ एवं प्राप्तेऽभिधीयते—अनाविष्कुर्वन्निति । बालस्य यत्स्वभावानाविष्काररूपं कर्म; तदुपाददानो वर्तेत विद्वान् । कुतः ? अन्वयात्— तस्यैवान्वयात् । *बाल्येन तिष्ठासेत्* इत्यस्मिन्विधौ तस्यैव ह्यन्वयसंभवः; इतरेषां विद्याविरोधित्वश्रवणात् *नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ *आहारशुद्धौ सत्त्वशुद्धिः* इत्यादिषु ॥ ४९ ॥ इति अनाविष्काराधिकरणम् ॥ १३ ॥

अथ ऐहिकाधिकरणम् ॥ १४ ॥

468 ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् । ३ । ४ । ५० ॥

द्विविधा विद्या—अभ्युदयफला, मुक्तिफला च । तत्राभ्युदयफला स्वसाधनभूतैः पुण्यकर्मभिः पुण्यकर्मानन्तरमेव उत्पद्यते, उतानन्तरं कालान्तरे वेत्यनियम इति संशयः । पूर्वकृतैः पुण्यकर्मभिर्हि विद्वान् जायते; यथोक्तं भगवता *चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन* इति । साधने निर्वृत्ते विलम्बहेत्वभावादनन्तरमेव । इति प्राप्त उच्यते—ऐहिकमप्रस्तुतप्रतिबन्ध इति । ऐहिकम्—अभ्युदयफलमुपासनम्, अप्रस्तुतप्रतिबन्धे-अप्रस्तुते-प्रबलकर्मान्तरप्रतिबन्धेऽसत्यनन्तरम्, प्रतिबन्धे

Digitization by Arya Samaj Charitable Foundation, Chennai

सति तदुत्तरकालमित्यनियमः । कुतः ? तद्दर्शनात्-दृश्यते हि प्रबलकर्मान्तरेण कर्मफलप्रतिबन्धाभ्युपगमः श्रुतौ *यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्* इत्युद्गीथविद्यायुक्तस्य कर्मणः फलाप्रतिबन्धश्रवणात् ॥ ५० ॥ इति ऐहिकाधिकरणम् ॥ १४ ॥

अथ मुक्तिफलाधिकरणम् ॥ १५ ॥

469 एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः । ३ । ४ । ५१ ॥

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्मभिरुत्पत्तावेवमेव कालानियमः, तस्यापि पूर्ववत्प्रतिबन्धाभावप्रतिबन्धसमाप्तिरूपावस्थावगतेः-अत्रापि तस्य हेतोस्समानत्वादित्यर्थः ॥ सर्वेभ्यः कर्मभ्यो मुक्तिफलविद्यासाधनस्य कर्मणः प्रबलत्वात्प्रतिबन्धासंभव इत्यधिकाशङ्का ॥ तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां संभवात्प्रतिबन्धसंभव इति परिहारः । द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ ५१ ॥ इति मुक्तिफलाधिकरणम् ॥ १५ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥ ३ ॥

श्रीमते रामानुजाय नमः

चतुर्थाध्याये—प्रथमः पादः—आवृत्त्यधिकरणम् ॥ १ ॥

470 आवृत्तिरसकृदुपदेशात् । ४ । १ । १ ॥

तृतीयेऽध्याये साधनैस्सह विद्या चिन्तिता । अथेदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते । तत्र *ब्रह्मविदाप्नोति परम् *तमेव विदित्वाऽतिमृत्युमेति *ब्रह्म वेद ब्रह्मैव भवति *यदा पश्यः पश्यते रुक्मवर्णम्* इत्यादिवेदान्तवाक्येषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः, उतासकृदावृत्तमिति संशयः । किं युक्तम् ? सकृत्कृतमिति; कुतः ? *ब्रह्म वेद ब्रह्मैव भवति* इति वेदनमात्रस्यैव विधानात्, असकृदावृत्तौ प्रमाणाभावात् । नचावघातादिवद्वेदनस्य ब्रह्मापरोक्ष्यं प्रति दृष्टोपायत्वाद्यावत्कार्यमावृत्तिरिति शक्यं वक्तुम्; वेदनस्य दृष्टोपायत्वाभावात् । ज्योतिष्टोमादिकर्माणि, वेदान्तविहितं च वेदनं परमपुरुषाराधनरूपम्, आराधिताच्च परमपुरुषाद्धर्मार्थकाममोक्षाख्यपुरुषार्थावाप्तिरिति हि *फलमत उपपत्तेरित्यत्र प्रतिपादितम् । अतो ज्योतिष्टोमादिवद्यथाशब्दं सकृत्कृतमेव शास्त्रार्थः ।

इति प्राप्ते प्रचक्ष्महे—आवृत्तिरसकृदिति । असकृदावृत्तमेव वेदनं शास्त्रार्थः; कुतः ? उपदेशात्—ध्यानोपासनपर्यायेण वेदनशब्देनोपदेशात् । तत्पर्यायत्वं च विद्युपास्तिध्यायतीनामेक-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्मिन्विषये वेदनोपदेशपरवाक्येषु प्रयोगादवगम्यते । तथाहि *मनो ब्रह्मेत्युपासीत* इत्युपासिनोपक्रान्तोऽर्थः *भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद* इति विदिनोपसंह्रियते । तथा *यस्तद्वेद यत्स वेद स मयैतदुक्तः* इत्युपक्रमे विदिनोक्तं रैक्वस्य ज्ञानम् *अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से* इत्युपासिनोपसंह्रियते । तथा *ब्रह्मविदाप्नोति परम्* इत्यादिवाक्यसमानार्थेषु वाक्येषु *आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः *ततस्तु तं पश्यति निष्कलं ध्यायमानः* इत्यादिषु ध्यायतिना वेदनमभिधीयते । ध्यानं च चिन्तनम् । चिन्तनं च स्मृतिसन्ततिरूपम्; न स्मृतिमात्रम् । उपास्तिरपि तदेकार्थः, एकाग्रचित्तवृत्तिनैरन्तर्ये प्रयोगदर्शनात् । तदुभयैकार्थ्यात् असकृदावृत्तसन्ततस्मृतिरिह *ब्रह्म वेद ब्रह्मैव भवति *ज्ञात्वा देवं मुच्यते सर्वपाशैः* इत्यादिषु वेदनादिशब्दैरभिधीयत इति निश्चीयते ॥ १ ॥

471 लिङ्गाच्च । ४ । १ । २ ॥

लिङ्गं-स्मृतिः । स्मृतेश्चायमर्थोऽवगम्यते । स्मर्यते हि मोक्षसाधनभूतं वेदनं स्मृतिसन्ततिरूपं *तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा । तद्ध्यानं प्रथमैष्षड्भिरङ्गैर्निष्पाद्यते तथा ॥ इति । तस्मादसकृदावृत्तमेव वेदनं शास्त्रार्थः ॥ २ ॥ इति आवृत्त्यधिकरणम् ॥ १॥

अथ आत्मत्वोपासनाधिकरणम् ॥ २ ॥

472 आत्मेति तूपगच्छन्ति ग्राहयन्ति च । ४ । १ । ३ ॥

इदमिदानीं चिन्त्यते--किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्यम्, उतोपासितुरात्मत्वेनेति । किं युक्तम् ? अन्यत्वेनेति । कुतः ? उपासितुः प्रत्यगात्मनोऽर्थान्तरत्वात् ब्रह्मणः । अर्थान्तरत्वं च *अधिकं तु भेदनिर्देशात् *अधिकोपदेशात् *नेतरोऽनुपपत्तेः* इत्यादिषूपपादितम् । यथावस्थितं च ब्रह्मोपास्यम्; अयथोपासने हि ब्रह्मप्राप्तिरप्ययथाभूता स्यात्, *यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति* इति न्यायात् । अतोऽन्यत्वेनोपास्यमिति ॥

एवं प्राप्तेऽभिधीयते--आत्मेति त्विति । तुशब्दोऽवधारणे । उपासितुरात्मेत्येवोपास्यम्, उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथा आत्मा; तथा स्वात्मनोऽपि परं ब्रह्मात्मेत्येवोपासीतेत्यर्थः । कुतः ? एवं ह्युपगच्छन्ति पूर्वे उपासितारः *त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि* इति । उपासितुरर्थान्तरभूतं ब्रह्मोपासितारोऽहमिति कथमभ्युपगच्छन्तीत्यत्राह--ग्राहयन्ति चेति । इममर्थमविरुद्धमुपासितॄन् ग्राहयन्ति शास्त्राणि--तान् प्रत्युपपादयन्तीत्यर्थः । *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः* इति; तथा *सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वम् *सर्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

खल्विदं ब्रह्म तज्जलानिति* इति च सर्वस्य चिदचिद्वस्तुनस्तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियाम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्मा; अतस्स त आत्मा। अतो यथा प्रत्यगात्मनस्स्वशरीरं प्रत्यात्मत्वात् देवोऽहं मनुष्योऽहमित्यनुसन्धानम् ; तथा प्रत्यगात्मनोऽप्यात्मत्वात्परमात्मनस्तस्याप्यहमित्येवानुसन्धानं युक्तमिति । एवं शास्त्रैरुपपादितं सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छन्तः *त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते* इति व्यतिकरेणोक्तवन्तः । एवं च *अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद *अकृत्स्नो ह्येष आत्मेत्येवोपासीत *सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद* इत्यात्मत्वाननुसन्धाननिषेधः, *पृथगात्मानं प्रेरितारं च मत्वा* इति पृथक्त्वानुसन्धानविधानं चाविरुद्धम् । अहमिति स्वात्मतयाऽनुसन्धानादन्यत्वानुसन्धाननिषेधो रक्षितः । स्वशरीरात्स्वात्मनोऽधिकत्वानुसन्धानवत्स्वात्मनोऽपि परमात्मनोऽधिकत्वानुसन्धानात्पृथक्त्वानुसन्धानविधानं च रक्षितम् । अधिकस्य ब्रह्मणः प्रत्यगात्मन आत्मत्वात्तस्य च ब्रह्मशरीरत्वान्निषेधवाक्ये *अकृत्स्नो ह्येषः* इत्युक्तम्। अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितम् ॥ ३ ॥ इति आत्मत्वोपासनाधिकरणम् ॥२॥

अथ प्रतीकाधिकरणम् ॥ ३ ॥

473 न प्रतीके न हि सः । ४ । १ । ४ ॥

*मनो ब्रह्मेत्युपासीत *स यो नाम ब्रह्मेत्युपास्ते* इत्यादिप्रतीकोपासनेष्वप्यात्मत्वानुसन्धानं कार्यम्, उत नेति चिन्तायां *मनो ब्रह्मेत्युपासीतेति ब्रह्मोपासनत्वसाम्याद्ब्रह्मणश्चोपासितुरात्मत्वादात्मेत्येवोपासीतेति ॥ एवं प्राप्तेऽभिधीयते—न प्रतीक इति । प्रतीके नात्मत्वानुसन्धानं कार्यम्; न हि सः—नह्युपासितुरात्मा प्रतीकः । प्रतीकोपासनेषु प्रतीक एवोपास्यः, न ब्रह्म । ब्रह्म तु तत्र दृष्टिविशेषणमात्रम् । प्रतीकोपासनं हि नाम अब्रह्मणि ब्रह्मदृष्टयाऽनुसन्धानम् ; तत्रोपास्यस्य प्रतीकस्योपासितुरात्मत्वाभावान्न तथाऽनुसन्धेयम् ॥ ४ ॥

नन्वत्रापि ब्रह्मैवोपास्यम्; ब्रह्मण उपास्यत्वसंभवे मनआदीनामचेतनानामल्पशक्तीनां चोपास्यत्वाश्रयणस्यान्याय्यत्वात् । अतो मनआदिदृष्टया ब्रह्मैवोपास्यमिति; अत आह—

474 ब्रह्मदृष्टिरुत्कर्षात् । ४ । १ । ५ ॥

मनआदिषु ब्रह्मदृष्टिरेव युक्ता, न ब्रह्मणि मनआदिदृष्टिः; ब्रह्मणो मनआदिभ्य उत्कर्षात् ; तेषां च विपर्ययात् । उत्कृष्टे हि राजनि भृत्यदृष्टिः प्रत्यवायकरी; भृत्ये तु राजदृष्टिरभ्युदयाय । ॥ ५ ॥ इति प्रतीकाधिकरणम् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ आदित्यादिमत्यधिकरणम् ॥ ४॥

475 आदित्यादिमतयश्चाङ्ग उपपत्तेः । ४ । १ । ६ ॥

य एवासौ तपति तमुद्गीथमुपासीत इत्यादिषु कर्माङ्गाश्रयेषूपासनेषु संशयः—किमुद्गीथादौ कर्माङ्गे आदित्यादिदृष्टिः कर्तव्या, उतादित्यादिषूद्गीथादिदृष्टिरिति । उत्कृष्टदृष्टिर्निकृष्टे कर्तव्येति न्यायात्, उद्गीथादीनां च फलसाधनभूतकर्माङ्गत्वेनाफलेभ्य आदित्यादिभ्यः उत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिः ॥ इति प्राप्तेऽभिधीयते—आदित्यादिमतयश्चाङ्ग इति । चशब्दोऽवधारणे । क्रत्वङ्गे उद्गीथादावादित्यादिदृष्टय एव कार्याः; कुतः ? उपपत्तेः-आदित्यादीनामेवोत्कृष्टत्वोपपत्तेः । आदित्यादिदेवताराधनद्वारेण हि कर्मणामपि फलसाधनत्वम्; अतस्तद्दृष्टिरुद्गीथाद्यङ्गे ॥ ६ ॥

इति आदित्यादिमत्यधिकरणम् ॥ ४॥

अथ आसीनाधिकरणम् ॥ ५ ॥

476 आसीनस्संभवात् । ४ । १ । ७ ॥

मोक्षसाधनतया वेदान्तशास्त्रैर्विहितं ज्ञानं ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं सन्ततस्मृतिरूपमित्युक्तम् । तदनुतिष्ठन्नासीनश्शयानस्तिष्ठन् गच्छंश्च विशेषाभावादनियमेनानुतिष्ठेत् ॥ इति प्राप्त उच्यते—आसीन इति । आसीनः उपासनमनुतिष्ठेत्; कुतः ? संभवात्—आसीनस्यैव ह्येकाग्रचित्ततासंभवः; स्थितिगत्योः प्रयत्नसापेक्षत्वात्, शयने च निद्रासंभवात् । पश्चार्धधारणप्रयत्ननिवृत्तये सापाश्रये आसीनः कुर्यात् ॥ ७ ॥

477 ध्यानाच्च । ४ । १ । ८ ॥

निदिध्यासितव्यः इति ध्यानरूपत्वादुपासनस्य, एकाग्रचित्तताऽवश्यंभाविनी । ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनमित्युक्तम् ॥ ८ ॥

478 अचलत्वं चापेक्ष्य । ४ । १ । ९ ॥

निश्चलत्वं चापेक्ष्य पृथिव्यन्तरिक्षादिषु ध्यानवाचोयुक्तिर्दृश्यते *ध्यायतीव पृथिवी, ध्यायतीवान्तरिक्षं, ध्यायतीव द्यौः, ध्यायन्तीवापो, ध्यायन्तीव पर्वताः* इति । अतः पृथिवीपर्वतादिवदेकाग्रचित्ततया निश्चलत्वमुपासकस्यासीनस्यैव संभवेत् ॥ ९ ॥

479 स्मरन्ति च । ४ । १ । १० ॥

स्मरन्ति चासीनस्यैव ध्यानं *शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं

Digitization by Arya Samaj Charitable Foundation, Chennai

नातिनीचं चेलाजिनकुशोत्तरम् । तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ इति ॥ १० ॥

480 यत्रैकाग्रता तत्राविशेषात् । ४ । १ । ११ ॥

एकाग्रतातिरिक्तदेशकालविशेषाश्रवणादेकाग्रतानुकूलो यो देशः कालश्च, स एवोपासनस्य देशः कालश्च । *समे शुचौ शर्करावह्निवालुकाविवर्जिते *इति वचनमेकाग्रतैकान्तदेशमाह; न तु देशं नियच्छति, *मनोऽनुकूले *इति वाक्यशेषात् ॥ ११ ॥ इति आसीनाधिकरणम् ॥ ५ ॥

अथ आप्रयाणाधिकरणम् ॥ ६ ॥

481 आप्रयाणात्तत्रापि हि दृष्टम् । ४ । १ । १२ ॥

तदिदमपवर्गसाधनमुक्तलक्षणमुपासनमेकाह एव संपाद्यम्, उताप्रयाणात्प्रत्यहमनुवर्तनीयमिति विशये, एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयम् । इति प्राप्त उच्यते— आप्रयाणादिति । आमरणादनुवर्तनीयम्; कुतः ? तत्रापि हि दृष्टम्—उपासनोद्योगप्रभृत्याप्रयाणान्मध्ये यः कालः, तत्र सर्वत्रापि दृष्टमुपासनं *स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते* इति ॥ ॥ १२ ॥ इति आप्रयाणाधिकरणम् ॥ ६ ॥

अथ तदधिगमाधिकरणम् ॥ ७ ॥

482 तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् । ४ । १ । १३ ॥

एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभते; ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयेते *तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते *तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन* इत्युत्तराघाश्लेषः, *तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते *क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे* इति पूर्वाघविनाशः । एतावश्लेषविनाशौ विद्याफलभूतावुपपद्येते, नेति संशयः । किं युक्तम् ? नोपपद्येते इति । कुतः ? *नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि* इत्यादिशास्त्रविरोधात् । अश्लेषविनाशव्यपदेशस्तु मोक्षसाधनभूतविद्याविधायिवाक्यशेषगतः कथञ्चिद्विद्यास्तुतिप्रतिपादनेनाप्युपपद्यते । न च विद्या पूर्वोत्तराघयोः प्रायश्चित्ततया विधीयते; येन प्रायश्चित्तेनाघविनाश उच्यते । विद्या हि *ब्रह्मविदाप्नोति परम् *ब्रह्म वेद ब्रह्मैव भवति* इति ब्रह्मप्राप्त्युपायतया विधीयते । अतो विद्यार्थवादोऽयमघविनाशाश्लेषव्यपदेश इति ॥

एवं प्राप्तेऽभिधीयते—तदधिगम इति । विद्याप्राप्तौ पुरुषस्य विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशावुपपद्येते; कुतः ? एवंविधं हि विद्यामाहात्म्यमवगम्यते *एवंविदि पापं कर्म न श्लिष्यते

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं हास्य सर्वे पाप्मानः प्रदूयन्ते इत्यादिव्यपदेशात्। न च *नाभुक्तं क्षीयते कर्म* इत्यनेन शास्त्रेणास्य विरोधः, भिन्नविषयत्वात्। तद्धि कर्मणां फलजननसामर्थ्यद्रढिमविषयम्; एतत्तूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यमुत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते। यथा अग्निजलयोरौष्ण्यतन्निवारणसामर्थ्यविषययोर्द्वयोः प्रमाणयोरपि विषयभेदात्प्रामाण्यम्; एवमत्रापीति न कश्चिद्विरोधः। अघस्याश्लेषकरणं-वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम्। अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां, सजातीयकर्मान्तरारम्भरुचिं, प्रत्यवायं च कुर्वन्ति। अघस्य विनाशकरणम्—उत्पन्नायास्तच्छक्तेर्विनाशकरणम्। शक्तिरपि परमपुरुषाप्रीतिरेव। तदेवं विद्या वेदितुर्वेद्यात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया सती वेद्यभूतपरमपुरुषाराधनस्वरूपा पूर्वकृताघसञ्चयजनितपरमपुरुषाप्रीतिं विनाशयति; सैव विद्या स्वोत्पत्त्युत्तरकालभाव्यघनिमित्तपरमपुरुषाप्रीत्युत्पत्तिं च प्रतिबध्नाति। तदिदमश्लेषवचनं प्रामादिकविषयं मन्तव्यम्; *नाविरतो दुश्चरितात्* इत्यादिभिश्शास्त्रैराप्रयाणादहरहरुत्पद्यमानाया उत्तरोत्तरातिशयभागिन्याः विद्यायाः दुश्चरितविरतिनिष्पाद्यत्वावगमात्॥ १३॥ इति तदधिगमाधिकरणम्॥ ७॥

अथ इतराधिकरणम्॥ ८॥

483 इतरस्याप्येवमसंश्लेषः पाते तु। ४। १। १४॥

उत्तरपूर्वाघयोर्विद्यया अश्लेषविनाशावुक्तौ। इतरस्य—पुण्यस्यापि, एवम्—उक्तेन न्यायेनाश्लेषविनाशौ विद्यया स्याताम्, विद्याफलविरोधित्वसामान्याद्व्यपदेशाच्च। भवति च व्यपदेशः उभे सुकृतदुष्कृते निर्दिश्य *सर्वे पाप्मानोऽतो निवर्तन्ते* इति, *तत्सुकृतदुष्कृते धूनुते* इति च। मुमुक्षोरनिष्टफलत्वात्सुकृतस्यापि पाप्मशब्देन व्यपदेशः। सुकृतस्यापि शास्त्रीयत्वात्तत्फलस्य केषांचिदिष्टत्वदर्शनाच्च विद्यया अविरोधशङ्कां निवर्तयितुमतिदेशः। ननु विदुषोऽपि सेतिकर्तव्यताकोपासननिर्वृत्तये वृष्टयन्नादिफलानीष्टान्येव; कथं तेषां विरोधाद्विनाश उच्यते? तत्राह—पाते त्विति। शरीरपाते तु तेषां विनाशः; शरीरपातादूर्ध्वं तु विद्यानुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः॥१४॥
इति इतराधिकरणम्॥ ८॥

अथ अनारब्धकार्याधिकरणम्॥ ९॥

484 अनारब्धकार्ये एव तु पूर्वे तदवधेः। ४। १। १५॥

ब्रह्मविद्योत्पत्तेः पूर्वोत्तरभाविनोस्सुकृतदुष्कृतयोरश्लेषविनाशावुक्तौ; ततः पूर्वभाविनोः सुकृतदुष्कृतयोः किमविशेषेण विनाशः, उतानारब्धकार्ययोरेवेति विशये, *सर्वे पाप्मानः प्रदूयन्ते* इति विद्याफलस्याविशेषश्रवणाद्विद्योत्पत्त्युत्तरकालभाविन्याश्च शरीरस्थितेः कुलालचक्रभ्रमणादिवत्सं-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्कारवशादप्युपपत्तेरविशेषेण । इति प्राप्ते उच्यते—अनारब्धकार्ये एव तु पूर्वे इति । विद्योत्पत्तेः पूर्वे सुकृतदुष्कृते अनारब्धकार्ये—अप्रवृत्तफले एव विद्यया विनश्यतः । कुतः ? तदवधेः— *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये* इति शरीरपातविलम्बावधिश्रुतेः । न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति ॥ १५ ॥ इति अनारब्धकार्याधिकरणम् ॥ ९ ॥

अथ अग्निहोत्राद्यधिकरणम् ॥ १० ॥

485 अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । ४ । १ । १६ ॥

*इतरस्याप्येवमसंश्लेष इति विद्याबलात्सुकृतस्याप्यसंश्लेष उक्तः । अग्निहोत्रादीनां नित्यनैमित्तिकानां स्वाश्रमधर्माणामपि सुकृतत्वसामान्येन तत्फलस्याश्लेषादनिच्छतोऽननुष्ठाने प्राप्त उच्यते—अग्निहोत्रादि त्विति । तुशब्दस्सुकृतान्तरेभ्यो विशेषणार्थः । अग्निहोत्राद्याश्रमधर्माः फलाश्लेषासंभवादनुष्ठेया एव । तदसंभवश्च तत्कार्यार्थत्वात्तेषाम् । विद्याख्यकार्यायैव हि विदुषोऽग्निहोत्राद्यनुष्ठानम् । कथमिदमवगम्यते ? तद्दर्शनात्; दृश्यते हि *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन* इत्यादिनाऽग्निहोत्रादीनां विद्यासाधनत्वम् । विद्यायाश्चाप्रयाणादभ्यासाधेयातिशयाया अहरहरुत्पाद्यत्वात्तदुत्पत्त्यर्थमाश्रमकर्माप्यहरहरनुष्ठेयमेव । अन्यथाऽऽश्रमकर्मलोपे दूषितान्तःकरणस्य विद्योत्पत्तिरेव न स्यात् ॥ १६ ॥

यदि अग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्थाः, विद्योत्पत्तेः प्राचीनं च सुकृतं *यावत्संपातमुषित्वा *प्राप्यान्तं कर्मणः* इत्यनुभवेन विनष्टम्; भुक्तशिष्टं च प्रारब्धफलम्; *सुहृदस्साधुकृत्यामित्यस्य को विषयः ? तत्राह—

486 अतोऽन्यापि ह्येकेषामुभयोः । ४ । १ । १७ ॥

अतः—अग्निहोत्रादिसाधुकृत्यायाः विद्योत्पत्त्यर्थायाः अन्याऽपि विद्याधिगमात्पूर्वोत्तरयोरुभयोरपि पुण्यकर्मणोः प्रबलकर्मप्रतिबद्धफला साधुकृत्याऽनन्ता संभवत्येव; तद्विषयमिदमेकेषां शाखिनां वचनं *तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यामिति । विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया ॥ १७ ॥

अनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसंभवं पूर्वोक्तं स्मारयति—

487 यदेव विद्ययेति हि । ४ । १ । १८ ॥

यदेव विद्यया करोति...तदेव वीर्यवत्तरम् इत्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्धफलत्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

वचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धस्सूच्यते हि । अतो विदुषोऽनुष्ठितप्रतिबद्धफलविषयं *सुहृदस्साधुकृत्यामिति शाट्यायनिकम् ॥ १८ ॥ इति अग्निहोत्राद्यधिकरणम् ॥ १० ॥

अथ इतरक्षपणाधिकरणम् ॥ ११ ॥

488 भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते । ४ । १ । १९ ॥

ययोः पुण्यपापयोरश्लेषविनाशावुक्तौ, ताभ्यामितरे आरब्धकार्ये पुण्यपापे किं विद्यायोनिशरीरावसाने, उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशये, *तस्य तावदेव चिरं यावन्न विमोक्ष्ये* इति तच्छरीरविमोक्षावसानत्वश्रवणात्तदवसाने । इति प्राप्त उच्यते––भोगेन त्विति । तुशब्दः पक्षव्यावृत्त्यर्थः । इतरे-आरब्धकार्ये पुण्यपापे स्वारब्धफलभोगेन क्षपयित्वा तत्फलभोगसमाप्त्यनन्तरं ब्रह्म संपद्यते । ते च पुण्यपापे एकशरीरोपभोग्यफले चेत्, तच्छरीरावसाने संपद्यते; अनेकशरीरभोग्यफले चेत्, तदवसाने संपद्यते; भोगेनैव क्षपयितव्यत्वादारब्धफलयोः कर्मणोः । *तस्य तावदेव चिरं यावन्न विमोक्ष्ये* इति च भोगेन तयोः कर्मणोः विमोक्ष उच्यते, देहावधिनियमाश्रवणात् । तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादिकालसंचितमनन्तं विद्यामाहात्म्याद्विनश्यति; विद्यारम्भोत्तरकालमनुष्ठितं च न श्लिष्यति; तत्र पुण्यरूपं सर्वं विदुषस्सुहृदो गृह्णन्ति, पापं च द्विषन्त इति निरवद्यम् ॥१९॥ इति इतरक्षपणाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

श्रीमते रामानुजाय नमः

चतुर्थाध्याये—द्वितीयः पादः—वागधिकरणम् ॥ १ ॥

489 वाङ्मनसि दर्शनाच्छब्दाच्च । ४ । २ । १ ॥

इदानीं विदुषो गतिप्रकारं चिन्तयितुमारभते । प्रथमं तावदुत्क्रान्तिश्चिन्त्यते । तत्रेदमाम्नायते *अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्* इति । अत्र *वाङ्मनसि संपद्यते इति वाचो मनसि संपत्तिश्रुतिः किं वाग्वृत्तिमात्रविषया, उत वाग्विषयेति विशये; वृत्तिमात्रविषयेति युक्तम् । कुतः ? मनसो वाक्प्रकृतित्वाभावात्तत्र वाक्स्वरूपसंपत्त्यसंभवात् । वागादिवृत्तीनां मनोधीनत्वेन वृत्तिसंपत्तिश्रुतिः कथंचिदुपपद्यत इति ॥ एवं प्राप्तेऽभिधीयते––वाङ्मनसीति । वाक्स्वरूपमेव मनसि संपद्यते । कुतः ? दर्शनात्–दृश्यते हि वागिन्द्रिय उपरतेऽपि मनःप्रवृत्तिः । वृत्तिमात्रसंपत्त्याऽपि तदुपपद्यत इति चेत्, तत्राह––शब्दाच्चेति । *वाङ्मनसि संपद्यत इति वाक्स्वरूपसंपत्तावेव हि शब्दः; न वृत्तिमात्रसंपत्तौ । नहि तदानीं वृत्त्युपरमे

Digitization by Arya Samaj Charitable Foundation, Chennai

वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते; येन वृत्तिमात्रमेव संपद्यत इत्युच्येत। यदुक्तं मनसो वाक्प्रकृतित्वाभावाद्वाचो मनसि संपत्तिर्नोपपद्यत इति; तत्, *वाङ्मनसि संपद्यत इति वचनात् मनसा वाक्संयुज्यते, नतु तत्र लीयत इति परिहर्तव्यम् ॥ १ ॥

490 अत एव सर्वाण्यनु । ४ । २ । २ ॥

यतो वाचो मनसा संयोगमात्रं संपत्तिः; न तु लयः; अत एव वाचमनु सर्वेषामिन्द्रियाणां मनसि संपत्तिश्रुतिरुपपद्यते *तस्मादुपशान्ततेजा (अ) पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः* इति ॥ २ ॥
इति वागधिकरणम् ॥ १ ॥

अथ मनोऽधिकरणम् ॥ २ ॥

491 तन्मनः प्राण उत्तरात् । ४ । २ । ३ ॥

तत्—सर्वेन्द्रियसंयुक्तं मनः प्राणे संपद्यते—प्राणेन संयुज्यते; न मनोवृत्तिमात्रम्। कुतः? उत्तरात्—*मनः प्राणे* इति वाक्यात् ॥ अधिकाशङ्का तु—*अन्नमयं हि सोम्य मनः इति वचनान्मनसोऽन्नप्रकृतित्वमवगम्यते; अन्नस्य च *ता अन्नमसृजन्त* इत्यम्मयत्वं सिद्धम्, *आपोमयः प्राणः* इति चाप्प्रकृतित्वं प्राणस्यावगम्यते, अतो मनः प्राणे संपद्यत इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता अपो निर्दिश्य तासु मनस्संपत्तिप्रतिपादने परम्परया स्वकारणे लय इति संपत्तिवचनमुपपन्नं भवतीति ॥ परिहारस्तु *अन्नमयं हि सोम्य मनः, आपोमयः प्राणः* इति मनःप्राणयोरन्नेनाद्भिश्चाप्यायनमुच्यते, न तत्प्रकृतित्वम्; आहङ्कारिकत्वान्मनसः, आकाशविकारत्वाच्च प्राणस्य। प्राणशब्देनापां लक्षणा च स्यादिति ॥ ३ ॥ इति मनोऽधिकरणम् ॥ २ ॥

अथ अध्यक्षाधिकरणम् ॥ ३ ॥

492 सोऽध्यक्षे तदुपगमादिभ्यः । ४ । २ । ४ ॥

यथा *वाङ्मनसि संपद्यते, मनः प्राणे* इति वचनानुरोधेन मनःप्राणयोरेव वाङ्मनसयोस्संपत्तिः; तथा *प्राणस्तेजसि* इति वचनात्तेजस्येव प्राणस्संपद्यते। इति प्राप्त उच्यते—सोऽध्यक्षे इति। सः-प्राणः, अध्यक्षे-करणाधिपे जीवे संपद्यते। कुतः? तदुपगमादिभ्यः-प्राणस्य जीवोपगमस्तावच्छ्रूयते *एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति* इति। तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते *तमुत्क्रामन्तं प्राणोऽनूत्क्रामति* इति। प्रतिष्ठा च जीवेन सह श्रूयते *कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि* इति। एवं जीवेन संयुज्य तेन सह तेजस्संपत्तिरिह *प्राणस्तेजसि* इत्युच्यते; यथा यमुनायाः गङ्गया संयुज्य सागरगमनेऽपि यमुना सागरं गच्छतीति वचो न विरुध्यते, तद्वत् ॥४॥ इति अध्यक्षाधिकरणम् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ भूताधिकरणम् ॥ ४ ॥

493 भूतेषु तच्छ्रुतेः । ४ । २ । ५ ॥

*प्राणस्तेजसीति जीवसंयुक्तस्य प्राणस्य तेजसि संपत्तिरुक्ता; सा संपत्तिः किं तेजोमात्रे, उत संहतेषु सर्वेषु भूतेष्विति विशये तेजोमात्रश्रवणात्तेजसि । इति प्राप्त उच्यते—भूतेष्विति । भूतेषु संपद्यते । कुतः ? तच्छ्रुतेः *पृथिवीमयः आपोमयः...तेजोमयः* इति जीवस्य सञ्चरतस्सर्वभूतमयत्वश्रुतेः ॥ ५ ॥

ननु तेजःप्रभृतिष्वेकैकस्मिन् क्रमेण संपत्तावपि *पृथिवीमय इत्यादिका श्रुतिरुपपद्यते, अत आह—

494 नैकस्मिन् दर्शयतो हि । ४ । २ । ६ ॥

नैकस्मिन्, एकैकस्य कार्याक्षमत्वात् । दर्शयतो ह्यक्षमत्वं श्रुतिस्मृती *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि* इति नामरूपव्याकरणयोग्यत्वाय त्रिवृत्करणमुपदिश्यते । *नानावीर्याः पृथग्भूताः ततस्ते संहतिं विना । नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः । समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥ इति । अतः *प्राणस्तेजसीति तेजश्शब्देन भूतान्तरसंसृष्टमेव तेजोऽभिधीयते । अतो भूतेष्वेव संपत्तिः ॥ ६ ॥ इति भूताधिकरणम् ॥ ४ ॥

अथ आसृत्युपक्रमाधिकरणम् ॥ ५ ॥

495 समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य । ४ । २ । ७ ॥

इयमुत्क्रान्तिः किं विद्वदविदुषोस्समाना, उताविदुष एवेति चिन्तायाम्, अविदुष एवेति प्राप्तम् । कुतः ? विदुषोऽत्रैवामृतत्ववचनादुत्क्रान्त्यभावात् । विदुषो ह्यत्रैवामृतत्वं श्राव्यते— *यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ इति ॥ एवं प्राप्तेऽभिधीयते—समाना चासृत्युपक्रमादिति । विदुषोऽप्यासृत्युपक्रमादुत्क्रान्तिस्समाना । आसृत्युपक्रमात्—आगत्युपक्रमात्, नाडीप्रवेशात्प्रागित्यर्थः । विदुषोऽपि हि नाडीविशेषेणोत्क्रम्य गतिः श्रूयते— *शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ इति । एवं नाडीविशेषेण गतिश्रवणाद्विदुषोऽप्युत्क्रान्तिरवर्जनीया । सा च नाडीप्रवेशात्प्राग्विशेषाश्रवणात्समाना । तत्प्रवेशदशायां च विशेषः श्रूयते *तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः* इति । *शतं चैका च हृदयस्येत्यनया श्रुत्यैकार्थ्यान्मूर्ध्नो निष्क्रमणं विद्वद्विषयम्; इतरदविद्वद्विषयम् । यदुक्तं विदुषोऽत्रैवामृतत्वं श्राव्यत इति;

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्रोच्यते--अमृतत्वं चानुपोष्येति । चशब्दोऽवधारणे । अनुपोष्य—शरीरेन्द्रियादिसंबन्धमदग्ध्वैव, यदमृतत्वम्--उत्तरपूर्वाघयोरश्लेषविनाशरूपं प्राप्यते; तदुच्यते *यदा सर्वे प्रमुच्यन्ते* इत्यादिकया श्रुत्येत्यर्थः । *अत्र ब्रह्म समश्नुत इति च उपासनवेलायां यो ब्रह्मानुभवः; तद्विषयमित्यभिप्रायः ॥ ॥ ७ ॥

496 तदापीतेस्संसारव्यपदेशात् । ४ । २ । ८ ॥

अवश्यं च तत्—अमृतत्वमदग्धदेहसंबन्धस्यैवेति विज्ञेयम् । कुतः ? आपीतेः संसारव्यपदेशात्—अपीतिः—अप्ययः, ब्रह्मप्राप्तिः । सा चार्चिरादिना मार्गेण देशविशेषं गत्वेति वक्ष्यते । आतदवस्थाप्राप्तेः संसारः देहसंबन्धलक्षणो हि व्यपादिश्यते— *तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये* इति, *अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि ॥ इति च ॥ ८ ॥

497 सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । ४ । २ । ९ ॥

इतश्च विदुषोऽपि बन्धो नात्र दग्धः; यतस्सूक्ष्मं शरीरमनुवर्तते । कुत इदमवगम्यते ? प्रमाणतस्तथोपलब्धेः—उपलभ्यते हि देवयानेन पथा गच्छतो विदुषः *तं प्रतिब्रूयात् *सत्यं ब्रूयात् *इति चन्द्रमसा संवादवचनेन शरीरसद्भावः । अतस्सूक्ष्मशरीरमनुवर्तते । अतश्च बन्धो न दग्धः ॥ ९ ॥

498 नोपमर्देनातः । ४ । २ । १० ॥

अतः *यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ इति वचनं न बन्धोपमर्देनामृतत्वं वदति ॥ १० ॥

499 अस्यैव चोपपत्तेरूष्मा । ४ । २ । ११ ॥

अस्य—सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेर्विदुषः प्रक्रान्तमरणस्य मरणात्प्रागूष्मा स्थूले शरीरे क्वाचित्क उपलभ्यते । नच स्थूलस्यैव शरीरस्यायमूष्मा, अन्यत्रानुपलब्धेः । ततश्चोष्मणः क्वचिदुपलब्धिर्विदुषस्सूक्ष्मशरीरस्योत्क्रान्तिनिबन्धनेति गम्यते । तस्माद्विदुषोऽप्यासृत्युपक्रमात्समानोत्क्रान्तिरिति सुष्ठूक्तम् ॥ ११ ॥

पुनरपि विदुष उत्क्रान्तिर्न संभवतीत्याशङ्क्य परिह्रियते—

Digitization by Arya Samaj Charitable Foundation, Chennai

500 प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् । ४ । २ । १२ ॥

यदुक्तं विदुषोऽप्युत्क्रान्तिस्समानेति; तन्नोपपद्यते, विदुष उत्क्रान्तिप्रतिषेधात् । तथाहि *स एतास्तेजोमात्रास्समभ्याददानो हृदयमेवान्ववक्रामति* इत्युपक्रम्य *तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति* इत्यविदुष उत्क्रान्तिप्रकारमभिधाय *अन्यन्नवतरं कल्याणतरं रूपं कुरुते* इति देहान्तरपरिग्रहं चाभिधाय *प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम्, तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे इति तु कामयमानः* इत्यविद्वद्विषयं परिसमाप्य *अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति* इति विदुष उत्क्रान्तिः प्रतिषिध्यते । तथा पूर्वत्र आर्तभागप्रश्नेऽपि विदुष उत्क्रान्तिप्रतिषेधो दृश्यते *अप पुनर्मृत्युं जयति* इति विद्वांसं प्रस्तुत्य *याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो न* इति पृष्टः *नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते स उच्छ्वयत्याध्मातो मृतः शेते* इति । अतो विद्वानिहैवामृतत्वं प्राप्नोतीति चेत्; तन्न । शारीरात्-प्रत्यगात्मनः प्राणानामुत्क्रान्तिर्ह्यत्र प्रतिषिध्यते, न शरीरात् । *न तस्य प्राणा उत्क्रामन्तीत्यत्र तच्छब्देन *अथाकामयमान इति प्रकृतश्शारीर एव परामृश्यते; नाश्रुतं शरीरम् । *तस्येति षष्ठ्या प्राणानां संबन्धित्वेन शारीरो निर्दिष्टः; नतूत्क्रान्त्यपादानत्वेन । उत्क्रान्त्यपादानं तु शरीरमेवेति चेन्न, अपादानापेक्षायामश्रुताच्छरीरात्संबन्धितया श्रुतस्यात्मन एव सन्निहितत्वेनापादानतयाऽपि ग्राह्यत्वात् । किञ्च प्राणानां जीवसंबन्धितयैव प्रज्ञातानां तत्संबन्धकथने प्रयोजनाभावात्संबन्धमात्रवाचिन्या षष्ठ्या अपादानमेव विशेष इति निश्चीयते; यथा नटस्य श्रुणोतीति । नचात्र विवदितव्यम्; स्पष्टो ह्येकेषां—माध्यन्दिनानामाम्नाये शारीरो जीव एवापादानमिति *योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति* इति । शारीरात्प्राणानामुत्क्रान्तिप्रसङ्गाभावात्तन्निषेधो नोपपद्यत इति चेन्न, *तस्य तावदेव चिरम्* इति विदुषश्शरीरवियोगकाले ब्रह्मसंपत्तिवचनेन प्राणानामपि तस्मिन् काले शारीराद्विदुषो वियोगः प्रसज्यते; ततश्च देवयानेन पथा ब्रह्मसंपत्तिर्नोपपद्यत इति *न तस्य प्राणा उत्क्रामन्ति—देवयानेन पथा ब्रह्मप्राप्तेः प्राग्जीवाद्विदुषोऽपि प्राणा न विश्लिष्यन्तीत्युच्यते । आर्तभागप्रश्नोऽपि यदा विद्वद्विषयः, तदा अयमेव परिहारः । स त्वविद्वद्विषयः, तत्र प्रश्नप्रतिवचनयोः ब्रह्मविद्याप्रसङ्गादर्शनात् । तत्र हि ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावः, अपामग्न्यन्नत्वं, म्रियमाणस्य जीवस्य प्राणपरित्यागः, मृतस्य नामवाच्यकीर्त्यनुवृत्तिः, तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्थाः प्रश्नपूर्वकं प्रत्युक्ताः । तत्र च *अप पुनर्मृत्युं जयतीति अपामग्न्यन्नत्वज्ञानादग्निजय एव मृत्युजय उच्यते । अतो नात्र विदुषः प्रसङ्गः । अविदुषस्तु प्राणानुत्क्रान्तिवचनं, स्थूलदेहवत्प्राणा न मुञ्चन्ति, अपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयतीति निरवद्यम् ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

501 स्मर्यते च । ४ । २ । १३ ॥

स्मर्यते च विदुषोऽपि मूर्धन्यनाड्योत्क्रान्तिः *ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ इति ॥१३॥ इति आसृत्युपक्रमाधिकरणम् ॥ ५ ॥

अथ परसंपत्त्यधिकरणम् ॥ ६ ॥

502 तानि परे तथा ह्याह । ४ । २ । १४ ॥

सकरणग्रामः सप्राणः करणाध्यक्षः प्रत्यगात्मा उत्क्रान्तिवेलायां तेजःप्रभृतिभूतसूक्ष्मेषु संपद्यत इत्युक्तम् । सैषा संपत्तिर्विदुषो न विद्यत इत्याशङ्क्य परिहृतम् । तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथाकर्म यथाविद्यं च स्वकार्याय गच्छन्ति, उत परमात्मनि संपद्यन्त इति विशये मध्ये परमात्मसंपत्तौ सुखदुःखोपभोगरूपकार्यादर्शनात्, तदुपभोगानुगुण्येन यथाकर्म यथाविद्यं च गच्छन्ति । इति प्राप्त उच्यते—तानि परे इति । तानि परस्मिन्नात्मनि संपद्यन्ते; कुतः ? तथा ह्याह श्रुतिः— *तेजः परस्यां देवतायाम्* इति । यथाह श्रुतिस्तदनुगुणं कार्यं कल्प्यमित्यर्थः । सुषुप्तिप्रलययोर्यथा परमात्मसंपत्त्या सुखदुःखोपभोगायासविश्रमः; तद्वदिहापि॥१४॥ इति परसंपत्त्यधिकरणम् ॥६॥

अथ अविभागाधिकरणम् ॥ ७ ॥

503 अविभागो वचनात् । ४ । २ । १५ ॥

सेयं परमात्मनि संपत्तिः किं प्राकृतलयवत्कारणापत्तिरूपा, उत *वाङ्मनसि* इत्यादिवदविभागरूपेति चिन्तायां, परमात्मनस्सर्वेषां योनिभूतत्वात्कारणापत्तिरूपा । इति प्राप्त उच्यते—अविभाग इति । अपृथग्भावः-पृथग्व्यवहारानर्हसंसर्ग इत्यर्थः । कुतः ? वचनात्—*तेजः परस्यां देवतायामित्यत्रापि *वाङ्मनसि संपद्यत इत्यतस्संपद्यत इति वचनस्यानुषङ्गात्, तस्य च संसर्गविशेषवाचित्वात्, अनुषक्तस्याभिधानवैरूप्ये प्रमाणाभावात्, उत्क्रान्तिवेलायां कारणापत्तिप्रयोजनाभावात् पुनस्तत्राव्यक्तादिसृष्ट्यवचनाच्च ॥ १५ ॥ इति अविभागाधिकरणम् ॥ ७ ॥

अथ तदोकोधिकरणम् ॥ ८ ॥

504 तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया । ४ । २ । १६ ॥

एवं गत्युपक्रमावधि विद्वदविदुषोस्समानाकार उत्क्रान्तिप्रकार उक्तः; इदानीं विदुषो विशेष उच्यते । तत्रेदमाम्नायते— *शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ इति । अनया नाडीनां शताधिकया मूर्धन्यनाड्यैव विदुषो गमनम्, अन्याभिरेव चाविदुषो गमनमित्ययं नियम उपपद्यते, नेति संशयः । किं युक्तम्? नियमो नोपपद्यत इति । कुतः? नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेचतया पुरुषेणोपादातुमशक्यत्वात् । *तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति यादृच्छिकीमुत्क्रान्तिमनुवदतीति युक्तमिति ॥ एवं प्राप्ते प्रचक्ष्महे—शताधिकयेति । विद्वान् शताधिकया मूर्धन्ययैव नाड्योत्क्रामति । नचास्याः विदुषो दुर्विवेचत्वम्; विद्वान् हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्याद्विद्याशेषभूततयाऽऽत्मनोऽत्यर्थप्रियगत्यनुस्मरणयोगाच्च प्रसन्नेन हार्देन परमपुरुषेणानुगृहीतो भवति; ततश्च तदोकः-तस्य-जीवस्य स्थानं हृदयम्, अग्रज्वलनं भवति-अग्रे ज्वलनं प्रकाशनं यस्य, तदिदमग्रज्वलनम् परमपुरुषप्रसादात्प्रकाशितद्वारो विद्वान् तां नाडीं विजानातीति तया विदुषो गतिरुपपद्यते ॥ १६ ॥ इति तदोकोधिकरणम् ॥ ८ ॥

अथ रश्म्यनुसाराधिकरणम् ॥ ९ ॥

505 रश्म्यनुसारी । ४ । २ । १७ ॥

विदुषो हृदयाच्छताधिकया मूर्धन्यनाड्या निर्गतस्यादित्यरश्मीननुसृत्यादित्यमण्डलगतिः श्रूयते—*अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते* इति । तत्र रश्म्यनुसारेणैवेत्ययं गतिनियमस्संभवति, नेति चिन्तायाम्, निशि मृतस्य विदुषो रश्म्यनुसारासंभवादनियमः । वचनं तु पक्षप्राप्तविषयम् ॥ इति प्राप्त उच्यते—रश्म्यनुसारीति । रश्म्यनुसार्येव विद्वानूर्ध्वं गच्छति । कुतः? *अथैतैरेव रश्मिभिरित्यवधारणात्; पाक्षिकत्वे ह्येवकारोऽनर्थकस्स्यात् । यदुक्तं निशि मृतस्य रश्म्यसंभवाद्रश्मीननुसृत्य गमनं नोपपद्यत इति; तन्न, निश्यपि सूर्यरश्म्यनुसारस्संभवति । लक्ष्यते हि निश्यपि निदाघसमये ऊष्मोपलब्ध्या रश्मिसद्भावः । हेमन्तादौ तु हिमाभिभवाद्दुर्दिन इवोष्मानुपलम्भः । श्रूयते च नाडीरश्मीनां सर्वदाऽन्योन्यान्वयः—*तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं च एवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं च अमुष्मादादित्यात्प्रतायन्ते त आसु नाडीषु सृप्ताः आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः* इति । तस्मान्निश्यपि रश्मिसंभवान्निशि मृतानामपि विदुषां रश्म्यनुसारेणैव ब्रह्मप्राप्तिरस्त्येव ॥ १७ ॥ इति रश्म्यनुसाराधिकरणम् ॥ ९ ॥

अथ निशाधिकरणम् ॥ १० ॥

506 निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च । ४ । २ । १८ ॥

इदमिदानीं चिन्त्यते—विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति, नेति । यद्यपि निशायां सूर्यरश्मिसंभवाद्रश्म्यनुसारेण गतिर्निशायामपि संभवति; तथापि निशामरणस्य शास्त्रेषु गर्हितत्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्परमपुरुषार्थलक्षणब्रह्मप्राप्तिर्निशामृतस्य न संभवति । शास्त्रेषु दिवामरणं प्रशस्तम्, विपरीतं निशामरणं—*दिवा च शुक्लपक्षश्च उत्तरायणमेव च । मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम् ॥ इति । दिवामरणनिशामरणयोः प्रशस्तत्वविपरीतत्वे चोत्तमाधमगतिहेतुत्वेन स्याताम् । अतो निशि मरणमधोगतिहेतुत्वान्न ब्रह्मप्राप्तिहेतुरिति चेत्; तन्न, विदुषः कर्मसंबन्धस्य यावद्देहभावित्वात् । एतदुक्तं भवति—अनारब्धकार्याणामधोगतिहेतुभूतानां कर्मणां विद्यासंबन्धेनैव विनाशादुत्तरेषां चाश्लेषात्प्रारब्धकार्यस्य च चरमदेहावधित्वाद्बन्धहेत्वभावाद्विदुषो निशामृतस्यापि ब्रह्मप्राप्तिस्सिद्धैव । दर्शयति च श्रुतिः *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये* इति । *दिवा च शुक्लपक्षश्चेत्यादिवचनमविद्वद्विषयम् ॥ १८ ॥ इति निशाधिकरणम् ॥ १० ॥

अथ दक्षिणायनाधिकरणम् ॥ ११ ॥

507 अतश्चायनेऽपि दक्षिणे । ४ । २ । १९ ॥

निशि मृतस्यापि विदुषो ब्रह्मप्राप्तौ यो हेतुरुक्तः, तत एव हेतोर्दक्षिणेऽप्ययने मृतस्य ब्रह्मप्राप्तिस्सिद्धा ॥ अधिकाशङ्का तु *अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति* इति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणात् चन्द्रं प्राप्तानां च *तेषां यदा तत्पर्यवैत्यथैतमेवाध्वानं पुनर्निवर्तन्ते* इति पुनरावृत्तिश्रवणात्, भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनाद्दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न संभवतीति ॥ परिहारस्तु—अविदुषां पितृयाणेन पथा चन्द्रं प्राप्तानामेव पुनरावृत्तिः, विदुषस्तु चन्द्रं प्राप्तस्यापि *तस्माद्ब्रह्मणो महिमानमाप्नोति* इति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिः ब्रह्म प्रेपित्सतो विश्रमहेतुमात्रमिति गम्यते । वाक्यशेषाभावेऽपि पूर्वोक्तादेव बन्धहेत्वभावात् विदुषश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या । भीष्मादीनां योगप्रभावात् स्वच्छन्दमरणानां धर्मप्रवर्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थस्तथाविधाचारः ॥ १९ ॥

ननु च विदुषो मुमूर्षून् प्रति पुनरावृत्त्यपुनरावृत्तिहेतुत्वेन कालविशेषविधिर्दृश्यते
*यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥
अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ इति । तत्राह—

508 योगिनः प्रति स्मर्येते स्मार्ते चैते । ४ । २ । २० ॥

नात्र मुमूर्षून् प्रति मरणकालविशेषोपादानं स्मर्यते; अपितु योगिनः—योगनिष्ठान् प्रति स्मार्ते-स्मृतिविषयभूते-स्मर्तव्ये देवयानपितृयाणाख्ये गती स्मर्येते योगाङ्गतयाऽनुदिनं स्मर्तुम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा ह्युपसंहारः *नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ इति। *अग्निर्ज्योतिः *धूमो रात्रिरिति च देवयानपितृयाणे प्रत्यभिज्ञायेते। उपक्रमे च *यत्र काले त्विति कालशब्दः कालाभिमानिदेवतातिवाहिकपरः, अग्न्यादेः, कालत्वासंभवात्। अतः *तेऽर्चिषमभिसंभवन्ति* इति विहितदेवयानानुस्मृतिरत्र विद्यानिष्ठान् प्रति विधीयते, न मुमूर्षून् प्रति मरणकालविशेषः ॥ २० ॥ इति दक्षिणायनाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीशारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

श्रीमते रामानुजाय नमः

चतुर्थाध्याये — तृतीयः पादः— अर्चिराद्यधिकरणम् ॥ १ ॥

509 अर्चिरादिना तत्प्रथितेः। ४। ३। १॥

विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुग्रहाद्गत्युपक्रम उक्तः। तस्य गच्छतो मार्ग इदानीं निर्णीयते। तत्र श्रुतिषु मार्गप्रकाराः बहुधा आम्नायन्ते। छान्दोग्ये तावत् *यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते* इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नायते *अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदुच न अर्चिषमेवाभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः- स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते* इति। तथाऽत्रैनाष्टमेकौ रश्मिभिरूर्ध्वमाक्रमते* इति। कौषीतकिनश्च देवयानमार्गमन्यथाऽधीयते *स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्* इति। तथा बृहदारण्यके *य एवमेतद्विदुर्ये चेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतात्पुरुषोऽमानवस्स एत्य ब्रह्मलोकान् गमयति* इति। तत्रैव पुनरन्यथा *यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा आडम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्* इत्यादि ॥ तत्र संशयः— किमर्चिरादिरेक एव मार्ग आभिश्श्रुतिभिः प्रतिपाद्यत इति, तेनैव ब्रह्म गच्छति विद्वान्? उत तस्मादन्येऽन्यत्र मार्गा इति, तैर्वाऽनेन वेत्यनियमः? इति। किं युक्तम्? अनियम इति। कुतः? अनेकरूपत्वान्नैरपेक्ष्याच्चेति ॥

एवं प्राप्तेऽभिधीयते— अर्चिरादिनेति। अर्चिरादिरेक एव मार्गस्सर्वत्र प्रतिपाद्यते। अतोऽर्चिरादिनैव गच्छति। कुतः? तत्प्रथितेः— तस्यैव सर्वत्र प्रथितेः। प्रथितिः— प्रसिद्धिः, तस्यैव

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वत्र प्रत्यभिज्ञानादित्यर्थः। प्रत्यभिज्ञानात्स एव मार्गस्सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्रोक्तानामन्यत्रोपसंहारः क्रियते। छान्दोग्ये तावदुपकोसलविद्यायां पञ्चाग्निविद्यायां चैकरूप एवाम्नायते। वाजसनेयके च पञ्चाग्निविद्यायां तथैवार्चिरादिः अल्पान्तर आम्नायते; अतस्तत्रापि स एवेति प्रतीयते। अन्यत्रापि सर्वत्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ॥ १ ॥

इति अर्चिराद्यधिकरणम् ॥ १ ॥

अथ वाय्वधिकरणम् ॥ २ ॥

510 वायुमब्दादविशेषविशेषाभ्याम्। ४। ३। २॥

अर्चिरादिनैव गच्छन्ति विद्वांस इत्युक्तम्। तत्रार्चिरादिके मार्गे छन्दोगाः मासादित्ययोरन्तराले संवत्सरमधीयते— *मासेभ्यस्संवत्सरं संवत्सरादादित्यमिति। वाजसनेयिनस्तु तयोरेवान्तराले देवलोकं *मासेभ्यो देवलोकं देवलोकादादित्यमिति। उभयत्रापि मार्गस्यैकत्वादुभावुभयत्रोपसंहार्यौ। तत्र मासादूर्ध्वमभिहितयोस्संवत्सरदेवलोकयोः पञ्चम्याऽभिहितस्य श्रौतक्रमस्य तुल्यत्वेऽपि *अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तानित्यधिककालानां न्यूनकालेभ्य उत्तरोत्तरत्वेन निवेशदर्शनात्संवत्सरस्यैव मासादनन्तरं बुद्धौ विपरिवृत्तेः संवत्सर एव मासादूर्ध्वं निवेशयितव्य इति तत ऊर्ध्वं देवलोक इति निश्चीयते। अन्यत्र वाजसनेयिनः *यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति* इत्यादित्यात्पूर्वं वायुमधीयते। कौषीतकिनस्तु *स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकमित्यग्निलोकशब्दनिर्दिष्टादर्चिषः परं वायुमधीयते। तत्र कौषीतकिनां पाठक्रमेणार्चिषः परत्वेन प्राप्तस्य वायोर्वाजसनेयिनां *तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छतीत्यूर्ध्वशब्दनिर्दिष्टश्रौतक्रमेण पाठक्रमाद्बलीयसा आदित्यात्पूर्वं प्रवेशो निश्चीयते। अत आदित्यात्पूर्वं संवत्सरादूर्ध्वं देवलोको वायुश्च प्राप्तौ। तत्रेदं चिन्त्यते—किं देवलोको वायुश्चार्थान्तरभूतौ यथेष्टक्रमेण विद्वानभिगच्छेत्, उतानर्थान्तरत्वेन संवत्सरादूर्ध्वं देवलोकं सन्तं वायुमभिगच्छेदिति। किं युक्तम्? भिन्नार्थत्वम्, प्रसिद्धेः। भिन्नार्थत्वे चोर्ध्वशब्देन पञ्चम्या चोभयोस्संवत्सरादित्यान्तराले श्रुतिक्रमेण प्राप्तत्वात्, विशेषाभावाच्च यथेष्टम्।

इति प्राप्त उच्यते—वायुमब्दादिति। वायुं संवत्सरादूर्ध्वमभिगच्छेत्। कुतः? अविशेषविशेषाभ्यां वायोरेव निर्दिष्टत्वात्। देवलोकशब्दो हि अविशेषेण—सामान्येन, देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते। *स वायुमागच्छति तस्मै स तत्रेति वायुशब्दो विशेषेण वायुमभिधत्ते। अतो देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायुरेवाभिधीयत इति संवत्सरादूर्ध्वं वायुमेवाभिगच्छेत्। कौषीतकिनां वायुलोकशब्दश्चाग्निलोकशब्दवत् वायुश्चासौ लोकश्चेति व्युत्पत्त्या वायुमेवाभिधत्ते। वायुश्च देवानामावासभूत इत्यन्यत्र श्रूयते *योऽयं पवत एष एव देवानां गृहाः* इति ॥ २ ॥ इति वाय्वधिकरणम् ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ वरुणाधिकरणम् ॥ ३ ॥

511 तटितोऽधि वरुणस्संबन्धात् । ४ । ३ । ३ ॥

कौषीतकिनां *स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमित्यात्राग्निलोकशब्दस्यार्चिःपर्यायत्वेन प्राथम्यमविगीतम् । वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः । आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन *देवलोकादादित्यमादित्याद्वैद्युतमिति वाजसनेयकोक्तश्रुतिक्रमाद्देवलोकशब्दाभिहिताद्वायोरुपरि निवेशस्सिद्धः। इदानीं वरुणेन्द्रादिषु चिन्ता। किमेते वरुणादयो यथापाठं वायोरूर्ध्वं निवेशयितव्याः आहोस्विद्विद्युतोऽधीति विशये, अर्चिःप्रभृतिषु सर्वेषु *अर्चिषोऽहरित्यादिश्रुतिक्रमोपरोधाद्विद्युतः परस्ताच्च *तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति* इति विद्युत्पुरुषस्य ब्रह्मगमयितृत्वश्रवणाच्च सर्वत्रावकाशाभावेनाप्राप्तौ च उपदेशावैयर्थ्यायावश्यं कस्यचिद्वाध्यत्वे पाठक्रमानुरोधेन वायोरनन्तरं वरुणो निवेशयितव्यः। वाय्वादित्ययोः क्रमस्य बाधितत्वेनेन्द्रप्रजापती अपि ह्यत्रैव निवेशयितव्यौ॥

इति प्राप्त उच्यते—तटितोऽधि वरुण इति । वरुणस्तावद्विद्युत उपरिष्टान्निवेशयितव्यः । कुतः ? संबन्धात्—मेघोदरवर्तित्वाद्विद्युतो वरुणेन संबन्धो लोकवेदयोः प्रसिद्धः । एतदुक्तं भवति—वरुणादीनामुपदेशावैयर्थ्याय क्वचिन्निवेशयितव्यत्वे सति पाठक्रमादर्थक्रमस्य बलीयस्त्वाद्विद्युतोऽधि वरुणो निवेशयितव्यः। ततश्चामानवस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते। तस्य च व्यवधानसहत्वादिन्द्रादेश्चोपदिष्टस्यावश्यनिवेशयितव्यस्य वरुणादुपर्युपदिष्टत्वादागन्तूनामन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादिर्निवेशयितव्य इति ॥ ३ ॥ इति वरुणाधिकरणम् ॥ ३ ॥

अथ आतिवाहिकाधिकरणम् ॥ ४ ॥

512 आतिवाहिकास्तल्लिङ्गात् । ४ । ३ । ४ ॥

इदमिदानीं चिन्त्यते--किमर्चिरादयो मार्गचिह्नभूताः, उत भोगभूमयः, अथवा विदुषां ब्रह्म प्रेप्सतामतिवोढार इति । किं तावद्युक्तम् ? मार्गचिह्नभूता इति । कुतः ? उपदेशस्य तथाविधत्वात् । दृश्यते हि लोके ग्रामादीन् प्रति गन्तॄणामेवंविधो देशिकैरुपदेशः—इतो निष्क्रम्यामुकं वृक्षममुकां नदीममुकं च पर्वतपार्श्वं गत्वाऽमुकं ग्रामं गच्छेति । अथवा, भोगभूमय एतास्स्युः, कालविशेषतया प्रसिद्धानामहरादीनां मार्गचिह्नत्वानुपपत्तेरन्यस्य च मार्गचिह्नभूतस्यैतेषामनभिधायकत्वात् । भोगभूमित्वं च *एत एव लोका यदहोरात्राण्यर्धमासा मासा ऋतवस्संवत्सराः* इत्यहरादीनां लोकत्ववचनादुपपद्यते । अत एव च कौषीतकिनः *अग्निलोकमागच्छति* इत्यादिना लोकशब्दानुविधानेनार्चिरादीन् पठन्तीति ॥ एवं प्राप्ते ब्रूमः—आतिवाहिका इति । विदुषामतिवाहे परमपुरुषेण नियुक्ताः आतिवाहिकाः देवताविशेषा एतेऽर्चिरादयः । कुतः ? तल्लिङ्गात्—अतिवहन-

Digitization by Arya Samaj Charitable Foundation, Chennai

लिङ्गात् । अतिवहनं हि गन्तॄणां गमयितृत्वम् । गमयितृत्वं च *तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति* इत्युपसंहारे श्रूयमाणं पूर्वेषामप्यविशेषश्रुतानां स एव संबन्ध इति गमयति । वदन्ति चार्चिरादयश्शब्दाः अर्चिराद्यात्मभूतानभिमानिदेवताविशेषान् ; *तं पृथिव्यब्रवीत्* इतिवत् ॥४॥

यद्येवं *तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयतीति वैद्युतस्यैव पुरुषस्य ब्रह्मगमयितृत्वश्रुतेर्विद्युतः परेषां वरुणादीनां कथमातिवाहिकत्वेनान्वय इत्यत्राह——

513 वैद्युतेनैव ततस्तच्छ्रुतेः । ४ । ३ । ५ ॥

ततः—विद्युत उपरि, वैद्युतेन—अमानवेनैवातिवाहिकेन विदुषामाब्रह्मप्राप्तेर्गमनम् । कुतः ? तच्छ्रुतेः *स एनान् ब्रह्म गमयतीति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्त्वनुग्राहका इति तेषामप्यातिवाहिकत्वेनान्वयो विद्यत एव ॥ ५ ॥ इति आतिवाहिकाधिकरणम् ॥ ४ ॥

अथ कार्याधिकरणम् ॥ ५ ॥

514 कार्यं बादरिरस्य गत्युपपत्तेः । ४ । ३ । ६ ॥

अर्चिरादिनैव गच्छति विद्वान् ; अर्चिरादिरमानवान्तश्च गण आतिवाहिको विद्वांसं ब्रह्म गमयतीत्युक्तम् । इदमिदानीं चिन्त्यते । किमयमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयति ? उत परमेव ब्रह्मोपासीनान् ? अथ परं ब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्च ? इति विशये, कार्यमुपासीनानेव गमयतीति बादरिराचार्यो मन्यते । कुतः ? अस्य—हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः । न हि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते, प्राप्तत्वादेव । नित्यप्राप्तपरब्रह्मविषयाविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यम् । कार्यं तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थं गमनमुपपद्यते । अतोऽर्चिरादिरातिवाहिकगणस्तमेव नयति ॥ ६ ॥

515 विशेषितत्वाच्च । ४ । ३ । ७ ॥

*पुरुषोमानस एत्य ब्रह्मलोकान्गमयतीति लोकशब्देन बहुवचनेन च लोकविशेषवर्तिनं हिरण्यगर्भमुपासीनमेवामानवो गमयतीति विशेष्यते । किञ्च *प्रजापतेस्सभां वेश्म प्रपद्ये* इति कार्यस्य हिरण्यगर्भस्य समीपगमनमर्चिरादिना गतः प्रत्यभिसंधत्ते ॥ ७ ॥

नन्वेवं *तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति* इत्ययं निर्देशो नोपपद्यते ; हिरण्यगर्भनयने हि *स एतान् ब्रह्माणं गमयतीति निर्देष्टव्यं स्यात् । अत आह—

Digitization by Arya Samaj Charitable Foundation, Chennai

516 सामीप्यात्तु तद्व्यपदेशः । ४ । ३ । ८ ॥

यो ब्रह्माणं विदधाति इति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात्तस्य ब्रह्मशब्देन व्यपदेश इति गत्यनुपपत्तिविशेषणादिभिरुक्तैर्हेतुभिर्निश्चीयत इत्यर्थः ॥ ८ ॥

अथ स्यात्––अर्चिरादिना हिरण्यगर्भप्राप्तौ *एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते *तयोर्ध्वमायन्नमृतत्वमेति* इत्यमृतत्वप्राप्त्यपुनरावृत्तिव्यपदेशो नोपपद्यते, हिरण्यगर्भस्य कार्यभूतस्य द्विपरार्धकालावसाने विनाशशास्त्रात्, *आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन* इतिवचनाद्धिरण्यगर्भं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वादिति; अत्राह––

517 कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् । ४ । ३ । ९ ॥

कार्यस्य-ब्रह्मलोकस्यात्यये तदध्यक्षेण-हिरण्यगर्भेणाधिकारिकेणावसिताधिकारेण विदुषा सह स्वयमपि तत्राधिगतविद्यः अतः––कार्याद्ब्रह्मलोकात् परं ब्रह्म प्राप्नोतीति, अर्चिरादिना गतस्यामृतत्वप्राप्त्यपुनरावृत्त्यभिधानात् *ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे* इति वचनाच्चावगम्यते ॥ ९ ॥

518 स्मृतेश्च । ४ । ३ । १० ॥

स्मृतेश्चायमर्थोऽवगम्यते–– *ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ इति । अतः कार्यमुपासीनमेवार्चिरादिको गणो नयतीति बादरेर्मतम् ॥१०॥

अत्र जैमिनिः पक्षान्तरपरिग्रहेण प्रत्यवतिष्ठते––

519 परं जैमिनिर्मुख्यत्वात् । ४ । ३ । ११ ॥

परं ब्रह्मोपासीनानर्चिरादिर्नयतीति जैमिनिराचार्यो मन्यते । कुतः ? मुख्यत्वात्–– *तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयतीति ब्रह्मशब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् । प्रमाणान्तरेण कार्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् । न च गमनानुपपत्तिः प्रमाणम्, परस्य ब्रह्मणस्सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैवाविद्यानिवृत्तिशास्त्रात् । यथा हि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा *तमेतं वेदानुवचनेनेत्यादिशास्त्रादवगम्यते, तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते । विदुष उत्क्रान्तिप्रतिषेधादि तु पूर्वमेव परिहृतम् । यत्तु *ब्रह्मलोकानिति लोकशब्दबहुवचनाभ्यां विशेषणात्कार्यभूतहिरण्यगर्भप्रतीतिरिति; तदयुक्तम्, निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात्, अर्थस्य चैकत्वे निश्चिते बहुवचनस्य *अदितिः पाशान्* इतिवदुपपत्तेः । परस्य ब्रह्मणः

Digitization by Arya Samaj Charitable Foundation, Chennai

परिपूर्णस्य सर्वगतस्य सत्यसङ्कल्पस्य स्वेच्छापरिकल्पिताः स्वासाधारणा अप्राकृताश्च लोका नात्यन्ताय न सन्ति, श्रुतिस्मृतीतिहासपुराणप्रामाण्यात् ॥ ११ ॥

520 दर्शनाच्च । ४ । ३ । १२ ॥

दर्शयति च श्रुतिः मूर्धन्यनाड्या निष्क्रम्य देवयानेन गतस्य परब्रह्मप्राप्तिम् *एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इति ॥ १२ ॥

यदुक्तं *प्रजापतेस्सभां वेश्म प्रपद्ये* इत्यर्चिरादिना गतस्य कार्ये प्रत्यभिसन्धिर्दृश्यत इति; तत्रोत्तरम्—

521 नच कार्ये प्रत्यभिसन्धिः । ४ । ३ । १३ ॥

न चायं प्रत्यभिसन्धिः कार्ये हिरण्यगर्भे; अपि तु परस्मिन्नेव ब्रह्मणि; वाक्यशेषे *यशोऽहं भवामि ब्राह्मणानाम्* इति तस्याभिसंधातुस्सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसन्धानात्, *अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि ॥ इत्यभिसंभाव्यस्य ब्रह्मलोकस्याकृतत्वश्रवणात्, सर्वबन्धविनिर्मोकस्य च साक्षाच्छ्रवणात्। अतः परमेव ब्रह्मोपासीनमर्चिरादिरातिवाहिको गणो नयतीति जैमिनेर्मतम् ॥ १३ ॥

इदानीं बादरायणस्तु भगवान् स्वमतेन सिद्धान्तमाह—

522 अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च । । ४ । ३ । १४ ॥

अप्रतीकालम्बनान्-प्रतीकालम्बनव्यतिरिक्तान् नयत्यर्चिरादिरातिवाहिको गण इति भगवान् बादरायणो मन्यते। एतदुक्तं भवति—कार्यमुपासीनान्नयतीति नायं पक्षस्संभवति; परमेवोपासीनानित्ययमपि नियमो नास्ति; न च प्रतीकालम्बनानपि नयति । अपितु ये परं ब्रह्मोपासते, ये चात्मानं प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते; तानुभयविधान्नयति । ये तु ब्रह्मकार्यान्तर्भूतनामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवत् ब्रह्मदृष्ट्या, केवलं वा तत्तद्वस्तूपासते, न तान्नयति । अतः परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयतीति । कुतः ? उभयथा च दोषात् । कार्यमुपासीनान्नयतीति पक्षे *अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्येत्यादिकाः श्रुतयः प्रकुप्येयुः । परमेवोपासीनानिति नियमे *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्तीति पञ्चाग्निविदोऽर्चिरादिर्गणो नयतीति श्रुतिः प्रकुप्येत् । अतः उभयस्मिन्नपि पक्षे दोषस्स्यात् । तस्मादुभयविधान्नयतीति । तदेतदाह—तत्क्रतुश्चेति । तत्क्रतुः—तथोपासीनस्तथैव प्राप्नोतीत्यर्थः; *यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति *तं यथायथोपासते* इति

Digitization by Arya Samaj Charitable Foundation, Chennai

न्यायात्, पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणात्, अर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च । अत एव तत्क्रतुन्यायात्प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसन्धानं सिद्धम् । नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावादचिन्मिश्रोपासने तत्क्रतुन्यायाच्चार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च न विद्यते ॥ १४ ॥

तमिमं विशेषं श्रुतिरेव दर्शयतीत्याह—

523 विशेषं च दर्शयति । ४ । ३ । १५ ॥

यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति इत्यादिका श्रुतिः नामादिप्राणपर्यन्तप्रतीकमुपासीनानां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति । तस्मादचिन्मिश्रं केवलं वाचिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते, न तान् नयति; अपितु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयतीति सिद्धम् ॥१५॥ इति कार्याधिकरणम् ॥ ५ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

श्रीमते रामानुजाय नमः

चतुर्थाध्याये—चतुर्थः पादः—संपद्याविर्भावाधिकरणम् ॥ १ ॥

524 संपद्याविर्भावस्स्वेनशब्दात् । ४ । ४ । १ ॥

परं ब्रह्मोपासीनानामात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानामर्चिरादिना मार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता । इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभते । इदमाम्नायते—*एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इति । किमस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपन्नस्य देवादिरूपवत्साध्येन रूपेण संबन्धोऽनेन वाक्येन प्रतिपाद्यते, उत स्वाभाविकस्य स्वरूपस्याविर्भाव इति संशये, साध्येन रूपेण संबन्ध इति युक्तम् । अन्यथा ह्यपुरुषार्थावबोधित्वं मोक्षशास्त्रस्य स्यात्, स्वरूपस्य स्वतोऽपुरुषार्थत्वदर्शनात् । न हि सुषुप्तौ देहेन्द्रियव्यापारेषूपरतेषु केवलस्यात्मस्वरूपस्य पुरुषार्थसंबन्धो दृश्यते । न च दुःखनिवृत्तिमात्रं परं ज्योतिरुपसंपन्नस्य पुरुषार्थः, येन स्वरूपाविर्भाव एव मोक्ष इत्युच्येत; *स एको ब्रह्मण आनन्दः, श्रोत्रियस्य चाकामहतस्य *रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति* इत्यादिभ्यो मुक्तस्य सुखानन्त्यश्रवणात् । नचापरिच्छिन्नानन्दरूपचैतन्यमेवास्य स्वरूपम्, तच्च संसारदशायामविद्यया तिरोहितं परं ज्योतिरुपसंपन्नस्याविर्भवतीति शक्यं वक्तुम्; ज्ञानस्वरूपस्य तिरोधानासंभवात् । प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम् । नच प्रकाशमात्रस्यानन्दता संभवति । सुखस्वरूपता ह्यानन्दस्वरूपता; सुखस्वरूपत्वं चात्मनोऽनुकूलत्वम् । प्रकाशमात्रात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

वादिनः कस्य प्रकाशोऽनुकूलवेदनीयो भवेदिति प्रकाशमात्रात्मवादिनः कथंचिदप्यानन्दस्वरूपता दुरुपपादा । स्वरूपापत्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसंपन्नस्य *स्वेन रूपेणाभिनिष्पद्यत इति वचनमनर्थकं स्यात् । अतोऽपूर्वेण साध्येन रूपेण संपद्यते । एवं च *अभिनिष्पद्यते इति वचनं मुख्यार्थमेव भवति । *स्वेन रूपेणेत्यप्यानन्दैकान्तेन स्वासाधारणेनाभिनिष्पद्यत इति सङ्गच्छत इति ॥

एवं प्राप्ते प्रचक्ष्महे—संपद्याविर्भाव इति । अयं प्रत्यगात्माऽर्चिरादिना परं ज्योतिरुपसंपद्य यं दशाविशेषमापद्यते, सः स्वरूपाविर्भावरूपः; नापूर्वाकारोत्पत्तिरूपः । कुतः ? स्वेन शब्दात्—*स्वेन रूपेणेति विशेषणोपादानादित्यर्थः । आगन्तुकविशेषपरिग्रहे हि *स्वेन रूपेणेति विशेषणमनर्थकं स्यात्, अविशेषणेऽपि तस्य स्वकीयरूपत्वसिद्धेः ॥ १ ॥

यत्तूक्तं स्वरूपस्य नित्यप्राप्तत्वात् *उपसंपद्याभिनिष्पद्यते इति वचनमनर्थकमिति, तत्रोत्तरम्

525 मुक्तः प्रतिज्ञानात् । ४ । ४ । २ ॥

कर्मसंबन्धतत्कृतदेहादिविनिर्मुक्तः स्वाभाविकरूपेणावस्थितोऽत्र *स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते । अतो नित्यप्राप्तस्यापि स्वरूपस्य कर्मरूपाविद्यातिरोहितस्य तिरोधाननिवृत्तिरत्राभिनिष्पत्तिरुच्यते । कुतः ? प्रतिज्ञानात्—सा हि प्रतिपाद्यतया प्रतिज्ञाता । कुत इदमवगम्यते ? *य आत्मा* इति प्रकृतं प्रत्यगात्मानं जागरिताद्यवस्थात्रितयविनिर्मुक्तं, प्रियाप्रियहेतुभूतकर्मारब्धशरीरविनिर्मुक्तं च प्रतिपादयितुम् *एतं त्वेव ते भूयोऽनुव्याख्यास्यामि* इति पुनःपुनरुक्त्वा *एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इत्यभिधानात् । अतः कर्मणा संबद्धस्य परं ज्योतिरुपसंपद्य बन्धनिवृत्तिरूपा मुक्तिः स्वेन रूपेणाभिनिष्पत्तिरुच्यते । स्वरूपाविर्भावेऽप्यभिनिष्पत्तिशब्दो दृश्यते, युक्त्याऽयमर्थो निष्पद्यत इत्यादिषु ॥ २ ॥

यच्चोक्तम्—आत्मस्वरूपस्य सुषुप्तावपुरुषार्थत्वदर्शनात्स्वरूपाविर्भावे मोक्षशास्त्रस्यापुरुषार्थावबोधित्वं स्यादिति कृत्वा देवाद्यवस्थावत्सुखसंबन्ध्यवस्थान्तरप्राप्तिरभिनिष्पत्तिरिति; तत्रोत्तरम्—

526 आत्मा प्रकरणात् । ४ । ४ । ३ ॥

स्वरूपेणैवायमात्मा अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकः प्रकरणादवगम्यते; *य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः *इति हि प्रजापतिवाक्यप्रक्रमः । इदं च प्रकरणं प्रत्यगात्मविषयमिति *उत्तराच्चेदाविर्भूतस्वरूपस्तु* इत्यत्र प्रतिपादितम् । अतोऽपहतपाप्मत्वादिस्वरूप एवायमात्मा संसारदशायां कर्माख्याविद्यया तिरोहितस्वरूपः परं ज्योतिरुपसंपद्याविर्भूतस्वरूपो भवति । अतः प्रत्यगात्मनोऽपहतपाप्मत्वादयस्स्वाभाविका

Digitization by Arya Samaj Charitable Foundation, Chennai

गुणाः परं ज्योतिरुपसंपन्नस्याविर्भवन्ति; नोत्पद्यन्ते । यथोक्तं भगवता शौनकेनापि ।

*यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात्क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतस्संभवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इति ।

अतो ज्ञानानन्दादिगुणानां कर्मणा आत्मनि सङ्कुचितानां परं ज्योतिरुपसंपद्य कर्मरूपबन्धक्षये विकासरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तं संपद्याविर्भाव इति ॥ ३ ॥ इति सम्पद्याविर्भावाधिकरणम् ॥१॥

अथ अविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥

527 अविभागेन दृष्टत्वात् । ४ । ४ । ४ ॥

किमयं परं ज्योतिरुपसंपन्नः सर्वबन्धविनिर्मुक्तः प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवति, उत तत्प्रकारतया तदविभक्तमिति विशये, *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता *यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ *इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इत्यादिश्रुतिस्मृतिभ्यां मुक्तस्य परेण साहित्यसाम्यसाधर्म्यावगमात् पृथग्भूतमनुभवति ॥

इति प्राप्त उच्यते––अविभागेनेति । परस्माद्ब्रह्मणः स्वात्मानमविभागेनानुभवति मुक्तः । कुतः ? दृष्टत्वात्––परब्रह्मोपसंपत्त्या निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात् । स्वात्मनः स्वरूपं हि *तत्त्वमसि *अयमात्मा ब्रह्म *ऐतदात्म्यमिदं सर्वम् *सर्वं खल्विदं ब्रह्म* इत्यादिसामानाधिकरण्यनिर्देशैः *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः *अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा* इत्यादिभिश्च परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितम् *अवस्थितेरिति काशकृत्स्नः* इत्यत्र । अतोऽविभागेन अहं ब्रह्मास्मीत्येवानुभवति । साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्सममिति देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति । सहश्रुतिस्त्वेवंभूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । ब्रह्मप्रकारतया तदविभागोक्तेर्हि *सङ्कल्पादेव तच्छ्रुतेः* इत्यादि न विरुध्यते, *अधिकंतु भेदनिर्देशात् *अधिकोपदेशात्* इत्यादि च ॥ ४ ॥ इति अविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ ब्राह्माधिकरणम् ॥ ३ ॥

528 ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । ४ । ४ । ५ ॥

प्रत्यगात्मनः परं ज्योतिरुपसंपद्य निवृत्ततिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तम्। तत्र येन स्वरूपेणायमाविर्भवति; तत्स्वरूपं श्रुतिवैविध्याद्विचार्यते। किमपहतपाप्मत्वादिकमेवास्य स्वरूपमिति तेन रूपेणायमाविर्भवति, उत विज्ञानमात्रमेवेति तेन रूपेण, अथोभयोरविरोध इत्युभयरूपेणेति। किं तावत्प्राप्तम् ? ब्राह्मेणेति जैमिनिराचार्यो मन्यते। ब्राह्मेण—अपहतपाप्मत्वादिनेत्यर्थः। अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मसंबन्धितया श्रुताः। ब्राह्मेणेति कुतोऽवगम्यते ? उपन्यासादिभ्यः; उपन्यस्यन्ते हि ब्रह्मगुणाः अपहतपाप्मत्वादयः प्रत्यगात्मनोऽपि प्रजापतिवाक्ये *य आत्माऽपहतपाप्मेत्यादिना *सत्यसङ्कल्प इत्यन्तेन। आदिशब्देन सत्यसङ्कल्पत्वादिगुणायत्ता जक्षणादयः *जक्षत्क्रीडन्नममाणः* इत्यादिवाक्यावगता व्यवहारा गृह्यन्ते। अत एभ्य उपन्यासादिभ्यः प्रत्यगात्मनो विज्ञानमात्रस्वरूपत्वं न संभवतीति जैमिनेर्मतम् ॥ ५ ॥

529 चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । ४ । ४ । ६ ॥

*चैतन्यमात्रमेवास्य स्वरूपमिति तेन रूपेणाविर्भवतीत्यौडुलोमिराचार्यो मन्यते। कुतः ? तदात्मकत्वात्—तावन्मात्रात्मकत्वादस्य प्रत्यगात्मनः। *स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव *विज्ञानघन एव* इत्यवधारणात् विज्ञानमात्रमेवास्य स्वरूपमित्यवगम्यते। अतोऽस्य गुणान्तराभावात् *अपहतपाप्मेत्यादयश्शब्दाः विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इति चितितन्मात्ररूपेणाविर्भाव इत्यौडुलोमेर्मतम् ॥ ६ ॥

संप्रति भगवान् बादरायणः स्वमतेन सिद्धान्तमाह–

530 एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः । ४ । ४ । ७ ॥

एवमपि—विज्ञानमात्रस्वरूपत्वप्रतिपादने सत्यपि, सत्यकामत्वादीनां पूर्वोक्तानां गुणानामविरोधं बादरायण आचार्यो मन्यते। कुतः ? उपन्यासात्पूर्वभावात्—औपनिषदात् *य आत्माऽपहतपाप्मा* इत्याद्युपन्यासात्प्रमाणात् पूर्वेषाम्-अपहतपाप्मत्वसत्यकामत्वादीनामपि भावात्—विद्यमानत्वात्। तुल्यप्रमाणकानामितरेतरबाधो न युज्यत इत्यर्थः। नच वस्तुविरोधादपहतपाप्मत्वादीनामविद्यापरिकल्पितत्वं न्याय्यम्; विशेषाभावात् विपरीतं कस्मान्न भवतीति न्यायात्। तुल्यबलत्वे ह्यशक्यस्यावधारणस्यान्यपरत्वमेव न्याय्यम्। एवमप्यविरोध इत्यभ्युपगम्य वदन् ज्ञानमात्रमेवास्य स्वरूपं नान्यत्किञ्चिदस्तीत्ययमर्थः *विज्ञानघन एवेत्यादिभिर्न प्रतिपाद्यत इति

Digitization by Arya Samaj Charitable Foundation, Chennai

मन्यते । कस्तर्हि *विज्ञानघन एवेत्यवधारणस्यार्थः ? कृत्स्नोऽप्यात्मा जडव्यावृत्तस्वप्रकाशः, नान्यायत्तप्रकाशः स्वल्पोऽपि प्रदेशोऽस्तीत्ययमर्थो वाक्यादेव सुव्यक्तः *स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति । नचैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेऽप्यपहतपाप्मत्वसत्यसङ्कल्पत्वादिधर्मसंबन्धो वाक्यान्तरावगतो विरुध्यते; यथा सैन्धवघनस्य कृत्स्नस्य रसघनत्वे रसनेन्द्रियावगते चक्षुराद्यवगताः रूपकाठिन्यादयो न विरुध्यन्ते । इदमत्र वाक्यतात्पर्यम्—यथा रसवत्स्वाम्रफलादिषु त्वगादि-प्रदेशभेदेन रसभेदे सत्यपि सैन्धवघनस्य सर्वत्रैकरसत्वम्; तथाऽऽत्मनोऽपि सर्वत्र विज्ञानस्वरूपत्वम्-स्वप्रकाशस्वरूपत्वमित्यर्थः ॥ ७ ॥ इति ब्राह्माधिकरणम् ॥ ३ ॥

अथ सङ्कल्पाधिकरणम् ॥ ४ ॥

531 संकल्पादेव तच्छ्रुतेः । ४ । ४ । ८ ॥

मुक्तः परं ब्रह्मोपसंपद्य ज्ञानस्वरूपोऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणक आवि-र्भवतीत्युक्तम्; तमधिकृत्य सत्यसङ्कल्पत्वप्रयुक्ता व्यवहाराः श्रूयन्ते*स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा* इति । किमस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षा, उत परमपुरुषस्येव सङ्कल्पमात्रादेव भवतीति विशये; लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवह्रियमाणानां कार्यनिष्पादने प्रयत्नान्तरसापेक्षत्वदर्शनादस्यापि तत्सापेक्षा ॥ इति प्राप्त उच्यते—सङ्कल्पादेवेति । कुतः ? तच्छ्रुतेः—*स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति* इति हि सङ्कल्पादेव पित्रादीनां समुत्थानं श्रूयते । नच प्रयत्नान्तरसापेक्षत्वाभिधायि श्रुत्यन्तरं दृश्यते; येनास्य *सङ्कल्पादेवेत्यव-धारणस्य *विज्ञानघन एवेतिवद्व्यवस्थापनं क्रियते ॥ ८ ॥

532 अत एव चानन्याधिपतिः । ४ । ४ । ९ ॥

यतो मुक्तस्सत्यसङ्कल्पः; अत एवानन्याधिपतिश्च । अन्याधिपतित्वं हि विधिनिषेधयोग्य-त्वम् । विधिनिषेधयोग्यत्वे हि प्रतिहतसङ्कल्पत्वं भवेत् । अतस्सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अत एव *स स्वराड्भवति* इत्युच्यते ॥ ९ ॥ इति सङ्कल्पाधिकरणम् ॥ ४ ॥

अथ अभावाधिकरणम् ॥ ५ ॥

533 अभावं बादरिराह ह्येवम् । ४ । ४ । १० ॥

किं मुक्तस्य देहेन्द्रियाणि न सन्ति, उत सन्ति, अथवा यथासङ्कल्पं सन्ति न सन्ति

Digitization by Arya Samaj Charitable Foundation, Chennai

चेति विशये; शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते। कुतः? आह ह्येवम्— *न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः* इति शरीर-संबन्धे दुःखस्यावर्जनीयत्वमभिधाय *अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभि-निष्पद्यते* इति मुक्तस्याशरीरत्वं ह्याह श्रुतिः ॥ १० ॥

534 भावं जैमिनिर्विकल्पामननात्। ४। ४। ११॥

मुक्तस्य शरीरेन्द्रियभावं जैमिनिराचार्यो मन्यते। कुतः? विकल्पामननात्—विविधः कल्पो विकल्पः, वैविध्यमित्यर्थः; *स एकधा भवति त्रिधा भवति, पञ्चधा सप्तधा* इत्यादिश्रुतेः। आत्मन एकस्याच्छेद्यस्यानेकधाभावासंभवात् त्रिधाभावादयः शरीरनिबन्धना इत्यवगम्यते। अशरीरत्ववचनं तु कर्मनिमित्तशरीराभावपरम्; तदेव हि शरीरं प्रियाप्रियहेतुः ॥ ११ ॥

भगवांस्तु बादरायणः स्वमतेन सिद्धान्तमाह—

535 द्वादशाहवदुभयविधं बादरायणोऽतः। ४। ४। १२॥

*सङ्कल्पादेवेत्येतदतश्शब्देन परामृश्यते; अत एव सङ्कल्पात्, उभयविधं सशरीरमशरीरं च मुक्तं भगवान् बादरायणो मन्यते। एवञ्चोभयी श्रुतिरुपपद्यते। द्वादशाहवत्—यथा *द्वादशाह-मृद्धिकामा उपेयुः *द्वादशाहेन प्रजाकामं याजयेत्* इत्युपैतियजतिचोदनाभ्यां सङ्कल्पभेदेन सत्र-महीनं च भवति ॥ १२ ॥

यदा शरीराद्युपकरणवत्त्वम्, तदा तानि शरीराद्युपकरणानि स्वेनैव सृष्टानीति नास्ति नियम इत्याह—

536 तन्वभावे सन्ध्यवदुपपत्तेः। ४। ४। १३॥

स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेः सत्यसङ्कल्पोऽपि स्वयं न सृजति। यथा स्वप्ने *अथ रथान् रथयोगान् पथस्सृजते* इत्यारभ्य *अथ वेशन्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता* इति, *य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः, तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते, तस्मिन् लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन* इति ईश्वरसृष्टैः रथाद्यु-पकरणैर्जीवो भुङ्क्ते; तथा मुक्तोऽपि लीलाप्रवृत्तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलारसं भुङ्क्ते ॥ १३ ॥

537 भावे जाग्रद्वत्। ४। ४। १४॥

स्वसङ्कल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणभावे जाग्रत्पुरुषभोगवन्मुक्तोऽपि लीलारसं

Digitization by Arya Samaj Charitable Foundation, Chennai

भुङ्क्ते; परमपुरुषोऽपि लीलार्थं दशरथवसुदेवादिपितृलोकादिकमात्मनः सृष्ट्वा तैर्मनुष्यधर्मलीलारसं यथा भुङ्क्ते; तथा मुक्तानामपि स्वलीलायै पितृलोकादिकं स्वयमेव सृजति कदाचित्; कदाचिच्च मुक्ताः सत्यसङ्कल्पत्वात्परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमुपपन्नम् ॥१४॥

नन्वात्माऽणुपरिमाण इत्युक्तम्; कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसंभव इत्यत्राह—

538 प्रदीपवदावेशस्तथाहि दर्शयति । ४ । ४ । १५ ॥

यथा प्रदीपस्यैकस्यैकस्मिन् देशे वर्तमानस्य स्वप्रभया देशान्तरावेशः; तथाऽऽत्मनोऽप्येकदेहस्थितस्यैव स्वप्रभारूपेण चैतन्येन सर्वशरीरावेशो नानुपपन्नः । यथा चैकस्मिन्नपि देहे हृदयाद्येकप्रदेशवर्तिनोऽपि चैतन्यव्याप्त्या सर्वस्मिन् देह आत्माभिमानः; तद्वत् । इयान्विशेषः—अमुक्तस्य कर्मणा सङ्कुचितज्ञानस्य देहान्तरेषु आत्माभिनानुगुणा व्याप्तिर्न संभवति; मुक्तस्य त्वसंकुचितज्ञानस्य यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिः इदमिति ग्रहणानुगुणा च नानुपपन्ना । तथाहि दर्शयति *वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते ॥ इति । अमुक्तस्य कर्म नियामकम्; मुक्तस्य तु स्वेच्छेति विशेषः ॥ १५ ॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शयति श्रुतिः *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति; तत्कथं मुक्तस्य सार्वज्ञ्यमुच्यते ? तत्रोत्तरम्—

539 स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि । ४ । ४ । १६ ॥

नेदं वचनं मुक्तविषयम्; अपितु स्वाप्ययसंपत्त्योरन्यतरापेक्षम् । स्वाप्ययः—सुषुप्तिः; संपत्तिश्च—मरणम्, *वाङ्मनसि संपद्यत* इत्यारभ्य *तेजः परस्यां देवतायामिति वचनात् । तयोश्चावस्थयोः प्राज्ञप्राप्तिर्निस्संबोधत्वं च विधेते । अतस्तयोरन्यतरापेक्षमिदं वचनम् । सुषुप्तिमरणयोर्निस्संबोधत्वं, मुक्तस्य च सर्वज्ञत्वमाविष्कृतं हि श्रुत्या *नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि* इति सुषुप्तिवेलायां निस्संबोधत्वमुक्त्वा तस्मिन्नेव वाक्ये मुक्तमधिकृत्य *स वा एष दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके* इति सर्वज्ञत्वमुच्यते । तथा *सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः* इति च स्पष्टमेव सर्वज्ञत्वमुच्यते । तथा मरणे च निस्संबोधत्वम् *एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति* इत्युक्तम् । विनश्यति—न पश्यतीत्यर्थः । अतः *प्राज्ञेनाऽत्मनेति वचनं स्वाप्ययसंपत्त्योरन्यतरापेक्षम् ॥ १६ ॥ इति अभावाधिकरणम् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ जगद्व्यापारवर्जाधिकरणम् ॥ ६ ॥

540 जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । ४ । ४ । १७ ॥

किं मुक्तस्यैश्वर्यं जगत्सृष्ट्यादि परमपुरुषासाधारणं सर्वेश्वरत्वमपि, उत तद्रहितं केवलपरमपुरुषानुभवविषयमिति संशयः । किं युक्तम् ? जगदीश्वरत्वमपीति । कुतः ? *निरञ्जनः परमं साम्यमुपैतीति परमपुरुषेण परमसाम्यापत्तिश्रुतेः, सत्यसङ्कल्पत्वश्रुतेश्च । नहि परमसाम्यसत्यसङ्कल्पत्वे सर्वेश्वरासाधारणजगन्नियमनेन विनोपपद्येते । अतस्सत्यसङ्कल्पत्वपरमसाम्योपपत्तये समस्तजगन्नियमनरूपमपि मुक्तस्यैश्वर्यमिति ॥

एवं प्राप्ते प्रचक्ष्महे—जगद्व्यापारवर्जमिति । जगद्व्यापारः—निखिलचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनम् । तद्वर्जं निरस्तनिखिलतिरोधानस्य निर्व्याजब्रह्मानुभवरूपं मुक्तस्यैश्वर्यम् । कुतः ? प्रकरणात्—निखिलजगन्नियमनं हि परं ब्रह्म प्रकृत्याऽऽम्नायते *यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्म* इति । यद्येतन्निखिलजगन्नियमनं मुक्तानामपि साधारणं स्यात्, ततश्चेदं जगदीश्वरत्वरूपं ब्रह्मलक्षणं न संगच्छते । असाधारणस्य हि लक्षणत्वम् । तथा *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत *ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणि इन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति *आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति स इमान् लोकानसृजत *एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्थस्यैका कन्या दशेन्द्रियाणि* इत्यादिषु । *यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः इत्यारभ्य *य आत्मनि तिष्ठन्नित्यादिषु च निखिलजगन्नियमनं परमपुरुषं प्रकृत्यैव श्रूयते । असन्निहितत्वाच्च—नचैतेषु निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य सन्निधानमस्ति, येन जगद्व्यापारस्तस्यापि स्यात् ॥ १७ ॥

541 प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः । ४ । ४ । १८ ॥

स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति इमान् लोकान् कामान्नी कामरूप्यनुसंचरन्* इति प्रत्यक्षेण—श्रुत्या मुक्तस्य जगद्व्यापार उपदिश्यते; अतो न जगद्व्यापारवर्जमिति चेत्; तन्न, आधिकारिकमण्डलस्थोक्तेः; आधिकारिकाः-अधिकारेषु नियुक्ता हिरण्यगर्भादयः; मण्डलानि-तेषां लोकाः; तत्स्थाः-भोगाः मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थः *तस्य सर्वेषु लोकेषु कामचारो भवतीत्यादिनोच्यते । अकर्मप्रतिहतज्ञानो मुक्तो विकारलोकान् ब्रह्मविभूतिभूताननुभूय यथाकामं तृप्यतीत्यर्थः । तदेवं विकारान्तर्वर्तिनः आधिकारिकमण्डलस्थान् सर्वान् भोगान् ब्रह्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

विभूतिभूताननुभवतीत्यनेन वाक्येनोच्यते; न जगद्व्यापारः ॥ १८ ॥

यदि संसारिवन्मुक्तोऽपि विकारान्तर्वर्तिनो भोगान् भुङ्क्ते, तर्हि बद्धस्येव मुक्तस्याप्यन्तवदेव भोग्यजातमल्पं च स्यात्; तत्राह—

542 विकारावर्ति च तथाहि स्थितिमाह । ४ । ४ । १९ ॥

विकारे—जन्मादिके न वर्तत इति विकारावर्ति; निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं, निरतिशयानन्दं परं ब्रह्म सविभूतिकं सकलकल्याणगुणमनुभवति मुक्तः । तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम् । तथाहि परस्मिन् ब्रह्मणि निर्विकारेऽनवधिकातिशयानन्दे मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिः— *यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति* इत्यादिका । तद्विभूतिभूतं च जगत्तत्रैव वर्तते *तस्मिन् लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन* इति श्रुतेः । अतस्सविभूतिकं ब्रह्मानुभवन्विकारान्तर्वर्तिनः आधिकारिकमण्डलस्थानपि भोगान् भुङ्क्त इति *सर्वेषु लोकेषु कामचार इत्यादिनोच्यते; न मुक्तस्य जगद्व्यापारः ॥१९॥

543 दर्शयतश्चैवं प्रत्यक्षानुमाने । ४ । ४ । २० ॥

अस्य प्रत्यगात्मनो मुक्तस्य नियाम्यभूतस्य नियन्तृभूतपरमपुरुषासाधारणं जगद्व्यापाररूपं नियमनं न संभवतीत्युक्तम् । निखिलजगन्नियमनरूपो व्यापारः परमपुरुषासाधारण इति दर्शयतः श्रुतिस्मृती— *भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चमः इति* एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः* इत्यादि । तथा *एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय* इति च श्रुतिः । स्मृतिरपि *मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ॥ इति, *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्* इति च । तथा मुक्तस्य सत्यसङ्कल्पत्वादिपूर्वकस्याप्यानन्दस्य परमपुरुष एव हेतुरिति श्रुतिस्मृती दर्शयतः *एष ह्येवानन्दयाति, *मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्यच ॥ इति । यद्यप्यपहतपाप्मत्वादिस्सत्यसङ्कल्पत्वपर्यन्तो गुणगणः प्रत्यगात्मनः स्वाभाविक एवाविर्भूतः, तथाऽपि तस्य तथाविधत्वमेव परमपुरुषायत्तम्; तस्य नित्यस्थितिश्च तदायत्ता; परमपुरुषस्यैतन्नित्यतायाः नित्येष्टत्वान्नित्यतया वर्तत इति न कश्चिद्विरोधः । एवमेव परमपुरुषभोगोपकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य परमपुरुषस्य नित्येष्टत्वादेव तथाऽवस्थानमस्तीति शास्त्रादवगम्यते । अतो मुक्तस्य सत्यसङ्कल्पत्वं परमपुरुषसाम्यं च जगद्व्यापारवर्जम् ॥ २० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

544 भोगमात्रसाम्यलिङ्गाच्च । ४ । ४ । २१ ॥

ब्रह्मयाथात्म्यानुभवरूपभोगमात्रे मुक्तस्य ब्रह्मसाम्यप्रतिपादनाच्च लिङ्गाज्जगद्व्यापारवजमित्यवगम्यते *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति । अतो मुक्तस्य परमपुरुषसाम्यं सत्यसङ्कल्पत्वं च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्यानुगुण्येन वर्णनीयमिति जगद्व्यापारवर्जमेव मुक्तैश्वर्यम् ॥ २१ ॥

यदि परमपुरुषायत्तं मुक्तैश्वर्यम्, तर्हि तस्य स्वतन्त्रत्वेन तत्सङ्कल्पान्मुक्तस्य पुनरावृत्तिसंभवाशङ्केत्यत्राह—

545 अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् । ४ । ४ । २२ ॥

यथा निखिलहेयप्रत्यनीककल्याणैकतानो जगज्जन्मादिकारणं समस्तवस्तुविलक्षणस्सर्वज्ञस्सत्यसङ्कल्पः आश्रितवात्सल्यैकजलधिः परमकारुणिको निरस्तसमाभ्यधिकसंभावनः परब्रह्माभिधानः परमपुरुषोऽस्तीति शब्दादवगम्यते; एवमहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीततदुपासनरूपतत्समाराधनप्रीतः उपासीनाननादिकालप्रवृत्तानन्तदुस्तरकर्मसञ्चयरूपाविद्यां विनिवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तयतीत्यपि शब्दादेवावगम्यते । शब्दश्च *स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते* इत्यादिकः । तथा च भगवता स्वयमेवोक्तं *मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानस्संसिद्धिं परमां गताः ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ इति । नचोच्छिन्नकर्मबन्धस्यासंकुचितज्ञानस्य परब्रह्मानुभवैकस्वभावस्य तदेकप्रियस्यानवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षातदर्थारम्भाद्यसंभवात्पुरावृत्तिशङ्का । न च परमपुरुषस्सत्यसङ्कल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति; य एवमाह— *प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥ आस्थितस्सहि युक्तात्मा मामेवानुत्तमां गतिम् । बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ॥ वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः इति । सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयति । इति सर्वं समञ्जसम् ॥२२॥ इति जगद्व्यापारवर्जाधिकरणम् ॥ ६ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायः ॥ ४ ॥ शास्त्रं च परिसमाप्तम् ॥

श्री भगवद्रामानुजग्रन्थमालायां शारीरकमीमांसाभाष्यं समाप्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीरस्तु
श्रीमते रामानुजाय नमः
श्रीभगवद्रामानुजग्रन्थमालायाम्

श्री वेदान्तसारः

समस्तचिदचिद्वस्तुशरीरायाखिलात्मने । श्रीमते निर्मलानन्दोदन्वते विष्णवे नमः ॥

परमपुरुषप्रसादात् वेदान्तसार उद्ध्रियते ॥

। अथातो ब्रह्मजिज्ञासा ॥ अत्रायमथशब्दः आनन्तर्ये वर्तते; अतश्शब्दशिरस्कत्वात् । अतश्शब्दश्च पूर्ववृत्तस्य हेतुभावे । पूर्ववृत्तश्च कर्मज्ञानमिति विज्ञायते; आरिप्सितस्य ब्रह्मज्ञानस्य वेदार्थविचारैकदेशत्वात् । अधीतवेदस्य हि पुरुषस्य कर्मप्रतिपादनोपक्रमत्वात् वेदानां कर्मविचारः प्रथमं कार्य इति *अथातो धर्मजिज्ञासेत्युक्तम् । कर्मणाञ्च प्रकृतिविकृतिरूपाणां धर्मार्थकामरूपपुरुषार्थसाधनतानिश्चयः, *प्रभुत्वादार्त्विज्यम्* इत्यन्तेन सूत्रकलापेन सङ्कर्षणेन कृतः । एवं वेदस्यार्थपरत्वे कर्मणाञ्च तदर्थत्वे तेषाञ्च केवलानां त्रिवर्गफलत्वे निश्चिते सति, वेदैकदेशभूतवेदान्तभागे केवलकर्मणामल्पास्थिरफलत्वं ब्रह्मज्ञानस्य च अनन्तस्थिरफलत्वमापाततो दृष्ट्वा, अनन्तरं मुमुक्षोरवधारितपरिनिष्पन्नवस्तुबोधजननशब्दशक्तेः पुरुषस्य ब्रह्मबुभुत्सा जायत इति *अथातो ब्रह्मजिज्ञासेति कर्मविचारानन्तरं तत एव हेतोः ब्रह्मविचारः कर्तव्य इत्युक्तं भवति । तदिदमाह श्रुतिः *परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तद्विज्ञानाथ स गुरुमेवाभिगच्छेत् समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठं, तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय, येनाक्षरं पुरुषं वेद सत्यम्, प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्* इति । ब्राह्मणः – वेदाभ्यासरतः, कर्मचितान् – कर्मणा संपादितान्, लोकान् – आराध्यक्षयिष्णुत्वेन क्षयस्वभावान्, कर्ममीमांसया परीक्ष्य, अकृतः – नित्यः परमपुरुषः, कृतेन – कर्मणा, न संपाद्य इति, यो निर्वेदमायात्, सः तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्, समित्पाणिः, श्रोत्रियं – वेदान्तवेदिनम्, ब्रह्मनिष्ठम् – साक्षात्कृतपरमपुरुषस्वरूपम्; सः – गुरुः, सम्यगुपसन्नाय तस्मै, येन – विद्याविशेषेण, अक्षरम् सत्यम् परमपुरुषम्, वेद – विद्यात्, तां ब्रह्मविद्याम्, प्रोवाच–प्रब्रूयादित्यर्थः; *स गुरुमवाभिगच्छेत्, तस्मै स विद्वान् प्रोवाच इत्यन्वयात् अप्राप्तत्वाच्च; विधावपि लिटो विधानात् *छन्दसि लुङ्लङ्लिटः* इति ॥ १ ॥

2 जन्माद्यस्य यतः ॥ अस्य—विचित्रचिदचिन्मिश्रस्य व्यवस्थितसुखदुःखोपभोगस्य जगतः, जन्मस्थितिलयाः यतः, तत् ब्रह्मेति प्रतिपादयति श्रुतिरित्यर्थः, *यतो वा इमानि भूतानि

Digitization by Arya Samaj Charitable Foundation, Chennai

जायन्ते...तद्ब्रह्म* इति । सूत्रे यत इति हेतौ पञ्चमी, जनिस्थितिलयानां साधारणत्वात् । जनिहेतुत्वञ्च निमित्तोपादानरूपं विवक्षितम्, *यतः इति हि श्रुतिः । इहोभयविषया कथमिति चेत्, *यतो वा इमानीति प्रसिद्धवन्निर्देशात्, प्रसिद्धेश्च उभयविषयत्वात् । *सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्...तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत* इत्यत्र, सदेव इदम् अग्रे एकमेव आसीदिति उपादानतां प्रतिपाद्य, अद्वितीयमिति अधिष्ठात्रन्तरनिवारणात् सच्छब्दवाच्यं ब्रह्मैव निमित्तमुपादानञ्चेति विज्ञायते । तथा तदैक्षत बहु स्यां प्रजायेयेत्यात्मन एव विचित्रस्थिरत्रसरूपेण बहुभवनं सङ्कल्प्य तथैव सृष्टिवचनाच्च । अतश्श्रुतावपि यतः इति हेतौ पञ्चमी । अत्रैव ब्रह्मणो जगन्निमित्तत्वमुपादानत्वञ्च प्रतिपादितम्, अर्थविरोधात् *अस्मान्मायी सृजते विश्वमेतत्* इत्यादि विशेषश्रुत्या चाक्षिप्य, *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् *अभिध्योपदेशाच्च *साक्षाच्चोभयाम्नानात् *आत्मकृतेः* इत्यादिभिस्सूत्रैः परिहरिष्यते । ननु च सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पं निरवद्यतया निरस्तसमस्तापुरुषार्थगन्धं ब्रह्मैवात्मानं विचित्रचिदचिन्मिश्रं जगद्रूपमिदं सर्वमसृजतेति कथमुपपद्यते ? तदेतत् सूत्रकारस्स्वयमेव परिचोद्य परिहरिष्यति । *अपीतौ तद्वत् प्रसङ्गादसमञ्जसम् *इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः* इति चोद्यम्; परिहारस्तु *न तु दृष्टान्तभावात् अधिकंतु भेदनिर्देशात्* इति च । *क्षरंत्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः *क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः (अचिद्वर्गं स्वात्मनो भोग्यत्वेन हरतीति भोक्ता हर इत्युच्यते) *द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ इत्यादिश्रुतिस्मृतिगणैः प्रत्यगात्मनो ब्रह्मणो भेदेन निर्देशात् परमपुरुषार्थभागिनः प्रत्यगात्मनोऽधिकमर्थान्तरभूतं ब्रह्म । तच्च प्रत्यगात्म शरीरतया तदात्मभूतम् । प्रत्यगात्मनस्तच्छरीरत्वं ब्रह्मणस्तदातमत्वञ्च *य आत्मनि तिष्ठन्...यस्यात्मा शरीरम् *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः* इत्यादिश्रुतिशतसमधिगतम् । सशरीरस्यात्मनः कार्यावस्थाप्राप्तावपि गुणदोषव्यवस्थितेर्दृष्टान्तभावात् ब्रह्मणि न दोषप्रसक्तिरिति नासामञ्जस्यं वेदान्तवाक्यस्येति *न तु दृष्टान्तभावादित्युक्तम् । दृष्टान्तश्च—देवमनुष्यादिशब्दवाच्यस्य सशरीरस्यात्मनः मनुष्यो बालो युवा स्थविर इति नानावस्थाप्राप्तावपि बालत्वयुवत्वस्थविरत्वादयः शरीरगता दोषाः नात्मानं स्पृशन्ति, आत्मगताश्च ज्ञानसुखादयः न शरीरमिति । अतः कार्यावस्थं कारणावस्थं च ब्रह्म प्रत्यगात्मशरीरतया तदात्मभूतमिति प्रत्यगात्मवाचिना शब्देन ब्रह्माभिधाने तच्छब्दसामानाधिकरण्ये च हेतुं वक्तुम्, निरसनीयं मतद्वयम् *प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः, उत्क्रमिष्यत एवंभावादित्यौडुलोमिः* इत्युपन्यस्य *अवस्थितेरिति काशकृत्स्नः* इति हेतुरुक्तः । *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्* इत्यादिना प्रत्यगात्मन आत्मतयाऽवस्थानात् ब्रह्मणस्तच्छब्देनाभिधानम्, तत्सा-

Digitization by Arya Samaj Charitable Foundation, Chennai

मानाधिकरण्येन व्यपदेशश्चेत्युक्तम् । तथा *वैषम्यनैर्घृण्ये न सापेक्षत्वात् *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च* इति देवमनुष्यादिविषमसृष्टेर्जीवकर्मनिमित्तत्वम्, जीवानां तत्तत्कर्मप्रवाहाणाञ्चानादित्वं प्रतिपाद्य, तदनादित्वं च *नित्यो नित्यानां चेतनश्चेतनानाम् *ज्ञाज्ञौ द्वौ* इत्यादिश्रुतिषूपलभ्यत इत्युक्त्वा, तदनादित्वेऽपि प्रलयकाले चिदचिद्वस्तुनोर्भोक्तृ-भोग्ययोर्नामरूपविभागाभावात्, *आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत्* इत्यादावेकत्वावधारणमुपपद्यत इति सूत्रकारेण स्वयमेवोक्तम् । तथा च *नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः इति प्रत्यगात्मनो नित्यत्वादनुत्पत्तिमुक्त्वा *ज्ञोऽत एवेति तस्य ज्ञातृत्वमेव स्वरूपमित्युक्तम् । *उत्क्रान्तिगत्यागतीनामित्यादिनाऽणुत्वञ्चोक्तम् । *तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् *याव-दात्मभावित्वाच्च न दोषस्तद्दर्शनात्* इति ज्ञातुरेवात्मनो ज्ञानशब्देन व्यपदेशो ज्ञानगुणसारत्वात् ज्ञानैकनिरूपणीयस्वभावत्वाच्चेत्युक्तम् । *नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा* इति ज्ञानमात्रस्वरूपात्मवादे हेत्वन्तरायत्तज्ञानवादे, सर्वगतात्मवादे च दोष उक्तः । *कर्ता शास्त्रार्थवत्त्वात् *उपादानाद्विहारोपदेशाच्च *व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः *उपलब्धि-वदनियमः *शक्तिविपर्ययात् *समाध्यभावाच्च *यथा च तक्षोभयथा* इत्यात्मन एव शुभाशुभेषु कर्मसु कर्तृत्वम्, प्रकृतेरकर्तृत्वम्, प्रकृतेश्च कर्तृत्वे तस्यास्साधारणत्वेन सर्वेषां फलानुभवप्रसङ्गादि च प्रतिपादितम् । *परात्तु तच्छ्रुतेः *कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः* इत्यात्मन एव कर्तृत्वं परमपुरुषानुमतिसहकृतमित्युक्तम् । *अंशो नानाव्यपदेशादन्यथा चापि दाशकित-वादित्वमधीयत एके *मन्त्रवर्णात् *अपि स्मर्यते *प्रकाशादिवत्तु नैवं परः स्मरन्ति च *इति *अनीशया शोचति मुह्यमानः, जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः *क्षरंत्वविद्या ह्यमृतंतु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यंकिञ्चन वेद नान्तरम् *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति *ज्ञाज्ञौ द्वावजावीशनीशौ *पृथागात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति *यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ *स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः *यस्सर्वज्ञस्सर्ववित् *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबल-क्रिया च *निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् *नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् *पतिं विश्वस्यात्मेश्वरम्* इत्यादिषु प्रत्यगात्मनः परमात्मनश्च कर्मवश्यत्वेन शोचितृत्वेनासर्वज्ञत्वेन उपासनायत्तमुक्तित्वेन निरवद्यत्वेन सर्वज्ञत्वेन सत्यसङ्कल्पत्वेन सर्वेश्वरत्वेन समस्तकल्याणगुणाकरत्वादिना च स्वरूपस्य स्वभावस्य नानात्वव्यपदेशात् तयोरेव *तत्त्वमसि *अय-मात्मा ब्रह्म *योऽसौ सोऽहं योऽहं सोऽसौ *अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद *अकृत्स्नो ह्येषः...आत्मेत्येवोपासीत *ब्रह्मदाशा ब्रह्मदासा ब्रह्म मे कितवाः* इति च सर्वजीवात्म व्यापित्वेनाभेदव्यपदेशाच्च, उभयव्यपदेशाविरोधेन परमात्मांशो जीवात्मेत्यभ्युपगन्तव्यम् । न

Digitization by Arya Samaj Charitable Foundation, Chennai

केवलं न्यायसिद्धमिदं, श्रुतिस्मृतिभ्याश्चांशत्वमुक्तं जीवात्मनः *पादोऽस्य विश्वा भूतानि *ममैवांशो जीवलोके जीवभूतस्सनातनः* इति। अंशत्वंनाम एकवस्त्वेकदेशत्वम्। तथा सत्युभयोरेकवस्तुत्वेनाविरोधो न स्यादित्याशङ्क्य, *प्रकाशादिवत्तु नैवं परः* इति परिहरति। अन्यविशेषणतैकस्वभावप्रकाशजातिगुणशरीरविशिष्टानग्निव्यक्तिगुण्यात्मनः प्रति प्रकाशजातिगुणशरीराणां यथा अंशत्वम्; एवं परमात्मानं प्रत्यगात्मशरीरकं प्रति प्रत्यगात्मनोंऽशत्वम्। एवम् अशत्वे यत्स्वभावोंऽशभूतो जीवः, नैवमंशी परमात्मा, सर्वत्र विशेषणविशेष्ययोस्स्वरूपस्वभावभेदात्। एवञ्च *कर्ता शास्त्रार्थवत्त्वात् *परात्तु तच्छ्रुतेः* इत्यनन्तरोक्तञ्च न विरुध्यते। एवं प्रकाशशरीरवज्जीवात्मनाम् अंशत्वं पराशरादयस्स्मरन्ति च *एकदेशस्थितस्याग्नेः ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्॥ *यत्किञ्चित् सृज्यते येन सत्त्वजातेन वै द्विज। तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः॥ *ते सव सर्वभूतस्य विष्णोरंशसमुद्भवाः* इति। अन्यथा पारमार्थिकापारमार्थिकोपाधिसमाश्रयणे प्रत्यगात्मनोंऽशत्वे ब्रह्मण एव वेदान्तनिवर्त्यास्सर्वे दोषा भवेयुरिति *आभासा एव चेत्यादिसूत्रैरुक्तम्। अतस्सर्वदा चिदचिद्वस्तुशरीरतया तदात्मभूतमेव ब्रह्म, कदाचिदविभक्तनामरूपचिदचिद्वस्तुशरीरं तत्कारणावस्थम्, कदाचिच्च विभक्तनामरूपचिदचिद्वस्तुशरीरं तत्कार्यावस्थं ब्रह्म। सर्वदा चिदचिद्वस्तुशरीरतया तद्विशिष्टत्वेऽपि ब्रह्मणः परिणामित्वापुरुषार्थाश्रयत्वे शरीरभूतचेतनाचेतनवस्तुगते; आत्मभूतं ब्रह्म सर्वदा निरस्तनिखिलदोषगन्धानवधिकातिशयासङ्ख्येयज्ञानानन्दाद्यपरिमितोदारगुणसागरमवतिष्ठत इति ब्रह्मैव जगन्निमित्तमुपादानञ्चेति *यतो वा इमानि* इत्यादिवाक्यं प्रतिपादयत्येवेति जन्माद्यस्य यतस्तत् ब्रह्मेति सुष्ठूक्तम्। *सदेव सोम्येदमग्रआसीत्, एकमेवाद्वितीयम् *तदैक्षत बहु स्यां प्रजायेयेत[illegible]य चायमर्थः—*यस्यात्मा शरीरम्, *यस्याक्षरं शरीरम्, यस्य पृथिवी शरीरम्, यस्याव्यक्तं शरीरम्, एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः* इत्यादिश्रुतेः ब्रह्मणः सर्वदा चिदचिद्वस्तुशरीरकत्वात् सदेवेदमिदानीं स्थूलचिदचिद्वस्तुशरीरकत्वेन विभक्तनामरूपम्, अग्रे—प्रलयकाले, सूक्ष्मदशापन्नचिदचिद्वस्तुशरीरतया नामरूपविभागानर्हमेकमेवासीत्। स्वयमेव ब्रह्म सर्वज्ञं सर्वशक्ति निमित्तान्तरानपेक्षमद्वितीयंचातिष्ठत्। *तदैक्षत बहु स्यां प्रजायेयेति तन्नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरकतया एकमेवावस्थितं नामरूपविभागार्हस्थूलदशापत्त्या बहुप्रकारं स्यामिति ऐक्षत। स्यां, प्रजायेयेति व्यष्टिसमष्टिव्यपदेशः। चिदचितोः परस्य च प्रलयकालेऽपि व्यवहारानर्हसूक्ष्मभेदः सर्ववेदान्तिभिरभ्युपगतः, अविद्याकृतभेदस्य उपाधिकृतभेदस्य च अनादित्वाभ्युपगमात्। इयांस्तु विशेषः—ब्रह्मैवाज्ञम् उपाधिसंबद्धं चेति सर्वश्रुतिस्मृतिन्यायविरोधोऽन्येषाम्, तदभावादविरोधश्चास्माकम्—इति॥ २॥

3 शास्त्रयोनित्वात्॥ एवं चिदचिद्वस्तुशरीरतया तद्विशिष्टस्य ब्रह्मण एव जगदुपादानत्वं निमित्तत्वंच नानुमानगम्यमिति शास्त्रैकप्रमाणकत्वात्तस्य *यतो वा इमानि भूतानीत्यादिवाक्यम्, निखिलजगदेककारणं ब्रह्म बोधयत्येवेति सिद्धम्॥ ३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

4 तत्तु समन्वयात् ॥ पुरुषार्थतयाऽन्वयः समन्वयः; शास्त्राख्यप्रमाणस्य पुरुषार्थपर्यवसायित्वेऽपि ब्रह्म स्वस्य परस्य चानुभवितुः अविशेषेण स्वरूपेण गुणैः विभूत्या च अनुभूयमानम् अनवधिकातिशयानन्दरूपमिति पुरुषार्थत्वेनाभिधेयतयाऽन्वयात्, ब्रह्मणश्शास्त्रप्रमाणकत्वमुपपन्नतरमिति निरवद्यं निखिल जगदेककारणं ब्रह्म वेदान्ताः प्रतिपादयन्तीत्युक्तम्। तस्यैकस्यैकदैव कृत्स्नजगन्निमित्तत्वं तस्यैवोपादानतया जगदात्मकत्वञ्च नानुमानादिगम्यमिति शास्त्रैकप्रमाणकत्वात्, तस्य चानवधिकातिशयानन्दरूपतया परमपुरुषार्थत्वाद्वेदान्ताः प्रतिपादयन्त्येवेति स्थिरीकृतम् ॥ ४ ॥

अतः परं पादशेषेण जगत्कारणतया प्रधानपुरुषप्रतिपादनानर्हतया सर्वज्ञं सत्यसङ्कल्पं निरस्ताविद्यादिसमस्तदोषगन्धम् अपरिमितोदारगुणसागरं ब्रह्मैव वेदान्ताः प्रतिपादयन्तीत्युच्यते। तत्र तावत्प्रधानं वेदान्तप्रतिपादनानर्हमित्याह—

5 ईक्षतेर्नाशब्दम् ॥ अशब्दम्—आनुमानिकं प्रधानम्। तत् वेदान्तवेद्यं न; कुतः? ईक्षतेः—*सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्* इति प्रस्तुतजगत्कारणव्यापारवाचिनः ईक्षतेर्धातोश्श्रवणात् *तदैक्षत बहु स्यामिति ॥ ५ ॥

6 गौणश्चेन्नात्मशब्दात् ॥ *तत्तेज ऐक्षत* इत्यादिषु अचेतनेऽपि वस्तुनि ईक्षतिश्श्रूयते। तत्र गौणः; एवमत्रापि प्रधान एवेक्षतिर्गौण इति चेत्; नैतदुपपद्यते, प्रस्तुते सच्छब्दवाच्ये श्रूयमाणाच्चेतनवाचिनः आत्मशब्दात्। *स आत्मा तत्त्वमसि श्वेतकेतो* इति ह्युत्तरत्र श्रूयते। तेजःप्रभृतिष्वपि न गौणमीक्षणम्। तेजःप्रभृतिशब्दैरपि तत्तच्छरीरकं ब्रह्मैवाभिधीयते, *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकजीवानुप्रवेशादेव सर्वस्य वस्तुनो नामरूपभाक्त्वात्। *तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, निरुक्तंचानिरुक्तंच, निलयनंचानिलयनंच, विज्ञानंचाविज्ञानंच, सत्यंचानृतंच सत्यमभवत्* इति चेतनमचेतनंच पृथक् निर्दिश्य तदुभयमनुप्रविश्य सत्त्यच्छब्दवाच्योऽभवदिति हि समानप्रकरणे स्पष्टमभिहितम् ॥ ६ ॥

7 तन्निष्ठस्य मोक्षोपदेशात् ॥ इतश्च प्रधानादर्थान्तरभूतं सच्छब्दाभिहितं जगत्कारणम्; सच्छब्दाभिहिततत्त्वनिष्ठस्य मोक्षोपदेशात्। *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये* इति हि तन्निष्ठस्य मोक्ष उपदिश्यते। प्रधानकारणवादिनामपि हि प्रधाननिष्ठस्य मोक्षो नाभिमतः ॥ ७ ॥

8 हेयत्वावचनाच्च ॥ यदि प्रधानमत्र विवक्षितम्; तदा तस्य हेयत्वात् अध्येयत्वमुच्येत। न तदुच्यते। मोक्षसाधनतया ध्येयत्वमेवात्रोच्यते *तत्त्वमसि श्वेतकेतो *इत्यादिना ॥ ८ ॥

इतश्च न प्रधानम्—

9 प्रतिज्ञाविरोधात् ॥ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधात्। सच्छब्दवाच्यतत्त्वज्ञानेन तत्कार्यतया चेतनाचेतनसर्ववस्तुज्ञानम्, *येनाश्रुतं श्रुतं भवतीत्यादिना प्रतिज्ञातम्। तद्धि प्रधान-

Digitization by Arya Samaj Charitable Foundation, Chennai

कारणवादे विरुध्यते, चेतनस्य प्रधानकार्यत्वाभावात्। प्रधानादर्थान्तरभूतब्रह्मकारणवादे चिदचिद्वस्तुशरीरं ब्रह्मैव नामरूपविभागाविभागाभ्यां कार्यं कारणश्चेति ब्रह्मज्ञानेन कृत्स्नस्य ज्ञाततोपपद्यते ॥ ९ ॥

इतश्च न प्रधानम्—

10 स्वाप्ययात् ॥ *स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषस्स्वपिति नाम सता सोम्य तदा संपन्नो भवति, स्वमपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति* इति जीवस्य चेतनस्य सुषुप्तस्य सता संपन्नस्य स्वाप्ययवचनात् प्रधानादर्थान्तरभूतं सच्छब्दवाच्यमिति विज्ञायते। स्वमपीतो भवति—आत्मानमेव जीवोऽपीतो भवतीत्यर्थः। चिद्वस्तुशरीरकं तदात्मभूतं ब्रह्मैव जीवशब्देनाभिधीयत इति नामरूपव्याकरणं श्रुत्युक्तम्। तज्जीवशब्दाभिधेयं परं ब्रह्मैव सुषुप्तिकालेऽपि प्रलयकाल इव नामरूपपरिष्वङ्गाभावात् केवलसच्छब्दाभिधेयमिति *सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीत्युच्यते। तथा समानप्रकरणे नामरूपपरिष्वङ्गाभावेन प्राज्ञेनैव परिष्वङ्गात् *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्* इत्युच्यते। आमोक्षाज्जीवस्य नामरूपपरिष्वङ्गादेव हि स्वव्यतिरिक्तविषयज्ञानोदयः। सुषुप्तिकाले हि नामरूपे विहाय सता संपरिष्वक्तः पुनरपि जागरदशायां नामरूपे परिष्वज्य तत्तन्नामरूपो भवतीति श्रुत्यन्तरे स्पष्टमभिधीयते। यथा—*सुप्युप्तः...स्वप्नं न कञ्चन पश्यति *अथास्मिन्प्राण एवैकधा भवति, एतस्माद्वा आत्मनः प्राणा यथायथं विप्रतिष्ठन्ते। तथा *त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा... यद्यद्भवन्ति तथा भवन्ति* इति ॥ १० ॥

11 गतिसामान्यात् ॥ सकलोपनिषद्गतिसामान्यादस्यामप्युपनिषदि न प्रधानं कारणमिति ज्ञायते। आत्मा वा इदमेक एवाग्र आसीत्, नान्यत्किञ्चन मिषत्, स ईक्षत लोकान्नु सृजा इति, स इमाल्लोकानसृजत *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *स कारणं करणाधिपाधिपो नचास्य कश्चिज्जनिता न चाधिपः* इत्यादिसकलोपनिषत्सु सर्वेश्वर एव हि जगत्कारणमिति प्रतिपाद्यते ॥ ११ ॥

12 श्रुतत्वाच्च ॥ श्रुतमेव ह्यस्यामुपनिषदि—*आत्मतः प्राण ..आत्मन आकाशः* इत्यादौ आत्मन एव सर्वोत्पत्तिः; अतः प्रधानादचेतनादर्थान्तरभूतस्सर्वज्ञः पुरुषोत्तम एव जगत्कारणं ब्रह्मेति स्थितम् ॥ १२ ॥

13 आनन्दमयोऽभ्यासात् ॥ यद्यपि प्रधानादर्थान्तरभूतस्य प्रत्यगात्मनश्चेतनस्य ईक्षणगुणयोगस्संभवति, तथाऽपि प्रत्यगात्मा बद्धो मुक्तश्च न जगत्कारणम्, *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः* इत्यारभ्य *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः* इत्यस्य आनन्दमयत्वप्रतिपादनात् कारणतया व्यपदिष्टोऽयमानन्दमयः प्रत्यगात्मनोऽर्थान्तरभूतः सर्वज्ञः परमात्मैव। कुतः? अभ्यासात्—आनन्दमयस्य निरतिशयदशाशिरस्कानन्दमयत्वेना-

Digitization by Arya Samaj Charitable Foundation, Chennai

भ्यासात् । *ते ये शतं प्रजापतेरानन्दाः, स एको ब्रह्मण आनन्दः *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चन* इति हि वेद्यत्वेनायमानन्दमयोऽनवधिकातिशयोऽभ्यस्यते ॥ १३ ॥

14 विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ *स वा एष पुरुषोऽन्नरसमयः* इति विकारार्थमयट्प्रकरणात् *आनन्दमयः* इत्यस्यापि विकारार्थत्वं प्रतीयते । अतोऽयमानन्दमयः नाविकाररूपः परमात्मा, इति चेन्न; अर्थविरोधात्; प्राचुर्यार्थ एवायं मयडिति विज्ञायते । *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः* इति ह्यविकार आत्मा प्रकृतः । प्रकरणे च विकारार्थत्वं प्राणमय एव परित्यक्तम् । उक्तेन न्यायेन आनन्दप्राचुर्यात् परमपुरुष एवायमानन्दमयः ॥ १४ ॥

15 तद्धेतुव्यपदेशाच्च ॥ *एष ह्येवानन्दयातीति जीवान्प्रत्यानन्दहेतुरयमानन्दमयो व्यपदिश्यते; अतश्चायं न प्रत्यगात्मा ॥ १५ ॥

16 मान्त्रवर्णिकमेव च गीयते ॥ *सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितमेव *तस्माद्वा एतस्मादित्यादिना आनन्दमय इति गीयते; अतश्च न प्रत्यगात्मा ॥ १६ ॥

17 नेतरोऽनुपपत्तेः ॥ इतरः—प्रत्यगात्मा मन्त्रवर्णोदित इति नाशङ्कनीयम्, *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति प्रत्यगात्मनो बद्धस्य मुक्तस्य च ईदृशविपश्चित्त्वानुपपत्तेः । *सोऽकामयत, बहु स्यां प्रजायेयेति विचित्रस्थिरत्रसरूपबहुभवनसङ्कल्परूपमिदं विपश्चित्त्वमिति ह्युत्तरत्र व्यज्यते । मुक्तस्य सर्वज्ञस्यापि जगद्व्यापाराभावादीदृशविपश्चित्त्वासंभवः ॥ १७ ॥ इतश्च—

18 भेदव्यपदेशाच्च ॥ *तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः* इति हि विज्ञानमयात् प्रत्यगात्मनो भेदेनायमानन्दमयो व्यपदिश्यते । न च विज्ञानमयविषयतया उदाहृतश्लोके *विज्ञानं यज्ञं तनुते* इति व्यपदेशात् विज्ञानमयो बुद्धिमात्रमित्याशङ्कनीयम्; यतस्सूत्रकार एव इमामाशङ्कां परिहरिष्यति *व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः* इति । *विज्ञानं यज्ञं तनुते* इति यज्ञादिक्रियायां जीवस्य कर्तृत्वव्यपदेशाच्च जीवः कर्ता । विज्ञानशब्देन जीवस्याव्यपदेशे बुद्धिमात्रव्यपदेशे च विज्ञानेनेति निर्देशविपर्ययस्स्यात्, बुद्धेः करणत्वादिति ॥ १८ ॥ इतश्च—

19 कामाच्च नानुमानापेक्षा ॥ *सोऽकामयत, बहु स्यामिति स्वकामादेवास्य जगत्सर्गश्श्रूयते । प्रत्यगात्मनो हि यस्य कस्यचित्सर्गे आनुमानापेक्षा दृश्यते । अनुमानगम्यं प्रधानम् आनुमानम् ॥ १९ ॥ इतश्च—

20 अस्मिन्नस्य च तद्योगं शास्ति ॥ अस्मिन्—आनन्दमये, अस्य—प्रत्यगात्मनः, आनन्दयोगं शास्ति *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति* इति । अतः प्रत्यगात्मनोऽर्थान्तरभूतः सर्वज्ञः पुरुषोत्तमः जगत्कारणभूतः आनन्दमयः ॥ २० ॥

21 अन्तस्तद्धर्मोपदेशात् ॥ अयं जगत्कारणभूतः विपश्चिदानन्दमयः, कश्चिदुपचितपुण्यविशेषो जीवविशेषः देहयोगाद्विज्ञायते, नायं परमात्मेति नाशङ्कनीयम्; *य एषोऽन्तरादित्ये

Digitization by Arya Samaj Charitable Foundation, Chennai

हिरण्मयः पुरुषः* इत्यादौ श्रूयमाणः पुरुषाकारः परमात्मैव । कुतः ? तद्धर्मोपदेशात्; *स एष सर्वेषां लोकानामीशः सर्वेषां कामानाम् *तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः* इति निरुपाधिकसर्वलोकसर्वकामेशत्वं स्वत एवाकर्मवश्यत्वं च प्रत्यगात्मनोऽर्थान्तरभूतस्य हि परमपुरुषस्यैव धर्मः । *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्* इत्यादिषु त्रिगुणात्मकप्रकृत्यनन्तर्गताप्राकृतस्वासाधारणरूपवत्त्वं च ज्ञानादिगुणवत्तस्यैव हि श्रूयते । ज्ञानादयोऽपि *सत्यं ज्ञानमनन्तं ब्रह्म *यस्सर्वज्ञस्सर्ववित् *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च* इत्यादिषु श्रुतत्वात् तस्य गुणा विज्ञायन्ते । तथा *आदित्य-वर्णं तमसः परस्तात्* इत्यादिषु अप्राकृतस्वासाधारणरूपश्रवणात् तद्वत्ता च विज्ञायते । तदेतद्वाक्यकारश्चाह—*हिरण्मयः पुरुषो दृश्यते इति प्राज्ञस्सर्वान्तरस्स्यात् लोककामेशोपदेशात् तथोदयात्पाप्मनाम्* इत्युक्त्वा, तद्रूपस्य कार्यत्वं मायामयत्वं वेति विचार्य, *स्याद्रूपं कृतकमनु-ग्रहार्थं तच्चेतसामैश्वर्यात्* इति निरसनीयं मतमुपन्यस्य, *रूपं वाऽतीन्द्रियम् अन्तःकरणप्रत्यक्ष-निर्देशात्* इति । व्याख्यातं च द्रमिडाचार्यैः—*न वा मायामात्रमञ्जसैव विश्वसृजो रूपम्, तत्तु न चक्षुषा ग्राह्यम्, मनसा त्वकलुषेण साधनान्तरवता गृह्यते, *न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेनेति श्रुतेः; न ह्यरूपाया देवतायाः रूपमुपदिश्यते; यथाभूतवादि हि शास्त्रम्; यथा *माहारजतं वासः *वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णमिति प्रकरणान्तरनिर्देशात्* इति । *साक्षिण इति हिरण्मय इति रूपसामान्याच्चन्द्रमुखवत्* इति च वाक्यम् । तच्च व्याख्यातं तैरेव *न मयडत्र विकारमादाय प्रयुज्यते, अनारभ्यत्वादात्मनः *इत्यादिना । अतः प्रधानात् प्रत्यगात्मनश्चार्थान्तरभूतो निरुपाधिकविपश्चिदनवधिकातिशयानन्दोऽप्राकृतस्वासाधारणदिव्यरूपः पुरुषोत्तमः परं ब्रह्म जगत्कारणमिति वेदान्तैः प्रतिपाद्यत इति निरवद्यम् ॥ २१ ॥

22 भेदव्यपदेशाच्चान्यः ॥ *य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यश्शरीरं य आदित्यमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत इत्यधिदैवतम्, यश्चक्षुषि तिष्ठन् यं आत्मनि तिष्ठन् इत्यध्यात्मम्, यस्सर्वेषु लोकेषु तिष्ठन्नित्यधिलोकम्, यस्सर्वेषु भूतेषु तिष्ठन्नित्यधिभूतम्, यस्सर्वेषु वेदेषु तिष्ठन्नित्यधिवेदम्, यस्सर्वेषु यज्ञेषु तिष्ठन्नित्यधियज्ञम्* इत्यन्तर्यामिब्राह्मणे । सुबालोपनिषदि च *यः पृथिवीमन्तरे सञ्चरन्नित्यारभ्य, *योऽव्यक्तमन्तरे सञ्चरन् योऽक्षरमन्तरे सञ्चरन् यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युश्शरीरम् यं मृत्युर्न वेद एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः* इति सर्वदेवसर्वलोकसर्वभूतसर्ववेदसर्वयज्ञसर्वात्मो-परिवर्तमानतया तत्तच्छरीरतया तत्तदन्तरात्मतया तत्तदवेद्यतया तत्तन्नियन्तृतया चैभ्यस्सर्वेभ्यः भेदव्यपदेशाच्च, अयमपहतपाप्मा नारायणः प्रधानात् प्रत्यगात्मनश्च अर्थान्तरभूतो निखिलजगदेक-कारणमिति सिद्धम् ॥ २२ ॥

23,24 आकाशस्तल्लिङ्गात् ॥ अत एव प्राणः ॥ *सर्वाणि ह वा इमानि भूतान्याकाशादेव

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्मुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति, *सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमेवाभ्युज्जिहते* इत्यादौ, *सदेव सोम्येदमग्र आसीदित्यादिना सामान्येन निर्दिष्टस्य जगत्कारणस्य भूताकाशप्राणसहचारिजीववाचिशब्दाभ्यां विशेषनिर्णयशङ्कायां *सर्वाणि ह वा इमानि भूतानीति प्रसिद्धवन्निर्दिश्यमानात् जगत्कारणत्वादिलिङ्गात् भूताकाशजीवाभ्याम् अर्थान्तरभूतः परमपुरुष एवात्र आकाशप्राणशब्दनिर्दिष्ट इति निश्चीयते । तत्प्रसिद्धिस्तु—बहुभवनरूपेक्षणानवधिकातिशयानन्दजीवानन्दहेतुत्वविज्ञानमयविलक्षणत्वनिखिलभुवनभयाभयहेतुत्वसर्वलोकसर्वकामेशत्वसर्वपाप्मोदयाप्राकृतस्वासाधारणरूपविशिष्टस्य रविकरविकसितपुण्डरीकनयनस्य सर्वज्ञस्य सत्यसङ्कल्पस्य करणाधिपाधिपस्य परमपुरुषस्यैव निखिलजगदेककारणत्वादिति स एव आकाशप्राणशब्दाभ्यां जगत्कारणत्वेनाभिधीयत इति निर्णयो युक्त एव ॥ २३ ॥ २४ ॥

25 ज्योतिश्चरणाभिधानात् *अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः* इत्यत्र सर्वस्मात्परत्वेन निर्दिश्यमानतया सकलकारणभूतज्योतिषः काक्षेयज्योतिषैक्याभिधानात्, स्ववाक्ये विरोधिलिङ्गादर्शनाच्च प्रसिद्धमेव ज्योतिर्जगत्कारणत्वेन प्रतिपाद्यत इति शङ्कायाम्; यद्यपि स्ववाक्ये विरोधिलिङ्गं न दृश्यते; तथाऽपि पूर्वस्मिन् वाक्ये *पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि* इति प्रतिपादितस्य सर्वभूतचरणस्य परमपुरुषस्यैव द्युसंबन्धितयाऽत्रापि प्रत्यभिज्ञानात् स एव ज्योतिश्शब्देन सर्वस्मात् परत्वेन सकलकारणतयाऽभिधीयते । अस्य च कौक्षेयज्योतिषैक्याभिधानं फलायोपदिश्यत इति न कश्चिद्विरोधः । अखिलजगदेककारणभूतः परमपुरुषोऽप्राकृतस्वासाधारणदिव्यवर्णो दिव्यरूपस्तमसः परस्ताद्वर्तत इति तस्यैव निरतिशयदीप्तियोगात् ज्योतिश्शब्दाभिधेयत्वम् विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु वासश्च युज्यते ॥ २५ ॥

26 छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात्तथा हि दर्शनम् ॥ पूर्वत्र *गायत्री वा इदं सर्वमिति गायत्र्याख्यच्छन्दः प्रस्तुतमिति नात्र परमपुरुषाभिधानमिति चेत्, नैतत्, परमपुरुषस्यैव गायत्रीसादृश्यस्य अनुसन्धानोपदेशत्वात्, तस्य छन्दोमात्रस्य सर्वभूतात्मकत्वानुपपत्तेरेवेति निगम्यते । अन्यत्रापि ह्यन्यस्य छन्दस्सादृश्यात् छन्दोनिर्देशो दृश्यते *ते वा एते पञ्चान्ये *इत्यारभ्य *सैषा विराट्* इत्यादौ ॥ २६ ॥

27 भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ भूतपृथिवीशरीरहृदयैश्चतुष्पदेति व्यपदेशश्च परमपुरुषे गायत्रीशब्दनिर्दिष्टे ह्युपपद्यत इति पूर्वोक्तप्रकार एव समञ्जसः ॥ २७ ॥

28 उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ पूर्वत्र* त्रिपादस्यामृतंदिवीति परमपुरुषो व्यपदिश्यते । अत्र *अथ यदतः परो दिवः इति पञ्चम्या निर्दिष्टः द्युसंबन्धिज्योतिरिति न प्रत्यभिज्ञेति चेत्; नैतत्, उभयस्मिन्नपि व्यपदेशे विरोधाभावात्; यथा वृक्षाग्रे श्येनः, वृक्षाग्रात्परतश्श्येनः इति व्यपदेशः । अत्र दिवः परत्वमेव उभयत्र विवक्षितमित्यर्थः ॥ २८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

29 प्राणस्तथाऽनुगमात् ॥ आत्मनां हिततमरूपमोक्षसाधनोपासनकर्मतया प्रज्ञातजीवभावस्य इन्द्रस्य *प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति विधानात् स एव जगत्कारणम्; कारणोपासनं हि मोक्षसाधनम्, *तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये *इति श्रुतेरिति नाशङ्कनीयम्; प्राणशब्दसमानाधिकरणेन्द्रशब्दनिर्दिष्टो जीवादर्थान्तरभूत उक्तलक्षणः परमात्मैव। कुतः? तथानुगमात्; परमात्मासाधारणानन्दाजरामृतादिष्वस्येन्द्रप्राणशब्दनिर्दिष्टस्यानुगमो हि दृश्यते—*स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः* इति ॥ २९ ॥

30 न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ उपक्रमे हि *मामेव विजानीहीति त्वाष्ट्रवधादिना प्रज्ञातजीवभावस्य इन्द्रस्योपदेशात्, उपसंहारस्तदनुगुणो वर्णनीय इति चेत्; नैतत्; अध्यात्मसंबन्धभूमा ह्यस्मिन्—अध्यात्मं—परमात्मधर्मः। परमात्मधर्मसंबन्धबहुत्वमस्मिन्निन्द्रशब्दाभिधेये, वाक्योपक्रमप्रभृत्योपसंहाराद्दृश्यते। *यं त्वं मनुष्याय हिततमं मन्यस इति हिततमोपासनं प्रारब्धम्। तच्च परमात्मधर्मः, *तमेवं विद्वानमृत इह भवति, नान्यः पन्था इत्यादिश्रुतेः। तथा *एष एव साधु कर्म कारयतीत्यादिना सर्वस्य कारयितृत्वम्, *एवमेवैता भूतमात्रा* इत्यारभ्य *प्रज्ञामात्राः प्राणेष्वर्पिताः* इति सर्वाधारत्वं, तथा आनन्दादयश्च, *एष लोकाधिपतिरित्यादिना सर्वेश्वरत्वंच ॥ ३० ॥

31 शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ नामरूपव्याकरणादिशास्त्रात्सर्वशब्दैः परमात्मैवाभिधीयत इति दृष्ट्या तज्ज्ञापनायायमिन्द्रशब्देन परमात्मोपदेशः। शास्त्रस्था हि वामदेवादयः तथैव वदन्ति—*तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति ॥ ३१ ॥

32 जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ *त्रिशीर्षाणं त्वाष्ट्रमहनम्, यावध्द्यस्मिन् शरीरे प्राणो वसति तावदायुः* इत्यादिजीवलिङ्गं, मुख्यप्राणलिङ्गं चास्मिन् दृश्यत इति नैवमिति चेन्न; उपासात्रैविध्यात् हेतोर्जीवशब्देन प्राणशब्देन च परमात्मनोऽभिधानम्। अन्यत्रापि परमात्मनः स्वरूपेणोपासनं भोक्तृशरीरकत्वेन भोग्यभोगोपकरणशरीरकत्वेनेति त्रिविधं परमात्मोपासनमाश्रितम्। यथा *सत्यं ज्ञानमनन्तं ब्रह्मेति स्वरूपेण, *तदनुप्रविश्य, सच्च त्यच्चाभवदित्यादि *सत्यंचानृतंच सत्यमभवत्* इति भोक्तृशरीरकत्वेन भोग्यभोगोपकरणशरीरकत्वेन च। इहापि तत्संभवादेवमुपदेशः। *जन्माद्यस्य यतः इत्यादिषु सद्ब्रह्मात्मेति सामान्यशब्दैर्हि जगत्कारणं प्रकृतिपुरुषाभ्यामर्थान्तरभूतमिति साधितम्। *ज्योतिश्चरणाभिधानादित्यस्मिन् सूत्रे पुरुषसूक्तोदितो महापुरुषो जगत्कारणमिति विशेषतो निर्णीतम्। स एव प्रज्ञातजीववाचिभिरिन्द्रादिशब्दैरपि क्वचित्क्वचिच्छास्त्रदृष्ट्या तत्तच्छरीरकतया चोपास्यत्वायोपदिश्यत इति *शास्त्रदृष्ट्या तूपदेशो वामदेववदिति उपासात्रैविध्यादिति साधितम् ॥ ३२ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे प्रथमस्याध्यायस्य प्रथमः पादः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रथमाध्याये द्वितीयः पादः

33 सर्वत्र प्रसिद्धोपदेशात् ॥ *सर्वं खल्विदमिति निर्दिष्टेन सामानाधिकरण्येन निर्दिष्टं ब्रह्म परमात्मा; कुतः ? प्रसिद्धोपदेशात् *तज्जलानिति हेतुतस्सर्वात्मकत्वोपदेशादित्यर्थः । प्रसिद्धं हि हेतुतया व्यपदिश्यते । सकलोपनिषत्सु ब्रह्मैव हि जगज्जन्मलयजीवनहेतुतया प्रसिद्धं *यतो वा इमानीत्यादिषु ॥ १ ॥

34 विवक्षितगुणोपपत्तेश्च ॥ मनोमयत्वसत्यसङ्कल्पत्वादयो विवक्षितगुणाः ब्रह्मण्येवोपपद्यन्ते ॥ २ ॥

35 अनुपपत्तेस्तु न शारीरः ॥ दुःखमिश्रपरिमितसुखलवभागिनि शारीरे तु एषां गुणानामनुपपत्तेर्न शारीरोऽयम् ॥ ३ ॥

36 कर्मकर्तृव्यपदेशाच्च ॥ *एतमितः प्रेत्याभिसंभविताऽस्मि* इत्यभिसंभाव्याभिसंभवितृत्वेन प्रस्तुतब्रह्मजीवयोर्व्यपदेशादभिसंभाव्यं ब्रह्म जीवादर्थान्तरम् ॥ ४ ॥

37 शब्दविशेषात् ॥ *एष म आत्माऽन्तर्हृदये* इति षष्ठ्या प्रथमया च जीवो ब्रह्म च व्यपदिश्यते । ततश्चार्थान्तरम् ॥ ५ ॥

38 स्मृतेश्च ॥ अत्रापि प्रथमया निर्दिष्टः पुरुषोत्तम इति निश्चीयते *सर्वस्य चाहं हृदि सन्निविष्टः* इति हि स्मृतिः ॥ ६ ॥

39 अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ *एष म आत्माऽन्तर्हृदये अणीयान् व्रीहेः* इत्यादिना अल्पायतनत्वात्, स्वरूपाल्पत्वस्य व्यपदेशाच्च, नायं पर इति चेन्न; उपास्यत्वाद्धेतोस्तथा व्यपदेशः, नतु स्वरूपाल्पत्वेन, व्योमवत्; स्वरूपमहत्वं चात्रैव व्यपदिश्यते *ज्यायान् पृथिव्याः ज्यायानन्तरिक्षादित्यादिना ॥ ७ ॥

40 संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ परोऽप्यन्तश्शरीरे वसति चेत्, जीववत् सुखदुःखोपभोगप्राप्तिस्स्यादिति चेन्न, हेतुवैशेष्यात्; परस्य हि छन्दतो जीवरक्षार्थं शरीरान्तर्वासः ॥८॥

41 अत्ता चराचरग्रहणात् ॥ *यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः* इत्यत्र ओदनोपसेचनसूचितोऽत्ता परमपुरुषः, ब्रह्मक्षत्रोपलक्षितस्य चराचरस्य कृत्स्नस्य मृत्यूपसेचनत्वेन अदनीयतया ग्रहणात् ॥ ९ ॥

42 प्रकरणाच्च ॥ *महान्तं विभुमात्मानं मत्वा धीरो न शोचति, नायमात्मा प्रवचनेन लभ्यः *इत्यादिना परस्यैव प्रकृतत्वात्, स एवायम् ॥ १० ॥

43 गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ अनन्तरम् *ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये* इत्यादिना जीवपरमात्मानावेव प्रयोज्यप्रयोजकभावेन कर्मफलाशनेऽन्वयादुपदिष्टौ, तयोरेवास्मिन् प्रकरणे गुहाप्रवेशदर्शनात्; *तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

परस्य *या प्राणेन संभवत्यदितिर्देवतामयी, गुहां प्रविश्य तिष्ठन्तीति जीवस्य । कर्मफलादनाददितिर्जीवः ॥ ११ ॥

44 विशेषणाच्च ॥ जीवपरावेव हि सर्वत्रास्मिन्प्रकरणे विशेष्येते, *न जायते म्रियते वा विपश्चिदित्यादौ जीवः, *अणोरणीयान् महतो महीयान्, *महान्तं विभुमात्मानम्* नायमात्मा प्रवचनेन *विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्* इत्यादिषु परः । *त्रिपादस्यामृतं दिवि *अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु* इति विश्वतः प्राकृतात् स्थानात् परं विष्णोः परस्थानमेव हि संसाराध्वनः पारभूतं मुमुक्षुभिः प्राप्यम् *परमं पदं सदा पश्यन्ति सूरयः *तदक्षरे परमे व्योमन् *क्षयन्तमस्य रजसः पराके *विश्वं पुराणं तमसः परस्तात् *ते ह नाकं महिमानस्सचन्ते, यत्र पूर्वे साध्यास्सन्ति देवाः* इत्यादिसकलोपनिषत्प्रसिद्धम् ॥ १२ ॥

45 अन्तर उपपत्तेः ॥ *य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म* इत्यत्र अक्ष्याधारः परमपुरुषः, निरुपाधिकामृतत्वाभयत्वसंयद्वामत्वादीनामस्मिन्नेवोपपत्तेः ॥ १३ ॥

46 स्थानादिव्यपदेशाच्च ॥ *यश्चक्षुषि तिष्ठन्नित्यादिना स्थितिनियमनादिव्यपदेशाच्चायं परः ॥ १४ ॥

47 सुखविशिष्टाभिधानादेव च ॥ *कं ब्रह्म खं ब्रह्मेति पूर्वत्रास्यैव सुखविशिष्टतया अभिधानाच्चायं परः ॥ १५ ॥

48 अत एव च स ब्रह्म ॥ यतस्तत्र भवभीताय उपकोसलाय ब्रह्मजिज्ञासवे *कं ब्रह्म खं ब्रह्मेत्युपदिष्टः *यद्वा व कं तदेव खमिति सुखरूपः; अतस्सुखशब्दाभिधेय आकाशः परमेव ब्रह्म ॥ १६ ॥

49 श्रुतोपनिषत्कगत्यभिधानाच्च ॥ श्रुतब्रह्मस्वरूपाणामधिगन्तव्यतया अर्चिरादिगतेरक्षिपुरुषं श्रुतवते *तेऽर्चिषमेवाभिसंभवन्तीत्यादिनाऽभिधानाच्चायं परमपुरुषः ॥ १७ ॥

50 अनवस्थितेरसंभवाच्च नेतरः ॥ परस्मादितरो जीवादिर्नाक्ष्याधारः; चक्षुषि नियमेन अनवस्थितेः अमृतत्वाद्यसंभवाच्च ॥ १८ ॥

51 अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ॥ *यः पृथिव्यां तिष्ठन्नित्यादिषु अधिदैवाधिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणोऽन्तर्यामी परमपुरुषः, सर्वान्तरत्वसर्वाविदितत्वसर्वशरीरकत्वसर्वनियन्तृत्वादिपरमात्मधर्मव्यपदेशात् ॥ १९ ॥

52 न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च ॥ नायं प्रधानं जीवश्च, तयोरसंभावितसर्वाविदितत्वादिधर्माभिलापात्; असंभावनया यथा न स्मार्तम्, तथा जीवोऽपीत्यर्थः ॥ २० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

53 उभयेऽपि हि भेदेनैनमधीयते ॥ उभये—काण्वा माध्यन्दिनाश्च, *यो विज्ञाने तिष्ठन् *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीति प्रत्यगात्मनो भेदेन, एनम्—अन्तर्यामिणम् अधीयते; अतः पर एवायम् ॥ २१ ॥

54 अदृश्यत्वादिगुणको धर्मोक्तेः ॥ *अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्य-मित्यारभ्य *यद्भूतयोनिं परिपश्यन्ति धीराः *अक्षरात् परतः परः* इत्यादौ प्रधानात्प्रत्यगात्मनश्च अर्थान्तरभूतः परमात्मा प्रतिपाद्यते, *यस्सर्वज्ञस्सर्वविदित्यादिधर्मोक्तेः ॥ २२ ॥

55 विशेषणभेदव्यपदेशाभ्यांच नेतरौ ॥ एकविज्ञानेन सर्वविज्ञानरूपविशेषणव्यपदेशान्न प्रधानम्। *अक्षरात् परतः पर इति प्रधानात्परतः प्रत्यगात्मनोऽपि पर इति भेदव्यपदेशात् न प्रत्यगात्मा च। अथवा सामानाधिकरण्येन परतोऽक्षरात् पञ्चविंशकात् पर इति भेदव्यपदेशः ॥२३॥

56 रूपोपन्यासाच्च ॥ *अग्निर्मूर्धा* इत्यादिना त्रैलोक्यशरीरोपन्यासाच्च परमात्मा ॥२४॥

57 वैश्वानरस्साधारणशब्दविशेषात् ॥ *आत्मानमेवेमं वैश्वानरमित्यादौ वैश्वानरः पर-मात्मा, जाठराग्न्यादिषु साधारणस्यापि वैश्वानरशब्दस्य अस्मिन्प्रकरणे परमात्मासाधारणैः सर्वात्मकत्वब्रह्मशब्दादिभिर्विशेष्यमाणत्वात् ॥ २५ ॥

58 स्मर्यमाणमनुमानं स्यादिति ॥ द्युलोकप्रभृति पृथिव्यन्तं रूपम् *अग्निर्मूर्धेत्या-दिषूक्तम्, अत्र प्रत्यभिज्ञायमानमस्य परमात्मत्वे अनुमानम्—लिङ्गमित्यर्थः ॥ २६ ॥

59 शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैन-मधीयते ॥ *स एषोऽग्निर्वैश्वानरः* इति अग्निशब्दसामानाधिकरण्यात् प्राणाहुत्याधारत्वादिभिः *पुरुषेऽन्तः प्रतिष्ठितमित्यादेश्च नायं परमात्मेति चेत्; नैतत्, जाठराग्निशरीरकत्वेनोपास्यत्वोपदेशात्, केवलजाठराग्नेः त्रैलोक्यशरीरकत्वाद्यसंभवाच्च। *स एषोऽग्निर्वैश्वानरो यत्पुरुषः* इत्येनं वैश्वानरं पुरुषमप्यधीयते वाजिनः। निरुपाधिकपुरुषशब्दश्च परमात्मनि नारायण एव *सहस्रशीर्षमित्यारभ्य, *विश्वमेवेदं पुरुषः* इत्यादिषु प्रसिद्धः ॥ २७ ॥

60 अत एव न देवता भूतंच ॥ यतोऽयं वैश्वानरः त्रैलोक्यशरीरः, पुरुषशब्दनिर्दिष्टश्च, ततोऽयं नाग्न्याख्यदेवता, तृतीयमहाभूतंच ॥ २८ ॥

61 साक्षादप्यविरोधं जैमिनिः ॥ नावश्यमग्निशरीरकत्वेन उपास्यत्वायेदमग्निशब्दसामा-नाधिकरण्यम्, अग्रनयनादियोगेन परमात्मन्येवाग्निशब्दस्य साक्षाद्वृत्तेस्सामानाधिकरण्याविरोधं जैमिनिराचार्यो मन्यते ॥ २९ ॥

62 अभिव्यक्तेरित्याश्मरथ्यः ॥ *यस्त्वेतमेवं प्रादेशमात्रमित्यनवच्छिन्नस्य द्युप्रभृति-परिच्छिन्नत्वमुपासकाभिव्यक्त्यर्थमिति आश्मरथ्यः ॥ ३० ॥

63 अनुस्मृतेर्बादरिः ॥ द्युप्रभृतिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वकल्पनं तथा-

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुस्मृत्यर्थं—ब्रह्मप्रतिपत्तय इति बादरिः ॥ ३१ ॥

64 संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ *उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः* इत्यादिना उपासकहृदयादीनां वेद्यादित्वकल्पनं विद्याङ्गभूतायाः प्राणाहुतेः अग्निहोत्रत्वसंपादनार्थमिति जैमिनिः । दर्शयति च श्रुतिः—*य एतदेवं विद्वानग्निहोत्रं जुहोतीति । एते पक्षास्स्वीकृताः । पूजार्थमाचार्यग्रहणम् ॥ ३२ ॥

65 आमनन्ति चैनमस्मिन् ॥ एनम्—परमात्मानम्, अस्मिन्—उपासितृशरीरे प्राणाहुतिवेलायामनुसन्धानार्थं *तस्य ह वा एतस्य...मूर्धैव सुतेजाः* इत्यादि आमनन्तिच । उपासकस्य मूर्धादिरेवास्य परमात्मनो मूर्धादिरित्यर्थः ॥ ३३ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

॥ प्रथमाध्याये तृतीयः पादः ॥

66 द्युभ्वाद्यायतनं स्वशब्दात् ॥ *यस्मिन्द्यौः पृथिवी चान्तरिक्षमित्यादौ द्युपृथिव्यादीनामायतनम्—आधारः परमपुरुषः; *तमेवैकं जानथात्मानमित्यात्मशब्दात् । निरुपाधिकात्मत्वं हि परमपुरुषस्यैव । *अमृतस्यैष सेतुरिति तदेव द्रढयति । *बहुधा जायमान इति परत्वं न निवारयति; *अजायमानो बहुधा विजायते* इति कर्मभिरजायमानस्यैव आश्रितवात्सल्यात् छन्दतो जननं तस्य हि श्रूयते ॥ १ ॥

67 मुक्तोपसृप्यव्यपदेशाच्च ॥ *तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति *तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्* इति च पुण्यपापविनिर्मुक्तानां प्राप्यतया व्यपदेशाच्चायं परः ॥ २ ॥

68 नानुमानमतच्छब्दात्प्राणभृच्च ॥ यथा न प्रधानमतच्छब्दात्, तथा न प्राणभृदपीत्यर्थः ॥ ३ ॥

69 भेदव्यपदेशात् ॥ *अनीशया शोचति मुह्यमानः, जुष्टं यदा पश्यत्यन्यमीशमित्यादिना प्रत्यगात्मनो भेदेन व्यपदेशाच्चायं परः ॥ ४ ॥

70 प्रकरणात् ॥ *अथ परा यया तदक्षरमधिगम्यते* इत्यादि परस्य हीदं प्रकरणम् ॥५॥

71 स्थित्यदनाभ्यांच ॥ *तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति* इति जीवस्य कर्मफलादनमभिधाय, अनश्नतो दीप्यमानस्य स्थित्यभिधानाच्चायं परमात्मा ॥ ६ ॥

72 भूमा संप्रसादादध्युपदेशात् ॥ *सुखं त्वेव विजिज्ञासितव्यम् *भूमैव सुखम्* इत्युक्त्वा भूम्नस्स्वरूपमाह *यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा* इति; यस्मिन् सुखेऽनुभूयमाने तद्व्यतिरिक्तं किमपि सुखत्वेन न पश्यति न शृणोति न विजानाति स भूमेत्युच्यते, *अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पमिति वचनात् । तथाच

Digitization by Arya Samaj Charitable Foundation, Chennai

महाभारते *दिव्यानि कामचाराणि विमानानि सभास्तथा। आक्रीडा विविधा राजन् पद्मिन्यश्चामलोदकाः। एते वै निरयास्तात स्थानस्य परमात्मनः॥ इति। *एष तु वा अतिवदति यस्सत्येनातिवदतीति प्रस्तुतं चातिवादित्वमेवमेव समञ्जसम्। अतिवादित्वं हि स्वोपास्यपुरुषार्थाधिक्यवादित्वम्। तदल्पमित्यल्पप्रतियोगित्वेन, भूमा इत्युक्तप्रकारवैपुल्याश्रयसुखरूपवाची। अयं भूमशब्दव्यपदिष्टः परमात्मा; संप्रसादादध्युपदेशात्—संप्रसादः प्रत्यगात्मा, *अथ य एष संप्रसादः* इत्यादिश्रुतेः। *एष तु वा अतिवदति यस्सत्येनेत्यादिना प्राणशब्दनिर्दिष्टात् प्रत्यगात्मनः ऊर्ध्वमर्थान्तरत्वेन अस्योपदेशात् ॥ ७ ॥

73 धर्मोपपत्तेश्च ॥ *स भगवः कस्मिन् प्रतिष्ठितः...स्वे महिम्नि* इत्यादावुपदिष्टानस्वमहिमप्रतिष्ठितत्वसर्वकारणत्वसर्वात्मकत्वादिधर्माणां परस्मिन्नेवोपपत्तेश्च भूमा परः ॥ ८

74 अक्षरमम्बरान्तधृतेः ॥ *एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनणु* इत्यादिना अभिहितमक्षरं परं ब्रह्म, अम्बरान्तधृतेः। *यदूर्ध्वं गार्गि दिवः इत्यारभ्य सर्वविकाराधारतया निर्दिष्ट आकाशः *कस्मिन्नोतश्च प्रोतश्चेति पृष्टे *एतद्वै तदक्षरमिति निर्दिष्टस्याक्षरस्य वायुमदम्बरान्तधृतेः; सर्वविकाराधारो ह्ययमाकाशः वायुमदम्बरान्तकारणं प्रधानम्; तद्धारकं परं ब्रह्म ॥ ९ ॥

75 सा च प्रशासनात् ॥ सा च धृतिः, *एतस्य वाऽक्षरस्य प्रशासने गार्गीत्यादिना प्रकृष्टाज्ञया क्रियमाणा श्रूयते। अत इदमक्षरं प्रत्यगात्मा च न भवतीत्यर्थः ॥ १० ॥

76 अन्यभावव्यावृत्तेश्च ॥ अन्यभावः—अन्यत्वम्, *अदृष्टं द्रष्टृ इत्यादिना परमात्मनोऽन्यत्वं ह्यस्याक्षरस्य व्यावर्तयति वाक्यशेषः; अतश्च पर एव ॥ ११ ॥

77 ईक्षतिकर्म व्यपदेशात्सः ॥ *यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत* इत्यारभ्य *स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते* इत्यत्र ध्यायतिपूर्वकेक्षतिकर्म सः—प्रशासिता परमात्मा इत्यर्थः; उत्तरत्र *तमोङ्कारेणैवायनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परञ्चेति परमपुरुषासाधारणधर्मव्यपदेशात; *यत्तत्कवयो वेदयन्ते इति तदीयस्थानस्य सूरिभिर्दृश्यत्वव्यपदेशाच्च ॥ १२ ॥

78 दहर उत्तरेभ्यः ॥ *अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्* इत्यत्र दहराकाशशब्दनिर्दिष्टः परमात्मा, उत्तरभ्यः वाक्यगतेभ्यः तदसाधारणधर्मेभ्यः। उत्तरत्र दहराकाशस्य सर्वाधारतयाऽतिमहत्वमभिधाय, एतत्सत्यं ब्रह्माख्यं पुरमिति निर्दिश्य, तस्मिन् ब्रह्माख्ये दहराकाशे कामास्समाहिताः इत्युक्ते, कोऽयं दहराकाशः? के च कामाः? इत्यपेक्षायाम्, *एष आतमा अपहतपाप्मा इत्यारभ्य *सत्यकामस्सत्यसङ्कल्पः इत्यन्तेन दहराकाशः आत्मा; कामाश्च अपहतपाप्मत्वादयः तद्विशेषणभूतगुणा इति हि ज्ञापयति। *दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यत्र दहरा-

Digitization by Arya Samaj Charitable Foundation, Chennai

काशस्तदन्तर्वर्ति च यत्, तदुभयमन्वेष्टव्यमित्युक्तमिति विज्ञायते; *अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्* इति हि व्यज्यते ॥ १३ ॥

79 गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च ॥ *एवमेवेमास्सर्वाः प्रजाः अहरहर्गच्छन्त्य एत ब्रह्मलोकं न विन्दन्ति* इत्यहरहस्सर्वासां प्रजानामजानतीनां दहराकाशोपरि गतिः—वर्तनम्, दहराकाशसमानाधिकरणो ब्रह्मलोकशब्दश्च दहराकाशः परं ब्रह्मेति ज्ञापयति । तथा ह्यन्यत्र सर्वासां परमात्मोपरि वर्तमानत्वं दृष्टम्, *तस्मिन् लोकाश्श्रितास्सर्वे *तदक्षरे परमे प्रजाः *इत्यादौ; ब्रह्मलोकशब्दश्च *एष ब्रह्मलोकः इत्यादौ । अन्यत्र दर्शनाभावेऽपि इदमेव पर्याप्तम् अस्य परमात्मत्वे लिङ्गम्, यद्दहराकाशोपरि सर्वस्य वर्तमानत्वम्, ब्रह्मलोकशब्दश्च ॥ १४ ॥

80 धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ *अथ य आत्मा स सेतुर्विधृतिरिति जगद्धृतेः परमात्मनो महिम्नोऽस्मिन् दहराकाशे उपलब्धेश्चायं परः; सा हि परमात्ममहिमा, *एष सेतुर्विधरणः इत्यादिश्रुतेः ॥ १५ ॥

81 प्रसिद्धेश्च ॥ आकाशशब्दस्य *यदेष आकाश आनन्दः इति परमात्मन्यपि प्रसिद्धेश्चायं परः; सत्यसङ्कल्पत्वादिगुणबृन्दोपबृंहिता प्रसिद्धिः भूताकाशप्रसिद्धेर्बलीयसीत्यर्थः ॥ १६ ॥

82 इतरपरामर्शात्स इति चेन्नासंभवात् ॥ *अथ य एष संप्रसादः इतीतरस्य—जीवस्य परामर्शात् प्रकृताकाशस्स इति चेत्; नैतत्, उक्तगुणानां तत्रासंभवात् ॥ १७ ॥

83 उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ उत्तरत्र *य आत्मा अपहतपाप्मेति जीवस्य अपहतपाप्मत्वादिश्रवणान्नासंभवः, जागरितस्वप्नसुषुप्त्याद्यवस्थासु वर्तमानत्वात् स हि जीव इति चेत्, नैतत्, आविर्भूतस्वरूपस्तु—कर्मारब्धशरीरसंबन्धित्वेन तिरोहितापहतपाप्मत्वादिकः पश्चात् परं ज्योतिरुपसंपद्याविर्भूतस्वरूपः तत्र अपहतपाप्मत्वादिगुणको जीवः प्रतिपादितः । दहराकाशस्तु अतिरोहितकल्याणगुणसागर इति नायं जीवः ॥ १८ ॥

84 अन्यार्थश्च परामर्शः ॥ *अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इति जीवात्मनो दहराकाशोपसंपत्त्या स्वरूपाविर्भावापादनरूपमाहात्म्यप्रतिपादनार्थोऽत्र जीवपरामर्शः ॥ १९ ॥

85 अल्पश्रुतेरिति चेत्तदुक्तम् ॥ अल्पस्थानत्वस्वरूपाल्पत्वश्रुतेर्नायं परमात्मेति चेत्; तत्रोत्तरमुक्तम् *निचाय्यत्वादेवं व्योमवच्चेति ॥ २० ॥

86 अनुकृतेस्तस्य च ॥ तस्य—दहराकाशस्य परञ्ज्योतिषः, अनुकरणश्रवणाच्च जीवस्य न जीवो दहराकाशः; *स तत्र पर्येति जक्षत् क्रीडन् रममाणः इत्यादिस्तदुपसंपत्त्या स्वच्छन्दवृत्तिरूपस्तदनुकारश्श्रूयते ॥ २१ ॥

87 अपि स्मर्यते ॥ *इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्तिच ॥ इति ॥ २२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

88 शब्दादेव प्रमितः ॥ *अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति, ईशानो भूतभव्य-स्येत्यादौ अङ्गुष्ठप्रमितः परमात्मा, *ईशानो भूतभव्यस्येति सर्वेश्वरत्ववाचिशब्दादेव ॥ २३ ॥

89 हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ अनवच्छिन्नस्यापि उपासकहृदि वर्तमानत्वापेक्ष-मङ्गुष्ठप्रमितत्वम् । मनुष्यानामेवोपासनसंभावनया तद्विषयत्वाच्च शास्त्रस्य मनुष्यहृदयापेक्षयेदमुक्तम् । स्थितं तावदुत्तरत्र समापयिष्यते ॥ २४ ॥

90 तदुपर्यपि बादरायणस्संभवात् ॥ तत्–ब्रह्मोपासनम्; उपरि-देवादिष्वप्यस्ति, अर्थित्व-सामर्थ्यसंभवादिति भगवान् बादरायणः मेने । संभवश्च पूर्वोपार्जितज्ञानाविस्मरणात्; मन्त्रार्थवादेषु विग्रहादिमत्तया स्तुतिदर्शनात्, तदुपपत्तये तत्संभवे, तेषामेव प्रामाण्येन विग्रहादिमत्त्वाच्च ॥ २५ ॥

91 विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ विग्रहादिमत्त्वे एकस्यानेकत्र युगपत्सा-न्निध्यायोगात्, कर्मणि विरोध इति चेन्न; शक्तिमत्सु सौभरिप्रभृतिषु युगपदनेकशरीरप्रतिपत्ति-दर्शनात् ॥ २६ ॥

92 शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ वैदिके तु शब्दे विरोधप्रसक्तिः–देहस्य सावयवत्वेनोत्पत्तिमत्त्वादिन्द्रादिदेवोत्पत्तेः प्राक् विनाशादूर्ध्वं च वैदिकेन्द्रादिशब्दा-नामर्थशून्यत्वमनित्यत्वं वा स्यादिति चेन्न; अतः–वैदिकादेवेन्द्रादिशब्दादिन्द्राद्यर्थसृष्टेः । नहीन्द्रादिशब्दाः व्यक्तिवाचकाः; अपि तु गवादिशब्दवदाकृतिवाचिनः; पूर्वस्मिन्निन्द्रादौ विनष्टे वैदिकेन्द्रादिशब्दादेव ब्रह्मा पूर्वेन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरम् इन्द्रादिकं कुलालादिरिव घटादिकं सृजतीति न कश्चिद्विरोधः । कुत इदमवगम्यते ? श्रुतिस्मृतिभ्याम् । श्रुतिः *वेदेन रूपे व्याकरोत् सतासती प्रजापतिः *स भूरिति व्याहरत् स भूमिमसृजत* इत्यादिः । स्मृतिरपि–*सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ इत्यादिः ॥ २७ ॥

93 अत एव च नित्यत्वम् ॥ यतो ब्रह्मा वैदिकाच्छब्दादर्थान् स्मृत्वा सृजति; अत एव *मन्त्रकृतो वृणीते *विश्वामित्रस्य सूक्तं भवति *इति विश्वामित्रादीनां मन्त्रादिकृत्त्वेऽपि मन्त्रादि-मयवेदस्य नित्यत्वं तिष्ठति । अनधीतमन्त्रादिदर्शनशक्तान् पूर्वविश्वामित्रादीन् तत्तद्वैदिकशब्दैः स्मृत्वा, तदाकारानपरान् तत्तच्छक्तियुक्तान् सृजति हि ब्रह्मा नैमित्तिकप्रलयानन्तरम् । ते चानधीत्यैव तानेव मन्त्रादीन् अस्खलितान् पठन्ति । अतस्तेषां मन्त्रादिकृत्त्वं वेदनित्यत्वं च स्थितम् ॥ २८ ॥

प्राकृतप्रलये तु चतुर्मुखे वेदाख्यशब्दे च विनष्टे कथं वेदस्य नित्यत्वमित्यत आह–

94 समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ अत एव सृज्यानाम् समान-नामरूपत्वात् प्राकृतप्रलयावृत्तावपि न विरोधः । आदिकर्ता परमपुरुषो हि पूर्वरूपसंस्थानं जगत् स्मृत्वा तदाकारमेव जगत् सृजति, वेदांश्च पूर्वानुपूर्वीविशिष्टानाविष्कृत्य चतुर्मुखाय ददातीति । श्रुति-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्मृतिभ्यामादिकर्ता पूर्ववत्सृजतीत्यवगम्यते । श्रुतिस्तावत् *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्यादिका, *यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै* इति च । स्मृतिरपि— *यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानितान्येव तथा भावा युगादिषु ॥ इति । वेदस्य नित्यत्वं च पूर्वपूर्वोच्चारणक्रमविशिष्टस्यैव सर्वदोच्चार्यमाणत्वम् ॥ २९ ॥

95 मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ मधुविद्यादिषु वस्वादिदेवानामेव उपास्यत्वात्, प्राप्यत्वाच्च, तत्र वस्वादीनां कर्मकर्तृभावविरोधेन उपास्यत्वासंभवात्, वसूनां सतां वसुत्वं प्राप्तमिति प्राप्यत्वासंभवाच्च तत्र वस्वादीनामनधिकारं जैमिनिर्मेने ॥ ३० ॥

96 ज्योतिषि भावाच्च ॥ *तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ज्योतिषि— परस्मिन् ब्रह्मणि देवानां साधारण्येन प्राप्तत्वेऽपि अधिकारमात्रवचनात् अन्यत्र वस्वाद्युपासने अनधिकारो न्यायसिद्धो गम्यते ॥ ३१ ॥

97 भावंतु बादरायणोऽस्ति हि ॥ मधुविद्यादिष्वपि वस्वादीनामधिकारभावं भगवान् बादरायणो मन्यते । अस्ति हि वस्वादीनां सतां स्वावस्थब्रह्मण उपास्यत्वसंभवः, कल्पान्तरे वसुत्वादेः प्राप्यत्वसंभवश्च । *एकल एव मध्ये स्थाता* इत्यादिना आदित्यस्य कारणावस्थां प्रतिपाद्य, *य एतामेवं ब्रह्मोपनिषदं वेदेति मधुविद्यायाः ब्रह्मविद्यात्वमाह । अतः कार्यकारणोभयावस्थं तत्रोपास्यम् । कल्पान्तरे वस्वादित्वमनुभूय अधिकारावसाने ब्रह्मप्राप्तिर्न विरुद्धा ॥ ३२ ॥

98 शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ *आजहारेमाश्शूद्रेत्यादौ ब्रह्मोपदेशे शिष्यं प्रति शूद्रेत्यामन्त्रणेन शिष्यस्य ब्रह्मज्ञानाप्राप्त्या शुक्सञ्जातेति सूच्यते । शोचनाच्छूद्रः, न जातियोगेन । कुतः? तदनादरश्रवणात्—ब्रह्मविद्यावैकल्येन स्वात्मानं प्रति हंसोक्तानादरवाक्यश्रवणात्; तदैवाचार्यं प्रत्याद्रवणात् । हिशब्दो हेतौ; यतश्शूद्रेत्यामन्त्रणं न जातियोगेन, अतश्शूद्रस्य ब्रह्मोपासनाधिकारो न सूच्यते ॥ ३३ ॥

99 क्षत्रियत्वगतेश्च ॥ शुश्रूषोः क्षत्रियत्वगतेश्च न जातियोगेन शूद्रेत्यामन्त्रणम् । उपक्रमे *बहुदायीत्यादिना दानपतित्वबहुपक्कान्नदायित्वबहुग्रामप्रदानैरस्य हि क्षत्रियत्वं गम्यते ॥ ३४ ॥

100 उत्तरत्र चैत्ररथेन लिङ्गात् ॥ उपरिष्टाच्चास्यां विद्यायां ब्राह्मणक्षत्रिययोरेवान्वयो दृश्यते *अथ ह शौनकश्च कापेयमभिप्रतारिणश्चेत्यादौ । अभिप्रतारी हि चैत्ररथः क्षत्रियः । अभिप्रतारिणः चैत्ररथत्वम्, क्षत्रियत्वं च कापेयसाहचर्याल्लिङ्गादवगम्यते । प्रकरणान्तरे हि कापेयसहचारिणश्चैत्ररथत्वम्, क्षत्रियत्वं चावगतम्, *एतेन चैत्ररथं कापेया अयाजयन्निति । *तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायतेति च । अतश्च अयं शिष्यः न चतुर्थः ॥ ३५ ॥

101 संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ विद्योपक्रमे *उप त्वा नेष्ये इत्युपनयनपरामर्शात् शूद्रस्य तदभावाभिलापाच्च न शूद्रस्य ब्रह्मविद्याधिकारः । *न शूद्रे पातकं किञ्चित् न च संस्कारमर्हतीति संस्कारो हि निषिद्धः ॥ ३६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

102 तद्भावनिर्धारणे च प्रवृत्तेः ॥ *नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरेति शूद्रत्वाभावनिश्चय एव उपदेशप्रवृत्तेश्च नाधिकारः ॥ ३७ ॥

103 श्रवणाध्ययनार्थप्रतिषेधात् ॥ शूद्रस्य श्रवणाध्ययनादीनि हि निषिध्यन्ते, *तस्माच्छूद्रसमीपे नाध्येतव्यमिति । अनुपशृण्वतोऽध्ययनादि च न संभवति ॥ ३८ ॥

104 स्मृतेश्च ॥ स्मर्यते हि शूद्रस्य वेदश्रवणादौ दण्डः *अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्, उदाहरणे जिह्वाच्छेदः, धारणे शरीरभेदः इति ॥ ३९ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति—

105 कम्पनात् ॥ अङ्गुष्ठप्रमितप्रकरणमध्ये *यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतमित्यादिना अभिहिताङ्गुष्ठप्रमितप्राणशब्दनिर्दिष्टजनितभयात् वज्रादिवोद्यतात् अग्निवायुसूर्येन्द्रप्रभृतिकृत्स्नजगत्कम्पनात् अङ्गुष्ठप्रमितः परमपुरुष इति निश्चीयते ॥ ४० ॥

106 ज्योतिर्दर्शनात् ॥ तत्प्रकरणे *न तत्र सूर्यो भातीत्यारभ्य *तस्य भासा सर्वमिदं विभातीति भाश्शब्दाभिहितस्य अनवधिकातिशयज्योतिषो दर्शनाच्च अङ्गुष्ठप्रमितः परमपुरुषः ॥४१॥

107 अकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ *आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेत्यादिना निर्दिष्ट आकाशः, *धूत्वा शरीरमकृतं कृतात्मेति प्रकृतात्प्रत्यगात्मनः परिशुद्धादर्थान्तरभूतः परमपुरुषः; नामरूपयोः निर्वोढृत्वतदस्पर्शरूपार्थान्तरत्वामृतत्वादिव्यपदेशात् ॥४२॥

तत्त्वमस्यादिनैक्योपदेशात् प्रत्यगात्मनो नार्थान्तरभूतः परमपुरुष इत्याशङ्क्याह—

108 सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् *प्राज्ञेनात्मनाऽन्वारूढः* इति सुषुप्त्युत्क्रान्त्योः बाह्यान्तरविषयानभिज्ञात्प्रत्यगात्मनः तदानीमेव प्राज्ञतया भेदेन व्यपदेशादर्थान्तरभूत एव ॥ ४३ ॥

109 पत्यादिशब्देभ्यः॥परिष्वञ्जके प्राज्ञ श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्चायमर्थान्तरभूतः। *सर्वस्याधिपतिः सर्वस्य वशी सर्वस्येशानः* इति ह्युत्तरत्र श्रूयते; ऐक्योपदेशोऽपि *अवस्थितेरिति काशकृत्स्नः* इत्यनेन जीवस्य शरीरभूतस्यात्मतया अवस्थितेरिति स्वयमेव परिहरिष्यति ॥ ४४ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे प्रथमस्याध्यायस्य तृतीयः पादः ॥

प्रथमाध्याये चतुर्थः पादः

110 आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ एकेषां कठानां शाखायाम्, आनुमानिकं प्रधानमपि जगत्कारणत्वेन *महतः परमव्यक्तमित्युच्यते इति चेत्; न,

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्वत्र *आत्मानं रथिनं विद्धीत्यादिषूपासनोपायेषु वशीकार्यत्वाय रथिरथादिरूपकविन्यस्तेषु शरीराख्यरूपकविन्यस्तस्यात्राव्यक्तशब्देन गृहीतेः । *इन्द्रियेभ्यः परा ह्यर्थाः* इत्यादिना हि वशीकार्यत्वेन हि परा उच्यन्ते । तथा चोत्तरत्र श्रुतिरेवं दर्शयति *यच्छेद्वाङ्मनसी प्राज्ञः इत्यादिना ॥१॥

111 सूक्ष्मंतु तदर्हत्वात् ॥ सूक्ष्मम्—अव्यक्तमेव शरीरावस्थं कार्यार्हमित्यव्यक्तशब्देन शरीरमेव गृह्यते ॥ २ ॥

यदि रूपकविन्यस्तानामेव ग्रहणम्, किमर्थम् *अव्यक्तात्पुरुषः परः* इत्यत आह—

112 तदधीनत्वादर्थवत् ॥ पुरुषाधीनत्वादात्मशरीरादिकम् अर्थवत्—उपासननिर्वृत्तये भवति । पुरुषो ह्यन्तर्यामी सर्वमात्मादिकं प्रेरयन् उपासनोपायत्वेन वशीकार्यकाष्ठा प्राप्यश्चेति *सा काष्ठा सा परा गतिरित्युच्यते ॥ ३ ॥

113 ज्ञेयत्वावचनाच्च ॥ अत्राव्यक्तस्य ज्ञेयत्वावचनाच्च न कापिलमव्यक्तम् ॥ ४ ॥

114 वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ *अशब्दमस्पर्शमित्यारभ्य *निचाय्य तमिति वदतीति चेन्न; *तद्विष्णोः परमं पदम् *एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते* इत्यादिना प्रकृतः प्राज्ञो हि *निचाय्य तमिति ज्ञेय उच्यते ॥ ५ ॥

115 त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ उपास्योपासनोपासकानां त्रयाणामेवास्मिन्प्रकरणे ज्ञेयत्वेन उपन्यासः प्रश्नश्च; न प्रधानादेः । *अध्यात्मयोगाधिगमेन देवं मत्वा इत्यादिः उपन्यासः; *येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके* इत्यादिकश्च प्रश्नः ॥ ६ ॥

116 महद्वच्च ॥ *बुद्धेरात्मा महान्परः इत्यात्मशब्दाद्यथा न तान्त्रिको महान्, तथाऽव्यक्तमपीति ॥ ७ ॥

117 चमसवदविशेषात् ॥ *अजामेकां...बह्वीः प्रजास्सृजमानामित्यत्र न तन्त्रसिद्धा प्रकृतिः कारणत्वेनोक्ता; जन्माभावयोगमात्रेण न तस्या एव प्रतीतिः *अर्वाग्बिलश्चमस इतिवत् प्रकरणे विशेषकाभावात् । *यथेदं तच्छिर इति हि चमसो विशेष्यते । यौगिकशब्दाद्विशेषप्रतीतिर्हि विशेषकापेक्षा ॥ ८ ॥

118 ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ ज्योतिः—ब्रह्म; ब्रह्मकारणिका इयमजा । तथाहि ब्रह्मकारणिकाया एव प्रतिपादकमेतत्सरूपमन्त्रश्च तैत्तिरीयाः अधीयते; *अणोरणीयान्महतो महीयानित्यारभ्य *अतस्समुद्रा गिरयश्चेत्यादिना सर्वस्य ब्रह्मण उत्पत्त्या तदात्मकत्वप्रतिपादनसमये *अजामेकामिति पठन्ति । अतस्तत्प्रत्यभिज्ञानादियं ब्रह्मकारणिकेति निश्चीयते ॥ ९ ॥

119 कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ कल्पना—सृष्टिः, यथा *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति । *अस्मान्मायी सृजते विश्वमेतदित्यादिना सृष्ट्युपदेशात् अजात्वब्रह्मकार्यत्वयोरविरोधश्च । प्रलयकाले नामरूपे विहायाचिद्वस्त्वपि सूक्ष्मरूपेण ब्रह्मशरीरतया तिष्ठतीत्यजात्वम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सृष्टिकाले नामरूपे भजमाना प्रकृतिः ब्रह्मकारणिका; यथा आदित्यस्य सृष्टिकाले वस्वादिभोग्यरसाधारतया मधुत्वं कार्यत्वञ्च, तस्यैव प्रलयकाले मध्वादिव्यपदेशानर्हसूक्ष्मरूपेणावस्थानमकार्यत्वञ्च मधुविद्यायां प्रतीयते *असौ वा आदित्यो देवमधु *नैवोदेता नास्तमेता एकल एव मध्ये स्थातेति, तद्वत् ॥ १० ॥

120 न सङ्ख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ *यस्मिन्पञ्च पञ्चजना इत्यत्र पञ्चविंशतिसङ्ख्योपसंग्रहादपि न तान्त्रिकाण्येतानि; यस्मिन्निति यच्छब्दनिर्दिष्टब्रह्माधारतया तेभ्यः पृथग्भावात् एतेषां तत्त्वातिरेकाच्च; यच्छब्दनिर्दिष्टमाकाशश्चेति द्वयमतिरिक्तम् । संख्योपसंग्रहादपीत्यपिशब्दान्नात्र पञ्चविंशतिसंख्यासंग्रहः; *दिक्संख्ये संज्ञायामिति संज्ञाविषयोऽयं पञ्चजना इति । पञ्चजना नाम केचित्, ते पञ्च पञ्चजनाः इत्युच्यन्ते, *सप्त सप्तर्षय इतिवत् ॥ ११ ॥

121 प्राणादयो वाक्यशेषात् ॥ पञ्चजनसंज्ञिताः प्राणादयः पञ्चेन्द्रियाणीति *प्राणस्य प्राणमुत चक्षुषश्चक्षुरित्यादिवाक्यशेषादवगम्यते; चक्षुश्श्रोत्रसाहचर्यात् प्राणान्नशब्दावपि स्पर्शनादीन्द्रियविषयौ ॥ १२ ॥

122 ज्योतिषैकेषामसत्यन्ने ॥ एकेषां शाखिनां काण्वानाम् *अन्नस्यान्नमित्यसति, *तं देवा ज्योतिषां ज्योतिरित्युपक्रमगतेन ज्योतिश्शब्देन पञ्च पञ्चजनाः इन्द्रियाणीति ज्ञायन्ते । ज्योतिषां ज्योतिः—प्रकाशकानां प्रकाशकं ब्रह्मेत्युक्त्वा, अनन्तरं *पञ्च पञ्चजना इत्युक्तेः प्रकाशकानि पञ्चेन्द्रियाणीति गम्यते ॥ १३ ॥

123 कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ आकाशादिषु कार्यवर्गेषु कारणत्वेन सर्वत्र वेदान्तवाक्येषु *असद्वा इदमग्र आसीत् *तद्धेदं तर्ह्यव्याकृतमासीदित्यादिष्वनिर्ज्ञातविशेषेषु *आत्मा वा इदमेक एवाग्र आसीत् स ईक्षत लोकान्नु सृजै* इति विशेषवाचिवाक्यनिर्दिष्टस्यैवोक्तेः न तान्त्रिकाव्याकृतादिकारणवादप्रसङ्गः ॥ १४ ॥

124 समाकर्षात् ॥ *सोऽकामयत, बहु स्यां प्रजायेयेति पूर्वनिर्दिष्टस्यैव सर्वज्ञस्य *असद्वा इदमग्र आसीदित्यत्र समाकर्षाच्च स एवेति गम्यते । *तद्धेदं तर्ह्यव्याकृतमासीदिति निर्दिष्टस्यैव *स एष इह प्रविष्ट आनखाग्रेभ्यः, *पश्यत्यचक्षुरित्यत्र समाकर्षात् एष एवाव्याकृत इति निश्चीयते । असदव्याकृतशब्दौ हि तदानीं नामरूपविभागाभावादुपपद्येते ॥ १५ ॥

125 जगद्वाचित्वात् ॥ *ब्रह्म ते ब्रवाणीत्युपक्रम्य *यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इत्यत्र कर्मशब्दस्यैतच्छब्दसामानाधिकरण्येन क्रियत इति व्युत्पत्त्या जगद्वाचित्वात् परमेव ब्रह्म वेदितव्यतयोपदिष्टम् ॥ १६ ॥

126 जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ *एतैरात्मभिर्भुङ्क्ते *अथास्मिन्प्राण एवैकधा भवतीति च जीवादिलिङ्गान्न पर इति चेत्, एतत् प्रतर्दनविद्यायामेव परिहृतम्—पूर्वापरपर्यालोचनया ब्रह्मपरत्वे निश्चिते तदनुगुणतया नेयमन्यल्लिङ्गमिति ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

127 अन्यार्थंतु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ *तौ ह सुप्तं पुरुषमाजग्मतुरित्यादिना देहातिरिक्तजीवसद्भावप्रतिपादनं तदतिरिक्तपरमात्मसद्भावज्ञापनार्थमिति, *क्वैष एतद्बालाके पुरुषोऽशयिष्टेति प्रश्नात्, *अथास्मिन्प्राण एवैकधा भवति *सता सोम्य तदा संपन्नो भवतीति वाक्यसमानार्थकात् प्रतिवचनाच्चावगम्यते। एके–वाजसनेयिनोऽपि एतत्प्रतिवचनसरूपं वाक्यं स्पष्टमधीयते च, *क्वैष एतदित्यादि, *य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते इत्यन्तम् ॥१८॥

128 वाक्यान्वयात् ॥ *न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामायेत्यारभ्य, *आत्मा वा अरे द्रष्टव्य इत्यादिनोपदिष्टः परमात्मा, *अमृतत्वस्य तु नाशाऽस्ति वित्तेनेत्यारभ्य *आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्यादि *येनेदं सर्वं विजानातीत्यन्तस्य कृत्स्नस्य वाक्यस्य परमात्मन्येवान्वयात् ॥ १९ ॥

अस्मिन्प्रकरणे प्रकरणान्तरे च जीववाचिशब्देन परमात्मनोऽभिधाने, तत्सामानाधिकरण्ये च कारणं मतान्तरेणाह––

129 प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ *आत्मनि खल्वरे दृष्टे इत्यादिना परमात्मज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये जीवस्य तत्कार्यतया तस्मादनतिरिक्तत्वं ज्ञापयितुं जीवशब्देन परमात्माभिधानमिति आश्मरथ्यः ॥ २० ॥

130 उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ उत्क्रमिष्यतः–मुक्तस्य परमात्मस्वरूपभावादात्मशब्देन परमात्माभिधानमिति औडुलोमिः ॥ २१ ॥

131 अवस्थितेरिति काशकृत्स्नः ॥ *य आत्मनि तिष्ठन्नात्मनोऽन्तर इत्यादिना जीवात्मनि परमात्मन आत्मतया अवस्थितेरिति काशकृत्स्न आचार्यो मन्यते। इदमेव मतं सूत्रकारस्स्वीकृतवानिति, मतद्वयमुपन्यस्य तद्विरोध्येतदभिधानात् अन्यस्यानभिधानाच्च निश्चीयते ॥ २२ ॥

132 प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ जगदुपादानकारणमपि परं ब्रह्म, न निमित्तमात्रम्, *स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवतीति, येन आदेष्ट्रा निमित्तभूतेन विज्ञातेन चेतनाचेतनात्मकं कृत्स्नं जगद्विज्ञातं भवतीति आदेष्टृविज्ञानेन सर्वविज्ञानप्रतिज्ञातदुपपादनरूपमृत्कार्यदृष्टान्तानुपरोधात्। आदिश्यते अनेनेति आदेशः––इत्यादेशशब्देनादेष्टाऽभिधीयते। आदेशः प्रशासनम्, *एतस्य वा अक्षरस्य प्रशासने गार्गि* इत्यादिश्रुतेः ॥ २३ ॥

133 अभिध्योपदेशाच्च ॥ *तदैक्षत बहु स्यां प्रजायेयेति निमित्तभूतस्येक्षितुः विचित्रचिदचिद्रूपेण जगदाकारेणात्मनो बहुभवनसङ्कल्पोपदेशाच्च उपादानमपीति विज्ञायते॥ २४ ॥

134 साक्षाच्चोभयाम्नानात् ॥ *ब्रह्म वनं ब्रह्म स वृक्ष आसीत्...ब्रह्माध्यतिष्ठद्भुवनानि धारयन्निति उपादानं निमित्तञ्च ब्रह्मैवेति स्वशब्देन उभयाम्नानाच्च ॥ २५ ॥

135 आत्मकृतेः ॥ *सोऽकामयतेति निमित्तभूतस्य स्वस्यैव जगदाकारेण कृतेः *तदात्मानं स्वयमकुरुतेत्युपदिश्यमानायाः परमपुरुषो जगन्निमित्तमुपादानञ्चेति विज्ञायते ॥ २६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परस्य ब्रह्मणो निरवद्यत्वसत्यसङ्कल्पत्वादेः तद्विपरीतानन्तापुरुषार्थाश्रयजगदाकारेण आत्मकृतेश्चाविरोधः कथमित्याशङ्क्याह--

136 परिणामात् ॥ अत्रोपदिश्यमानात् परिणामात् तदविरोध एव । अविभक्तनामरूपातिसूक्ष्मचिदचिद्वस्तुशरीरकः कारणावस्थः परमपुरुषस्स्वयमेव *सोऽकामयत बहु स्यां प्रजायेयेति विभक्तनामरूपचिदचिद्वस्तुशरीरको भवेयमिति सङ्कल्प्य *इदं सर्वमसृजत यदिदं किञ्चेति स्वशरीरभूतमतिसूक्ष्मञ्चिदचिद्वस्तु स्वस्माद्विभज्य *तत्सृष्ट्वा, तदेवानुप्राविशदिति स्वस्माद्विभक्ते चिदचिद्वस्तुनि स्वयमेवात्मतयाऽनुप्रविश्य *सच्च त्यच्चाभवत्, निरुक्तं चानिरुक्तंच, निलयनं चानिलयनंच, विज्ञानं चाविज्ञानंच, सत्यं चानृतंच सत्यमभवदिति हि स्वस्य बहुभवनरूपपरिणाम उपदिश्यते; अतो न कश्चिद्विरोधः । अविभागावस्थायामपि जीवस्तत्कर्म च सूक्ष्मरूपेण तिष्ठतीति वक्ष्यति *न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति ॥ २७ ॥

137 योनिश्च हि गीयते ॥ *यद्भूतयोनिमित्यादिषु योनिश्च गीयते; अतश्चोपादानमपि ॥ २८ ॥

138 एतेन सर्वे व्याख्याता व्याख्याताः ॥ *जन्माद्यस्य यतः* इत्यादिना एतदन्तेन न्यायेन सर्वे वेदान्ताः ब्रह्मपरा व्याख्याताः ॥ द्विरुक्तिरध्यायपरिसमाप्तिद्योतनाय ॥ २९ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे प्रथमस्याध्यायस्य चतुर्थःपादः ॥ ४ ॥

॥ समाप्तश्चाध्यायः ॥

श्रीमते रामानुजाय नमः

श्री वेदान्तसारे द्वितीयाध्याये प्रथमः पादः

139 स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ उपबृंहणापेक्षे वेदान्तार्थनिर्णये सति, कपिलस्मृत्युपबृंहणेन वेदान्तार्थः प्रधानकारणवाद इत्यनभ्युपगमे, कपिलस्मृतेरुपबृंहणानन्वयेनानवकाशदोषप्रसक्तिरिति चेत् नः अन्यासां वेदाविरोधिनीनां बह्वीनां मन्वादिस्मृतीनामनवकाशप्रसक्तेः । वेदस्योपबृंहणापेक्षत्वेऽपि अनन्यपराविरुद्धानेकस्मृतिषु सतीषु, विरुद्धार्थायाः वेदोदितार्थविशदीकरणत्वाभावेन तस्या उपबृंहणत्वमन्याय्यमित्यर्थः ॥ १ ॥

योगीन्द्रकपिलस्य तथाऽनुपलब्धेः कथं स्मृत्यन्तरमेतन्न्याय्यमिति चेत्, तत्राह--

140 इतरेषां चानुपलब्धेः ॥ वेदार्थसाक्षात्कारचतुरमन्वादियोगीन्द्राणां कपिलदृष्टार्थानुपलब्धेः कपिलोपलब्धिर्भ्रम एव ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

141 एतेन योगः प्रत्युक्तः ॥ योगस्य हैरण्यगर्भस्यापि कापिलस्मृतिवद्वेदविरुद्धत्वाविशेषात् तद्वन्निरासः ॥ ३ ॥

142 न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ विकारास्पदत्वेनाज्ञत्वेनापुरुषार्थाश्रयत्वेन च जगतो ब्रह्मविलक्षणत्वात्तत्कार्यत्वं न संभवति; विलक्षणत्वंच शब्दाच्चावगम्यते, *विज्ञानं चाविज्ञानं चेत्यादेः ॥ ४ ॥

143 अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ *तं पृथिव्यब्रवीत् *आपो वा अकामयन्तेत्यादौ ज्ञानकार्यव्यपदेशः तत्तदभिमानिदेवताविषय इति, *हन्ताहमिमास्तिस्रो देवता इति देवताशब्देन विशेषितत्वात्, *अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिना तत्तदचिद्वस्त्वभिमानित्वेन देवतानुगतेश्चावगम्यते ॥ ५ ॥

144 दृश्यते तु ॥ विलक्षणयोरपि कार्यकारणभावस्संभवति, माक्षिकादिभ्यः क्रिम्याद्युत्पत्तिदर्शनात् ॥ ६ ॥

145 असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ एवं तर्हि कार्यं कारणे असदिति चेत् न, सालक्षण्यनियमप्रतिषेधमात्रत्वात्; पूर्वोक्तं कार्यकारणयोर्वस्त्वैक्यं न त्यक्तम् ॥ ७ ॥

146 अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ जगतो ब्रह्मकारणत्वेन तस्मिन्नपीत्यादौ जगत इव ब्रह्मणोऽपि विकारित्वाद्यनिष्टप्रसङ्गाद्वेदान्तवाक्यं सर्वमसमञ्जसं स्यात् ॥ ८ ॥

147 न तु दृष्टान्तभावात्। नैतत्, *यस्यात्मा शरीरम् *यस्याव्यक्तं शरीरमित्यादिश्रुतिसिद्धचिदचिद्वस्तुशरीरकस्य ब्रह्मणः कार्यकारणभावेनावस्थाने गुणदोषव्यवस्थितेः दृष्टान्तसद्भावात् । यथा जीवस्य सशरीरस्य मनुष्याद्यात्मनो बालत्वयुवत्वस्थविरत्वादिभावेऽपि बालत्वादयश्शरीरे तिष्ठन्ति, ज्ञानसुखादयश्चात्मन्येव; तद्वदत्रापि शरीरभूतचिदचिद्वस्तुगतान्यज्ञानविकारादीनि दोषाः। आत्मभूते तु ब्रह्मणि निरवद्यत्वाविकारित्वसार्वज्ञ्यसत्यसङ्कल्पत्वादयः ॥ ९ ॥

148 स्वपक्षदोषाच्च ॥ प्रधानकारणदोषाच्चायमेव ग्राह्यः । प्रधानकारणवादे हि निर्विकारपुरुषसन्निधानात् प्रकृतिप्रवृत्तावितरेतरधर्माध्यासादयो दुरुपपादाः ॥ अन्यत्रान्यधर्मानुसन्धानरूपोऽध्यासः निर्विकारपुरुषस्य न संभवति, अचेतनायाः प्रकृतेरनुसन्धानरूपोऽध्यासस्सुतरां न संभवति ॥ १० ॥

149 तर्काप्रतिष्ठानादपि ॥ प्रधानकारणवादस्य कुतर्कमूलत्वात् तस्याप्रतिष्ठितत्वादपि त्याज्यं प्रधानम् ॥ ११ ॥

150 अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ क्लृप्तप्रकारात् प्रकारान्तरेण प्रधानमनुमेयमिति चेत्; एवमपि ततोऽधिककुतर्ककुशलसंभावनया अप्रतिष्ठितत्वात् अनिर्मोक्षप्रसङ्गो दुर्वारस्स्यात् ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

151 एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ एतेन—साङ्ख्यस्मृतिनिराकरणहेतुना तर्काप्रतिष्ठितत्वादिना परिशिष्टाश्च कणभक्षाक्षपादक्षपणकादिस्मृतयो निराकृताः ॥ १३ ॥

152 भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ यदि चिदचिद्वस्तुशरीरकत्वेन ब्रह्मणोऽपि सशरीरत्वमिष्यते; तर्हि जीववत्सशरीरत्वेन ब्रह्मणोऽपि शरीरसंबन्धप्रयुक्तसुखदुःखभोक्तृत्वापत्तेः जीवादविभागप्रसक्तिरिति चेत्, न; स्यादेव जीवाद्विभागः, निरवद्यत्वकल्याणगुणाकरत्वेन ब्रह्मणः। न हि सशरीरत्वप्रयुक्तमनिष्टभोक्तृत्वम्; अपि त्वन्यवश्यत्वकृतम्। यथा लोके राज्ञस्सशरीरत्वेऽपि अनन्यवश्यस्य स्वाज्ञातिवृत्तिकृतानिष्टभोक्तृत्वं नेतरसमानम् ॥ १४ ॥

153 तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ कारणभूताद्ब्रह्मणोऽनन्यत्वं कार्यभूतजगतः वाचारम्भणशब्दादिभ्यो वाक्येभ्योऽवगम्यते, *वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् *सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति *ऐतदात्म्यमिदं सर्वं...... तत्त्वमसीत्यादिभ्यः ॥ १५ ॥

154 भावे चोपलब्धेः ॥ घटादिकार्यभावे च तदेवेदं मृद्द्रव्यमित्युपलब्धेश्च कारणादनन्यत्कार्यम् ॥ १६ ॥

155 सत्त्वाच्चापरस्य ॥ कार्यस्य कारणे सत्वाच्च तस्मादनन्यत्कार्यम्, घटशरावादिकं पूर्वं मृत्तिकैवासीदिति हि घटादिः मृदात्मनोपलभ्यते ॥ १७ ॥

156 असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च ॥ *इदं वा अग्रे नैव किञ्चनासीदिति कार्यस्य तदानीमसत्त्वव्यपदेशात् कारणे कार्यमसदिति चेत् न, स्थूलत्वविरोधिसूक्ष्मत्वरूपधर्मान्तरयोगादसत्त्वव्यपदेशः। कुतः? *तदसदेव सन्मनोऽकुरुत स्यामिति वाक्यशेषादवगम्यते; मनस्कारो हि विद्यमानस्यैव। युक्तिश्च असद्व्यपदेशो धर्मान्तरयोगनिमित्त इति गमयति; पिण्डत्वघटत्वकपालत्वादिभिः परस्परविरोधिभिः भावरूपैर्धर्मैः घटः प्राङ्नासीदिदानीमस्ति भविष्यति चेति सदा विद्यमानस्यैव मृद्द्रव्यस्य हि असदादिव्यपदेशः। तथा शब्दान्तरंच *तद्धेदं तर्ह्यव्याकृतमासीदित्यादि ॥ १८ ॥

157 पटवच्च ॥ तन्तव एव संयोगविशेषभाजः पट इति नामान्तरादिकं भजन्ते, तद्वत् ब्रह्मापि ॥ १९ ॥

158 यथा च प्राणादिः ॥ यथा च वायुरेक एव वृत्तिविशेषैः प्राणापानादिनामानि भजते, तथा ब्रह्मापीति तदनन्यत्वं जगतः ॥ २० ॥

159 इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ *तत्त्वमसि, *अयमात्मा ब्रह्मेति कार्यभूतस्य जीवस्य ब्रह्मभावव्यपदेशाद्धि अनन्यत्वमुक्तम्; एवं तर्हि सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणः आत्मनो हितरूपकार्यजगदकरणम्, अहितरूपकार्यकरणञ्चेत्यादिदोषप्रसक्तिः ॥ २१ ॥ नैतत्—

Digitization by Arya Samaj Charitable Foundation, Chennai

160 अधिकं तु भेदनिर्देशात् ॥ कार्यकारणयोरनन्यत्वेऽपि जीवस्वरूपात् ब्रह्मस्वरूपमर्थान्तरम्, *करणाधिपाधिपः *विद्याविद्ये ईशते यस्तु सोऽन्यः* इत्यादिभेदनिर्देशात्। चिदचिद्वस्तुशरीरं ब्रह्मैव कारणावस्थं कार्यावस्थश्चेति गुणदोषव्यवस्थितिरिति *न तु दृष्टान्तभावादिति ह्युक्तम्। *यस्य पृथिवी शरीरम् *यस्यात्मा शरीरमित्यादिश्रुतिशतसमधिगतं चिदचिद्वस्तुशरीरकत्वम् ॥ २२ ॥

161 अश्मादिवच्च तदनुपपत्तिः ॥ अश्मकाष्ठलोष्टतृणादेरचेतनस्येव जीवस्य *अनीशया शोचति मुह्यमान इत्यादिना अत्यन्तविसजातीयतयाऽभिहितस्य सर्वज्ञसत्यसङ्कल्पब्रह्मस्वरूपतानुपपत्तिस्सिद्धयत्येवेत्यर्थः ॥ २३ ॥

162 उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ कार्यनिर्वृत्तावनेककारकोपसंहारदर्शनात् ब्रह्मैकमेव जगदाकारकार्यं न भवेदिति चेत् न, क्षीरस्यैव दधिभाववत् ब्रह्मणोऽपि संभवति ॥ २४ ॥

163 देवादिवदपि लोके ॥ यथा देवादेश्शास्त्रावगतशक्तेः स्वसङ्कल्पादेव स्वेस्वे लोके स्वापेक्षितनानारूपभावः; एवं ब्रह्मणोऽपि शास्त्रावगतशक्तेस्सर्वमुपपन्नम् ॥ २५ ॥

164 कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ चिदचिद्वस्तुशरीरकं ब्रह्मैव कार्यकारणावस्थमिति ह्युक्तम्। तत्र ब्रह्मणश्शरीरिणो निरवयवत्वेन कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगप्रसक्तिः; कार्यावस्थायामपि अंशान्तरेणावस्थितमिति च पक्षे निरवयवत्वशब्दकोपो वा स्यात्। अतो ब्रह्म न कारणम् ॥ २६ ॥

परिहरति—

165 श्रुतेस्तु शब्दमूलत्वात् ॥ श्रुतिप्रामाण्यान्नैवं प्रसज्यते। शब्दैकप्रमाणकत्वाद्ब्रह्मस्वरूपस्य सकलेतरप्रमाणावगतवस्तुविसजातीयत्वेन तत्रतत्रादृष्टशक्तियोगो ब्रह्मणो न विरुद्धः; अतः कार्यत्वेन कारणत्वेन परिपूर्णस्यावस्थानं संभवति। यथा जातिवादिनां जातेः खण्डमुण्डादिषु॥ २७॥

166 आत्मनि चैवं विचित्राश्च हि ॥ जीवात्मनि चाचिद्धर्मविरोधिधर्मयोगो विसजातीयशक्तित्वादेव। अग्निजलादयोऽप्यचिद्विशेषा अन्योन्यविलक्षणा नियतशक्तयो विचित्रा दृश्यन्ते ॥२८॥

167 स्वपक्षदोषाच्च ॥ कृत्स्नप्रसक्त्यादिदोषः निरवयवेऽचित्सजातीये प्रधान एवेति ब्रह्मैव कारणम् ॥ २९ ॥

168 सर्वोपेता च तद्दर्शनात् ॥ *पराऽस्य शक्तिर्विविधैव श्रूयते* इति श्रुतेः सर्वशक्तियोगश्च देवताया अवगम्यते ॥ ३० ॥

169 विकरणत्वान्नेति चेत्तदुक्तम् ॥ *न तस्य कार्यं करणञ्च विद्यते इति ब्रह्मणो विकरणत्वात् कारणत्वं नेति चेत्, तस्योत्तरं शब्दैकमूलत्वेन विसजातीयत्वादिति पूर्वसूत्रोक्तमेव ॥ ३१ ॥

170 न प्रयोजनवत्त्वात् ॥ ब्रह्मणः अवाप्तसमस्तकामत्वेन सृष्टौ प्रयोजनाभावात् ब्रह्म न कारणम् ॥ ३२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

171 लोकवत्तु लीलाकैवल्यम् ॥ अवाप्तसमस्तकामस्यापि लीलाप्रयोजनत्वे नैरपेक्ष्यं संभवति, लोके केवललीलायै कन्तुकाद्यारम्भदर्शनात् । अस्यात्मतृप्तस्यावाप्तसमस्तकामत्वं हि सदाऽभिमतसकलभोगोपकरणसद्भावः । आत्मतृप्तेर्भोगतृप्तिर्विसजातीया । लीलारसस्यापि तद्विलक्षणस्य त्रिगुणपुरुषाद्युपकरणं नित्यमेव ॥ ३३ ॥

172 वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ देवादिविषमसृष्ट्या पक्षपातो नैर्घृण्यञ्च न संभवति परस्य, क्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेः। तथा *साधुकारी साधुर्भवति पापकारी पापो भवतीति श्रुतिरेव दर्शयति ॥ ३४ ॥

173 न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युलभ्यते च ॥ *सदेव सोम्येदमग्र आसीत् एकमेवेत्येकत्वावधारणात्, तदानीं क्षेत्रज्ञाभावात् कर्म न संभवतीति चेत्, नः अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहश्चास्त्येव। उपपद्यते च तदनादित्वेऽप्यविभागश्रुतिः, नामरूपविभागाभावात्, *तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियतेत्यनयैकार्थ्यात्। उपलभ्यते च श्रुतिषु क्षेत्रज्ञानादित्वम् *ज्ञाज्ञौ द्वावजावीशनीशौ *नित्यो नित्यानामिति ॥ ३५ ॥

174 सर्वधर्मोपपत्तेश्च ॥ प्रधानपरमाण्वादिष्वनुपपन्नानां सर्वधर्माणां ब्रह्मणि सकलेतरविलक्षणत्वेन सर्वशक्तिश्रुत्या चोपपत्तेः ब्रह्मैव कारणमिति सिद्धम् ॥ ३६ ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे द्वितीयस्याध्यायस्य प्रथमः पादः ।

द्वितीयाध्याये द्वितीयः पादः

175 रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ दार्वादेरचेतनस्य रथप्रासादादिनिर्माणे तदभिज्ञानधिष्ठितस्य रचनानुपपत्तेश्च तज्ज्ञाधिष्ठितस्य रचनाप्रवृत्तेश्च, अनुमानगम्यं प्रधानमचेतनं प्राज्ञानधिष्ठितं न जगत्कारणम् ॥ १ ॥

176 पयोम्बुवच्चेत्तत्रापि ॥ यथा पयः अम्बु च दध्यादिभावेऽनपेक्षम्, तद्वत्प्रधानमपीति चेत्; तत्रापि उक्त एव हेतुः, तस्यापि पक्षीकृतत्वात् ॥ २ ॥

177 व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ प्राज्ञाधिष्ठितत्वानपेक्षत्वेन सर्वदा सृष्टिप्रसङ्गाच्च न प्रधानं कारणम् ॥ ३ ॥

178 अन्यत्राभावाच्च न तृणादिवत्॥ क्षीरीभवद्धेनूपयुक्ततृणादिवत् प्रधानमपीति न युक्तं वक्तुम्, अनडुदादिष्वदर्शनात्; तद्धि प्राज्ञाधिष्ठितम् ॥ ४ ॥

179 पुरुषाश्मवदिति चेत्तथाऽपि ॥ पुरुषः स्वसन्निधानात्प्रधानं प्रवर्तयति। अन्धपङ्गुपुरुषवत् अश्मवत्—अयस्कान्ताश्मवत् इति न प्राज्ञापेक्षेति चेत्; न, तथाऽपि न प्रधानप्रवृत्तिसंभवः,

Digitization by Arya Samaj Charitable Foundation, Chennai

आविकृतत्वात्पुरुषस्य। पङ्ग्वन्धादेः मार्गोपदेशदेशान्तरगमनादिः कादाचित्को विकारो ह्यस्ति ॥५॥

180 अङ्गित्वानुपपत्तेश्च ॥ गुणानामुत्कर्षापकर्षरूपाङ्गाङ्गिभावाद्धि जगत्प्रवृत्तिः, प्रतिसर्गावस्थायां साम्यावस्थानां वैषम्यकृताङ्गाङ्गित्वानुपपत्तेश्च न जगदारम्भः ॥ ६ ॥

181 अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ज्ञस्य या शक्तिः तद्वियोगात्—ज्ञातृत्वशक्तिवियोगादित्यर्थः । उक्तप्रकारव्यतिरिक्तप्रकारेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात् रचनानुपपत्त्यादयो दोषास्तदवस्थाः ॥ ७ ॥

182 अभ्युपगमेऽप्यर्थाभावात् ॥ प्रधानाभ्युपगमेऽपि प्रयोजनाभावान्न तदनुमेयम् । पुरुषस्य निर्विकारस्य प्रधानदर्शनरूपविकारासंभवात्, प्रकृतिधर्माध्यासनिमित्तभोगः, तद्विवेकानुसन्धानकृतकैवल्यश्च न संभवति ॥ ८ ॥

183 विप्रतिषेधाच्चासमञ्जसम् ॥ पुरुषस्य द्रष्टृत्वभोक्तृत्वनिर्विकारत्वादिविरुद्धसहस्राभ्युपगमाच्च असमञ्जसं कापिलमतम् ॥ ९ ॥

184 महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ असमञ्जसमिति वर्तते, वाशब्दश्चार्थे। ह्रस्वपरिमण्डलाभ्यां महद्दीर्घवत्—द्व्यणुकत्र्यणुकोत्पत्तिवदन्यच्च तन्मतं सर्वमसमञ्जसम् । अवयवास्स्वकीयैष्षड्भिः पार्श्वैस्संयुज्यमाना हि पृथुतरमवयविनमारभन्ते । परमाणूनां निरवयवत्वेन पार्श्वानभ्युपगमात्; पार्श्वाननपेक्ष्य संयुज्यमानानां न पृथुतरद्रव्यारम्भकत्वसंभवः ॥ १० ॥

185 उभयथाऽपि न कर्मातस्तदभावः ॥ अणुगताद्यकर्मासंभवात्तत्कृताणुसंयोगाभावात् क्षेत्रज्ञादृष्टानां विपाकापेक्षत्वेऽपि न तत्कृतकादाचित्काणुगतकर्मसंभवः; अनपेक्षत्वे प्रागप्युत्पादकं स्यात् । विपाको नाम कश्चिददृष्टगतो धर्मो न ज्ञायते; कर्मविधिवेलायामेव कालविशेषनियतफलदायित्वं यस्य कर्मणश्चोदितम्, तस्य तत्तत्कालागम एव विपाकः । अनियतकालविशेषाणां कर्मणां प्रबलकर्मान्तराप्रतिबन्ध एव विपाकः, अदृष्टानि च तत्तत्कर्मानुगुणफलदानस्वभावानि। अतोऽनन्तैरात्मभिः विविधकालफलदायित्वेनानुष्ठितानामेकदैकरूपविपाको न संभवति । अनुमेयेश्वरासिद्धेस्तदधिष्ठानाच्च न संभवति ॥ ११ ॥

186 समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ समवायाभ्युपगमाच्च असमञ्जसम्, समवायस्यापि जातिगुणादेरिव अपृथक्सिद्धिहेतत्वपेक्षासाम्यादनवस्थितेः, समवायस्य तत्स्वभावकल्पनायां जात्यादेरेव तन्न्याय्यम् ॥ १२ ॥

187 नित्यमेव च भावात् ॥ समवायस्य नित्यत्वाभ्युपगमे संबन्धिनित्यत्वमन्तरेण तदनुपपत्तेः अवयवावयविनोरुभयोर्नित्यत्वप्रसङ्गादसदेवेदम् ॥ १३ ॥

188 रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ परमाणूनां रूपादिमत्त्वान्नित्यत्वादिविपर्ययश्च, घटादिषु तथा दर्शनात् ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

189 उभयथा च दोषात् ॥ अनित्यत्वादिभयाद्रूपादिशून्यत्वे कारणगुणपूर्वकत्वासिद्धिः, तद्भयाद्रूपादिमत्त्वे च अनित्यत्वादिरिति उभयथा च दोषादसमञ्जसमेव ॥ १५ ॥

190 अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ काणादपक्षे कस्याप्यंशस्य वैदिकैरपरिग्रहादनुपपन्नत्वाच्च अत्यन्तमनपेक्षा ॥ १६ ॥

191 समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ अणुहेतुके पृथिव्यादिसमुदाये, पृथिव्यादिहेतुके शरीरेन्द्रियसमुदाये च सुगताभ्युपगते तदभ्युपगमप्रकारेणैव समुदायासिद्धिः । क्षणिकत्वं हि तैरभ्युपगम्यते । संहतौ व्याप्रियमाणाः परमाणवः पृथिव्यादयश्च तदानीमेव नष्टाश्चेत्, के समुदायिरूपेण संहन्यन्ते ? ॥ १७ ॥

192 इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावानिमित्तत्वात् ॥ अस्थिरेषु स्थिरत्वबुद्धिरूपाविद्यारागद्वेषादिपरम्परया अन्योन्यकारणत्वात्सर्वकारणत्वमुपपन्नमिति चेत्, न; अविद्यायास्सङ्घातभावानिमित्तत्वात् । न हि शुक्तिकादिषु रजतादिबुद्धिरूपाविद्यया शुक्तिकादिर्वस्तुतो रजतादिकार्यं करोति । अत्र विदुषस्तदानीमेव नष्टत्वादविद्यानिमित्तरागादयोऽपि न संभवन्ति ॥ १८ ॥

193 उत्तरोत्पादे च पूर्वनिरोधात् ॥ उत्तरघटक्षणोत्पत्तौ पूर्वघटक्षणस्यापि नष्टत्वेनाभावस्यैवोत्पादकत्वाविशेषेण सर्वदोत्पत्तिश्च स्यात् ॥ १९ ॥

194 असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ असत उत्पत्तावधिपतिसहकार्यादीनां ज्ञानहेतुत्वप्रतिज्ञाविरोधश्च । तस्यापि स्थित्यभ्युपगमे युगपत् घटद्वयोपलब्धिप्रसक्तिः, अस्थितौ च संप्रयोगज्ञानापत्तेः यौगपद्यम् ॥ २० ॥

195 प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ॥ निरोधः—निरन्वयविनाशः, स स्थूलः सूक्ष्मश्च न संभवति, कपालादिभावरूपावस्थाप्राप्तेरेव विनाशशब्दाभिधेयत्वात्, सतो द्रव्यस्य अविच्छेदात् ॥ २१ ॥

196 उभयथा च दोषात् ॥ उत्पन्नस्य तुच्छतापत्तौ तुच्छादुत्पत्तौ चाभावादुत्पत्त्यसंभवादभावात्मककार्यापत्तिरूपदोषात्तुच्छत्वासिद्धिः ॥ २२ ॥

197 आकाशे चाविशेषात् ॥ आकाशे च न तुच्छत्वम्, अबाधितप्रतीत्यविशेषात् । प्रतीयते ह्याकाशः श्येनादिपतनदेशत्वेन ॥ २३ ॥

198 अनुस्मृतेश्च ॥ प्रत्यभिज्ञानाच्च न क्षणिकत्वसिद्धिः । तदेवेदमिति हि सामानाधिकरण्येनातीतवर्तमानदेशकालविशिष्टं वस्तु एकमिति प्रतीयते । अस्याश्च सामग्री पूर्वानुभवजनितसंस्कारवतः पुरुषस्येन्द्रियसंप्रयोगः ॥ २४ ॥

199 नासतोऽदृष्टत्वात् ॥ ज्ञानाकारवैचित्र्येण ज्ञाने स्वाकारं समर्प्य विनष्टमप्यर्थमनुमिनोतीति वादश्च न संभवति, असतो विनष्टस्य धर्मिणो धर्मसंक्रमणस्यादृष्टत्वात् । (ज्ञाने नीला-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्याकार उपलभ्यते; स विनष्टस्यासतोऽर्थस्याकारो भवितुं नार्हति; कुतः ? अदृष्टत्वात् । न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे संक्रमणं दृष्टम्) ॥ २५ ॥

200 उदासीनानामपि चैवं सिद्धिः ॥ क्षणिकत्वाभ्युपगमे अनुष्ठातुरन्यत्वात् फलिनां निष्प्रयत्नानामपि सर्वार्थसिद्धिस्स्यात् ॥ २६ ॥

201 नाभाव उपलब्धेः ॥ ज्ञानव्यतिरिक्तार्थाभाववादश्च न संभवति; घटमहं जानामीति कर्तृज्ञानकर्मतयाऽर्थस्य उपलब्धेः न तदभावश्शक्यते वक्तुम् । पुरुषस्यार्थविशेषव्यवहारानुगुण्यापादकत्वमेव ज्ञानस्याकारः ॥ २७ ॥

202 वैधर्म्याच्च न स्वप्नादिवत् ॥ करणदोषजबाधकप्रत्ययराहित्यरूपवैषम्याच्च न स्वप्नादिवज्जागरितज्ञानस्य मिथ्यात्वम् ॥ २८ ॥

203 न भावोऽनुपलब्धेः ॥ अर्थशून्यस्य ज्ञानस्य सद्भावो न संभवति, अनुपलब्धेः । स्वप्नज्ञानस्याप्यर्थवत्तोपपादयिष्यते ॥ २९ ॥

204 सर्वथाऽनुपपत्तेश्च ॥ सर्वशून्यवादश्च न संभवति । सदिति प्रतिज्ञायामसदिति प्रतिज्ञायाश्च तुच्छता न संभवति, अनुपपत्तेः; सदसद्बुद्धितुच्छत्वादीनां वस्तुगतान्योन्यविरुद्धभावरूपावस्थाविशेषविषयत्वात् ॥ ३० ॥

205 नैकस्मिन्नसम्भवात् ॥ अर्हतो मतं न युक्तिमत्, एकस्मिन् वस्तुनि युगपत् सत्त्वासत्त्वनित्यत्वानित्यत्वभेदाभेदानामसंभवात् । पर्यायरूपाश्च द्रव्यस्यास्तित्वादिशब्दबुद्धिविषयाः परस्परविरुद्धपिण्डत्वघटत्वकपालत्वाद्यवस्थाः युगपन्न संभवन्ति; तथा घटत्वशरावत्वावस्थाश्च पृथिव्यादेः प्रदेशभेदेन । तथा च द्रव्यस्यानित्यत्वमुत्पत्तिविनाशयोगित्वम्, तद्विपरीतं नित्यत्वं नैकस्मिन् समवैति ॥ ३१ ॥

206 एवं चात्माकार्त्स्न्यम् ॥ आत्मनश्शरीरपरिमाणत्वे बृहतश्शरीरादल्पीयसि प्रविशतः अकार्त्स्न्यं—विकलत्वं प्रसज्यते ॥ ३२ ॥

207 न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ तथा सङ्कोचविकासावस्थायोगादपि नाविरोधः, घटादिवद्विकारादियोगप्रसक्तेः ॥ ३३ ॥

208 अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ अन्त्यस्य—मोक्षावस्थापरिमाणस्य एकरूपावस्थितेः तस्य स्वाभाविकत्वेनात्मतत्परिमाणयोरुभयोर्नित्यत्वेन पूर्वत्रापि न विशेषः । विविधदेहपरिमाणत्वे वैकल्यं स्यादेव ॥ ३४ ॥

209 पत्युरसामञ्जस्यात् ॥ नेति वर्तते, पशुपतेर्मतमनादरणीयम्, वेदविरुद्धनिमित्तोपादानभेदतद्विरुद्धाचारपरत्वेन असामञ्जस्यात् ॥ ३५ ॥

210 अधिष्ठानानुपपत्तेश्च ॥ अनुमेयेश्वराभ्युपगमेन हि केवलाधिष्ठातृत्वमुच्यते । तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

सति अशरीरस्य प्रधानाधिष्ठानानुपपत्तेः; सशरीरत्वे तु शरीरोत्पत्त्यनिरूपणात्, सावयवस्य तस्य नित्यत्वे महीमहीधरादीनामपि नित्यत्वाविरोधाच्च ॥ ३६ ॥

211 करणवच्चेन्न भोगादिभ्यः ॥ करणकलेबराद्यधिष्ठानवदशरीरस्यैवाधिष्ठानमिति चेत्; न, पुण्यपापनिमित्तत्वात्तस्य तत्फलभोगादिप्रसक्तेः ॥ ३७ ॥

212 अन्तवत्त्वमसर्वज्ञता वा ॥ तथा सति क्षेत्रज्ञवत् अन्तवत्त्वमसर्वज्ञता च ॥ ३८ ॥

213 उत्पत्त्यसंभवात् ॥ साङ्ख्यादिवत्पञ्चरात्रमपि जीवोत्पत्त्यभिधानात्, श्रुतिविरुद्धत्वेन तदसंभवादप्रमाणम् ॥ ३९ ॥

214 न च कर्तुः करणम् ॥ कर्तुः–जीवात्, करणम्–मनश्च, श्रुतावुत्पद्यते इति नोच्यते, *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चेत्यादिश्रुतेः ॥ ४० ॥

215 विज्ञानादिभावे वा तदप्रतिषेधः ॥ *वासुदेवात्सङ्कर्षणो नाम जीव इत्यादौ सङ्कर्षणादीनां विज्ञानादिरूपवासुदेवत्वे सति तदभिधायिनः प्रामाण्यानिषेधः । परब्रह्मवासुदेवस्य श्रुतावपि *अजायमानो बहुधा विजायते इति चावतारश्श्रूयते । जीवादिशब्दाः तत्तच्छरीरकसङ्कर्षणादीनां वाचकाः ॥ ४१ ॥

216 विप्रतिषेधाच्च ॥ तस्मिन्नपि तन्त्रे *व्याप्तिरूपेण संबन्धः तस्याश्च पुरुषस्य च । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥ इति जीवोत्पत्तिप्रतिषेधाच्चाविरोधश्श्रुतः ॥ ४२ ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे द्वितीयस्याध्यायस्य द्वितीयः पादः

द्वितीयाध्याये तृतीयः पादः

217 न वियदश्रुतेः ॥ वियन्नोत्पद्यते, अश्रुतेः––श्रुतिः श्रवणम् । निरवयवस्य, आत्मन इवोत्पत्तिश्रवणासंभवात् ॥ १ ॥

218 अस्ति तु ॥ श्रवणं संभवत्येव––*आकाशस्संभूतः इत्येव हि श्रुतिः अतीन्द्रियार्थविषया वियदुत्पत्तिं प्रतिपादयति । आत्मनोऽपि *न जायते* इति प्रतिषेधादनुत्पत्तिः ॥ २ ॥

219 गौण्यसंभवाच्छब्दाच्च ॥ *तत्तेजोऽसृजतेति तेजःप्राथम्यवचनात्, *आकाशस्संभूत इति श्रुतिः गौणी, *वायुश्चान्तरिक्षं चैतदमृतमिति शब्दाच्च ॥ ३ ॥

220 स्याच्चैकस्य ब्रह्मशब्दवत् ॥ एकस्य संभूतशब्दस्याकाशे गौणत्वमन्यत्र मुख्यत्वम् अनुषङ्गे संभवत्येव, श्रवणावृत्तिवत् । यथैकस्य ब्रह्मशब्दस्य *तस्मादेतत् ब्रह्म नाम रूपमन्नञ्च जायते इति प्रकृतौ गौणत्वम्, *तपसा चीयते ब्रह्मेति मुख्यत्वमावृत्तौ ॥ ४ ॥ परिहरति––

Digitization by Arya Samaj Charitable Foundation, Chennai

221 प्रतिज्ञाऽहानिरव्यतिरेकात् ॥ *येनाश्रुतं श्रुतमित्यादिना एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञायाः अहानिः वियदादेः ब्रह्मकार्यत्वेन तदव्यतिरेकादेव ॥ ५ ॥

222 शब्देभ्यः ॥ *आकाशस्संभूत इत्यादिशब्देभ्यः अवगतां वियदुत्पत्तिं *तत्तेजोऽसृजतेत्यत्राकाशशब्दावचनावगतं तेजःप्राथम्यं न निवारयितुं क्षमम् ॥ ६ ॥

223 यावद्विकारं तु विभागो लोकवत् ॥ *ऐतदात्म्यमिदं सर्वमित्यादिना आकाशादेरपि विकारत्वावगमात्, तेजःप्रभृतिविभागवचनं सर्वस्य प्रदर्शनार्थमिति निश्चीयते । यथा च लोके दशेमे देवदत्तपुत्रा इत्युक्त्वा तेषु केषाञ्चिदुत्पत्तिवचनम् ॥ ७ ॥

224 एतेन मातरिश्वा व्याख्यातः ॥ *तेजोऽत इत्यादि वक्तुं वायोः पृथगुपादानम् ॥ ८ ॥

225 असंभवस्तु सतोऽनुपपत्तेः ॥ असंभवस्तु परस्य ब्रह्मण एव, इतरस्य *सदेवेत्यवधारणाद्यनुपपत्तेरुत्पत्तिरेव ॥ ९ ॥

आकाशादिव्यवहितकार्याणामपि साक्षाद्ब्रह्मण उत्पत्तिं वक्तुं पूर्वपक्षमाह—

226 तेजोऽतस्तथा ह्याह ॥ तेजः वायोरेवोत्पद्यते, न साक्षाद्ब्रह्मणः; *वायोरग्निरिति आह ॥ १० ॥

227 आपः ॥ *अग्नेरापः इति श्रुतेः आपः अग्नेः ॥ ११ ॥

228 पृथिवी ॥ पृथिवी अद्भ्यः, *अद्भ्यः पृथिवी इति श्रुतेः ॥ १२ ॥

229 अधिकाररूपशब्दान्तरेभ्यः ॥ *ता अन्नमसृजन्तेत्यन्नशब्देन पृथिव्येवाभिधीयते, महाभूतसृष्ट्यधिकारात्; *यत्कृष्णं तदन्नस्येति पृथिवीरूपविधानात्, *अद्भ्यः पृथिवीति पृथिवीशब्दाभिधानाच्च ॥ १३ ॥

राद्धान्तमाह—

230 तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ *तत्तेज ऐक्षत *ता आप ऐक्षन्तेति तदभिध्यानरूपात्, *तदैक्षत बहु स्यामित्येतत्सरूपात् परमात्मकारणत्वलिङ्गात् स एव परमात्मा तेजःप्रभृतिशरीरकस्तत्तच्छब्दैस्साक्षात्कारणत्वेनाभिधीयते ॥ १४ ॥

231 विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ पारम्पर्यक्रमात् विपर्ययेण *एतस्माज्जायते प्राणः खं वायुर्ज्योतिरापः* इत्यादिवाक्यात् यस्साक्षाद्ब्रह्मणस्सृष्टेरुपक्रमः, सोऽपि अतः—तेजःप्रभृतिशरीरकब्रह्मण एव सृष्टेः उपपद्यते ॥ १५ ॥

232 अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ भूतप्राणयोरन्तराले इन्द्रियग्राममनसी क्रमेण उत्पद्येते इत्येतत्परमिदं वाक्यं, *खं वायुर्ज्योतिरापः इत्यादिश्रुतिप्रत्यभिज्ञानरूपात् लिङ्गात्; अत इदमपि पारंपर्यक्रमपरमिति चेन्न, *एतस्माज्जायत इत्यस्य प्राणादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

पृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतस्तेजःप्रभृतीनामपि साक्षात्परमात्मैव कारणम् ॥ १६ ॥

*तत्तेज ऐक्षतेति तेजःप्रभृतिशब्दाः लोके तत्तद्वस्तुवाचिनः ब्रह्मणि भाक्ता इत्यत्राह—

233 चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥ चराचरवस्तुसंबन्धितत्तद्वाचकशब्दः ब्रह्मणि अभाक्तः—मुख्य एव,*अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति तु सर्वस्य वस्तुनो नामरूपभाक्त्वस्यात्मतया ब्रह्मानुप्रवेशभावभावित्वात् । लौकिकास्त्वेवमजानन्तो वाच्यैकदेशे प्रयुञ्जते ॥ १७ ॥

234 नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ नात्मा उत्पद्यते, *न जायते म्रियते इति श्रुतेः; *नित्यो नित्यानामित्यादिश्रुतिभ्यो नित्यत्वावगतेश्च ॥ १८ ॥

235 ज्ञोऽत एव ॥ *अथ यो वेदेदं जिघ्राणीति स आत्मा *मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके* इत्यादिश्रुतेः बद्धो मुक्तश्चात्मा ज्ञातैव । *मनोऽस्य दैवं चक्षुः* इति श्रुतेः स्वधर्मभूतं ज्ञानं मनः ॥ १९ ॥

236 उत्क्रान्तिगत्यागतीनाम् ॥ उत्क्रान्तिगत्यागतीनां श्रुतेरणुर्जीवः ॥ २० ॥

237 स्वात्मना चोत्तरयोः ॥ गत्यागत्योस्स्वात्मनैव संपाद्यत्वादप्यणुत्वं निश्चितम् ॥ २१ ॥

238 नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ *स वा एष महानज आत्मेति श्रुतेः नाणुरिति चेत्, न; *यस्यानुवित्तः प्रतिबुद्ध आत्मेति परमात्माधिकारात् ॥ २२ ॥

239 स्वशब्दोन्मानाभ्याञ्च ॥ एषोऽणुरात्मेत्यणुशब्दात्, *आराग्रमात्रो ह्यवर इत्युद्धृत्य उन्मानशब्दाच्चाणुः ॥ २३ ॥

अणोरपि सकलदेहव्यापिवेदनानुभवे अन्यमतेन हेतुमाह—

240 अविरोधश्चन्दनवत् ॥ यथा चन्दनबिन्दुरेकदेशस्थोऽपि सकलदेहव्यापि सुखं जनयति तद्वदविरोधः ॥ २४ ॥

241 अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ देहदेशविशेषस्थितेश्चन्दनस्येति चेन्न, आत्मनोऽपि तदभ्युपगमात्; *हृदि ह्ययमात्मा *योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरिति श्रुतेः ॥ २५ ॥

स्वमतेनाह—

242 गुणाद्वाऽऽलोकवत् ॥ आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यानुभवति, यथा मणिप्रभृतयस्स्वकीयेनालोकेन सकलदेशं व्याप्य प्रकाशयन्ति; *प्रज्ञामात्रास्वर्पिताः इति श्रुतेः ॥ २६ ॥

न ज्ञानात्मनोः व्यतिरेक इत्यत्राह—

243 व्यतिरेको गन्धवत्तथा च दर्शयति ॥ *गन्धवती पृथिवीतिवत् अहं जानामीति गुणवत्त्वेनोपलब्धेः व्यतिरेकोऽस्ति । दर्शयति च श्रुतिर्व्यतिरेकं *जानात्येवायं पुरुष इति ॥ २७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

244 पृथगुपदेशात् ॥ आत्मनः पृथक्त्वेन चोपदिश्यते *न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इति ॥ २८ ॥

*योऽयं विज्ञानमय इति ज्ञानमात्रव्यपदेशः कथमित्यत्राह—

245 तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः, यथा प्राज्ञस्य विपश्चितोऽपि *सत्यं ज्ञानमिति ॥ २९ ॥

246 यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ आत्मस्वरूपानुबन्धित्वात् ज्ञानस्य तेन व्यपदेशे न दोषः । स्वरूपानुबन्धिधर्मत्वेन गोत्वादीनां खण्डादेः गौरित्यादिव्यपदेशो हि दृश्यते ॥ ३० ॥

सुषुप्त्यादिष्वसतो ज्ञानस्य यावदात्मभावित्वं कथमित्यत्राह—

247 पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ सुषुप्त्यादिषु सतो ज्ञानस्यानभिव्यक्तस्यापि जागरादावभिव्यक्तिसंभवात्, स्वरूपानुबन्ध्येव ज्ञानम्; यथा पुंस्त्वासाधारणसप्तमधातोर्बाल्येऽपि सतो युवत्वेऽभिव्यक्तिः । जीवात्मनो ज्ञातृत्वमणुत्वञ्चोक्तम् ॥ ३१ ॥

248 नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ अन्यथा—ज्ञप्तिमात्रसर्वगतात्मवादे तावन्नित्यवत्सर्वदोपलब्धिस्स्यात्; सङ्कोचकाभावाद्विद्यमानाया अनुपलब्धेरपि सव हेतुरिति साऽपि नित्यवत्स्यात्; ज्ञाने विद्यमानेऽपि हेत्वन्तरेण निवारणासंभवात् । आगन्तुकज्ञानसर्वगतात्मवादेऽपि स एव दोषः; सर्वात्मनां सर्वगतत्वेन ज्ञानहेतूनां मनस्संयोगादीनां सर्वसाधारणत्वात् । अदृष्टहेतूनामपि सर्वसाधारणत्वात् तेनापि न नियमः । अथोपलब्ध्यनुपलब्ध्योर्विरोधादुपलब्धेर्वैते हेतवः स्युः; अनुपलब्धेर्वा । तथा सत्यन्यतरनियमस्स्यात् ॥ ३२ ॥

249 कर्ता शास्त्रार्थवत्त्वात् ॥ ज्ञाता सन्नयमात्मा कर्मसु कर्ता च । आत्मनः अकर्तृत्वे, कुर्यात्, न कुर्यादिति शास्त्रानर्थक्यं स्यात् ॥ ३३ ॥

250 उपादानाद्विहारोपदेशाच्च ॥ *प्राणान् गृहीत्वा स्वे शरीरे यथा कामं परिवर्तते इत्युपादानविहारोपदेशाच्च कर्ता ॥ ३४ ॥

251 व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ *विज्ञानं यज्ञं तनुते इत्यादिना यज्ञादौ कर्तृत्वव्यपदेशाच्च कर्ता । विज्ञानशब्दो बुद्धेः, नात्मन इति चेत्, न । तदा, विज्ञानेनेति निर्देशविपर्ययः स्यात्, बुद्धेः करणत्वात् ॥ ३५ ॥

252 उपलब्धिवदनियमः ॥ प्रकृतेरेव कर्तृत्वे तस्यास्सर्वसाधाणत्वेन पूर्वोपलब्ध्यनियमवत् फलानियमस्स्यात् ॥ ३६ ॥

253 शक्तिविपर्ययात् ॥ प्रकृतेरेव कर्तृत्वे कर्तुरेव भोक्तृत्वमिति सैव भोक्त्री स्यादित्यर्थः॥ ३७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

254 समाध्यभावाच्च ॥ प्रकृतेरेव कर्तृत्वे प्रकृतेरन्योऽस्मीति समाध्यभावप्रसङ्गाच्च ॥ ३८ ॥

255 यथा च तक्षोभयथा ॥ आत्मनः कर्तृत्वे इच्छायां करोति, अन्यथा न करोतीति, व्यवस्था च सिध्यति। यथा तक्षा स्वकार्येषु। बुद्धेरिच्छाभावात् न व्यवस्था; चेतनधर्मत्वादिच्छायाः ॥ ॥ ३९ ॥

256 परात्तु तच्छ्रुतेः ॥ *य आत्मानमन्तरो यमयतीत्यादिश्रुतेरात्मनः कर्तृत्वं परायत्तम्; *सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनश्चेत्यादिस्मृतेश्च ॥ ४० ॥

257 कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ जीवः स्वेच्छया प्रवृत्तिनिवृत्तिहेतुभूतं प्रयत्नं करोति, जीवने तु कृतं प्रयत्नं प्रथमप्रवृत्तिहेतुमपेक्ष्य तदनुमतिदानेन परः प्रवर्तयतीति तद्विधिनिषेधावैयर्थ्यनिग्रहानुग्रहेभ्योऽवगम्यते । यथा गुरुतरदार्वादिभरणमबलः प्रबलसहकृतः कुर्वन्नपि स्वीयप्रयत्नेन विधिनिषेधयोग्यो भवति। एवमेव जीवः परमपुरुषानुमतिसहकृतः प्रवर्तमानोऽपि विधिनिषेधयोग्य इति न कश्चिद्विरोधः ॥ ४१ ॥

258 अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ जीवात्मा परमपुरुषांशः, *पृथगात्मानं प्रेरितारं च मत्वा *स कारणं करणाधिपाधिपः *इत्यादिनानाव्यपदेशात्; अन्यथा *तत्त्वमसि *अयमात्मा ब्रह्मेति ऐक्योपदेशाच्च। *ब्रह्मदाशाः इत्यादिसर्वजीवानामप्यैक्यमधीयत एके; अंशत्वाभ्युपगमे ह्युभयं मुख्यं भवति ॥ ४२ ॥

259 मन्त्रवर्णात् ॥ *पादोऽस्य विश्वा भूतानीति मन्त्रवर्णाच्च ॥ ४३ ॥

260 अपि स्मर्यते ॥ *ममैवांशो जीवलोके जीवभूतस्सनातन इत्यादिना ॥ ४४ ॥

261 प्रकाशादिवत्तु नैवं परः ॥ ब्रह्मांशत्वेऽपि जीवस्य, जीवो यत्स्वरूपो यत्स्वभावश्च, नैवं परः—निरवद्यः सर्वज्ञः सत्यसङ्कल्प एव सर्वदा। कथम्? प्रकाशादिवत्— प्रकाशविशिष्टानां मणिप्रभृतीनां प्रकाशः विशिष्टैकदेशत्वेन यथांशः। आदिशब्दाद्विशेषणतैकस्वभावजातिगुणशरीराणि गृह्यन्ते। विशेषणानां विशिष्टैकदेशतया तदंशत्वेऽपि विशेषणविशेष्ययोः स्वरूपस्वभावभेदो न विरुद्धः। *य आत्मनि तिष्ठन्यस्यात्मा शरीरमिति हि श्रुतिः ॥ ४५ ॥

262 स्मरन्ति च ॥ चिदचिदात्मकजगतो ब्रह्मांशत्वं प्रकाशादिवदिति पराशरादयः स्मरन्ति *एकदेशस्थितस्याग्नेः ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्॥ *तत्सर्वं वै हरेस्तनुः *तानि सर्वाणि तद्वपुः* इत्यादिषु ॥ ४६ ॥

263 अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ब्रह्मांशत्वेऽपि सर्वजीवानां कस्यचिद्वेदाध्ययनादौ अनुज्ञा, कस्यचित् परिहार इत्येतौ ब्राह्मणादिदेहविशेषसंबन्धादुपपद्येते; यथाऽग्न्यादेः श्रोत्रियागारश्मशानादिसंबन्धात् ॥ ४७ ॥

264 असन्ततेश्चाव्यतिकरः ॥ प्रतिदेहं भिन्नत्वात्, अणुत्वेन तत्रतत्र परिच्छिन्नत्वाच्च,

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानसुखाद्यव्यतिकरः । अज्ञानोपाधिभ्यां ब्रह्मैव संबध्यत इति पक्षद्वयेऽपि न तत्तद्व्यवस्था ॥ ४८ ॥

265 आभासा एव च ॥ पक्षद्वयेऽपि हेतवश्च आभासाः ॥ ४९ ॥

266 अदृष्टानियमात् ॥ सत्यमिथ्योपाधिकृतत्वेऽपि आत्मनां ब्रह्मण एव अज्ञानमुपाधिश्चेति तत्तत्कृतेनादृष्टादिनाऽपि न नियमः ॥ ५० ॥

267 अभिसन्ध्यादिष्वपि चैवम् ॥ अदृष्टहेतुभूताभिसन्ध्यादिष्वपि चैवमेव ॥ ५१ ॥

268 प्रदेशभेदादिति चेन्नान्तर्भावात् ॥ उपाधिसंबन्धिब्रह्मप्रदेशभेदात् व्यवस्थेति चेन्न; उपाधिषु गच्छत्सु सर्वप्रदेशानां तदन्तर्भावात् ॥ ५२ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे द्वितीयस्याध्यायस्य तृतीयः पादः ।

द्वितीयाध्याये चतुर्थः पादः

269 तथा प्राणाः ॥ यथा जीवोत्पत्तिः नित्यत्वश्रुतेर्नोपपद्यते; तथेन्द्रियाण्यपि, *असद्वा इदमग्र आसीत्...ऋषयो वा व तेऽग्रे सदासीत्-..प्राणा वा व ऋषयः* इति प्रलयकाले प्राणानां स्थित्युपदेशात् ॥ १ ॥ नैवम्—

270 गौण्यसंभवात्तत्प्राक्छ्रुतेश्च ॥ तस्य परमात्मन एव सृष्टेः प्राक्स्थितिस्थानश्रुतेः ऋषिशब्दः प्राणशब्दश्च परमात्मन्येव । बहुत्वासंभवात् बहुवचनश्रुतिर्गौणी ॥ २ ॥

271 तत्पूर्वकत्वाद्वाचः ॥ परमात्मनः सृष्टिपूर्वकत्वात् इतरेषां नामयोगस्य तदानीं प्राणशब्दो नेन्द्रियविषयः ॥ ३ ॥

272 सप्त गतेर्विशेषितत्वाच्च ॥ सप्तैवेन्द्रियाणि *सप्त प्राणाः *यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह, बुद्धिश्च* इति सप्तानामेव सहगतेस्तेषामेव योगे विशेषितत्वाच्च ॥ ४ ॥

273 हस्तादयस्तु स्थितेऽतो नैवम् ॥ हस्तादयोऽपीन्द्रियाणि, जीवे देहान्तरवस्थिते उपकारकत्वाविशेषात् । अतो न सप्तैव, अपि त्वेकादश, *दशेमे पुरुषे प्राणा आत्मैकादशः *इन्द्रियाणि दशैकञ्चेति श्रुतिस्मृतिभ्याम् । बुद्ध्यादयः मनोवृत्तिभेदाः । सप्तानां गतिश्रवणं विशेषणञ्च तेषां प्राधान्यात् ॥ ५ ॥

274 अणवश्च ॥ तानि चाणूनि, *प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति गतिश्रवणात् ॥ ६ ॥

275 श्रेष्ठश्च ॥ श्रेष्ठः पञ्चवृत्तिप्राणोऽप्युत्पद्यते । उत्तरचिन्तार्थोऽयमनुवादः ॥ ७ ॥

276 न वायुक्रिये पृथगुपदेशात् ॥ पञ्चवृत्तिप्राणः न वायुमात्रम्, तत्क्रिया वा, *एतस्माज्जायते प्राणः खं वायुरिति पृथगुपदेशात् ॥ ८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

277 चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ वायोः पृथग्भूतोऽयं नाग्न्यादिवत् भूतान्तरम्; वायुरेव देहधारणयोग्याकारमापन्नः चक्षुरादिवत् जीवोपकरणम्, चक्षुरादिभिस्सहोपदेशतत्तुल्योपकारतन्मुख्यत्वेभ्यः ॥ ९ ॥

278 अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ करणम्--क्रिया; न जीवोपकाररूपक्रियारहितत्वे दोषः; यतः श्रुतिरेव देहेन्द्रियाद्यशैथिल्यकरणं दर्शयति, प्राणोत्क्रमणे देहेन्द्रियादिशैथिल्याभिधानात् ॥ १० ॥

279 पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ प्राण एक एव स्ववृत्तिभिः पञ्चभिः प्राणापानादिनामभाग्भवति; कामादिभिर्यथैकमेव मनः *कामस्सङ्कल्प इत्यारभ्य *एतत्सर्वं मन एवेति ॥११॥

280 अणुश्च ॥ *प्राणोऽनूत्क्रामतीत्युत्क्रान्तेः अणुः ॥ १२ ॥

281 ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् ॥ जीवेन सह अग्न्याद्यः इन्द्रियाद्यधिष्ठानं परमात्मसङ्कल्पादेव भवति; *योऽग्नौ तिष्ठन्...योऽग्निमन्तरो यमयति, इत्यादिशब्दात् ॥ १३ ॥

282 तस्य च नित्यत्वात् ॥ सर्वस्य तन्नियाम्यत्वनियमात् ॥ १४ ॥

283 त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ श्रेष्ठादन्यत्र ये प्राणाः, त इन्द्रियाणि, तेष्वेवेन्द्रियव्यपदेशात्, *इन्द्रियाणि दशैकञ्चेत्यादि ॥ १५ ॥

284 भेदश्रुतेर्वैलक्षण्याच्च ॥ *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चेति भेदेनोत्पत्तिश्रुतेः, इन्द्रियवृत्त्युपरमेऽपि प्राणवृत्त्यनुपरमवैलक्षण्याच्च ॥ १६ ॥

285 संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ देवादिनामरूपव्यष्टिसृष्टिः चतुर्मुखशरीरकात् परमात्मन एव; न केवलचतुर्मुखात् । *नामरूपे व्याकरवाणि तासां त्रिवृतंत्रिवृतमेकैकां करवाणीति त्रिवृत्करणं कुर्वतो नामरूपव्याकरणोपदेशात् । त्रिवृत्करणं तु केवलचतुर्मुखस्य न संभवति; त्रिवृत्कृतैस्तेजोबन्नैरण्डमुत्पाद्य पश्चाच्चतुर्मुखसृष्टिः, *तदण्डमभवद्धैमं...तस्मिञ्जज्ञे स्वयं ब्रह्मा* इत्यादिस्मृतेः ॥ १७ ॥

286 मांसादि भौमं यथाशब्दमितरयोश्च ॥ *अन्नमशितं त्रेधा विधीयते* इत्यत्र प्रागुक्तत्रिवृत्करणादर्थान्तरभूतः अण्डान्तर्वर्तिपुरुषभुक्तान्नादीनां परिणामप्रकार उच्यते । अन्यथा मांसमनसोः पुरीषादणीयस्त्वेनाप्यत्वतैजसत्वप्रसक्तिः । तथा सति *अन्नमशितं त्रेधेति भूमेरेव त्रिधात्वोपक्रमः, *अन्नमयं हि सोम्य मन इति मनसो भौमत्वञ्च विरुध्यते । तथेतरयोरप्तेजसोः त्रैविध्यं विरुध्यते । तदिदमाह--मांसादि भौमं यथाशब्दमितरयोश्चेति । पुरीषवन्मांसमनसी अपि भौमे इतीहोच्यते । तथा मूत्रवल्लोहितप्राणावप्याप्यौ; तथा अस्थिवन्मज्जावाचौ तैजस्यौ ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्वमेव त्रिवृत्कृतं चेत्, त्र्यात्मकं वस्तु कथमन्नमापस्तेज इत्युच्यत इत्यत्राह—

287 वैशेष्यात्तु तद्वादस्तद्वादः ॥ अन्नादिभूयस्त्वेन वैशेष्यादन्नादिवादः ॥ १९ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

श्रीमते रामानुजाय नमः

श्रीवेदान्तसारे तृतीयाध्याये प्रथमः पादः

288 तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ जीवो देहाद्देहान्तरप्राप्तौ भूतसूक्ष्मैस्संपरिष्वक्तो यातीति पञ्चाग्निविद्यायां प्रश्नप्रतिवचनाभ्यामवगम्यते । *वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नः, *इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रतिवचनम् । उत्तरैस्सूत्रैरर्थोऽभिव्यज्यते । स चायमर्थः—जीवो ब्राह्मणादिदेहस्थः स्वाहादानादिकर्मकृत् तत्तत्फलभोगायास्माद्देहादुत्थाय गच्छन्, एतद्देहस्थाभिः भूतान्तरसंसृष्टाभिः सूक्ष्माकाराभिरद्भिः संपरिष्वक्तोऽग्नित्वेन निरूपितं द्युलोकं प्राप्य, ताभिरेवामृतमयदेहाकारपरिणताभिरद्भिःपरिष्वक्तो देवानां शेषत्वमुपगम्य, तैस्सह तत्र भोगमनुभूय, कर्मावसाने भुक्तशिष्टब्राह्मणादियोनिःप्रापककर्मणा सह पुनरपीमं कर्मलोकमागम्य, कर्म कर्तुं ताभिः परिष्वक्तोऽग्नित्वरूपितं पर्जन्यं प्राप्य, वर्षधाराभिस्सहाग्नित्वनिरूपितां पृथिवीमुपगम्य, व्रीह्यादिसस्येन संयुज्य, अन्नाकारपरिणतेन तेन सहाग्नित्वनिरूपितं पुरुषं प्राप्य, तत्र शुक्लाकारपरिणताभिस्ताभिरद्भिः परिष्वक्तोऽग्नित्वनिरूपितां योषितं प्राप्य तत्र गर्भाकारपरिणताभिस्ताभिरद्भिः पुरुषशब्दाभिलपनीयाभिः परिष्वक्तः कर्मानुरूपं ब्राह्मणादिरूपेण जायते—इति ॥ १ ॥

289 त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ सर्वस्य त्रिवृत्करणेन त्र्यात्मकत्वात् भूतान्तरसंसृष्टा एवापो भूयस्त्वेनाप्छब्देनोच्यन्ते ॥ २ ॥

290 प्राणगतेश्च ॥ *प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति जीवेन सहेन्द्रियगतेस्तदाश्रयत्वेन देहगमनं प्रतीयते ॥ ३ ॥

291 अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ *अग्निं वागप्येतीतीन्द्रियाणामग्न्यादिगतिश्रुतेर्न जीवेन गमनमिति चेन्न, वागाद्यभिमानिदेवतासु भाक्तत्वात् वागादिशब्दानाम्, *ओषधीर्लोमानीत्यनपियद्भिर्लोमादिभिस्सहपाठात् ॥ ४ ॥

292 प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ प्रथमे—द्युलोकेऽपामश्रवणात् नापो

Digitization by Arya Samaj Charitable Foundation, Chennai

गच्छन्ति; *एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रद्धैव श्रुतेति चेन्न, आप एव श्रद्धाशब्देनोच्यन्त इत्यप्सु पृष्टासु तदुत्तरत्वोपपत्तेर्गम्यते । *श्रद्धा वा आपः इति श्रूयते ॥ ५ ॥

293 अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ अत्र प्रश्नप्रतिवचनयोराप एव प्रतीयन्ते; न तत्परिष्वक्तो जीव इति चेन्न, उत्तरत्र *अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते इत्यादाविष्टादिकारिणां गमनप्रकारवचनात् । द्युलोकाग्निसंबन्ध्यप्छब्दवाच्यस्य *तस्या आहुतेस्सोमो राजा संभवतीति सोमभूतस्यैव *सोमो राजेति प्रत्यभिज्ञानादद्भिः परिष्वक्तस्तच्छरीरक एव आप इत्युच्यत इत्यवगम्यते ॥ ६ ॥

294 भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥ *एष सोमो राजा...तं देवा भक्षयन्तीति सोमापन्नस्य देवैर्भक्ष्यमाणत्ववचनं, भाक्तम्—अनात्मवित्त्वेन देवोपकरणत्वाभिप्रायम् । तथा हि दर्शयति श्रुतिः *यथा पशुरेवं स देवानामिति पशुवद्देवोपकरणत्वं दर्शयति । तथाऽऽत्मविदामनात्मविदांच परमपुरुषोपकरणत्वं देवोपकरणत्वं च स्मर्यते *देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपीति ॥ ७ ॥

295 कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ कृतस्य कर्मणोऽन्ते निवर्तमानो भुक्तशिष्टकर्मवान्निवर्तत इति श्रुतिस्मृतिभ्यामवगम्यते । *रमणीयचरणाः...रमणीयां योनिमापद्यन्ते इति श्रुतिः । *ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपमित्यादिका स्मृतिः । आरोहप्रकारेण मार्गैकदेशः, प्रकारान्तरेण चैकदेशः ॥ ८ ॥

296 चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ *रमणीयचरणा इति चरणशब्दान्नानुशयः, चरणशब्दस्य स्मार्ताचारविषयत्वादिति चेन्न, अनुशयोपलक्षणार्था आचारश्रुतिः, तस्यैव सुखसाधनत्वात् ॥ ९ ॥

297 आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ स्मार्ताचारस्यानुपयोगात् आनर्थक्यमिति चेन्न, तदपेक्षत्वात् सर्वस्य पुण्यकर्मणः, *सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु इति वचनादिति कार्ष्णाजिनिमतम् ॥ १० ॥

298 सुकृतदुष्कृते एवेति तु बादरिः ॥ *रमणीयचरणाः...कपूयचरणा इति चरणशब्देन सुकृतदुष्कृते एवाभिधीयेते; पुण्यं कर्माचरतीति प्रसिद्धेरिति बादरिः । एतदेव स्वीकृतम्; स्मार्ताचारापेक्षं सर्वं पुण्यं कर्मेति च स्वीकृतम् ॥ ११ ॥

299 अनिष्टादिकारिणामपि च श्रुतम् ॥ इष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनमस्ति, *ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते *इत्यविशेषात् ॥ १२ ॥

300 संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ इष्टापूर्ताद्यकुर्वतां यमसदने तत्फलमनुभूयारोहादिः, *वैवस्वतं सङ्गमनमित्यादौ तद्गतिदर्शनात् ॥ १३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

301 स्मरन्ति च ॥ *सर्वे चैते वशं यान्ति यमस्येति ॥ १४ ॥

302 अपि सप्त ॥ सप्त रौरवादीनपि स्मरन्ति ॥ १५ ॥

303 तत्रापि तद्व्यापारादविरोधः ॥ तत्रापि यमव्यापारादेव यमवश्यताया अविरोधः॥१६॥

304 विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ विद्याकर्मणोः फलं ब्रह्मगमनं चद्रगमनंच । कथम्? *तद्य इत्थं विदुः तेऽर्चिषमभिसंभवन्ति *इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीति प्रकृतत्वात् ब्रह्मचन्द्रगमनयोः। अतः पापिनां न तद्गतिप्रसङ्गः ॥ १७ ॥

305 न तृतीये तथोपलब्धेः ॥ न च पापिनां द्युलोकगमनाय चन्द्रलोकगमनापेक्षा, तेषां द्युलोकगमनाभावोपलब्धेः—*अथैतयोः पथोर्न कतरेण चेत्यारभ्य, *एतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते* इति। तृतीयस्थानमिति पापकर्माण उच्यन्ते ॥ १८ ॥

306 स्मर्यतेऽपि च लोके ॥ लोके च द्रौपद्यादीनां पुण्यकर्मणामपि पञ्चमाहुत्यनपेक्ष-देहारम्भस्स्मर्यते ॥ १९ ॥

307 दर्शनाच्च ॥ तथा श्रुतावपि दृश्यते *भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जमिति। स्वेदजोद्भिज्जयोस्तदनपेक्षत्वम् ॥ २० ॥

308 तृतीयशब्दावरोधस्संशोकजस्य ॥ स्वेदजस्य उद्भिज्जशब्देन सङ्ग्रह इत्यर्थः ॥ २१ ॥

309 तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ *यथेतमाकाशमित्यादिना आकाशसादृश्यापत्तिः प्रत्यवरोहत उपदिश्यते, तत्रतत्र सुखदुःखानुभवाभावोपपत्तेः। तदनुभवार्थं हि तत्तच्छरीरता ॥२२॥

310 नातिचिरेण विशेषात् ॥ व्रीह्यादिप्राप्तेः प्रागाकाशादिषु नातिचिरं तिष्ठति, *अतो वै खलु दुर्निष्प्रपतरमिति व्रीह्यादावेव विशेषवचनात् ॥ २३ ॥

311 अन्याधिष्ठिते पूर्ववदभिलापात् ॥ *त इह व्रीहियवाः* इत्यादौ चान्यजीवाधिष्ठिते व्रीहियवादौ संश्लेषमात्रम्, अवरोहतः आकाशादिष्विव जननहेतुविरहिताभिलापात्। *जायन्त इति वचनमौपचारिकम्। यत्र ब्राह्मणादिजन्मास्ति, तत्र *रमणीयचरणाः इति हि हेतुरभिलप्यते ॥२४॥

312 अशुद्धमिति चेन्न शब्दात् ॥ अवरोहतः पूर्वानुष्ठितयागादिषु अग्नीषोमीयादि-हिंसागर्भत्वेन अशुद्धं कर्मास्तीति चेन्न, *हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेति *न वा उ वे तन्म्रियसे न रिष्यसि *इति पशुसंज्ञपनस्याहिंसात्वशब्दात् ॥ २५ ॥

313 रेतस्सिग्योगोऽथ ॥ *योयो ह्यन्नमत्ति योयो रेतस्सिञ्चतीति अन्नेन संसृष्टस्य रेतस्सिचा योगमात्रमनन्तरमुच्यते; अतः पूर्वमपि व्रीह्यादियोगमात्रम् ॥ २६ ॥

314 योनेश्शरीरम् ॥ योनिप्राप्तेः पश्चादेवावरोहता शरीरं प्राप्यते ॥ २७ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य प्रथमः पादः

Digitization by Arya Samaj Charitable Foundation, Chennai

तृतीयाध्याये द्वितीयः पादः

315 सन्ध्ये सृष्टिराह हि ॥ सन्ध्ये—स्वप्ने *अथ रथान् रथयोगानित्यादिना अभिहिता सृष्टिर्जीवकृता; *पुष्करिण्यस्स्रवन्त्यस्सृजते स हि कर्तेति स्वप्नद्रष्टं जीवमेव कर्तारमाह श्रुतिः ॥१॥

316 निर्मातारं चैके पुत्रादयश्च ॥ *य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः* इति, एनं जीवं स्वाप्नार्थनिर्मातारम् एके शाखिनोऽधीयते । अत्र कामशब्दनिर्दिष्टाः काम्यमानतया पुत्रादयः; पूर्वत्र *सर्वान् कामान् छन्दतः, इत्युक्त्वा *शतायुषः पुत्रपौत्रानिति विवृतत्वात् ॥ २ ॥

317 मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॥ स्वप्ने या रथादिसृष्टिः तदिदमीश्वरकृतं मायामात्रं—स्वप्नदर्शैवानुभाव्यं तत्कालमात्रावसानमित्याश्चर्यतया मायेत्युक्तम् । जीवस्य सत्यसङ्कल्पत्वादिकं स्वाभाविकं स्वरूपं संसारदशायां कात्स्न्र्येनानभिव्यक्तमिति न तस्य सङ्कल्पमात्रात् सृष्टिरुपपद्यते । *स हि कर्ता *पुरुषो निर्मिमाणः इति न जीवविषयम्, *तस्मिँल्लोकाश्श्रिताःसर्वे इति वचनात् ॥ ३ ॥

स्वाभाविकस्य अनभिव्यक्तिहेतुमाह—

318 पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानादेव तिरोहितम्; तदपचारात्तदनुवृत्तेर्हि अस्य बन्धविपर्ययौ, *अथ तस्य भयं भवति *अथ सोऽभयङ्गतो भवतीति श्रुतेः ॥ ४ ॥

319 देहयोगाद्वा सोऽपि ॥ सोऽपि तिरोभावः, देवमनुष्यादिदेहाकाराचिद्योगात् सृष्टिवेलायाम्, नामरूपविभागानर्हसूक्ष्माकाराचिद्योगात् प्रलये ॥ ५ ॥

320 सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ *अथ स्वप्ने पुरुषं कृष्णमित्यादिश्रुतेः शुभाशुभसूचकश्च हि स्वप्नः; स्वप्नविदश्चाचक्षते तत् । अतो न जीवस्स्रष्टा स्वाप्नार्थानाम् ॥ ६ ॥

321 तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ स्वप्नाभावः सुषुप्तिः, *आसु तदा नाडीषु सुप्तो भवति *सता सोम्य तदा संपन्नो भवतीति श्रुतेः नाडीषु परमात्मनि, *पुरीतति शेते इति श्रुतेः पुरीतति च; प्रासादखट्वापर्यङ्कवदविरोधः ॥ ७ ॥

322 अतः प्रबोधोऽस्मात् ॥ *सत आगम्य न विदुरिति ब्रह्मणः प्रबोधश्रुतिः अत एव ॥ ८ ॥

323 स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ सता संपन्नोऽपि सुप्त एव प्रबुद्ध उत्तिष्ठति, ज्ञानवैधुर्येण कृतस्य कर्मणस्तेनानुभाव्यत्वात्, पूर्वानुभूतप्रत्यभिज्ञानात्, *त इह व्याघ्रो वा इत्यादि *यद्यद्भवन्ति तथा भवन्तीति शब्दात्, मोक्षोपायविध्यानर्थक्याच्च ॥ ९ ॥

324 मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ मूर्च्छिते पुरुषे या अवस्था, सा मरणायार्धसंपत्तिरिति

Digitization by Arya Samaj Charitable Foundation, Chennai

हेतुभेदात्, आकारभेदात्, अपुनरुत्थाननियमाभावाच्च ज्ञायते ॥ १० ॥

325 न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ जागरादिषु चतसृष्ववस्थास्वन्तर्यामित्वेन स्थितेरपि परस्य ब्रह्मणो न कश्चन दोषः; यतस्सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिलदोषसंबन्धत्वसमस्तकल्याणगुणाकरत्वरूपोभयलिङ्गं परं ब्रह्म श्रुतम् *अपहतपाप्मा...सत्यसङ्कल्पः *निरवद्यम् *यस्सर्वज्ञस्सर्ववित् *समस्तकल्याणगुणात्मकोऽसौ *सकला न यत्र क्लेशादयः इत्यादिषु ॥ ११ ॥

326 भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ जीवस्य स्वतोऽपहतपाप्मनोऽपि शरीरसंबन्धित्वावस्थाभेदाद्यथा दोषसंबन्धः, तथा परस्यापि *यस्य पृथिवी शरीरमित्यादिशरीरसंबन्धित्वाद्दोष इति चेन्न, *यस्य पृथिवी शरीरमित्यादिषु प्रतिपर्यायं *स त आत्माऽन्तर्याम्यमृतः इति निर्दोषत्ववचनात् ॥ १२ ॥

327 अपि चैवमेके ॥ एकस्मिन् शरीरेऽवस्थितयोर्जीवपरयोर्यो विशेष उक्तः, एवमेके स्वशब्देनाधीयते—*द्वा सुपर्णा इत्यारभ्य, *पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीतीति ॥ १३ ॥

328 अरूपवदेव हि तत्प्रधानत्वात् ॥ मनुष्यादिशरीरेषु शरीरित्वेऽपि रूपरहितवस्तुवदेव वर्तते तत्—ब्रह्म, जीवनामरूपयोरपि निर्वोढृत्वेन प्रधानत्वात् । तथा हि श्रुतिः, *नामरूपयोर्निर्वहिता ते यदन्तरा इति; नामरूपयोरन्तरा—अस्पृष्टो मध्ये वर्तते, अवश्य इत्यर्थः ॥ १४ ॥

329 प्रकाशवच्चावैयर्थ्यात् ॥ यथा *सत्यं ज्ञानमिति वाक्यावैयर्थ्यात् स्वप्रकाशतया ज्ञानस्वरूपं ब्रह्म; तथा *निरवद्यम् *यस्सर्वज्ञः *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिपरश्शतवाक्यावैयर्थ्यात् निरवद्यं कल्याणगुणाकरञ्चेत्युभयलिङ्गमेव ॥ १५ ॥

330 आह च तन्मात्रम् ॥ *सत्यं ज्ञानमिति ज्ञानस्वरूपतामात्रमाह, नान्यन्निवारयति; अविशेषात्, विरोधाभावाच्च ॥ १६ ॥

331 दर्शयति चाथो अपि स्मर्यते ॥ दर्शयति च निर्दोषत्वं कल्याणगुणाकरत्वञ्च वेदान्तगणः *निष्कलं निष्क्रियं शान्तम् *तमीश्वराणामित्यादिः । *यो मामजमनादिमित्यादिना स्मर्यते च तत् ॥ १७ ॥

332 अत एव चोपमा सूर्यकादिवत् ॥ यतः पृथिव्यादौ सर्वत्र स्थितस्यापि निर्दोषत्वं कल्याणगुणाकरत्वञ्च; अत एव शास्त्रेषु जलसूर्यकादिवदित्युपमा *आकाशमेकं हि यथा...जलाधारेष्विवांशुमान् इति ॥ १८ ॥ चोदयति—

333 अम्बुवदग्रहणात्तु न तथात्वम् ॥ अम्बुनि सूर्यो यथा गृह्यते, न तथा परमात्मा पृथिव्यादौ; अत्र परमार्थतस्स्थितः; अतो न निर्दोषत्वमिति ॥ १९ ॥ परिहरति—

334 वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ नेति वर्तते । नैवम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

पृथिव्यादिष्वन्तर्भावात् परस्य तद्गतवृद्धिह्रासभाक्त्वं दृष्टान्तेन निवर्त्यते इत्युभयदृष्टान्तोपादानसामञ्जस्यादवगम्यते । *आकाशमेकं हि यथेति वस्तुतस्स्थितमाकाशं, वस्तुतोऽनवस्थितश्च सूर्यकमुभयमुपादत्ते; अनवस्थितस्य यथा न दोषस्पर्शः, तथा स्थितस्यापि हेत्वभावादिति ज्ञापयितुम् । विवक्षितधर्मसाम्यज्ञापनाय सिंह इवेति दृष्टान्तो दृश्यते । अथवा दर्शनाच्चेति, *अश्व इव रोमाणि विधूय पापमित्यादौ विवक्षितसाम्यान्वयो दार्ष्टान्तिके हि दृश्यते । अश्वो हि रोमाणि सहजानि स्वावयवभूतानि मूर्तद्रव्याणि स्वशरीरं कम्पयन् कानिचिन्मुञ्चति; आत्मा तु स्वेन कदाचिदनुष्ठितानि क्षणध्वंसितया विनष्टानि कर्माणि भगवदप्रीतिकराणीति भगवता स्वाप्रीतिकृतदुःखानि दातुं प्रवृत्तेन उपासनप्रीतिकृतानुग्रहान्निवर्तितानीति तत्सम्पर्काभावमनुसन्दधाति ॥ २० ॥

*अथात आदेशो नेति नेतीति सकलविशेषप्रतिषेधान्नोभयलिङ्गमित्यत आह—

335 प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ *द्वे वाव ब्रह्मणो रूपे इत्यारभ्य, कृत्स्नप्रपञ्चस्य ब्रह्मणो रूपत्वेनाप्रज्ञातस्य रूपत्वमुपदिश्य, पुनस्तस्यैव प्रतिषेधासंभवात् प्रकृतैतावन्मात्रं न भवति ब्रह्मेति ब्रह्मणः प्रकृतेयत्तां *नेतिनेतीति प्रतिषेधति । ततः पश्चात् पूर्वमनुक्तं गुणगणं ब्रवीति च *न ह्येतस्मादिति नेत्यन्यत्परमस्तीति । इति नेति निर्दिष्टाद्ब्रह्मणोऽन्यन्न ह्यस्तीत्युत्कृष्टम्; *अथ नामधेयं सत्यस्य सत्यमिति च । तन्निर्वचनम्—*प्राणा वै सत्यं तेषामेष सत्यमिति । प्राणाः—जीवात्मानः वियदादिवदुत्पत्त्यभावात्सत्यम्; तेभ्योऽप्येष सत्यं, ज्ञानसङ्कोचाद्यभावात् । अतः प्रकृतेयत्ताप्रतिषेधादुभयलिङ्गमेव ॥ २१ ॥

प्रत्यक्षेण सन्मात्रं ब्रह्मैव गृह्यते, अन्यत्सर्वं भ्रान्तमिति *नेति नेतीति निषेधार्थ इत्यत आह—

336 तदव्यक्तमाह हि ॥ ब्रह्मस्वरूपं न केनापि प्रमाणेन व्यज्यते; तथाऽऽह हि श्रुतिगणः, *न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् इत्यादिः । प्रत्यक्षादिना तु पटादेरेवास्तित्वं गृह्यते; न ब्रह्मणः ॥ २२ ॥

337 अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ अपि चात्यर्थप्रियानुध्यानरूपसम्यक्प्रीणने सति ब्रह्मस्वरूपं गृह्यत इति श्रुतिस्मृतिभ्यामवगम्यते । *नायमात्मा प्रवचनेन लभ्यः इति श्रुतिः । *नाहं वेदैरित्यादिस्मृतिः ॥ २३ ॥

338 प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ संराधनकर्मण्यभ्यासात् येषां ब्रह्मस्वरूपदर्शनं जातम्; तद्दर्शने ज्ञानानन्दादेरिव जगदैश्वर्यस्यावैशेष्यं प्रतीयते *अहं मनुरभवं सूर्यश्चेत्यादौ ॥ २४ ॥

339 अतोऽनन्तेन तथा हि लिङ्गम् ॥ अतः *द्वे वाव ब्रह्मणो रूपे इत्यादिनोपदिष्टेनानन्तेन कल्याणगुणेन योगो ब्रह्मणस्सिद्धः । तथा सत्युभयलिङ्गमेव ब्रह्म ॥ २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

340 उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ *आत्मैवेदं सर्वम् *अस्मान्मायी सृजते इत्येकत्वनानात्वव्यपदेशात् अहेः कुण्डलभावादिवत् ब्रह्मस्वरूपस्यैव *द्वे वा व ब्रह्मणो रूपे इत्यादिनोक्तः पृथिव्यादिभावः ॥ २६ ॥

341 प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ प्रकाशतदाश्रययोर्यथा स्वरूपभेदेऽपि तेजस्त्वयोगेनैक्यम्; एवमचिद्ब्रह्मणोश्चैकजातियोगेन ॥ २७ ॥

342 पूर्ववद्वा ॥ वाशब्दः पक्षद्वयव्यावृत्त्यर्थः; यथा पूर्वत्र जीवस्य प्रकाशजातिगुणशरीरवद्विशेषणतैकस्वभावतया विशिष्टैकदेशत्वेनांशत्वम्; एवमचिद्वस्तुनोऽपि । *आत्मैवेदं सर्वमिति चिदचिदोरेकेनैव शब्देन ऐक्याभिधानमित्यंशत्वमप्येकरूपमिति पूर्ववद्वेत्युक्तम् । इतरपक्षयोर्ब्रह्मणस्सदोषतादि दुर्वारमित्यर्थः । *यस्य पृथिवी शरीरम् *यस्यात्मा शरीरमिति चिदचिद्वस्तुनोश्शरीरतया तद्विशेषणस्वभावता सिद्धा ॥ २८ ॥

343 प्रतिषेधाच्च ॥ *नास्य जरयैतज्जीर्यतीत्यादिनाऽचिद्धर्मप्रतिषेधाच्चैवम् ॥ २९ ॥

344 परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ *जन्माद्यस्य यतः इत्यादिना *प्रतिषेधाच्चेत्येतदन्तेन यत्परमकारणं ब्रह्म प्रतिपादितम्; अतः परमपि किञ्चित्तत्त्वमस्तीति युक्त्याभासेनाशङ्क्यते । *अथ य आत्मा स सेतुः *एतं सेतुं तीर्त्वा *चतुष्पाद्ब्रह्म *अमृतस्यैष सेतुः* इत्यादिभिरस्य ब्रह्मणः सेतुत्वतरितव्यत्वपरिमितत्वप्रापकत्वव्यपदेशेभ्यः, *तेनेदं पूर्णं पुरुषेण सर्वम् *ततो यदुत्तरतरमित्येतस्मादर्थान्तरव्यपदेशाच्चान्यत्परमस्तीति ॥ ३० ॥

345 सामान्यात्तु ॥ तुशब्देनैतद्व्यावर्तयति । नैतद्युक्तम्; कुतः ? *न ह्येतस्मादिति नेत्यन्यत्परमस्तीति मूर्तामूर्तप्रपञ्चप्रकारतया तद्विशिष्टात्, इति नेति निर्दिष्टात् ब्रह्मणोऽन्यत्परं नास्तीत्यादिनिषेधसहस्रात् । परस्मिन् ब्रह्मणि सेतुत्वव्यपदेशः प्रशासनात् सर्वलोकासङ्करकरत्वेन सेतुसामान्यात्तु । तथाह--*अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति । *सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यारभ्य उक्तजगन्निमित्तोपादानभूतस्यैव ब्रह्मणः *एतमितः प्रेत्याभिसंभविताऽस्मीति परमप्राप्यत्ववचनात् । तरतिरपि प्राप्तिवचनः ॥ ३१ ॥

346 बुद्ध्यर्थः पादवत् ॥ *चतुष्पादित्युन्मानव्यपदेशोऽपि *वाक्पादः चक्षुः पाद इतिवदुपासनार्थः ॥ ३२ ॥

347 स्थानविशेषात्प्रकाशादिवत् ॥ अपरिमितस्यापि स्थानविशेषसंबन्धादवच्छिद्यानुसन्धानं युज्यते, प्रकाशाकाशादेरिव विततस्यापि वातायनघटादिना ॥ ३३ ॥

348 उपपत्तेश्च ॥ प्राप्यस्यैव परमात्मनः प्रापकत्वोपपत्तेः; यथाह--*यमेवैष वृणुते तेन लभ्य इति ॥ ३४ ॥

349 तथाऽन्यप्रतिषेधात् ॥ *यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति

Digitization by Arya Samaj Charitable Foundation, Chennai

कश्चित् इत्यस्मिन्वाक्ये पुरुषादन्यस्य ज्यायस्त्वप्रतिषेधादितोऽधिकं नास्ति। *ततो यदुत्तरतरमिति तु यतः पुरुषतत्त्वादन्यदुत्कृष्टं नास्ति; तत उत्तरतरं पुरुषतत्त्वमेवारूपमनामयम्; *य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति* इत्युपक्रमप्रतिज्ञातं सहेतुकमुपसंहृतम्। *तमेव विदित्वाऽति-मृत्युमेति नान्यः पन्था इत्युपक्रमे प्रतिज्ञातम्; अन्यथा उपक्रमविरोधश्च ॥ ३५ ॥

350 अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ *अणोरणीयान्महतो महीयान् *तेनेदं पूर्णं पुरुषेण सर्वम् *व्याप्य नारायणस्स्थितः *नित्यं विभुं सर्वगतं सुसूक्ष्ममित्यादिशब्दैरनेन ब्रह्मणा स्वव्यतिरिक्ततत्त्वस्य व्याप्तत्वमवगतम्; तत्तु तस्मात्परं वारयति ॥ ३६ ॥

351 फलमत उपपत्तेः ॥ अतः—परस्माद्ब्रह्मण एव कर्मभिरुपासनेन चाराधितात् भोगापवर्ग-रूपफलं सिद्ध्यति; कर्म क्षणध्वंसि न कालान्तरभाविफलायालमिति सर्वज्ञात् परमकारुणिकात् फलसिद्धिरुपपद्यते ॥ ३७ ॥

352 श्रुतत्वाच्च ॥ श्रुतमेव हि *अन्नादो वसुदानः *एष ह्येवानन्दयाति* इति अस्यैव फलदायित्वम् ॥ ३८ ॥

353 धर्मं जैमिनिरत एव ॥ धर्ममेव अतः—उपपत्तेः, श्रुतत्वाच्च, फलदायिनं जैमिनिर्मेने। उपपत्तिस्तु कृष्यादेर्मर्दनादेश्च कर्मणस्साक्षात्परम्परया वा फलसिद्धिदर्शनम्। श्रुतत्वं च कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वद्वारेण तत्तत्फलसाधनमिति निश्चयः ॥ ३९ ॥

354 पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ पूर्वोक्तं परमपुरुषस्यैव फलदायित्वं भगवान् बादरायणो मन्यते, *वायव्यं श्वेतमालभेतेत्यादिषु *स एवैनं भूतिं गमयतीति भगवदात्मकतया वाय्वादेः कर्मविधिष्वेव फलहेतुत्वव्यपदेशात्। वाक्यशेषस्थं विध्यपेक्षितं हि *प्रतितिष्ठन्ति ह वा* इत्यादिषु स्वीक्रियते। *यो वायौ तिष्ठन्निति हि श्रूयते ॥ ४० ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य द्वितीयः पादः।

तृतीयाध्याये तृतीयः पादः

355 सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ सर्ववेदान्तप्रत्ययं दहराद्युपासनमेकमेव, *विद्यात् *उपासीतेति कर्मविधिष्विव चोदनाफलसंयोगरूपाख्यानामविशेषात् ॥ १ ॥

356 भेदान्नेति चेदेकस्यामपि ॥ अविशेषपुनश्श्रुतिर्भेदापादिकेति न विद्यैक्यमिति चेत्, विद्यैक्येऽपि शाखान्तरे प्रतिपत्तृभेदान्न भेदः ॥ २ ॥

357 स्वाध्यायस्य तथात्वेहि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ आथर्वणवेदे

Digitization by Arya Samaj Charitable Foundation, Chennai

*तेषामेवैतां ब्रह्मविद्यां वदेतेति शिरोव्रतवतां नियमः। शिरोव्रतस्य स्वाध्यायाङ्गत्वेन *नैतदचीर्णव्रतोऽधीयीतेति तस्याध्ययनसंबन्धावगमात्; समाचाराख्यग्रन्थे *इदमपि वेदव्रतेन व्याख्यातमिति वेदव्रतत्वावगमाच्च। *ब्रह्मविद्यामित्यत्र ब्रह्मशब्दो वेदविषयः। यथा सवहोमास्तेषामेव, तथा शिरोव्रतमिति तन्न विद्याभेदलिङ्गम्॥ ३॥

358 दर्शयति च॥ श्रुतिरेव विद्यैक्यं दर्शयति; छान्दोग्ये दहरविद्योक्तं गुणाष्टकं तैत्तिरीयके केवलं *तस्मिन्यदन्तः इति वदति॥ ४॥

359 उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥ एवं सर्वत्र विद्यैक्ये अन्यत्रोक्तानामन्यत्रोपसंहारः तद्विद्योपकाररूपार्थैक्यात्; यथैकविधिशेषतया विहिताङ्गानामिति॥ ५॥

पूर्वकाण्डोक्तं स्वीकृत्यात्र वक्तव्यमाह—

360 अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ वाजिनां छन्दोगानाञ्चोद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं हि विहितम्। तत्र विद्यैक्यं पूर्वपक्षं हृदि निधाय राद्धान्तच्छायया चोदयति। वाजिनां प्राणदृष्ट्योपासनमुद्गीथकर्तृविषयमितरत्र कर्मविषयमिति शब्दादेव प्रतीयते; *अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य उदगायत्* इत्यादिनोद्गीथकर्तृविषयं वाजिनाम्; छन्दोगानांतु *य एवायंमुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे* इत्युद्गीथविषयमिति चेत्, तदिदमाह—अन्यथात्वं शब्दादिति चेदिति। न, उपक्रमाविशेषात् *हन्तासुरान्यज्ञ उद्गीथेनात्ययामेत्येकत्र। अन्यत्रापि *तद्ध देवा उद्गीथमाजहुरनेनैनानभिहनिष्याम इति॥ ६॥

361 न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्॥ नैवं, प्रकरणं ह्युभयत्र भिद्यते; *ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथावयवभूतप्रणवविषयं छन्दोगानाम्। *हन्तासुरान्यज्ञ उद्गीथेनात्ययामेतितु वाजिनां कृत्स्नोद्गीथविषयमिति रूपभेदाद्विद्याभेदः। यथा एकस्यामपि शाखायामुद्गीथोपासने हिरण्मयपुरुषदृष्टेः परोवरीयस्त्वादिविशिष्टदृष्टिर्भिद्यते॥ ७॥

362 संज्ञातश्चेत्तदुक्तमस्तितु तदपि॥ उद्गीथविद्येति संज्ञैक्याद्विद्यैक्यमुक्तश्चेत्; विधेयभेदेऽपि संज्ञैक्यमस्त्येव; यथा नैयमिकाग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे चेत्येवमादिषु॥ ८॥

363 व्याप्तेश्च समञ्जसम्॥ प्रथमप्रपाठके उपक्रमवदुत्तरास्वपि प्रणवस्योपास्यत्वव्याप्तेः, मध्येच उद्गीथमुपासाञ्चक्रिरे* इति प्रणवविषयत्वमेव समञ्जसम्॥ ९॥

364 सर्वाभेदादन्यत्रेमे॥ *यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद...प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति वाजिनां छन्दोगानां कौषीतकिनाञ्च प्राणविद्यायां वागादिकरणग्रामस्थितेः तत्कार्यस्य च प्राणहेतुकत्वेन तिसृष्वप्येकरूपेण प्राणज्यैष्ठ्यमुपपादितम्। वागादिगतवसिष्ठत्वादिसंबन्धित्वमपि प्राणस्योभयत्रोक्तम्। कौषीतकिनां तु तन्नोक्तम्। तथाऽपि सर्वत्र ज्यैष्ठ्योपपादनप्रकारस्य सर्वस्याभेदाद्विद्यैक्यमिति कौषीतकिप्राणविद्यायामपि वसिष्ठत्वादय उपसंहार्याः॥ १०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

365 आनन्दादयः प्रधानस्य ॥ अभेदादिति वर्तते । ब्रह्मस्वरूपनिरूपणान्तर्गतामलत्वज्ञानानन्दादयो गुणाः सर्वासु परविद्यासूपसंहार्याः, गुणिनो ब्रह्मणस्सर्वत्राभेदात् । ११ ॥

366 प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ *तस्य प्रियमेव शिरः* इति प्रियशिरस्त्वादीनामप्राप्तिः ब्रह्मगुणत्वाभावात्तेषाम् । शिरःपक्षादिभेदेब्रह्मगुणे सति ब्रह्मण उपचयापचयप्रसक्तिः ॥ १२ ॥

367 इतरे त्वर्थसामान्यात् ॥ आनन्दादयः स्वरूपनिरूपणान्तर्गततया ब्रह्मसमाना इत्युपसंहार्या एव ॥ १३ ॥

368 आध्यानाय प्रयोजनाभावात् ॥ प्रियशिरस्त्वाद्युपदेशः ब्रह्मणोऽनुचिन्तनार्थः, प्रयोजनान्तराभावात् ॥ १४ ॥

369 आत्मशब्दाच्च ॥ *अन्योन्तर आत्माऽऽनन्दमयः इत्यात्मशब्दाच्च शिरःपक्षादयो न ब्रह्मगुणाः ॥ १५ ॥

370 आत्मगृहीतिरितरवदुत्तरात् ॥ परमात्मन एवात्मशब्देन ग्रहणमिति *सोऽकामयत बहुस्यां प्रजायेयेत्युत्तरात् बहुभवनसङ्कल्पाभिधायिनो वाक्यादवगम्यते; *आत्मा वा इदमेक एवाग्र आसीदित्यात्मशब्दादिवत् ॥ १६ ॥

371 अन्वयादिति चेत्स्यादवधारणात् ॥ पूर्वत्र प्राणमयादिष्वात्मशब्दान्वयात्कथमुत्तरान्निर्णय इति चेत्, *आत्मन आकाशस्संभूतः इत्यवगतस्यात्मन एव प्राणमयादिष्ववधारणात् स्यादेव परमात्मैवेति निर्णयः ॥ १७ ॥

372 कार्याख्यानादपूर्वम् ॥ *यो ह वै ज्येष्ठञ्च वेद* इति प्राणविद्यां विधाय, अपां प्राणवासस्त्वमुक्त्वा, *तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते* इत्याचमनस्य सदाचारप्राप्तत्वादाचमनमनूद्य आचमनीयानामपां प्राणवासस्त्वानुसंधानमप्राप्तं विधीयत इति युक्तम्, अप्राप्तस्यैव विधेयतया ख्यापनात् । अत्रानुवादसरूपो विधिः कल्प्यत इत्यर्थः ॥ १८ ॥

373 समान एवं चाभेदात् ॥ अग्निरहस्ये, बृहदारण्यके चाम्नाता शाण्डिल्यविद्या । एकत्र *स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानमिति । इतरत्र *मनोमयोऽयं पुरुषो भास्सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति* इति । उभयत्र मनोमयत्वादिके समानेऽपि वशित्वादेस्सत्यसङ्कल्पत्ववितितिरूपेणाभेदादैक्यम् ॥ १९ ॥

374 संबन्धादेवमन्यत्रापि ॥ *य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन् इत्युपक्रम्य, सत्यस्य ब्रह्मणः आदित्यमण्डले अक्षिणि चोपास्यत्वमुक्त्वा, *तस्योपनिषदहरित्यधिदैवतम्

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्योपनिषदहमित्यध्यात्मम् इति द्वेनामन्याम्नायेते; उभयत्रैकस्यैवोपास्यस्य संबन्धाद्विद्यैक्यमित्युभयत्रोभे नामनी ॥ २० ॥

375 नवा विशेषात् ॥ नैतत्। आदित्याक्षिस्थानसंबन्धभेदादुपास्यस्य विद्याभेद इति तत्र नियते नामनी ॥ २१ ॥

376 दर्शयति च ॥ दर्शयति च श्रुतिर्विद्याभेदं *तस्यैतस्य तदेव रूपं यदमुष्य रूपम् इति रूपातिदेशं ब्रुवती ॥ २२ ॥

377 संभृतिद्युव्याप्त्यपि चातः ॥ *ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान* इत्यादि ज्येष्ठानां वीर्याणां ब्रह्मणि संभृतिः द्युव्याप्तिश्च ब्रह्मण इत्येतदनारभ्याधीतमपि न सर्वोपासनशेषभूतम्। अतो द्युव्याप्तिसामर्थ्यादल्पस्थानव्यतिरिक्तेषूपासनेषु प्राप्नोति। संभृत्याद्यपि द्युव्याप्तिसहपठितं तत्रैव ॥ २३ ॥

378 पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ छान्दोग्ये तैत्तिरीयके चाम्नाता पुरुषविद्या भिन्ना, यजमानपत्न्यादीनां यज्ञावयवानामितरेषां सवनत्रयादीनाञ्चैकत्राम्नातानामन्यत्रानाम्नानात्, फलभेदाच्च; तैत्तिरीयके आत्मादीनां यजमानत्वकल्पनं सायंप्रातर्मध्यंदिनानां सवनत्वकल्पनं ब्रह्ममहिम प्राप्तिफलम्। अत्र फलस्याश्रवणात् पूर्वप्रस्तुतफलं ब्रह्मविद्याङ्गम्। छान्दोग्ये चाशिशिषादीनां दीक्षात्वकल्पनं त्रेधाविभक्तपुरुषायुषस्य च सवनत्रयकल्पनं शतं जीवतीति च फलम् ॥ २४ ॥

379 वेधाद्यर्थभेदात् ॥ उपनिषदारम्भेष्वधीत *शुक्रं प्रविध्य हृदयं प्रविध्येत्यादिमन्त्रवत्, महाव्रतादिमन्त्रवच्च, *शन्नोमित्रः *सह नाववतु इति मंत्रावपि मन्त्रसामर्थ्येन प्रयोजनभेदावगमात् अध्ययनशेषभूताविति न विद्याङ्गभूतौ ॥ २५ ॥

380 हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् ॥ विदुषो ब्रह्मप्राप्तुवतः पुण्यपापयोर्विमोचनमेकस्यां शाखायां विदुषस्तच्चिन्तनार्थमधीतम्। विमुक्तयोः प्रवेशस्थानमेकस्यां शाखायां पुण्यप्रवेशस्थानं सुहृदः, दुष्कृतस्य शत्रव इति। एकस्यां शाखायां विमोचनं प्रवेशस्थानञ्चेत्युभयमाम्नातम्। सर्वं तच्चिन्तनार्थम्। हानाविति प्रदर्शनार्थम्। हानावुपायने चेत्यर्थः। हानिः—विमोचनम्, उपायनं—प्रवेशनम्। केवलहानावाम्नातायां केवले चोपायने आम्नाते इतरेतरसमुच्चयो न्याय्यः, न विकल्पः; उपायनशब्दस्य हानिवाक्यशेषत्वात्। तच्छेषत्वञ्च त्यक्तयोः प्रवेशस्थानवाचित्वेन तदपेक्षत्वात्। यथा *वानस्पत्याः कुशाः इत्येतद्वाक्यशेषभूतं* औदुम्बर्यः कुशा इति प्रदेशान्तरस्थम्; यथा च देवासुराणां छन्दोभिरित्येतद्वाक्यशेषभूतं *देवच्छन्दांसि पूर्वमिति प्रदेशान्तरस्थम्; यथा च *हिरण्येन षोडशिनस्स्तोत्रमुपाकरोतीत्येतद्वाक्यशेषभूतं *समयाविषिते सूर्ये षोडशिनस्स्तोत्रमिति; यथा च *ऋत्विज उपगायन्तीत्येतच्छेषभूतं *नाध्वर्युरुपगायेदिति। एवमुपायनवाक्यस्य हानिवाक्यशेषतया संभवन्त्यां गतौ न विकल्पो न्याय्यः। तदुक्तम्—अपि तु

Digitization by Arya Samaj Charitable Foundation, Chennai

वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य* इत्यादिना ॥ २६ ॥

381 साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥ सुकृतदुष्कृतयोर्हानिः *अश्व इव रोमाणि विधूय...धूत्वा शरीरमिति देहवियोगकाले श्रुता। शाखान्तरे *स आगच्छति विरजां नदीं तत्सुकृतदुष्कृते धूनुते* इत्यध्वन्यपि श्रुताऽपि साम्पराये—चरमदेहवियोगकाल एव चिन्तनीया; देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावात्। तथा ह्यन्ये शाखिनः *तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति देहवियोगसमनन्तरं ब्रह्मप्राप्तिमधीयते ॥ २७ ॥

382 छन्दत उभयाविरोधात् ॥ देहवियोगकाले पुण्यपापविमोचनश्रुतेः देहवियोगादूर्ध्वं ब्रह्मप्राप्तिश्रुतेश्चेत्युभयश्रुत्यविरोधाद्धेतोः *सुकृतदुष्कृते धूनुते* इत्ययं श्रुतिखण्डः छन्दतो नेतव्यः—*एतं देवयानं पन्थानमापद्यत इति वाक्यखण्डात् प्रागनुगमयितव्य इत्यर्थः ॥२८॥ चोदयति—

383 गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ देवयानगतिश्रुतेरर्थवत्त्वमुभयत्र चिन्तायामेव। अन्यथा देहवियोगकाल एव चिन्तायां तस्मिन्नेव सर्वकर्मक्षयाद्देहाभावेन गतिर्नोपपद्यत इति हि गतिश्रुतिविरोधः ॥ २९ ॥ परिहरति—

384 उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ देहवियोगकाले सर्वकर्मक्षयेऽपि गतिविधिरुपपन्नः; ब्रह्मोपासीनानामकर्मलभ्यार्थोपलब्धेः *स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति* इत्यादौ; यथा लोके राजानमुपासीनानामितरपुरुषासाधारणसर्वार्थसिद्धिः ॥ ३० ॥

385 यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ वसिष्ठादीनां ज्ञानिनामपि देहपातादूर्ध्वं फलान्तरानुभवः प्रारब्धाधिकारहेतुकर्मविनाशाभावात्। यावदधिकारसमाप्ति तद्धेतुकर्मफलानुभवाय तेषां तत्रैव स्थितिः, नार्चिरादिप्राप्तिः। ज्ञानिनामपि प्रारब्धकर्म अनुभवेनैव नश्यतीति वक्ष्यते ॥ ३१ ॥

386 अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ॥ येषूपकोसलादिषूपासनेष्वर्चिरादिगतिराम्नाता तन्निष्ठानामेव तया प्राप्तिरिति तच्चिन्तनमपि तेषामेवेति नियमाभावः; अपि तु सर्वोपासननिष्ठानाम्। तथा सत्येव श्रुतिस्मृतिभ्यामविरोधः। श्रुतिस्तावत् पञ्चाग्निविद्यायां *ये चेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवन्ति* इत्यविशेषेण श्रुता। स्मृतिरपि *अग्निर्ज्योतिरहश्शुक्ल इत्यादिका ॥ ३२ ॥

387 अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ *एतद्वै तदक्षरम् *अथ परा यया तदक्षरम्* इत्यारभ्य *अस्थूलमनण्वह्रस्वमदीर्घमलोहितं यत्तदद्रेश्यमग्राह्यम्* इत्याद्यस्थूलत्वाद्रेश्यत्वादिविषयाणामक्षरब्रह्मसंबन्धिनीनां धियां सर्वासु परविद्यासु संग्रहः; गुणिनो ब्रह्मणस्सर्वत्रैकत्वात्, एतैर्गुणैर्विना सकलेतरव्यावृत्तब्रह्मानुसन्धानानुपपत्तेश्च। हेयसंबन्धानर्हानन्दादयोऽपि प्रत्यगात्मनो ब्रह्मव्यावर्तकाः। प्रधानानुवर्तित्वं हि गुणस्वभावः। यथा जामदग्न्यचतूरात्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरोडाश्युपसद्गुणभूतमन्त्रस्य प्रधानभूतोपसदनुवर्तित्वेनोपांशुगुणकत्वम् । तदुक्तम् *गुणमुख्यव्यतिक्रमे* इत्यादिना ॥ ३३ ॥

नैतावता सर्वत्र सर्वोपसंहारव्याप्तिरित्याह--

388 इयदामननात् ॥ आमननम्--आभिमुख्येन मननम् । इयदेव गुणजातं सर्वत्रोपसंहार्यम्, येन गुणजातेन सकलेतरव्यावृत्तब्रह्ममननम् ॥ ३४ ॥

389 अन्तराभूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ *य आत्मेत्युषस्तिप्रश्नः भूतग्रामवत्प्रत्यगात्मविषयः; अन्यथा *यः प्राणेन प्राणिति स त आत्मेति प्रतिवचनस्य कहोलविषयादशनायाद्यतीतत्वादेः भेदानुपपत्तिरिति चेत्, न । *य आत्मा सर्वान्तर इत्युभयत्र प्रश्नैकरूप्यात् परमात्मैवोभयत्र प्रतिवचनगतः । प्राणनादिहेतुत्वमशनायाद्यतीतत्वं च परमात्मन्येवोपपद्यते । प्राणनादिहेतुत्वं हि परमात्मन एव; *को ह्येवान्यात्कः प्राण्यादित्यादिश्रुतेः । सद्विद्योपदेशवत् प्रश्नप्रतिवचनावृत्तिरेकविषया ॥ ३५ ॥

प्रष्टृभेदोऽपि न भेदक इत्याह--

390 व्यतिहारो विशिंषन्ति हीतरवत् ॥ अर्थैक्ये निश्चिते सति प्रष्ट्रोर्बुद्धिव्यतिहारः कार्यः । उषस्तिना अशनायाद्यतीतत्वधीः कार्या; कहोलेनापि प्राणनादिहेतुत्वधीः कार्या । उभयत्र प्रकरणगतवाक्यानि हि परमात्मानमेव विशिंषन्ति; यथा इतरत्र सद्विद्यायामपि ॥ ३६ ॥

प्रश्नाद्यावृत्तौ कथमैक्यमित्यत्राह--

391 सैव हि सत्यादयः ॥ *सेयं देवतैक्षतेति प्रस्तुता देवतैव सर्वत्र प्रश्नगता; प्रतिवचनेषु च *तत्सत्यं स आत्मा* इत्यादय इत्यैक्यम् ॥ ३७ ॥

392 कामादीतरत्र तत्र चायतनादिभ्यः ॥ *दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमित्युक्त्वा, *एष आत्माऽपहतपाप्मेत्यारभ्य *सत्यकामस्सत्यसंकल्प इति छान्दोग्ये, वाजिनां च *य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः* इत्युभयत्र हृदयायतनत्वसत्यसंकल्पत्वतद्विशेषरूपवशित्वादिभिर्दहरविद्याप्रत्यभिज्ञानात् सत्यसंकल्पत्वसहचारिणोऽपहतपाप्मत्वादिसत्यसंकल्पत्वपर्यन्ताः उभयत्रोपसंहार्याः ॥ ३८ ॥

393 आदरादलोपः ॥ *नेह नानास्ति किंचन, *स एष नेतिनेत्यात्मा* इति निषेधो न वशित्वादिगुणविषयः; *सर्वस्य वशी सर्वस्येशान इति तेषामज्ञातानामादरेण विधानात् । अतो न लोपः । सर्वस्य ब्रह्मकार्यतयैक्यात् *नेह नानास्तीत्यब्रह्मात्मकनानात्वं प्रतिषिध्यते । *स एष नेति नेत्यात्मेत्यादि च प्राकृतविशेषविषयम् ॥ ३९ ॥

394 उपस्थितेऽतस्तद्वचनात् ॥ उपस्थिते--ब्रह्मोपसंपन्ने, अतः- उपसंपत्तेरेव हेतोः,

Digitization by Arya Samaj Charitable Foundation, Chennai

*जक्षत्क्रीडन्रममाण इत्यादिना छन्दतो ज्ञात्यादिप्राप्त्यभिधानात् साक्षान्मोक्षफलं तत् न सांसारिकफलमिति परविद्यैवैषा सगुणा ॥ ४० ॥

395 तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ उद्गीथाद्युपासनस्य क्रतुषु गोदोहनादिवदुपादानानियमः *तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्युद्गीथोपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात् । *यदेव विद्यया करोति...तदेव वीर्यवत्तरमिति वर्तमाननिर्देशेऽपि क्रतुवीर्यवत्तरत्वसाधनतयोपासनविधिः कल्प्यते । वीर्यवत्तरत्वं नाम प्रबलकर्मान्तराप्रतिबन्धेनाविलम्बितफलत्वम् । अतः क्रतुफलात्पृथक्फलमुद्गीथोपासनमित्यानियमः ॥ ४१ ॥

396 प्रदानवदेव तदुक्तम् ॥ दहरविद्यायामपहतपाप्मत्वादिगुणविशिष्टोपासने तत्तद्गुणविशिष्टस्वरूपभेदात् प्रतिगुणं गुण्यावृत्तिः; *इन्द्राय राज्ञे* इत्यादिषु विशिष्टस्वरूपभेदात्प्रदानावृत्तिवत् । तदुक्तम् *नाना वा देवता पृथक्त्वादिति ॥ ४२ ॥

397 लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ *सहस्रशीर्षं देवमित्यत्र नारायणशब्देन प्रकृतदहरविद्योपास्यमात्रं न विशेष्यते, अपि तु सर्वपरविद्यासूपास्यम्; तच्चिह्नभूतवाक्यभूयस्त्वादेव । अक्षरशिवशम्भुपरब्रह्मादिशब्दैस्सर्वोपास्यानानूद्य नारायणत्वं हि विधीयते । प्रकरणाद्धि वाक्यं बलीयः । तदपि *श्रुतिलिङ्गेत्यादिनोक्तम् ॥ ४३ ॥

398 पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ *मनश्चितो वाक्चितः प्राणचितः इत्यादिसांपादिकाग्नीनाम् *असद्वा इदमग्र आसीत् इत्यादिना पूर्वप्रकृतेष्टकचिताग्निशेषिभूतक्रियामयक्रत्वनुप्रवेशस्स्यात् । एषामग्नित्वेनेष्टकचिताग्निना विकल्पः द्वादशाहाङ्गभूतमानसग्रहवत् । एषां मानसानामपि क्रियामयक्रत्वङ्गत्वं न विरुद्धम् ॥ ४४ ॥

399 अतिदेशाच्च ॥ तेषामेकैक एव तावान्यावानसौ पूर्वः* इतीष्टकचिताग्निकार्यातिदेशाच्च तदङ्गत्वम् ॥ ४५ ॥

400 विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ विद्यैव एते, विद्यामयक्रत्वङ्गभूता इत्यर्थः । सांपादिकाग्नित्वेनैषां विद्यामयत्वे सिद्धेऽपि *ते हैते विद्याचित एवेति निर्धारणं हि विद्यामयक्रत्वन्वयेन विद्यामयत्वख्यापनाय । दृश्यते चात्र विद्यामयः क्रतुः *मनसैषु ग्रहा अगृह्यन्तेत्यादौ ॥ ४६ ॥

401 श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ *ते हैते विद्याचित एव विद्यया हैवैते एवं विदश्चिता भवन्ति* इति श्रुत्या वाक्येन चावगतविद्यामयक्रत्वन्वयस्य दुर्बलप्रकरणेन न बाधः ॥ ४७ ॥

402 अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववदृष्टश्च तदुक्तम् ॥ *मनसैषु ग्रहा अगृह्यन्तेत्यादिक्रत्वनुबन्धैः *ते हैते विद्याचित एवेति श्रुत्यादिभिश्चात्र विद्यामयक्रतुविधिः कल्प्यत इति दहरविद्यादीनां क्रियामयत्वात् पृथक्त्ववत्, अस्यापि विद्यामयक्रतोस्सानुबन्धैः पृथक्त्वमवगम्यते । दृष्टश्चानुवादसरूपेऽपि विधिः *यदेव विद्यया करोतीत्यादौ । तदुक्तम् *वचनानि त्वपूर्वत्वादिति ॥४८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

403 न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ तेषामेकैक एव तावान्यावानसौ* इतीष्टकचिताग्निफलसामान्येनातिदेशः इष्टकचिताग्नेः स्वक्रतुद्वारेण यत्फलम् तदेवैषां विद्यामयक्रत्वनुप्रवेशेन फलमिति; न पुनरिष्टकचितातिदेशत्वमप्येषामिति, केनापि सामान्येनातिदेशोपलब्धेः। यथा *स एष एव मृत्युः य एष एतस्मिन्मण्डले पुरुषः* इति सर्वहरत्वमात्रेण; न हि तत्र मण्डलपुरुषस्य मृत्युदेशत्वम् ॥ ४९ ॥

404 परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ परेण च ब्राह्मणेनास्य मनश्चितादिवाचिनश्शब्दस्य विद्यामयप्रतिपादित्वमवगम्यते *अयं वा व लोक एषोऽग्निचितस्तस्याप एवेत्यादिना पृथक्फला विद्यैव विधीयते। क्रियाप्रकरणे अग्निरहस्ये मनश्चितादीनामनुबन्धस्तु संपादनीयानामग्न्यङ्गानां भूयस्त्वात् ॥ ५० ॥

405 एक आत्मनश्शरीरे भावात् ॥ शरीरे वर्तमानत्वादुपासितुः तस्य च कर्तृत्वभोक्तृत्वादिस्वरूपत्वात्, तथाऽवस्थितस्यात्मतया परविद्यासु परमात्मोपास्य इत्येके मन्यन्ते ॥ ५१ ॥

406 व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॥ नैवम्, यत् कर्तृत्वादिस्वरूपस्यैवोपासितुरात्मतया परमात्माऽनुसन्धेय इति। अपि तूपासितुस्सांसारिकस्वभावान्मुक्तस्वरूपस्य यो व्यतिरेकः अपहतपाप्मत्वादिगुणकस्वरूपः, सोनुसन्धेयः, तथाऽनुसन्धानभावभावित्वात् तत्स्वरूपोपलब्धेः। यथावस्थितस्वरूपब्रह्मानुसन्धानभाविनी हि ब्रह्मोपलब्धिः। तद्वत्, *यथाक्रतुरस्मिन् लोके पुरुषः* इत्यादिश्रुतेः ॥ ५२ ॥

407 अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ उद्गीथादिक्रत्वङ्गाश्रया उपासनाः यासु शाखासु श्रूयन्ते, तास्वेव कार्या इति न ह्यस्ति नियामकम्। अतः उद्गीथानुबन्धित्वात् प्रतिशाखं कार्याः ॥ ५३ ॥

408 मन्त्रादिवद्वाऽविरोधः ॥ वाशब्दोऽवधारणे। यथा क्रत्वङ्गभूतानां मन्त्राणामेकैकशाखागतानामपि सर्वशाखागतक्रत्वन्वयेनाविरोधः ॥ ५४ ॥

409 भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ वैश्वानरविद्यायां त्रैलोक्यशरीरतयोपास्यस्य स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादपर्यन्तावयवत्वमभिधाय,* यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु* इत्यादिना ब्रह्मानुभवः फलं चाभिहितम्। तत्र मूर्धाद्यवयवोपासनात् भूम्नः—समस्तोपासनस्य ज्यायस्त्वं—प्रामाणिकत्वमस्ति; तत्रैव ब्रह्मानुभवफलाभिधानात्। तत्रावयवोपासनं तत्रतत्र फलकीर्तनं च क्रतान्त्रिव द्रष्टव्यम्। यथा *वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते* इत्युक्त्वा *यदष्टाकपालो भवतीत्यादौ। तथा समस्तोपासनस्यैव श्रैष्ठ्यं दर्शयति श्रुतिः *दिवमेव भगवो राजन्नित्यत्रयवोपासनेऽभिहिते *मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इत्यादिनाऽनर्थं ब्रुवती ॥ ५५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

410 नाना शब्दादिभेदात् ॥ सद्विद्याभूमविद्यादीनां ब्रह्मण एकस्यैवोपास्यत्वे तत्प्राप्तेरेव फलत्वेऽप्युपास्यत्वप्रकारभेदाद्विद्याभेदः। प्रकारभेदश्च शब्दान्तराद्यनुबन्धभेदादवगम्यते। पूर्वकाण्डोदितमपि ज्ञानस्याविधेयत्वं ब्रुवतां निरसनाय पुनरारब्धम् ॥ ५६ ॥

411 विकल्पोऽविशिष्टफलत्वात् ॥ एकस्मिन्नुपासके सर्वासां परविद्यानां विकल्पः; अपरिच्छिन्नानन्दरूपब्रह्मानुभवफलस्याविशिष्टत्वात् ॥ ५७ ॥

412 काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ब्रह्मव्यतिरिक्तविद्याफलस्य परिमितत्वात् भूयस्त्वापेक्षया समुच्चयस्संभवतीति यथाकामं समुच्चीयेरन् विकल्पेरन् वा ॥ ५८ ॥

413 अङ्गेषु यथाश्रयभावः ॥ *उद्गीथमुपासीतेत्युद्गीथाद्यङ्गेषु आश्रितानामुद्गीथादिवत् क्रत्वङ्गभाव एव; गोदोहनादिवत् स्ववाक्ये फलान्तराश्रवणात् उद्गीथादिसंबन्धितया क्रत्वङ्गभावो न विरुध्यत इति ॥ ५९ ॥

414 शिष्टेश्च ॥ *उद्गीथमुपासीतेति विधेः *यदेव विद्यया करोतीत्यत्र विध्यभावाच्चाङ्गभावो न विरुद्धः ॥ ६० ॥

415 समाहारात् ॥ *उद्गीथमनुसमाहरतीति वेदनहानावन्येन समाधानं ब्रुवत् वेदनस्याङ्गतां द्योतयति ॥ ६१ ॥

416 गुणसाधारण्यश्रुतेश्च ॥ प्रकृतोपासनस्यैव *ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति* इति सर्वत्र संचरतः प्रणवस्य गुणत्वेनोपासनस्यापि संचारादुपासनोपादाननियमो गम्यते। अतः पूर्वोक्तोपादाननियमो न संभवति ॥ ६२ ॥

417 न वा तत्सहभावाश्रुतेः ॥ नैतत्; अङ्गभावाश्रुतेः। अङ्गभावो हि सहभावः। *यदेव विद्यया करोति......तदेव वीर्यवत्तरमिति फलान्तरसाधनतयाऽवगतस्योपासनस्याङ्गभावासंभवात् *उद्गीथमुपासीतेत्युद्गीथाश्रयतामात्रप्रतिपादनात् ॥ ६३ ॥

418 दर्शनाच्च ॥ *एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति* इति ब्रह्मणो वेदनेन सर्वरक्षणं ब्रुवन्ती श्रुतिरुद्गातृप्रभृतीनां वेदनस्यानङ्गतां दर्शयतीति उपासनोपादानानियमस्सिद्धः ॥ ६४ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य तृतीयः पादः।

तृतीयाध्याये चतुर्थः पादः।

419 पुरुषार्थोऽतश्शब्दादिति बादरायणः ॥ विद्यातः पुरुषार्थ इति भगवान् बादरायणो मेने;* ब्रह्मविदाप्नोति परम् *यो वेद...सोऽश्नुते सर्वान्कामान्सहेत्यादिशब्दात् ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

420 शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ *तत्त्वमसीत्यादिसामानाधिकरण्येन कर्मसु कर्तुरेव ब्रह्मत्वावगमात्, तद्वेदनस्य तत्संस्कारतया कर्मशेषत्वात्, द्रव्यादिष्विव फलश्रुतिरर्थवादः ॥ २ ॥

421 आचारदर्शनात् ॥ *यक्ष्यमाणो ह वै भगवन्तोऽहमित्यादौ ब्रह्मविदः कर्मप्रधानाचारदर्शनात् विद्या कर्माङ्गम् ॥ ३ ॥

422 तच्छ्रुतेः ॥ *यदेव विद्यया करोतीति श्रुत्यैव विद्यायाः कर्मसु विनियोगात् । *यत्करोति तद्विद्ययेति हि श्रुतिः । यद्विद्यया साधनभूतया कर्म करोति, तत्कर्म वीर्यवत्तरमिति वा ॥४॥

423 समन्वारम्भणात् ॥ *तं विद्याकर्मणी समन्वारभेते* इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यदर्शनाच्च, विद्या कर्माङ्गम् ॥ ५ ॥

424 तद्वतो विधानात् ॥ *आचार्यकुलाद्वेदमधीत्य...अभिसमावृत्य कुटुम्बे* इत्यादावर्थज्ञानपर्यन्ताध्ययनवतः कर्मविधानाच्च; अध्ययनं ह्यर्थज्ञानपर्यन्तम् । ६ ॥

425 नियमात् ॥ *कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः* इत्यात्मविदो जीवस्य कर्मसु विनियोगाच्च ॥ ७ ॥

426 अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ न विद्या कर्माङ्गम्, अपि तु विद्यातः पुरुषार्थ इत्येवमेव भगवतो बादरायणस्य मतम् । कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्यैव वेद्यतयोपदेशात् । तत्कथम्? *बहु स्यां प्रजायेयेति *स कारणं करणाधिपाधिपः* इत्यादिवाक्येषु वेद्यस्याधिकत्वदर्शनात् ॥ ८ ॥

427 तुल्यं तु दर्शनम् ॥ विद्यायाः प्राधान्येऽपि तुल्यमाचारदर्शनम् *ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे इत्यादौ ब्रह्मविदां कर्मत्यागो हि दृश्यते । अनुष्ठानं तु फलाभिसन्धिरहितस्य विद्याङ्गत्वेन ॥ त्यागस्तु फलाभिसन्धियुक्तस्येति न विरोधः ॥ ९ ॥

428 असार्वत्रिकी ॥ *यदेव विद्यया करोतीति न सार्वत्रिकी विद्योच्यते, *यदेव विद्येयेति प्रसिद्धवन्निर्देशात् । प्रसिद्धिश्चोद्गीथविद्यायाः । *यदेव विद्यया करोति...तदेव वीर्यवत्तरं भवतीति प्रकृतोद्गीथविद्यायुक्तस्य कर्मणो हि वीर्यवत्तरत्वसाधनभावो विधीयते ॥ १० ॥

429 विभागश्शतवत् ॥ *तं विद्याकर्मणी समन्वरभेते* इति विद्याकर्मणोर्भिन्नफलत्वेन स्वस्मै फलायान्वेतीति विभागः । यथा क्षेत्ररत्नविक्रयिणे शतद्वयमन्वेतीत्यत्र क्षेत्रार्थं शतम्, रत्नार्थं शतमिति ॥ ११ ॥

430 अध्ययनमात्रवतः ॥ *वेदमधीत्येत्यध्ययनमात्रवतः कर्मविधानान्न विद्या कर्माङ्गम् ॥ अध्ययनविधिर्हि अक्षरराशिग्रहणमात्रे पर्यवस्यतीत्युक्तम् । अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानादर्थान्तरभूता *विद्यात् *उपासीतेति विहिता विद्या प्रत्ययावृत्तिरूपा ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

431 नाविशेषात् ॥ *कुर्वन्नेवेह कर्माणीत्यत्र स्वतन्त्रे कर्मणि विद्वदायुषो विनियोग इति विशेषहेत्वभावात् *ईशावास्यमिदं सर्वमिति प्रकरणाच्च विद्याङ्गभूतमेव च तत्कर्मेति ज्ञायते। अतो न विद्या कर्माङ्गम् ॥ १३ ॥

432 स्तुतयेऽनुमतिर्वा ॥ विद्यास्तुतये कर्मानुमतिर्वा। विद्यामाहात्म्यात्सर्वदा कर्म कुर्वन्नपि तैर्न लिप्यत इति हि विद्या स्तुता स्यात्। *न कर्म लिप्यते नर इति च वाक्यशेषः ॥ १४ ॥

433 कामकारेण चैके ॥ *किं प्रजया करिष्याम इत्यादिना कामकारेण गार्हस्थ्यत्यागमधीयत एके; अतश्च विद्यैव प्रधानभूता ॥ १५ ॥

434 उपमर्दं च ॥ विद्यया सर्वकर्मोपमर्दं चाधीयते *क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे *इत्यादिना ॥ १६ ॥

435 ऊर्ध्वरेतस्सु च शब्दे हि ॥ ऊर्ध्वरेतस्स्वाश्रमेषु विद्यादर्शनात्, तेषु चाग्निहोत्राद्यभावान्न विद्या कर्माङ्गम्। ते चाश्रमास्सन्त्येव; *त्रयो धर्मस्कन्धा इति वैदिके शब्दे हि दृश्यते ॥१७॥

436 परामर्शं जैमिनिरचोदनाचापवदति हि ॥ *त्रयो धर्मस्कन्धा इत्यत्र चोदनाभावादुपासनस्तुत्यर्थमनुवाद एवेति जैमिनिर्मेने। *वीरहा वा एष देवानां योऽग्निमुद्वासयते *इत्यपवदति चाश्रमान्तरम् ॥ १८ ॥

437 अनुष्ठेयं बादरायणस्साम्यश्रुतेः ॥ गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयमिति बादरायणमतम्, *त्रयो धर्मस्कन्धा इति सर्वाश्रमसाम्यश्रुतेः ॥ १९ ॥

438 विधिर्वा धारणवत् ॥ *उपरि हि देवेभ्यो धारयतीत्यप्राप्तत्वेन यथा विधिः तद्वत् ॥२०॥

439 स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ उद्गीथादिषु रसतमत्वादिदृष्टिविधिर्न संभवति; *इयमेव जुहूस्स्वर्गो लोक आहवनीयः* इतिवत्, कर्माङ्गभूतोद्गीथाद्युपादाय तस्य रसतमत्ववचनं तत्स्तुतिमात्रमिति चेत्, नैतत्, जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानात्। रसतमत्वादेश्चाप्राप्तत्वाद्रसतमत्वादिदृष्टिविधिरेव ॥ २१ ॥

440 भावशब्दाच्च ॥ *उद्गीथमुपासीतेति विधिप्रत्ययाच्च ॥ २२ ॥

441 पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ वेदान्तेषु तत्तद्विद्यारम्भेऽधीताः *प्रतर्दनो ह वै इत्याद्याख्यायिकाः पारिप्लवार्थाः, *आख्यानानि शंसन्तीति तत्र विनियोगादिति चेत्, न; तत्रैव *मनुर्वैवस्वतः इत्याद्याख्यानानां विशेषितत्वात् तेषामेव तत्र विनियोगः ॥ २३ ॥

442 तथा चैकवाक्योपबन्धात् ॥ विद्याविधिनैकवाक्यत्वाच्च *सोऽरोदीदित्यादिवत् विद्यास्तुत्यर्था एताः ॥ २४ ॥

443 अत एव चाग्नीन्धनाद्यनपेक्षा ॥ ऊर्ध्वरेतसाम् *एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिश्रुतेरेव विद्यावत्त्वात् तेष्वाधानाद्यनपेक्षा विद्या ॥ २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

444 सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ कर्मवत्सु गृहस्थेष्वग्निहोत्रादिसर्वकर्मापेक्षा विद्या, *ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतेः; यथाचाश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धापेक्षो गमने । ऊर्ध्वरेतस्सु च स्वाश्रमकर्मापेक्षा ॥ २६ ॥

445 शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ गृहस्थो विहितकर्मव्यापृतोऽपि *शान्तो दान्तः इत्यादिना शमदमादिविधेस्तद्युक्तस्स्यात्; विद्यानिष्पत्तये शमदमादीनामवश्यानुष्ठेयत्वात्, शान्त्युपरतिप्रभृतिभिर्विना विद्यानिष्पत्त्यनुपपत्तेः ॥ २७ ॥

446 सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ प्राणविद्यानिष्ठस्य *न ह एवंविदि किञ्चनानन्नं भवतीति सर्वान्नानुमतिर्न सर्वदा, अपितु प्राणात्ययापत्तावेव; अतिशयितशक्तेर्ब्रह्मविदोऽप्युच्छिष्टभक्षणादिः प्राणात्ययापत्तावेवेति दर्शनात् ॥ २८ ॥

447 अबाधाच्च ॥ *आहारशुद्धौ सत्त्वशुद्धिरित्याहारशुद्धिविधेरबाधाच्च प्राणसंशय एव ॥ २९ ॥

448 अपि स्मर्यते ॥ *प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः इत्यादिना स्मर्यते च प्राणसंशय एवेति ॥ ३० ॥

449 शब्दश्चातोऽकामकारे ॥ *तस्माद्ब्राह्मणस्सुरां न पिबेदिति कामकारनिवृत्तिशब्दश्चात एव; यतः प्राणसंशय एव सर्वान्नानुमतिः ॥ ३१ ॥

450 विहितत्वाच्चाश्रमकर्मापि ॥ यज्ञादिकर्म *यावज्जीवमग्निहोत्रमित्यादिना विहितत्वात् विद्यारहितकेवलाश्रमिणामप्यनुष्ठेयम् ॥ ३२ ॥

451 सहकारित्वेन च ॥ *तमेतं वेदानुवचनेनेत्यादिश्रुतेर्विद्याङ्गतया विधेर्विद्यासहकारित्वेन विदुषा चानुष्ठेयम् ॥ ३३ ॥

452 सर्वथाऽपि त एवोभयलिङ्गात् ॥ उभयत्र विनियोगेऽपि यज्ञादयस्त एव, उभयत्र प्रत्यभिज्ञानाख्याल्लिङ्गात् । कर्मस्वरूपैक्येऽपि विनियोगपृथक्त्वेन न विरोधः ॥ ३४ ॥

453 अनभिभवं च दर्शयति ॥ *धर्मेण पापमपनुदतीति विद्योत्पत्तिप्रतिबन्धकपापनिवर्तनेन विद्याया अनभिभवं कर्मानुष्ठानकार्यञ्च दर्शयति ॥ ३५ ॥

454 अन्तरा चापि तु तद्दृष्टेः ॥ आश्रमानन्तरा वर्तमानो विधुरादिरनाश्रमी । तस्यापि विद्याधिकारोऽस्ति, रैक्वादिष्वनाश्रमिषु ब्रह्मविद्याधिकारदर्शनात् ॥ ३६ ॥

455 अपि स्मर्यते ॥ अनाश्रमिणोऽपि जपादिना विद्यानुग्रहः स्मर्यते *जप्येनापि च संसिद्ध्येदिति ॥ ३७ ॥

456 विशेषानुग्रहश्च ॥ आश्रमानियतधर्मविशेषेण विद्यानुग्रहश्च श्रूयते *तपसा ब्रह्मचर्येण श्रद्धया विद्यया चाऽऽत्मानमित्यादिना ॥ ३८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

457 अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ अनाश्रमित्वादाश्रमित्वं ज्यायः, धर्मभूयस्त्वात्, *अनाश्रमी न तिष्ठेत्तु *इति स्मृतेश्च ॥ ३९ ॥

458 तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ नैष्ठिकादिनिष्ठस्य प्रच्युत्य स्थितिर्न संभवत्येव, नियमात् तद्रूपनिवृत्तिभ्यः । यथा नियच्छन्ति हि *अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति *अरण्यमियात्ततो न पुनरेयादितिच, *सन्नचस्याग्निं न पुनरावर्तयेदिति च । अतस्तेषां प्रच्युत्य स्थित्यभावाद्विद्यानधिकारः । जैमिनेरप्येवम् ॥ ४० ॥

459 नचाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ *अवकीर्णिपशुश्च तद्वदित्यधिकारलक्षणोक्तं प्रायश्चित्तमपि तस्य न संभवति, तस्य प्रायश्चित्तानधिकारस्मृतेः तदसंभवात्, *आरूढो नैष्ठिकं धर्ममित्यारभ्य *प्रायश्चित्त न पश्यामीत्यादिस्मृतेः ॥ ४१ ॥

460 उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ उपपातकत्वात् प्रायश्चित्तमेके मध्वशननिषेधतत्प्रायश्चित्तवदिति । तदुक्तम् *उत्तरेषाञ्चैतदविरोधीति ॥ ४२ ॥

461 बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ उपपातकत्वेऽपि अन्यथाऽपि कर्माधिकारबहिष्कृता एते । तथा स्मृतेः *प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा* इति, शिष्टबहिष्काराच्च ॥ ४३ ॥

462 स्वामिनः फलश्रुतेरित्यात्रेयः ॥ उद्गीथाद्युपासनं यजमानेनानुष्ठेयम्, तस्यैव क्रतुवीर्यवत्तरत्वादिफलश्रुतेरित्यात्रेयः ॥ ४४ ॥

463 आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ कर्मस्वरूपवत्तदङ्गाश्रयमप्यार्त्विज्यम्; साङ्गफलसाधनकर्मानुष्ठानाय हि ऋत्विक्परिक्रियते ॥ ४५ ॥

464 सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ *तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यारभ्य *अथ मुनिरित्यत्र विद्यावतो यज्ञादिवत् बाल्यपाण्डित्ययोस्तृतीयं सहकार्यन्तरं मौनं विधीयते, पक्षेण प्रकृष्टमननशीले मुनिशब्दप्रयोगात्; विद्याभ्यासरूपमननमिदमप्राप्तमेव ॥ ४६ ॥

465 कृत्स्नभावात्तु गृहिणोपसंहारः ॥ कृत्स्नेष्वाश्रमिषु विद्यासद्भावात् छान्दोग्ये *अभिसमावृत्य कुटुम्बे इत्यारभ्य *स खल्वेवं वर्तयन्यावदायुषमिति गृहिणोपसंहारस्सर्वेषां प्रदर्शनार्थः । तुशब्दो हि गृहिण एवेति शङ्काव्यावृत्त्यर्थः ॥ ४७ ॥

466 मौनवदितरेषामप्युपदेशात् ॥ *अथ मुनिरित्यत्रापि *अथ भिक्षाचर्यं चरतीति पारिव्राज्येनोपसंहारः प्रदर्शनार्थः, मौनभिक्षाचर्यवदितराश्रमधर्माणां यज्ञादीनामप्युपदेशात् ॥ ४८ ॥

467 अनाविष्कुर्वन्नन्वयात् ॥ *पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति बाल्यमित्यविशेषेण श्रुतावपि बालकर्म स्वमाहात्म्यानाविष्काररूपं विद्यान्वययोग्यतया विधीयते ॥ ४९ ॥

468 ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ अभ्युदयफलमुपासनं स्वसाधनभूतपुण्यकर्मा-

Digitization by Arya Samaj Charitable Foundation, Chennai

नन्तरमुत्पद्यत इति नायं नियमः, प्रबलकर्मान्तरप्रतिबन्धाभावे तदनन्तरं, प्रतिबन्धे तु तस्मिन्समाप्ते, *तदेव वीर्यवत्तरमिति प्रतिबन्धाभावे फलदर्शनात् ॥ ५० ॥

469 एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ एवं मुक्तिफलोपासनस्यापि प्रतिबन्धभावाभावयोरित्यनियमः, प्रतिबन्धाभाव एवेति फलोदयावस्थावधृतेः ॥ ५१ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥

श्रीमते रामानुजाय नमः

श्रीवेदान्तसारे चतुर्थाध्याये प्रथमः पादः

470 आवृत्तिरसकृदुपदेशात् ॥ *ब्रह्मविदाप्नोति परमित्यादिषु मोक्षसाधनं वेदनमसकृदावृत्तम्, *विद्यात् *उपासीतेति विद्युपास्योरुपक्रमोपसंहारयोर्व्यतिकरेणोपदेशात् ॥ १ ॥

471 लिङ्गाच्च ॥ लिङ्गं—स्मृतिः; *मां ध्यायन्त उपासते, तेषामहं समुद्धर्ता *तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा, तद्ध्यानम्* इत्यादिस्मृतेश्च ॥ २ ॥

472 आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ यद्यपि *अधिकंतु भेदनिर्देशात् *अधिकोपदेशादित्यादिषु प्रत्यगात्मनोऽर्थान्तरत्वं ब्रह्मणः प्रतिपादितम् । तथाप्युपासिता *अहं ब्रह्मास्मीत्येवोपासीत । यतः पूर्वे उपासितारः *त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते* इत्यात्मेत्येवोपगच्छन्ति । उपासितुरर्थान्तरमपि ब्रह्म तानुपासितॄन् स्वात्मभूतं ग्राहयन्ति शास्त्राणि *य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मा* इत्यादीनि । यथा मनुष्योऽहमिति मनुष्यशरीरस्य स्वात्मप्रकारतैकस्वभावतया प्रकारिणि स्वात्मनि अहंशब्दस्य तद्बुद्धेश्च पर्यवसानम्; तथा स्वात्मनोऽपि परमात्मशरीरतया तत्प्रकारस्वभावत्वेन अहंशब्दतद्बुद्ध्योः परमात्मनि पर्यवसानमिति *अहं ब्रह्मेत्येवोपास्यमिति ॥३॥

473 न प्रतीके न हि सः ॥ *मनो ब्रह्मेत्यादिप्रतीके तु नात्मेति ग्रहणम्; न हि तत्र सः—परमात्मोपास्यः, परमात्मदृष्ट्या हि मनःप्रभृतीति ॥ ४ ॥

474 ब्रह्मदृष्टिरुत्कर्षात् ॥ ब्रह्मण उत्कृष्टत्वात्तद्दृष्ट्या मनआद्युपासनं ह्यभ्युदयाय भवतीति ॥ ५ ॥

475 आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ *य एवासौ तपति तमुद्गीथमुपासीतेत्यादावप्यादित्यादेरेवोत्कृष्टत्वात् उद्गीथादौ तद्दृष्टयः कार्याः ॥ ६ ॥

476 आसीनस्संभवात् ॥ आसीन उपासनं कुर्यात्, तस्यैवैकाग्र्यसंभवात् ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

477 ध्यानाच्च ॥ *निदिध्यासितव्यः इत्युपासनस्य ध्यानरूपत्वाच्चासीनः ॥ ८ ॥

478 अचलत्वं चापेक्ष्य ॥ पृथिव्यादेरचलत्वं चापेक्ष्य *ध्यायतीव पृथिवी इति प्रयोगात् मनसो निश्चलत्वमासीनस्यैव ॥ ९ ॥

479 स्मरन्ति च ॥ *उपविश्यासने युञ्ज्याादित्यादिना ॥ १० ॥

480 यत्रैकाग्रता तत्राविशेषात् ॥ यत्रैकाग्रता, तत्र देशे तत्र काले उपासीतेति देशकालविशेषाश्रवणात् ॥ ११ ॥

481 आप्रयाणात्तत्रापि हि दृष्टम् ॥ आप्रयाणादहरहरुपासनं कार्यम्, *स खल्वेवं वर्तयन्यावदायुषमिति दर्शनात् ॥ १२ ॥

482 तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ उपासने प्रारब्धे तत्सामर्थ्यादेव पूर्वकृताघनाशः उत्तराघाश्लेषश्च भवति, *एवं हास्य सर्वे प्राप्मानः प्रदूयन्ते *एवमेवंविदि पापं कर्म न श्लिष्यते इति श्रुतेः ॥ १३ ॥

483 इतरस्याप्येवमसंश्लेषः पाते तु ॥ विदुषः पुण्यस्यापि मोक्षविरोधित्वेनानिष्टफलत्वसाम्यादेवमश्लेषविनाशौ । वृष्टयन्नायुरारोग्यादिविद्यानुगुणफलस्य कर्मणः शरीरपातादूर्ध्वमफलत्वम् ॥ १४ ॥

484 अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ विद्याधिगतेः पूर्वकृते पुण्यपापे फलदानायाप्रवृत्ते एव विनश्यतः; *तस्य तावदेव चिरमिति शरीरपातावधिश्रुतेः ॥ १५ ॥

485 अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ अग्निहोत्राद्याश्रमकर्म, विद्योत्पत्त्याख्यकार्यायैव आप्रयाणादनुष्ठेयं *तमेतं वेदानुवचनेनेत्यादिना विद्योत्पत्तिकार्यत्वं ह्याश्रमधर्मस्य दृष्टम् ॥ १६ ॥

486 अतोऽन्यापि ह्येकेषामुभयोः ॥ *तस्य पुत्रा दायमुपयन्ति *द्विषन्तः पापकृत्यां सुहृदस्साधुकृत्यामित्यादिवचनस्याग्निहोत्रादेरन्याऽप्यनादिकालप्रवृत्ता साधुकृत्या प्रबलकर्मप्रतिबद्धफला, उत्तरा वृष्टयन्नादिविद्यानुगुणफला प्रतिबद्धा चेति पूर्वोत्तरकृतयोरुभयोरप्यस्त्येव विषयः ॥१७॥

487 यदेव विद्ययेति हि ॥ *यदेव विद्ययेत्यत्र फलप्रतिबन्धोऽस्तीति ह्युक्तम् ॥ १८ ॥

488 भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ आरब्धकार्ययोः पुण्यपापयोर्यत्फलम्, तद् एकशरीरावसानमनेकशरीरावसानं वा भुक्त्वैव तदनन्तरं ब्रह्म प्राप्नोति ॥ १९ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थाध्याये द्वितीयः पादः

489 वाङ्मनसि दर्शनाच्छब्दाच्च ॥ *अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते इति शब्दात्; उत्क्रान्तौ मनसः प्रागेव वाच उपरतिदर्शनाच्च वाङ्मनसि संपद्यते—युज्यत इति ॥१॥

490 अत एव सर्वाण्यनु ॥ अतः *इन्द्रियैर्मनसि संपद्यमानैरिति शब्दात्, उपरतिदर्शनाच्च, वाचमनु सर्वाणीन्द्रियाणि मनसि च संयुज्यन्ते ॥ २ ॥

491 तन्मनः प्राण उत्तरात् ॥ उत्तरात् *मनः प्राणे इति शब्दात् सर्वेन्द्रिययुक्तं मनप्राणे संयुज्यते ॥ ३ ॥

492 सोऽध्यक्षे तदुपगमादिभ्यः ॥ सः—प्राणः अनन्तरं जीवेन संयुज्यते, *एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति* इति प्राणस्य जीवोपगमादिश्रुतेः ॥ ४ ॥

493 भूतेषु तच्छ्रुतेः ॥ *प्राणस्तेजसीति भूतान्तरसंसृष्टे तेजोऽभिधीयत इति प्राणा भूतेषु संयुज्यन्ते ॥ ५ ॥

494 नैकस्मिन् दर्शयतो हि ॥ *तेजसीति न तेजोमात्रे, त्रिवृत्करणश्रुतिस्मृतिभ्यां केवलस्य तेजसोऽनवस्थानात् ॥ ६ ॥

495 समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ अर्चिरादिगत्युपक्रमात्प्रागुत्क्रान्तिः विद्वदविदुषोस्समाना, विदुषोऽर्चिरादिगत्या ब्रह्मप्राप्तिश्रुतेः । *यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ इति अत्रैव अमृतत्वब्रह्मप्राप्तिवचनं शरीरेन्द्रियादिसंबन्धमदग्ध्वैवोपासनारम्भाभिप्रायमित्युपगन्तव्यमित्यर्थः ॥ ७ ॥

496 तदापीतेस्संसारव्यपदेशात् ॥ अर्चिरादिगमनेन ब्रह्मप्राप्तेः प्राक् शरीरसंबन्धव्यपदेशात्तदमृतत्वादिवचनमुक्तप्रकारमेव ॥ ८ ॥

497 सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते; अन्यथा गत्यनुपपत्तेः । न केवलं गत्यनुपपत्तिमात्रं सूक्ष्मशरीरवत्त्वे प्रमाणम्, चन्द्रमसा संवादादिप्रमाणान्तरतश्च सूक्ष्मशरीरवत्त्वोपलब्धेः— *तं प्रति ब्रूयात् *सत्यं ब्रूयादिति ॥ ९ ॥

498 नोपमर्देनातः ॥ अतः—उक्ताद्धेतोः, *अथ मर्त्योऽमृतो भवतीत्याद्यमृतत्ववचनं न देहसंबन्धोपमर्देन ॥ १० ॥

499 अस्यैव चोपपत्तेरूष्मा ॥ अस्य—सूक्ष्मशरीरस्य विद्यमानत्वोपपत्तेश्च न तदुपमर्देन । उपलभ्यते ह्युत्क्रामतो विदुषस्सूक्ष्मदेहगुण ऊष्मा । अन्यत्रानुपलम्भान्न स्थूलगुणः ॥ ११ ॥

500 प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ *अथाकामयमानो न तस्य प्राणा उत्क्रामन्ति* इति विदुष उत्क्रान्तिप्रतिषेधादत्रैव साक्षाद्ब्रह्मप्राप्तिरिति चेत्, नैतत्; विदुष उत्क्रम-

Digitization by Arya Samaj Charitable Foundation, Chennai

माणस्यार्चिरादिकया गमनाय प्राणा न विश्लिष्यन्ते इति ह्युच्यते *न तस्य प्राणा उत्क्रामन्तीति । अयमर्थो माध्यन्दिनानां पाठे स्पष्टोऽभिधीयते *योऽकामो निष्काम आप्तकाम आत्मकामः न तस्मात्प्राणा उत्क्रामन्तीति ॥ १२ ॥

501 स्मर्यते च ॥ विदुषोऽपि मूर्धन्यनाड्या गमनं स्मर्यते च *ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति पराङ्गतिम् ॥ इति ॥ १३ ॥

502 तानि परे तथा ह्याह ॥ *तेजः परस्यां देवतायामिति श्रुतेः परदेवतासंपत्तिरुत्क्रममाणस्य विश्रमस्थानमिति तानि—भूतानि जीवसंयुक्तानि परदेवतायां संपद्यन्ते ॥ १४ ॥

503 अविभागो वचनात् ॥ परदेवतासंपत्तिवचनमविभागमात्रपरम्, *वाङ्मनसि संपद्यते इति संपत्तिपदस्यैवात्रानुषक्तस्यार्थान्तरपरत्वे प्रमाणाभावात्; मनःप्रभृतिषु हि प्रलयासंभवादविभागमात्रपरम् ॥ १५ ॥

504 तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया ॥ हार्दपरमपुरुषाराधनरूपविद्यासामर्थ्यात्, तदङ्गगतिचिन्तनेन च प्रीतपरमपुरुषानुगृहीतः, तदनुग्रहतः प्रकाशिततद्द्वारो जीवः शताधिकया मूर्धन्यनाड्या गच्छति । तदनुग्रहादेव जीवस्थानमग्रे प्रकाशवद्भवति । हार्दः-परमात्मा परमपुरुषः । *तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः *सर्वस्य चाहं हृदि सन्निविष्टः इति हि श्रुतिस्मृती ॥ १६ ॥

505 रश्म्यनुसारी ॥ *अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते इति श्रुतेः विद्वान् रश्म्यनुसार्येव गच्छति । निश्यपि रश्मयस्संभवन्त्येव, निदाघादावूष्मोपलब्धेः । हेमन्तेऽनुपलब्धिस्तु हिमाभिभवकृता ॥ १७ ॥

506 निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ *दिवा च शुक्लपक्षश्चेत्यारभ्य *विपरीतं तु गर्हितमिति निशामरणनिन्दनात्, निशि मृतस्य न ब्रह्मप्राप्तिरिति चेत् न, कर्मसंबन्धस्य यावद्देहभावित्वात्, प्रारब्धस्य यावच्चरमदेहावसानभावित्वाच्च, ब्रह्मप्राप्तिविघ्नहेत्वभावात् । दर्शयति च *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये इति । निशानिन्दा इतरपुरुषार्थविषया ॥ १८ ॥

507 अतश्चायनेऽपि दक्षिणे ॥ अतः—बन्धहेत्वभावादेव दक्षिणायनमृतस्यापि विदुषो ब्रह्मप्राप्तिरस्त्येव ॥ १९ ॥

508 योगिनः प्रति स्मर्येते स्मार्ते चैते ॥ *यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः इति न मरणकालस्स्मर्यते; अपितु योगिनः— विद्यानिष्ठान्प्रति अर्चिरादिका तद्विपरीता चेति एते-स्मार्ते—स्मृतिविषयभूते स्मर्येते, *नैते सृती पार्थ जानन्योगी मुह्यति कश्चनेति वचनात् ॥ २० ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थाध्याये तृतीयः पादः

509 अर्चिरादिना तत्प्रथितेः ॥ अर्चिरादिनैकेन विद्वान् गच्छति, सर्वासु श्रुतिषु तच्चिह्नैस्तत्प्रत्यभिज्ञानात् ॥ १ ॥

510 वायुमब्दादविशेषविशेषाभ्याम् ॥ *मासेभ्यस्संवत्सरं संवत्सरादादित्यमित्यब्दादित्ययोर्मध्ये द्वयोः प्रकरणान्तरयोः एकत्र देवलोकः श्रुतः, इतरत्र वायुशब्दः । तत्र देवलोकशब्दोऽपि देवानां लोक इति वायोरविशेषेण वाचकः, वायुशब्दश्च तस्यैव विशेषेण वाचक इति अविशेषविशेषाभ्यां देवलोकवायुशब्दाभ्यां वायुरेक एव विहित इत्यब्दादूर्ध्वमादित्यात्पूर्वं वायुमेव निवेशयेत् ॥ २ ॥

511 तटितोऽधि वरुणस्संबंधात् ॥ तटितोऽनन्तरं वरुणो निवेश्यः, मेघोदरवृत्तित्वाद्विद्युतः, मेघस्थलजलात्मकत्वेन लोकवेदयोर्वरुणस्य विद्युत्संबन्धावगमात् । तदनन्तरमिन्द्रप्रजापती पाठक्रमात्, प्रबलविशेषाभावाच्च ॥ ३ ॥

512 आतिवाहिकास्तल्लिङ्गात् ॥ अर्चिराद्यभिमानिदेवताविशेषाः विदुषामातिवाहिकत्वेन परमपुरुषनियुक्ता इति विज्ञायते, *स एनान् ब्रह्म गमयतीति तेष्वेकत्र गमयितृत्वदर्शनात् लिङ्गात् ॥ ४ ॥

513 वैद्युतेनैव ततस्तच्छ्रुतेः ॥ *चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयतीति श्रुतेः वैद्युतपुरुषात्परस्तात्स एव ब्रह्म गमयिता । वरुणेन्द्रप्रजापतीनां तदनुग्राहकत्वमेव ॥ ५ ॥

514 कार्यं बादरिरस्य गत्युपपत्तेः ॥ कार्यं—हिरण्यगर्भमुपासीनानर्चिरादिर्नयति, अस्यैव गत्युपपत्तेः । न हि सर्वगतं परं ब्रह्मोपासीनानां गतिरस्तीति बादरिः मेने ॥ ६ ॥

515 विशेषितत्वाच्च ॥ *पुरुषो मानस एत्य ब्रह्मलोकान् गमयति *प्रजापतेस्सभां वेश्म प्रपद्ये इति च विशेषितत्वात् हिरण्यगर्भमेव ॥ ७ ॥

516 सामीप्यात्तु तद्व्यपदेशः ॥ *ब्रह्म गमयतीति ब्रह्मव्यपदेशस्तत्सामीप्यात्; अस्य *यो ब्रह्माणं विदधाति पूर्वमिति सामीप्यमस्ति हि ॥ ८ ॥

517 कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ हिरण्यगर्भप्राप्तावप्यपुनरावृत्तिश्रुत्यविरोधः, हिरण्यगर्भलोकात्यये तदध्यक्षेण सहातः परं गच्छति, *ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे* इति श्रुतेः ॥ ९ ॥

518 स्मृतेश्च ॥ *ब्रह्मणा सह ते सर्वे इत्यारभ्य *प्रविशन्ति परं पदमिति स्मृतेश्च ॥ १० ॥

519 परं जैमिनिर्मुख्यत्वात् ॥ परमुपासीनानिति जैमिनिः, *ब्रह्म गमयतीति तत्रैव मुख्यत्वात् ॥ ११ ॥

520 दर्शनाच्च ॥ *अस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्येति श्रुतेश्च ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

521 नच कार्ये प्रत्यभिसन्धिः ॥ *प्रजापतेस्सभामिति प्रत्यभिसन्धिश्च न कार्ये; प्रजापतिशब्दस्य *पतिं विश्वस्येत्यादिश्रुतेः परस्मिन्नेव मुख्यत्वात् ब्रह्मलोकशब्दश्च कर्मधारयवृत्त्या तत्रैवेत्यभिप्रायः। *ते ब्रह्मलोके इति तु श्रुतिः ब्रह्मैव लोक इति परब्रह्मविषयैव। *ब्रह्मणा सह ते सर्वे, इति स्मृतिश्च *तदुपर्यपीति न्यायेन चतुर्मुखलोकस्थोपासनविषया ॥ १३ ॥

522 अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ प्रतीकालम्बना हि नामादिप्राणशब्दनिर्दिष्टप्रत्यगात्मस्वरूपपर्यन्तं सर्वं चिदचिद्वस्तुजातं ब्रह्मदृष्ट्या स्वरूपेण वा ये उपासते, ते; अप्रतीकालम्बनाः तद्व्यतिरिक्ताः, ये पञ्चाग्निविदः, ये च परं ब्रह्मोपासते; तान्नयत्यार्चिरादिरिति भगवान् बादरायणो मन्यते। कार्यमिति पक्षे, परमेवेति च पक्षे सकलोपनिषद्विरोधरूपदोषः प्रसज्यते। कार्यपक्षे *ब्रह्म गमयति *परं ज्योतिरुपसंपद्येत्याद्याः प्रकुप्येयुः। परमेवेति पक्षे *य एवमेतद्विदुर्ये चेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवतीति श्रुतिः प्रकुप्येत। कार्यपक्षे तत्क्रतुन्यायश्च विरुध्यते। अर्चिरादिना गतानां हि ब्रह्मप्राप्तिरपुनरावृत्तिश्च श्रूयते। पञ्चाग्निविदस्तु प्रकृतिवियुक्तात्मस्वरूपं *य आत्मनि तिष्ठन्नित्यादिनाऽवगतब्रह्मात्मकत्वमुपासत इति ह्यप्रतीकालम्बनत्वम्, तत्क्रतुन्यायाविरोधश्च; उभयेऽपि हि परिपूर्णं ब्रह्मोपासते मुखभेदेन—स्वात्मशरीरकं ब्रह्म केचन, ब्रह्मात्मकस्वात्मानमितरे इति ॥ १४ ॥

523 विशेषञ्च दर्शयति ॥ कार्यमुपासीनानां ब्रह्मप्राप्तिव्यतिरिक्तपरिमितदेशकालफलविशेषञ्च दर्शयति श्रुतिः* यावन्नाम्नो गतमित्यादिका ॥ १५ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे चतुर्थस्याध्यायस्य तृतीयः पादः

चतुर्थाध्याये चतुर्थः पादः

524 संपद्याविर्भावस्स्वेनशब्दात् ॥ *एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते* इति सिद्धस्यैव प्रत्यगात्मस्वरूपस्य अनादिकर्मणा तिरोहितस्य परं ज्योतिरुपसंपद्याविर्भाव उच्यते; *स्वेन रूपेणेति विशिष्याभिधानात् ॥ १ ॥

525 मुक्तः प्रतिज्ञानात् ॥ आत्मस्वरूपमात्रस्य प्रागेव सिद्धत्वेऽपि कर्मबन्धविनिर्मुक्तापरिच्छिन्नज्ञानादिस्वरूपस्य ह्यत्राविर्भाव उच्यते। *एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति जागरिताद्यवस्थातिरोधानविनिर्मुक्तस्यैव वक्तव्यतया प्रतिज्ञानात् ॥ २ ॥

526 आत्मा प्रकरणात् ॥ *भूयोऽनुव्याख्यास्यामीति प्रकृतापहतपाप्मत्वादिगुणक आत्मेति प्रकरणादवगम्यते; *य आत्माऽपहतपाप्मा* इत्यारभ्य *सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यः* इति प्रकृत्य *एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्युक्तम् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

527 अविभागेन दृष्टत्वात् ॥ आविर्भूतस्वरूपोऽयं मुक्तात्मा स्वात्मशरीरकं परं ब्रह्म स्वात्मनोऽप्यात्मतया अहं ब्रह्मासीत्यविभागेनैवानुभवति, *आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति तथारूपोपासनेन तथाविधस्वरूपस्य दृष्टत्वात् । *य आत्मनि तिष्ठन्...यस्यात्मा शरीरं स त आत्मा *तत्त्वमसीत्यादिशास्त्रसिद्धमेव ह्युपासितम् ॥ ४ ॥

528 ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ अस्य स्वरूपाविर्भावः ब्राह्मेण—अपहतपाप्मत्वादिगुणकस्वरूपेण; ते हि ब्रह्मगुणाः प्रत्यगात्मनोऽपि गुणाः स्वाभाविका इति *य आत्माऽपहतपाप्मा इत्यारभ्य उपन्यासादिभ्यः अवगम्यते । त एव *जक्षत्क्रीडन् रममाणः इत्यादिनोच्यन्ते । इति जैमिनेर्मतम् ॥ ५ ॥

529 चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ *विज्ञानघन एवेत्यवधारणात् विज्ञानमात्रस्वरूप इत्यौडुलोमिः ॥ ६ ॥

530 एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ *विज्ञानघन एवेति स्वप्रकाशस्वात्मस्वरूप इत्यवगतेऽपि *य आत्माऽपहतपाप्मेत्युपन्यासादिना पूर्वेषामपहतपाप्मत्वादीनामपि सद्भावावगमादुभयश्रुत्यवगतोभयस्वरूपस्य परस्परविरोधाभावद्रूपद्वयं नान्योन्यपरिहारीत्युभयरूपसमुच्चयं भगवान् बादरायणो मेने ॥ ७ ॥

531 सङ्कल्पादेव तच्छ्रुतेः । *स यदि पितृलोककामः* इत्यादिनाऽवगताः पित्रादयः *सङ्कल्पादेवास्येति श्रुतेः सङ्कल्पादेव भवन्ति । यथा परमपुरुषस्य लीलाप्रवृत्तस्य दशरथवसुदेवादयस्सङ्कल्पादेव भवन्ति । एवमेव परमपुरुषलीलान्तर्गतस्य मुक्तस्यापि तदुपकरणभूताः पित्रादयस्सङ्कल्पादेव भवन्तीत्यर्थः ॥ ८ ॥

532 अत एव चानन्याधिपतिः ॥ अत एव *अपहतपाप्मा...सत्यसङ्कल्पः इत्यादिश्रुतेः न कदाचिदपि कर्माधीनोऽयम् ॥ ९ ॥

533 अभावं बादरिराह ह्येवम् ॥ तस्य देहेन्द्रियाद्युपकरणाभावं बादरिर्मेने; *नह वै सशरीरस्येत्यादिर्हि तदभावमाह ॥ १० ॥

534 भावं जैमिनिर्विकल्पामननात् ॥ *एकधा भवतीत्यादिना देहेन्द्रियादिभिर्विविधताश्रुतेः देहाद्युपकरणसद्भावं जैमिनिर्मेने ॥ ११ ॥

535 द्वादशाहवदुभयविधं बादरायणोऽतः ॥ उभयश्रुतेस्सशरीरत्वमशरीरत्वञ्चेच्छातः; यथा द्वादशाहे उभयश्रुतेस्सत्रमहीनश्च भवति ॥ १२ ॥

536 तन्वभावे सन्ध्यवदुपपत्तेः ॥ स्वेनैव सृष्टतन्वाद्यभावे स्वप्ने *अथ रथान् रथयोगान् पथस्सृजते* इति परमपुरुषसृष्टैर्भोगवत् मुक्तोऽपि परमपुरुषसृष्टैरेव लीलारसं भुङ्क्ते ॥ १३ ॥

537 भावे जाग्रद्वत् ॥ स्वेनैव सृष्टोपकरणभावे जाग्रत्पुरुषवत् भुङ्क्ते ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

538 प्रदीपवदावेशस्तथाहि दर्शयति ॥ एकदेशस्थितस्यापि स्वप्रभारूपज्ञानव्याप्त्या सर्वानुभवस्सिद्ध्यति । *वालाग्रशतभागस्येत्यारभ्य *स चानन्त्याय कल्पते इति हि दर्शयति ॥१५॥

539 स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ *प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति वेदनाभाववचनं सुषुप्तिमरणयोरन्यतरापेक्षमित्युक्तम् । *नाह स्वल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति* इत्यादिना सुषुप्त्यादावकिञ्चिज्ज्ञत्वमाविष्कृतं हि ॥१६॥

540 जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तं मुक्तस्य जगज्जन्मादिकारणत्ववर्जम्; *यतो वा इमानि भूतानि जायन्ते इत्यारभ्य *तद्ब्रह्मेत्यादि जगत्सृष्ट्यादि परस्यैवेति प्रकरणादवगम्यते; सृष्ट्यादिप्रकरणेषु मुक्तस्यासन्निहितत्वाच्च। मुक्तस्यातिरोहितस्वमाहात्म्यस्यानवधिकातिशयानन्दपरिपूर्णब्रह्मानुभव एव । ब्रह्मणोऽपि जगद्व्यापारो लीलामात्रमिति *लोकवत्तु लीलाकैवल्यमित्युक्तम् ॥ १७ ॥

541 प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ *इमाल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्नित्युपदेशाज्जगद्व्यापारोऽस्तीति चेत्, न, हिरण्यगर्भाद्याधिकारिकमण्डलस्थभोगोक्तेः । नहि तत्र नियमनं श्रुतम् ॥ १८ ॥

542 विकारावर्ति च तथाहि स्थितिमाह ॥ विकारासंसृष्टपरिपूर्णपरब्रह्मानुभव एव तस्य सुखम्; तथाऽस्य स्थितिं *रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीत्याह ॥ १९ ॥

543 दर्शयतश्चैवं प्रत्याक्षानुमाने ॥ उक्तमर्थं श्रुतिस्मृती च दर्शयतः *तस्माद्वा एतस्मादात्मन आकाशस्संभूतः *एतस्य वा अक्षरस्य प्रशासने इत्यादिका श्रुतिः। स्मृतिरपि *अहं सर्वस्य प्रभवः मत्तस्सर्वं प्रवर्तते* इति ॥ २० ॥

544 भोगमात्रसाम्यलिङ्गाच्च ॥ *सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति ब्रह्मानुभवरूपभोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

545 अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥ *स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते* इतिशब्दात् निवृत्तसमस्ततिरोधानः, आविर्भूतापहतपाप्मत्वादिगुणगणः अनवधिकातिशयानन्दं परं ब्रह्मानुभवति; न च पुनरावर्तते इति निश्चीयत इति सर्वं समञ्जसम् ॥ २२ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायः ॥ ४ ॥

श्रीमते रामानुजाय नमः

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीशारीरकमीमांसाभाष्योपात्तप्रमाणसूचिका

(संख्या– पृष्ठ संख्या)

अकृत्स्नो ह्येषः ५६, ३६८
अक्षय्यं ह वै चातुर्मास्य १०३
अक्षरं तमसि लीयते २१३
अक्षरात्परतः परः १५९, १७२, ३१५
अग्नये पथिकृते १३१
अग्निमग्नमावह १८३
अग्निर्ज्योतिरहः ३३२, ३८०
अग्निर्मूर्धा १६१, १६२
अग्निर्वाग्भूत्वा २२०
अग्निर्वैहोत्रं वेतु ३३३
अग्निलोकमागच्छति ३८३
अग्नेरापः २७२
अग्नेरूर्ध्वज्वलनं २५४
अग्राह्यो न हि गृह्यते ३३८
अङ्गुष्ठमात्रः पुरुषो १८०, १९०
अचेतनापरार्थाच्च २६७
अजामेकां [तै] ९८, १९९
अजामेकां [श्वे] १९८
अजायमानो वहुधा १३९, १६६, २६७
अजो नित्यः २७४
अजोपिसन्नव्ययात्मा १३९, १६६
अणीयान् व्रीहेर्वा १५०
अणोरणीयान् १९९
अतः प्रत्यक्षसिद्ध ७२
अत्त्यन्नं पश्यति प्रियं ३४५
अत्र ब्रह्म समश्नुते ३७६
अत्रायं पुरुषः स्वयं ६७

अथ खलु क्रतुमयः १४७, १५१
अथ खलु प्राणएव १४५, १४८
अथ तत ऊर्ध्वउदेत्य १८५, १९९
अथ तस्य त्रयं ७७
अथ नामधेयं ३१३
अथ परायया ५५, ७५, १५९, १६०, ३३२
अथ य आत्मा ससेतुः १७७, ३१४
अथ य इमेग्राम २९७, ३००
अथ य इहात्मानमनु १७५, १७६
अथ य इहात्मानमननु ३३७
अथ य एष संप्रसादो १७८
अथ यत्रैतत्सुषुप्तः ३०५
अथ यत्रैतदस्माच्छरी ३७९
अथ यत्रैतदाकाशमनु १७८
अथ यदतःपरोदिवो १४२, १९१, १९९
अथ यदा सुषुप्तो ३०६
अथ यदिदमस्मिन् १७४, ३३६
अथ यदु चैवास्मिन् ३८१
अथ यो दक्षिणेप्रमी ३८०
अथ योन्यां देवतामुपास्ते ५६, ३६८
अथ यो वेदेद जिघ्राणीति ६७, २७६
अथ यो हैतानन्तानुपास्ते २८८
अथ रथानूरथ ३९२
अथ वेशन्तान् ३९२
अथ स्वप्ने पुरुषं ३०५

अथ ह य एवायं मुख्यः २८९, ३२०
अथ ह शौनकं च १८८
अथ हास्यवेदमुप १८९
अथ हेममासन्यं ३१९
अथ हेमादेवता ३२२
अथ हैनं गार्हपत्योनु १५५
अथ हैनं वागुवाच ३२२
अथाकामयमानः ३७७
अथात आत्मादेशः १७१
अथात आदेशो नेति ३११, ३१३
अथातो धर्मजिज्ञासा ५०
अथातो हंकारादेशः १७१
अथाध्यात्मम् १३७
अथास्मिन् प्राण २०४
अथैतमेवाध्वानं पुनः ३०१
अथैतयोः पथोर्न ३०१
अथैतैरेवरश्मिभिः ३८१
अथोवैखलुदुर्निष्प्रपतरं ३०२
अदितिः पाशान् ३८५
अदृष्टो द्रष्टा १५८, १७७
आद्भिः परिदधति ३२५
अद्भ्यः पृथिवी २७२
अद्भ्यसंभूतो ३१५
अधस्तात्समिधं ३५५
अधिष्ठानं तथा कर्ता १९४, २८०
अधीता भगवन् २६७
अनश्नन्नन्यो २२२
अनादिनिधनाह्येषा १८३

Digitization by Arya Samaj Charitable Foundation, Chennai

अनादिमायया ५६, ९२
अनाशी परमार्थश्च ९५
अनाश्रमी न तिष्ठेत्तु ३६१
अनीशया शोचति २२१
अनीशश्चात्मा २१९, २२१
अनुम एतां भगवो ५३, १८७, ३६७
अनुविद्य विजानाति ५२
अनृतेनहि प्रत्यूढाः ५६, ८४, ९२
अनेन जीवेनात्मना ९३, ९७, १००, १२४, १२५, १२७, १२८, १४५, १८२, १९१, २०३, २१०, २२८, २३५, २९२, ३०८, ३७५
अन्तःप्रविष्टश्शास्ता ८२, ९६, ९९, १२४, १३२, १४५, १५७, २०३, २१०, २८२, ३८९
अनन्तवदेवास्य ५०, ५१
अन्तर्बहिश्चतत्सर्वं ३४०
अन्तश्शरीरे निहितो १५८
अन्धोभविष्यो ३४६
अन्नमयं हि सोम्य २९३, ३७४
अन्नमशितं त्रेधा २९३
अन्यत्र धर्मादन्यत्रा ११४, १९६
अन्यदेव तद्विदिता ११४
अन्यन्नवतरं ३७७
अन्योन्तर आत्मा ३२४
अपः प्रणयति २९६
अपक्षय विनाशाभ्यां ७८
अपपुनर्मृत्युं जयति ३७७
अपहतपाप्मा ९६, १००, १३४, १३९, २१४, २२१, २२२, २४२, २४५, ३०७, ३३९, ३५२
अपहते पापकृत्यां १५५
अपाणिपादो २२२
अपितु वाक्यशेषस्स्यात् ३२९
अप्राणोह्यमनाः ११४, १४७, २२२
अभयं वै ब्रह्म ३३७
अग्निसमावृत्य ३६४
अमृतत्वस्य तुनाशास्ति २०७
अमृतस्य परं सेतुं ३१४
अमृतस्यैष सेतुः १६६, ३१४
अमौनं च मौनं च ३६४
अयं लोको नास्ति ३००
अयं वावलोक एषो ३४३, ३४४
अयंसो अग्निरिति १८३
अयमग्निर्वैश्वानरो १६१
अयमात्मा ब्रह्म ५१, ११५, ११७, २४०, २८३, ३८९
अरण्यमियात्ततो ३६२
अराइवरथनाभौ १६६
अरुणयैकहायिन्या १३०, १३१
अर्चिषोहरह ३८२, ३८३
अर्थाभावेयदव्ययम् १६७
अर्थैकत्वेद्रव्यगुणयोः १३०
अर्वाग्बिलश्चमसः १९८
अवकीर्णिपशुश्च ३६२
अवान्तरतपानाम २६८
अविकाराय ८१
अविद्याकर्मसंज्ञान्या ८३, ८४
अव्यक्तं पुरुषे ब्रह्मन् २१३, २१७
अव्यक्तमक्षरे ९२, ९९, १७२, २१५
अव्यक्तादिविशेषान्ता २१६
अशब्दमस्पर्श १४९, १९६, १९७
अशरीरं वावसन्तं ३३०
अशरीरं शरीरेषु ११४, २२२,
अश्वइवरोमाणि १९१, ३२८, ३३०, ३७६, ३८६
अष्ट वर्षं ब्राह्मणमुप ५०
अष्टौ ग्रहाः २८८
अष्टौ प्रकृतयष्षोडश १९७
असङ्गो ह्ययं पुरुषः ११४
असत्यमप्रतिष्ठं ते २८२
असदेवेदमग्र २०२, २८७, ३४१
असद्वा इदमग्र आसीत् २०२, २३९
असद्वा इदमग्र....तदाहुः २८७
असन्नेव सभवति ७६, १२६
असौ वा आदित्योदेव १८५, १९९
असौ वै लोकोग्निः १६२
अस्तिभगवोनाम्नोभूयसी १६८
अस्तिभगवो वाचो भूयः १६८
अस्तिहि मध्वादिषु १८६
अस्थूलमनण्वह्रस्वं ५७, १३८
अस्माच्छरीरात्समुत्थाय ३८६, ३९२
अस्मान्मायी ९२, ९८, १९९, २११, २१३, २१६, २४१

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्यलोकस्य का गतिः १४०
अस्य सोम्य पुरुषस्य ३७३
अहंकार इतीयं मे ९९
अहं कृत्स्नस्य जगतः ७२, ७७, २१७
अहं तु ते तद्वक्ष्यामि १५५
अहं बीजप्रदः पिता ७२
अहं वैश्वानरो भूत्वा १४२, १६३
अहं श्रेयसे विवदमानाः ३२२
अहं हि सर्व यज्ञानां २१८, ३१७
अहं सर्वस्य प्रभवो ७२, २१७, २८२
अहमात्मा गुडाकेश ५५, ७२, १८४
अहमिमास्तिस्रो १००
अहमेकः प्रथम ७२
अहमेवाधस्तादह १६९
अहहारे त्वा शूद्र १८७
आकाशमेकं हि यथा ३१०
आकाशो हवै नाम १४०, १९१, ३०९
आख्यानानिशंसन्ति ३५७
आचारहीनं न पुनन्ति २९९
आचार्यकुलाद्वेदमधीत्य ३५१
आचार्यस्तुते गतिं १५५
आचार्याद्धैव विद्या १५५
आजहारेमाश्शूद्र १८६
आत्मतः प्राणः १७०
आत्मन आकाश १४१
आत्मनस्तुकामाय २०८
आत्मनिखल्वरे २३६
आत्मनो वा अरे दर्शनेन २०८
आत्मभावं नयत्येनं ८३
आत्मानं रथिनं १५३, १९३, २००, ३२३
आत्मानमेवेमं वैश्वा १६१, ३४५, ३४६
आत्मानमेवलोक ५२, ११३, १२०
आत्मानारायणः १०१
आत्मा वा अरे ५२, १०३, ११३, २०७, ३५७, ३६७
आत्मावा इदमेक ५८, १११, १२४, १३९, १४०, १४१, २०९, २२१, २३७, २४३, २८७, ३२४, ३९४
आत्मेत्येवतुगृह्णीयात् ५६, ९८
आत्मेत्येवोपासीत ५६, ११२
आत्मेन्द्रियमनो ११४
आत्मैकएव १४३
आत्मैवेदं सर्वम् १६८, २३६, ३१३
आदित्यवर्णं ७९
आदिसर्गमहं वक्ष्ये १८४
आनन्दं ब्रह्मणो ७६, १३७, २७८
आनन्दमयमात्मानमुप १३७
आनन्दोजरोमृतः १४४
आनन्दो ब्रह्म ५५, ७६, १११, १४६, १४८, २१४, २७८, ३२३
आनीदवातं २८८
आपः पीतास्त्रेधा २९३
आपः पुरुषवचसः २९६
आपोमयः प्राणः ३७४
आपो वा अकामयन्त २२०
आपोवासः ३२५
आब्रह्मभुवनाल्लोकाः १८५, ३९६
अब्रह्मस्तम्बपर्यन्त ७९
आरम्बणसंशीलनं ५४
आराग्रमात्रो ह्यवरोपि २७७
आरूढो नैष्ठिकं धर्मं ३६२
आर्षं धर्मोपदेशं २२४
आविस्सन्निहितं १६१
आसीदिदतमोभूतं १८४, २१३, २१७
आस्थितस्स हि युक्तात्मा ३९६
आहारशुद्धौ सत्त्व ५४, ३५९, ३६५
इति तुपञ्चम्याहुता २९५
इतिहासपुराणाभ्यां ८०
इदं ज्ञानमुपाश्रित्य ८३, १८०, ३८९
इदं ब्रह्मेदं क्षत्रम् २०८
इदं महोपनिषदं २६८
इदं वा अग्रेनैव २३९, २४३
इदं शतसहस्राद्धि २६८
इदं श्रेय इदं ब्रह्म २६८
इदं सर्वं यदयमात्मा ५५, १२०, २०८, २३६
इदं सर्वमसृजत ११३, १३६, २०३
इदमपि वेदव्रतेन ३१९

Digitization by Arya Samaj Charitable Foundation, Chennai

इन्द्रश्शचीपतिः १४३
इन्द्रागच्छ हरिव १८३
इन्द्राय राज्ञे ३३९
इन्द्राय स्वराज्ञे ३४०
इन्द्रायाधिराजाय ३४०
इन्द्रियाणि दशक २८८, १९१
इन्द्रियेभ्यः पराह्यर्थाः १९३
इन्द्रोमायाभिः ५६, ९२, २२८
इन्द्रोहवै वृत्रं हत्वा ३२८
इमाल्लोकान्कामान्नी ३९४
इमास्तिस्रो देवताः २००
इयमेवजुहूः ३५६
इयाजसोपि सुबहून् ५४, ३५०
इष्टापूर्तं बहुधा जातं २५०, ३१७
ईशावास्यमिदं ३५३
ईश्वरस्सर्वभूतानां ८४, १५०
२८२, २९४
उक्थमुक्थमुपासीत ३४४
उच्छिष्टं वै मे पीतं ३५९
उततमादेशमप्राक्ष्यः २१२, ३३५
उत्तमः पुरुषस्त्वन्यः ७७, १०१,
३०९
उत्तरेषां चैतदविरोधि ३६२
उद्गीथमुपासीत ३४८, ३५२
उद्दालको हवै १६२, ३४६
उपत्वानेष्ये १८८
उपासनं स्याद्ध्रुवानु ५३
उभे अस्मिन् द्यावा १७६
उर एववेदिर्लोमानि १६५
ऊर्ध्वमेकस्स्थित ३७८
ऋग्वेदं भगवो २६७
ऋतं पिबन्तौ ८२, ९२,
१५२, १९६
ऋतं वदिष्यामि ३२८
ऋतमवादिषं ३२८
ऋत्विग्भ्यो दक्षिणां ३६३
ऋत्विज उपगायन्ति ३२९
ऋषयः कावषेयाः ३५२
ऋषिं प्रसूतं कपिलं २१७
एक एव हि भूतात्मा ३१०
एकं वा संयोगरूप ३१८
एकदेशस्थितस्याग्ने ७८, २८५
एकमेवाद्वितीयम् ११३
एकधैवानुद्रष्टव्यम् ३३७
एकस्वरूपभेदस्तु ८४
एकान्तिनस्सदा ३५५
एको देवस्सर्वभूतेषु ११४, २२८
एको देवो बहुधा २२८
एको ह वै नारायण १११, १३९,
२३७, २४३, २६५, ३९४
एत एव लोकायदहो ३८३
एतं त्वेव ते भूयो ३८८
एतं सेतुं तीर्त्वा ३१४
एतं ब्रह्मलोकं ९२
एतत्तु यत् ९५
एतत्सत्यं ब्रह्मपुरं १७६
एतदमृतमभयं १५५
एतद्यो वेत्ति ६७
एतद्वै तदक्षरं गार्गि ३३२
एतद्वै सत्यकामपरं १७४
एतमानन्दमयमात्मा ८३
एतमितः प्रेत्याभि १५०, १५१
एतमेव तदनमनग्नं ३२५
एतमेव लोकमिच्छन्तः २६५
एतमेव प्रव्राजिनः ३५७
एतस्माज्जायते प्राणो २६६, २७०,
२७२, २८७, २८८, २८९
एतस्माज्जीवघनात् १७४
एतस्य वा अक्षरस्य १७२,
१७३, १७७, १९०, २१२,
२९१, ३५२, ३९५
एतावानस्य महिमा १४३
एताहवै देवता अहं ३२२
एतेन वै चैत्ररथं १८८
एतेभ्यो भूतेभ्यः ३९३
एतेषां मे देहि ३५९
एवं क्रतुर्हामुं लोकं ३४४
एवं त्वयिनान्यथेतो ३५३
एवं प्रकारममलं ७८
एवं भूतस्य मे देवि १८४
एवं विदे चिन्वन्ति ३४२
एवं विद्ध वै ब्रह्मा ३४९
एवमेकं सांख्ययोगं २६९
एवमेव खलु सोम्येमाः १७६
एवमेवास्य परिद्रष्टुः ६८, २७६
एवमेवेममात्मान ३७४
एवमेवैता भूतमात्राः २१९
एवमैवेष एतान् २८०, २९०
एवमेवैष संप्रसादो १७८, ३८७
एवमेष महाशब्दो ७८
एष आत्मा अपहत ७६, ११९,
१२४, १३८, १७५, ३३७
एष एव साधुकर्म १४४

Digitization by Arya Samaj Charitable Foundation, Chennai

एष एवा साधुकर्म ५४
एष तुवा अग्निहोत्री १६९
एष तुवा अतिवदति १६८, ३४५, ३४६
एष त आत्मान्तर्या १५७, १५८
एष देवपयोब्रह्म ३८५
एष म आत्मान्तर्हृदय १४८, १५०, १५१
एष ब्रह्मलोकस्सम्रा १७६
एष लोकाधिपतिरेष १४५
एष वः पन्थाः १६०
एष वः पुण्यस्सु कृतः १६०
एष संप्रसादोस्मात् १६९, २०९, ३३०, ३८६
एष सर्वभूतान्तरात्मा १२४, १३८, १४५, २२३
एष सवश्वरः १७७, ३३७, ३५२, ३९५
एष सर्वेषु भूतेषु १९४, १९६, २२८
एष हि द्रष्टा श्रोता ६७, २७६
एष ह्येव साधुकर्म २८२
एष ह्येवानन्दयाति २०८, ३०५, ३१६, ३९५,
एषां लोकानामसंभेदाय ३१४
एषा सोम्य ते स्सद्विद्या १५५
एषोणिमा ३३५
एषोणुरात्मा चेतसा २७७
ऐतदात्म्यमिद ९६, ९७, १०१, १२४, १३२, १४५, २१२, २२८, २३६, २७१, २७४, ३३६, ३५०, ३८९
ऐश्वर्यस्य समग्रस्य ७८
ओमित्येतदक्षर ३२०, ३३९, ३४४, ३४७
ओमित्येवात्मानं ५२
ओषधीर्लोमानि २९६
औदुम्बरीं स्पृष्ट्वोद्गायेत २१७
औदुम्बयः कुशाः ३२९
औपमन्यव कंत्व १६३
कइत्था वेदयत्रसः १५२
कंब्रह्म खं ब्रह्म १५४
कण्ठिका रुचकं चैव २६४
कतम आत्मायोयं ६७, १९२, २७६
कथं नुभरावस्स आदेशः २३५
कम्वरएनमेतत्सन्तं १८७
कर्तव्यत्वेन वै यत्र २६६
कर्तारमीशं पुरुषं २१६
कर्तृकर्मणोः कृति ४९
कर्मणैव हि संसिद्धि ३५०
कस्मिन्नुखल्वाकाश १७२
कस्मिन्नुत्क्रान्त उत्क्रान्तो ३७४
कस्मै मां दास्यसि १५३
कस्य हवा देवा यज्ञ १८३
कामस्संकल्पो २९०
कारणं गुणसङ्गो २८०
कार्यकारणकर्तृत्वे २८०
किं कारणं ब्रह्म १९९
किं प्रजया करिष्यामो ३५४
किं मेवासः ३२५
किं स्विद्वनंकउ २१३, २४४
किमेतान्येकनिष्ठानि २६८
कुतस्तुखलुसोम्य २४०
कुतस्सृष्टमिदं २१७
कुर्वन्नेवेह कर्माणि ३५१
कुशावानस्पत्याः ३२९
कृतिस्त्वेव विजिज्ञासि १७०
कृत्यल्लुटो बहुलम् १२७, २३५
कृद्योगा च षष्ठी ४९
कोन आत्मा किं ब्रह्म १६२
को ह्येवान्यात्कः १३५, १७७, ३३४
क्रियागुणैरात्म गुणैश्च ११७
क्रियावानेष ब्रह्म ५४
क्रीडतो बालकस्येव २१६
क्वैष एतद्बालाके २०४
क्षरं प्रधानममृता ९८, १०१, १९८
क्षरस्सर्वाणि भूतानि ८४, १७२
क्षीयन्ते चास्य कर्माणि ३७०
क्षेत्रज्ञं चापिमां ५५, ८४
क्षेत्रज्ञः करणी ८३
गायत्री वा इदं १४२
गुणमुख्यव्यतिक्रमे ३३३
गृहस्थो ब्रह्मचारी २६८
गोदोहनेन पशुकामस्य ३४८
घ्नन्ति त्वेवैनं विच्छाद १८०
चतुर्विंशतिसंख्यात १९७
चतुर्विधा भजन्ते ३६५
चतुर्विधोपिभेदोयं ८४
चत्वारः पञ्चदश १३२
चतुर्थो वर्ण एकजाति १८८
चतुष्पाद्ब्रह्म ३१४

Digitization by Arya Samaj Charitable Foundation, Chennai

छन्दांसि यज्ञाः १९८
जक्षत्क्रीडन् ३९०
जगतामुपकाराय ७८
जगत्सर्वं शरीरं ते २२३
जगद्व्यापारवर्जं ८३
जनकस्य कुले जाता ३०४
जप्येनापि च संसि ३६१
जलाधारिष्वित्रवांशुमान् ३१०
जात्याश्रयनिमित्ता ५४
जानात्येवायं ६७, २७६, २७८
ज्ञाज्ञौद्वावजा ७५, ९८, ११७
१९८, २४१, २७४, २८३
ज्ञात्वादेवं मुच्यते ३६७
ज्ञानं विशुद्धं ५६, ९३, ९४
ज्ञानयोगेन सांख्यानां २६८
ज्ञानरूपं परं ब्रह्म ८४
ज्ञानशक्तिबलैश्वर्य ७८
ज्ञानस्वरूपमखिलं ५५, ८१
ज्ञानस्वरूपमत्यन्त ५५, ८०,
८१, २७६
ज्ञानस्वरूपो भगवान् ५६, ९३,
९४
ज्ञानान्येतानि राजर्षे २६८
ज्यायान् पृथिव्या १५०, १७५,
३२७
ज्योतिष्टोमेन स्वर्ग ५७
ज्योतींषु विष्णुः ९३, ९५
त इह व्याघ्रो वा १२३, ३०६
त एतस्यैव सर्वे रूप २९१
त एते सर्व एव समाः २८८
तं दुर्दर्शं गूढमनु १५२, १९६
तं देवा ज्योतिषां १८५, १९१
१९८, २०२
तं पृथिव्यब्रवीत् २२०, ३८४
तं प्रतिब्रूयात् ३७६
तं यथायथोपासते ३४३, ३८६
तं वा एतं देवा आत्मान १७९
तं विद्याकर्मणी ३५१
तं षड्विंशकमित्याहुः १९७, २०१
तं होपनिन्ये १८८
ततः परिवृत्तौ कर्म २९८
ततस्तुतं पश्यति ३६७
ततस्स्वयंभूर्भगवान् २१७, २३८
ततो यदुत्तरतरं ३१४
तत्त्वं नारायणः परः ३४०
तत्त्वमसि ५१, ५६, ९३,
९६, ९७, ११५, १२५, १२७,
१२८, १३३, २३६, २४०
२८३, ३८९, ३३६
तत्तेज ऐक्षत १२२, २७२, २९२
तत्तेजोसृजत १४०, २०३,
२७०, २७२
तत्प्रकृत वचने ८०, १३४
तत्प्राप्ति हेतुर्ज्ञानं १६०
तत्पुरुषो मानव ३८३, ३८४
तत्याजभेदं परमार्थ ८२
तत्र पूज्यपदार्थोक्ति ७८
तत्र सुप्तस्य देवस्य १८४
तत्रापरा ऋग्वेदो १६०
तत्रापिदहृंगगनं १०३, ३१९
तत्रैवं सति कर्तारं २८०
तत्सत्यं स आत्मा ११३
तत्सप्तधातुत्रिमल २७९
तत्सर्वं वैहरेस्तनुः ९३, २२३
तत्सुकृतदुष्कृते ३२८, ३७१
तत्सृष्ट्वा तदेवा ९७, ९९, १४६,
१५८, २०३, २३६, २९१
तथा हेयगुणध्वंसा ३८९
तदण्डमभवद्धैमं १८४
तदनुप्रविश्य ९७, १००
तदपोसृजत २७२, २९२
तदसदेवसन्मनो २४०
तदात्मन्येव हृद्य्ये १६१
तदात्मानं स्वयमकु २१४, २१६,
२६५
तदा विद्वान् ८३, ३२८
तदेतत्सत्यं १६०
तदेतदक्षयं ७९
तदेतदृचाभ्यनूक्त १४२
तदेव प्रीतये भूत्वा २०९, ३०८
तदेव ब्रह्म त्वं विद्धि ११५, ११६
तदेव शुक्रं तद्ब्रह्म ३०४
तदेव सर्वमेवैतत् ७८
तदेवानुप्राविशत् २१५
तदैक्षत ७५, ९६, १००,
१२५, १२७, १२८, १२९,
२०३, २१३, २३६, २३७,
२६५, २७०, ३५२
तद्ध देवा उद्गीथ ३२०
तद्धेदं तर्ह्यव्याकृतं १००, २०२,
२०५, २४०, २४६, २७५, २८७
तद्धैतत्पश्यन् ७२, १४५, ३१२
तद्धोभय देवासुरा १८२

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्ब्रह्म परमं ७८
तद्भावत्रभात्रमापन्नः ८३
तद्य इत्थं विदुर्ये २००,२३२,२८६
तद्य इह रमणीय २९८
तद्य इहात्मानमनु ३३७, ३३९
तद्यत्रैतत्सुषुप्तः ३०६
तद्यत्सत्यमसौ ३२६, ३३६
तद्यथा पुष्करपलाश ३७०
तद्यथा महापथ ३७९
तद्यथा रथस्यारेषु १४४
तद्यथा श्रेष्ठी २०४
तद्यथा हिरण्यनिधिं १७६
तद्यथेषीकतूलं १६२, ३७०
तद्यथेह कर्मचितो ५०, ५१
तद्यद्भक्तं प्रथम १६३
तद्रूप प्रत्ययेचैका ३६७
तद्वा एतदक्षरं १७३
तद्विपर्ययजातुष्टिः ५४
तद्विष्णोः परमंपदं १७४
तेन्नामरूपाभ्यां १००, २०२
तन्मात्राणि भूतादौ १९५
तपश्श्रद्धे ये ह्युप १६०
तपसा चीयते ब्रह्म १६०
तम आसीत्तमसा २१३
तमः परेदेवएकी २७३
तमीश्वराणां परमं ७५, ९६, १३९ २३८, ३०९
तमुत्क्रामन्तं प्राणो २९०, २९६ ३७४
तमेनं वेदानुवचनेन ५४, १६०, २६५, ३५७, ३६०, ३६१, ३७२, ३८५
तमेवं विद्वानमृतः ५०, ५३, १६६, २०७, २६५
तमेव भान्तमनुभाति १८०
तमेवमन्य आत्मानं २०१
तमेव विदित्वाति ५१, ५३, ५६, ११४, ११८, २०७
तमोङ्कारेणैवायतनेन १७४
तयातिरोहितत्वाच्च ७९
तयोरन्यः पिप्पलं ९८, ११४, ११८, १५१, २२१, २४१, २८६
तयोर्ध्वमायन् ३८५
तरति शोकमात्मवित् १६८
तल्लब्धिर्विवेकविमोक ५४
तवैष महिमा येन ८१
तस्माच्च विपर्यासात् २५२
तस्माचैत्ररथो नामकः १८८
तस्माच्छूद्रो बहुपशु १८९
तस्माच्छूद्रो यज्ञेनव १८६
तस्मात्कायाः प्रभवन्ति २१८
तस्मात्तत्संयोगादचेतनं २५२
तस्मादव्यक्तमुत्पन्नं २१३, २१७
तस्मादुपशान्त तेजाः ३७४
तस्मादेतद्ब्रह्म २७०, २७२
तस्मादेवं विच्छान्तो २५८
तस्मादेवं विदशिष्यन् ३२५
तस्माद्ब्राह्मणो महिमान ३८०
तस्माद्ब्राह्मणः पाण्डित्यं ३३५, ३६३, ३६५
तस्माद्ब्राह्मणसुरां ३५९
तस्माद्वा एतस्मादात्मन् १११, १२४, १३६, १४०, २०३, २७०, ३१५, ३२४
तस्माद्वा एतस्मान्मयो ६८
तस्माद्वा....विज्ञान २०३, २१५
तस्मान्न बध्यतेद्धा २५२
तस्मान्न विज्ञानमृते ५६, ९३, ९४
तस्माल्लोकात्पुनरेत्य २७६
तस्मिंश्चान्यो ९२
तस्मिन् कामास्समा १२४
तस्मिन्नण्डे भवद्ब्रह्मा २९२
तस्मिन्नेतस्मिन्नग्नौ २९५
तस्मिन्यदन्तरिति १७६
तस्मिन्यदन्तस्तदन्वेष्ट ७६, १७५, ३१९, ३३७
तस्मिन्यदन्तस्तदुपासि ३४०
तस्मिन्यावत्संपात २९७
तस्मिंल्लोकाश्श्रितासर्वे ९१, ३९५
तस्मै मृदितकषायाय ११४
तस्मै सहोवाच १६०
तस्य तावदेव चिरं ११६, १२२, १४४, ३३०, ३७२, ३७३, ३७६, ३७७, ३८०
तस्य पुत्रादायमुपयन्ति ३२८, ३३०, ३७२
तस्य प्रियमेव शिरः ३२३
तस्य वैतस्य पुरुषस्य ३११
तस्य सर्वेषु लोकेषु काम ३९४
तस्य ह वा एतस्य महतो १०१, १२४
तस्य ह वा एतस्यात्मनो १६५
तस्य ह वा एतस्यैवं १७१, २०७
तस्यात्मपरदेहेषु ५५, ८२
तस्यान्ते सुषिरं सूक्ष्मं ३३७
तस्याश्शिखाया मध्ये १६६, ३४०

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्यैवं विदुषो यज्ञस्यात्मा ३२७
तस्यैवात्मा पदवित्तं ३७०
तस्यैष एव शारीर आत्मा १२५
तस्योपनिषदह ३२६
ता अन्नमसृजन्त २७२, २९२, ३७४
ता आप ऐक्षन्त १२२, २७२, २९२
तानहं द्विषतः २५०, २८२
तानि सर्वाणि तद्वपुः ९३, २२३
तान् हैतानेवंविदे ३४२
तान् होवाचाश्वपतिः १६२
तावानस्य महिमा १४३
तासां त्रिवृतं ९०, २००, २९६
तेजः परस्यां देव ३३६, ३७८
तेजस्विनावधीत ३२८
तेजोबलैश्वर्य ७८, ३०७
तेजोशितं २९३
ते देवाः प्राणे निःश्रे २२०
ते धूममभिसंभवन्ति ३००
ते ध्यानयोगानुगताः १९९
तेन प्रद्योतेनैष २७६, ३७५, ३७६
तेन मायासहस्रं ९२
तेनेदं पूर्णं पुरुषेण ३१४
तेनेन्द्रो वज्रमुदय १८२
तेनेयं त्रयी विद्यावर्तते ३४८
तेनोभौ कुरुतः ३३९, ३४८
ते ब्रह्मलोके तु परान्त ३८५
ते मनसैवाधीयन्त ३४१
तेऽर्चिषमभिसंभ १५६, ३००, ३८१
ते वा एते पञ्चान्ये १४३
तेषां खल्वेषां भूतानां ३०१
तेषां तदातत्पर्यवैति ३८०
तेषां सततयुक्तानां ५३, २५०, २८२
तेषां सत्यानां सत ५६
तेषां सर्वेषु लोकेष्वकाम १७६
तेषामहं समुद्धर्ता ७२
तेषामेकैक एव ३४१, ३४२
तेषामेवानुकम्पार्थं २५०, २८२
तेषामेवैतां ब्रह्म ३१८
तेषामेवैष विरजो ५४
तेहदेवा उद्गीथमाज ३२०
ते हे मे प्राणा अहंश्रेयसे २२०
ते हैते विद्याचित ३४१
तैजसानीन्द्रियाण्याहुः २८८
तौ ह द्वात्रिंशतं वर्षाणि १८२
तौ ह सुप्तं पुरुष २०४
त्रयो धर्मस्कन्धाः ३५४, ३६५
त्रिणाचिकेतस्त्रिभि १९६
त्रिपादस्यामृतं दिवि १४३
त्रिशीर्षाणं त्वाष्ट्रमहनं १४४
त्वं वा अहमस्मि भगवो ५६, ३३६, ३६७
त्वं हिनः पिता ११४
त्वमेवमे वरं वृणीष्व १४४
दर्भमयी रशना १३४
दर्शपूर्णमासाभ्यां १०१
दशेमे पुरुषे प्राणाः २८८
दहरोस्मिन्नन्तर १०३, १७८
दहं विपाप्मं परवेश्म ३४०
दिक्संख्येसंज्ञायां २०१
दिवमेव भगवो राजन् १६३
दिवाचशुक्लपक्षश्च ३८०
दिव्यो ह्यमूर्तः १६१
दीक्षाप्रवेशमात्रेण २६४
देवच्छन्दांसिपूर्वम् ३२९
देवतासायुज्यादशरीर २८३
देवसवितुः प्रसुव ३२८
देवान् देवयजो २९७, ३१७
देवासुराणां छन्दोभिः ३२९
देवासुरा ह वै यत्र संयेतिरे ३२०
देवा हवै सत्रं निषेदुः ३२८
देशकाल वैगुण्यात् ५४
देहेन्द्रियमनः प्राण ७२
द्यां मूर्धानं यस्यविप्रा १६२
द्रव्यसंस्कारकर्मसु ३५०
द्रष्टा श्रोता १५७
द्वयाह प्राजापत्या ३१९
द्वादशाहमृद्धिकामाः ३९२
द्वादशाहेनप्रजाकामं ३९२
द्वासुपर्णासयुजा ८२, १६७, ३०८
द्वेरूपेब्रह्मणस्तस्य ७८
द्वे वाव ब्रह्मणोरूपे ३११, ३१३
धर्मेणपापमपनुदति ५४, ३६०
धूत्वशरीरमकृतं १९२
धूमो रात्रिस्तथा ३८०
ध्यायतीव पृथिवी ३६९
ध्यायते ध्यासिता २११
ध्यायेन्नारायणं देवं २१८
ध्रुवा स्मृतिः ५३
न चक्षुषा गृह्यते ११६, १४८, ३१२
नचास्योपदिशेद्धर्मं १८९
नचैतेषु समस्तेषु २६७
नजायते १९६, २०९, २४६, २६६, २७४, २८०

Digitization by Arya Samaj Charitable Foundation, Chennai

नतत्समश्चाभ्यधिकः २३८
न तत्ररथानरथ ९०, ३०४
न तत्रसूर्योभाति १९१
न तदस्ति विनयात् ५५, ८४
न तस्यकश्चित्पतिरस्ति १२४
न तस्यकार्यं ७५, १३९, २२१, २४५
न तस्यप्राणा उत्क्रामन्ति ३७७
न तस्येशे कश्चन ९५, ३१५
न त्वेवाहं जातु नासं ७२
न तद्योगयुजाशक्यं ७९
न दृष्टेर्द्रष्टारं ५५, ७६, ११२, ११५, ३३३
नन्दिग्रहि १२७
न पश्यो मृत्युं ५०, ५६, ६८, १७१, २७६, २७९
नपुनर्मृत्यवे ५०, ६६
न प्रेत्यसंज्ञास्ति १५३, २११, २७६
नभूतसंघसंस्थानो १३९, २२३
नम ऋषिभ्यो मन्त्र १८३
नमे स्तेनः १६२
नरकस्वर्गसंज्ञे ३०८
न वा अजीविष्यमिमान् ३५९
न वा अरेपत्युः कामाय २०७, २०८
न वा उवेम्रियसे ३०३
न वाचं विजिज्ञासीत १४५
न विज्ञातुर्विज्ञातेर्विपरि ६७
न शूद्रेपीतकं किंचित् १८८
न संदृशे तिष्ठतिरूप ३१२
न सवेद अकृत्स्नो ५३
न ह वा अस्मा उदेति १८५
न ह वा अस्यानन्नंजग्धं ३५८
न ह वा एवं विदि किंच ३५८
न ह वै देवा अश्नन्ति २९७
न ह वै सशरीरस्य ११४, १२५, १३८, १७८, २२५, ३९२
न हिंस्यात्सर्वाभूतानि ३०३
न हि विज्ञातुर्विज्ञातेः २७८
न ह्यध्रुवैः प्राप्यते ५०
न ह्येतस्मादितिनेत्य ३११, ३१३
नाध्वर्युरुपगायेत् ३२९
नाना वा देवता पृथ ३४०
नानाविधैरुपायैः २५२
नानावीर्याः ९०, ३७५
नान्यं गुणेभ्यः २८०
नान्यदतोस्तिद्रष्टृ १७३
नान्योतोस्तिद्रष्टा ११८, १५७, १९४, २२८
नान्नूक्तं क्षीयते कर्म ३७०
नामब्रह्म १२०, १५६
नामरूपं च भूतानां १८३, २९१
नामरूपाद्विमुक्तः ८३
नायमात्माप्रव ५३, १५२, ३१२, ३१५, ३६४
नायमात्माबल ५४
नारायणपरं ब्रह्म २६५
नारायणो जगन्मूर्ति २१७, २३८
नाविरतो दुश्चरिं ३६५, ३७१
नासदासीन्नोसदा ५६, ९२
नास्यजरयैतज्जीयति ३१४, ३३८
नास्याब्रह्मवित्कुले १५५
नाह वेदैर्नतपसा ५३, ३१२, ३६४
नाहस्खल्वयमेव २७६, ३०६, ३९३
निचाय्यतं मृत्यु ५२
नित्यं विभुं सर्वगतं ३१६
नित्यं वृद्धशरादिभ्यः १३४
नित्यो नित्यानां ७५, ९८, ११७, २४१, २७४, २८४, ३१३
निदिध्यासितव्यः ११३, ३६९
निमित्तमात्रमेवासौ २४६
निरञ्जनःपरमं ८३, ३९४
निरञ्जनम् ५७, ७५, १३९
निर्गुणम् ५७, ७५, १३९
निर्गुणस्याप्रमेयस्य ८१, २४४
निर्दोषं हि समं ८२
निष्कलं निष्क्रियं ५१, ५५, ७५, २११, २१४, ३०९
निष्ठा त्वेवविजि १७०
नेतिनेति ३०९
नतिहोवाचयाज्ञ ३७७
नेदं यदिदमुपासते ११६
नेहनानास्ति ५५, ७७, १०१, ११३, २२८, २३३, २३६
नैतक्षचीर्ण व्रतो ३१९
नैतदब्राह्मणो १८८
नैते सृती पार्थ जानन् ३८१
नैवेहकिंचिमाग्रे १५८
नोपजनं स्मरन्निदं ६८, २७६, २७९
पञ्चमहायज्ञाद्यनु ५४
पञ्चम्यामाहुतावापः ३००
पञ्चरात्रस्यकृत्स्नस्य २६८
पातिं विश्वस्यात्मे ९८, १०१, १२४, ३१३

Digitization by Arya Samaj Charitable Foundation, Chennai

पद्मकोशप्रतीकाशं ३४०
पद्यु ह वा एतच्छ्म १८८
परं ज्योतिरुपसंपद्य ८३, १९१, ३०६, ३३१, ३३७, ३३८
परः पराणां ७८, ८१, ८२
परमात्माच सर्वेषा ७८
परमात्मात्मनोः ८३
परमार्थस्त्वमेवै ५५, ८१
परात्परं पुरुष ३१४
परात्परं यन्महतो ३१४
परास्यशक्तिः ५७, ९६, १००, १२१, २३८, २४५, ३५२
परिणामतस्सलिल २४९
परीक्ष्यलोकान् ५०, १६०
परो नारायणो देवः १८४
पर्णमयीजुहूः १३४
पश्यत्यचक्षुः १५८, २४५
पादोस्यविश्वा २८४, ३१५
पादोस्य सर्वा १४२, १४३
पिण्डः पृथग्यतः ८२
पितृलोकादाकाशं २९७
पितृहा १६८
पुरुष एवेदं सर्वं १६४
पुरुष विमोक्षनि २५२
पुरुषस्यं दर्शनार्थं २५१, २५२
पुरुषस्स परः ५३
पुरुषोमान सएत्य ३८४
पुरुषोवावयज्ञः ३२७
पुरुषोस्ति भोक्तृभावात् २८१
पूः प्राणिनस्सर्व २१८
पृथगात्मानं प्रेरितारं ५०, ९८, १०१, २४१, २८६, ३६८
पृथिवीमयः ३७५
पृथिव्यप्सुप्रलीयते१९५,२१५,२७३
पृथ्वादिभ्यइमनि १६८
प्रकृतिं पुरुषं चैव ९९, १९९, २४६
प्रकृतिर्यामया ७८, १९५
प्रकृतेः क्रियमाणानि २८०
प्रकृतेस्सुकुमारतरं २५२
प्रजापतिः प्रजाअसृ २७४
प्रजापतिव संवत्सरः ३२८
प्रजापतेस्सभां ३८४, ३८६
प्रतर्दनो ह वै १४३, ३५६
प्रतिपदविधाना ४९
प्रतिप्रतिगुणाश्रय २५१
प्रत्यस्तमितभेदं ५५, ७९
प्रधानं च पुमांश्चैव ७९
प्रधानक्षेत्रज्ञपतिः ९८, ११७, १९८, २४१, ३१३
प्रमादं वै मृत्युमहं ५६
प्रस्तोतर्या देवता १४१
प्रहषोडशं वर्षशतं ३२७
प्राचीनशाल औप ३४५
प्राजापत्यं ब्राह्मणानां ३५५
प्राज्ञेनात्मनान्वारूढः ८३, १९२
प्राज्ञेनात्मनासंपरि ८३, ११८, १२३, १९२, २०६, २४१, ३९३
प्राणंचहास्मैतदा १५६
प्राणमनूत्क्रामन्तं २८८
प्राणसंशयमापन्नो ३५९
प्राणस्तेजसि ३७४
प्राणस्यप्राणः १४८
प्राणस्यप्राणमुत २०१
प्राणापानोव्यान २९०
प्राणावाऋषयः २८७
प्राणावैसत्यं ३११
प्राणेसर्वंप्रतिष्ठितम् २९०
प्राणो ब्रह्मकं ब्रह्म १५५
प्राणोस्मि प्रज्ञात्मा १४४
प्राणो ह पिता प्राणो १६८
प्रातः प्रातरनृतं २६७
प्राप्यान्तंकर्मणस्तस्य २९८, ३७२, ३७७
प्रायश्चित्तं नपश्याम्यामि ३६२
प्रियोहिज्ञानिनो ५३, ३९६
प्लवाह्येते अदृढाः ५०, १६०
फलवत्सन्निधावफलं ३२७
फलसंबिभन्तसया २५०
बहुदायी १८७
बहुपाक्यः १८७
बहुस्यां ७२, ७७, ९०, १०१, १३१, १६०, १८४, २४३
बहूनां जन्मनामन्ते ३९६
बहोर्लोपेभूच १६८
बालः क्रीडनकैरिव २१६
ब्रह्मचर्यं समाप्य ३५५
ब्रह्मचारिन्निदमुपा १८८
ब्रह्मचार्याचार्य ३६१
ब्रह्मजज्ञं देवमीडयं १५३
ब्रह्मज्येष्ठावीर्या ३२६
ब्रह्मणासह ते सर्वे ३८५
ब्रह्मणेत्वामहस ३२७
ब्रह्मणो हि प्रतिष्ठा ३९५

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मतेब्रवाणि २०५
ब्रह्मदाशाब्रह्मदासाः ११७, २८३
ब्रह्मपुच्छंप्रतिष्ठा १२६
ब्रह्मलोकान् ३८५
ब्रह्मवन २४४
ब्रह्म वा इदम् १११, २३७, ३९४
ब्रह्मविदाप्नोति ५०, ७६, ८३, १०३, ११६, १२०, १२५, ३२४, ३४७, ३४९, ३६६, ३७०
ब्रह्मवेदब्रह्मैव ५१, ५६, ७६, ८३, ११४, ११६, ११८, ३७०, ३६६
ब्रह्मसंस्थोमृतत्व ३५४, ३५५, ३५७, ३६५
ब्रह्मसर्वानुभूः १२०
ब्रह्मेमेधावा ११७
ब्रह्मैकमेव २४३
ब्रह्मैवेदं सर्वं २३६, ३१३
ब्राह्मं संन्यासिनां ३५५
ब्राह्मणः पुत्रेषणाया ३६५
ब्राह्मणानां हि सद्ब्रह्म २६६
ब्राह्मणैः क्षत्रियैः २६८
भक्त्यात्वनन्यया ३१२, ३६४,
भगवांस्त्वेवमे ३३५
भयादस्याग्निः १९०
भातिचतपति च ५३, ३६७
भिन्नप्रवृत्तिनिमित्तानां ७५, १३०, १३१
भिद्यते हृदयग्रन्थिः ५३, ५६, ३५४
भीषास्माद्वातः पवते ७६, १९०, २०३, २९१, ३०५, ३०९, ३९५, ३५२
भूमात्वेवविजि १६९
भूमात्वेवेति १६९
भूमिरापोनलो १९५
भूय एवमाभगवान् ३३५
भूरित्वष्टेवराजति ९३
भृगुर्वै वारुणिः १०५
भेदानां परिमाणात् २४८
भोक्ता भोग्यंप्रेरितारं ९८
भो भोयि मल्लाक्ष १८७
मघवन्मर्त्यं वा १७८
मतिस्त्वेवविजिज्ञा १७०
मत्स्थानिसर्वभूतानि ७७
मनः प्राणे ३७४
मनश्चितोवाक्चितः ३४१
मनष्षष्ठानीन्द्रियाणि २९१, २९६,
मनसा तु विशुद्धेन ११६, १४८
मनसैवानुद्रष्टव्यं ३३७
मनसै (वै) तान् कामान् २७६, २७९
मनसैषु ग्रहाअग्र ३४२
मनुर्वैवस्वतो राजा ३५७
मनोनुकूले ३७०
मनोब्रह्म १५६
मनो ब्रह्मेत्युपासीत ५३, ३६७, ३६८
मनोमयः प्राण १४७, १४९, १५१, २४५
मनोमयोयं पुरुषो ३२५
मनोवाववाचो भूयः १६८
मन्त्रकृतो वृणीते १८३
मन्त्रेषु कर्माणि १६०
मम माया दुरत्यया ५३, ९३
मम योनिर्महद्ब्रह्म ९९
ममवांशो जीवलोके २८४
मयड्वतयोः १३४
मयाध्यक्षेण प्रकृतिः ९९, १९८, २११, ३०९, ३९५
महतः परमव्यक्तं १९३
महद्भूतमनन्तपारं २०८
महानव्यक्ते लीयते २१२
महान्तं विभुमात्मानं १५२
महाभूतान्यहंकारो ७२
महीघटत्वम् ९३, ९४, ९५
मांचयोव्यभिचारेण ३९५
मामात्मपरदेहेषु २८२
मामुपेत्य पुनर्जन्म ३९६
मामेव विजानीहि १४४
मायां तु प्रकृतिं ५६, ९२, ९८, १९९, २११
माया वयुनं ज्ञानं १३९
मासेभ्यस्संवत्सरं ३८२
मासेभ्यो दवलोक ३८२
मिथ्यैतदन्यदुद्रव्य १०१
मुद्रिकाषट्कत्त्व २६४
मूर्धा ते व्यपतिष्यत् ३४६
मूलप्रकृतिरविकृतिः २०१, २४७
मृत्योस्समृत्युमाप्नोति १००, २२८,
मृषा वै खलु मा संवाद २०५
मेघो भूत्वाप्रवर्षति ३०२
य आकाशे तिष्ठन् २७२
य आत्मनि ८३, ९६, ९९, ११८, १२७, १३२, १३९, १४५, १५७, १५८, १७७, १९४, २१०, २१२, २२३, २४१, २७६, २८२, २९१,

Digitization by Arya Samaj Charitable Foundation, Chennai

२०७, २३४, २५०, ३६७, ३८९, ३९४
य आत्मा अपहत ११३, १७८, २८८, ३९०
य आदित्ये तिष्ठन् १३९, २९१, ३१७
य इमं च लोक परंच १५७
य इहात्मानमनुविद्य ८३
य एतास्तेजोमात्राः ३७७
य एनं विदुरमृताः ९५
य एवमेतद्विदुः ३३२, ३८१
य एवासौ तपति ३६९
य एष विज्ञानमयः २०६
य एष सुप्तेषु ९१, २०४, ३९२
य एषोक्षिणि पुरुषो १५४
य एषोन्तरादित्ये १३७
यं कामं कामयते १७५
यं पृथिवी न वेद १५८
यः पुनरेतं त्रिमात्रेण १७३
यः पृथिवीमन्तरे ९७, ९९, १३२, २१२, २२३
यः पृथिव्यां ९६, ९९, १३२, १५७, २१२, २१४, २२३, २७२, ३०७, ३३४, ३५०, ३९४
यः प्राणस्सवायुः २८९
यः प्राणेन प्राणिति ३३३
यक्ष्यमाणो ह वै १६२, ३५०
यच्च किंचिज्जगत्यास्मिन् १२४, ३१६
यच्चान्यथात्वं ९४
यच्चास्येहास्ति १२४, १७६
यच्चतत् ९५
यच्छेद्वाङ्मनसी १९४
यजदेवपूजायाम् ३१७
यजेतस्वर्गकामः ३१४, ३१७
यज्ञः पशुः ९५
यज्ञदानतपः ३५८
यज्ञेन दानेन तपसा ३६१
यज्ञैस्त्वमिज्यसे ३१८
यज्ञोध्ययनं दानं ३५५
यतः प्रवृत्तिर्भूतानां ३१८, २५०, ३५८
यतः प्रसूताजगतः २७४
यतोवाइमानि ५८, ८०, १०५, १०६, १०७, १११, १२१, १३९, १४०, १४८, २७४, ३२३, ३९४
यतोवाचोनिव ७६, १२७, १३५, ३०९, ३५२
यत्किंचित्सृज्यते २८५
यत्राच्छान्तमजरं १७४
यत्तदद्रेस्यमग्राह्यं १६०, १९६
यत्तुकालान्तरेणापि ९५
यत्रकालेत्वनावृत्तिं ३८०
यत्रत्वस्यसर्वमा ७७, १०१, ११८, २१२
यत्र नान्यत्पस्यति १६८, १७०
यत्र हि द्वैतमिव ५५, ७७, १०१, २०७, २११, २२८, २३०, २३६
यत्रान्यत्पस्यति १६८
यत्रास्य पुरुषस्य २९६
यत्रैतत्पुरुषः स्वपिति ३०६
यत्रैष एतत्सुप्तो २०६
यत्साक्षादपरोक्षा ३३३
यथाक्रतुः ७६, १२२, १७२, ३४३, ३६७, ३८६
यथागमं यथान्यायं २६९
यथातुखलुसोम्ये २९३
यथा न क्रियते ३८९
यथा नद्यस्स्यन्द ८३, १६७, २०९, ३४९
यथा पशुरेवंस २९७
यथा पादोदरस्त्वचा १७४
यथा पुष्करपलाशे ३८१
यथा लोके राजा २२६
यथाश्मानमाखणं ३२०
यथासक्तंजलेवातो ७९
यथासुदीप्तात्पावकात् २०९
यथासोम्यमधु ३३६
यथासोम्यैकेननखनिकृ २१२
„ मृत्पिण्डेन १२८, २१२, २३५, २७५
„ लोहमणिना २१२
यथा ह्येवेहप्रजा १७६
यथेतमनेवं च ३०२
यथेदं तच्छिरः १९८
यथोदपानकरणात् ३८९
यथोर्णनाभिः १५९, १६०, २१६
यदग्नेरोहितं ९०, २७२, २९३
यदनेनहविषाशास्ते १८२
यदम्बु वैष्णवः ९३, २२३
यदष्टाकपालो भवति ३४६
यदा कर्मसु काम्येषु ३०५
यदातमस्तन्नदिवा २१३
यदातुशुद्धं ५६, ९३, ९४

Digitization by Arya Samaj Charitable Foundation, Chennai

यदापश्चावतिष्ठन्ते २८७
यदापस्यःपस्यते १६६, १८०, ३४७, ३६६, ३८९
यदावैपुरुषो ३८१, ३८२
यदावैविजानात्यथ १६९
यदासर्वेप्रमुच्यन्ते ३७५, ३७६
यदासुप्तस्स्वप्नं १२३, २०६
यदा ह्येवैष....अदृश्ये ५६, ७७, ३०५, ३९५
,, उदर ५५, ७७
यदिच्छन्तो ब्रह्म ३५७
यदिदं किंचजगत्सर्वं १९०
यदूर्ध्वं गार्गि १७२
यदेतद्दृश्यते ५५, ८१
यदेवकंतदेव १५६
यदेव विद्यया करोति ३३९, ३४८, ३४९, ३५१, ३५२, ३६३,३६६, ३७२
यदेव साक्षादपरो ३३६
यदेष आकाशे १३७, १४०,२७८
यद्भूतयोनिं २१६
यद्यद्विभूतिमत् ८४
यद्यन्योस्ति ५५, ८२
यद्यपि सञ्चित्तः ८३
यद्वैकिंचमनु २१८
यन्मुहूर्तं क्षणं वापि ७७
यमात्मानवेद १५८
यमेवैषवृणुते १६०
ययातदक्षरं १७२
यशोहं भवामि ३८६
यश्चक्षुषि तिष्ठन् १५७,२९१,३०७
यस्तद्वेदयत्सवेद ५३, ३६७
यस्तर्केणानुसन्धत्ते २२०
यस्तेजासितिष्ठन् २७२
यस्त्वेतमेवं १६१, १६४, १६५, ३४५
यस्मात्क्षरमतीतो ७२
यस्मात्परं नापरमस्ति ३१५
यस्मात्सम्यक्परं २६७
यस्मिन्द्यौः पृथिवी १६६
यस्मिन्नुत्क्रान्ते २९०
यस्मिन्पञ्चपञ्च २००
यस्य चक्षुश्शरीरम् २१४
यस्य चन्द्रतारकं २१४
यस्य चित्तंशरीरं २१५
यस्य ज्ञानमयं तपः १६०, २१५
यस्य तमश्शरीरं २१४
यस्यतेजश्शरीरं २१४
यस्यत्वक्छरीरं २१४
यस्यदिशश्शरीरं २१४
यस्यदेवेपराभक्तिः ३६४
यस्यद्यौश्शरीरं २१४
यस्यपृथिवीशरीरं १०१, १३३, १९५, २७२
यस्यप्राणश्शरीरं २१४
यस्यबुद्धिश्शरीरं २१५, २७२
यस्य ब्रह्मचक्षत्रंच १५१
यस्य मनश्शरीरम् २१४
यस्यमृत्युश्शरीरम् ९७, १५८
यस्यरेतश्शरीरम् २१४
यस्य वाक्छरीरम् २१४
यस्य वायुश्शरीरम् २१४
यस्य वैतत्कर्म २०४
यस्य श्रोत्रं शरीरं २१४
यस्य विज्ञानं शरीरं २१४
यस्यसर्वाणिभूतानि २१४
यस्याकाशश्शरीरं २१४
यस्याक्षरं शरीरं १७२, २१५
यस्याग्निरास्यं १६२
यस्याग्निश्शरीरं २१४
यस्यात्मा शरीरं १०१, २१४, २४२, २८५
यस्यादित्यश्शरीरं २१४
यस्यानुक्तिः प्रति २७७
यस्यान्तरिक्षं शरीरं २१४
यस्यापश्शरीरं २१४
यस्यामतंतस्यमतं ५५, ७६
यस्याव्यक्तं शरीरं १०१, १२२, १७२, २१५, २७२
यस्याहंकारश्शरीरं २१५, २७२
यस्सत्येनातिवदति १६८
यस्सर्वज्ञः ५७, ७५, १००, ११९, १२१, १५९, १६०, १६६,१९१, २२९ २३८, २७८, ३०९, ३५२
यस्सर्वेषु यज्ञेषु १५७
,, लोकेषु १५७
,, वेदेषु १५७
यस्सेतुरीजानानां १५३
याज्ञवल्क्येति ३७७
यान्तिमद्याजिनोपि ३१७
यान्यनवद्यानिकर्माणि २९८
यान्यस्माकंसुचरि २९८
याप्राणेनसंभवत्य १५२

Digitization by Arya Samaj Charitable Foundation, Chennai

यावज्जीवमग्नि ३५४, ३६०
यावत्संपातमुषित्वा २९८, ३७२
यावदस्मिन्शरीरे १४५
यावदेकैकस्मै १६२
यावन्नाम्नोगतं ३८७
यावान्वाअयमाका १७५, ३२७
युक्तं तद्गुणकोपासनात् ८३
येचेमेरण्ये श्रद्धातप ३३२, ३५४, ३५७
येतुज्ञानविदः ८२
येनस्यात्तेनेदश एव ३६४
येनाश्रुतं श्रुतं १२८, २७०, २७५
येनाहंनामृता २०७
येनेदं सर्वं ११४, २११
येप्यन्यदेवता २१८
येयं प्रेते विचिकित्सा १५३, १९६
येवैकेचास्माल्लोकात् २७६, २९९
यैस्स्वकर्मपरैर्नाथ २१८
योक्षरमन्तरे ९९, १३२, १३९, २१०
योग्नौतिष्ठन् ३१७
योप्सुतिष्ठन् २४९, २७२, ३१०
यो ब्रह्माणं विदधाति १७४, १८४, ३८५
यो मामजमनादिं च ७७, ३०९
यो मामेवमसंमूढो १५०
यो मृत्युमन्तरे २१५
योयं पवतएषएव ३८२
योयं मध्यमः प्राणः २८९
योयं विज्ञानमयः २७६
योयोर्नियोनिमधि १९९
योयोयांयां तनुं ३१७
योयोह्यन्नमत्ति २९७, ३०३
योरेतसितिष्ठन् ३०७
यो वा एतदक्षरं १७३
यो वायौतिष्ठन् २७२, २९१, ३१७
यो विज्ञाने तिष्ठन् १२७, १५७, १५८, २२३, २७६
यो वै बालाक एतेषां २०४
यो व्यक्तमन्तरे २१२, २४१
योशनायापिपासे ३३६
यो हवै ज्येष्ठं च ३२१
रङ्गस्य दर्शयित्वा २५२
रमणीयचरणाः ३०२
रश्मिभिरेषोस्मिन् १५७
रसोवैसः ८३, १३७, ३९५
रुद्राक्षकङ्कण २६४
लोकेषु पञ्चविधं ३४४
वचनानित्यपूर्वत्वात् ३४२
वज्रहस्तः पुरन्दरः १८२
वरं वृणीष्व १४४
वर्णा आश्रमाश्च २९८
वर्षेण बीजं प्रतिसं १२२
वसन्ति तत्र भूतानि ७८
वस्त्वस्ति किम् ९३, ९४, ९५
वाक्पादः प्राणः ३१५
वाग्वावनाम्नोभूयसी १६८
वाङ्मनसिसंपद्यते ३७४, ३९३
वाचारम्भणं विकारो ५५, २३५
वायव्यं श्वेतमालभेत ३१७
वायुर्वै क्षेपिष्ठा देवता १८२
वायुश्चान्तरिक्ष १०५, २७०, २८७
वायोरग्निः २७०, २७२
वालाग्रशतभागस्य २७७, ३९३
विकारजननीमज्ञां १९७, २११
विजानाम्यहंयत् १५६
विज्ञातारमरे ६७, ७६, १००, २०७, २७६
विज्ञानं चाविज्ञानं १२७, २१९
विज्ञानं प्रापकं ८३
विज्ञानं यज्ञं तनुते १२७, २७६, २८१
विज्ञान घन एव ६७, २०७, २११, ३९०, ३९१
विज्ञानमानन्दं ५६, १३७, १३९, २३३
विज्ञानमेकं ९३, ९४
विज्ञानसारथिर्यस्तु १५३, १९६
विज्ञायप्रज्ञां कुर्वीत ५२, १०३
विद्यां चाविद्यां च ५४
विद्यया हैवेते ३४१
विधिस्तु धारणे ३५५
विभेद जनके ५५, ८२, ८४
विमोकः कामानभि ५४
विरोधेत्वनपेक्षं २१७, २६६
विविदिषन्ति ५१, ११६, ३५७
विश्वंनारायणः २६९
विश्वमेवेदं पुरुषः ३४०
विश्वस्मा अग्निं १६१
विश्वात्मानं परायणं १२४
विष्टभ्याहं ७७, ८४, २९१, ३०९, ३९५
विष्णुशक्तिः परा ७८

Digitization by Arya Samaj Charitable Foundation, Chennai

विष्णोस्सकाशादु ८१, २१८, २३८
विष्ण्वाधारं यथा ९५
वीरहा वा एष देवानां ३५४
वृत्तात्कर्माधिगमात् ४९
वेणुरन्ध्रविभेदेन ५५, ८२
वेत्थ यथा केनासौ ३०१
वेत्थ यथा पञ्चम्यां २९५
वेदनमुपासनं ५३
वेदमधीत्य ३५३
वेदानिमं लोकममुं ११६
वेदान्तेषु यथासारं २६७
वेदाहं समतीतानि ७२
वेदाहमेतं पुरुषं ९५, १३९, १४३, २६५, ३४९
„ तमेव ३१५
वेदेन रूपे व्याकरोत् १८३
वैवस्वतं संगमनं ३००
वैश्वानरं द्वादशकपालं ३४६
वैश्वानरमुपास्ते ३१८
वैश्वानरस्य सुमतौ १६१
व्यक्तं विष्णुस्तथा १९५
व्यङ्क्तृव्यङ्ग्यत्व ६९
व्याधिभिः प्रतिपूर्णोस्मि १५५
व्याप्तिरूपेणसंबन्धः २६७
व्रीहिर्वा यवोवा १५०
शंनोमित्तश्शंवरुणः ३२८
शक्तयस्सर्वभावानां ८१, २४४
शक्तो हस्तिकवाय्योः २३८
शतं चैका च हृदयस्य ३७५, ३७८
शतायुषःपुत्रपौत्रान् ३०४
शब्दान्तरे कर्मभेदः ३४६
शमीमय्यस्त्रुचः १३४
शरीरजैःकर्मदोषैः ३०३
शान्त उपासीत ५४, १४७
शान्ताङ्गार इव ६९
शान्तोदान्तः ५१, ५४, ३६४
शास्त्रफलं प्रयोक्तरि ३६३
शुक्रं प्रविध्य ३२८
शुक्लकृष्णेगतीह्येते ३८०
शुचेर्दक्षश्च १८७
शुचौ देशेप्रतिष्ठाप्य ३६९
शुद्धे महाविभूत्याख्ये ७८
शुनिचैवश्वपाकेच ८२
शौनकोहवै महाशालो १६०
श्रद्धांसत्यमुपासते ३३२
श्रद्धात्वेव विजिज्ञासि १७०, ३३२
श्रावण्यां प्रौष्ठपद्यां ५०
श्रावयेच्चतुरोवर्णान् १८६
श्रुतं ह्येवमेवमे ११४, १६८
श्रुतिलिङ्गवाक्य ३४०
श्रूयतां चाप्यविद्याया ७२
श्रूयतां ९३
श्रोतव्योमन्तव्यः ११६, ३६४
श्वेतकेतुर्हारूणेय ३५६
श्वेतोश्वोहरिनीलो ३२८
षोडशकलम् ३१४
स आगच्छति विरजां ३३०
स आत्मानमुपासीत ३२५
स आपःप्रदुघे उभे ३१५
स इमाल्लोकानसृजत १४०
स ईक्षत लोकान्नु ७२, ७५, १२१, १४१
स ईक्षांचक्रे १२१
स ईश्वरोव्यष्टिसमष्टि ७८
स उत्तमःपुरुषः ६८, १७८
स एकधा भवति २२३, २२५, ३३१, ३९२
स एकाकीनरमेत २६५
स एको ब्रह्मण आनन्दः ७६, २७८, ३०९, ३५२, ३८७
स एको मानुष आनन्दः १३४
स एतं देवयानं ३३०, ३८१, ३८२, ३८३
स एनान् ब्रह्मगमयति ३८४
स एव सर्वभूतात्मा ९३
स एष इह प्रविष्टः २०३
स एष एव मृत्युर्य ३४३
स एष नेतिनेति २११, ३३७
स एष प्राण एव १४४
स एष रसानां रस ३५६
स एष वैश्वानरो १६२
स एष सर्वेश्वरः १३८
स एषोऽग्निर्वैश्वानरः १६३, १६४
स एषोन्तर्हृदयः १४७
स एषोन्तश्चरते १६६
संकर्षणात्प्रद्युम्न २६६
संघातपरार्थत्वात् २५२
संज्ञायतेयेन ७८
संन्यस्याग्निं न पुनः ३६२
संभर्तेति तथा भर्ता ७८
संयुक्तमेतत् १९७
संहितमेतच्छारीरकं ५०

Digitization by Arya Samaj Charitable Foundation, Chennai

सकारणं करणाधि ९८,११८,१३९, १४८,२३८,२४१,३५२
सकृत्प्रत्ययंकुर्यात् ५३
सक्रतुंकुर्वीत १५१
स खल्वेवं वर्तयन् ३४, ३७०, ३९५
स चानन्त्यायकल्पते १४८
स त आगम्यनावद्धुः १७६,३०६
स त आत्मान्तर्याम्य १५७,१५८, ३०८
स तत्र पर्येति ८३, २२५, ३०६, ३३१, ३९१
सतासोम्यतदा १२३, २०६,
सतासोम्यतदा १२३
सत्यं चानृतं च ९१, २१५
सत्यंज्ञानं ५१, ५५, ५६, ५७, ७५ १००, १०६, १११, ११३, ११५, १२०, १२५, १३९, १४६, १६९, २०३, २१४, २१५, २३१, २३४, २७८, ३०९, ३१५, ३२३, ३३२, ३३४
सत्यंत्वेत्रविजिज्ञा १६९, ३३२
सत्यंब्रह्म ३२६
सत्यंब्रह्मेत्युपासीत ३२५
सत्यंब्रुयात् ३७६
सत्यकामस्सत्य- ५७, २४५, २७६
सत्यार्जवदया ५४
सत्येनलभ्यः ५४
सत्वं रजस्तमइति १९८
सत्वमग्निं स्वर्ग्यं १९६
सत्वात्संजायते ज्ञानं ५४
सदा तद्भावभावितः ५४
सदेव सोम्य ५१, ५५, ५८, ७५, " ९९, १०१, १०६, १११, ११३, १२१, १२८, १२९, १३९, १४०, १८२, २०२, २१२, २२९, २३५, २३६, २३७, २३९, २४२, २४३, २४६, २६५, २७१, २८७, ३९४
सद्भावएवं भवतो ५६, ९३, ९४
सन्ततं सिराभिस्तु १६६
सन्ध्यं तृतीय स्वप्न ३०४
सन्ध्याहीनोशुचिः २९९
सन्मूलास्सोम्य ९६, ९९, १२४, १२९, २३५, २७४, ३६७
सपर्यगाच्छुक्रमकायं ११४
सप्त इमेलोकायेषु २८७
सप्तवैशीर्षण्याः २८८
सब्रह्मविद्यां सर्व १५९
सब्राह्मणःकेनस्यात् ३६४
सभूरितिव्याहरत् १८३
समएभिस्त्रिभिः २९०
समयाविषिते सूर्ये ३२९
समस्तकल्याण ७८, ८२, ३०७
समस्तशक्तिरूपाणि ७८, १३९
समस्तहेयरहितं ३०७
समस्ताश्शक्तयश्चैताः ७८, ७९, १३९
समाने वृक्षे पुरुषो ९९, १६७, २१९
समेत्यान्योन्य ३७५
समेशुचौशर्करा ३७७
स य इदमविद्वान् १६५
स य एतदेवममृतं १८५
स यथा प्रयोग्य आचरणे १७८
स यथा महाराजः २८०
स यथार्द्रैधाग्नेः २१०
स यथा सर्वासामपां २१०
स यथा सैन्धवघनः ६७, २१०, ३९०
स यदा प्रातिबुध्यते २०४
स यादि पितृलोककामः २२५,३९१
स योनाम ब्रह्मेत्युपास्ते ३६८
सयौहवैतद्भगवन् १७४
सयोहवैतन्महद्यक्षं ३३६
सयोहैतदेवंवेद ३४३
सयोहैतमेवमग्निं १६३
सर्वं खल्विति १४९
सर्वं खल्विदं ७७, ९६, १०१, १४७, १४८, १५१, १९३, २१२, २३६, २६९, २७४, ३३६, ३५०, ३६७, ३८९
सर्वं तं परादात् १०१, २०७, २१२, २३६
सर्वं ह पश्यः पश्यति ३०६, ३९३
सर्वं हीदं प्राणेनावृतं २९०
सर्वकर्मासर्वगन्धः ३३३
सर्वगतं सुसूक्ष्मं १५०
सर्वगत्वादनन्तस्य १४५
सर्वज्ञस्सर्वकृत् ३१०

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वत एवमेतदन्न १८७
सर्वत्रासौ समस्तं च ७८
सर्वभूतानि कौन्तेय ९९, १९८
सर्ववर्णानां स्वधर्मा ३०३
सर्वस्य चाहं हृदि ८४, १५०, १९४, २८२
सर्वस्यवशी ३३७
सर्वस्याधिपतिः १९२
सर्वांश्च लोकानाप्नोति १७९
सर्वाणि ... प्राणं १४२, १४८
सर्वाणि रूपाणि १२४, १३९, १९२
सर्वाणि ह वा इमानि १४०
सर्वाणि ह वा इमानि भूतान्या १७७, २८७
सर्वान्कामान् छन्दतः ३०४
सर्वाहवैदेवताः २२०
सर्वेचैतेवशंयान्ति ३००
सर्वेनिमेषाजज्ञिरे ९५, १३९, ३१५
सर्वे पाप्मानः प्रदूयन्ते ३७१
सर्वे पाप्मानोतो ३७१
सर्वे वेदायत्पदं १९६
सर्वेषांतु सनामानि १८३
सर्वेषु च नृपश्रेष्ठ २६९
सर्वेषु लोकेषु च ३९५
स वा एष एतेन दिव्येन १७८
स वा एष एवं पश्यन् १६९, १७०
स वा एष दिव्येन ३९३
स वा एष पुरुषो १२५
स वा एष महानज १९३, २११, २१४, २७७, ३१४, ३१६, ३३७
सवै वेदितव्यः २०४
स सर्व भूतप्रकृतिं ७७, ८२
स सर्वेषु लोकेषु १६२
स सेतुर्विधृतिरेषां १७७
स स्वराडभवति ५०, ३०६, ३३१, ३४५, ३९१, ३९४
सह ब्रह्मणाविपश्चिता २७८
सह संजिहान एव १८७
सहस्रशीर्षं देवं ३४०
सहोपलम्भनियमात् २६१
सहोवाच किं मे ३२५
सहोवाचप्राणोस्मि १४४
सहोवाचैतद्वैतदक्षरं १७२
सांख्यं योगं पञ्चरात्रं २६८, २६९
साक्षाद्द्रष्टरि ७१
साङ्गेषु वेदेषु निष्ठां २६७
साधुकारी साधुर्भवति २४६
सिद्धं तूपासनशब्दात् ५३
सुखं त्वेवविजिज्ञासि १७०
सुर्पा सुलुक् १९४
सुहृदस्साधुकृत्यां ३७२
सूर्याचन्द्रमसौधाता १९९, २१५, २४६
सृष्ट्वा नारं तोयमन्तः १८४
सेयं देवतेमास्तिस्रो २९३
सैयं देवतैक्षत ७५, २३६, २९२, २९३, ३३६
सैषानन्दस्य मीमांसा १२७
सैषानस्तमितादेवता २८७
सोकामयत ९९, १००, १३५, १३६, १३८, २०३, २१३, २१५, २६५, ३१५, ३२४
सोध्वनः पारमाप्नोति १५२
सोन्वेष्टव्यस्स १०३, ११३
सोभिध्याय शरीरात् १८४, २१६, २१७, २२३, २३८
सोरोदीत् ३५७
सोविद्याग्रन्थिं १६०
सोश्नुते सर्वान् कामान् ७६, ८३, ११८, २०३, ३८९, ३९६
सोहं भगवस्सत्येन १६९
सोहं भगवो मन्त्रवित् २६७
सोहं सचत्वं ५५, ८२
सोहमिच्छामि ८०
स्तब्धोस्युततमादेशं २१२, २३५
स्वप्नान्तं मे सोम्य १२३
स्वर्गकामो यजेत ३०३
स्वाध्यायो ध्येतव्यः ५०
हन्ताचेन्मन्यते २८०
हन्ताहमिमांस्तिस्रो ७२, ९९, १२२, १२९, २२०, ३१३
हन्तिपाप्मानं ३३६
हितानामनाद्यः २०४
हिरण्यशरीर ऊर्ध्वं ३०३
हिरण्येन षोडशिनः ३२९
हृदयं गार्हपत्यः १६३
हृदामनीषामनसा ११६, १४८
हृदि ह्ययमात्मा २७७
होतृषदनाद्धैवापि ३४८

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मसूत्राणामकारादिसूची

[संख्या—सूत्रसंख्या]

अंशोनाना	२५८
अकरणत्वा	२७८
अक्षरधि	३८७
अक्षरमम्ब	७४
अग्निहोत्रादि	४८५
अग्न्यादिगति	२९१
अङ्गावबद्धाः	४०७
अङ्गित्वानुप	१८०
अङ्गेषु यथा	४१३
अचलत्वं चा	४७८
अणवश्च	२७४
अणुश्च	२८०
अत एव च नि	९३
अत एव च स	४८
अत एव चाग्नी	४४३
अत एव चान	५३२
अत एव चो	३३२
अत एव न	६०
अत एव प्राणः	२४
अत एव सर्वा	४९०
अतः प्रबोधः	३२२
अतश्चायने	५०७
अतस्त्वितर	४५७
अतिदेशाच्च	३९९
अतोनन्तेन	३३९
अतोऽन्यापि	४८६
अत्ताचराचर	४१
अथातो ब्रह्म	१
अदृश्यत्वादि	५४
अदृष्टानियमात्	२६६
अधिकंतु भेद	१६०
अधिकाररूप	२२९
अधिकोपदेशात्तु	४२६
अधिष्ठानानुपपत्तेश्च	२१०
अध्ययनमात्रवतः	४३०
अनभिभवं च	४५३
अनवस्थितेरसंभ	५०
अनारब्धकार्ये	४८४
अनाविष्कुर्वन्	४६७
अनावृत्तिश्शब्दात्	५४५
अनियमस्सर्वेषां	३८६
अनिष्टादिकारिणाम	२९९
अनुकृतेस्तस्यच	८६
अनुज्ञापरिहारौ	२६३
अनुपपत्तेस्तु न	३५
अनुबन्धादिभ्यः	४०२
अनुष्ठेयं	४३७
अनुस्मृतेर्बादरिः	६३
अनुस्मृते श्च	१९८
अनेन सर्वगत	३५०
अन्तर उपपत्तेः	४५
अन्तरा चापि	४५४
अन्तरा भूत	३८९
अन्तरा विज्ञान	२३२
अन्तर्याम्यधि	५१
अन्तवत्त्वमस	२१२
अन्तस्तद्धर्मो	२१
अन्त्यावस्थिते	२०८
अन्यत्राभावा	१७८
अन्यथात्वं	३६०
अन्यथानुमितौ	१८१
अन्यथानुमेय	१५०
अन्यभावव्यावृत्तेः	७६
अन्याधिष्ठिते	३११
अन्यार्थं तु	१२७
अन्यार्थश्च	८४
अन्वयादिति	३७१
अपरिग्रहाच्चा	१९०
अपि चैवमेके	३२७
अपि संराधने	३३७
अपि सप्त	३०२
अपि स्मर्यते	८७
”	२६०
”	४४८
”	४५५
अपीतौ तद्वत्	१४६
अप्रतीकालम्बना	५२२
अबाधाच्च	४४७
अभावं बादरि	५३३
अभिध्योपदेशा	१३३
अभिमानिव्यप	१४३
अभिव्यक्तेरित्या	६२
अभिसंध्यादि	२६७
अभ्युपगमे	१८२
अम्बुवदग्रहणा	३३३
अरूपवदेव	३२८
अर्चिरादिना	५०९
अर्भकौकस्त्वा	३९
अल्प श्रुतेरिति	८५
अवस्थितिवैशे	२४१

Digitization by Arya Samaj Charitable Foundation, Chennai

अवस्थितेरिति	१३१	आनन्दादयः	३६५	उपमर्दं च	४३४
अविभागेन दृष्ट	६२७	आनर्थक्यमिति	२९७	उपलब्धिवदनियमः	२५२
अविभागोवचनात्	५०३	आनुमानिक	११०	उपसंहारदर्श	१६२
अविरोधश्चन्दन	२४०	आपः	२२७	उपसंहारो	३५९
अशुद्धमितिचेन्न	३१२	आप्रयाणात्तत्र	४८१	उपस्थितेऽत	३९४
अश्मादिवच्च	१६१	आभासाएवच	२६५	उपादानाद्विहारो	२५०
अश्रुतत्वादिति	२९३	आमनन्तिचैन	६५	उभयथाच	१८९
असतिप्रतिज्ञोप	१९४	आर्त्विज्यमित्यौडु	४६३	उभयथाच	१९६
असदितिचेन्न	१४५	आवृत्तिरसकृदुप	४७०	उभयथाऽपि	१८५
असद्व्यपदेशा	१५६	आसीनस्संभवात्	४७६	उभयव्यपदे	३४०
असन्ततेश्चा	२६४	आहचतन्मात्रं	३३०	उभयेपिहि	५३
असंभवस्तु	२२५	इतरेत्वर्थसामा	३६७	ऊर्ध्वरेतस्सुच	४३५
असार्वत्रिकी	४२८	इतरपरामर्शात्	८२	एक आत्मनश्शरीरे	४०५
अस्तितु	२१८	इतरव्यपदेशा	१५९	एतेन मातरिश्वा	२२४
अस्मिन्नस्यच	२०	इतरस्याप्येवम	४८३	एतेन योगः प्रत्युक्तः	१४१
अस्यैवचोपपत्ते	४९९	इतरेतरप्रत्यय	१९२	एतेन शिष्टा	१५१
आकाशस्तल्लिङ्गात्	२३	इतरेषांचानुपल	१४०	एतेन सर्वे व्याख्या	१३८
आकाशेचाविशेषात्	१९७	इयदामननात्	३८८	एवंचात्माका	२०६
आकाशोऽर्थान्तरा	१०७	ईक्षतिकर्म	७७	एवमप्युपन्यासात्	५३०
आचारदर्शनात्	४२१	ईक्षतेर्नाशब्दम्	५	एवं मुक्तिफला	४६९
आतिवाहिकास्त	५१२	उत्क्रमिष्यत	१३०	ऐहिकमप्रस्तुत	४६८
आत्मकृतेः	१३५	उत्क्रान्तिगत्या	२३६	कम्पनात्	१०५
आत्मगृहीति	३७०	उत्तरत्रचैत्ररथेन	१००	करणवच्चेन्न	२११
आत्मनिचैवं	१६६	उत्तराच्चैदावि	८३	कर्ता शास्त्रार्थ	२४९
आत्मशब्दाच्च	३६९	उत्तरोत्पादेच	१९३	कर्मकर्तृव्यप	३६
आत्माप्रकरणात्	५२६	उत्पत्त्यसंभवात्	२१३	कल्पनोपदेशा	११९
आत्मेतितूपगच्छन्ति	४७२	उदासीनानामपि	२००	कामकारेण	४३३
आदरादलोपः	३९३	उपदेशभेदान्नेति	२८	कामाच्चनानुमा	१९
आदित्यादिमतय	४७५	उपपत्तेश्च	३४८	कामादीतरत्र	३९२
आध्यानायप्रयोजना	३६८	उपपन्नस्तल्लक्ष	३८४	काम्यास्तुयथा	४१२
आनन्दमयोभ्यासात्	१३	उपपूर्वमपीत्येके	४६०	कारणत्वेन चाका	१२३

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यंबादरिराह ५१४
कार्याख्यानाद ३७२
कार्यात्यये तद ५१७
कृतप्रयत्नापेक्ष २५७
कृतात्ययेऽनुशय २९५
कृत्स्नप्रसक्ति १६४
कृत्स्नभावात्तु ४६५
क्षत्रियत्वगतेश्च ९९
गतिशब्दाभ्यां ७९
गतिसामान्यात् ११
गतेरर्थवत्व ३८३
गुणसाधारण्य ४१६
गुणाद्वालोकवत् २४२
गुहां प्रविष्टा ४३
गौणश्चेन्नात्म ६
गौण्यसंभवाच्छ २१९
गौण्यसंभवात्त २७०
चक्षुरादिवत्तु २७७
चमसवदविशेषात् ११७
चरणादिति चेन्न २९६
चराचर व्यपाश्रयः २३३
चितितन्मात्रेण ५२९
छन्दत उभयावि ३८२
छन्दोभिधानान्ने २६
जगद्वाचित्वात् १२५
जगद्व्यापारवर्जं ५४०
जन्माद्यस्य २
जीवमुख्यप्राण १२६
जीवमुख्यप्राण ३२
ज्ञेयत्वावचनाच्च ११३
ज्ञात एव २३५
ज्योतिराद्यधिष्ठा २८१
ज्योतिर्दर्शनात् १०६
ज्योतिरुपक्रमा ११८
ज्योतिश्चरणाभि २५
ज्योतिषि भावा ९६
ज्योतिषैकेषाम १२२
त इन्द्रियाणि २८३
तच्छ्रुतेः ४२२
तडितोऽधिवरुण ५११
तत्तुसमन्वयात् ४
तत्पूर्वकत्वाद्वाचः २७१
तत्रापि तद्व्यापारा ३०३
तत्स्वाभाव्यापत्ति ३०९
तथाचैकवाक्यो ४४२
तथान्यप्रतिषेधा ३४९
तथा प्राणाः २६९
तदधिगम उत्तर ४८२
तदधीनत्वादर्थवत् ११२
तदनन्यत्वमा १५३
तदन्तरप्रतिपत्तौ २८८
तदभावनिर्धारणे १०२
तदभावो नाडीषु ३२१
तदभिध्याना २३०
तदव्यक्तमाह ३३६
तदापीतेस्संसार ४९६
तदुपर्यपि ९०
तदोकोग्रज्वलनं ५०४
तद्गुणसारत्वात् २४५
तद्धेतुव्यपदेशा १५
तद्भूतस्य तुनात ४५८
तद्वतोविधानात् ४२४
तन्निर्धारणानि ३९५
तन्निष्ठस्यमोक्षो ७
तन्मनः प्राण ४९१
तन्वभावे ५३६
तर्काप्रतिष्ठा १४९
तस्यचनित्यत्वा २८२
तानिपरे ५०२
तुल्यं तु दर्श ४२७
तृतीयशब्दाव ३०८
तेजोतस्तथा २२६
त्रयाणामेव ११५
त्र्यात्मकत्वात्तु २८९
दर्शनाच्च ३०७
दर्शनाच्च ४१८
दर्शनाच्च ५२०
दर्शयतश्चैवं ५४३
दर्शयति च ३५८
दर्शयति च ३७६
दर्शयतिचाथो ३३१
दहरउत्तरेभ्यः ७८
दृश्यते तु १४४
देवादिवदपि १६३
देहयोगाद्वासोपि ३१९
द्युभ्वाद्यायतनं ६६
द्वादशाहवत्त ५३५
धर्मं जैमिनिरत ३५३
धर्मोपपत्तेश्च ७३
धृतेश्चमहिम्नो ८०
ध्यानाच्च ४७७
न कर्माविभागा १७३
न च कर्तुः करणं २१४

न च कार्ये प्रत्यभि ५२१
न च पर्यायादपि २०७
न च स्मार्तमत ५२
न चाधिकारिक ४५९
न तु दृष्टान्त १४७
न तृतीये तथोप ३०५
न प्रतीकेन हि सः ४७३
न प्रयोजन १७०
न भावोऽनुप २०३
न वक्तुरात्मोप ३०
न वा तत्सह ४१७
न वा प्रकरण ३६१
न वायुक्रिये २७६
न वा विशेषात् ३७५
न वियदश्रुतेः २१७
न विलक्षणत्वा १४२
न संख्योपसंग्रहा १२०
न सामान्या ४०३
न स्थानतोपि ३२५
नाणुरतच्छ्रुतेः २३८
नातिचिरेण ३१०
नात्माश्रुतेः २३४
नानाशब्दादि ४१०
नानुमानमत ६८
नाभावउप २०१
नाविशेषात ४३१
नासतोदृष्टत्वात् १९९
नित्यमेव च भावात् १८७
नित्योपलब्ध्य २४८
नियमात् ४२५
निर्मातारं ३१६
निशिनेति ५०६
नेतरोनुपपत्तेः १७
नैकस्मिन् दर्श ४९४
नैकस्मिन्नसंभवात् २०५
नोपमर्देनातः ४९८
पञ्चवृत्तिर्मनो २७९
पटवच्च १५७
पत्यादिशब्देभ्यः १०९
पत्युरसामञ्ज २०९
पयोम्बुवच्चेत् १७६
परं जैमिनिर्मुख्य ५१९
परमतस्सेतू ३४४
परात्तुतच्छ्रुतेः २५६
पराभिध्यानात्तु ३१८
परामर्श ४३६
परिणामात् १३६
परेणचशब्दस्य ४०४
पारिप्लवार्था ४४१
पुंस्त्वादिवत्त्व २४७
पुरुषविद्यायामपि ३७८
पुरुषार्थोतः ४१९
पुरुषाश्मवदिति १७९
पूर्वं तु बादरायण ३५४
पूर्ववद्वा ३४२
पूर्वविकल्पः ३९८
पृथगुपदेशात् २४४
पृथिवी २२८
प्रकरणाच्च ४२
प्रकरणात् ७०
प्रकाशवच्चा ३२९
प्रकाशादिवच्चा ३३८
प्रकाशादिवत्तु २६१
प्रकाशाश्रय ३४१
प्रकृतिश्च १३२
प्रकृतैतावत्त्वं ३३५
प्रतिज्ञाविरोधात् ९
प्रतिज्ञासिद्धेः १२९
प्रतिज्ञाहानि २२१
प्रतिषेधाच्च ३४३
प्रतिषेधादिति ५००
प्रतिसंख्याप्रति १९५
प्रत्यक्षोपदेशा ५४१
प्रथमे श्रवणा २९२
प्रदानवदेव ३९६
प्रदीपवदावे ५३८
प्रदेशभेदादिति २६८
प्रसिद्धेश्च ८१
प्राणगतेश्च २९०
प्राणस्तथानु २९
प्राणादयो १२१
प्रियशिरस्त्वा ३६६
फलमत उपपत्तेः ३५१
बहिस्तूभयथा ४६१
बुद्ध्यर्थः पाद ३४६
ब्रह्मदृष्टिरु ४७४
ब्राह्मेणजैमिनि ५२८
भाक्तं वानात्म २९४
भावं जैमिनिः ५३४
भावं तु बादरायण ९७
भावशब्दाच्च ४४०
भावेचोपलब्धेः १५४
भावेजाग्रद्वत् ५३७

Digitization by Arya Samaj Charitable Foundation, Chennai

भूतादिपादव्यप २७
भूतेषु तच्छ्रुतेः ४९३
भूमासंप्रसादा ७२
भूम्नः क्रतुव ४०९
भेदव्यपदेशाच्च १८
भेदव्यपदेशाच्चा २२
भेदव्यपदेशात् ६९
भेदश्रुतेर्वैलक्षण्यात् २८४
भेदादितिचेन्न ३२६
भेदान्नेति चेन्नैक ३५६
भोक्त्रापत्तेर १५२
भोगमात्रसाम्य ५४४
भोगेनत्वितरे ४८८
मध्वादिष्वसंभवा ९५
मन्त्रवर्णात् २५९
मन्त्रादिवद्वा ४०८
महद्वच्च ११६
महद्दीर्घवद्वा १८४
मांसादिभौमं २८६
मांत्रवर्णिक १६
मायामात्रं तु ३१७
मुक्तः प्रतिज्ञा ५२५
मुक्तोपसृप्य ६७
मुग्धेर्धसंप ३२४
मौनवदितरेषा ४६६
यत्रैकाग्रता ४८०
यथाचतक्षो २५५
यथा च प्राणादिः १५८
यदेवविद्ययेति ४८७
यावदधिकार ३८५
यावदात्मभावि २४६
यावद्विकारं २२३
योगिनः प्रति ५०८
योनिश्च हि १३७
योनेश्शरीरम् ३१४
रचनानुपपत्तेः १७५
रश्म्यनुसारी ५०५
रूपादिमत्त्वाच्च १८८
रूपोपन्यासा ५६
रेतस्सिग्योगो ३१३
लिङ्गभूयस्त्वा ३९७
लिङ्गाच्च ४७१
लोकवत्तुलीला १७१
वदतीतिचेन्न ११४
वाक्यान्वयात् १२८
वाङ्मनसिदर्श ४८९
वायुमब्दाद ५१०
विकरणत्वान्नेति १६९
विकल्पोविशिष्ट ४११
विकारशब्दान्न १४
विकारावर्ति च ५४२
विज्ञानादिभावे २१५
विद्याकर्मणो ३०४
विद्यैववत्तुनिर्धा ४००
विधिर्वाधारण ४३८
विपर्ययेणतु २३३
विप्रतिषेधाच्च २१६
विप्रतिषेधाच्चा १८३
विभागश्शतवत् ४२९
विरोधः कर्मणी ९१
विवक्षितगुणो ३४
विशेषं च दर्श ५२३
विशेषणभेद ५५
विशेषणाच्च ४४
विशेषानुग्रहाच्च ४५६
विशेषितत्वाच्च ५१५
विहितत्वाच्चा ४५०
वृद्धिह्रासभा ३३४
वेधाद्यर्थभे ३७९
वैद्युतेनैव ५१३
वैधर्म्याच्च न २०२
वैशेष्यात्तु २८७
वैश्वानरस्सा ५७
वैषम्यनैर्घृण्ये १७२
व्यतिरेकस्त ४०६
व्यतिरेकानव १७७
व्यतिरेकोगन्ध २४३
व्यतिहारोवि ३९०
व्यपदेशाच्च २५१
व्याप्तेश्च ३६३
शक्तिविपर्यया २५३
शब्दइतिचन्ना ९२
शब्दाविशेषात् ३७
शब्दश्चातो ४४९
शब्दादिभ्यो ५९
शब्दादेवप्रमि ८८
शब्देभ्यः २२२
शमदमाद्युपेत ४४५
शास्त्रदृष्ट्या ३२
शास्त्रयोनि ३
शिष्टेश्च ४१४
शुगस्यतदनादर ९८
शेषत्वात्पुरुषा ४२०

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रवणाध्ययना	१०३
श्रुतत्वाच्च	१२
श्रुतत्वाच्च	३५२
श्रुतेस्तुशब्द	१६५
श्रुतोपनिषत्कगत्य	४९
श्रुत्यादिबली	४०१
श्रेष्ठश्च	२७५
स एव तु कर्म	३२३
संयमनेत्वनु	३००
संस्कारपरा	१०१
संकल्पादेव	५३१
संज्ञातश्चैत	३६२
संज्ञामूर्तिक्लृप्ति	२८५
संपत्तेरिति	६४
संपद्याविर्भावः	५२४
संबन्धादेवम	३७४
संभृतिद्युव्या	३७७
संभोगप्राप्ति	४०
सत्त्वाच्चापरस्य	१५५
सन्ध्येसृष्टिराह	३१५
सप्तगतेः	२७२
समन्वारम्भणा	४२३
समवायाभ्युप	१८६
समाकर्षात्	१२४
समाध्यभावा	२५४
समानएवं	३७३
समाननाम	९४
समानाचासृ	४९५
समाहारात्	४१५
समुदाय उभय	१९१
सर्वत्रप्रसिद्धो	३३
सर्वथानुपपत्ते	२०४
सर्वथापि	४५२
सर्वधर्मोपप	१७४
सर्ववेदान्त	३५५
सर्वान्नानुमति	४४६
सर्वापेक्षा	४४४
सर्वाभेदा	३६४
सर्वोपेता	१६८
सहकारित्वेन	४५१
सहकार्य	४६४
साक्षाच्चोभ	१३४
साक्षादप्यविरो	६१
साचप्रशासनात्	७५
सामान्यात्तु	३४५
सामीप्यात्तु	५१६
साम्पराये	३८१
सुकृतदुष्कृते	२९८
सुखविशिष्टा	४७
सुषुप्त्युत्क्रान्त्यो	१०८
सूक्ष्मं तु तदर्ह	१११
सूक्ष्मं प्रमाणत	४९७
सूचकश्च हि	३२०
सैवहिसत्या	३९१
सोध्यक्षे	४९२
स्तुतयेनुमति	४३२
स्तुतिमात्र	४३९
स्थानविशेषा	३४७
स्थानादिव्यप	४६
स्थित्यदनाभ्यां	७१
स्मरन्ति च	२६२
स्मरन्ति च	३०१
स्मरन्ति च	४७९
स्मर्यते च	५०१
स्मर्यतेऽपि	३०६
स्मर्यमाणमनु	५८
स्मृतेश्च	३८
स्मृतेश्च	१०४
स्मृतेश्च	५१८
स्मृत्यनवकाश	१३९
स्याच्चैकस्य	२२०
स्वपक्षदोषा	१४८
स्वपक्षदोषा	१६७
स्वशब्दोन्मा	२३९
स्वात्मनाचो	२३७
स्वाध्यायस्य	३५७
स्वाप्ययसंप	५३९
स्वाप्ययात्	१०
स्वामिनः फल	४६२
हस्तादयस्तु	२७३
हानौतूपायन	३८०
हृद्यपेक्षया	८९
हेयत्वावचनाच्च	८

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मसूत्राधिकरणानामकारादिसूची ।

[संख्या—अध्याय–पाद–अधिकरणसंख्या]

अंशाधिकरणम्	२-३-७	आदित्यादिमत्य	४-१-४	चमसाधि	१-४-२
अक्षरध्यधि	३-३-१४	आनन्दमयाधि	१-१-६	जगद्वाचित्वा	१-४-५
अक्षराधि	१-३-३	आनन्दाद्यधि	३-३-४	जगद्व्यापारवर्जा	४-४-६
अग्निहोत्राद्यधि	४-१-१०	आनुमानिका	१-४-१	जन्माद्यधि	१-१-२
अग्नीन्धनाद्यधि	३-४-४	आप्रयाणाधि	४-१-६	जिज्ञासाधि	१-१-१
अङ्गावबद्धाधि	३-३-२२	आरम्भणाधि	२-१-६	ज्ञाधिकरणम्	२-३-४
अत्त्रधिकरणम्	१-२-२	आवृत्त्यधि	४-१-१	ज्योतिरधि	१-१-१०
अदृश्यत्वादि	१-२-५	आसीनाधि	४-१-५	ज्योतिराद्यधि	२-४-६
अध्यक्षाधि	४-२-३	आसृत्युपक्रमा	४-२-५	तत्स्वाभाव्या	३-१-४
अनारब्धकार्या	४-१-९	इतरक्षपणाधि	४-१-११	तदधिगमाधि	४-१-७
अनाविष्कारा	३-४-१३	इतरव्यपदेशा	२-१-७	तदन्तरप्रति	३-१-१
अनियमाधि	३-३-१३	इतराधि	४-१-८	तदभावाधि	३-२-२
अनिष्टादिकार्य	३-१-३	इन्द्रप्राणाधि	१-१-११	तदोकोधि	४-२-८
अन्तरधि	१-१-७	इन्द्रियाधि	२-४-७	तद्भूताधि	३-४-१०
अन्तरत्वाधि	३-३-१५	ईक्षतिकर्माधि	१-३-४	तन्निर्धारणा	३-३-१७
अन्तराधि	१-२-३	ईक्षत्यधि	१-१-५	तेजोधि	२-३-२
अन्तर्याम्यधि	१-२-४	उत्पत्त्यसंभवाधि	२-२-८	दक्षिणायना	४-२-११
अन्यथात्वाधि	३-३-२	उपलब्ध्यधि	२-२-४	दहराधि	१-३-५
अन्याधिष्ठिता	३-१-६	उपसंहारदर्श	२-१-८	देवताधि	१-३-७
अपशूद्राधि	१-३-९	उभयलिङ्गाधि	३-२-५	द्युभ्वाद्यधि	१-३-१
अभावाधि	४-४-५	एकस्मिन्नसं	२-२-६	नातिचिराधि	३-१-५
अर्चिराद्यधि	४-३-१	ऐहिकाधि	३-४-१४	निशाधिकरणम्	४-२-१०
अर्थान्तरत्वादि	१-४-१०	कर्त्रधिकरणम्	२-३-५	परसंपत्त्यधि	४-२-६
अविभागाधि	४-२-७	कर्मानुस्मृति	३-२-३	पराधिक	३-२-७
अविभागेनदृष्ट	४-४-२	कामाद्यधि	३-३-१६	परायत्ताधि	२-३-६
अहिकुण्डलाधि	३-२-६	कारणत्वाधि	१-४-४	पशुपत्यधि	२-२-७
आकाशाधि	१-१-८	कार्याख्यानाधि	३-३-५	पारिप्लवाधि	३-४-३
आतिवाहिकाधि	४-३-४	कार्याधिकरणम्	४-३-५	पुरुषविद्याधि	३-३-९
आत्मत्वोपासना	४-१-२	कृतात्ययाधि	३-१-२	पुरुषार्थाधि	३-४-१
आत्माधिकरणम्	२-३-३	कृत्स्नप्रसक्त्यधि	२-१-९	पूर्वविकल्पा	३-३-२०

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकृत्यधि १-४-७
प्रतीकाधि ४-१-३
प्रदानाधि ३-३-१८
प्रमिताधि १-३-६
प्रयोजनवत्त्वा २-१-१०
प्राणाणुत्वा २-४-३
प्राणाधिक १-१-९
प्राणोत्पत्त्य २-४-१
फलाधिक ३-२-८
ब्राह्माधिक ४-४-३
भूताधि ४-२-४
भूमज्याय ३-३-२३
भूमाधि १-३-२
भोक्त्रापत्त्यधि २-१-५
मध्वधि १-३-८
मनोधि ४-२-२
महद्दीर्घाधिकर २-२-२
मुक्तिफलाधि ३-४-१५
मुग्धाधि ३-२-४
यथाश्रयभावा ३-३-२६
योगप्रत्युक्त्यधि २-१-२
रचनानुपपत्त्य २-२-१
रश्म्यनुसाराधि ४-२-९
लिङ्गभूयस्त्वा ३-३-१९
वरुणाधि ४-३-३
वाक्यान्वया १-४-६
वागधिक ४-२-१
वायुक्रिया २-४-४
वाय्वधिक ४-३-२
विकल्पाधि ३-३-२५
विधुराधि ३-४-९
वियदधि २-३-१
विलक्षणत्वा २-१-३
विहितत्वाधि ३-४-८
वेधाद्यधि ३-३-१०
वैश्वानरा १-२-६
शब्दादिभेदा ३-३-२४
शमदमाद्य ३-४-६
शरीरेभावा ३-३-२१
शास्त्रयोनित्वा १-१-३
शिष्टापरिग्रहा २-१-४
श्रेष्ठाणुत्वाधि २-४-५
सकल्पाधि ४-४-४
संख्योपसंग्रहा १-४-३
संज्ञामूर्ति २-४-८
संपद्याविर्भा ४-४-१
संबन्धाधि ३-३-७
संभृत्यधि ३-३-८
सन्ध्याधि ३-२-१
सप्तगत्यधि २-४-२
समन्वयाधि १-१-४
समानाधि ३-३-६
समुदायादि २-२-३
सर्वत्रप्रसि १-२-१
सर्वथानुप २-२-५
सर्ववेदान्त ३-३-१
सर्वव्याख्याना १-४-८
सर्वान्नानुमत्य ३-४-७
सर्वापेक्षा ३-४-५
सर्वाभेदा ३-३-३
सहकार्यन्त ३-४-१२
साम्पराया ३-३-१२
स्तुतिमात्रा ३-४-२
स्मृत्यधि २-१-१
स्वाम्यधि ३-४-११
हान्यधि ३-३-११

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीरस्तु ॥

श्रियः कान्ताय नमः ।

श्रीमते रामानुजाय नमः ।

श्रीभगवद्रामानुजग्रन्थमालायां

श्रीवेदान्तदीपः ॥

श्रियःकान्तोऽनन्तो वरगुणगणैकास्पदवपुः हताशेषावद्यः परमखपदो वाङ्मनसयोः ।
अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ॥
प्रणम्य शिरसाऽऽचार्यांस्तदादिष्टेन वर्त्मना । ब्रह्मसूत्रपदान्तस्स्थवेदान्तार्थः प्रकाश्यते ॥

अत्रेयमेव हि वेदविदां प्रक्रिया— अचिद्वस्तुनः स्वरूपतः स्वभावतश्चात्यन्तविलक्षणः तदात्मभूतः चेतनः प्रत्यगात्मा । तस्मात् बद्धान्मुक्तान्नित्याच्च निखिलहेयप्रत्यनीकतया कल्याणगुणैकतानतया च, सर्वावस्थचिदचिद्व्यापकतया धारकतया नियन्तृतया शेषितया च अत्यन्तविलक्षणः परमात्मा । यथोक्तं भगवता—

* द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ * इति । श्रुतिश्च— * प्रधानक्षेत्रज्ञपतिर्गुणेशः * पतिं विश्वस्याऽऽत्मेश्वरम् * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः * इत्यादिका । कूटस्थः— मुक्तस्वरूपम् , * ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ इत्यादिव्यपदेशात् । सूत्रकारश्चैवमेव वदति— * नेतरोऽनुपपत्तेः * भेदव्यपदेशात् * अनुपपत्तेस्तु न शारीरः * कर्मकर्तृव्यपदेशाच्च * शब्दविशेषात् * संभोगप्राप्तिरितिचेन्न वैशेष्यात् * न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च * उभयेऽपि हि भेदेनैनमधीयते * विशेषणभेदव्यपदेशाभ्यां च नेतरौ * मुक्तोपसृप्यव्यपदेशाच्च * स्थित्यदनाभ्यां च * इतरपरामर्शात्स इति चेन्नासंभवात् * उत्तराच्चेदाविर्भूतस्वरूपस्तु * सुषुप्त्युत्क्रान्त्योर्भेदेन * पत्यादिशब्देभ्यः * अधिकं तु भेदनिर्देशात् * अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् * जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च * भोगमात्रसाम्यलिङ्गाच्च * इत्यादिभिः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न चाविद्याकृतमुपाधिकृतं वा भेदमाश्रित्यैते निर्देशाः, * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * मुक्तोपसृप्यव्यपदेशाच्च * उत्तराच्चेदाविर्भूतस्वरूपस्तु * संपद्याविर्भावस्स्वेनशब्दात् * जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च * भोगमात्रसाम्यलिङ्गाच्च * इति सर्वाविद्योपाधिविनिर्मुक्तमधिकृत्यैव भेदोपपादनात् ।

श्रुतिस्मृतिसूत्रेषु सर्वत्र भेदे निर्दिष्टे चिदचिदीश्वरस्वरूपभेदः स्वाभाविको विवक्षित इति निश्चीयते । * सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत * वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं, * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो * क्षेत्रज्ञं चापि मां विद्धि * तदनन्यत्वमारम्भणशब्दादिभ्यः * इति परस्य ब्रह्मणः कारणत्वम्, कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य कार्यत्वम्, कारणात्कार्यस्यानन्यत्वं चोच्यमानमेवमेवोपपद्यते । सर्वावस्थस्य चिदचिद्वस्तुनः परमात्मशरीरत्वम्, परमात्मनश्चाऽऽत्मत्वम्, * यः पृथिव्यां तिष्ठन्....यस्य पृथिवी शरीरम्, * य आत्मनि तिष्ठन्....यस्याऽऽत्मा शरीरं....य आत्मानमन्तरो यमयति * यस्याव्यक्तं शरीरं–यस्याक्षरं शरीरं–यस्य मृत्युः शरीरम्, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा * इत्यादिश्रुत्यैवोपदिष्टमिति सूक्ष्मचिदचिद्वस्तु(विशिष्टः)शरीरः परमात्मा कारणम्, स एव परमात्मा स्थूलचिदचिद्वस्तुशरीरः कार्यमिति कारणावस्थायां कार्यावस्थायां च चिदचिद्वस्तुशरीरकतया तत्प्रकारः परमात्मैव सर्वशब्दवाच्य इति परमात्मशब्देन सर्वशब्दसामानाधिकरण्यं मुख्यमेवोपपन्नतरम् । * अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि * तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत् * इत्यादि श्रुतिरेवेममर्थमुपपादयति । सर्वमात्मतयाऽनुप्रविश्य तच्छरीरत्वेन सर्वप्रकारतया स एव सर्वशब्दवाच्यो भवतीत्यर्थः । * बहु स्यामिति बहुभवनसङ्कल्पोऽपि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरकतयैकधाऽवस्थितस्य विभक्तनामरूपचिदचिच्छरीरकतया बहुप्रकारताविषय इति (वेदवित्प्रक्रिया) ॥

ये पुनः निर्विशेषकूटस्थस्वप्रकाशनित्यचैतन्यमात्रं ब्रह्म ज्ञातव्यतयोक्तमिति वदन्ति, तेषां * जन्माद्यस्य यतः * शास्त्रयोनित्वात् * तत्तु समन्वयात् * ईक्षतेर्नाशब्दम् * इत्यादेः, * जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च * भोगमात्रसाम्यलिङ्गाच्च * अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् * इत्यन्तस्य सूत्रगणस्य ब्रह्मणो जगत्कारणत्वबहुभवनसङ्कल्परूपेक्षणाद्यनन्तविशेषप्रतिपादनपरत्वात्सर्वं सूत्रजातम्, सूत्रकारोदाहृताः * यतो वा इमानि भूतानि जायन्ते * तदैक्षत बहु स्यां प्रजायेयेति * इत्याद्यास्सर्वश्रुतयश्च न सङ्गच्छन्ते । अथोच्येत— * येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय * यथा सोम्यैकेन मृत्पिण्डेनेत्येकमृत्पिण्डारब्धघटशरावादीनां तन्मृत्पिण्डादनन्यद्रव्यतया तज्ज्ञानेन तेषां ज्ञाततेव, ब्रह्मज्ञानेन तदारब्धस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

कृत्स्नस्य चिदचिदात्मकस्य जगतस्तस्मादनतिरिक्तवस्तुतया ज्ञातता संभवतीत्युपपाद्य, * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमितीदंशब्दवाच्यस्य चिदचिदात्मकप्रपञ्चस्य सृष्टेः प्राक् निखिलभेदप्रहाणेन सच्छब्दवाच्यैनैकतापत्तिं घटशरावाद्युत्पत्तेः प्रागुत्पादकमृत्पिण्डैकतापत्तिवदभिधाय, * तदैक्षत बहु स्यामिति तदेव सच्छब्दवाच्यं ब्रह्म चिदचिदात्मकप्रपञ्चरूपेणात्मनो बहुभवनमेकमृत्पिण्डस्य घटशरावादिरूपेण बहुभवनवत्सङ्कल्प्यात्मानमेव तेजःप्रभृतिजगदाकारेणासृजतेति चाभिधाय, * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि * इत्यभिधानात् ब्रह्मैकमेवाविद्याकृतेन पारमार्थिकेन वा उपाधिना संबद्धं देवादिरूपेण बहुभूतमिति वेदविद्भिरभ्युपगन्तव्यमिति : तदयुक्तम् ; * ज्ञाज्ञौ द्वावजावीशनीशौ * नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् * इत्यादिश्रुतिभिः जीवानामजत्वनित्यत्वबहुत्ववचनात् । यदि घटशरावादेरुत्पत्तेः प्रागेकीभूतस्य मृद्द्रव्यस्योत्पत्त्युत्तरकालभाविबहुत्ववत् सृष्टेः प्रागेकीभूतस्यैव ब्रह्मणस्सृष्ट्युत्तरकालीनं नानाविधजीवरूपेण बहुत्वमुच्येत ; तदा जीवामामजत्वनित्यत्वबहुत्वादि विरुध्येत ; सूत्रविरोधश्च, * इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति ब्रह्मैव देवमनुष्यादिजीव(स्व)रूपेण बहुभूतं चेदात्मनो हिताकरणादिदोषप्रसक्तिरित्युक्त्वा, * अधिकं तु भेदनिर्देशादिति जीवाद्ब्रह्मणोऽर्थान्तरत्वमुक्तम् । तथा च * वैषम्यनैर्घृण्ये न सापेक्षत्वात् * इति देवादिविषमसृष्टिप्रयुक्तपक्षपातनैर्घृण्ये जीवानां पूर्वपूर्वकर्मापेक्षत्वाद्विषमसृष्टेरिति परिहृते । तथा * न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च * इति, * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् * इति सृष्टेः प्रागविभागवचनात् सृष्टेः प्राग्जीवानामभावात्तत्कर्म न संभवतीति परिचोद्य, जीवानां तत्कर्मप्रवाहाणां चानादित्वादिति परिहृतम् । * नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः * इत्यात्मन उत्पत्त्यभावश्चोक्तो नित्यत्वं च स्वाभ्युपगमविरोधश्च । आमोक्षाज्जीवभेदस्यानादित्वं सर्वैरेव हि वेदान्तिभिरभ्युपगम्यते । अतश्श्रुतिविरोधात्सूत्रविरोधात्स्वाभ्युपगमविरोधाच्च सृष्टेः प्रागेकत्वावधारणं नामरूपविभागाभावाभिप्रायम् , नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशक्तिभेदसहं चेति सर्वैरभ्युपगम्यते । इयांस्तु विशेषः— अविद्यापरिकल्पनेऽप्युपाधिपरिकल्पनेऽपि ब्रह्मव्यतिरिक्तस्याविद्यासंबन्धिनश्चोपाधिसंबन्धिनश्चेतनस्याभावादविद्योपाधिसंबन्धौ, तत्कृताश्च दोषा ब्रह्मण एव भवेयुः— इति ।

सन्मात्रब्रह्मवादेऽपि प्राक्सृष्टेस्सन्मात्रं ब्रह्मैकमेव सृष्ट्युत्तरकालं भोक्तृभोग्यनियन्तृरूपेण त्रिधा भूतं चेत् , घटशरावमणिकवज्जीवेश्वरयोरुत्पत्तिमत्त्वमनित्यत्वञ्च स्यात् । अथैकत्वापत्तिवेलायामपि भोक्तृभोग्यनियन्तृशक्तित्रयमवस्थितमिति चेत् , किमिदं शक्तित्रयशब्दवाच्यमिति विवेचनीयम् । यदि सन्मात्रस्यैकस्यैव भोक्तृभोग्यनियन्तृरूपेण परिणामसामर्थ्यं शक्तित्रयशब्दवाच्यम् : एवं तर्हि मृत्पिण्डस्य घटशरावादिपरिणामसमर्थस्य तदुत्पादकत्वमिव ब्रह्मण ईश्वरादीनामुत्पादकत्वमिति तेषामनित्यत्वमेव । अथेश्वरादीनां सूक्ष्मरूपेणावस्थितिरेव शक्तिरित्युच्येत ; तर्हि तदतिरिक्तस्य सन्मात्रस्य ब्रह्मणः, प्रमाणाभावात्तदभ्युपगमे च तदुत्पाद्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

तयेश्वरादीनामनित्यत्वप्रसङ्गाच्च त्रयाणां नामरूपविभागानर्हसूक्ष्मदशापत्तिरेव प्राक्सृष्टेरेकत्वावधारणावसेयेति वक्तव्यम्। न तदा तेषां ब्रह्मात्मकत्वादेकत्वावधारणं विरुध्येत। अतस्सर्वावस्थावस्थितस्य चिदचिद्वस्तुनः ब्रह्मशरीरत्वश्रुतेस्सर्वदा सर्वशब्दैर्ब्रह्मैव तत्तच्छरीरकतया तत्तद्विशिष्टमेवाभिधीयत इति स्थूलचिदचिद्वस्तुविशिष्टं ब्रह्मैव कार्यभूतं जगत्, नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुविशिष्टं ब्रह्म कारणमिति तदेव मृत्पिण्डस्थानीयं * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् * इत्युच्यते : तदेव विभक्तनामरूपचिदचिद्वस्तुविशिष्टं ब्रह्म कार्यमिति सर्वं समञ्जसम्। श्रुतिन्यायविरोधस्तु तेषां भाष्ये प्रपञ्चित इति नेह प्रतन्यते॥

भाष्योदितोऽधिकरणार्थस्ससूत्रविवरणस्सुखग्रहणाय संक्षेपेणोपन्यस्यते। तत्र प्रथमे पादे प्रधानपुरुषावेव जगत्कारणतया वेदान्ताः प्रतिपादयन्तीत्याशङ्क्य सर्वज्ञं सत्यसङ्कल्पं निरवद्यं समस्तकल्याणगुणाकरं ब्रह्मैव जगत्कारणतया प्रतिपादयन्तीत्युक्तम्। द्वितीयतृतीयचतुर्थपादेषु कानिचिद्वेदान्तवाक्यानि प्रधानादिप्रतिपादनपराणीति तन्मुखेन सर्वाक्षेपमाशङ्क्य तान्यपि ब्रह्मपराणीत्युक्तम्। तत्रास्पष्टजीवादिलिङ्गकानि वाक्यानि द्वितीये निरूपितानि; स्पष्टलिङ्गकानि तृतीये; चतुर्थे तु प्रधानानादिप्रतिपादनच्छायानुसारीणीति विशेषः। अतः प्रथमेऽध्याये सर्वं वेदान्तवाक्यजातं सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तं ब्रह्मैव जगत्कारणतया प्रतिपादयतीति स्थापितम्। द्वितीयेऽध्याये तस्यार्थस्य दुर्धर्षणत्वप्रतिपादनेन द्रढिमोच्यते। तत्र प्रथमे पादे साङ्ख्यादिस्मृतिविरोधान्न्यायविरोधाच्च प्रसक्तो दोषः परिहृतः। द्वितीये तु साङ्ख्यादिवेदबाह्यपक्षप्रतिक्षेपमुखेन तस्यैवादरणीयता स्थिरीकृता। तृतीयचतुर्थयोर्वेदान्तवाक्यानामन्योन्यविप्रतिषेधादिदोषगन्धाभावख्यापनाय वियदादीनां ब्रह्मकार्यताप्रकारो विशोध्यते। तत्र तृतीये पादे च चिदचित्प्रपञ्चस्य ब्रह्मकार्यत्वे सत्यप्यचिदंशस्य स्वरूपान्यथाभावेन कार्यत्वम्; चिदंशस्य स्वभावान्यथाभावेन ज्ञानसङ्कोचविकासरूपेण कार्यतोदिता; चतुर्थे तु जीवोपकरणानामिन्द्रियादीनामुत्पत्तिप्रकारः। इति प्रथमेनाध्यायद्वयेन मुमुक्षुभिरुपास्यं निरस्तनिखिलदोषगन्धम् अनवधिकातिशयासङ्ख्येयकल्याणगुणगणं, निखिलजगदेककारणं ब्रह्मेति प्रतिपादितम्। उत्तरेण द्वयेन ब्रह्मोपासनप्रकारस्तत्फलभूतमोक्षस्वरूपञ्च चिन्त्यते। तत्र तृतीयस्य प्रथमे पादे ब्रह्मोपासिसिषोत्पत्तये जीवस्य संसरतो दोषाः कीर्तिताः। द्वितीये च उपासिसिषोत्पत्तय एव ब्रह्मणो निरस्तनिखिलदोषताकल्याणगुणाकरतारूपोभयलिङ्गता प्रतिपाद्यते। तृतीये तु ब्रह्मोपासनैकत्वनानात्वविचारपूर्वकमुपासनेषूपसंहार्यानुपसंहार्यगुणविशेषाः प्रपञ्चिताः। चतुर्थे तूपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वमुक्तम्। चतुर्थेऽध्याये ब्रह्मोपासनफलचिन्ता क्रियते। तत्र प्रथमे पादे ब्रह्मोपासनफलं वक्तुम् उपासनस्वरूपपूर्वकोपासनानुष्ठानप्रकारो विद्यामाहात्म्यं चोच्यते। द्वितीये तु ब्रह्मोपासीनानां ब्रह्मप्राप्तिगत्युपक्रमप्रकारश्चिन्तितः। तृतीये तु अर्चिरादिगतिस्वरूपम्, अर्चिरादिनैव ब्रह्मप्राप्तिरिति च प्रतिपाद्यते। चतुर्थे तु मुक्तस्य ब्रह्मानुभवप्रकारश्चिन्त्यते। अतो मुमुक्षुभिः ज्ञातव्यं निरस्तनिखिलदोषगन्धम्, अनवधिकातिशयासङ्ख्येयकल्याणगुणगणाकरं, निखिलजगदेककारणं परं ब्रह्म; तज्ज्ञानञ्च मोक्षसाधनमसकृदा-

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तस्मृतिसन्तानरूपमुपासनात्मकम् उपासनफलं च अर्चिरादिना परं ब्रह्मोपसंपद्य स्वस्वरूपभूतज्ञानादिगुणाविर्भावपूर्वकानन्तमहाविभूत्यनवधिकातिशयानन्दब्रह्मानुभवोऽपुनरावृत्तिरूप इति शारीरकशास्त्रेणोक्तं भवति ॥

१. ॐ अथातो ब्रह्मजिज्ञासा । ब्रह्ममीमांसा विषयः, सा किमारम्भणीया ? उतानारम्भणीया ? इति संशयः । तदर्थं परीक्ष्यते— वेदान्ताः किं ब्रह्मणि प्रमाणम् ? उत न ? इति । तदर्थं परिनिष्पन्नेऽर्थे शब्दस्य बोधनसामर्थ्यावधारणं संभवति नेति । न संभवतीति पूर्वः पक्षः । संभवतीति राद्धान्तः । यदा न संभवति, तदा परिनिष्पन्नेऽर्थे शब्दस्य बोधनसामर्थ्याभावात्सिद्धरूपे ब्रह्मणि न वेदान्ताः प्रमाणमिति तद्विचाराकारा ब्रह्ममीमांसा नारंभणीया । यदा संभवति, तदा सिद्धेऽप्यर्थे शब्दस्य बोधजननसामर्थ्यसंभवाद्वेदान्ताः ब्रह्मणि प्रमाणमिति सा चारम्भणीया स्यात् । अत्र पूर्वपक्षवादी मन्यते— वृद्धव्यवहारादन्यत्र व्युत्पत्त्यसंभवात् , व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्य एवार्थे शब्दशक्त्यवधारणात् , परिनिष्पन्नेऽर्थे ब्रह्मणि न वेदान्ताः प्रमाणमिति तद्विचाररूपा ब्रह्ममीमांसा नारम्भणीयेति । सिद्धान्तस्तु— बालानां मातापितृप्रभृतिभिरम्बातातमातुलशशिपशुपक्षिमृगादिषु अङ्गुल्या निर्दिश्य तत्तदभिधायिनश्शब्दान्प्रयुञ्जानैः क्रमेण बहुशः शिक्षितानां तत्तच्छब्दश्रवणसमनन्तरं स्वात्मानमेव तदर्थबुद्ध्युत्पत्तिदर्शनात् , शब्दार्थयोस्संबन्धान्तरादर्शनात् , सङ्केतयितृपुरुषाज्ञानाच्च, बोध्यबोधकभाव एव शब्दार्थयोस्संबन्ध इति निश्चिन्वानानां परिनिष्पन्नेऽर्थे शब्दस्य बोधकत्वावधारणं संभवतीति ब्रह्मणि वेदान्तवाक्यानां प्रामाण्यात्तदर्थविचाराकारा ब्रह्ममीमांसा आरम्भणीयेति ॥

सूत्रार्थस्तु— अथेत्यानन्तर्ये । अतः इति च वृत्तस्य हेतुभावे । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा, ज्ञातुमिच्छा जिज्ञासा । इच्छायाः इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिहाभिप्रेतम् । पूर्ववृत्तादल्पास्थिरफलकेवलकर्माधिगमादनन्तरं तत एव हेतोरनन्तस्थिरफलब्रह्माधिगमः कर्तव्य इति ॥ १ ॥ इति जिज्ञासाधिकरणम् ॥ १ ॥

२. जन्माद्यस्य यतः । तैत्तिरीयके "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्म" इत्येतद्वाक्यं विषयः । किमेतज्जिज्ञास्यतया प्रतिज्ञातं ब्रह्म जगज्जन्मादिकारणतया लक्षणतः प्रतिपादयितुं शक्नोति न वेति संशयः । न शक्नोतीति पूर्वः पक्षः । कुतः ? जगज्जन्मादीनामुपलक्षणतया विशेषणतया वा ब्रह्मलक्षणत्वासंभवात् । उपलक्षणत्वे ह्युपलक्ष्यस्याकारान्तरयोगोऽपेक्षितः । न चेह तदस्ति । अतः उपलक्षणत्वं न संभवति । विशेषणत्वेऽप्यनेकविशेषणविशिष्टतया अपूर्वस्यैकस्य प्रतिपादकत्वं न संभवति ; विशेषणानां व्यावर्तकत्वेन विशेषणबहुत्वे ब्रह्मबहुत्वप्रसक्तेः । राद्धान्तस्तु— एकस्मिन्नविरुद्धानां विशेषणानामनेकत्वेऽपि श्यामत्वयुवत्वादिविशिष्टदेवदत्तवज्जगज्जन्मादिविशिष्टं

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मैकमेष विशेष्यं भवति । उपलक्षणत्वे जन्मादिभिरुपलक्ष्यस्य ब्रह्मशब्दावगतबृहत्त्वाद्याकाराश्च सन्तीति जगज्जन्मादिकारणं ब्रह्मेति लक्षणतः प्रतिपादयितुं शक्नोतीति । सूत्रार्थः— अस्य विविधविचित्रभोक्तृभोग्यपूर्णस्य जगतः यतः जन्मादि, तद्ब्रह्मेति प्रतिपादयितुं शक्नोत्येतद्वाक्यमिति ॥ २ ॥ इति जन्माद्यधिकरणम् ॥ २ ॥

३. **शास्त्रयोनित्वात्** । * यतो वा इमानीत्यादिवाक्यमेव विषयः । तत्किं जगत्कारणे ब्रह्मणि प्रमाणम् ? उत नेति संशयः । नैतत्प्रमाणमिति पूर्वः पक्षः । अनुमानसिद्धब्रह्मविषयत्वात् । प्रमाणान्तराविषये हि शास्त्रं प्रमाणम् । जगतस्सावयवत्वेन कार्यत्वात्, कार्यस्य स्वोपादानोपकरणसंप्रदानप्रयोजनाद्यभिज्ञकर्तृकत्वात्, जगन्निर्माणकार्यचतुरः कर्मपरवशपरिमितशक्त्यादिक्षेत्रज्ञविलक्षणस्सर्वज्ञस्सर्वशक्तस्सर्वेश्वरोऽनुमानसिद्ध इति तस्मिन् * यतो वा इमानि भूतानीत्यादिवाक्यं न प्रमाणमिति ॥ राद्धान्तस्तु— जगतः कार्यत्वेऽपि एकदैवैकेनैव कृत्स्नं जगन्निर्मितमित्यत्र प्रमाणाभावात्: क्षेत्रज्ञानामेव विलक्षणपुण्यानां ज्ञानशक्तिवैचित्र्यसंभावनया कदाचित् कस्यचिज्जगदेकदेशनिर्माणसामर्थ्यसंभवात्, तदतिरिक्तपुरुषानुमानं न संभवतीति शास्त्रैकप्रमाणकत्वात् ब्रह्मणस्तत्प्रतिपादकत्वेन तस्मिन् * यतो वा इमानि भूतानीत्यादिवाक्यं प्रमाणमिति । शास्त्रं योनिः यस्य कारणं प्रमाणं तत् ब्रह्म शास्त्रयोनि, प्रमाणान्तराविषयत्वेन शास्त्रैकप्रमाणकत्वाद्ब्रह्मणः तस्मिन् * यतो वा इमानीत्यादि वाक्यं प्रमाणमिति सूत्रार्थः ॥ ३ ॥ इति शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

४. **तत्तु समन्वयात्** । ब्रह्मणश्शास्त्रप्रमाणकत्वं सम्भवति, नेति विचार्यते । न संभवतीति पूर्वः पक्षः । कुतः ? प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणः स्वरूपेण पुरुषार्थत्वात् पुरुषार्थावबोधकत्वेन च शास्त्रस्य प्रामाण्यान्मोक्षसाधनब्रह्मध्यानविधिपरत्वेऽसत्यपि ब्रह्मणि तद्ध्यानविधानसंभवात् न ब्रह्मसद्भावे तात्पर्यमिति ब्रह्मणश्शास्त्रप्रमाणकत्वं न संभवतीति । राद्धान्तस्तु— अतिशयितगुणपितृपुत्रादिजीवनज्ञानवत् अनवधिकातिशयानन्दस्वरूपब्रह्मज्ञानस्य निरतिशयपुरुषार्थत्वात्तस्य शास्त्रप्रमाणकत्वं संभवति, * आनन्दो ब्रह्म * यदेष आकाश आनन्दो न स्यात् * यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान् * इत्यादिभिरनवधिकातिशयानन्दस्वरूपं ब्रह्मेति हि प्रतिपाद्यते । अतो ब्रह्म स्वेन परेण वाऽप्यनुभूयमानं निरतिशयानन्दस्वरूपमेवेति तत्प्रतिपादनपरस्यैव साक्षात्पुरुषार्थान्वयः । प्रवृत्तिनिवृत्तिपरस्य तु तत्साध्यफलसंबन्धात्पुरुषार्थान्वयः— इति ॥

सूत्रार्थः— तुशब्दः प्रसक्ताशङ्कानिवृत्त्यर्थः । तत्— पूर्वसूत्रोदितं ब्रह्मणश्शास्त्रयोनित्वं सिद्ध्यति । समन्वयात्— सम्यक् पुरुषार्थतयाऽन्वयः समन्वयः । वेदितुर्निरतिशयानन्दस्वरूपत्वेन परमपुरुषार्थरूपे परे ब्रह्मणि वेदकतया शास्त्रस्यान्वयात् ब्रह्मणश्शास्त्रप्रमाणकत्वं सिद्ध्यत्येवेति ॥ ४ ॥ इति समन्वयाधिकरणम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५. **ईक्षतेर्नाशब्दम्** । * येनाश्रुतं श्रुतं भवतीत्यादि जगत्कारणवादिवेदान्तवेद्यं विषयः । तत्किं साङ्ख्योक्तं प्रधानम्, उतानवधिकातिशयानन्दं ब्रह्मेति संशयः । प्रधानमिति पूर्वः पक्षः । कुतः ? प्रतिज्ञादृष्टान्तान्वयेनानुमानाकारवाक्यवेद्यत्वात् * येनाश्रुतं श्रुतं भवतीत्यादिना एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय * यथा सोम्यैकेन मृत्पिण्डेनेति दृष्टान्तेन ह्युपपाद्यते । एवमानुमानिकमेवैतद्वाक्यवेद्यमिति निश्चीयते । * सदेव सोम्येदमिति सच्छब्दः प्रधानविषयः । * तदैक्षत बहु स्यामिति च गौणमीक्षणं भवितुमर्हति, * तत्तेज ऐक्षतेत्यादिगौणेक्षणसाहचर्याच्च । राद्धान्तस्तु— * तदैक्षत बहु स्यामिति बहुभवनसङ्कल्परूपेक्षणान्वयात् * सदेव सोम्येति कारणवाचिसच्छब्दविषयो नाचेतनं प्रधानम्; अपि तु सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तं परं ब्रह्मैवेति निश्चीयते । न चानुमानाकारमेतद्वाक्यम् । हेत्वनुपादानात् । अन्यज्ञानेनान्यज्ञानासंभवपरिजिहीर्षया तु दृष्टान्तोपादानम्, न च मुख्येक्षणसंभवे गौणपरिग्रहसंभवः । तेजःप्रभृतिष्वपि न गौणमीक्षणम्, तेजआदिशब्दानां तेजःप्रभृतिशरीरकस्यान्तर्यामिणो वाचकत्वादिति परमेव ब्रह्म जगत्कारणवादिवेदान्तवेद्यमिति ॥

सूत्रार्थः— ईक्षतेरिति ईक्षतिधात्वर्थः ईक्षणम् । शब्दः प्रमाणं यस्य न भवति तत्, अशब्दं परोक्तमानुमानिकं प्रधानम् । * सदेव सोम्येदमिति जगत्कारणतया प्रतिपादितान्वयिनः ईक्षणव्यापारान्नाचेतनमशब्दं तत्; अपि तु सर्वज्ञं सत्यसङ्कल्पं ब्रह्मैव जगत्कारणमिति निश्चीयते— इति ॥ ५ ॥

६. **गौणश्चेन्नात्मशब्दात्** । * तत्तेज ऐक्षतेत्यचेतनगतगौणेक्षणसाहचर्यात् * तदैक्षतेत्यत्र ईक्षतिर्गौण इति चेन्न; आत्मशब्दात्, सच्छब्दाभिहिते ईक्षितरि * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा * इति श्रूयमाणाच्चेतनवाचिनः, आत्मशब्दादयमीक्षतिर्मुख्य एवेति प्रतीयते । * ऐतदात्म्यमिदं सर्वमिति तेजःप्रभृतीनामपि तदात्मकत्वावगमात् तेजःप्रभृतीक्षणमपि मुख्यमेवेत्यभिप्रायः ॥ ६ ॥

७. **तन्निष्ठस्य मोक्षोपदेशात्** । इतश्च सच्छब्दाभिहितं न प्रधानम् । अपि तु परमेव ब्रह्म । * तत्त्वमसीति सदात्मकतया प्रत्यगात्मानुसन्धाननिष्ठस्य * तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये * इति मोक्षोपदेशात्तत्कारणं परमेव ब्रह्म ॥ ७ ॥

८. **हेयत्वावचनाच्च** । यदि प्रधानमिह कारणतया विवक्षितम्, तदा तस्य मोक्षविरोधित्वाद्धेयत्वमुच्येत । न चोच्यते । अतश्च न प्रधानम् ॥ ८ ॥

९. **प्रतिज्ञाविरोधात्** । प्रधानवादे प्रतिज्ञा च विरुध्यते । * येनाश्रुतं श्रुतमिति वक्ष्यमाणकारणविज्ञानेन चेतनाचेतनमिश्रकृत्स्नप्रपञ्चज्ञानं हि प्रतिज्ञातम् । चेतनांशं प्रति प्रधानस्याकारणत्वात्, तज्ज्ञानेन चेतनांशो न ज्ञायत इति न प्रधानं कारणम् ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१०. **स्वाप्ययात्।** * स्वमपीतो भवति....सता सोम्य तदा संपन्नो भवति * इति जीवस्य सुषुप्तस्य स्वाप्ययश्रुतेः। स्वकारणे ह्यप्ययः स्वाप्ययः। जीवं प्रति प्रधानस्याकारणत्वात्स्वाप्ययश्रुतिर्विरुध्यते। अतश्च न प्रधानम्। अपि तु ब्रह्मैव ॥ १० ॥

११. **गतिसामान्यात्।** इतरोपनिषद्गतिसामान्यादस्यां चोपनिषदि न प्रधानं कारणं विवक्षितम्। इतरासु चोपनिषत्सु— * यस्सर्वज्ञस्सर्ववित्....तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते * परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च * स कारणं करणाधिपाधिपः * आत्मनि खल्वरे विदिते सर्वमिदं विज्ञातं भवति * तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः * पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् * तस्माद्विराडजायत * आत्मा वा इदमेक एवाग्र आसीत्....स इमांल्लोकानसृजत * एको ह वै नारायण आसीत्....स एकाकी न रमेत * इति सर्वज्ञः पुरुषोत्तम एव कारणतया प्रतिपाद्यते। अस्याश्च तद्गतिसामान्यादत्रापि स एव कारणतया प्रतिपादनमर्हतीति च न प्रधानम् ॥ ११ ॥

१२. **श्रुतत्वाच्च।** श्रुतमेव ह्यस्यामुपनिषदि— * आत्मत एवेदं सर्वम् * इति। अतश्च * सदेव सोम्येत्यादिजगत्कारणवादिवेदान्तवेद्यं न प्रधानम्; सर्वज्ञं सत्यसङ्कल्पं परमेव ब्रह्मेति स्थितम् ॥ १० ॥ इति ईक्षत्यधिकरणम् ॥ ५ ॥

१३. **आनन्दमयोऽभ्यासात्।** तैत्तिरीयके— * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः * इति प्रकृत्य * तस्माद्वा एतस्माद्विज्ञानमयात, अन्योऽन्तर आत्माऽऽनन्दमयः * इत्यत्र जगत्कारणतयाऽवगत आनन्दमयः किं प्रत्यगात्मा, उत परमात्मेति संशयः। प्रत्यगात्मेति पूर्वः पक्षः। कुतः? * तस्यैष एव शारीर आत्मा * इति आनन्दमयस्य शारीरत्वश्रवणात्। शारीरो हि शरीरसंबन्धी। स च प्रत्यगात्मैव। तस्य चेतनत्वेनेक्षापूर्विका च सृष्टिरुपपद्यत इति। राद्धान्तस्तु— * सैषाऽनन्दस्य मीमांसा भवति * इत्यारभ्य, * यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान् * इति निरतिशयदशाशिरस्कोऽभ्यस्यमान आनन्दः प्रत्यगात्मनोऽर्थान्तरभूतस्य परस्यैव ब्रह्मण इति निश्चीयते। शारीरात्मत्वञ्च परमात्मन एव, * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः * इत्याकाशादिजगत्कारणतयाऽवगत एवान्नमयस्य शारीर आत्मेति प्रतीयते, आत्मान्तरानिर्देशात्। श्रुत्यन्तरेषु पृथिव्यक्षरादीनां शरीरत्वं परमात्मन आत्मत्वञ्च श्रूयते * यस्य पृथिवी शरीरमित्यारभ्य, * एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः * इति। अन्नमयस्यात्मैव प्राणमयादिषु * तस्यैष एव शारीर आत्मा, यः पूर्वस्य * इत्यनुकृष्यत इति प्रत्यगात्मनो विज्ञानमयस्य च स एव शारीर आत्मा। आनन्दमये तु * तस्यैष एव शारीर आत्मा, यः पूर्वस्य * इति निर्देशः आनन्दमयस्यानन्यात्मत्वप्रदर्शनार्थः। अतो जगत्कारणतया निर्दिष्ट आनन्दमयः परमात्मैवेति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु— आनन्दमयशब्दनिर्दिष्टः आकाशादिजगत्कारणभूतः प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा। कुतः? तस्यानन्दस्य निरतिशयत्वप्रतीतिबलात् । * स एको मानुष आनन्दः,' ते ये शतम् * इत्याद्यभ्यासात्, तस्य च प्रत्यगात्मन्यसंभावितस्य तदतिरिक्ते परमात्मन्येव संभवात् ॥ १३ ॥

१४. **विकारशब्दान्नेति चेन्न प्राचुर्यात्।** आनन्दमय इति विकारार्थान्मयट्च्छब्दान्नायमविकृतः परमात्मा । अस्य च विकारार्थत्वमेव युक्तम्, * अन्नमयः इति विकारोपक्रमादिति चेन्न; प्रत्यगात्मन्यपि * न जायते म्रियते वा * इत्यादिविकारप्रतिषेधात्प्राचुर्यार्थ एवायं मयडिति निश्चयात् । अस्मिंश्चानन्दे, * यतो वाचो निवर्तन्ते * इत्यादि वक्ष्यमाणात्प्राचुर्यादयमानन्दप्रचुरः परमात्मैव । न ह्यनवधिकातिशयरूपः प्रभूतानन्दः प्रत्यगात्मनि संभवति ॥ १४ ॥

१५. **तद्धेतुव्यपदेशाच्च।** * एष ह्येवानन्दयाति * इति जीवान्प्रत्यानन्दयितृत्वव्यपदेशाच्चायं परमात्मैव ॥ १५ ॥

१६. **मान्त्रवर्णिकमेव च गीयते।** * सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितं ब्रह्मैव, * तस्माद्वा एतस्मादात्मनः * इत्यारभ्य * आनन्दमयः * इति च गीयते; ततश्चानन्दमयो ब्रह्म ॥ १६ ॥

प्रत्यगात्मनः परिशुद्धं स्वरूपं मन्त्रवर्णोदितमित्याशङ्क्याह—

१७. **नेतरोऽनुपपत्तेः।** परस्माद्ब्रह्मणः इतरः प्रत्यगात्मा न मन्त्रवर्णोदितः, तस्य * विपश्चिता ब्रह्मणेति विपश्चित्त्वानुपपत्तेः; विविधं पश्यच्चित्त्वं हि विपश्चित्त्वम्; तच्च * सोऽकामयत, बहु स्यां प्रजायेय * इत्यादिवाक्योदितनिरुपाधिकबहुभवनसङ्कल्परूपं सर्वज्ञत्वम् । तत्तु प्रत्यगात्मनः परिशुद्धस्यापि न संभवति, * जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च * इति वक्ष्यमाणत्वात् । अतः परं ब्रह्मैव मान्त्रवर्णिकम् ॥ १७ ॥

१८. **भेदव्यपदेशाच्च।** * भीषाऽस्माद्वातः पवते * इत्यादिना अग्निवायुसूर्यादिजीववर्गस्यानन्दमयात्प्रशासितुः प्रशासितव्यत्वेन भेदो व्यपदिश्यते । अतश्चानन्दमयः परमात्मेति । योजनान्तरम्— * तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः * इति विज्ञानमयाज्जीवादानन्दमयस्य भेदो व्यपदिश्यते । विज्ञानमयो हि जीव एव न बुद्धिमात्रम्, मयट्छ्रुतेः । अतश्चानन्दमयः परमात्मा ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१९. **कामाच्च नानुमानापेक्षा।** * सोऽकामयत * इत्यारभ्य * इदं सर्वमसृजतेति कामादेव जगत्सर्गश्रवणात् अस्यानन्दमयस्य जगत्सर्गे नानुमानगम्यप्रकृत्यपेक्षा प्रतीयते। प्रत्यगात्मनो यस्यकस्यचिदपि सर्गे प्रकृत्यपेक्षाऽस्ति। अतश्चायं प्रत्यगात्मनोऽन्यः परमात्मा ॥ १९ ॥

२०. **अस्मिन्नस्य च तद्योगं शास्ति।** * रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति * इति अस्मिन्— आनन्दमये रसशब्दनिर्दिष्टे, अस्य– अयंशब्दनिर्दिष्टस्य जीवस्य, तल्लाभादानन्दयोगं शास्ति शास्त्रम्। प्रत्यगात्मनो यल्लाभादानन्दयोगः स तस्मादन्यः परमात्मैवेत्यानन्दमयः परं ब्रह्म ॥ २० ॥ इति आनन्दमयाधिकरणम् ॥ 6 ॥

२१. **अन्तस्तद्धर्मोपदेशात्।** छान्दोग्ये * य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते * य एषोऽन्तरक्षिणि पुरुषो दृश्यते * इत्यक्ष्यादित्याधारतया श्रूयमाणः पुरुषः किं जीवविशेषः, उत परमपुरुष इति संशयः। जीवविशेष इति पूर्वः पक्षः। कुतः? सशरीरत्वात्। शरीरसंयोगो हि कर्मवश्यस्य जीवस्य स्वकर्मफलभोगायेति। राद्धान्तस्तु * स एष सर्वेभ्यः पाप्मभ्य उदित * इत्यादिना अपहतपाप्मत्वपूर्वकसर्वलोककामेशत्वोपदेशात्, तेषां च जीवेष्वसंभवात्, अयमक्ष्यादित्याधारः पुरुषोत्तम एव। स्वासाधारणविलक्षणरूपवत्त्वं च ज्ञानबलैश्वर्यादिकल्याणगुणवत् तस्य संभवति। श्रूयते च तद्रूपस्याप्राकृतत्वम् * आदित्यवर्णं तमसस्तु पारे * इत्यादौ। सूत्रार्थस्तु– आदित्याद्यन्तश्श्रूयमाणः पुरुषः परं ब्रह्म। तदसाधारणादपहतपाप्मत्वादिधर्मोपदेशात् ॥ २१ ॥

२२. **भेदव्यपदेशाच्चान्यः।** * य आदित्ये तिष्ठन्नादित्यादन्तरः * य आत्मनि तिष्ठन्नात्मनोऽन्तरः * इत्यादिभिः जीवाद् भेदव्यपदेशाच्चायं जीवादन्यः परमात्मैव ॥ २२ ॥ इति अन्तरधिकरणम् ॥ 7 ॥

२३. **आकाशस्तल्लिङ्गात्।** छान्दोग्ये * अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति * इत्यत्र आकाशशब्दनिर्दिष्टं जगत्कारणं किं प्रसिद्धाकाशः, उत समस्तचिदचिद्वस्तुविलक्षणं ब्रह्मेति संशयः। प्रसिद्धाकाश इति पूर्वः पक्षः। कुतः? आकाशशब्दस्य लोके तत्रैव व्युत्पत्तेः, * यतो वा इमानि भूतानीत्यादिसामान्यलक्षणस्य सदादिशब्दानामपि साधारणत्वेन * आकाशादेव समुत्पद्यन्ते * इति विशेषे पर्यवसानात्; ईक्षणादयोऽपि आकाश एव जगत्कारणमिति निश्चिते सति गौणा वर्णनीया इति। राद्धान्तस्तु— * सर्वाणि ह वा इमानि भूतानीति प्रसिद्धवन्निर्देशात्, प्रसिद्धेश्चेक्षापूर्वकत्वात्, चिदचिद्वस्तुविलक्षणं सर्वज्ञं ब्रह्माकाशशब्दनिर्दिष्ट-

Digitization by Arya Samaj Charitable Foundation, Chennai

मिति । सूत्रार्थस्तु— आकाशशब्दनिर्दिष्टं परमेव ब्रह्म, प्रसिद्धवन्निर्दिश्यमानात् जगत्कारणत्वादिलिङ्गात् ॥ २३ ॥ इति आकाशाधिकरणम् ॥ ८ ॥

२४. अत एव प्राणः । छान्दोग्ये * प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता ❀ इति प्रस्तुत्य ❀ कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता * इत्यत्र निखिलजगत्कारणतया प्राणशब्दनिर्दिष्टः किं प्रसिद्धः प्राणः, उतोक्तलक्षणं ब्रह्मेति संशयः । प्रसिद्धप्राण इति पूर्वः पक्षः । कुतः ? सर्वस्य जगतः प्राणायत्तस्थितिदर्शनात् स एव निखिलजगदेककारणतया निर्देशमर्हतीति । राद्धान्तस्तु— शिलाकाष्ठादिष्वचेतनेषु चेतनस्वरूपेषु च प्राणायत्तस्थित्यभावात्, * सर्वाणि ह वा इमानि भूतानीति प्रसिद्धवन्निर्देशादेव हेतोः प्राणशब्दनिर्दिष्टं परमेव ब्रह्म । सूत्रमपि व्याख्यातम् ॥ २४ ॥ इति प्राणाधिकरणम् ॥ ९ ॥

२५. ज्योतिश्चरणाभिधानात् । छान्दोग्ये * अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः * इत्यत्र जगत्कारणत्वव्याप्तनिरतिशयदीप्तियुक्ततया ज्योतिश्शब्दनिर्दिष्टं किं प्रसिद्धादित्यादि ज्योतिः, उत परमेव ब्रह्मेति संशयः, प्रसिद्धज्योतिरिति पूर्वः पक्षः । कुतः ? * इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः * इति कौक्षेयज्योतिषा प्रसिद्धेनैक्यावगमात्, स्ववाक्ये तदतिरिक्तपरब्रह्मासाधारणलिङ्गादर्शनाच्च । राद्धान्तस्तु— प्रसिद्धज्योतिषोऽन्यदेव परं ब्रह्म इह निरतिशयदीप्तियुक्तं ज्योतिश्शब्दनिर्दिष्टम् । कुतः ? * पादोऽस्य सर्वा भूतानि, त्रिपादस्यामृतं दिवि * इति पूर्ववाक्ये द्युसंबन्धितया निर्दिष्टस्यैव चतुष्पदो ब्रह्मणः * अथ यदतः परो दिवो ज्योतिरित्यत्र प्रत्यभिज्ञानात् । तच्च परमेव ब्रह्मेति विज्ञातम्, सर्वेषां भूतानां तस्य पादत्वेन व्यपदेशात् । एवं परब्रह्मत्वे निश्चिते कौक्षेयज्योतिषः तदात्मकत्वानुसन्धानं फलायोपदिश्यत इति ज्ञायते । सूत्रार्थस्तु— ज्योतिश्शब्दनिर्दिष्टं परं ब्रह्म ; अस्य ज्योतिषः पूर्ववाक्ये सर्वभूतचरणत्वाभिधानात् । सर्वभूतपादत्वञ्च परस्यैव ब्रह्मण उपपद्यते ॥ २५ ॥

२६. छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात्तथा हि दर्शनम् । * गायत्री वा इदं सर्वम् * इति गायत्र्याख्यच्छन्दसः प्रकृतत्वात्, सर्वभूतपादत्वेन गायत्र्या एवाभिधानान्न ब्रह्मेति चेत् ; नैतत् । तथा चेतोर्पणनिगमात्— गायत्री यथा भवति, तथा ब्रह्मणि चेतोर्पणोपदेशात् । गायत्रीसादृश्यं चतुष्पात्त्वं ब्रह्मण्यनुसन्धेयमित्युपदिश्यते ; गायत्र्यास्सर्वात्मकत्वानुपपत्तेरित्यर्थः । तथा हि दर्शनम्— तथा ह्यन्यत्रापि अच्छन्दस एव सादृश्याच्छन्दश्शब्देनाभिधानं दृश्यते * ते वा एते पञ्चान्ये पञ्चान्ये दश संपद्यन्ते * इत्यारभ्य * सैषा विराडन्नादिति ॥ २६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२७. **भूतादिपादव्यपदेशोपपत्तेश्चैवम्।** भूतपृथिवीशरीरहृदयानि निर्दिश्य * सैषा चतुष्पदेति भूतादीनां पादत्वव्यपदेशश्च ब्रह्मण्येवोपपद्यत इति ब्रह्मैव गायत्रीशब्दनिर्दिष्टमिति गम्यते ॥ २७ ॥

२८. **उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्।** * पादोऽस्य सर्वा भूतानि, त्रिपादस्यामृतन्दिवि * इति पूर्ववाक्योदितं परं ब्रह्मैवास्तु, तथाऽपि * अथ यदतः परो दिवो ज्योतिः * इति द्युसंबन्धमात्रेण नेह तत्प्रत्यभिज्ञायते; तत्र चात्र च उपदेशप्रकारभेदात्। तत्र हि दिवीति द्यौस्सप्तम्या निर्दिश्यते। इह च * दिवः परो ज्योतिरिति पञ्चम्या। ततो न प्रतिसन्धानमिति चेन्न; उभयस्मिन्नपि व्यपदेशे उपरिस्थितिरूपार्थैक्येन प्रतिसन्धानाविरोधात्। यथा वृक्षाग्रे श्येनः, वृक्षाग्रात्परतश्श्येनः इति ॥ २८ ॥ इति ज्योतिरधिकरणम् ॥ 10 ॥

२९. **प्राणस्तथाऽनुगमात्।** कौषीतकीब्राह्मणे प्रतर्दनविद्यायां * त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे * इति प्रतर्दनेनोक्त इन्द्रः * प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व इत्याह। अत्र हिततमोपासनकर्मतया निर्दिष्ट इन्द्रप्राणशब्दाभिधेयः, किं जीवः, उत परमात्मेति संशयः। जीव इति पूर्वः पक्षः। कुतः? इन्द्रशब्दस्य जीवविशेषे प्रसिद्धेः, प्राणशब्दस्यापि तत्समानाधिकरणस्य स एवार्थ इति * तं मामायुरमृतमित्युपास्स्व * इति तस्यैवोपास्यत्वोपदेशात् इति। राद्धान्तस्तु— इन्द्रप्राणशब्दनिर्दिष्टं जीवादर्थान्तरभूतं परं ब्रह्म, * स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः * इतीन्द्रप्राणशब्दनिर्दिष्टस्यैव जीवेष्वसंभावितानन्दत्वाजरत्वामृतत्वादिश्रवणात्। सूत्रार्थस्तु— उपास्यतयोपदिष्टम् इन्द्रप्राणशब्दाभिधेयं परं ब्रह्म; तथेति प्रकारवचनः, परब्रह्मप्रकारभूतेष्वानन्दादिष्वस्यानुगमात् ॥ २९ ॥

३०. **न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्।** नायमुपास्यः परमात्मा— * मामेव विजानीहि * तं मामायुरमृतमित्युपास्स्व * इति प्रज्ञातजीवभावस्येन्द्रस्य वक्तुस्स्वात्मन उपास्यत्वोपदेशात्, उपक्रमे जीवभावनिश्चये सति उपसंहारस्य तदनुगुणतया नेयत्वादिति चेन्न; अध्यात्मसंबन्धभूमा ह्यस्मिन्— आत्मनि संबन्धः अध्यात्मसंबन्धः, तस्य भूमा बहुत्वम्। जीवादर्थान्तरभूतात्मासाधारणधर्मसंबन्धबहुत्वमस्मिन् प्रकरणे उपक्रमप्रभृत्योपसंहारादुपलभ्यते। उपक्रमे तावत् * यं त्वं मनुष्याय हिततमं मन्यसे * इति वरेणोच्यमानमुपासनं परमात्मोपासनमेव, तस्यैव हिततमत्वात्। तथा * एष एव साधु कर्म कारयति * इत्यादिसाध्वसाधुकर्मणोः कारयितृत्वं परमात्मन एव धर्मः। तथा * तद्यथा रथस्यारेषु नेमिरर्पिता, नाभावरा अर्पिताः, एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणेऽर्पिताः * इति सर्वाधारत्वञ्च तस्यैव धर्मः। आनन्दादयश्च, * एष लोकाधिपतिरेष सर्वेशः * इति च। हीति हेतौ। अतः परं ब्रह्मैवायमित्यर्थः ॥ ३० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परमात्मैवोपास्यश्चेत्; कथमिन्द्रः ॐ मामुपास्स्वेत्युपदिदेश ? इत्यत आह—

३१. **शास्त्रदृष्ट्या तूपदेशो वामदेववत्** । इन्द्रस्य जीवस्यैव सतः स्वात्मत्वेनोपास्यभूत-परमात्मोपदेशोऽयं शास्त्रदृष्ट्या । ॐ अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा * तत्त्वमसि * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः ॐ एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः * इत्यादीनि हि शास्त्राणि परमात्मानं जीवात्मन आत्मतयोपदिदिशुः । अतो जीवात्मवाचिनश्शब्दाः जीवात्मशरीरकं परमात्मानमेव वदन्तीति शास्त्र-दृष्टार्थस्य तस्य ॐ मामेव विजानीहि * मामुपास्स्वेति स्वात्मशब्देन परमात्मोपदेशो न विरुध्यते । यथा वामदेवश्शास्त्रदृष्ट्या स्वात्मशरीरकं परमात्मानं पश्यन् अहमिति परमात्मानमवोचत्, * तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र * इति ॥ ३१ ॥

३२. **जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्** । * त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छम् * यावदस्मिन् शरीरे प्राणो वसति तावदायुः * इति जीवमुख्यप्राणलिङ्गात् नाध्यात्मसंबन्धभूम्ना परमात्मत्वनिश्चय इति चेन्न; परमात्मन एव स्वाकारेण, जीव-शरीरकत्वेन, प्राणशरीरकत्वेन चोपासात्रैविध्याद्धेतोः तत्तच्छब्देनाभिधानमिति निश्चीयते । अन्यत्रापि ब्रह्मो-पासनात्रैविध्यस्याश्रितत्वात्— * सत्यं ज्ञानमनन्तं ब्रह्म * आनन्दो ब्रह्मेति स्वाकारेणोपास्यत्वम्, * सच्च त्यच्चाभवदित्यादिना भोक्तृशरीरकत्वेन, भोग्यशरीरकत्वेन च । इह प्रतर्दनविद्यायामपि तस्य त्रैविध्यस्य संभवात् । अतः इन्द्रप्राणशब्दनिर्दिष्टः परमात्मा ॥ ३२ ॥ इति इन्द्रप्राणाधिकरणम् ॥ 11 ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य प्रथमः पादः ॥

॥ अथ प्रथमाध्याये द्वितीयः पादः ॥

३३. **सर्वत्र प्रसिद्धोपदेशात्** । छान्दोग्ये श्रूयते, * सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत, अथ खलु क्रतुमयोऽयं पुरुषः यथा क्रतुरस्मिँल्लोके पुरुषो भवति, तथेतःप्रेत्य भवति, स क्रतुं कुर्वीत मनोमयः प्राणशरीरः * इति । अत्र, * सर्वं खल्विदं ब्रह्मेति सर्वात्मकत्वेन निर्दिष्टं ब्रह्म, किं प्रत्यगात्मा, उत परमात्मेति संशयः । प्रत्यगात्मेति पूर्वः पक्षः । सर्वत्र तादात्म्योपदेशो हि तस्यैवोपपद्यते । परस्य तु ब्रह्मणः सकलहेयप्रत्यनीककल्याणैकतानस्य समस्तहेयाकारं सर्वतादात्म्यं विरोधादेव न संभवति । प्रत्यगा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्मनो हि कर्मनिमित्तो ब्रह्मादिस्तम्बपर्यन्तसर्वभाय उपपद्यते । सृष्ट्यादिहेतुत्वञ्च तत्तत्कर्मनिमित्तत्वेन सृष्ट्यादेरुपपद्यते । ब्रह्मशब्दोऽपि बृहत्त्वगुणयोगेन * तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते * इतिवत्तत्रैव वर्तते । राद्धान्तस्तु— * तज्जलानिति, * सर्वं खल्विदं ब्रह्मेति तज्जन्मस्थितिलयहेतुकं तदात्मकत्वं प्रसिद्धवन्निर्दिश्यमानं परस्यैव ब्रह्मण उपपद्यते । परस्माद्ब्रह्मण एव हि जगज्जन्मस्थितिलयाः प्रसिद्धाः * सोऽकामयत बहु स्यां प्रजायेयेति * इदं सर्वमसृजत * इत्यादिषु । तथा सर्वात्मकत्वञ्च जन्मादिहेतुकं परस्यैव ब्रह्मणः प्रसिद्धम्, * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः * ऐतदात्म्यमिदं सर्वमिति । हेयप्रत्यनीककल्याणैकतानात्मनश्च परस्य हेयाकरसर्वभूतात्मत्वमविरुद्धम् ; * यः पृथिव्यां तिष्ठन्....यस्य पृथिवी शरीरम् * य आत्मनि तिष्ठन्....यस्यात्मा शरीरं स त आत्माऽन्तर्याम्यमृतः * इत्यादिना शरीरात्मभावेन सर्वात्मत्वोपपादनात् ; शरीरात्मनोश्च स्वभावव्यवस्थानात् । सर्वं ब्रह्मेति सामानाधिकरण्यनिर्देशश्च सर्वशब्दस्य सर्वशरीरके ब्रह्मण्येव प्रवृत्तेरुपपद्यते । शरीरवाची हि शब्दः शरीरिण्यात्मन्येव पर्यवस्यति ; देवमनुष्यादिशब्दवत् । सूत्रार्थस्तु— सर्वत्र— * सर्वं खल्विदं ब्रह्मेति निर्दिष्टे वस्तुनि सर्वशब्दवाच्ये सामानाधिकरण्येन तदात्मतया निर्दिष्टं परं ब्रह्मैव । कुतः ? प्रसिद्धोपदेशात् ; * तज्जलानिति, सर्वमिदं ब्रह्म खल्विति प्रसिद्धवत्तस्योपदेशात्, सर्वात्मकत्वस्योपदेशाच्च । तदेव हि जगज्जन्मस्थितिलयहेतुत्वेन वेदान्तेषु प्रसिद्धम् ॥ १ ॥

३४. **विवक्षितगुणोपपत्तेश्च ।** मनोमयत्वादिकास्सत्यसङ्कल्पत्वमिश्रा विवक्षिता गुणाः परस्मिन्नेवोपपद्यन्ते ॥ २ ॥

३५. **अनुपपत्तेस्तु न शारीरः ।** एतेषां गुणानामनन्तदुःखमिश्रपरिमितसुखलवभागिनि अज्ञे कर्मपरवशे शारीरे प्रत्यगात्मन्यनुपपत्तेश्चायं न शारीरः, अपि तु परमेव ब्रह्म ॥ ३ ॥

३६. **कर्मकर्तृव्यपदेशाच्च ।** * एतमितः प्रेत्याभिसंभवितास्मि * इति प्राप्यतयोपास्यो निर्दिश्यते ; प्राप्तृतया च जीवः । अतश्च जीवादन्यदेवेदं परं ब्रह्म ॥ ४ ॥

३७. **शब्दविशेषात् ।** * एष म आत्माऽन्तर्हृदये * इति शारीरष्षष्ठ्या निर्दिष्टः, उपास्यः प्रथमया । अतश्च जीवादन्यः ॥ ५ ॥

३८. **स्मृतेश्च ।** * सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च * इति स्मृतेश्च । अतश्च जीवादन्य उपास्यः परमात्मा ॥ ६ ॥

३९. **अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ।** * एष म आत्माऽन्तर्हृदये * इति अल्पस्थानत्वात्, * अणीयान्व्रीहेर्वा यवाद्वा * इत्यल्पत्वव्यपदेशाच्च न परं ब्रह्मेति चेन्न ।

Digitization by Arya Samaj Charitable Foundation, Chennai

निचाय्यत्वादेवम् , एवमुपास्यत्वाद्धेतोरल्पायतनत्वाल्पत्वव्यपदेशः, न स्वरूपाल्पत्वेन, * ज्यायान्पृथिव्या इत्यादिना सर्वस्माज्ज्यायस्त्वोपदेशात् । ज्यायसोऽप्यस्य हृदयायतनावच्छेदेनाल्पत्वानुसन्धानमुपपद्यते । व्योमवत्— यथा महतोऽपि व्योम्नस्सूचीपथादिष्वल्पत्वानुसन्धानम् । चशब्दोऽवधारणे । तद्वदेवेत्यर्थः । स्वाभाविकं चास्य महत्त्वमत्राभिधीयत इत्यर्थः । * ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः * इति ह्यनन्तरमेवोपदिश्यते ॥ ७ ॥

४०. **संभोगप्राप्तिरिति चेन्न वैशेष्यात्** । यद्युपासकशरीरे हृदयेऽयमपि वर्तते ; ततस्तद्वदेवास्यापि शरीरप्रयुक्तसुखदुःखसंभोगप्राप्तिरिति चेन्न, हेतुवैशेष्यात् । न हि शरीरान्तर्वर्तित्वमात्रमेव सुखदुःखोपभोगहेतुः ; अपि तु कर्मपरवशत्वम् ; तत्त्वपहतपाप्मनः परमात्मनो न संभवति ॥ ८ ॥ इति सर्वत्रप्रसिद्ध्यधिकरणम् ॥ 1 ॥

४१. **अत्ता चराचरग्रहणात्** । कठवल्लीष्वाम्नायते * यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः । इति । अत्रौदनोपसेचनसूचितोऽत्ता किं जीवः, उत परमात्मेति संशयः । जीव इति पूर्वः पक्षः । कुतः ? भोक्तृत्वस्य कर्मनिमित्तत्वात् , जीवस्यैव तत्संभवात् । राद्धान्तस्तु— सर्वोपसंहारे मृत्यूपसेचनमदनीयं चराचरात्मकं कृत्स्नं जगदिति तस्यैतस्यात्ता परमात्मैव । न चेदं कर्मनिमित्तं भोक्तृत्वम् , अपि तु जगत्सृष्टिस्थितिलयलीलस्य परमात्मनो जगदुपसंहारित्वरूपं भोक्तृत्वम् । सूत्रार्थः— ब्रह्मक्षत्रौदनस्यात्ता परमात्मा, ब्रह्मक्षत्रशब्देन चराचरस्य कृत्स्नस्य जगतो ग्रहणात् । मृत्यूपसेचनो ह्योदनो न ब्रह्मक्षत्रमात्रम् ; अपि तु तदुपलक्षितं चराचरात्मकं कृत्स्नं जगदेव ॥ ९ ॥

४२. **प्रकरणाच्च** । * महान्तं विभुमात्मानं मत्वा धीरो न शोचति * नायमात्मा प्रवचनेन लभ्यो न मेधया " इति परस्यैव हीदं प्रकरणम् , अतश्चायं परमात्मा ॥ १० ॥

नन्वनन्तरम् * ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये * इति द्वयोः कर्मफलादनश्रवणात् , परमात्मनश्च कर्मफलादनानन्वयात् , अन्तःकरणद्वितीयो जीव एव तत्रात्तेति प्रतीयते ; अतोऽत्रापि स एव जीवोऽत्ता भवितुमर्हतीत्याशङ्क्याह—

४३. **गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्** । गुहां प्रविष्टौ जीवात्मपरमात्मानौ ; जीवद्वितीयः परमात्मैव तत्र प्रतीयत इत्यर्थः । स्वयमनश्नतोऽपि परमात्मनः प्रयोजकतया पानेऽन्वयो विद्यते । जीवद्वितीयः परमात्मेति कथमवगम्यते ? तद्दर्शनात्— तयोरेव ह्यस्मिन्प्रकरणे गुहाप्रवेशव्यपदेशो दृश्यते— * तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्टं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोको जहाति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

इति परमात्मनः, * या प्राणेन संभवत्यदितिर्देवतामयी । गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत * इति जीवस्य । कर्मफलान्यत्तीत्यदितिर्जीवः ॥ ११ ॥

४४. **विशेषणाच्च ।** अस्मिन्प्रकरणे ह्युपक्रमप्रभृत्योपसंहाराज्जीवपरमात्मानावेवोपास्यत्वोपासकत्व-प्राप्यत्वप्राप्तृत्वादिभिर्विशेष्येते * महान्तं विभुमात्मानं मत्वा धीरो न शोचति * विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् * इत्यादिषु । अतश्चात्ता परमात्मा ॥ १२ ॥ इति अत्त्रधिकरणम् ॥

४५. **अन्तर उपपत्तेः ।** छान्दोग्ये * य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्म * इत्यत्राक्ष्याधारः पुरुषः किं प्रतिबिम्बात्मजीवदेवताविशेषान्यतमः, उत परमात्मेति संशयः । एष्वन्यतम इति पूर्वः पक्षः । कुतः ? * य एष दृश्यत इति प्रसिद्धवत्साक्षात्कारनिर्देशात् । राद्धान्तस्तु— परमा-त्मैवायमक्ष्याधारः पुरुषः, अक्षिपुरुषसंबन्धितया श्रूयमाणा हि निरुपाधिकात्मत्वामृतत्वाभयत्वब्रह्मत्वसंयद्वामत्वादयः परमात्मन्येवोपपद्यन्ते । प्रसिद्धवन्निर्देशश्च * यश्चक्षुषि तिष्ठन्नित्यादि श्रुत्यन्तरप्रसिद्धेरुपपद्यते । साक्षात्कारश्च— तदुपासननिष्ठानां योगिनाम् । सूत्रार्थस्तु— अक्ष्यन्तरः परमात्मा, संयद्वामत्वादीनां गुणानामत्रैवोपपत्तेः ॥ १३ ॥

४६. **स्थानादिव्यपदेशाच्च ।** स्थानं— स्थितिः । परमात्मन एव * यश्चक्षुषि तिष्ठन्नित्यादौ चक्षुषि स्थितिनियमनादीनां व्यपदेशाच्चायं परमात्मा ॥ १४ ॥

४७. **सुखविशिष्टाभिधानादेव च ।** * प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सुखविशिष्टतया प्रकृतस्य परस्यैव ब्रह्मणोऽक्ष्याधारतया उपास्यत्वाभिधानाच्चायं परमात्मा । एवकारोऽस्यैव हेतोर्नैरपेक्ष्यावगमाय ॥ १५ ॥

* प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्यत्र सुखविशिष्टं परमेव ब्रह्माभिहितमिति कथमिदमवगम्यते, यावता नामादिवत्प्रतीकोपासनमेवेत्याशङ्क्याह—

४८. **अत एव च स ब्रह्म ।** यतस्तत्र भवभयभीतायोपकोसलाय ब्रह्मस्वरूपजिज्ञासवे * कं च तु खं च न विजानामि * इति पृच्छते * यद्वाव कं तदेव खं यदेव खं तदेव कम् * इत्यन्योन्यव्यवच्छेदक-तया अपरिच्छिन्नसुखस्वरूपं ब्रह्मेत्यभिधाय, * प्राणं च हास्मै तदाकाशं चोचुः * इत्युक्तम् । अत एव खशब्दा-भिधेयस्य आकाशोऽपरिच्छिन्नसुखविशिष्टं परं ब्रह्मैव ॥ १६ ॥

४९. **श्रुतोपनिषत्कगत्यभिधानाच्च ।** श्रुतोपनिषत्कैः— अधिगतपरब्रह्मयाथात्म्यैः ब्रह्मप्राप्तये या गतिरर्चिरादिकाऽधिगन्तव्यतयाऽवगता श्रुत्यन्तरे, तस्याश्चेहाक्षिपुरुषं श्रुतवतोऽधिगन्तव्यतया * तेऽर्चिषमेवाभि-संभवन्ति * इत्यादिनाऽभिधानादक्षिपुरुषः परमात्मा ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५०. **अनवस्थितेरसंभवाच्च नेतरः ।** परमात्मन इतरो जीवादिकः, तस्याक्ष्णि नियमेनानवस्थितेः, अमृतत्वसंयद्वामत्वादीनां चासंभवान्न सोऽक्ष्याधारः ॥ १८ ॥ इति अन्तराधिकरणम् ॥ 3 ॥

५१. **अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ।** बृहदारण्यके * यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः * इत्यादिषु सर्वेषु पर्यायेषु श्रूयमाणोऽन्तर्यामी किं प्रत्यगात्मा, उत परमात्मेति संशयः । प्रत्यगात्मेति पूर्वः पक्षः ; वाक्यशेषे * द्रष्टा....श्रोता....मन्ता * इति द्रष्टृत्वादिश्रुतेः, * नान्योऽतोऽस्ति द्रष्टा * इति द्रष्ट्रन्तरनिषेधाच्च । राद्धान्तस्तु— पृथिव्याद्यात्मपर्यन्तसर्वतत्त्वानां सर्वैस्तैरदृष्टेनैकेन नियमनं निरुपाधिकामृतत्वादिकञ्च परमात्मन एव धर्म इत्यन्तर्यामी परमात्मा । द्रष्टृत्वादिश्च रूपादिसाक्षात्कारः । स च * पश्यत्यचक्षुरित्यादिना परमात्मनोऽप्यस्ति । * नान्योऽतोस्ति द्रष्टेति च जीवेनादृष्टान्तर्यामिद्रष्टृवत्, अन्तर्यामिणाऽप्यदृष्टद्रष्ट्रन्तरनिषेधपरः । सूत्रार्थः— अधिदैवाधिलोकादिपदचिह्नितेषु श्रूयमाणोऽन्तर्यामी परमात्मा, सर्वान्तरत्वसर्वाविदितत्वसर्वशरीरकत्वसर्वनियमनसर्वात्मकत्वामृतत्वादिपरमात्मधर्माणां व्यपदेशात् ॥ १९ ॥

५२. **न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च ।** स्मार्तं प्रधानम्, शारीरः प्रत्यगात्मा । स्मार्तं च शारीरश्च नान्तर्यामी, तयोरसंभावितोक्तधर्माभिलापात् । यथा स्मार्तस्याचेतनस्यासंभावनया नान्तर्यामित्वप्रसक्तिः, तथा प्रत्यगात्मनोऽपीत्यर्थः ॥ २० ॥

५३. **उभयेऽपि हि भेदेनैनमधीयते ।** उभये काण्वा माध्यन्दिना अपि, * यो विज्ञाने तिष्ठन् * य आत्मनि तिष्ठन् * इति यतः प्रत्यगात्मनो भेदेन, एनम्— अन्तर्यामिणम् अधीयते : अतोऽयं तदतिरिक्तः परमात्मा ॥ २१ ॥ इति अन्तर्याम्यधिकरणम् ॥ 4 ॥

५४. **अदृश्यत्वादिगुणको धर्मोक्तेः ।** आथर्वणे— * अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यम् * इत्यारभ्य, * यद्भूतयोनिं परिपश्यन्ति धीराः * अक्षरात्परतः परः * इत्यादौ किं प्रधानपुरुषौ प्रतिपाद्येते, उत परमात्मैवेति संशयः । प्रधानपुरुषाविति पूर्वः पक्षः । पृथिव्याद्यचेतनगतदृश्यत्वादीनां प्रतिषेधात्तज्जातीयाचेतनं प्रधानमेव भूतयोन्यक्षरमिति प्रतीयते । तथा * अक्षरात्परतः परः इति च तस्याधिष्ठाता पुरुष एवेति । राद्धान्तस्तु— उत्तरत्र * यस्सर्वज्ञस्सर्ववित् * इति प्रधानपुरुषयोरसंभावितं सार्वज्ञ्यमभिधाय * तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते * इति सर्वज्ञात्सत्यसङ्कल्पाज्जगदुत्पत्तिश्रवणात्पूर्वोक्तमदृश्यत्वादिगुणकं भूतयोन्यक्षरम् * अक्षरात्परतः परः * इति च निर्दिष्टं तदक्षरं परं ब्रह्मैवेति विज्ञायते । सूत्रार्थस्तु— अदृश्यत्वादिगुणकः परमात्मा, सर्वज्ञत्वादितद्धर्मोक्तेः ॥

4

Digitization by Arya Samaj Charitable Foundation, Chennai

५५. **विशेषणभेदव्यपदेशाभ्यां च नेतरौ ।** विशिनष्टि हि प्रकरणं प्रधानात् भूतयोन्यक्षरम् एकविज्ञानेन सर्वविज्ञानादिना । तथा * अक्षरात्परतः पर इति अक्षरात्– अव्याकृतात् परतोऽवस्थितात्पुरुषात् पर इति पुरुषाच्चास्य भूतयोन्यक्षरस्य भेदो व्यपदिश्यते । अतश्च न प्रधानपुरुषौ ; अपि तु परमात्मैवात्र निर्दिष्टः ॥ २३ ॥

५६. **रूपोपन्यासाच्च ।** * अग्निर्मूर्धा * इत्यादिना समस्तस्य चिदचिदात्मकस्य प्रपञ्चस्य भूतयोन्यक्षररूपत्वेनोपन्यासाच्चायमदृश्यत्वादिगुणकः परमात्मा ॥ २४ ॥ इति अदृश्यत्वादिगुणकाधिकरणम् ॥ 5 ॥

५७. **वैश्वानरस्साधारणशब्दविशेषात् ।** छान्दोग्ये * आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि * इत्यारभ्य * यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते * इत्यत्र किमयं वैश्वानरः परमात्मेति शक्यनिर्णयः, उत नेति संशयः । अशक्यनिर्णय इति पूर्वः पक्षः ; वैश्वानरशब्दस्य जाठराग्नौ, भूततृतीये, देवताविशेषे परमात्मनि च वैदिकप्रयोगदर्शनात् ; अस्मिन् प्रकरणे सर्वेषां लिङ्गोपलब्धेश्च । राद्धान्तस्तु— * को न आत्मा किं ब्रह्म * इति सर्वेषां जीवानामात्मभूतं ब्रह्म किमिति प्रक्रमात् , उत्तरत्र च, * आत्मानं वैश्वानरम् * इति ब्रह्मशब्दस्थाने सर्वत्र वैश्वानरशब्दप्रयोगाच्च, वैश्वानरात्मा सर्वेषां जीवानामात्मभूतं परं ब्रह्मेति विज्ञायते । सूत्रार्थः— वैश्वानरशब्दनिर्दिष्टः परमात्मा, वैश्वानरशब्दस्यानेकार्थसाधारणस्याप्यस्मिन्प्रकरणे परमात्मासाधारणविशेषणैस्सर्वात्मत्वादिभिः विशेष्यमाणत्वात् । विशेष्यत इति विशेषः ॥ २५ ॥

५८. **स्मर्यमाणमनुमानं स्यादिति ।** स्मर्यमाणं— प्रत्यभिज्ञायमानम् , अनुमीयतेऽनेनेति अनुमानम् , इति शब्दः प्रकारवचनः, इत्थं रूपं स्मर्यमाणं वैश्वानरस्य परमात्मत्वेऽनुमानं स्यात् ; द्युप्रभृतिपृथिव्यन्तमवयवविभागेन वैश्वानरस्य रूपमिहोपदिष्टम् * अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ * * द्यां मूर्धानं यस्य विप्रा वदन्ति * इति श्रुतिस्मृतिप्रसिद्धं परमपुरुषरूपमिह प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वे लिङ्गं स्यादित्यर्थः ॥

५९. **शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ।** अनिर्णयमाशङ्क्य परिहरति— शब्दादिभ्योऽन्तःप्रतिष्ठानाच्चेति । शब्दस्तावत् वाजिनां वैश्वानरविद्याप्रकरणे * स एषोऽग्निर्वैश्वानरः * इति वैश्वानरसमानाधिकरणोऽग्निशब्दः । अस्मिन् प्रकरणे च * हृदये गार्हपत्यः * इत्यारभ्य वैश्वानरस्य हृदयादिस्थानस्याग्नित्रयपरिकल्पनं प्राणाहुत्याधारत्वञ्चेत्यादि प्रतीयते । वाजिनामपि * स यो ह वैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद * इति वैश्वानरस्य शरीरान्तःप्रतिष्ठितत्वं प्रतीयते । अतः एतैर्लिङ्गैर्वैश्वानरस्य जाठराग्नित्वप्रतीतेर्नायं परमात्मेति शक्यनिर्णय इति चेत् ; तन्न ; तथा दृष्ट्युपदेशात् , दृष्टिः— उपासनम् , तथोपासनोपदेशादित्यर्थः । जाठराग्निशरीरतया वैश्वानरस्य परमात्मानं उपासनं ह्यत्रोपदिश्यते * अयमग्निर्वै-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्वानरः पुरुषेऽन्तः प्रतिष्ठितः * इत्यादौ। कथमवगम्यत इति चेत्, असंभवात्— केवलजाठराग्नेस्त्रैलोक्यशरीरत्वाद्यसंभवात्। पुरुषमपि चैनमधीयते— चशब्दः प्रसिद्धौ; वाजिनस्तत्रैव * स एषोऽग्निर्वैश्वानरो यत्पुरुषः * इति एनं वैश्वानरं पुरुषमपि ह्यधीयते। पुरुषश्च परमात्मैव * पुरुष एवेदं सर्वम् * पुरुषान्न परं किञ्चित् * इत्यादिषु प्रसिद्धेः॥ २७॥

६०. **अत एव न देवता भूतञ्च।** यतस्त्रैलोक्यशरीरोऽसौ वैश्वानरः, यतश्च निरुपाधिकपुरुषशब्दनिर्दिष्टः; अत एव नाग्न्याख्या देवता, महाभूततृतीयश्च वैश्वानरश्शङ्कनीयः॥ २८॥

६१. **साक्षादप्यविरोधं जैमिनिः।** अग्निशरीरतया वैश्वानरस्योपासनार्थमग्निशब्दसामानाधिकरण्यनिर्देश इत्युक्तम्। विश्वेषां नराणां नेतृत्वादिना संबन्धेन यथा वैश्वानरशब्दः परमात्मनि वर्तते, तथैवाग्निशब्दस्यापि अग्रनयनादिना योगेन साक्षात्परमात्मनि वृत्तौ न कश्चिद्विरोध इति जैमिनिराचार्यो मन्यते॥

* यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरम् * इति द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिन्या मात्रया परिच्छिन्नत्वमनवच्छिन्नस्य परमात्मनो वैश्वानरस्य कथमुपपद्यत इत्यत्राह—

६२. **अभिव्यक्तेरित्याश्मरथ्यः।** अनवच्छिन्नस्यैव परमात्मनः उपासनाभिव्यक्त्यर्थं द्युप्रभृतिपृथिव्यन्तप्रदेशपरिच्छिन्नत्वमिति आश्मरथ्य आचार्यो मन्यते॥ ३०॥

द्युप्रभृतिप्रदेशावच्छेदेनाभिव्यक्तस्य परमात्मनो द्युभ्वादित्यादीनां मूर्धाद्यवयवकल्पनं किमर्थमिति चेत्; तत्राह—

६३. **अनुस्मृतेर्बादरिः।** अनुस्मृतिः— उपासनम्, ब्रह्मप्राप्तये तथोपासनार्थं मूर्धप्रभृतिपादान्तदेहपरिकल्पनमिति बादरिराचार्यो मन्यते॥ ३१॥

अयं वैश्वानरः परमात्मा त्रैलोक्यशरीरः उपास्य उपदिश्यते चेत्, * उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः * इत्यादिना उपासकशरीरावयवानां गार्हपत्यादिपरिकल्पनं किमर्थमित्यत्राह—

६४. **संपत्तेरिति जैमिनिस्तथा हि दर्शयति।** वैश्वानरविद्याङ्गभूतायाः उपासकैरहरहः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसंपादनाय गार्हपत्यादिपरिकल्पनमिति जैमिनिराचार्यो मन्यते। तथा ह्यग्निहोत्रसंपत्तिमेव दर्शयतीयं श्रुतिः प्राणाहुतिं विधाय, * अथ य एवं विद्वानग्निहोत्रं जुहोति * इति। उक्तानामर्थानां पूजितत्वख्यापनायाचार्यग्रहणम्॥ ३२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

६५. **आमनन्ति चैनमस्मिन्।** एनं परमपुरुषं वैश्वानरं द्युभ्वादिदेहम्, अस्मिन् उपासकदेहे प्राणाग्निहोत्रेणाराध्यत्वाय आमनन्ति हि * तस्य ह वा एतस्य वैश्वानरस्य मूर्धैव सुतेजाः * इत्यादिना। उपासकमूर्धादिपादान्ता एव द्युप्रभृतयः परमपुरुषस्य मूर्धादय इति प्राणाग्निहोत्रवेलायामनुसन्धेया इत्यर्थः ॥ ३३ ॥ इति वैश्वानराधिकरणम् ॥ 11 ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

॥ अथ प्रथमाध्याये तृतीयः पादः ॥

६६. **द्युभ्वाद्यायतनं स्वशब्दात्।** आथर्वणे * यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः * इत्यत्र द्युपृथिव्यादीनामायतनं किं जीवः, उत परमात्मेति संशयः। जीव इति पूर्वः पक्षः, मनःप्रभृतीन्द्रियाधारत्वश्रुतेः, उत्तरत्र नाडीसंबन्धात्, जायमानत्वश्रुतेश्च। राद्धान्तस्तु— निरुपाधिकात्मत्वामृतसेतुत्वयोः परमात्मधर्मयोश्श्रवणात्परमात्मैवायम्। सर्वं नियन्तृतया आप्नोतीति ह्यात्मा। अमृतस्य प्रापकतया सेतुश्च स एव। नाडीसंबन्धः, बहुधाजायमानत्वञ्च, * सन्ततं सिराभिस्तु लम्बत्याकोशसन्निभम् * अजायमानो बहुधा विजायते * इत्यादिषु सर्वसमाश्रयणीयत्वायाजहत्स्वभावस्यैव परमात्मनोऽपि दृश्यत इति। सूत्रार्थस्तु— द्युपृथिव्यादीनामायतनं परमात्मा, स्वशब्दात् ॥ १ ॥

६७. **मुक्तोपसृप्यव्यपदेशाच्च।** * तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् * इति च बन्धान्मुक्तस्य प्राप्यतया व्यपदेशाच्चायं परमात्मा ॥ २ ॥

६८. **नानुमानमतच्छब्दात्प्राणभृच्च।** आनुमानम्— अनुमानगम्यं प्रधानम्। यथा तद्वाचिशब्दाभावात्तदिह न गृह्यते ; तथा प्राणभृदपीत्यर्थः। अतश्चायं परमात्मा ॥ ३ ॥

६९. **भेदव्यपदेशात्।** * अनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशम् * इत्यादिना जीवाद्भेदेन व्यपदेशाच्चायं परमात्मा ॥ ४ ॥

७०. **प्रकरणात्।** * अथ परा यया तदक्षरमधिगम्यते * इत्यादिना परमात्मन एव प्रकृतत्वात् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

७१. **स्थित्यदनाभ्याञ्च।** * तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति * इति कर्मफलमनश्नतः परमात्मनो दीप्यमानतया स्थितेः, जीवस्य कर्मपरवशतया तत्फलादनाच्च. परमात्मनो जीवात् भेदावगमात् अमृतसेतुद्युभ्वाद्यायतनं न जीवः। * अदृश्यत्वादिगुणक इत्यनेन परमात्मत्वे स्थापितेऽपि, नाडीसंबन्धबहुधाजायमानत्वलिङ्गात्, याऽवान्तरप्रकरणविच्छेदाशङ्का, सा निराकृता * द्युभ्वाद्यायतनमिति। वैश्वानरस्य त्रैलोक्यशरीरत्वादिना परमात्मत्वनिर्णय इति मध्ये वैश्वानरविद्या निरूपिता ॥ ६ ॥ इति द्युभ्वाद्यधिकरणम् ॥ 1 ॥

७२. **भूमा संप्रसादादध्युपदेशात्।** छान्दोग्ये * यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा * इत्यत्र भूमशब्दनिर्दिष्टो निरतिशयवैपुल्यविशिष्टसुखस्वरूपः किं प्रत्यगात्मा, उत परमात्मेति संशयः। प्रत्यगात्मेति पूर्वः पक्षः। * तरति शोकमात्मविदिति प्रक्रम्य नामादिपरम्परयोत्तरभूयस्त्वेन प्रश्नप्रतिवचनाभ्यां प्रवृत्तस्यात्मोपदेशस्य प्राणशब्दनिर्दिष्टे प्रत्यगात्मनि समाप्तिदर्शनात्, प्रत्यगात्मन एव भूमसंशब्दनमिति निश्चीयते। राद्धान्तस्तु— यद्यपि प्रश्नप्रतिवचनाभ्यामुत्तरोत्तरभूयस्त्ववचनं प्राणे पर्यवस्थितम्; तथापि प्राणवेदिनोऽतिवादित्वमुक्त्वा, * एष तु वा अतिवदति यस्सत्येनातिवदतीति तुशब्देनोपासकभेदं प्रतिपाद्य, तस्य सत्योपासकस्य पूर्वस्मादाधिक्योपदेशात्, सत्यशब्दाभिधेयं परं ब्रह्मैव भूमविशिष्टमिति। सूत्रार्थस्तु— भूमगुणविशिष्टं परं ब्रह्मैव, संप्रसादादध्युपदेशात्— संप्रसादः प्रत्यगात्मा, * एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य * इत्याद्युपनिषत्प्रसिद्धेः; * एष तु वा अतिवदतीति प्रत्यगात्मनोऽधिकतयोपदेशात्। अतिवादित्वं हि स्वोपास्याधिक्यवादित्वम् ॥ ७ ॥

७३. **धर्मोपपत्तेश्च।** स्वाभाविकामृतत्वस्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वोत्पत्तिहेतुत्वादीनां भूम्नि श्रूयमाणानां धर्माणां परस्मिन्नेव ब्रह्मण्युपपत्तेश्च भूमा परं ब्रह्मैव ॥ ८ ॥ इति भूमाधिकरणम् ॥ 2 ॥

७४. **अक्षरमम्बरान्तधृतेः।** वाजिनां गार्गीप्रश्ने * स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायम् * इत्यत्राक्षरशब्दनिर्दिष्टं प्रधानम्? जीवो वा? उत परमात्मा? इति सशयः। प्रधानम्, जीवो वा, न परमात्मेति पूर्वः पक्षः। * कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च * इत्युक्ते, आकाशाधारतयोच्यमानमक्षरं प्रधानम्, जीवो वा; प्रधानस्य विकाराधारत्वात्, जीवस्याचिद्वस्त्वाधारत्वात्; न परमात्मा— इति। राद्धान्तस्तु— * यदूर्ध्वं गार्गि दिवः * इत्यारभ्य, कालत्रयवर्तिनः कृत्स्नस्याधारतया निर्दिष्ट आकाशोऽव्याकृतमेव; न वायुमानाकाशः। ततः पश्चात् * कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च * इति पृष्टे, तदाधारतयोच्यमानमेतदक्षरं न प्रधानं भवितुमर्हति। नापि जीवः, * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः * इत्यारभ्य प्रशासनात्सर्वाधारत्वश्रुतेः।

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु—* एतद्वै तदक्षरं गार्गि * इति निर्दिष्टमक्षरं परमात्मा, अम्बरान्तधृतेः— अम्बरम्— वायुमानाकाशः, अम्बरान्तः— अम्बरपारभूतम्, अम्बरकारणमिति यावत्; कारणापत्तिरेव हि कार्यस्यान्तः। स चाम्बरान्तः अव्याकृतं प्रधानम्, तस्य धृतेः— धारणात्। अव्याकृतस्यापि धृतेरक्षरं परमात्मैवेत्यर्थः ॥ ९ ॥

एवं तर्हि जीवो भवितुमर्हति, तस्य प्रधानधृत्युपपत्तेरित्याशङ्क्याह—

७५. **सा च प्रशासनात्।** सा च— अम्बरान्तधृतिः * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ * इति प्रशासनात् श्रूयते। प्रशासनम्— प्रकृष्टं शासनम्, अप्रतिहताज्ञा। न चाप्रतिहताज्ञया कृत्स्नस्य चिदचिदात्मकस्य जगतो धृतिर्जीवे उपपद्यते; अतो न जीवः ॥ १० ॥

७६. **अन्यभावव्यावृत्तेश्च।** अन्यभावः— अन्यत्वम्, अस्याक्षरस्य परमपुरुषादन्यत्वं व्यावर्तयति वाक्यशेषः, * अदृष्टं द्रष्टृ * इत्यादिना सर्वैरदृष्टमेतदक्षरं सर्वस्य द्रष्टृत्यादिप्रधानजीवासंभावनीयार्थप्रतिपादनात् ॥ ११ ॥ इति अक्षराधिकरणम् ॥ 3 ॥

७७. **ईक्षतिकर्म व्यपदेशात्सः।** आथर्वणिकानां सत्यकामप्रश्ने * यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत * इत्यारभ्य, * ससामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते * इत्यत्र, ध्यायतीक्षतिकर्मतया व्यपदिष्टः परः पुरुषः किं हिरण्यगर्भः, उत परब्रह्मभूतः पुरुषोत्तम इति संशयः। हिरण्यगर्भ इति पूर्वः पक्षः। पूर्वत्रैकमात्रं प्रणवमुपासीनस्य मनुष्यलोकप्राप्तिं फलम्, द्विमात्रमुपासीनस्यान्तरिक्षलोकप्राप्तिश्च फलमभिधाय, अनन्तरं * यः पुनरेतं त्रिमात्रेण * इति त्रिमात्रं प्रणवमुपासीनस्य फलत्वेनोच्यमानब्रह्मलोकस्थपुरुषेक्षणकर्मभूतश्चतुर्मुख एवेति विज्ञायते, मनुष्यलोकान्तरिक्षलोकसाहचर्यात् ब्रह्मलोकोऽपि क्षेत्रज्ञलोक इति निश्चयात्।

राद्धान्तस्तु— * परात्परं पुरिशयं पुरुषमीक्षते * इतीक्षतिकर्मतया निर्दिष्टपुरुषविषये श्लोके * तमोङ्कारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परञ्च * इति निरुपाधिकशान्तत्वामृतत्वादिव्यपदेशात्परमात्मैवायमिति निश्चीयते। एवं परमात्मत्वे निश्चिते ब्रह्मलोकशब्दश्च तत्स्थानमेवाभिदधातीत्यवगम्यते। तद्विषयतयोदाहृते च श्लोके * यत्तत्कवयो वेदयन्ते * [* तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः *] इत्येवमादिभिः सूरिभिर्दृश्यत्ववचनं तदेव द्रढयति। सूत्रार्थस्तु— ईक्षतिकर्म सः— परमात्मा, ध्यायतीक्षत्योरेकविषयत्वेन ध्यायतिकर्मापि स एवेत्यर्थः; व्यपदेशात्— तद्विषयतया * शान्तमजरममृतमभयं परञ्च * इति परमात्मधर्माणां व्यपदेशात् ॥ १२ ॥ इति ईक्षतिकर्माधिकरणम् ॥ 4 ॥

७८. **दहर उत्तरेभ्यः।** छान्दोग्ये * अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् * इत्यत्र हृदयपुण्डरीकमध्यवर्ती दहरा-

Digitization by Arya Samaj Charitable Foundation, Chennai

काशश्श्रूयमाणः किं भूताकाशः ? उत जीवः ? अथ परमात्मा— इति संशयः। प्रथमं तावद्भूताकाश इति युक्तमाश्रयितुमिति पूर्वः पक्षः ; आकाशशब्दस्य भूताकाशे प्रसिद्धिप्राचुर्यात् , आकाशान्तर्वर्तिनोऽन्यस्यान्वेष्टव्यताप्रतीतेश्च। राद्धान्तस्तु— * किं तदत्र विद्यते यदन्वेष्टव्यम् * इति चोदिते, * यावान्वा अयमाकाशः * इत्यारभ्य, * एतत्सत्यं ब्रह्मपुरम् * इत्यन्तेन दहराकाशस्यातिमहत्त्वसर्वाश्रयत्वाजरत्वसत्यत्वाद्यभिधाय, * अस्मिन्कामास्समाहिताः * इत्याकाशान्तर्वर्तिनोऽन्वेष्टव्याः कामा इति प्रतिपाद्य, कोऽयं दहराकाशशब्दनिर्दिष्टः ? के तदाश्रयाः कामाः ? इत्यपेक्षायाम् , * एष आत्माऽपहतपाप्मा * इत्यारभ्य, * सत्यसङ्कल्पः * इत्यन्तेन आकाशशब्दनिर्दिष्टः आत्मा, कामाश्चापहतपाप्मत्वादयस्तद्विशेषणभूता इति प्रतिपादयद्वाक्यमपहतपाप्मत्वादिविशिष्टपरमात्मानमाह। उपक्रमे चान्वेष्टव्यतया प्रतिज्ञात आकाशः आत्मा, एतद्विशेषणभूताः अपहतपाप्मत्वादयः कामा इति [वाक्यं] ज्ञापयत् * अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवति * इत्युपसंहरति। अतोऽयं दहराकाशोऽपहतपाप्मत्वादिविशिष्टः परमात्मेति निश्चीयते, न भूताकाशादिरिति ॥

एवं तर्ह्यस्मिन्वाक्ये * अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थायेति प्रत्यगात्मप्रतीतेः, तस्य चोत्तरत्र प्रजापतिवाक्येऽपहतपाप्मत्वादिगुणकत्वावगमात् , प्रत्यगात्मैव दहराकाश इति पूर्वपक्षी मन्यते। राद्धान्ती तु— प्रत्यगात्मा कर्मपरवशतया जागरितस्वप्नसुषुप्त्याद्यवस्थाभिः तिरोहितापहतपाप्मत्वादिकः परमात्मानमुपसंपन्नः तत्प्रसादादाविर्भूतगुणकः प्रजापतिवाक्ये प्रतिपादितः। दहराकाशस्त्वतिरोहितनिरुपाधिकापहतपाप्मत्वादिकः प्रत्यगात्मन्यसंभावनीयजगद्विधरणसमस्तचिदचिद्वस्तुनियमनाद्यनन्तगुणकः प्रतिपन्न इति नायं प्रत्यगात्मा दहराकाशः, अपि तु परमात्मैवेति मन्यते। सूत्रार्थस्तु— दहराकाशः परं ब्रह्म, उत्तरेभ्यः— उत्तरवाक्यगतेभ्योऽपहतपाप्मत्वादिपरमात्मासाधारणधर्मेभ्यो हेतुभ्यः ॥ १३ ॥

७९. **गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च।** अस्मिन्दहराकाशे सर्वासां प्रजानामजानतीनामहरहर्या गतिश्श्रूयते, यश्च दहराकाशावमर्शरूपैतच्छब्दसमानाधिकरणतया प्रयुक्तो ब्रह्मलोकशब्दः, ताभ्यां दहराकाशः परं ब्रह्मेत्यवगम्यते * तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः * इति। तथा हि दृष्टम्— तथा ह्यन्यत्र परस्मिन्ब्रह्मण्येवंरूपं गमनं दृष्टम्— * एवमेव खलु सोम्येमास्सर्वाः प्रजास्सति संपद्य न विदुस्सति संपत्स्यामह इति * सत आगम्य न विदुस्सत आगच्छामह इति * तथा ब्रह्मलोकशब्दश्च परस्मिन्ब्रह्मण्येव दृष्टः— * एष ब्रह्मलोकस्सम्राडिति होवाच * इति। लिङ्गञ्च— मा भूदन्यत्र दर्शनम् , अस्मिन् प्रकरणे सर्वासां प्रजानां श्रूयमाणमहरहर्गमनं, ब्रह्मलोकशब्दश्च दहराकाशस्य परमात्मत्वे पर्याप्तं लिङ्गम्। चशब्दोऽवधारणे। एतदेव पर्याप्तमित्यर्थः ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

८०. **धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः** । अस्य धृत्याख्यस्य परमात्मनो महिम्नः अस्मिन् दहराकाशे उपलब्धेरयं परमात्मा । धृतिः— जगद्विधरणं परमात्मनो महिमेत्यन्यत्रावगम्यते । * एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय * इति । सा चास्मिन्दहराकाशे उपलभ्यते * अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति ॥ १५ ॥

८१. **प्रसिद्धेश्च** । * को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, * सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्ते * इत्यादिष्वाकाशशब्दस्य परस्मिन्ब्रह्मणि प्रसिद्धेः आकाशशब्द एव परमात्मधर्मविशेषितो भूताकाशशङ्कां निवर्तयतीत्यर्थः ॥ १६ ॥

८२. **इतरपरामर्शात्स इति चेन्नासंभवात्** । परमात्मन् इतरः जीवः; * अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय * इति जीवस्य परामर्शात्स एव दहराकाश इति चेत्तन्न, पूर्वोक्तानां गुणानां तस्मिन्नसंभवात् ॥ १७ ॥

८३. **उत्तराच्चेदाविर्भूतस्वरूपस्तु** । उत्तरात्— प्रजापतिवाक्यात्, अपहतपाप्मत्वादिगुणको जीवोऽवगम्यत इति चेत्तन्न; जागरिताद्यवस्थाभिरनादिकालप्रवृत्ताभिः पुण्यपापरूपकर्ममूलाभिः तिरोहितगुणकः परब्रह्मोपासनजनिततदुपसंपत्त्याऽऽविर्भूतस्वरूपोऽसौ जीवः तत्र प्रजापतिवाक्येऽपहतपाप्मत्वादिगुणकः कीर्तितः । दहराकाशस्त्वतिरोहितस्वरूपोऽपहतपाप्मत्वादिगुणक इत्यस्मिन्दहराकाशे न जीवशङ्का ॥ १८ ॥

दहरवाक्ये जीवपरामर्शः किमर्थमिति चेत्, तत्राह—

८४. **अन्यार्थश्च परामर्शः** । * अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इति परंज्योतिस्स्वरूपदहराकाशोपसंपत्त्याऽस्य जीवस्यानृततिरोहितस्वरूपस्य स्वरूपाविर्भावो भवतीति दहराकाशस्य जगद्विधरणादिवज्जीवस्वरूपाविर्भावापादनरूपसंपद्विशेषप्रतिपादनार्थो जीवपरामर्शः ॥ १९ ॥

८५. **अल्पश्रुतेरिति चेत्तदुक्तम्** । * दहरोऽस्मिन्नत्यल्पपरिमाणश्रुतिराराग्रोपमितस्य जीवस्यैवोपपद्यते, न तु सर्वस्माज्ज्यायसो ब्रह्मण इति चेत्; तत्र यदुत्तरं वक्तव्यम्, तत्पूर्वमेवोक्तम्— * निचाय्यत्वादित्यनेन ॥ २० ॥

८६. **अनुकृतेस्तस्य च** । अनुकृतिः— अनुकारः; तस्य परमात्मनोऽनुकाराद्धि जीवस्याविर्भूतस्वरूपस्यापहतपाप्मत्वादिगुणकत्वम् । अतोऽनुकर्तुः जीवादनुकार्यः परब्रह्मभूतो दहराकाशोऽर्थान्तरभूत एव । तदनुकारश्च तत्साम्यापत्तिः श्रूयते * यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ इति ॥ २१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

८७. **अपि स्मर्यते ।** स्मर्यते च तदुपासनात्तत्साम्यापत्तिरूपानुकृतिर्जीवस्य, * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति ॥ २२ ॥ इति दहराधिकरणम् ॥ 5 ॥

८८. **शब्दादेव प्रमितः ।** कठवल्लीष्वाम्नायते * अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद्वैतत् * उत्तरत्र च * अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः * तथोपरिष्टात्— * अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः * इति । अत्राङ्गुष्ठप्रमितो जीवात्मा, उत परमात्मेति संशयः । जीवात्मेति पूर्वः पक्षः, अन्यत्र स्वीकृतस्पष्टजीवभावे पुरुषे अङ्गुष्ठप्रमितत्वश्रुतेः * प्राणाधिपस्सञ्चरति स्वकर्मभिरङ्गुष्ठमात्रो रवितुल्यरूपः * इति । राद्धान्तस्तु— तत्र * स्वकर्मभिरिति जीवभावनिश्चयवदत्रापि, * ईशानो भूतभव्यस्येति भूतभव्येशितृत्वदर्शनात् परमात्मैवेति । सूत्रार्थस्तु— शब्दादेव प्रमितः— अङ्गुष्ठप्रमितः परमात्मैव, * ईशानो भूतभव्यस्येति परमात्मवाचिशब्दात् ॥ २३ ॥

कथमनवच्छिन्नस्य परमात्मनोऽङ्गुष्ठप्रमितत्वमित्याशङ्क्याह—

८९. **हृद्यपेक्षया तु मनुष्याधिकारत्वात् ।** उपासनार्थमुपासकहृदये वर्तमानत्वात्, उपासकहृदयस्याङ्गुष्ठमात्रत्वात् तदपेक्षयेदमङ्गुष्ठप्रमितत्वम् । मनुष्याणामेवोपासकत्वसंभावनया मनुष्यानधिकृत्य प्रवृत्तत्वाच्छास्त्रस्य मनुष्यहृदयापेक्षयेदमुक्तम् । स्थितं तावदुत्तरत्र समापयिष्यते ॥ २४ ॥ इति प्रमिताधिकरणभागः ॥

९०. **तदुपर्यपि बादरायणस्संभवात् ।** मनुष्याधिकारं ब्रह्मोपासनशास्त्रमित्युक्तम् । तत्प्रसङ्गेन देवादीनामपि ब्रह्मविद्यायामधिकारोऽस्ति नवेति चिन्त्यते । न देवादीनामधिकारोऽस्तीति पूर्वः पक्षः, परिनिष्पन्ने ब्रह्मणि शब्दस्य प्रामाण्यसंभवेऽपि देवादीनां विग्रहादिमत्त्वे प्रमाणाभावात्, मन्त्रार्थवादानामपि विधिशेषतया विग्रहादिसद्भावपरत्वाभावात्, विग्रहवन्निर्वर्त्याहरहरनुष्ठीयमानविवेकादिसाधनसप्तकसंस्कृतमनोनिष्पाद्योपासननिर्वृत्तौ तेषां सामर्थ्याभावात् । राद्धान्तस्तु— जगत्सृष्टिप्रकरणेषु नामरूपव्याकरणश्रुत्यैव देवादीनां विग्रहादिमत्त्वं सिध्यति । देवादीनां देहेन्द्रियादिकरणमेव हि नामरूपव्याकरणम् ; मन्त्रार्थवादयोश्च तदुपलब्धेः, तयोरनुष्ठेयप्रकाशनस्तुतिपरत्वेऽपि तदुपपत्तये तत्सद्भावे प्रमाणत्वाद्देवादीनां विग्रहादिमत्त्वसिद्धिः ; न हि विग्रहादिमत्तया स्तुतिः प्रकाशनं च तदभावे संभवति । अतस्सामर्थ्यसंभवादस्त्येवाधिकारः । सूत्रार्थस्तु— तदुपर्यपि तेभ्यः मनुष्येभ्यः उपरि वर्तमानानां देवादीनाम्, अप्यधिकारोऽस्ति । यद्वा तत्— ब्रह्मोपासनम्, उपरि-देवादिष्वपि संभवति ; तेषामपि ब्रह्मस्वरूपतदुपासनप्रकारज्ञानतदर्थित्वतदुपादानसामर्थ्यसंभवात् । पूर्वोपार्जितज्ञानाविस्मरणात ज्ञान-

Digitization by Arya Samaj Charitable Foundation, Chennai

संभव ; तापत्रयाभिहतिपूर्वकब्रह्मगुणज्ञानाद्यार्थित्वसंभवः ; सृष्टिवाक्यमन्त्रार्थवादेषु विग्रहवत्त्वादिदर्शनात् सामर्थ्यसंभवश्चेति भगवान् बादरायणो मन्यते ॥ २५ ॥

९१. **विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।** कर्मणि—यागादौ, विग्रहवत्त्वे सति एकस्य युगपदनेकयागेषु सन्निधानानुपपत्तेर्विरोधः प्रसज्यत इति चेत् ; तन्न, शक्तिमतां सौभरिप्रभृतीनां युगपदनेकशरीरप्रतिपत्तिदर्शनात् ॥ २६ ॥

९२. **शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्।** विरोध इति वर्तते ; माभूत्कर्मणि विरोधः, शब्दे तु वैदिके विरोधः प्रसज्यते, विग्रहवत्त्वे हि तेषां सावयवत्वेनोत्पत्तिविनाशयोगादुत्पत्तेः प्राक् विनाशादूर्ध्वं च, वैदिकानामिन्द्रादिशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यादिति चेत् ; तन्न, अतः प्रभवात्—अतः— वैदिकादेव शब्दात् इन्द्रादेः प्रभवात्। पूर्वपूर्वेन्द्रादौ विनष्टे वैदिकादिन्द्राद्याकृतिविशेषवाचिनश्शब्दादिन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरमिन्द्रादिकं सृजति प्रजापतिरिति वैदिकस्य शब्दस्य न कश्चिद्विरोधः। न हि देवदत्तादिशब्दवदिन्द्रादिशब्दाः व्यक्तिविशेषे संकेतपूर्वकाः प्रवृत्ताः ; अपि तु गवादिशब्दवदाकृतिविशेषवाचिन इति तेषामपि नित्य एव वाच्यवाचकभावः। वैदिकादिन्द्रादिशब्दात्तदर्थविशेषं स्मृत्वा कुलालादिरिव घटादिकं प्रजापतिस्सृजतीति कुतोऽवगम्यते ? प्रत्यक्षानुमानाभ्यां— श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्— * वेदेन रूपे व्याकरोत्सतासती प्रजापतिः * तथा * स भूरिति व्याहरत् सभूमिमसृजत * इत्यादिका। स्मृतिरपि— * सर्वेषाञ्च स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ * नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इत्यादिका ॥ २७ ॥

९३. **अत एव च नित्यत्वम्।** यतः प्रजापतिः वैदिकाच्छब्दादर्थाकारं स्मृत्वा तदाकारं सर्वं सृजति, अतश्च वसिष्ठविश्वामित्रादीनां मन्त्रसूक्तादिकृत्त्वेऽपि मन्त्रादिमयस्य वेदस्य नित्यत्वं तिष्ठत्येव। प्रजापतिर्हि नैमित्तिकप्रलयानन्तरम् * मन्त्रकृतो वृणीते * विश्वामित्रस्य सूक्तं भवति * इत्यादिवेदशब्देभ्योऽनधीतमन्त्रादिदर्शनशक्तवसिष्ठाद्याकृतिविशेषं स्मृत्वा, वसिष्ठत्वादिपदप्राप्तयेऽनुष्ठितकर्मविशेषांश्चानुस्मृत्य, तदाकारविशेषांस्तान्वसिष्ठादीन् सृजति ; ते चानधीत्यैव वेदैकदेशभूतमन्त्रादीन् स्वरतो वर्णतश्चास्खलितान्पठन्ति। तदेषां मन्त्रादिकृत्त्वेऽपि वेदनित्यत्वमुपपद्यते ॥ २८ ॥

प्रजापतिप्रभृतिषु सर्वेषु तत्त्वेष्वव्याकृतपर्यन्तेषु अव्याकृतपरिणामरूपेषु शब्दमयेषु वेदेषु च विनष्टेष्वव्याकृतसृष्ट्यावृत्तौ कथं वेदस्य नित्यत्वमित्यत आह—

Digitization by Arya Samaj Charitable Foundation, Chennai

९४. **समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ।** अव्याकृतसृष्ट्यावृत्तावपि सृज्यानां समाननामरूपत्वादेव न कश्चिद्विरोधः । आदिसर्गेऽपि हि परमपुरुषः पूर्वसंस्थानं जगत्स्मरन् तथैव सृजति । वेदांश्च पूर्वानुपूर्वीविशिष्टानाविष्कृत्य हिरण्यगर्भाय ददातीति । पूर्वसंस्थानमेव जगत्सृजतीति कथमवगम्यते ? दर्शनात् स्मृतेश्च । दर्शनं श्रुतिः, * अहोरात्राणि विदधद्विश्वस्य मिषतो वशी, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, दिवं च पृथिवीं चान्तरिक्षमथो सुवः * इति, * यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै * इति च । स्मृतिरपि— * यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ इति । एतदेव वेदस्य नित्यत्वम्— यत्पूर्वपूर्वोच्चारणक्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यत्वम्, परमपुरुषोऽपि स्वस्वरूपस्वाराधनतत्फलयाथात्म्यावबोधि वेदं स्वस्वरूपवन्नित्यमेव पूर्वानुपूर्वीविशिष्टं स्मृत्वाऽऽविष्करोति । अतो देवादीनां ब्रह्मविद्याधिकारे न कश्चिद्विरोधः ॥ २९ ॥ इति प्रमिताधिकरणगर्भे देवताधिकरणम् ॥ 7 ॥

९५. **मध्वादिष्वसंभवादनधिकारं जैमिनिः ।** छान्दोग्ये * असौ वा आदित्यो देवमधु * इत्युपक्रम्य * तद्यत्प्रथमममृतं तद्वसव उपजीवन्ति * इत्युक्त्वा, * स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति * इत्यादिना ऋग्यजुस्सामादिवेदोदितकर्मसंपाद्यरसाधारतया मधुमयस्यादित्यस्य पूर्वदक्षिणपश्चिमोत्तरोर्ध्वदिशान्वसुरुद्रादित्यमरुत्साध्यनाम्नां देवगणानां भोग्यत्वेनाभिधाय, तैर्भुज्यमानाकारेणादित्यांशानुपास्यानुपदिश्य, तानेवादित्यांशान् तथाभूतान्प्राप्यानुपदिशति । एवमादिषूपासनेषु वस्वादित्यादीनामधिकारोऽस्ति, न वेति संशयः । नास्त्यधिकार इति पूर्वः पक्षः, वस्वादीनामुपास्यान्तर्गतत्वेन कर्मकर्तृभावविरोधात्, प्राप्यस्य वसुत्वादेः प्राप्तत्वाच्च । राद्धान्तस्तु— ब्रह्मण एव तदवस्थस्योपास्यत्वाद्वस्वादीनां सतां स्वावस्थब्रह्मानुसन्धानाविरोधात्, कल्पान्तरे वसुत्वादेः प्राप्यत्वाविरोधाच्च वस्वादीनामधिकारस्संभवतीति । सूत्रार्थस्तु— मधुविद्यादिषु वस्वादीनामनधिकारं जैमिनिर्मन्यते, असंभवात्— वस्वादीनामेवोपास्यानामुपासकत्वासंभवात्, वसुत्वादेः प्राप्तत्वादेव प्राप्यत्वासंभवाच्च ॥ ३० ॥

९६. **ज्योतिषि भावाच्च ।** * तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् * इति ज्योतिषि— परस्मिन् ब्रह्मणि देवमनुष्ययोरधिकारसाधारण्ये सत्यपि, ज्योतिषां ज्योतिः परं ब्रह्म देवा उपासते इति विशेषवचनं वस्वादीनां कर्मकर्तृभावविरोधात्तेषु तेषामनधिकारं द्योतयति । देवाः इति सामान्यवचनञ्च वस्वादिविशेषविषयमित्यवगम्यते अन्येषामविरोधात् ॥ ३१ ॥

९७. **भावं तु बादरायणोऽस्ति हि ।** तु शब्दः पक्षं व्यावर्तयति । वस्वादीनां मधुविद्यादिष्वधिकारसद्भावं भगवान् बादरायणो मन्यते । अस्ति हि वस्वादीनामेवोपास्यत्वं प्राप्यत्वं च । इदानीं वसूना-

Digitization by Arya Samaj Charitable Foundation, Chennai

मेव सतां कल्पान्तरे वसुत्वस्य प्राप्यत्वसंभवात्प्राप्यत्वं संभवति । स्वात्मनां ब्रह्मभावानुसन्धानसंभवादुपास्यत्वं च संभवति । * य एतामेव ब्रह्मोपनिषदं वेद * इति हि कृत्स्नाया मधुविद्यायाः ब्रह्मविद्यात्वमवगम्यते ॥ ३२ ॥

इति प्रमिताधिकरणगर्भे मध्वधिकरणम् ॥ ४ ॥

९८. **शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ।** ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति नेति संशयः । अस्तीति पूर्वः पक्षः, अर्थित्वसामर्थ्यसंभवात् ; शूद्रस्यानग्निविद्यत्वेऽपि मनोवृत्तिमात्रत्वादुपासनस्य संभवति हि सामर्थ्यम् । ब्रह्मस्वरूपतदुपासनप्रकारज्ञानं चेतिहासपुराणश्रवणादेव निष्पद्यते । अस्ति हि शूद्रस्यापीतिहासपुराणश्रवणानुज्ञा * श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः * इति । तथा तत्रैव विदुरादीनां ब्रह्मनिष्ठत्वं दृश्यते । उपनिषत्स्वपि * आजहारेमाश्शूद्रानेनैव मुखेनालापयिष्यथाः * इति शूद्रशब्देनामन्त्र्य ब्रह्मविद्योपदेशदर्शनाच्छूद्रस्यापीहाधिकारस्सूच्यते । राद्धान्तस्तु— उपासनस्य मनोवृत्तिमात्रत्वेऽप्यनधीतवेदस्य शूद्रस्य उपासनोपायभूतज्ञानासंभवात् न सामर्थ्यसंभवः । कर्मविधिवदुपासनाविधयोऽपि त्रैवर्णिकविषयाध्ययनगृहीतस्वाध्यायोत्पन्नज्ञानमेवोपासनोपायतया स्वीकुर्वते । इतिहासादयोऽपि स्वाध्यायसिद्धमेव ज्ञानमुपबृंहयन्तीति ततोऽपि नास्य ज्ञानलाभः । श्रवणानुज्ञा तु पापक्षयादिफला । विदुरादीनां तु भवान्तरवासनया ज्ञानलाभात् ब्रह्मनिष्ठत्वम् । शूद्रेत्यामन्त्रणमपि न चतुर्थवर्णत्वेन ; अपि तु ब्रह्मविद्यावैकल्याच्छुगस्य संजातेति । अतो न शूद्रस्याधिकारः । सूत्रार्थस्तु— ब्रह्मविद्यावैकल्येन हंसोक्तानादरवाक्यश्रवणात् तदैवाचार्यं प्रत्याद्रवणाच्चाचार्येण तस्य शुश्रूषोर्विद्याऽलाभकृता शुक्सूच्यते । हिशब्दो हेतौ । यस्मादस्य शुक्सूच्यते, अतश्शोचनाच्छूद्र इति कृत्वा आचार्यो रैकः जानश्रुतिं शूद्रेत्यामन्त्रयते ; न जातियोगेनेत्यर्थः ॥ ३३ ॥

९९. **क्षत्रियत्वगतेश्च ।** अस्य शुश्रूषोः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्रेत्यामन्त्रणम् । प्रकरणप्रक्रमे हि * बहुदायी * इत्यादिना दानपतित्वबहुतरपक्वान्नदायित्वक्षत्तृप्रेषणबहुग्रामादिप्रदानैरस्य जानश्रुतेश्शुश्रूषोः क्षत्रियत्वं प्रतीतम् ॥ ३४ ॥

१००. **उत्तरत्र चैत्ररथेन लिङ्गात् ।** उपरिष्टाच्चास्यां विद्यायां ब्राह्मणक्षत्रिययोरेवान्वयो दृश्यते * अथ ह शौनकं च कापेयमभिप्रतारिणञ्च * इत्यादिना । अभिप्रतारी हि चैत्ररथः क्षत्रियः । अभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च कापेयसाहचर्याल्लिङ्गादवगम्यते ; प्रकरणान्तरे हि कापेयसहचारिणः चैत्ररथत्वं क्षत्रियत्वञ्चावगतम् * एतेन वै चैत्ररथं कापेया अयाजयन् * इति, * तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायत * इति च । अतोऽस्यां विद्यायामन्वितो ब्राह्मणादितरो जानश्रुतिरपि क्षत्रियो भवितुमर्हति ॥ ३५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१०१. **संस्कारपरामर्शात्तदभावाभिलापाच्च** । विद्योपदेशे * उप त्वा नेष्ये * इत्युपनयनसंस्कारपरामर्शात्, शूद्रस्य तदभाववचनाच्चानधिकारः । * न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति * इति हि निषिध्यते ॥ ३६ ॥

१०२. **तदभावनिर्धारणे च प्रवृत्तेः** । * नैतदब्राह्मणो विवक्तुमर्हति समिधं सौम्याहर * इति शुश्रूषोर्जाबालेश्शूद्रत्वाभावनिश्चय एवोपदेशे प्रवृत्तेर्नाधिकारः ॥ ३७ ॥

१०३. **श्रवणाध्ययनार्थप्रतिषेधात्** । शूद्रस्य श्रवणाध्ययनादीनि हि प्रतिषिध्यन्ते * तस्माच्छूद्रसमीपे नाध्येतव्यमिति । अनुपशृण्वतोऽध्ययनादिर्न संभवति ॥ ३८ ॥

१०४. **स्मृतेश्च** । स्मर्यते च शूद्रस्य वेदश्रवणादौ दण्डः * अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः * इति ॥ ३९ ॥ इति प्रमिताधिकरणगर्भे अपशूद्राधिकरणम् ॥ 9 ॥

प्रासङ्गिकं परिसमाप्य प्रकृतं परिसमापयति—

१०५. **कम्पनात्** । अङ्गुष्ठप्रमितप्रकरणमध्ये * यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम् । महद्भयं वज्रमुद्यतम् * भयादस्याग्निस्तपति * इत्यादौ प्राणशब्दनिर्दिष्टाङ्गुष्ठप्रमितजनितभयनिमित्तादग्निवायुसूर्यप्रभृतिकृत्स्नजगत्कम्पनाच्छ्रूयमाणादङ्गुष्ठप्रमितः परमात्मैवेति निश्चीयते ॥ ४० ॥

१०६. **ज्योतिर्दर्शनात्** । * अस्मिन्नेव प्रकरणे तत्संबन्धितया * न तत्र सूर्यो भाति * इत्यारभ्य * तस्य भासा सर्वमिदं विभाति * इति सर्वेषां छादकस्यानवधिकातिशयस्य भाश्शब्दाभिहितस्य ब्रह्मभूतस्य परस्य ज्योतिषो दर्शनाच्च अङ्गुष्ठप्रमितः परमात्मा ॥ ४१ ॥ इति प्रमिताधिकरणम् ॥ 6 ॥

१०७. **आकाशोऽर्थान्तरत्वादिव्यपदेशात्** । छान्दोग्ये * आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा * इत्यत्राकाशशब्दनिर्दिष्टः किं मुक्तात्मा, उत परमात्मेति संशयः । मुक्त इति पूर्वः पक्षः, * धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि * इति मुक्तस्यानन्तरप्रकृतत्वात् । राद्धान्तस्तु– * नामरूपयोर्निर्वहिता ते यदन्तरेति स्वयमस्पृष्टनामरूपतया नामरूपयोर्निर्वोढृत्वेन श्रूयमाणोऽयमाकाशो बद्धमुक्तोभयावस्थात्प्रत्यगात्मनोऽर्थान्तरत्वात्परमात्मैव । सूत्रार्थस्तु— आकाशः परमात्मा, तस्य नामरूपयोर्निर्वोढृत्वतदस्पर्शलक्षणार्थान्तरत्वव्यपदेशात् । प्रत्यगात्मनो ह्यर्थान्तरभूत एव नामरूपयोर्निर्वोढा । बद्धावस्थस्तावन्नामरूपाभ्यां स्पृष्टस्तत्परवशश्चेति न निर्वोढा; मुक्तस्यापि जगद्व्यापाररहितत्वान्न निर्वोढृत्वम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आदिशब्देन निरुपाधिकब्रह्मत्वामृतत्वात्मत्वादीनि गृह्यन्ते ; तानि निरुपाधिकानि मुक्तस्यापि न संभवन्ति ॥ ४२ ॥

ननु तत्त्वमस्यादिनैक्यव्यपदेशात् , * नेह नानाऽस्तीति भेदप्रतिषेधाच्च न प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मेत्याशङ्क्याह—

१०८. सुषुप्त्युत्क्रान्त्योर्भेदेन । * व्यपदेशादिति वर्तते । * प्राज्ञेनात्मना संपरिष्वक्तः * प्राज्ञेनाऽऽत्मनाऽन्वारूढः * इति सुषुप्त्युत्क्रान्त्योः लुप्तसकलविशेषविज्ञानात्प्रत्यगात्मनस्तदानीमेव सर्वज्ञतया भेदव्यपदेशात्प्रत्यगात्मनोऽर्थान्तरभूत एव परमात्मा ॥ ४३ ॥

१०९. पत्यादि शब्देभ्यः । परिष्वञ्जके प्राज्ञे श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्चायं प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा, * सर्वस्याधिपतिस्सर्वस्य वशी सर्वस्येशानः * इत्यादौ । ऐक्योपदेशभेदप्रतिषेधौ तु ब्रह्मकार्यत्वनिबन्धनाविति * तज्जलानिति * सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिभिरेव व्यक्तौ ॥ ४४ ॥ इति अर्थान्तरत्वादिव्यपदेशाधिकरणम् ॥ 10 ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य तृतीयः पादः ॥

॥ अथ प्रथमाध्याये चतुर्थः पादः ॥

११०. आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च । कठवल्लीषु * इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ * इत्यत्र किं साङ्ख्योक्तं प्रधानमव्यक्तशब्दाभिधेयम् , उत नेति संशयः । प्रधानमिति पूर्वः पक्षः, * महतः परमित्यादितत्तन्त्रप्रक्रियाप्रत्यभिज्ञानात् , * पुरुषान्न परं किञ्चिदिति पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्च । राद्धान्तस्तु— नाव्यक्तशब्देन प्रधानमिह गृह्यते । पूर्वत्र * आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिना उपासनानिर्वृत्तये वश्येन्द्रियत्वापादानाय, ये आत्मशरीरबुद्धिमनइन्द्रियविषयाः, रथिरथसारथिप्रग्रहहयगोचरत्वेन रूपिता ; तेषु वशीकार्यत्वे पराः * इन्द्रियेभ्यः परा इत्यादिनोच्यन्ते ; तत्र चेन्द्रियादयः स्वशब्देनैव गृह्यन्ते, रथत्वेन रूपितं शरीरमिहाव्यक्तशब्देन गृह्यत इति नेह तत्तन्त्रप्रक्रियाप्रत्यभिज्ञागन्धः । * अव्यक्तात्पुरुषः पर इति च न पञ्चविंशकः ;

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि तु प्राप्यः परमात्मैव। अन्तर्यामितयोपासनस्याप्युपायभूत इति स इह वशीकार्यकाष्ठात्वेन * पुरुषान्न परं किञ्चिदित्युक्तः ॥

सूत्रार्थस्तु– एकेषां– कठानां शाखायाम्, आनुमानिकं— प्रधानं जगत्कारणत्वेन * महतः परमव्यक्तमित्याम्नायते इति चेत्; तन्न, अव्यक्तशब्देन शरीराख्यरूपकविन्यस्तस्य गृहीतेः— पूर्वत्रात्मादिषु रथिरथादिरूपकविन्यस्तेषु रथत्वेन रूपितस्य शरीरस्यात्राव्यक्तशब्देन गृहीतेरित्यर्थः। अतो वशीकार्यत्वे परा इहोच्यन्ते। दर्शयति चैनमर्थं वाक्यशेषः, इन्द्रियादीनां नियमनप्रकारं प्रतिपादयन् * यच्छेद्वाङ्मनसी * इत्यादिः ॥

कथमव्यक्तशब्दस्य शरीरं वाच्यं भवतीत्याशङ्क्याह—

१११. **सूक्ष्मं तु तदर्हत्वात्।** तुशब्दोऽवधारणे। सूक्ष्मम्– अव्यक्तमेवावस्थान्तरापन्नं शरीरं भवति, तदवस्थस्यैव कार्यार्हत्वात् ॥ २ ॥

यदि रूपकविन्यस्ता आत्मादय एव वशीकार्यत्वे पराः * इन्द्रियेभ्यः परा इत्यादिना गृह्यन्ते; तर्हि * अव्यक्तात्पुरुषः परः, पुरुषान्न परं किञ्चिदिति पुरुषग्रहणं किमर्थमित्यत आह—

११२. **तदधीनत्वादर्थवत्।** अन्तर्यामिरूपेणावस्थितपुरुषाधीनत्वादात्मादिकं सर्वं रथिरथत्वादिना रूपितम् अर्थवत्— प्रयोजनवद्भवति। अत उपासननिर्वृत्तौ वशीकार्यकाष्ठा परमपुरुष इति तदर्थमिह रूपकविन्यस्तेषु परिगृह्यमाणेषु पुरुषस्यापि ग्रहणम्। उपासननिर्वृत्त्युपायकाष्ठा पुरुषः प्राप्यश्चेति * पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरित्युक्तम्। भाष्यप्रक्रियया वा नेयमिदं सूत्रम्— परमपुरुषशरीरतया तदधीनत्वात् भूतसूक्ष्ममव्याकृतमर्थवदिति तदिहाव्यक्तशब्देन गृह्यते; नाब्रह्मात्मकं स्वनिष्ठं तन्त्रसिद्धमिति ॥ ३ ॥

११३. **ज्ञेयत्वावचनाच्च।** यदि तन्त्रसिद्धप्रक्रियेहाभिप्रेता; तदाऽव्यक्तस्यापि ज्ञेयत्वं वक्तव्यम्। * व्यक्ताव्यक्तज्ञविज्ञानात् * इति हि तत्प्रक्रिया। न ह्यव्यक्तमिह ज्ञेयत्वेनोक्तम्, अतश्चात्र न तन्त्रप्रक्रियागन्धः ॥ ४ ॥

११४. **वदतीति चेन्न प्राज्ञो हि प्रकरणात्।** * अशब्दमस्पर्शमित्युपक्रम्य * महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते * इति प्रधानस्य ज्ञेयत्वमनन्तरमेव वदतीयं श्रुतिरिति चेत्; तन्न, * अशब्दमस्पर्शमित्यादिना प्राज्ञः— परमपुरुष एव ह्यत्रोच्यते; * सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् * एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते * इति प्राज्ञस्यैव प्रकृतत्वात् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

११५. **त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।** अस्मिन्प्रकरणे * येयं प्रेते विचिकित्सा मनुष्ये * इत्यारभ्यासमाप्तेः परमपुरुषतदुपासनोपासकानां त्रयाणामेवैवं ज्ञेयत्वेन उपन्यासः प्रश्नश्च दृश्यते, न प्रधानादेस्तान्त्रिकस्यापि । अतश्च न प्रधानमिह ज्ञेयत्वेनोक्तम् ॥ ६ ॥

११६. **महद्वच्च ।** यथा * बुद्धेरात्मा महान्परः * इत्यात्मशब्दसामानाधिकरण्यान्महच्छब्देन न तान्त्रिकं महत्तत्त्वं गृह्यते, एवमव्यक्तशब्देनापि न तान्त्रिकं प्रधानम् ॥ ७ ॥ इति आनुमानिकाधिकरणम् ।

११७. **चमसवदविशेषात् ।** श्वेताश्वतरे * अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ इत्यत्र किमजाशब्देन तन्त्रसिद्धा प्रकृतिरभिधीयते, उत ब्रह्मात्मिकेति संशयः । तन्त्रसिद्धेति पूर्वः पक्षः, * अजामेकामित्यस्या अकार्यत्वप्रतीतेः, बह्वीनां प्रजानां स्वातन्त्र्येण कारणत्वश्रवणाच्च । राद्धान्तस्तु— न तन्त्रसिद्धायाः प्रकृतेरत्र ग्रहणम्, जननविरहश्रवणमात्रेण तन्त्रसिद्धायाः प्रकृतेः प्रतीतिनियमाभावात् । न हि यौगिकानां शब्दानामर्थप्रकरणादिभिर्विशेष्यव्यवस्थापकैर्विना विशेषे वृत्तिनियमसंभवः ; न चास्यास्स्वातन्त्र्येण सृष्टिहेतुत्वमिह प्रतीतम्, अपि तु सृष्टिहेतुत्वमात्रम् ; तत् ब्रह्मात्मिकायाश्च न विरुद्धम् । अत्र तु ब्रह्मात्मिकाया एव शाखान्तरसिद्धायाः एतत्सरूपमन्त्रोदितायाः प्रत्यभिज्ञानात्सैवेति निश्चीयते ॥

सूत्रार्थस्तु— नायमजाशब्दस्तन्त्रसिद्धप्रधानविषयः ; कुतः ? चमसवदविशेषात् ; यथा * अर्वाग्बिलश्चमसः * इति मन्त्रे चमनसाधनत्वयोगेन प्रवृत्तस्य चमसशब्दस्य शिरसि प्रवृत्तौ * यथेदं तच्छिर एष ह्यर्वाग्बिलश्चमसः * इति वाक्यशेषे विशेषो दृश्यते ; तथा * अजामेकामित्यजाशब्दस्य तन्त्रसिद्धप्रधाने वृत्तौ विशेषाभावान्न तद्ग्रहणं न्याय्यम् ॥ ८ ॥

अस्ति तु ब्रह्मात्मिकाया एव ग्रहणे विशेष इत्याह—

११८. **ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ।** ज्योतिः— ब्रह्म यस्याः उपक्रमः कारणम्, सा ज्योतिरुपक्रमा । तुशब्दोऽवधारणे । ब्रह्मकारणिकैवैषाऽजा ; तथा ह्यधीयत एके, यथारूपोऽयमजायाः प्रतिपादको मन्त्रः ; तथारूपमेव मन्त्रं ब्रह्मात्मिकायाः तस्याः प्रतिपादकमधीयत एके शाखिनः * अणोरणीयान्महतो महीयान् * इत्यादिना ब्रह्म प्रतिपाद्य, * सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्समिधस्सप्तजिह्वाः । सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयान्निहितास्सप्तसप्त । अतस्समुद्रा गिरयश्च सर्वे * इत्यादिना ब्रह्मण उत्पन्नत्वेन ब्रह्मात्मकतया सर्वानुसन्धानविधानसमये * अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् * इति प्रतिपाद्यमाना ब्रह्मात्मिकैवेति तत्प्रत्यभिज्ञानादिहाप्यजा ब्रह्मात्मिकैवेति निश्चीयते ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अजात्वं ज्योतिरुपक्रमात्वं च कथमुपपद्यते इत्यत आह—

१११. **कल्पनोपदेशाच्च मध्वादिवदविरोधः।** कल्पना सृष्टिः, * सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् * इत्यादिदर्शनात्। * अस्मान्मायी सृजते विश्वमेतत् * इति हि सृष्टिरिहोपदिश्यते। प्रलयवेलायामेषा प्रकृतिः परमपुरुषाश्रया कारणावस्था अतिसूक्ष्मावयवा शक्तिरूपेणावतिष्ठते; तदवस्थाभिप्रायेणास्या अजात्वम्। सृष्टिवेलायां पुनस्तच्छरीरात् ब्रह्मणः स्थूलावस्था जायते; तदवस्था ज्योतिरुपक्रमेति न कश्चिद्विरोधः। मध्वादिवत्— यथा आदित्यस्यैकस्यैव कार्यावस्थायाम् * असौ वा आदित्यो देवमधु * इति वस्वादिभोग्यरसाधारतया मधुत्वम्, तस्यैव * अथ तत ऊर्ध्वं उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता * इत्यादिना नामरूपप्रहाणेन कारणावस्थायां सूक्ष्मस्यैकस्यैवावस्थानं न विरुध्यते, तद्वत्॥ १०॥ इति चमसाधिकरणम्॥ 2॥

१२०. **न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च।** वाजसनेयके * यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेवंमन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् * इत्यत्र किं साङ्ख्योक्तानि पञ्चविंशतितत्त्वानि प्रतिपाद्यन्ते, उत नेति संशयः। तान्येवेति पूर्वः पक्षः। * पञ्च पञ्चजना इति हि पञ्चसङ्ख्याविशिष्टाः पञ्चजनाः पञ्चविंशतिस्संपद्यन्ते। कथम्? पञ्चजना इति समाहारविषयोऽयं समासः; पञ्चपूल्यः इतिवत्। पञ्चभिर्जनैरारब्धस्समूहः पञ्चजनः। पञ्चजनीत्यर्थः। लिङ्गव्यत्ययश्छान्दसः। पञ्चजना इति बहुवचनात्समूहबहुत्वं चावगम्यते। ते च कतीत्यपेक्षायां पञ्च पञ्चजनाः इति पञ्चशब्दविशेषिताः पञ्चजनसमूहा इति पञ्चविंशतिस्तत्त्वानि भवन्ति। मोक्षाधिकारात्तान्त्रिकाण्येवेति निश्चीयन्ते। एवं निश्चिते सति * तमेवं मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमिति पञ्चविंशकमात्मानं ब्रह्मभूतं विद्वानमृतो भवतीति। राद्धान्तस्तु— * यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः * इति यच्छब्दनिर्दिष्टब्रह्माधारत्वात्तदाधेयानां तत्त्वानां ब्रह्मात्मकत्वमवगम्यते; यच्छब्दनिर्दिष्टं च * तमेवं मन्य आत्मानम् (इति तच्छब्देन परामृश्य, * ब्रह्मामृतोऽमृतम्) इति निर्देशात् ब्रह्मेति निश्चीयते। अतो न तान्त्रिकप्रसङ्गः॥

सूत्रार्थस्तु— * पञ्च पञ्चजना इत्यत्र पञ्चविंशतिसङ्ख्योपसङ्ग्रहादपि न तान्त्रिकाणीमानि तत्त्वानि, यस्मिन्निति यच्छब्दनिर्दिष्टब्रह्माधारतया तान्त्रिकेभ्यो नानाभावात्— एषां तत्त्वानां पृथग्भावादित्यर्थः। अतिरेकाच्च— तान्त्रिकेभ्यस्तत्त्वातिरेकप्रतीतेश्च: यस्मिन्निति निर्दिष्टमतिरिक्तमाकाशश्च। * न सङ्ख्योपसङ्ग्रहादपीत्यपिशब्देन सङ्ख्योपसङ्ग्रहो न संभवतीत्याह, आकाशस्य पृथङ्निर्देशात्। अतः पञ्चजनाः इति न समाहारविषयः, अपि तु * दिक्सङ्ख्ये संज्ञायाम् * इति संज्ञाविषयः; पञ्चजनसंज्ञिताः केचित्, ते च पञ्चैवेति। सप्त सप्तर्षयः इतिवत्॥ ११॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१२१. **प्राणादयो वाक्यशेषात्।** पञ्चजनसंज्ञिताः पञ्च पदार्थाः प्राणादय इति वाक्यशेषादवगम्यते। * प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः * इति। ब्रह्मात्मकानीन्द्रियाणि पञ्च पञ्चजना इति निर्दिष्टानि। जननाच्च जनाः॥ १२॥

काण्वपाठेऽन्नवर्जितानां चतुर्णां निर्देशात् पञ्चजनसंज्ञितानीन्द्रियाणीति कथं ज्ञायत इत्यत्राह—

१२२. **ज्योतिषैकेषामसत्यन्ने।** एकेषां— काण्वानां वाक्यशेषे असत्यन्नशब्दे वाक्योपक्रमगतेन * तं देवा ज्योतिषां ज्योतिरिति ज्योतिश्शब्देन पञ्चजनाः इन्द्रियाणीति विज्ञायन्ते। कथम्? * ज्योतिषां ज्योतिरिति ब्रह्मणि निर्दिष्टे प्रकाशकानां प्रकाशकं ब्रह्मेति प्रतीयते। के ते प्रकाशका इत्यपेक्षायां * पञ्च पञ्चजनाः * इत्यनिर्ज्ञातविशेषाः पञ्चसंख्यासंख्याताः प्रकाशकानि पञ्चेन्द्रियाणीत्यवगम्यते। अतः * यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः * इतीन्द्रियाणि भूतानि च ब्रह्मणि प्रतिष्ठितानीति न तान्त्रिकतत्त्वगन्धः॥ १३॥ इति सङ्ख्योपसंग्रहाधिकरणम्॥ ३॥

१२३. **कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।** जगत्कारणवादीनि वेदान्तवाक्यानि किं प्रधानकारणतावादैकान्तानि, उत ब्रह्मकारणतावादैकान्तानीति संशयः। प्रधानकारणतावादैकान्तानीति पूर्वः पक्षः, * सदेव सोम्येदमग्र आसीदिति क्वचित्सत्पूर्विका सृष्टिराम्नायते; अन्यत्र * असदेवेदमग्र आसीत् * असद्वा इदमग्र आसीत् * तथा * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत * इति। अव्याकृतं हि प्रधानम्। अतः प्रधानकारणतावादनिश्चयात्तदेकान्तान्येव। राद्धान्तस्तु— * सत्यं ज्ञानमनन्तं ब्रह्मेत्युपक्रम्य * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिषु सर्वज्ञस्य परस्य ब्रह्मणः कारणत्वप्रतिपादनात्तस्यैव ब्रह्मणः कारणावस्थायां नामरूपविभागसंबन्धितया सद्भावाभावात् असदव्याकृतादिशब्देन व्यपदेश इति ब्रह्मकारणतावादैकान्तान्येव। सूत्रार्थस्तु— आकाशादिपदचिह्नितेषु * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः * इत्यादिषु सर्वज्ञस्य परस्य ब्रह्मणः कारणत्वप्रतिपादनात्, सर्वेषु सृष्टिवाक्येषु यथाव्यपदिष्टस्यैव कारणत्वेनोक्तेः ब्रह्मकारणतावादैकान्तानि। यथाव्यपदिष्टम्— सार्वज्ञ्यादियुक्ततयाऽस्माभिर्व्यपदिष्टम्॥ १४॥

तथा सति * असद्वा इदमग्र आसीदिति किं ब्रवीतीत्यत आह—

१२४. **समाकर्षात्।** * सोऽकामयत, बहु स्यां प्रजायेयेतीति बहुभवनसङ्कल्पपूर्वकं जगत्सृजतो ब्रह्मणस्सर्वज्ञस्य * असद्वा इदमग्र आसीदित्यत्र समाकर्षात् कारणावस्थायां नामरूपसंबन्धित्वाभावेन असदिति ब्रवीति। एवं * तद्धेदं तर्ह्यव्याकृतमासीदित्यादिषु * स एष इहानुप्रविष्ट आनखाग्रेभ्यः *

Digitization by Arya Samaj Charitable Foundation, Chennai

* पश्यत्यचक्षुः * इत्यादिपूर्वापरपर्यालोचनया तत्रतत्र सर्वज्ञस्य समाकर्षो द्रष्टव्यः ॥ १५ ॥ इति कारणत्वाधिकरणम् ॥ 4 ॥

१२५. जगद्वाचित्वात् । कौषीतकिनां * ब्रह्म ते ब्रवाणि * इत्युपक्रम्य * यो वै बालक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः * इत्यत्र वेदितव्यतयोपदिष्टः साङ्ख्यतन्त्रसिद्धः पुरुषः, उत परमात्मेति संशयः । पुरुष एव प्रकृतिवियुक्त इति पूर्वः पक्षः, * यस्य वैतत्कर्मेति पुण्यपापरूपकर्मसंबन्धितयोपलक्षितत्वात् । राद्धान्तस्तु— * यस्य वैतत्कर्मेति कर्मशब्दस्य क्रियत इति व्युत्पत्त्या जगद्वाचित्वात् कृत्स्नं जगद्यस्य कार्यम्, स परमपुरुष एव वेदितव्यतयोपदिष्टो भवतीति । सूत्रमपि व्याख्यातम् ॥ १६ ॥

१२६. जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् । * एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते * इत्यादि भोक्तृत्वरूपजीवलिङ्गात्, * अथास्मिन्प्राण एवैकधा भवति * इति मुख्यप्राणलिङ्गाच्च नायं परमात्मेति चेत्; तस्य परिहारः प्रतर्दनविद्यायामेव व्याख्यातः । पूर्वापरप्रकरणपर्यालोचनया परमात्मपरमिदं वाक्यमिति निश्चिते सति अन्यलिङ्गानि तदनुगुणतया नेतव्यानीत्यर्थः ॥ १७ ॥

ननु * तौ ह सुप्तं पुरुषमाजग्मतुः * इति प्राणनामभिरामन्त्रणाश्रवणयष्टिघातोत्थापनादिना शरीरेन्द्रियप्राणाद्यतिरिक्तजीवात्मसद्भावप्रतिपादनपरमिदं वाक्यमित्यवगम्यत इत्यत उत्तरं पठति—

१२७. अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके । तुशब्दश्शङ्कानिवृत्त्यर्थः । जीवसङ्कीर्तनम् अन्यार्थम्— जीवातिरिक्तब्रह्मसद्भावप्रतिबोधनार्थमिति प्रश्नप्रतिवचनाभ्यामवगम्यते । प्रश्नस्तावज्जीवप्रतिपादनानन्तरं * क्वैष एतद्बालाके पुरुषोऽशयिष्ट * इत्यादिकः सुषुप्तजीवाश्रयविषयतया परमात्मपर इति निश्चितः । प्रतिवचनमपि * अथास्मिन्प्राण एवैकधा भवति * इत्यादिकं परमात्मविषयमेव । सुप्तपुरुषाश्रयतया हि प्राणशब्दनिर्दिष्टः परमात्मैव * सता सोम्य तदा संपन्नो भवतीत्यादिभ्यः । जैमिनिग्रहणमुक्तस्यार्थस्य पूज्यत्वाय । अपि चैवमेके— एके वाजसनेयिनः इदमेव बालाक्यजातशत्रुसंवादगतं प्रश्नप्रतिवचनरूपं वाक्यं परमात्मविषयं स्पष्टमधीयते * क्वैष एतदित्यादि * य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते * इत्येतदन्तम् ॥ १८ ॥ इति जगद्वाचित्वाधिकरणम् ॥ 5 ॥

१२८. वाक्यान्वयात् । बृहदारण्यके मैत्रेयीब्राह्मणे * न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय * इत्यारभ्य, * आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः * इत्यादौ द्रष्टव्यतया निर्दिष्टः पुरुषः तन्त्रसिद्धः, उत परमात्मेति संशयः । तन्त्रसिद्धः पञ्चविंशक एवेति पूर्वः पक्षः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पतिजायापुत्रवित्तमित्रपश्वादिप्रियसंबन्ध्यात्मा न परमात्मा भवितुमर्हति । स एव हि * आत्मा वा अरे द्रष्टव्य इति प्रतिपाद्यते । राद्धान्तस्तु– न पत्यादीनां कामाय पत्यादयः प्रिया भवन्ति, आत्मनस्तु कामायेत्युक्त्वा, * आत्मा वा अरे द्रष्टव्यः इति निर्दिष्ट आत्मा, जीवातिरिक्तस्सत्यसङ्कल्पस्सर्वज्ञः परमात्मैव; यत्सङ्कल्पायत्तं पत्यादीनां स्वसंबन्धिनः प्रति प्रियत्वम्, स हि सत्यसंकल्पः परमात्मा । आत्मज्ञानेन सर्वज्ञानादयोऽपि वक्ष्यमाणाः परमात्मन्येव संभवन्ति ।

सूत्रार्थस्तु— वाक्यस्य कृत्स्नस्य परमात्मन्येवान्वयात् द्रष्टव्यतया निर्दिष्ट आत्मा परमात्मैव * अमृतत्वस्य तु नाशाऽस्ति वित्तेन * आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम् * इदं सर्वं यदयमात्मा * तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः * येनेदं सर्वं विजानाति तं केन विजानीयात् * इति हि कृत्स्नस्य वाक्यस्य परमात्मन्यन्वयो दृश्यते ॥ १६ ॥

* एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीति जीवलिङ्गस्य मतान्तरेण निर्वाहमाह—

१२९. **प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ।** एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये जीवस्य परमात्मकार्यतया परस्मादात्मनोऽनन्यो जीव इति जीवशब्देन परमात्मनोऽभिधानमित्याश्मरथ्यमतम् ॥ २० ॥

१३०. **उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ।** * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इति शरीरात् उत्क्रमिष्यतः अस्य जीवस्य परमात्मभावाज्जीवशब्देन परमात्मनोऽभिधानमिति औडुलोमिराचार्यो मेने ॥ २१ ॥

१३१. **अवस्थितेरिति काशकृत्स्नः ।** * य आत्मनि तिष्ठन् * इत्यादिभिर्जीवात्मन्यन्तरात्मतया परमात्मनः अवस्थितेः जीवात्मशब्दस्य परमात्मनि पर्यवसानाज्जीवात्मशब्देन परमात्मनोऽभिधानमिति काशकृत्स्न आचार्यो मन्यते । इदमेव सूत्रकाराभिमतमित्यवगम्यते, त्रयाणामन्योन्यविरोधात्, इतः परमवचनाच्च ॥ २२ ॥ इति वाक्यान्वयाधिकरणम् ॥ 6 ॥

१३२. **प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।** परं ब्रह्म किं जगतो निमित्तकारणमात्रम्, उतोपादानकारणमपीति संशयः । निमित्तकारणमात्रमिति पूर्वः पक्षः, मृत्कुलालादौ निमित्तोपादानयोर्भेददर्शनात्; * अस्मान्मायी सृजते विश्वमेतत् * इत्यादिभिर्भेदप्रतिपादनात्, ब्रह्मणोऽविकारत्वश्रुतिविरोधाच्च । राद्धान्तस्तु– * येनाश्रुतं श्रुतमिति ब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञानान्यथानुपपत्त्या * यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयमिति मृत्तत्कार्यदृष्टान्तेन तदुपपादनाच्च जगदुपादानकारणमपि ब्रह्मैवेति विज्ञायते । प्रमाणान्तरावसितसकलवस्तुविलक्षणस्य शास्त्रैकसमधिगम्यस्य परस्य ब्रह्मणस्सर्वज्ञस्य सर्वशक्तेः कार्यकारणोभयावस्थायामपि

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वशरीरभूतचिदचित्प्रकारतयाऽवस्थितस्यैकस्यैव निमित्तत्वमुपादानत्वं चाविरुद्धम्। शरीरभूताचिद्वस्तुगतो विकार इति कार्यावस्थावस्थितस्यापि शरीरिणः परमात्मनोऽविकारित्वं सिद्धमेव। चिदचिद्वस्तुशरीरस्य ब्रह्मण एवोपादानत्वेऽपि ब्रह्मण्यपुरुषार्थविकारास्पर्शप्रदर्शनाय हि * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति व्यपदेशः। प्रतिज्ञादृष्टान्तानुपरोधात् उपादानं च ब्रह्मैवेति सूत्रार्थः ॥ २३ ॥

१३३. **अभिध्योपदेशाच्च।** * सोऽकामयत बहु स्याम् * तदैक्षत बहु स्यां प्रजायेयेति स्रष्टुर्ब्रह्मणस्स्वस्यैव जगदाकारेण बहुभवनचिन्तनोपदेशाच्च जगदुपादानं निमित्तं च ब्रह्मैवेति निश्चीयते ॥ २४ ॥

१३४. **साक्षाच्चोभयाम्नानात्।** * किं स्विद्वनं क उ स वृक्ष आसीत् * इत्यादिना जगदुपादाननिमित्तादौ पृष्टे * ब्रह्म वनं ब्रह्म स वृक्ष आसीत् * ब्रह्माध्यतिष्ठत् * इत्युपादानं निमित्तं चोभयं ब्रह्मैवेति हि साक्षादाम्नायते; अतश्चोभयं ब्रह्म ॥ २५ ॥

१३५. **आत्मकृतेः।** * तदात्मानं स्वयमकुरुतेति स्रष्टुरात्मन एव जगदाकारेण कृतिरुपदिश्यते; अतश्चोभयं ब्रह्मैव। नामरूपभावाभावाभ्यामेकस्य कर्मकर्तृभावो न विरुद्धः ॥ २६ ॥

यद्यात्मानमेव ब्रह्म जगदाकारं करोति, तर्हि ब्रह्मणोऽपहतपाप्मत्वादिकमनवधिकातिशयानन्दस्वरूपत्वं सर्वज्ञत्वमित्यादि सर्वं विरुध्यते, अज्ञत्वासुखित्वकर्मवश्यत्वादिविपरीतरूपत्वाज्जगत इत्यत उत्तरं पठति—

१३६. **परिणामात्।** अज्ञब्रह्मविवर्तवादे हि तद्भवत्येव, अज्ञानस्य तत्कार्यरूपानन्तापुरुषार्थस्य च वेदान्तजन्यज्ञाननिवर्त्यस्य ब्रह्मण्येवान्वयात् तदा शास्त्रस्य भ्रान्तजल्पितत्वापाताच्च। अविभक्तनामरूपसूक्ष्मचिदचिद्वस्तुशरीरकस्य ब्रह्मणो विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरत्वेन परिणामो हि वेदान्तेषूपदिश्यते, * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत * इत्येवमादिभिः। अपुरुषार्थाश्च विकाराश्शरीरभूतचिदचिद्वस्तुगताः। कारणावस्थायां कार्यावस्थायां चात्मभूतं ब्रह्म अपहतपाप्मत्वादिगुणकमेव। स्थूलसूक्ष्मावस्थस्य कृत्स्नस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वम्, ब्रह्मणश्च तदात्मत्वम् * यः पृथिव्यां तिष्ठन्.... यस्य पृथिवी शरीरमित्यारभ्य * यस्याव्यक्तं शरीरम् यस्याक्षरं शरीरम् यस्य मृत्युश्शरीरम् एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देवः * इत्येवमादिश्रुतिशतसमधिगतम्। अतः सर्वमनवद्यम् ॥ २६ ॥

१३७. **योनिश्च हि गीयते।** * यद्भूतयोनिं परिपश्यन्ति धीराः * कर्तारमीशं पुरुषं ब्रह्मयोनिम् * इत्यादिषु सर्वस्य भूतजातस्य परमपुरुषो योनित्वेन गीयते। हिशब्दो हेतौ। यस्माद्योनिरिति गीयते, तस्माच्चोपादानमपि ब्रह्म। योनिशब्दश्चोपादानकारणपर्यायः ॥ २८ ॥ इति प्रकृत्यधिकरणम् ॥ 7 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१३८. एतेन सर्वे व्याख्याता व्याख्याताः । * यतो वा इमानीत्यादिषूदाहृतेषु वाक्येषु * जन्माद्यस्य यतः * इत्यादिनोक्तन्यायकलापेन सर्वे वेदान्ताः ब्रह्मपरा व्याख्याताः । पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ॥ २९ ॥ इति सर्वव्याख्यानाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे प्रथमस्याध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चाध्यायः ॥

श्रीमते रामानुजाय नमः ।

॥ अथ द्वितीयाध्याये प्रथमः पादः ॥

१३९. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् । वेदान्तानां समस्तचिदचिद्वस्तुविलक्षणास्पृष्टहेयगन्धसर्वज्ञताद्यनन्तकल्याणगुणाकरब्रह्मैकपरत्वं प्रतिपादितं कपिलस्मृतिविरोधेन चालयितुं शक्यम्, उत नेति संशयः । शक्यमिति पूर्वः पक्षः, श्रुतिविरुद्धायाः स्मृतेरनादरणीयत्वे स्थितेऽपि वेदान्तवेद्यार्थस्य दुर्ग्रहत्वेन अल्पश्रुतैर्मन्दमतिभिराप्तप्रणीतस्मृत्युपबृंहणेन विना तेषां निश्चयो नोपपद्यते । कपिलस्मृतिः केवलतत्त्वपरेति तयैव ह्युपबृंहणं न्याय्यम् । अन्यथा आप्तप्रणीतायाः केवलतत्त्वपरायास्तस्या अनवकाशप्रसङ्ग इति वेदान्तवेद्यं जगत्कारणं प्रधानम् । राद्धान्तस्तु— वेदान्तस्योपबृंहणापेक्षत्वेऽप्याप्ततममन्वादिस्मृतिभिर्वेदान्ताविरोधिनीभिरेवोपबृंहणं न्याय्यम्, अन्यथा तासां बह्वीनामनवकाशप्रसङ्गो महानयं दोषस्स्यात् । न च तासां धर्मप्रतिपादनांशोपबृंहणत्वेन सावकाशत्वम्, यतो धर्माणामपि स्वरूपं परब्रह्मभूतपरमपुरुषाराधनत्वम् * इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः * * यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत * इत्यादिश्रुतिस्मृतिभिः । सूत्रमपि व्याख्यातम् ॥ १ ॥

अतीन्द्रियार्थसाक्षात्कारसमर्थस्य कपिलस्य वेदान्तानां ब्रह्मपरत्वानुपलब्धेः प्रधानपरत्वमेवाश्रयणीयमित्यत उत्तरं पठति—

१४०. इतरेषां चानुपलब्धेः । इतरेषां मन्वादीनां वेदविदग्रेसराणां सर्वातीन्द्रियार्थसाक्षात्कारसमर्थानां प्रधानपरत्वानुपलब्धेर्ब्रह्मपरत्वोपलब्धेश्च ब्रह्मपरत्वमेवाश्रयणीयम्; वेदान्तप्रतिपन्नार्थविरुद्धायास्तु कपिलोपलब्धेर्भ्रान्तिमूलत्वं कल्पयितव्यम् ॥ २ ॥ इति स्मृत्यधिकरणम् ॥ 1 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१४१. **एतेन योगः प्रत्युक्तः ।** किं वेदान्तानां योगस्मृत्योपबृंहणं न्याय्यम्, उत नेति संशयः । न्याय्यमिति पूर्वः पक्षः, कृत्स्नवेदप्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वाद्योगस्य, ईश्वरसद्भावाभ्युपगमाच्च । अतो योगस्मृत्योपबृंहितत्वेन वेदान्तानामब्रह्मात्मकप्रधानोपादानप्रतिपादनपरत्वम् । राद्धान्तस्तु— कपिलस्मृतिवद्वेदविरुद्धत्वाविशेषादनादरणीयैव योगस्मृतिः ; हिरण्यगर्भस्यापि क्षेत्रज्ञत्वेन भ्रमसंभवात् योगस्मृतेरपि भ्रान्तिमूलकत्वम् । सूत्रमपि व्याख्यातम् ॥ ३ ॥ इति योगप्रत्युक्त्यधिकरणम् ॥ 2 ॥

१४२. **न विलक्षणत्वादस्य तथात्वं च शब्दात् ।** किं वेदान्तानां जगत्कारणतया प्रधानपरत्वम्, उत ब्रह्मपरत्वमिति संशयः । प्रधानपरत्वमिति पूर्वः पक्षः, अज्ञत्वादिना जगतो ब्रह्मविलक्षणत्वेन ब्रह्मकार्यत्वप्रतिपादनासंभवात्, सालक्षण्येन प्रधानकार्यत्वप्रतिपादनपरत्वस्य च संभवात् । राद्धान्तस्तु— माक्षिकादिभ्यः क्रिम्यादीनां विलक्षणानामुत्पत्तिदर्शनात् ब्रह्मविलक्षणस्य जगतः तत्कार्यत्वं संभवत्येव इति । सूत्रार्थस्तु— अज्ञत्वेनासुखत्वेन चोपलब्धस्य चास्य चिदचिन्मिश्रस्य जगतः सर्वज्ञाद्धेयप्रत्यनीकान्निरतिशयानन्दाद्ब्रह्मणो विलक्षणत्वेन जगतो ब्रह्मकार्यत्वप्रतिपादनं वेदान्तानां न संभवति । तथात्वं— विलक्षणत्वं च शब्दादवगम्यते, न केवलं प्रत्यक्षाद्युपलब्ध्या, * विज्ञानं चाविज्ञानं च * अनीशया शोचति मुह्यमानः * अनीशश्चात्मा बध्यते भोक्तृभावात् * इत्यादेः ॥ ४ ॥

* आपो वा अकामयन्त * तं पृथिव्यब्रवीत् * इत्यादौ पृथिव्यादेरपि ज्ञानकार्यं व्यपदिश्यते ; तस्मात्, * अविज्ञानञ्चेत्येतदन्यपरमित्यत उत्तरं पठति—

१४३. **अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ।** तुशब्दश्चोद्यं व्यावर्तयति ; पृथिव्याद्यभिमानिदेवतानामयं व्यपदेशः । कुतोऽवगम्यते, विशेषानुगतिभ्यां— विशेषः— विशेषणम् * हन्ताहमिमास्तिस्रो देवताः इति पृथिव्यादेर्देवताशब्देन विशेषणं दृश्यते, * सर्वा ह वै देवता अहं श्रेयसे विवदमानाः * इति च वागादिप्राणपर्यन्तस्य च । तथा अनुगतिः— अनुप्रवेशः, अग्न्यादीनां वागाद्यनुप्रवेशो दृश्यते, * अग्निर्वाग्भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् वायुः प्राणो भूत्वा नासिके प्राविशदित्यादौ ॥ ५ ॥

१४४. **दृश्यते तु ।** तुशब्दः पक्षं व्यावर्तयति, माक्षिकादिभ्यो विलक्षणानां क्रिम्यादीनामुत्पत्तिर्दृश्यते ; अतो ब्रह्मविलक्षणस्यापि जगतस्तत्कार्यत्वं संभवति ॥ ६ ॥

१४५. **असदिति चेन्न प्रतिषेधमात्रत्वात् ।** यदि कार्यस्य कारणाद्विलक्षणद्रव्यत्वमभ्युपगम्यते, तर्हि कारणे कार्यं न सद्भवतीत्यसत्कार्यवादोऽभ्युपगतस्स्यात् ; तथा सति * सर्वं खल्विदं ब्रह्मेति सामानाधि-

Digitization by Arya Samaj Charitable Foundation, Chennai

करण्यव्यपदेशो न घटत इति चेत्; तत्र, कार्यकारणयोस्सालक्षण्यनियमप्रतिषेधमात्रत्वादस्माभिः पूर्वमभिहितस्य। कार्यकारणयोरेकद्रव्यत्वं स्वीकृतमेव। एकमेव कारणावस्थं द्रव्यं कार्यावस्थां भजमानं सलक्षणावस्थामपि भजते, विलक्षणावस्थामपीत्यर्थः ॥ ७ ॥

१४६. **अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।** यदि ब्रह्मैव सर्वज्ञं सत्यसङ्कल्पं निरतिशयानन्दमपहतपाप्मत्वादिस्वरूपं तद्विपरीतजगदवस्थां भजते; तर्हि पिण्डत्वघटत्वावस्थमृद्द्रव्यवत् सर्वज्ञत्वमपहतपाप्मत्वमज्ञत्वं कर्मवश्यत्वं च ब्रह्मणः प्रसज्येतेति विरुद्धार्थाभिधानाद्वेदान्तवाक्यमसमञ्जसं स्यात्। अपीताविति सृष्ट्यादेः प्रदर्शनार्थम्। जगतो ब्रह्मण्यपीतौ ब्रह्मण उत्पत्तावपीत्यर्थः। अपीतिरप्ययः ॥ ८ ॥

१४७. **न तु दृष्टान्तभावात्।** न ब्रह्मण्यज्ञत्वादयः प्रसज्येरन्; अत एव न वेदान्तानामसामञ्जस्यम्। तुशब्दः प्रसक्तस्यासंभावनीयतां द्योतयति। एकस्यैवावस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थायां दृष्टान्तसद्भावात्, यथा मनुष्यो जातो बालो युवा स्थविरो भवतीत्यत्र मनुष्यशरीरकस्य चेतनस्यैव सर्वावस्थान्वयेऽपि जन्मबालत्वयुवत्वस्थविरत्वादीनि नात्मनि सङ्गच्छन्ते; तथा ज्ञानसुखदुःखादयश्च न शरीरे। एवं चिदचिद्वस्तुशरीरकस्य परस्य ब्रह्मण. कार्यकारणोभयावस्थान्वयेऽपि कर्मवश्यत्वाज्ञत्वादयः शरीरभूतचिदचिद्वस्तुगताः। अपहतपाप्मत्वसर्वज्ञत्वादयः परमात्मन्यात्मभूतेऽवतिष्ठन्ते। सर्वावस्थस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वम्, ब्रह्मणश्च तदात्मत्वम्, * यस्य पृथिवी शरीरमित्याद्यन्तर्यामिब्राह्मणादिष्ववगतमिति न कश्चिद्विरोधः ॥ ९ ॥

१४८. **स्वपक्षदोषाच्च।** न केवलं ब्रह्मकारणवादस्य निर्दोषतया तत्समाश्रयणम्, प्रधानकारणवादे दोषाच्चैतत्परित्यज्य स एव समाश्रयणीयः। प्रधानकारणवादे हि निर्विकारस्य चिन्मात्रस्य पुरुषस्य प्रकृतिसन्निधानकृततद्धर्माध्यासमूला जगत्प्रवृत्तिरभ्युपगम्यते; तत्र प्रकृतिसद्भावमात्रे सन्निधाने सति मुक्तस्यापि तद्धर्माध्यासप्रसङ्गः; विकारविशेषे सति सन्निधाने कृत्स्नस्य विकारस्याध्यासपूर्वकत्वान्नाध्यासस्य विकारो हेतुरिति विरुद्धार्थाभिधानादसामञ्जस्यदोष इति न तत्पक्षसंभवगन्धः ॥ १० ॥

१४९. **तर्काप्रतिष्ठानादपि।** कापिलतन्त्रस्य तर्कमूलत्वेन शाक्यादितर्कप्रतिहततयाऽस्य तर्कस्याप्रतिष्ठितत्वाच्च न तत्पक्षसंभवः ॥ ११ ॥

१५०. **अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः।** इतः पूर्वं विद्यमानैस्तर्कैरप्रतिहतत्वं यथा संभवति, तथा प्रधानकारणवादमनुमास्यामह इति चेत्; तथापि तर्काप्रतिष्ठानदोषात् अनिर्मोक्षप्रसङ्गो दुर्वारः; त्वदधिककुतर्ककुशलसद्भावसंभवात् ॥ १२ ॥ इति विलक्षणत्वाधिकरणम् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१५१. **एतेन शिष्टापरिग्रहा अपि व्याख्याताः।** न परिगृह्यन्ते वैदिकैरित्यपरिग्रहाः; शिष्टाश्च ते अपरिग्रहाश्च शिष्टापरिग्रहाः; एतेन— तर्काप्रतिष्ठानलक्षणकपिलस्मृतिनिरसनहेतुना, परिशिष्टाः कणभक्षादिस्मृतयोऽपि निरस्ता व्याख्याताः। परमाणुकारणवादस्सर्वसंमत इति न तेषां तर्कस्याप्रतिष्ठितत्वमित्यधिकाऽशङ्का। तर्कमूलत्वाविशेषात् परमाणूनां शून्यत्वाद्रव्यत्वादिविवादाच्च, तर्कस्याप्रतिष्ठितत्वमेवेति परिहारः॥ १३॥ इति शिष्टापरिग्रहाधिकरणम्॥ 4॥

१५२. **भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।** सर्वात्मभूतस्य परस्य ब्रह्मणः स्वशरीरभूताज्जीवान्निरतिशयानन्दस्वभावतया यो विभाग उक्तः, स किं विभागस्संभवति, उत नेति संशयः। न संभवतीति पूर्वः पक्षः। सर्वचिदचिद्वस्तुशरीरतया सशरीरत्वाद्ब्रह्मणः, सशरीरस्य च सुखदुःखयोर्भोक्तृत्वापत्तेः। तदापत्तिश्च * न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः * इति श्रुतेः। राद्धान्तस्तु— स्यादेव विभागो जीवात्परस्याकर्मवश्यतया। न सशरीरत्वप्रयुक्तस्सुखदुःखयोगः; अपि तु शास्त्रवश्यतया तदतिवृत्तिकृतः; * स एकधा भवति त्रिधा भवतीत्यादिनाऽवगतशरीरस्य मुक्तस्य सशरीरस्याप्यशास्त्रवश्यतया निरस्तनिखिलदुःखत्वदर्शनात्। यथा लोके राजशासनवश्यानां तच्छासनातिवृत्तिनिमित्तदुःखान्वयेऽपि राज्ञः सशरीरस्यापि प्रकारान्तरेण साधर्म्येऽपि स्वशासनावश्यतया न तदतिवृत्तिकृतदुःखान्वयः। विभागः वैलक्षण्यम्। सूत्रमपि व्याख्यातम्॥ १४॥ इति भोक्त्रापत्त्यधिकरणम्॥ 5॥

१५३. **तदनन्यत्वमारम्भणशब्दादिभ्यः।** किं ब्रह्मकार्यं जगत् ब्रह्मणोऽन्यत्, उतानन्यदिति संशयः। अन्यदिति पूर्वः पक्षः, तथोपलब्धेः। न हि बुद्धिशब्दान्तरादयः कारणात्कार्यस्यानन्यत्वे कथंचिदुपपद्यन्ते; कारकव्यापारवैयर्थ्यं चानन्यत्वे। अतो वस्तुविरोधादनन्यत्वश्रुतयो लक्षणया नेयाः। राद्धान्तस्तु— * वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो * सर्वं खल्विदं ब्रह्म तज्जलानिति * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत * इत्यादिश्रुतिशतसिद्धं कार्यस्य जगतः कारणाद्ब्रह्मणोऽनन्यत्वम्। न चात्र वस्तुविरोधगन्धः; कारणीभूतमृदादिद्रव्यस्यैव पृथुबुध्नोदराद्यवस्थान्तरापत्त्या बुद्धिशब्दान्तरादयोऽप्युपपद्यन्ते। तत एव कारकव्यापाराद्यर्थवत्त्वञ्च। एवं कारणस्यैव कार्यावस्थायामपि प्रत्यभिज्ञायमानस्यावस्थान्तरापत्त्यैव सर्वेषूपपन्नेषु अनुपलब्धद्रव्यान्तरकल्पना न संभवति। तस्मात् ब्रह्मकार्यं जगत् ब्रह्मणोऽनन्यदेव॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु— तस्मात् ब्रह्मणः, अनन्यत्वं कार्यस्य जगतः आरम्भणशब्दादिभ्यो वाक्येभ्यस्तदुपपादयद्भ्योऽवगम्यते, आरम्भणमिति शब्द आदिर्येषां पूर्वोक्तानां वाक्यानाम्, तान्यारम्भणशब्दादीनि; तान्यनन्यत्वमुपपादयन्ति ॥ १५ ॥

१५४. **भावे चोपलब्धेः।** घटादिकार्यभावे च तदेवेदं मृद्द्रव्यमित्थमवस्थितमिति कारणस्य उपलब्धेश्च कारणादनन्यत्वं कार्यस्य। यथा देवदत्तस्य बालत्वयुवत्वाद्यवस्थाविशिष्टस्यानन्यत्वम् ॥ १६ ॥

१५५. **सत्त्वाच्चापरस्य।** अपरस्य कार्यस्य कारणे सत्त्वाच्च कारणादनन्यत्कार्यम्। सर्वमिदं घटशरावादिकार्यं पूर्वाह्णे मृदेवासीदिति हि कारणे कार्यमुपलभ्यते। घटशरावादिसंस्थानसंस्थितमेव मृद्द्रव्यं पूर्वकाले पिण्डाकारमुपलब्धमित्यर्थः ॥ १७ ॥

१५६. **असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च।** * असदेवेदमग्र आसीत् * इदं वा अग्रे नैव किञ्चनासीत् * इत्यादिषु कारणावस्थायां कार्यस्यासत्त्वव्यपदेशात् कारणे कार्यं सदित्येतन्नोपपद्यत इति चेन्न, सदितिव्यपदेशहेतुभूतनामरूपावस्थाविरोधिसूक्ष्मावस्थाख्यधर्मान्तरेण योगादसदिति व्यपदिश्यते। कथमिदमवगम्यते? वाक्यशेषाद्युक्तेश्शब्दान्तराच्च। वाक्यशेषस्तावत्— * तदसदेव सन्मनोऽकुरुत स्याम् * इति। असदिति व्यपदिष्टस्यैव मनस्कारप्रतिपादनेन असद्व्यपदेशो धर्मान्तरयोगादित्यवगम्यते। युक्तिश्च धर्मान्तरयोगमेवासद्व्यपदेशहेतुमवगमयति; घटोऽस्ति घटो नास्तीति सदसद्व्यपदेशयोर्घटत्वकपालत्वयोः परस्परविरोधिधर्मयोरेव हेतुत्वे सिद्धे तदतिरिक्तानुपलब्धतुच्छत्वस्य हेतुत्वकल्पनानुपपत्तेः। तथा शब्दान्तरं च * सदेव सोम्येदमग्र आसीदिति समानप्रकरणस्थमसच्छब्दं धर्मान्तरयोगनिमित्तमवगमयति ॥ १८ ॥

१५७. **पटवच्च।** यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपाभ्यां कार्यान्तरादिकं भजन्ते, तद्वद्ब्रह्मापि ॥ १९ ॥

१५८. **यथा च प्राणादिः।** यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते, तद्वद्ब्रह्मापीति तदनन्यत्वं जगतस्सिद्धम् ॥ २० ॥ इति आरम्भणाधिकरणम् ॥ 6 ॥

१५९. **इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।** ब्रह्मणो जगत्कारणत्वं संभवति, नेति संशयः। न संभवतीति पूर्वः पक्षः, * अयमात्मा ब्रह्म * तत्त्वमसीति सामानाधिकरण्येन जीवो ब्रह्मेत्यवगमात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

जगत्सर्गस्य च जीवदुःखहेतुत्वात्, आत्महिताकरणादिदोषप्रसक्तेः सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणो जगत्कारणत्वानुपपत्तेः । जीवपरयोर्भेदवादिन्यश्श्रुतयः, जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः, भेदे सत्यनन्यत्वासिद्धेः । औपाधिकभेदविषयाः भेदश्रुतयः, स्वाभाविकाभेदविषया अभेदश्रुतयः इति चेत्; तत्रेदं वक्तव्यम्, स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति, न वा? न जानाति चेत्, सर्वज्ञत्वहानिः । जानाति चेत्, स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणः हिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्या । जीवब्रह्मणोरज्ञानकृतो भेदः, तद्विषया भेदश्रुतिरिति चेत्; तत्रापि जीवाज्ञानपक्षे पूर्वोक्तो दोषस्तत्फलं च तदवस्थमेव । ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न संभवति; अज्ञानेन प्रकाशस्तिरोहितश्चेत्, तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषाः भाष्ये प्रपञ्चिताः । राद्धान्तस्तु— * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः * तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति * प्रधानक्षेत्रज्ञपतिर्गुणेशः * पृथगात्मानं प्रेरितारं च मत्वा * इत्यादिभिः प्रत्यगात्मनोऽर्थान्तरभूतं ब्रह्मेत्यवगमात्, जीवकर्मानुगुणतया जगत्सर्गस्य च ब्रह्मणो लीलाप्रयोजनत्वात्, जगत्कारणत्वं संभवत्येव । तत्त्वमस्यादिसामानाधिकरण्यनिर्देशः * यस्यात्मा शरीरमित्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वात्तच्छरीरतया जीवप्रकारकब्रह्मप्रतिपादनपरः । सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणावस्थम्, स्थूलचिदचिद्वस्तुशरीरं ब्रह्मैव कार्यावस्थमिति कार्यकारणयोरनन्यत्वम् । एवमपि शरीरभूतयोश्चिदचिद्वस्तुनोः शरीरिणो ब्रह्मणश्च दुःखित्वपरिणामित्वहेयप्रत्यनीकत्वकल्याणगुणाकरत्वस्वभावा स्वरूपविवेकविषयश्रुतिसिद्धाः तथैव व्यवस्थिता इति ब्रह्मणो जगत्कारणत्वं संभवत्येव । सूत्रार्थस्तु— इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः— ब्रह्मण इतरः जीवः, ब्रह्मणो जीवतया व्यपदेशात्, जीवस्य च दुःखित्वात्, हितरूपजगदकरणमहितरूपजगत्करणमित्यादिदोषप्रसक्तिर्ब्रह्मणः । अतो ब्रह्मणो जगत्कारणत्वं न संभवतीति ॥ २१ ॥

अत उत्तरं पठति—

१६०. अधिकं तु भेदनिर्देशात् । तुशब्दः पक्षव्यावृत्त्यर्थः । प्रत्यगात्मनः अधिकम्— अर्थान्तरभूतं ब्रह्म । कुतः? भेदनिर्देशात्— * स कारणं करणाधिपाधिपः * प्रधानक्षेत्रज्ञपतिर्गुणेशः * पृथगात्मानं प्रेरितारं च मत्वा * इत्यादिभ्यः प्रत्यगात्मनो जीवात् ब्रह्मणो हि भेदो निर्दिश्यते ॥ २२ ॥

१६१. अश्मादिवच्च तदनुपपत्तिः । अश्मकाष्ठलोष्ठतृणादेरचेतनस्येवानन्तदुःखाकरजीवस्य निरतिशयानन्दसत्यसङ्कल्पब्रह्मभावानुपपत्तिश्च । न केवलं भेदश्रुत्याऽर्थान्तरत्वमवगम्यते, वस्त्वनुपपत्त्या चेत्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

जीवसामानाधिकरण्यनिर्देशः * यस्यात्मा शरीरमित्यादिश्रुतिशतसिद्धजीवप्रकारकब्रह्मप्रतिपादनपर इति * अवस्थितेरिति काशकृत्स्न इत्यत्रैव प्रतिपादितः ॥ २३ ॥ इति इतरव्यपदेशाधिकरणम् ॥ 7 ॥

१६२. **उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।** ब्रह्मणो जगत्कारणत्वं संभवति, न वेति संशयः। न संभवतीति पूर्वः पक्षः; लोके कार्यजननसमर्थस्यापि वस्तुनः तत्तत्कार्यजनने अनेककारकोपसंहारदर्शनाद्विचित्रजगज्जननसमर्थस्यापि ब्रह्मणोऽसहायस्य जनयितृत्वानुपपत्तेः। राद्धान्तस्तु— क्षीरस्य दधिभावेऽनन्यापेक्षत्वदर्शनान्नानेककारकोपसंहारनियमो दृश्यत इति ब्रह्मणोऽनन्यापेक्षस्यैव कारणत्वं संभवत्येव। सूत्रमपि व्याख्यातम्। क्षीरवद्धीति प्रसिद्धवन्निर्देशः चोद्यमान्द्यपरः ॥ २४ ॥

१६३. **देवादिवदपि लोके।** यथा देवादयः स्वे स्वे लोके स्वापेक्षितानि स्वसङ्कल्पादेव सृजन्ति; तथा ब्रह्मापि— देवादेश्शास्त्रावसेयशक्तितया ब्रह्मतुल्यत्वेऽपि देवादिग्रहणं ब्रह्मणो विचित्रशक्तित्वस्य सुग्रहणायेति मन्तव्यम् ॥ २५ ॥ इति उपसंहारदर्शनाधिकरणम् ॥ 8 ॥

१६४. **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।** ब्रह्मणो जगत्कारणत्वं संभवति, नेति संशयः। न संभवतीति पूर्वः पक्षः; निरवयवस्य ब्रह्मणो जगदुपादानत्वे कृत्स्नस्य ब्रह्मणो जगदाकारेणोपयोगप्रसङ्गात्; तत्परिजिहीर्षया सावयवाभ्युपगमे * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् * इत्यादि कारणावस्थायां निरवयवत्ववादिशब्दो बाध्येत। यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्, स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते; तथापि शरीरांशस्यापि कार्यत्वाभ्युपगमात् कृत्स्नप्रसक्तिर्निरवयवत्वशब्दबाधो वा। राद्धान्तस्तु— सकलेतरविसजातीयं श्रुत्यैकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म निरवयवमपि कार्यञ्च भवति, अन्यच्च भवतीति परिमितशक्तिवस्तुचोद्यं न तत्र प्रसज्यते। यथा जातिवादिनो जातिरेकैवामूर्ता खण्डमुण्डादिष्वत्यन्तविलक्षणेषु अनन्तेष्वपि परिसमाप्यैवं वर्तते; न तत्रेतरवस्तुचोद्यमिति। अतो ब्रह्मणः जगत्कारणत्वं संभवत्येव। सूत्रार्थस्तु— कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा— ब्रह्मकारणत्वे कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगप्रसङ्गः, निरवयवत्वात्। सावयवत्वे निरवयवत्वशब्दकोपो वा— निरवयवत्ववादिशब्दबाधप्रसङ्ग इत्यर्थः ॥ २६ ॥

१६५. **श्रुतेस्तु शब्दमूलत्वात्।** तुशब्दः पक्षव्यावृत्त्यर्थः। श्रुतेः— श्रुतिप्रामाण्यान्नैवं प्रसज्यते; शब्दमूलत्वात्— शब्दैकमूलत्वेन सकलेतरविजातीयत्वादित्यर्थः ॥ २७ ॥

१६६. **आत्मनि चैवं विचित्राश्च हि।** आत्मनि चैवं— जीवात्मन्यचेतनधर्माप्रसक्तिश्चैवम्— अचेतनविजातीयत्वादेवेत्यर्थः। विचित्राश्च हि— अचेतनेषु च विसजातीयेष्वग्निजलादिषु विचित्रा हि शक्तयो दृश्यन्ते; एवं परमात्मनश्चेतनाचेतनविसजातीयस्य विचित्राश्शक्तय उपपद्यन्ते ॥ २८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१६७. **स्वपक्षदोषाच्च।** प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव जगत्कारणम्। तत्र हि लौकिकवस्तुसजातीयत्वेन प्रधानादेरुक्तदोषोऽन्ये च प्रसज्येरन्॥ २९॥

१६८. **सर्वोपेता च तद्दर्शनात्।** न केवलं सकलेतरविसजातीयत्वेन सर्वशक्त्युपेता परा देवतेत्युच्यते; तद्दर्शनात्— सर्वशक्तियोगश्रुतेरित्यर्थः। दर्शयतीति दर्शनं श्रुतिः, *पराऽस्य शक्तिर्विविधैव श्रूयते* इत्यादिका॥ ३०॥

१६९. **विकरणत्वान्नेति चेत्तदुक्तम्।** उक्तस्यार्थस्य द्रढिम्ने चोद्यपूर्वकं पूर्वोक्तं सारयति— विकरणत्वात्— करणविरहितत्वात् ब्रह्म न कारणमिति चेत्; *न तस्य कार्यं करणं च विद्यते* इति हि श्रूयते। तदुक्तम्— अत्र यद्वक्तव्यम्, तत्पूर्वमेवोक्तम् *शब्दमूलत्वात्* विचित्राश्च हीति। अयमेव परिहारः— शब्दैकमूलत्वेन सकलेतरविसजातीयत्वाद्ब्रह्मणः, विसजातीयानां च शक्तिवैचित्र्यस्य लोकदृष्टत्वात्सर्वमुपपन्नमित्यर्थः॥ ३१॥ इति कृत्स्नप्रसक्त्यधिकरणम्॥ 9॥

१७०. **न प्रयोजनवत्त्वात्।** ब्रह्मणो जगत्कारणत्वं संभवति, नेति संशयः। न संभवतीति पूर्वः पक्षः; बुद्धिपूर्वारम्भाणां सप्रयोजनत्वात्, ईश्वरस्य च स्वत एवावाप्तसमस्तकामस्य जगत्सृष्ट्यारम्भे प्रयोजनभावात् गर्भवासादिदुःखरूपत्वात्सृष्टेः, परानुग्रहेणापि न सप्रयोजनत्वमिति। राद्धान्तस्तु— परिपूर्णस्यापीश्वरस्य केवललीलाप्रयोजनाय जगत्सृष्ट्याद्यारम्भस्संभवति। यथा लोके सप्तद्वीपवर्ती मेदिनीमधितिष्ठतो महाराजस्य परिपूर्णस्यापि केवललीलैकफलाः कन्दुकाद्यारम्भा दृश्यन्ते, तद्वदीश्वरस्यापि प्रयोजनाय जगत्सृष्ट्यारम्भस्संभवति। सूत्रार्थस्तु— न प्रयोजनवत्त्वात्— प्रयोजनवत्त्वात्सृष्टेः ईश्वरस्य स्वतः परिपूर्णस्य प्रयोजनाभावान्न स्रष्टृत्वम्॥ ३२॥

१७१. **लोकवत्तु लीलाकैवल्यम्।** लीलाकैवल्यं— लीलायाः प्रयोजनत्वे कैवल्यं संभवति; केवलाया लीलायास्सृष्ट्यारम्भप्रयोजनत्वं संभवतीत्यर्थः। लोकवत्। यथा लोके राज्ञः कन्दुकाद्यारम्भे॥ ३३॥

देवमनुष्यादिविषमसृष्ट्या पक्षपातप्रसङ्गात् दुर्विषहदुःखगर्भत्वेन नैर्घृण्यप्रसङ्गाच्च, परमकारुणिकस्य परमपुरुषस्य परिपूर्णस्य लीलार्थमपि जगत्सर्गो न संभवतीत्याशङ्क्याह—

१७२. **वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति।** ईश्वरस्य विचित्रजगत्सृष्टौ देवादिवैषम्यप्रयुक्तपक्षपातः, दुःखप्रदजगत्सर्गे नैर्घृण्यं च न संभवतः; वैषम्यादावीश्वरस्य क्षेत्रज्ञकर्मसापेक्षत्वात्। क्षेत्रज्ञानां पूर्वपूर्वकर्म पर्यालोच्य, तत्तत्कर्मानुगुणं विषमं जगत्सृजतीति तत्कर्मैव वैषम्यादिहेतुरित्यर्थः। तथा देवादिदेहयोगं क्षेत्रज्ञानां तत्कर्मसापेक्षं दर्शयति हि श्रुतिः *साधुकारी साधुर्भवति पापकारी पापो भवतीति॥ ३४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१७३. **न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च।** सृष्टेः प्राक्कर्म न विद्यते क्षेत्रज्ञाभावात्; तदभावश्च, * सदेव सोम्येदमित्यवधारणावगतादविभागादिति चेत्; तन्न, अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहाणां च। उपपद्यते च क्षेत्रज्ञस्वरूपानादित्वेऽपि नामरूपविभागाभावादविभागश्रुतिः। अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्। उपलभ्यते च श्रुतिस्मृत्योः क्षेत्रज्ञानामनादित्वम् * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत * इति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम्; * ज्ञाज्ञौ द्वावजावीशनीशौ। * नित्यो नित्यानाम् * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि * इति। अविभागश्रुतिरपि नामरूपविभागाभावादेवोपपद्यत इत्यभिप्रायः॥

[अत्र पाठान्तरम्]

सृष्टेः प्राक्कर्म न विद्यते, क्षेत्रज्ञाभावात्। तदभावश्च * सदेव सोम्येदमित्यवधारणावगतादविभागादिति चेत्; तन्न, अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहाणां च। * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम्। उपपद्यते क्षेत्रज्ञस्वरूपानादित्वेऽपि नामरूपविभागाभावादविभागश्रुतिः; अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्। उपलभ्यते च श्रुतिस्मृत्योः क्षेत्रज्ञानामनादित्वम् * ज्ञाज्ञौ द्वावजावीशनीशौ * नित्यो नित्यानाम् * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि * न जायते * इत्यादिभिः॥ ३५॥

१७४. **सर्वधर्मोपपत्तेश्च।** प्रधानपरमाण्वादिष्वनुपपन्नानां स्वपक्षदोषादित्यादिषूक्तानां सर्वेषां धर्माणां कारणत्वोपपादकानां ब्रह्मण्युपपत्तेश्च ब्रह्मैव कारणम्। प्रधानपरमाण्वादीनां परिमितशक्तिकत्वाल्लोकदृष्टवस्तुसजातीयत्वाच्च अनुपपत्तयस्सहस्रशस्सन्ति। ब्रह्मणश्शास्त्रैकसमधिगम्यतया सकलेतरविसजातीयत्वेनाचिन्त्यशक्तित्वात्सर्वशक्तित्वश्रुतेश्च सर्वमुपपन्नमित्यर्थः॥ ३६॥ इति प्रयोजनवत्त्वाधिकरणम्॥ 10॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे द्वितीयस्याध्यायस्य प्रथमः पादः॥

॥ अथ द्वितीयाध्याये द्वितीयः पादः॥

१७५. **रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च।** सांख्यतन्त्रसिद्धः प्रधानकारणवादः किं समीचीनयुक्तिमूलः, उत नेति संशयः। समीचीनयुक्तिमूल इति पूर्वः पक्षः। घटादिवद्विचित्रसन्निवेशं जगत्कार्यम् तद्वदेव स्वसरूपकारणविशेषारब्धम्। सुखदुःखमोहाद्यात्मकतया सत्त्वाद्यात्मकं जगत् सत्त्वरजस्तमो-

Digitization by Arya Samaj Charitable Foundation, Chennai

मूलकम् । तत्र महदादिपृथिव्यन्तानां घटादिवत्परिणामित्वेन कारणापेक्षित्वाविशेषात् ते जगदुत्पत्तौ कारण-काष्ठा न भवन्ति; तेषां परिमितत्वेन अपरिमितजगदुत्पादनाशक्तेः । अन्यूनानतिरिक्तानि साम्यावस्थान्य-परिमितानि सत्त्वरजस्तमांसि अव्यक्तप्रधानादिशब्दाभिधेयानि जगत्कारणम् । राद्धान्तस्तु— रथप्रासादादि-हेतुभूतदार्वादिवत् अचेतनं प्रधानं स्वस्वभावाद्यभिज्ञचेतनानधिष्ठितं विचित्रजगद्रचनासमर्थमिति न केवलं प्रधानं कारणम् । सूत्रार्थस्तु— रचनानुपपत्तेश्च नानुमानम्— अनुमीयत इत्यनुमानम् प्रधानम्; तस्याचेतनस्य प्राज्ञानधिष्ठितस्य विचित्रसन्निवेशजगद्रचनानुपपत्तेः तन्न कारणम् । चकारात्सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादे-रिवोपादानकारणत्वासंभवं समुच्चिनोति । सत्त्वादयो हि कार्यगतलाघवप्रकाशादिहेतुभूताः कारणभूतपृथिव्यादि-गतास्तत्स्वभावविशेषाः । प्रवृत्तेश्च— अनुपपत्तेरिति वर्तते; प्राज्ञानधिष्ठितस्य प्रधानस्य विचित्रजगद्रचनानु-गुणाद्यपरिस्पन्दरूपप्रवृत्त्यनुपपत्तेश्च न प्रधानं कारणम् ॥ १ ॥

१७६. **पयोम्बुवच्चेत्तत्रापि ।** पयसः अम्बुनश्च यथा प्राज्ञानधिष्ठितस्यैव दधिभावेन नारिकेल-चूतादिविचित्ररसरूपेण च परिणामो दृश्यते; तद्वत्प्रधानस्यापि केवलस्यैव जगदाकारेण परिणाम उपपद्यत इति चेत्; परिहरति तत्रापीति । तदपि पक्षीकृतमित्यर्थः । यत्र रथादिष्वचेतनस्य प्राज्ञाधिष्ठितत्वं दृष्टम्, तद्व्यतिरिक्तं हि सर्वं पक्षीकृतमेव । * योऽप्सु तिष्ठन्नित्यादि श्रुतेः तदपि प्राज्ञाधिष्ठितम् ॥ २ ॥

१७७. **व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ।** सर्गव्यतिरेकेण प्रतिसर्गावस्थयाऽनवस्थितिप्रसङ्गाच्च केवलं प्रधानं न कारणम्; अन्यानपेक्षत्वात्प्रधानस्य सर्वदैव सृष्टिः प्रसज्यते ॥ ३ ॥

१७८. **अन्यत्राभावाच्च न तृणादिवत् ।** धेन्वादिनोपयुक्तं हि तृणोदकादि स्वयमेव क्षीरा-कारेण परिणमते; तद्वत्प्रधानमपीति च वक्तुं न शक्यते; धेन्वादिनोपयुक्तस्यापि तृणादेः क्षीराकारेण परिणामः प्राज्ञाधिष्ठितत्वादेव भवतीत्यभ्युपेतव्यम्; कुतः? अन्यत्राभावात्— अनडुहाद्युपयुक्तस्य प्रहीणस्य वा तृणादेः क्षीराकारेण परिणामाभावात् ॥ ४ ॥

१७९. **पुरुषाश्मवदिति चेत्तथापि ।** प्राज्ञानधिष्ठितमपि प्रधानं चैतन्यमात्रवपुर्निष्क्रियः पुरुष-स्वसन्निधिमात्रेण सर्गादौ प्रवर्तयति । यथा दृक्छक्तियुक्तः गमनशक्तिविकलः पङ्गुः पुरुषः, अन्धं दृक्छक्ति-विकलं प्रवृत्तिशक्तियुक्तं पुरुषं स्वसन्निधानात्प्रवर्तयति; यथा चायस्कान्ताश्मा स्वसन्निधानादयः प्रवर्तयति; तद्वदितिचेत्; परिहरति— तथापीति । तद्वदपि प्रधानस्य प्रवृत्तिर्नोपपद्यते; तत्र हि पङ्गोः पुरुषस्य गमन-शक्तिविकलस्यापि मार्गोपदेशादिव्यापारः कादाचित्को दृश्यते; अन्धस्य चाक्षुषव्यापारविरहेऽपि पङ्गूपदेश-ग्रहणादिश्चेतनधर्मोऽस्ति । अयस्कान्तमणेरप्ययःप्रवृत्तौ कादाचित्कमयस्सन्निधानं विद्यते । इह तु सन्निधि-

Digitization by Arya Samaj Charitable Foundation, Chennai

मात्रातिरेकी तादृशः कश्चिद्विशेषः उभयत्रापि न विद्यते । पुरुषसन्निधानस्य नित्यत्वेन नित्यसर्गप्रसक्तिः । तथा सति प्रतिसर्गाभावोऽपवर्गाभावप्रसङ्गश्च ॥ ५ ॥

इतश्च—

१८०. **अङ्गित्वानुपपत्तेश्च ।** गुणानामुत्कर्षापकर्षरूपाङ्गाङ्गिभावेन जगत्प्रवृत्तिः प्रतिसर्गावस्थायां साम्यावस्थानामेकस्योत्कर्षरूपाङ्गित्वानुपपत्तेश्च न संभवति । तत्राप्युत्कर्षोऽस्ति चेत्, सर्वदा सर्गप्रसङ्गः ॥ ६ ॥

१८१. **अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ।** उक्तप्रकाराद्व्यतिरिक्तप्रकारेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगाद्रचनानुपपत्त्यादयो दोषाः तदवस्थाः ॥ ७ ॥

१८२. **अभ्युपगमेऽप्यर्थाभावात् ।** प्रधानाभ्युपगमेऽपि प्रधानेन प्रयोजनाभावान्न तदनुमेयम् । पुरुषस्य भोगापवर्गार्थतया हि प्रधानप्रवृत्तेस्सप्रयोजनत्वम् । चैतन्यमात्रवपुषो निष्क्रियस्य नित्यनिर्विकारस्य पुरुषस्य इतरेतराध्यासकृतप्रकृतिदर्शनरूपभोगः, तद्विवेकरूपापवर्गश्च न संभवति । निर्विकारस्यैव प्रकृतिसन्निधानेन भोगस्संभवति चेत्; उभयोर्नित्यत्वेन च सन्निधानस्य नित्यत्वादपवर्गासिद्धिः; तथाविधसन्निधेरेवापवर्गहेतुत्वे भोगासिद्धिश्च ॥ ८ ॥

१८३. **विप्रतिषेधाच्चासमञ्जसम् ।** विप्रतिषिद्धं चेदं साङ्ख्यदर्शनम्; प्रकृतेः परार्थतया पुरुषो द्रष्टा भोक्ता अधिष्ठाता चेत्याहुः; प्रकृतेश्च पुरुषस्य भोगापवर्गार्थतया सप्रयोजनत्वं च, प्रकृत्यैव साधनभूतया पुरुषो भोगमपवर्गं चाश्नुत इति चोक्तेः । स च पुरुषश्चैतन्यमात्रवपुर्नित्यो निर्विकारो न द्रष्टा न भोक्ता न कर्तेति च; अत एव पुरुषो न बध्यते, न च मोक्षसाधनमनुतिष्ठति, न च मुच्यत इति च वदन्ति । प्रकृतिरचेतनभूतैव पुरुषसन्निधानात्पुरुषधर्मं चैतन्यं स्वस्मिन् स्वधर्मं कर्तृत्वं पुरुषे चानुसन्धाय बध्यते; मोक्षसाधनमनुतिष्ठति, मुच्यते इति चाहुः । अध्यासरूपमनुसन्धानं हि चेतनधर्मः; तथा प्रकृतिरनुपकारिणः पुरुषस्य भोगापवर्गस्वरूपं प्रयोजनं साधयतीत्युपकारिणीति चाहुः । अध्यासरूपबन्धादयः पुरुषस्य न सन्तीति चेत्, कस्तस्योपकारः? एवमाद्यन्योन्यविरुद्धभाषणादसमञ्जसम् ॥ १ ॥ इति रचनानुपपत्त्यधिकरणम् ॥ 1 ॥

१८४. **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ।** किं काणादाभ्युपगत परमाणुकारणवादः समीचीनयुक्तिमूलः, उत नेति संशयः । समीचीनयुक्तिमूल इति पूर्वपक्षः, अवयवसंयोगादवयव्युत्पत्तेर्दर्शनात्, अवयवाल्पत्वप्राचुर्याभ्यां सर्षपमहीधरवैषम्यदर्शनाच्च अवयवाल्पत्वकाष्ठाऽवश्याभ्युपगमनीयेति परमाणुसिद्धिः । ते चतुर्विधाः परमाणवो विपाकदशापन्नक्षेत्रज्ञादृष्टसचिवाः परमेश्वराधिष्ठिताः द्व्यणुकादिक्रमेण जगदारम्भका इति । राद्धान्तस्तु— अवयवास्स्वकीयैः षड्भिः पार्श्वैरसंयुज्यमानास्स्वस्मान्महान्तमवयविनमुत्पादयन्तीति परमाणुष्वपि

Digitization by Arya Samaj Charitable Foundation, Chennai

तथैवोत्पादकत्वमभ्युपेतव्यम्। तथा सति परमाणवोऽपि सांशास्स्वकीयैरवयवैः, ते च स्वकीयैरिति न क्वचित्कारणस्य व्यवस्थितिः। सूत्रार्थस्तु— महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्; असमञ्जसमिति वर्तते; वाशब्दश्चार्थे। ह्रस्वपरिमण्डलाभ्यां— द्व्यणुकपरमाणुभ्याम् महद्दीर्घवत्— त्र्यणुकद्व्यणुकोत्पत्तिवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसम्॥ १०॥

द्व्यणुकादिक्रमेणारम्भकत्वं कारणानवस्थितेरसमञ्जसम्। किमत्रान्यदसमञ्जसमित्यत्राह—

१८५. **उभयथापि न कर्मातस्तदभावः।** परमाणूनामाद्यं कर्म अदृष्टकारितमित्यभ्युपगम्यते; तददृष्टं किमणुगतम्? उत क्षेत्रज्ञगतम्? उभयथाऽप्यदृष्टस्य अकादाचित्कत्वेन सदोत्पादकत्वप्रसङ्गात्कादाचित्कं कर्म न संभवति। अतः कर्मणा परमाणुसंयोगाभावः। विपाकापेक्षत्वेऽपि नानाविधानन्तादृष्टानामेकदैवैकरूपविपाकश्च न संभवति। आनुमानिकेश्वरासिद्धेरीश्वरेच्छयापि नियमो न संभवति॥ ११॥

१८६. **समवायाभ्युपगमाच्च साम्यादनवस्थितेः।** समवायाभ्युपगमाच्च असमञ्जसम्; समवायो हि जातिगुणादीनां द्रव्यविशेषापृथक्सिद्धिहेतुतयाऽभ्युपगम्यते; समवायस्यापि तथाभावे हेत्वपेक्षासाम्यादनवस्थितेः। समवायस्य तथाभावस्स्वाभाविक इति चेत्; जातिगुणादीनामेवैष स्वभाव इति युक्तम्॥

इतश्च—

१८७. **नित्यमेव च भावात्।** समवायसंबन्धस्य नित्यत्वाभ्युपगमात्, संबन्धिनित्यत्वमन्तरेण तदनुपपत्तेः, अवयवावयविनोरुभयोरपि नित्यमेव भावात् कार्यकारणभाव एव न सिद्ध्यति॥ १३॥

१८८. **रूपादिमत्वाच्च विपर्ययो दर्शनात्।** परमाणूनां नित्यत्वनिरवयवत्वादिविपर्ययश्च स्यात्, रूपादिमत्त्वात्तेषाम्, घटादिषु रूपादिमत्सु तथा दर्शनात्; दर्शनादेव हि त्वदभिमतं परिकल्प्यते॥ १४॥

१८९. **उभयथा च दोषात्।** अनित्यत्वादिभयात्परमाणूनां रूपादिशून्यत्वे कार्यगुणस्य कारणगुणपूर्वकत्वासिद्धिः, तत्सिद्धये रूपादिमत्त्वे चानित्यत्वादिदोषप्रसक्तिरिति, उभयथा च दोषादसमञ्जसमेव॥ १५॥

१९०. **अपरिग्रहाच्चात्यन्तमनपेक्षा।** कापिलपक्षे हि श्रुतिन्यायविरुद्धेऽपि सत्कार्यवादादि किञ्चिद्वैदिकैः परिगृह्यते; काणादे तु कस्यचिदप्यंशस्य वैदिकैः परिग्रहाभावादनुपपन्नत्वाच्च निःश्रेयसार्थिभिरत्यन्तमनपेक्षा कार्या॥ १६॥ इति महद्दीर्घाधिकरणम्॥ 2॥

Digitization by Arya Samaj Charitable Foundation, Chennai

१९१. **समुदाय उभयहेतुकेऽपि तदप्राप्तिः।** सौगताश्चतुर्विधाः— प्रत्यक्षसिद्धस्थूलद्रव्यवादिनः केचिद्वैभाषिकाः; अन्ये विज्ञानानुमेयस्थूलद्रव्यवादिनः। ते च सौत्रान्तिकाः। अपरे निरालम्बनविज्ञानमात्रसद्भावं वदन्ति योगाचाराः। त्रयोऽप्येते स्वाभ्युपगतवस्तुनः क्षणिकत्वं वदन्ति। अन्ये तु सर्वशून्यवादिनो माध्यमिकाः। तत्राद्ययोर्बाह्यसद्भावमभ्युपगच्छतोः जगदुत्पत्तिप्रकारः लोकव्यवहारश्च सूपपादः; उत दुरुपपाद इति संशयः। सूपपाद इति पूर्वः पक्षः। तथा हि— पार्थिवाप्यतैजसवायवीया गन्धादियुक्ताः परमाणवो हि पृथिव्यादिरूपेण संहता भवन्ति; भूतेभ्यश्च शरीरेन्द्रियविषयलक्षणसङ्घाताः; तत्र आन्तरः विज्ञानसन्तानो ग्राहकाभिमानारूढः आत्मत्वेनावतिष्ठते। एषु क्षणिकेष्वपि स्थिरत्वादिगोचरबुद्ध्याख्याविद्यया सर्वमुपपद्यत इति जगदुत्पत्तिर्लोकव्यवहारश्च युज्यते॥ राद्धान्तस्तु— क्षणध्वंसिनः परमाणवः कदा संहतौ व्याप्रियन्ते? कदा संहन्यन्ते? संहतौ व्यापृताः तस्मिन्नेव क्षणे विनष्टाश्चेत्, के पुनः संहन्यन्ते? कश्च विज्ञानात्मा कदा कं विषयं स्पृशति? कश्च कदा कं जानाति? कश्च कदा कमर्थमुपादत्ते? स्प्रष्टा नष्टः, स्पृष्टं च नष्टम्, वेदिता नष्टः, वेद्यं च नष्टम्। कथमन्येन स्पृष्टमन्यो विजानाति? कथं वाऽन्येन विदितमन्य उपादत्ते? सन्तानैकत्वे सिद्धेऽपि सन्तानिभ्यस्सन्तानस्य परमार्थतः वस्त्वन्तरत्वानभ्युपगमात्, सन्तानैक्यमपारमार्थिकमकिञ्चित्करम्। स्थिरत्वाद्यविद्ययाऽपि सङ्घातोत्पत्तिर्न संभवति; न हि शुक्तिकादिषु रजताविद्यया रजताद्युत्पत्तिसंभवः। विदुषश्च पूर्वस्य नष्टत्वेन उत्तरेणाविदुषापूर्वविनष्टेन विदुषाऽनुसंहितार्थोपादानं न संभवति; संस्काराश्रयत्वेन चैकोऽर्थः स्थिरो नाभ्युपगम्यते। अतो जगदुत्पत्तिर्लोकव्यवहारश्च दुरुपपाद एव। सूत्रार्थस्तु— समुदाय उभयहेतुकेऽपि तदप्राप्तिः— उभयहेतुकेऽपि समुदाये समुदायत्वाप्राप्तिः; परमाणुहेतुकः पृथिव्यादिसमुदायः; पृथिव्यादिहेतुकः शरीरेन्द्रियसमुदायः— इत्युभयहेतुकोऽपि समुदायः क्षणिकत्वाभ्युपगमादुक्तेन न्यायेन न सिद्ध्यतीत्यर्थः॥ १७॥

१९२. **इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्।** यद्यपि क्षणिकास्सर्वे भावाः, तथाप्यविद्यादीनामितरेतरहेतुकत्वादुपपन्नं लोकव्यवहारादिकम्। अस्थिरेषु स्थिरत्वबुद्धिरूपया अविद्यया तत्रतत्र रागद्वेषादयो जायन्ते; इत्येवमादिपरम्परया पुनरप्यविद्येति चक्रवत्परिवर्तत इति चेत्; नैतदुपपद्यते, सङ्घातभावानिमित्तत्वादविद्यायाः— यद्यप्यविद्याख्या विपरीतबुद्धिः क्षणिकं स्थिरत्वेन विषयीकरोति, तथापि तत्र वस्तुतः स्थिरं भवतीति वस्तुतस्स्थिरकार्यं न करोति; अतस्सङ्घातभावो न सिध्यतीत्यर्थः। अस्थिरे स्थिरत्वबुद्धियुक्तस्य विज्ञानात्मनस्तदैव नष्टत्वात्कस्य रागद्वेषादयो जायन्त इति, रागद्वेषादिपरम्परा च न सिध्यतीत्यभिप्रायः॥ १८॥

इतश्च—

Digitization by Arya Samaj Charitable Foundation, Chennai

१९३. **उत्तरोत्पादे च पूर्वनिरोधात्।** उत्तरघटक्षणोत्पत्तिवेलायां पूर्वस्य विनष्टत्वादभावस्यैव हेतुत्वेनाविशेषात्सर्वेषां सर्वदोत्पत्तिः प्रसज्येत। पूर्वक्षणवर्तिनो हेतुत्वोपगमेऽपि देशादेर्विशेषकस्य स्थिरस्यैकस्यानभ्युपगमादविशेषेणोत्तरक्षणवर्तिनस्सर्वस्य हेतुस्स्यात् ॥ १९ ॥

१९४ **असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा।** असत उत्पत्तौ प्रतिज्ञाविरोधश्च भवताम्; अधिपतिसहकार्यादीनां विज्ञानोत्पत्तिहेतुत्वप्रतिज्ञानात्। अथैतत्परिजिहीर्षया पूर्वो घटक्षणस्तिष्ठतीत्युच्येत, तदा युगपद्घटक्षणद्वयोपलब्धिप्रसङ्गः; न चोपलभ्यते। उपरोधो विरोधः ॥ २० ॥

सतो निरन्वयविनाशोऽपि न संभवतीत्याह—

१९५. **प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्।** प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिः— स्थूलसूक्ष्मविनाशयोरप्राप्तिरित्यर्थः; स्थूलविनाशः मुद्गराभिघाताद्यनन्तरभाव्युपलब्धियोग्यः; सूक्ष्मस्तु, प्रतिक्षणभाव्युपलब्ध्यनर्हः। तौ निरन्वयौ न भवतः, उत्पत्तिविनाशधर्मभागिनो द्रव्यस्याविच्छेदात्। * तदनन्यत्वमिति सत्कार्यवादस्योपपादितत्वादित्यभिप्रायः। घटादौ कपालादिरूपावस्थया निरन्वयविनाशादर्शनात्प्रदीपनिर्वाणेऽपि सूक्ष्मावस्थाप्राप्तिरित्यविरोधः ॥ २१ ॥

१९६. **उभयथा च दोषात्।** उत्पन्नस्य तुच्छतापत्तौ, तुच्छादुत्पत्तौ च, इत्युभयप्रकारे च दोषापत्तेः, ते न संभवतः। उत्पन्नस्य तुच्छतापत्तौ हि पश्चात्तुच्छादुत्पद्यमानं जगत्तुच्छात्मकमेव स्यात्; मृत्सुवर्णादेरुत्पद्यमानमृत्सुवर्णाद्यात्मकघटमुकुटादिवत्। अतस्तुच्छादुत्पत्तिस्तुच्छतापत्तिश्च न संभवतः ॥ २२ ॥

१९७. **आकाशे चाविशेषात्।** आकाशे तुच्छस्वरूपता न संभवति, अबाधितप्रतीतिसिद्धपृथिव्यादिवत् आकाशेऽप्यबाधितप्रतीतेरविशेषात्। प्रतीयते ह्याकाशः, अत्र श्येनः पतत्यत्र गृध्र इति श्येनादेः पतनदेशत्वेन ॥ २३ ॥

१९८. **अनुस्मृतेश्च।** प्रत्यभिज्ञानाच्च न घटादेः क्षणिकत्वम्। तदेवेदमिति हि प्रत्यभिज्ञायते। (प्रत्यभिज्ञानं हि नाम, अतीतवर्तमानकालवर्त्येकवस्तुविषयमेकं प्रत्यक्षज्ञानम्। तस्य कालद्वयसंबन्धविशिष्टमेव वस्तु विषयः। न च तदित्यंशस्स्मरणम्, इदमित्यंशश्च ग्रहणम्, अतीतकालसंबन्धिनीन्द्रियसंप्रयोगाभावादिति वाच्यम्, तदिदमिति सामानाधिकरण्येन ग्रहणस्यैकत्वस्फुरणात्। पूर्वकालानुभवजनितसंस्कारसहकृतेन्द्रियसंप्रयोगयुक्तस्य पुरुषस्य यथा ग्रहणमुपपद्यत एव। अन्वयव्यतिरेकाधीनं हि सर्वत्र सामग्रीपरिकल्पनम्)। न च

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्वालादिवत्साद्दश्यनिबन्धना प्रत्यभिज्ञेति त्वया वक्तुं शक्यम्, कालद्वयवर्तिनोर्द्वयोस्साद्दश्यस्यानुसन्धातुः ज्ञातुरेकस्यानभ्युपगमात् ॥ २४ ॥

पृथिव्यादिविज्ञानानुमेयार्थवादिनं प्रत्याह । स हि ज्ञाने नीलपीतादिविचित्राकारं दृष्ट्वा ज्ञानात्पूर्वक्षणवर्तिनं ज्ञाने स्वाकारं समर्प्य विनष्टमर्थमनुमिनोति । तत्रोत्तरम्—

१९९. नासतोऽदृष्टत्वात्। असतो धर्मिणो धर्मस्यान्यत्र सङ्क्रमणं न संभवति, कुतः? अदृष्टत्वात्— न हि धर्मिणि विनष्टे तद्धर्मस्यान्यत्र संक्रमणं क्वचिद्दृष्टम् ॥ २५ ॥

२००. उदासीनानामपि चैवं सिद्धिः। वैभाषिकसौत्रान्तिकयोर्द्वयोरपि साधारणमिदं दूषणम्। एवं सर्वभावानां क्षणिकत्वाभ्युपगमे सति, उदासीनानां— निष्प्रयत्नानामपि ऐहिकामुष्मिकसर्वार्थसिद्धिस्स्यात्, प्रयत्नाद्यनुतिष्ठतस्तदानीमेव विनष्टत्वात्, तत्तत्संस्कारादेरपि कस्यचित् स्थिरस्यानुवर्तमानस्यानभ्युपगमाच्च, पश्चादागता सिद्धिरहैतुकीति निष्प्रयत्नानामप्यैहिकामुष्मिकसर्वार्थसिद्धिस्स्यात् ॥ २६ ॥ इति समुदायाधिकरणम् ॥

२०१. नाभाव उपलब्धेः। योगाचाराभिमतः ज्ञानमात्रसद्भाववादः किं समीचीनयुक्तिमूलः, उत नेति संशयः । समीचीनयुक्तिमूल इति पूर्वः पक्षः । बाह्यार्थसद्भाववादिनाऽपि तत्तदर्थाकारज्ञानस्य प्रकाशमानत्वमवश्याश्रयणीयम् । सर्वस्य वस्तुनः प्रकाशमानस्य स्वासाधारणेनाकारेण प्रकाश इष्यते । तत्र घटपटादिज्ञानस्य घटपटाद्याकार एवाकारः । अन्यथा घटाद्यसाधारण्यं च तत्तज्ज्ञानस्य न संभवति । एकश्चायमाकार उपलभ्यते । स तु ज्ञानस्यैवेति तद्व्यतिरिक्तार्थसद्भाववादोऽनुपपन्नः । तावतैव घटोऽयं ज्ञात इति व्यवहारश्चोपपद्यते । तस्य वहिर्वदवभासो निर्मूलत्वाद्विभ्रमकृतः । राद्धान्तस्तु— घटमहं जानामीति सकर्मकस्य सकर्तृकस्य ज्ञाधात्वर्थस्य च्छेदनादिवत्सर्वलोकसाक्षिकमुपलभ्यमानस्य कर्तृकर्मव्यतिरेकेण केवलस्यैव सद्भावमनुन्मत्तः को ब्रवीति? स्वासाधारणाकारश्च छेदनादिवत्तत्तदर्थव्यवहारयोग्यतापादनाकारेणोपलभ्यते । एवं छेदनादेरप्याकारो द्विधाभावनादिहेतुतयैव कर्तृगतस्योपलभ्यते । न ह्यमूर्तानां क्रियादीनां कर्तृकर्मनिरूपणीयस्वाकाराणां कर्माकारत्वमाश्रीयते । सूत्रार्थस्तु— नाभाव उपलब्धेः— ज्ञानव्यतिरिक्तार्थाभावो न शक्यते वक्तुम्, उपलब्धेः— घटमहं जानामीति जानातेः कर्मतया कर्तृतया चोपलब्धेः ॥ २७ ॥

२०२. वैधर्म्याच्च न स्वप्नादिवत्। स्वप्नज्ञानादिवच्च जागरितज्ञानानां न मिथ्यार्थत्वम्, तद्वैधर्म्यात् निद्रादिकारणदोषबाधकप्रत्ययरहितत्वादित्यर्थः । चकारात्तान्यपि यथार्थानीत्यभिप्रायः ॥ २८ ॥

२०३. न भावोऽनुपलब्धेः। न केवलस्यार्थशून्यस्य ज्ञानस्य भावस्संभवति, क्वचिदप्यनुपलब्धेः । अबाधितप्रतीतिसिद्धस्यासद्भावे सति ज्ञानमात्रस्याप्यसद्भावो न शक्यते वारयितुमित्यभिप्रायः ॥ २९ ॥ इति उपलब्ध्यधिकरणम् ॥ 4 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२०४. **सर्वथाऽनुपपत्तेश्च**। माध्यमिकोक्तसर्वशून्यवादस्संभवति, नेति संशयः। संभवतीति पूर्वः पक्षः। विज्ञानं घटादयश्च सर्वे भावा न सन्ति, कुतः? उत्पत्त्यनिरूपणात् घटादिभावानाम्। भावात्तावदुत्पत्तिर्न संभवति: न हि घटादिरुत्पद्यमानः असंमृदितेन मृत्पिण्डादिनोत्पद्यते। नाप्यभावात्, पश्चादभावादुत्पद्यमानो घटादिरभावात्मक एव स्यादिति सर्वशून्यत्वमेव युक्तिमत्। राद्धान्तस्तु— लोके भावाभावशब्दयोस्तद्बुद्ध्योश्च प्रमाणेनोपलभ्यमानस्यैव वस्तुनः अवस्थाविशेष एव भावरूपो विषयः। वर्तमानतयोपलभ्यमानावस्थाविशेषो भावबुद्धिविषयः। तद्विरोध्यवस्थाविशेषः अभावबुद्धिविषयः। अतो न कुतश्चित्त्वदभिप्रेतं तुच्छत्वं सिद्ध्यति। सूत्रार्थस्तु— सर्वथानुपपत्तेश्च— सर्वशून्यवादी सर्वं सदिति प्रतिज्ञाय स्वाभिप्रेतं साधयति? उतासदिति प्रतिज्ञाय? अथ प्रकारान्तरेण प्रतिज्ञाय? सर्वथापि सर्वशून्यत्वानुपपत्तेस्स्वाभिमतासिद्धिः, सदसद्भावयोर्विद्यमानवस्तुधर्मतोपपादनात् ॥ ३० ॥ इति सर्वथानुपपत्त्यधिकरणम् ॥ 5 ॥

२०५. **नैकस्मिन्नसंभवात्**। जैनमतं युक्तिमत्; उत नेति संशयः; युक्तिमदिति पूर्वः पक्षः; जीवाजीवशब्दाभिलपनीयभोक्तृ भोग्यात्मकं जगत् सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वैरनैकान्तिकम्; षड्द्रव्यतत्पर्यायात्मनावस्थितत्वात् कृत्स्नस्य जगतो द्रव्यात्मना सत्त्वैकत्वनित्यत्वानि उपपन्नानि; पर्यायात्मना च विपरीतानि। पर्यायाश्च— घटत्वपटत्वाद्यवस्थाविशेषाः। द्रव्यस्वरूपस्यैकत्वात् स्थिरत्वात् सद्बुद्धिबोद्ध्यत्वात् तेन रूपेणैकत्वादि युक्तम्; पर्यायशब्दाभिधेयावस्थाविशेषाणामनेकत्वादस्थिरत्वादसद्बुद्धिबोध्यत्वात्तेन रूपेणासत्त्वानित्यत्वनानात्वानि युक्तानि। प्रतीतिव्यवस्थाप्यत्वात् सर्वस्य वस्तुनः उभयाकारप्रतीतेरुभयमुपपन्नम्॥ राद्धान्तस्तु— एकस्यास्तित्वनास्तित्वादिभिरनैकान्तिकत्वमयुक्तम्, एकस्मिन्वस्तुन्यस्तित्वनास्तित्वादेः विरुद्धस्य च्छायातपवद्युगपदसंभवात्। तथा हि— द्रव्यस्य तद्विशेषणभूतपर्यायस्य इत्थंशब्दाभिधेयावस्थाविशेषस्य च इदमित्थमिति प्रतीतेः प्रकारप्रकारितया पृथक्पदार्थत्वान्नैकस्मिन्विरुद्धप्रकारभूतसत्त्वासत्त्वरूपधर्मसमावेशो युगपत्संभवति। उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वं तद्विपरीतं च नित्यत्वं तस्मिन्कथं समवैति? विरोधिधर्माश्रयत्वं च भिन्नत्वं तद्विपरीतं चाभिन्नत्वं कथं वा तस्मिन्समवैति? यथा अश्वत्वमहिषत्वयोः युगपदेकस्मिन्नसंभवः। (एकस्य पृथिवीद्रव्यस्य घटत्वं शरावत्वं च प्रदेशभेदेन; न त्वेकेन प्रदेशेनोभयाश्रयत्वम्; यथैकस्य देवदत्तस्योत्पत्तिविनाशयोगित्वं कालभेदेन। न ह्येतावता वस्तुनो द्व्यात्मकत्वम्, अपि तु परिणामशक्तियोगमात्रम्) अतो न युक्तिमत् जैनमतम्। सूत्रार्थस्तु— नैकस्मिन्नसंभवात्— न जैनमतं युक्तम्, कुतः? एकस्मिन्वस्तुन्युक्तरीत्या युगपद्विरुद्धधर्मसमावेशासंभवात्। अतस्सूत्रविरुद्धं वेदान्तवादिभिरपि भेदाभेदसमाश्रयणम् ॥ ३१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२०६. एवं चात्माकात्स्न्र्यम्। एवमात्माकात्स्न्र्यञ्चानुपपन्नम्; शरीरपरिमाणत्वे ह्यात्मनो बृहतश्शरीरादल्पीयसि शरीरे प्रविशतः अकात्स्न्र्यम्– अपरिपूर्णत्वं प्रसज्येत। तदानीमल्पपरिमाणत्वात् ॥ ३२ ॥

२०७. न च पर्यायादप्यविरोधो विकारादिभ्यः। तथाविधाल्पत्वावस्थायोगेनाप्यविरोधो न संभवति। घटपटादेरिव विकारतत्प्रयुक्तदोषास्पदत्वप्रसङ्गात् ॥ ३३ ॥

२०८. अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः। जीवस्य यदन्त्यं परिमाणं मोक्षावस्थम्, तस्य पश्चादेकरूपेणावस्थितेस्तदेव स्वाभाविकं परिमाणमिति, आत्मनश्च तत्परिमाणस्य चोभयोर्नित्यत्वात्पूर्वमपि न शरीरपरिमाणत्वसिद्धिरिति पूर्वावस्थायां न विशेषः; अतः असङ्गतमेवेद जैनमतम ॥ ३४ ॥ इति एकस्मिन्नसंभवाधिकरणम् ॥ 6 ॥

२०९. पत्युरसामञ्जस्यात्। पशुपतिमतं निःश्रेयसार्थिभिरादरणीयम्, उत नेति संशयः। आदरणीयमिति पूर्वः पक्षः। परमपुरुषार्थसाधनावबोधित्वेन निखिलवस्तुसाक्षात्कारसमर्थपशुपतिप्रणीतत्वात्। राद्धान्तस्तु— अनादिनिधनाविच्छिन्नपाठसंप्रदायनिरस्तप्रमादादिनिखिलदोषगन्धवेदसिद्धपरावरतत्त्वव्यत्ययप्रतिपादनात्, निमित्तोपादानभेदाभिधानात्, सुराकुम्भस्थापनतत्स्थदेवतार्चनमुद्रिकाषट्कविज्ञानतद्धारणादिवेदविरुद्धाचारप्रतिपादनपरत्वाच्च, असामञ्जस्यात् अनादरणीयमिति। सूत्रार्थस्तु— पत्युरसामञ्जस्यात्– * नैकस्मिन्नसंभवादित्यतो नेत्यनुवर्तते। पत्युः— पशुपतेः, मतम् अनादरणीयम्। कुतः? वेदविरुद्धतत्त्वाचारावबोधित्वेन असामञ्जस्यात् ॥ ३५ ॥

२१०. अधिष्ठानानुपपत्तेश्च। अनुमेयेश्वराभ्युपगमेन हि प्रधानस्याधिष्ठानमीश्वरस्योच्यते। सशरीरस्यैव कुलालादेरधिष्ठानदर्शनात् अशरीरस्येश्वरस्य प्रधानाधिष्ठानानुपपत्तेश्चासामञ्जस्यम्। सशरीरत्वाभ्युपगमेऽपि तच्छरीरस्य सावयवस्य नित्यत्वेऽनित्यत्वे च दोषः पूर्वोक्त इत्यभिप्रायः ॥ ३६ ॥

२११. करणवच्चेन्न भोगादिभ्यः। क्षेत्रज्ञस्य स्वकरणकलेबराद्यधिष्ठानवदुपपद्यत इति चेत्, न, पुण्यापुण्यरूपकर्मनिमित्तत्वात् क्षेत्रज्ञाधिष्ठानस्य; ईश्वरस्यापि तद्वत्तया तत्फलभोगादिनिखिलतत्स्वभावप्रसक्तेः ॥ ३७ ॥

२१२. अन्तवत्त्वमसर्वज्ञता वा। वाशब्दश्चार्थे। पुण्यापुण्यवत्त्वे त्वन्तवत्त्वं सृष्टिसंहारास्पदत्वमसर्वज्ञता च प्रसज्यत इत्यसमञ्जसमेवेदम् ॥ ३८ ॥ इति पशुपत्यधिकरणम् ॥ 7 ॥

२१३. उत्पत्त्यसंभवात्। साङ्ख्यादितन्त्रवत् पाञ्चरात्रतन्त्रमप्यप्रमाणम्, उत नेति संशयः। अप्रमाणमिति पूर्वः पक्षः। * वासुदेवात्सङ्कर्षणो नाम जीवो जायते * इति श्रुतिविरुद्धजीवोत्पत्त्यादिप्रतिपादनात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

* चतुर्षु वेदेषु पुरुषार्थमलभमानः * इति वेदगणानादरवचनाच्च । राद्धान्तस्तु— सङ्कर्षणप्रद्युम्नानिरुद्धानां परब्रह्मभावानाम् * अजायमानो बहुधा विजायते * इति श्रुतिप्रसिद्धस्वेच्छावतारप्रतिपादनान्न क्वचिच्छ्रुतिविरोधः । जीवाहङ्कारमनश्शब्दाश्च तत्तच्छरीरकाणां सङ्कर्षणादीनामेवाभिधायकाः, * तत्तेज ऐक्षत * इति तेजःप्रभृतिशब्दवत् । * चतुर्षु वेदेषु पुरुषार्थमलभमानः * इति च अनुदितहोमनिन्दावत् ; यथा * ऋग्वेदं भगवोऽध्येमि * इत्यारभ्य * इतिहासपुराणं पञ्चमम् * इत्यादिना सर्वेषु विद्यास्थानेषु चात्मनो वेदनाभाववचनं वक्ष्यमाणप्रशंसार्थम् । तन्त्रेऽस्मिन्वेदान्तोदितब्रह्मोपासनविधानाद्वेदाविरुद्धतदर्चनादिविधानाच्चावगम्यते इति प्रमाणमेव । सूत्रार्थस्तु– उत्पत्त्यसंभवात्– * न जायते म्रियते वा * इत्यादिश्रुतेः जीवस्योत्पत्त्यसंभवाज्जीवोत्पत्तिवचनाच्च न प्रमाणम् ॥ ३९ ॥

२१४. **न च कर्तुः करणम् ।** * सङ्कर्षणात्प्रद्युम्नसंज्ञं मन उत्पद्यते * इति मनसः करणस्य कर्तुर्जीवादुत्पत्तिश्च श्रुतिविरुद्धत्वान्न संभवति ; * एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च * इति मनसो ब्रह्मण उत्पत्तिश्श्रूयते ॥ ४० ॥

२१५. **विज्ञानादिभावे वा तदप्रतिषेधः ।** वाशब्दात्पक्षो विपरिवर्तते । विज्ञानं चादि च विज्ञानादि ब्रह्म । सङ्कर्षणादीनां ब्रह्मभावे सति * अजायमानो बहुधा विजायते * इति श्रुतिप्रसिद्धस्वेच्छावतारस्यैवात्राभिधानात् , तदप्रतिषेधः, प्रामाण्याप्रतिषेधः । सङ्कर्षणादीनां जीवादिसमानाधिकरणतया निर्देशस्तेषामधिष्ठातृतयोपपद्यते ॥ ४१ ॥

२१६. **विप्रतिषेधाच्च ।** अस्मिन्नपि तन्त्रे जीवोत्पत्तिविप्रतिषेधाच्च अविरुद्धमिदं तन्त्रम् ; * व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥ * इति हि पुरुषस्योत्पत्तिः प्रतिषिध्यते ॥ ४२ ॥ इति उत्पत्त्यसंभवाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

॥ अथ द्वितीयाध्याये तृतीयः पादः ॥

२१७. **न वियदश्रुतेः ।** वियत् उत्पद्यते, नेति संशयः । नोत्पद्यते इति पूर्वः पक्षः, निरवयवस्य सर्वगतस्यात्मन इवोत्पत्त्यसंभवात् । असंभावनीयस्य श्रवणं च न संभवति । अत उत्पत्तिश्रुतिर्गौणीति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

राद्धान्तस्तु— वियत् उत्पद्यत एव, उत्पत्तिश्रुतेः । अतीन्द्रियार्थविषयया श्रुत्याऽभिहितेऽर्थे निरवयवत्वादिहेतुकं नानुत्पत्त्यनुमानमुदेतुमलम् । आत्मनोऽप्यनुत्पत्तिश्रुतेरेव नित्यत्वम्, न निरवयवत्वादिना । सूत्रार्थस्तु— नवियदश्रुतेः– वियत् नोत्पद्यते । कुतः ? अश्रुतेः— अश्रवणात्; असंभावनीयस्य श्रवणासंभवात् ॥ १ ॥

२१८. **अस्ति तु** । अस्ति तु वियत उत्पत्तिः, * आत्मन आकाशस्संभूतः * इति श्रुतेः ; अतीन्द्रियार्थविषयया श्रुत्या प्रमाणान्तराप्रतिपन्नवियदुत्पत्तिप्रतिपादनं संभवत्येव । न अग्निना सिञ्चेदितिवदयोग्यमित्यर्थः ॥ २ ॥

२१९. **गौण्यसंभवाच्छब्दाच्च** । * तत्तेजोऽसृजतेति प्रतिपन्नतेजःप्राथम्यविरोधात् मध्ये वियदुत्पत्तिर्नसंभवतीत्युत्पत्तिश्रुतिर्गौणी, * वायुश्चान्तरिक्षं चैतदमृतमित्यमृतत्वश्रवणाच्च ॥ ३ ॥

२२०. **स्याच्चैकस्य ब्रह्मशब्दवत्** । * आकाशस्संभूतः, आकाशाद्वायुः, वायोरग्निः * इत्यादिषु सर्वत्रानुषक्तस्यैकस्य संभूतशब्दस्य आकाशे गौणत्वम्, वाय्वादिषु मुख्यत्वं च संभवति; ब्रह्मशब्दवत्— यथैकस्य ब्रह्मशब्दस्यैकप्रकरणे श्रूयमाणस्य * तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते * इति प्रधाने गौणत्वम्, * तपसा चीयते ब्रह्म * इति ब्रह्मणि मुख्यत्वं च । श्रवणावृत्ताविवानुषङ्गेऽप्यभिधानावृत्तेरनुषङ्गोऽपि तत्तुल्य इत्यभिप्रायः ॥ ४ ॥

परिहरति—

२२१. **प्रतिज्ञाऽहानिरव्यतिरेकात्** । * येनाश्रुतं श्रुतमिति ब्रह्मविज्ञानेनाकाशादिसर्वविज्ञानप्रतिज्ञाया अहानिः, आकाशस्यापि ब्रह्मण उत्पत्त्या तदव्यतिरेकादेव भवति ॥ ५ ॥

२२२. **शब्देभ्यः** । इतश्च * सदेव सोम्येदमग्र आसीत * ऐतदात्म्यमिदं सर्वम् * इत्यादिभ्यो ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणसर्वात्मकत्वादिवादिभ्यश्शब्देभ्यश्च वियदुत्पत्तिः प्रतीयते । * तत्तेजोऽसृजत * इत्येतस्मिन्वाक्ये आकाशोत्पत्त्यवचनात्प्रतीयमानं तेजःप्राथम्यं समानप्रकरणस्थैः प्रकरणान्तरस्थैश्च शब्दैः प्रतीयमानां वियदुत्पत्तिं न निवारयतीत्यभिप्रायः ॥ ६ ॥

२२३. **यावद्विकारं तु विभागो लोकवत्** । यद्यपि च्छान्दोग्ये * तत्तेजोऽसृजतेतिवदाकाशोत्पत्तिः स्वरूपेण नाभिधीयते ; तथापि तस्मिन्नेव * ऐतदात्म्यमिदं सर्वमित्यादिनाऽऽकाशादेस्सर्वस्य वस्तुनो ब्रह्मविकारत्ववचनात् यावद्विकारं विभागः— उत्पत्तिरुक्तैवेति गम्यते । लोकवत्— यथा लोके सर्व एते देवदत्तपुत्रा इत्यभिधाय तेषां केषाञ्चिद्देवदत्तादुत्पत्तिवचनं सर्वेषां तत उत्पत्तिप्रतिपादनार्थमिति गम्यते । आकाशस्यामृतत्ववचनं सुरादिवच्चिरकालस्थायित्वविषयमित्यभिप्रायः ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२२४. **एतेन मातरिश्वा व्याख्यातः।** अनेनैव न्यायेन मातरिश्वनोऽप्युत्पत्तिरुक्ता। नायं न्यायातिदेशः, अधिकाशङ्काभावात्। * तेजोऽतस्तथा ह्याह * इति वायोस्तेजस उत्पत्तिं वक्तुं पृथगुपादानम्॥८॥

२२५. **असंभवस्तु सतोऽनुपपत्तेः।** तुशब्दोऽवधारणार्थः। सतः परमकारणस्य परस्यैव ब्रह्मणः असंभवः— उत्पत्त्यसंभवः। तद्व्यतिरिक्तस्य कृत्स्नस्यैव एकविज्ञानेन सर्वज्ञानप्रतिज्ञाद्यनुपपत्तेः संभव उक्त इत्यभिप्रायः॥ ९॥ इति वियदधिकरणम्॥ 1॥

२२६. **तेजोऽतस्तथा ह्याह।** * आकाशाद्वायुः * इत्यादिव्यवहितकार्याणि किं स्वानन्तराकाशादेः केवलादुत्पद्यन्ते, उत तत्तच्छरीरात्परस्माद्ब्रह्मणः इति संशयः। स्वानन्तरादेवेति पूर्वः पक्षः— * आकाशाद्वायुः वायोरग्निः * इति तस्मात्केवलादेवोत्पत्तिश्रवणात्। * एतस्माज्जायते प्राणः * इति परस्माद्ब्रह्मणस्सर्वस्योत्पत्तिवादः, परम्परयाप्युपपद्यते। राद्धान्तस्तु— * तत्तेज ऐक्षत बहु स्याम् * * ता आप ऐक्षन्त * इति बहुभवनसङ्कल्पपूर्वकसृष्ट्युपदेशात्। केवलस्य त्वीदृशसङ्कल्पानुपपत्तेः, * यस्तेजसि तिष्ठन् यस्य तेजश्शरीरम् .... यस्याकाशश्शरीरम् * इति सर्वेषां परब्रह्मशरीरत्वश्रवणाच्च तत्तच्छब्दवाच्यात्परस्माद्ब्रह्मण एव साक्षात्तेजःप्रभृतीनामपि सृष्टिः। सूत्रार्थस्तु— तेजोऽतस्तथाह्याह— अतः— वायोरेव केवलादुत्पद्यते तेजः, तथा ह्याह श्रुतिः— * वायोरग्निरिति॥ १०॥

२२७. **आपः।** * अतस्तथा ह्याहेत्यनुवर्तते। अतः— तेजस एव केवलात् आपः उत्पद्यन्ते, * अग्नेरापः * तदपोऽसृजत * इति ह्याह॥ ११॥

२२८. **पृथिवी।** एवं पृथिव्यपि उत्पद्यते, * अद्भ्यः पृथिवी * ता अन्नमसृजन्त * इति ह्याह॥ १२॥

अन्नशब्देन कथं पृथिव्यभिधीयत इत्यवगम्यते? तत्राह—

२२९. **अधिकाररूपशब्दान्तरेभ्यः।** अन्नशब्देन पृथिव्युच्यते, महाभूतसृष्ट्यधिकारात् पश्चादपि महाभूतरूपसङ्कीर्तने * यत्कृष्णं तदन्नस्येति रूपकीर्तनात्, समानप्रकरणे * अद्भ्यः पृथिवीति पृथिवीशब्दश्रवणाच्च॥ १३॥

२३०. **तदभिध्यानादेव तु तल्लिङ्गात्सः।** तुशब्दः पक्षव्यावृत्त्यर्थः। न तेजःप्रभृतयः केवलाः स्वानन्तराणां कारणानि; अपि तु तत्तच्छरीरः सः— परमात्मैव तेषां कारणम्; कुतः? परमात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

सृष्टिलिङ्गात् तथाविधाभिध्यानात् । यथैव हि * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति, तथैव * तत्तेज ऐक्षत बहु स्यां प्रजायेयेति बहुभवनसङ्कल्परूपाभिध्यानं दृश्यते ; ईदृशमभिध्यानं परमात्मन एव हि संभवति ॥ १४ ॥

२३१. **विपर्ययेण तु क्रमोऽत उपपद्यते च ।** * आकाशाद्वायुः, वायोरग्निरिति पारम्पर्यक्रमात् विपर्ययेण * एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुर्ज्योतिरापः पृथिवी: * इति सर्वेषां ब्रह्मानन्तर्यरूपो यः क्रमः, स चात एव तत्तच्छरीराद्ब्रह्मणस्सृष्टेरुपपद्यते ॥ १५ ॥

२३२. **अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ।** विज्ञानसाधनत्वादिन्द्रियाणि प्राणश्च विज्ञानमित्युच्यते । * एतस्माज्जायते प्राणः इत्येतद्वाक्यम् आकाशतन्मात्रपञ्चकयोरन्तराले विज्ञानमनसी क्रमेण उत्पद्येते इत्येतत्परम् । विज्ञानमनसी इति प्राणस्यापि प्रदर्शनार्थम्, * पृथिव्यप्सु प्रलीयते इत्यारभ्य * वायुराकाशे लीयते आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते * इति प्रलयक्रमप्रत्यभिज्ञानात् तल्लिङ्गात् । अतो न श्रुत्यन्तरविरुद्धत्वात्साक्षाद्ब्रह्मणस्सर्वेषां सृष्टिपरमिदं वाक्यम् । अपि तु श्रुत्यन्तरसिद्धपारम्पर्यक्रमपरमिति चेत् ; परिहरति नाविशेषात् - भूततन्मात्रान्तराले विज्ञानमनसोरुत्पत्तावपि तत्तच्छरीरकब्रह्माभिधायित्वात् भूतेन्द्रियमनःप्राणशब्दानां सर्वेषां साक्षादुत्पत्त्यविशेषात् तत्परमेवेदं वाक्यम् ॥ १६ ॥

लोके तत्तद्वस्तुवाचितया शब्दजातस्य ब्रह्मणि वृत्तिरमुख्येत्याशङ्क्याह—

२३३. **चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ।** तुशब्दश्शङ्कानिवृत्त्यर्थः । स्थावरजङ्गमवस्तुव्यपाश्रयः तद्व्यपदेशः तद्वाचिशब्दो ब्रह्मणि अभाक्तः— मुख्य एव । कुतः ? तद्भावभावित्वात्— तेजःप्रभृतिषु आत्मतया ब्रह्मभावभावित्वेन सर्वस्य वस्तुनस्तच्छरीरतया तत्प्रकारत्वात् तत्तद्वाचिनां शब्दानां तत्रैव पर्यवसनात् । प्रकारवाचिनां शब्दानां प्रकारिपर्यवसायित्वेनाभाक्तत्वं गवादिशब्देषु सिद्धम् ॥ १७ ॥ इति तेजोधिकरणम् ॥ 2 ॥

२३४. **नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ।** किमात्मोत्पद्यते, न वेति संशयः । उत्पद्यत इति पूर्वः पक्षः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादेः, * तोयेन जीवान्व्यससर्ज भूम्याम् * प्रजापतिः प्रजा असृजत * इत्यादि सृष्टिवचनाच्च ; नित्यादिश्रुतिराकाशाद्यमृतत्ववचनवन्नेया । राद्धान्तस्तु— नात्मोत्पद्यते, अनुत्पत्तिश्रुतेः । * न जायते म्रियते वा विपश्चित् * इति जीवोत्पत्तिर्निषिध्यते ; * अजो नित्यः * नित्यो नित्यानामित्यादिश्रुतिभ्यो नित्यत्वावगमात् । जीवोत्पत्तिपक्षे अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गात्, वैषम्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

नैर्घृण्यप्रसङ्गाच्च। जीवस्य सृष्टिवचनं भोक्तृत्वानुगुणज्ञानविकासाभिप्रायम्। प्राक् सृष्टेरेकत्वावधारणादविभागवचनं नामरूपविभागाभावाभिप्रायम्। सूत्रमपि व्याख्यातम्॥ १८॥ इति आत्माधिकरणम्॥ 3॥

२३५ ज्ञोऽत एव। किं जीवश्चैतन्यमात्रवपुः, उत जडस्वरूप एवागन्तुकचैतन्यगुणः; उत ज्ञातृत्वैकस्वरूप इति संशयः। चैतन्यमात्रवपुरिति प्रथमः पक्षः। * विज्ञानं यज्ञं तनुते * यो विज्ञाने तिष्ठन् * ज्ञानस्वरूपमत्यन्तनिर्मलम् * इत्यादिश्रुतिस्मृतिभ्यः। द्वितीयस्तु— सुषुप्तिमूर्च्छादिषु सतोऽप्यात्मनश्चैतन्याऽनुपलब्धेः, जाग्रतोऽपीन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वाच्चैतन्यस्य, * न प्रेत्य संज्ञास्तीति मुक्तस्य चैतन्यप्रतिषेधाच्च, पाषाणकल्प एवागन्तुकचैतन्यगुणः। सर्वत्र कार्योपलब्धेस्सर्वत्र सन्निधानात्, शरीरगमनेनैव कार्यसंभवे गतिकल्पनायोगात्, सर्वगतश्चेति। राद्धान्तस्तु * अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान्कामान्पश्यन्रमते * * न पश्यो मृत्युं पश्यति * सर्वं ह पश्यः पश्यति * द्रष्टा श्रोता घ्राता रसयिता * इत्यादिश्रुतिभ्यो बद्धमुक्तोभयावस्थो ज्ञातैवात्मा। ज्ञानमात्रव्यपदेशस्तु ज्ञानस्य प्रधानगुणत्वात्, स्वरूपानुबन्धित्वेन स्वरूपनिरूपकगुणत्वात्, आत्मस्वरूपस्य ज्ञानवत्स्वप्रकाशत्वाद्वोपपद्यते। सुषुप्तिमूर्च्छादौ सदेव ज्ञानं कर्मणा संकुचितमनभिव्यक्तमपि जागरादौ विकसितमभिव्यज्यत इति न विरोधः। * न प्रेत्य संज्ञाऽस्तीति सांसारिकदेहाद्यस्मरणविषयम्, * नोपजनं स्मरन्निदं शरीरमित्यादिनैकार्थ्यात्। सर्वगतत्वं तु अणुत्वगत्यादिश्रुतिविरुद्धम्। सूत्रार्थस्तु— ज्ञोऽत एव। अतः— श्रुतेः, ज्ञातैव॥ १९॥

२३६. उत्क्रान्तिगत्यागतीनाम्। श्रुतेरिति वर्तते। * तेन प्रद्योतेनैष आत्मा निष्क्रामति * ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति * तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे * इत्याद्युत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीवः॥ २०॥

२३७. स्वात्मना चोत्तरयोः। चशब्दोऽवधारणार्थः। यद्यप्युत्क्रान्तौ स्थितस्य शरीरविश्लेषेण कथंचित्संपाद्यत्वमस्ति; उत्तरयोः— गमनागमनयोस्तु स्वात्मनैव संपाद्यत्वमवश्याभ्युपेयम्॥ २१॥

२३८. नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्। * योऽयं विज्ञानमय इति जीवं प्रस्तुत्य * स वा एष महानज आत्मा * इति महत्वश्रुतेः नाणुर्जीव इति चेन्न; इतराधिकारात्— जीवेतरपरमात्माधिकारात् * यस्यानुवित्तः प्रतिबुद्ध आत्मा * इति हि मध्ये परमात्मा प्रस्तुतः॥ २२॥

२३९. स्वशब्दोन्मानाभ्याञ्च। * एषोऽणुरात्मा चेतसा वेदितव्यः यस्मिन्प्राणः पञ्चधा संविवेशेति साक्षादणुशब्दादणुरेवायम्। उन्मानाच्चाणुरेव। उन्मानम्— उद्धृत्य मानम्। * आराग्रमात्रो ह्यवरोऽपि दृष्टः * इत्याराग्रमुद्धृत्य तन्मानत्वं हि जीवस्य श्रूयते॥ २३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मनोऽणुपरिमाणस्य सकलदेहव्यापि सुखाद्यनुभवः कथमित्यत्र मतान्तरेण परिहारमाह—

२४०. अविरोधश्चन्दनवत्। यथा हरिचन्दनबिन्दुः देहैकदेशवर्त्यपि सकलदेहवर्तिनमाह्लादं जनयति, तद्वदविरोधः ॥ २४ ॥

२४१. अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि। चन्दनबिन्दोर्देहैकदेशविशेषस्थित्यपेक्षस्तथाभावः; आत्मनस्तु न तथेति चेन्न, आत्मनोऽपि तथाभावाभ्युपगमात्; हृदि ह्ययमात्मा स्थित इति श्रूयते— * योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरित्यादौ ॥ २५ ॥

स्वमतेनाह—

२४२. गुणाद्वाऽऽलोकवत्। वाशब्दो मतान्तरव्यावृत्त्यर्थः। आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः; यथा द्युमणिमणिप्रभृतीनामेकदेशवर्तिनामालोकः तद्गुणः अनेकदेशव्यापी दृश्यते ॥ २६ ॥

* विज्ञानं यज्ञं तनुते * इत्यादौ ज्ञानमेवात्मेति व्यपदिश्यत इति चेत्; तत्राह—

२४३. व्यतिरेको गन्धवत्तथा च दर्शयति। जानामीत्यात्मगुणत्वेन प्रतीतेः व्यतिरेकोऽभ्युपगमनीयः। यथा गन्धवती पृथिवी इत्युपलब्धौ गन्धस्तद्गुणस्तद्व्यतिरिक्तः। दर्शयति च श्रुतिः * जानात्येवायं पुरुष इति ॥ २७ ॥

२४४. पृथगुपदेशात्। न केवलं जानामीति पृथगुपलब्धिमात्रम्; आत्मनः पृथक्त्वेनोपदिश्यते च ज्ञानम्, * न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते * इति ॥ २८ ॥

* विज्ञानमात्मेति व्यपदेशः कथमुपपद्यत इत्यत्राह—

२४५. तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्। ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः; यथा प्राज्ञः, * ब्रह्मणा विपश्चिता * यस्सर्वज्ञस्सर्ववित् * इति सर्वज्ञ एव ज्ञानगुणसारत्वात् * सत्यं ज्ञानमिति व्यपदिश्यते ॥ २९ ॥

२४६. यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्। ज्ञानस्य यावदात्मस्वरूपभावित्वाच्च तेन तद्व्यपदेशो न दोषः, खण्डादिषु तथा दर्शनात्; खण्डादिषु हि यावत्स्वरूपभाविधर्मत्वेन गोत्वस्य गौरिति व्यपदेशो दृश्यते; चकारादात्मनः स्वप्रकाशत्वेन ज्ञानमिति व्यपदे(शो)शो न दोष इत्युच्यते ॥ ३० ॥

सुषुप्त्यादिषु ज्ञानस्यानुपलब्धेर्न यावदात्मभावित्वमित्याशङ्क्याह—

Digitization by Arya Samaj Charitable Foundation, Chennai

२४७. **पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्।** तुशब्दश्शङ्कानिवृत्त्यर्थः; सुषुप्त्यादिष्वपि सतो ज्ञानस्यानभिव्यक्तस्य जागर्यादिष्वभिव्यक्तिसंभवात् यावदात्मभाव्येव ज्ञानम्। पुंस्त्वादिवत्— पुंस्त्वमिति पुरुषासाधारणधातुरुच्यते; यथा सप्तधातुमयत्वेन शरीरस्य पुंस्त्वस्य बाल्येऽपि सतोऽनभिव्यक्तस्य सप्तमधातोः युवत्वेऽभिव्यक्तिः॥ ३१॥

एवमात्मनो ज्ञातृत्वमणुत्वं चोक्त्वा पक्षान्तरे दोषमाह—

२४८. **नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा।** अन्यथा– ज्ञानात्मवादे सर्वगतात्मवादे च उपलब्ध्यनुपलब्धी नित्यवत् प्रसज्येयाताम्; उपलब्ध्यनुपलब्ध्योरन्यतरनियमो वा। ज्ञानात्मपक्षे तावत् ज्ञानस्य प्रकाशस्वभावत्वात्प्रकाशपर्यायोपलब्धेर्नित्यवत्प्रसक्तिरनिवार्या। ज्ञाने विद्यमाने सति हेत्वन्तरेणानुपलब्धिजननायोगात् ज्ञानमेवानुपलब्धेरपि हेतुरित्यास्थेयम्। ज्ञानस्य सर्वदा वर्तमानत्वात्सर्वदोभयप्रसक्तिः। अथ युगपद्विरुद्धकार्यजननायोगात् ज्ञानमुपलब्ध्यनुपलब्ध्योरन्यतरहेतुरास्थीयते, तदाऽन्यतरनियमस्स्यात्। सर्वगतत्वपक्षे यथा ज्ञानात्मवादिनाम्, तथैव हेतुजन्यज्ञानवादिनोऽपि सर्वेषामात्मनां सर्वगतत्वे सर्वस्यात्मनस्संयोगादेः हेतोस्सर्वेषां साधारणत्वात् उक्तरीत्या तथैव प्रसक्तिः। अदृष्टोत्पत्तिहेतोरपि सर्वस्य साधारणत्वाददृष्टेनापि न व्यवस्था॥ ३२॥ इति ज्ञाधिकरणम्॥ 4॥

२४९. **कर्ता शास्त्रार्थवत्त्वात्।** आत्मनो ज्ञातृत्ववत्कर्तृत्वमप्यस्ति, नेति संशयः। प्रधानस्यैव कर्तृत्वादात्मनो न कर्तृत्वमस्तीति पूर्वः पक्षः। * अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते * नान्यं गुणेभ्यः कर्तारम् * इत्यादिषु गुणानामेव कर्तृत्ववचनात्। राद्धान्तस्तु– स्वर्गापवर्गसाधनानुष्ठानविधानशास्त्राणामर्थवत्त्वाय कर्तैवात्मा, बोद्धुरेव हि शासनम्; नाचेतनस्य प्रधानस्य। * यजेत * उपासीनेति कर्तरि लकारः। अतः कर्तारमेव बोधयति शास्त्रम्। सूत्रमपि व्याख्यातम्॥ ३३॥

२५०. **उपादानाद्विहारोपदेशाच्च।** उपादानात् उपदिश्यमानात्, विहारोपदेशाच्च। उपदिश्यते उपादानं, विहारश्च, * एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते * इति उपादानविहारयोः कर्तृत्वोपदेशाच्च कर्ता॥ ३४॥

२५१. **व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः।** * विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिचेति यज्ञादिकर्मस्वात्मनः कर्तृत्वोपदेशाच्च कर्ता। विज्ञानशब्देन नात्मनो व्यपदेशः, अपि त्वन्तःकरणरूपबुद्धेरेवेति चेत्— तथा सति विज्ञानेनेति करणविभक्तिनिर्देशस्स्यात्॥ ३५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२५२. **उपलब्धिवदनियमः।** प्रधानस्य कर्तृत्वेन आत्मनो भोक्तृत्वमिति पक्षे पूर्वोक्तोपलब्ध्यनियमवत्प्रधानस्य सर्वसाधारणत्वात् भोक्तृत्वानियमः। अन्तःकरणभेदेऽपि सर्वेषामात्मनां सर्वगतत्वेन साधारण्यमनिवार्यम् ॥ ३६ ॥

२५३. **शक्तिविपर्ययात्।** बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वायोगात् भोक्तृत्वशक्तिरपि बुद्धेरेवेति आत्मनो भोक्तृत्वशक्तिविपर्ययः— हानिरित्यर्थः ॥ ३७ ॥

२५४. **समाध्यभावाच्च।** प्रकृतेः कर्तृत्वे मोक्षसाधनभूतसमाध्यभावश्च स्यात्: प्रकृतेरन्योऽस्मीति समाधाने प्रकृतेः कर्तृत्वायोगात् ॥ ३८ ॥

२५५. **यथा च तक्षोभयथा।** आत्मनः कर्तृत्वे(ऽपि) भोगवाञ्छायां करोति, अन्यथा न करोतीत्युभयप्रकारव्यवस्थोपपद्यते; यथा तक्षा स्वकार्ये इच्छया व्यवस्थितः। बुद्धेः कर्तृत्वे अचेतनत्वेन स्वेच्छाया अभावाद्व्यवस्था न सिध्यतीत्यभिप्रायः ॥ ३९ ॥ इति कर्त्रधिकरणम् ॥ 5 ॥

२५६, २५७. **परात्तु तच्छ्रुतेः। कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः।** इदानीं जीवस्य कर्तृत्वं किं परमात्मायत्तम्, उत स्वायत्तमिति संशयः। स्वायत्तमिति पूर्वः पक्षः, विधिनिषेधशास्त्रानर्थक्यापत्तेः। यस्त्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः, स एव हि नियोज्यो निग्रहानुग्रहास्पदं च भवतीति। राद्धान्तस्तु— • अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा • य आत्मानमन्तरो यमयति इत्यादिश्रुतेः परमात्मायत्तमेव कर्तृत्वम्; तच्च जीवेन स्वबुद्ध्या कृतं प्रयत्नमपेक्ष्य तदनुमतिदानेनेति विधिनिषेधावैयर्थ्यम्। अत एव निग्रहानुग्रहास्पदं च। सूत्रद्वयमपि व्याख्यातम् ॥ ४१ ॥ इति परायत्ताधिकरणम् ॥ 6 ॥

२५८. **अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके।** किं जीवः परमात्मनोऽत्यन्तभिन्नः, उत परमात्मैवाज्ञः, अथ परमात्मैवोपाधिसंबद्धः, परमात्मांशो वेति संशयः। अत्यन्तभिन्न— इति प्रथमः पक्षः, • पृथगात्मानं प्रेरितारं च मत्त्वा • तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति • अनीशश्चात्मा बध्यते भोक्तृभावात् • सर्वस्य वशी सर्वस्येशानः • इत्यादिभेदश्रुतेः, जीवपरमात्मनोः कर्मपरतन्त्रतातद्विपरीतत्वश्रुतेश्च; अभेदश्रुतयः नरपतिरेव सर्वलोक इतिवदौपचारिक्यः इति। भेदश्रुतीनामविद्वद्विषयतया वा उपाधिसंबन्धविषयतया वा अमुख्यवृत्तिसंभवादभेदश्रुतिमुख्यत्वाय अज्ञः परमात्मा, उपाधिसंबद्धो वा जीवः इति युक्तम्। राद्धान्तस्तु— नानात्वैकत्वव्यपदेशात् परमात्मनस्सत्यसङ्कल्पत्वसर्वज्ञत्वनिरवद्यत्वश्रुतेरज्ञत्वोपाधिसंबन्धाद्यनुपपत्तेर्जीवशब्दस्य जीवशरीरकपरमात्मवाचित्वेन • तत्त्वमसि • अयमात्मा ब्रह्मेति सामानाधिकरण्यस्य मुख्यत्वाच्छरीरशरीरिणोर्विशेष्यभूतयोः स्वरूपस्वभावभेदेन च भेदश्रुतेश्च मुख्यत्वाद्विशिष्टवस्त्वेकदेशतया च

Digitization by Arya Samaj Charitable Foundation, Chennai

विशेषणस्य परमात्मांशो जीवः । जीवशरीरत्वं च परमात्मनः * यस्यात्मा शरीरमित्यादिषु सिद्धम् । सूत्रार्थस्तु— अंशः— परमात्मांशो जीवः, नानाव्यपदेशात्— भेदव्यपदेशात्, अन्यथा च— अभेदव्यपदेशाच्च ; उक्तनीत्या उभयमुख्यत्वायेत्यभिप्रायः । दाशकितवादित्वमप्यधीयत एके * ब्रह्मदाशा ब्रह्मदासाः * इत्यादिना दाशकितवादित्वमप्यधीयत एके शाखिनः ; सर्वजीवव्यापित्वादभेदोपदेशस्य तत्रात्यादरः प्रतीयत इत्यर्थः ॥ ४२ ॥

२५९. **मन्त्रवर्णात्** । मन्त्रवर्णाच्चांश एव जीवः, * पादोऽस्य विश्वा भूतानीति ; पादशब्दोंऽशवाची ॥ ४३ ॥

२६०. **अपि स्मर्यते** । * ममैवांशो जीवलोके जीवभूतस्सनातनः * इति जीवस्य परमात्मांशत्वं स्मर्यते च ॥ ४४ ॥

एकद्रव्यैकदेशत्वं ह्यंशत्वम् ; अतो जीवस्य ब्रह्मैकदेशत्वेन जीवदोषा ब्रह्मणो दोषा एवेत्याशङ्क्याह—

२६१. **प्रकाशादिवत्तु नैवं परः** । तुशब्दश्शङ्कानिवृत्त्यर्थः ; प्रकाशवतां मणिद्युमणिप्रभृतीनां प्रकाशविशिष्टानां विशेषणभूतः प्रकाशः यथांशः, तद्वज्जीवशरीरतया जीवविशिष्टस्य ब्रह्मणोंऽशो जीवः । विशिष्टवस्त्वैकदेशतया विशेषणस्य, विशेषणं विशिष्टस्यांशः । आदिशब्दात् द्रव्यविशेषणतैकस्वभावजातिगुणशरीराणि गृह्यन्ते । विशेषणविशेष्ययोः स्वरूपस्वभावभेदाद्विशेषणभूतो जीवः यत्स्वरूपो यत्स्वभावश्च, नैवं परः— सर्वज्ञस्सत्यसङ्कल्पो नित्यनिरवद्यश्चेत्यर्थः ॥ ४५ ॥

२६२. **स्मरन्ति च** । प्रकाशादिवत् जीवस्यांशत्वं पराशरादयः स्मरन्ति * एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत् ॥ तथा परं प्रति शरीरत्वं च * यत्किञ्चित्स्सृज्यते येन सत्त्वजातेन वै द्विज । तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः ॥ इति ॥ ४६ ॥

ब्रह्मांशत्वेन च सर्वेषामात्मनां समत्वाद्वेदाध्ययनादौ केषांचिदनुज्ञा, केषांचित्परिहारश्च कथमुपपद्यत इत्यत्राह—

२६३. **अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्** । ब्राह्मणादिशुच्यशुचिदेहसंबन्धात् अनुज्ञापरिहारौ उपपद्येते, ज्योतिरादिवत् । ज्योतिः— अग्निः यथा श्रोत्रियागारादग्निराह्रियते, श्मशानादेस्तु परिह्रियते ; यथाचान्नादिः श्रोत्रियादेरनुज्ञायते, अभिशस्तादेश्च परिह्रियते ; तद्वत् ॥ ४७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२६४. **असन्ततेश्चाव्यतिकरः।** जीवानां प्रतिशरीरं भिन्नत्वादणुत्वेन तत्तत्रावच्छिन्नत्वाच्च न भोगव्यतिकरश्च। अज्ञब्रह्मजीववादे चोपहितब्रह्मजीववादे चाज्ञानसंबन्धि चोपाधिसंबन्धि च ब्रह्मैवेति भोगव्यवस्था न सिद्ध्यतीत्यभिप्रायः ॥ ४८ ॥

२६५. **आभासा एव च।** अज्ञब्रह्मजीववादे सर्वज्ञस्य ब्रह्मणः अज्ञानकल्पनस्वरूपतिरोधानकल्पनाहेतवः आभासा एव। चकारान्निरवद्यत्वादिश्रुतिविरोधश्च ॥ ४९ ॥

पारमार्थिकोपाधिसंबन्धिब्रह्मजीववादे अनाद्यदृष्टप्रवाहेणोपाधिप्रवाहानादित्वात्तत्संबन्धिनि ये दोषाः, न ते ब्रह्मणि प्रसज्यन्त इत्यत्राह—

२६६. **अदृष्टानियमात्।** अदृष्टैस्तत्कृतोपाधिभिश्च ब्रह्मणश्छेदासंभवात्तत्कृता दोषा ब्रह्मण्येव संभवेयुः ॥ ५० ॥

२६७. **अभिसन्ध्यादिष्वपि चैवम्।** अदृष्टहेतुभूताभिसन्ध्यादिष्वप्युपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्पूर्वपूर्वोपाधियुक्तं ब्रह्मैवेति न कश्चिद्विशेषः ॥ ५१ ॥

२६८. **प्रदेशभेदादिति चेन्नान्तर्भावात्।** उपाधिसंबन्धिब्रह्मप्रदेशादनुपहितब्रह्मदेशो भिद्यते; अतो व्यवस्थेति चेन्न, उपाधिषु गच्छत्सु पूर्वमनुपहितब्रह्मप्रदेशस्याप्यन्तर्भावात् ॥ ५२ ॥ इति अंशाधिकरणम् ॥ 7 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे द्वितीयस्याध्यायस्य तृतीयः पादः ॥

॥ अथ द्वितीयाध्याये चतुर्थः पादः ॥

२६९. **तथा प्राणाः।** किं जीववदिन्द्रियाण्यपि नोत्पद्यन्ते, उत वियदादिवदुत्पद्यन्त इति संशयः। नोत्पद्यन्त इति पूर्वः पक्षः। प्रलयकाले अवस्थानश्रुतेः; उत्पत्तिवादाः जीवोत्पत्तिवादवन्नेयाः। * असद्वा इदमग्र आसीत्.... ऋषयो वा व तेऽग्रे सदासीत् के ते ऋषय इति प्राणा वा व ऋषयः * इतीन्द्रियाणां तदानीं स्थितिश्श्रूयते। राद्धान्तस्तु— प्राक्सृष्टेरेकत्वावधारणात्, इन्द्रियाणाम् * एतस्माज्जायते * इत्युत्पत्तिवादात्, उत्पत्तिनिषेधनित्यत्ववचनाभावाच्च, वियदादिवदुत्पद्यन्ते। * प्राणा वा व ऋषयः * इति प्राणशब्दनिर्दिष्टः परमात्मा। सूत्रार्थस्तु— तथा प्राणाः— यथा जीवा नोत्पद्यन्ते तथा प्राणा अपि ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

बहुत्वासंभवाद्बहुवचनश्रुतिर्गौणीत्याह—

२७०. **गौण्यसंभवात्तत्प्राक्छ्रुतेश्च।** * प्राणा वा * इति बहुवचनश्रुतिर्गौणी, तदानीं बहुत्वासंभवात्, तस्य परमात्मन एव प्रागवस्थानश्रुतेश्च ॥ २ ॥

[अत्र पाठान्तरम्]

चस्त्वर्थः; तुशब्दात्पक्षो व्यावृत्तः। इन्द्रियाण्युत्पद्यन्त एव। कुतः? तत्प्राक् श्रुतेः— तस्य परमात्मन एव प्रागवस्थानश्रुतेः * सदेव सोम्येदमग्र आसीत् * आत्मा वा इदमेक एवाग्र आसीत् * एको ह वै नारायण आसीत् * इति। प्राणशब्दस्य * प्राणमभिसंविशन्ति * इति परमात्मन्यपि प्रसिद्धेः, * प्राणा वा व ऋषयः इति तस्यैव द्रष्टृत्वसंभवात् ॥ २ ॥

२७१. **तत्पूर्वकत्वाद्वाचः।** इतश्च; वाचः परमात्मव्यतिरिक्तनामधेयस्य तत्पूर्वकत्वात्— वियदादिसृष्टिपूर्वकत्वादित्यर्थः; * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत * इत्यादिश्रुतेः। अतः परमात्मैव प्राणशब्दनिर्दिष्टः ॥ ३ ॥ इति प्राणोत्पत्त्यधिकरणम् ॥ 1 ॥

२७२. **सप्त गतेर्विशेषितत्वाच्च।** किमिन्द्रियाणि सप्तैव, उतैकादशेति संशयः। सप्तैवेति पूर्वः पक्षः। * सप्त प्राणाः प्रभवन्ति * इत्यादिषु सप्तानामेव जीवेन सह सञ्चारश्रवणात्, * यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च * इति सप्तानामेव योगकाले ज्ञानानीति विशेषितत्वाच्च; श्रोत्रादीनि ज्ञानेन्द्रियाणि मनो बुद्धिश्चेति सप्तैव। राद्धान्तस्तु— श्रोत्रादीनि ज्ञानेन्द्रियाणि वागादीनि च कर्मेन्द्रियाणि मन इत्येकादश; कथम्? वाग्घस्तादीनामपि श्रोत्रादिवत्कार्यभेदेन जीवोपकरणत्वाविशेषात् * दशेमे पुरुषे प्राणा आत्मैकादशः * इन्द्रियाणि दशैकं च * इत्यादिश्रुतिस्मृतिभ्यः। वागादीनां जीवेन सह गमनाभावात्सप्तानामेव प्रयाणकाले गतिश्रवणम्; योगकाले विशेषितत्वं च ज्ञानेन्द्रियाणां मनसस्तद्वृत्तिरूपबुद्धेश्च प्राधान्यात्। सूत्रार्थस्तु— सप्तगतेर्विशेषितत्वाच्च— सप्तानामेव गतिश्रवणात्, ज्ञानानि पञ्च मनो बुद्धिश्चेति विशेषितत्वाच्च तानि सप्तैव ॥ ४ ॥

२७३. **हस्तादयस्तु स्थितेऽतो नैवम्।** नैवम्— न सप्तैवेन्द्रियाणीत्यर्थः; श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च वाग्घस्तादीनि च कर्मेन्द्रियाणि पञ्च मनश्चेत्येकादश; तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति; वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्तिविनाशयोगीन्युपकारकाणि; अतो नैवम् इत्यन्वयः; एषां जीवोपकारकत्वाविशेषात्, * दशेमे पुरुषे प्राणा आत्मैकादशः * इत्यादिवचनाच्चेत्यभिप्रायः ॥ ५ ॥ इति सप्तगत्यधिकरणम् ॥ 2 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२७४. **अणवश्च**। इन्द्रियाणि किं सर्वगतानि, उताणुपरिमाणानीति संशयः। सर्वगतानीति पूर्वः पक्षः; * त एते सर्व एव समास्सर्वेऽनन्ताः * इति प्राणानामानन्त्यश्रवणात्। राद्धान्तस्तु * प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति * इति श्रवणात्, परिमितत्वे सति अप्रत्यक्षत्वात् अणवः। आनन्त्यश्रुतिस्तु * अथ यो हैताननन्तानुपास्ते * इत्युपासनविधानादुपासनफलबाहुल्यविषया ॥ ६ ॥

२७५. **श्रेष्ठश्च**। श्रेष्ठः प्राणश्चोत्पद्यते। नात्र न्यायातिदेशः, अधिकाशङ्काभावात्। पृथग्योगकरणमुत्तरचिन्तार्थम्। श्रेष्ठः पञ्चवृत्तिः प्राणः। प्राणश्रैष्ठ्यं तु प्राणसंवादे तस्य श्रेष्ठयाभिधानात् ॥ ७ ॥
इति प्राणाणुत्वाधिकरणम् ॥ 3 ॥

२७६. **न वायुक्रिये पृथगुपदेशात्**। किमयं श्रेष्ठप्राणो वायुमात्रम्, उत तत्क्रिया, अथ वायुरेव कंचन विशेषमापन्नः? इति संशयः। वायुमात्रमिति प्रथमः पक्षः, * यः प्राणस्स वायुः * इति व्यपदेशात्। वायुमात्रे प्राणप्रसिद्ध्यभावात्, उच्छ्वासनिश्वासरूपवायुक्रियायां प्राणप्रसिद्धेः, वायोः, क्रियाविशेष एव प्राण इति द्वितीयः पक्षः। राद्धान्तस्तु— न वायुमात्रं तत्क्रिया वा प्राणः; अपि तु देहधारणयोग्यतादिरूपविशेषमापन्नो वायुः, * एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुः * इति वायुप्राणयोः पृथगुत्पत्त्युपदेशात्। क्रियायाश्च पृथगुपदेशो न संभवति, तेजःप्रभृतिष्वदर्शनात्। चक्षुरादिकरणैस्सह जीवोपकरणतयोपदेशात्, देहेन्द्रियधारणरूपोपकाराधिक्याच्चक्षुरादिभ्यः प्राधान्यवचनाच्च न क्रियामात्रम्। सूत्रार्थस्तु— न वायुक्रिये पृथगुपदेशात्— वायुमात्रं तत्क्रिया वा न प्राणः; पृथगुपदेशात्— * प्राणो जायते * खं वायुरिति हि पृथगुत्पत्तिरुपदिश्यते ॥ ८ ॥

वायोः पृथगुपदिष्टतया तस्मादन्योऽयं प्राणः किमग्न्यादिवद्भूतान्तरमित्याशङ्क्याह—

२७७. **चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः**। तुशब्दश्शङ्कानिवृत्त्यर्थः; प्राणो नाकाशादिवद्भूतान्तरम्; अपि तु वायुरेवावस्थान्तरमापन्नः चक्षुरादिवत् जीवोपकरणम्। तच्च उपकरणत्वमुपकरणभूतैरिन्द्रियैः सह शिष्ट्यादिभ्योऽवगम्यते। शिष्टिः— शासनम्, उपदेशः। उपदिश्यते ह्ययं प्राणश्चक्षुरादिभिस्सह प्राणसंवादादिषु। तत्सजातीयत्वे ह्येतदुपपद्यते। प्राणशब्दगृहीतेषु करणेष्वस्य * अथ ह य एवायं मुख्यः प्राणः * इति विशिष्याभिधानमादिशब्देनोक्तम्। तदपि तत्सजातीयत्वे हि संभवति ॥ ९ ॥

२७८. **अकरणत्वाच्च न दोषस्तथा हि दर्शयति**। अकरणत्वात्-करणं क्रिया, अकरणत्वं क्रियारहितत्वम्। अक्रियत्वादस्य प्राणस्य जीवं प्रत्युपकारविशेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते; स नास्ति। यत उपकारविशेषरूपां शरीरेन्द्रियधारणात्मकक्रियां दर्शयति श्रुतिः— * यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव

Digitization by Arya Samaj Charitable Foundation, Chennai

दृश्यते स वरश्रेष्ठः * इति वागादिमुख्यप्राणपर्यन्तानि करणानि प्रत्येकमभिधाय प्राणोत्क्रमणे शरीरेन्द्रिय-शैथिल्याभिधानात् ॥ १० ॥

प्राणापानादिनामभेदेन पञ्चधाऽवस्थित एक एव प्राण इत्याह—

२७९. **पञ्चवृत्तिर्मनोवद्व्यपदिश्यते**। प्राणापानादिवृत्तिभेदात्प्राण एव पञ्चधा व्यपदिश्यते ; मनोवत्— यथैकमेव मनः कामादिवृत्तिभेदेन तैश्शब्दैरभिधीयत इति श्रुतिराह, * कामस्सङ्कल्पः * इत्यारभ्य * ह्रीर्धीर्भीरित्येतत्सर्वं मन एव * इति । अपानादि समानपर्यन्तं व्यपदिश्य * एतत्सर्वं प्राण एव * इति व्यपदेशात्प्राण एव पञ्चवृत्तिरित्यवगम्यते ॥ ११ ॥ इति वायुक्रियाधिकरणम् ॥ 4 ॥

२८०. **अणुश्च**। किमयं प्राणस्सर्वगतः, उताणुरिति संशयः । सर्वगत इति पूर्वः पक्षः ; * सम एभिस्त्रिभिर्लोकैस्समः * इत्यादिना प्राणस्यानन्त्यव्यपदेशात् । राद्धान्तस्तु— * तमुत्क्रामन्तं प्राणोऽनुत्क्रामति * इत्युत्क्रान्तिवचनादिन्द्रियवत्प्राणश्चाणुः । एवमणुत्वे निश्चिते सति सर्वस्य प्राणायत्तस्थितित्वेन वैभववादः । सूत्रमपि व्याख्यातम् ॥ १२ ॥ इति श्रेष्ठाणुत्वाधिकरणम् ॥ 5 ॥

२८१. **ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात्**। अग्न्यादीनां जीवस्य चेन्द्रि-याधिष्ठानं परमात्मायत्तमिति * परात्तु तच्छ्रुतेरित्युक्तमेव स्मारयति विषमव्याप्तिज्ञापनाय । प्राणवता— जीवेन सह, ज्योतिरादेः— अग्न्यादेः वागाद्यधिष्ठानम्, तदामननात्— परमात्मामननाद्भवति । आम-ननम्— आभिमुख्येन मननम् ; तत्सङ्कल्पादेव भवतीत्यर्थः ; * योऽग्नौ तिष्ठन्.... योऽग्निमन्तरो यमयति * इत्यादिशब्दात् ॥ १३ ॥

२८२. **तस्य च नित्यत्वात्**। सर्वेषामात्मतयाऽनुप्रविश्य, सर्वनियमनस्य नित्यत्वात्— परमा-त्मनः अवर्जनीयत्वादित्यर्थः, * तत्सृष्ट्वा, तदेवानुप्राविशत् * इति श्रुतेः ॥ १४ ॥ इति ज्योतिराद्यधिष्ठाना-धिकरणम् ॥ 6 ॥

२८३. **त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्**। किं प्राणशब्दनिर्दिष्टास्सर्व एवेन्द्रि-याणि, उत श्रेष्ठव्यतिरिक्ताः प्राणा इति संशयः । सर्व एवेति पूर्वः पक्षः ; सर्वेषामविशेषेण प्राणशब्द-निर्देशात्, करणत्वाच्च । राद्धान्तस्तु— श्रेष्ठव्यतिरिक्ताः प्राणा इन्द्रियाणि, तेष्वेवेन्द्रियशब्दनिर्देशात् ; * इन्द्रि-याणि दशैकञ्च * एकादशं मनश्चात्र * इति । एषामपि प्राणशब्दनिर्देशः प्राणाधीनवृत्तित्वेन । तथा च श्रुतिः * त एतस्यैव सर्वे रूपमभवन्— तस्मादेत एतेनाख्यायन्ते * इति । रूपमभवन्— शरीरमभवन्,

Digitization by Arya Samaj Charitable Foundation, Chennai

तदधीनवृत्तयोऽभवन्नित्यर्थः। सूत्रार्थस्तु— श्रेष्ठादन्यत्र ये प्राणाः; त इन्द्रियाणि, तेष्वेव तद्व्यपदेशात्— इन्द्रियव्यपदेशात् ॥ १५ ॥

२८४. भेदश्रुतेर्वैलक्षण्याच्च। * एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चेति समनस्केन्द्रियेभ्यो भेदेन प्राणस्योत्पत्तिश्रुतेः, इन्द्रियेषूपरतेष्वपि प्राणवृत्तेर्वृत्तिवैलक्षण्याच्च ॥ १६ ॥ इति इन्द्रियाधिकरणम् ॥

२८५. संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। किं प्रपञ्चव्यष्टिसृष्टिः जीवभूतचतुर्मुखात्, उत तच्छरीरकात्परमात्मन एवेति संशयः। केवलाच्चतुर्मुखादिति पूर्वः पक्षः, * अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति व्यतिरेकश्रुतेः। जीवस्य परमात्मांशत्वेन व्याकरवाणीत्युत्तमपुरुषनिर्देशोऽपि कथंचिदुपपद्यते। राद्धान्तस्तु— * नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणं कुर्वत एव नामरूपव्याक्रियोपदेशात्परमात्मन एव नामरूपव्याकरणरूपव्यष्टिसृष्टिः। त्रिवृत्करणं तु न चतुर्मुखेन कर्तुं शक्यम्, अण्डसृष्ट्युत्तरकालभावित्वाच्चतुर्मुखोत्पत्तेः, त्रिवृत्कृतैरेव तेजोबन्नैरण्डसृष्टिसंभवाच्च। * तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ इति हि स्मर्यते। * नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः ॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदादिविशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥ इति च। अतश्चतुर्मुखशरीरकात्परमात्मन एव व्यष्टिसृष्टिः। एवं सति व्याकरवाणीत्युत्तमपुरुषनिर्देशस्समञ्जसः। * अनेन जीवेनेति व्यतिरेकनिर्देशोऽपि जीवशरीरकेणात्मनेत्यन्वयात्समञ्जसः। जीवशब्दस्तेजःप्रभृतिशब्दवज्जीवशरीरकब्रह्मवाचीति ह्युक्तम्। * अनेन जीवेनात्मनेति सामानाधिकरण्यञ्च मुख्यम्; * अनुप्रविश्य नामरूपे व्याकरवाणीति समानकर्तृकत्वनिर्देशश्च। सूत्रार्थस्तु— संज्ञामूर्तिक्लृप्तिस्तु— तु शब्दश्शङ्काव्यावृत्त्यर्थः। नामरूपक्लृप्तिः परमात्मन एव; कुतः? त्रिवृत्कुर्वत उपदेशात्— त्रिवृत्करणं कुर्वत एव नामरूपव्याकरणोपदेशात्। त्रिवृत्करणं तु परमात्मन एव कर्मेत्युक्तम् ॥ १७ ॥

* अन्नमशितं त्रेधा विधीयते * इत्यादिना चतुर्मुखसृष्टवस्तुषु त्रिवृत्करणप्रकारो ह्युपदिश्यते; अतश्चतुर्मुखेन केवलेन तच्छक्यमित्याशङ्क्याह—

२८६. मांसादि भौमं यथाशब्दमितरयोश्च। * तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति निर्दिष्टं त्रिवृत्करणम् * अन्नमशितं त्रेधा विधीयते * इत्यादिना नोपदिश्यते; * तस्य यस्स्थविष्ठो धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः * इति मांसाद्यपि हि भौममेवोपदिश्यते। * अन्नमशितं त्रेधेति प्रक्रमात्, * अन्नमयं हि सोम्य मनः * इति वाक्यशेषाच्च। तेजोबन्नानां त्रिवृत्करणप्रकारे ह्युपदिश्यमाने मांसमनसोः

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरीषाद्भौमादणीयस्त्वेनाप्यत्वं तैजसत्वं च प्रसज्यते । तथेतरयोरप्यप्तेजःपर्याययोः * आपः पीताः * तेजोऽशितम् * इति त्रयाणां भागानां यथाशब्दमाप्यत्वं तैजसत्वमेवोपदिश्यते । तत्रापि हि * आपः पीताः * तेजोऽशितमित्युपक्रमः ; वाक्यशेषश्च * आपोमयः प्राणः तेजोमयी वाक् * इति । प्रागुक्तत्रिवृत्करणप्रकारे हि मूत्रप्राणयोस्स्थविष्ठत्वाणीयस्त्वाभ्यां भौमत्वतैजसत्वप्रसक्तिः । * तेजोऽशितमित्यत्रापि पूर्वयोर्भौमत्वाप्यत्वप्रसक्तिः । अतोऽत्र प्रागेव त्रिवृत्कृतस्यान्नादेस्त्रस्यैव त्रेधा परिणाम उपदिश्यते ॥ १८ ॥

प्रागेव त्रिवृत्कृतं चेत्, कथं केवलान्नादिशब्दैरुच्यते ? इत्यत्राह—

२८७. वैशेष्यात्तु तद्वादस्तद्वादः । वैशेष्यं— विशेषभावः । त्रिवृत्कृतेऽप्येकैकस्मिंस्तत्रतत्रान्नाद्याधिक्यरूपविशेषभावादन्नादिवादः । द्विरुक्तिरध्यायपरिसमाप्तिद्योतनार्था ॥ १९ ॥ इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ४ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चाध्यायः ॥

श्रीमते रामानुजाय नमः ।

॥ अथ तृतीयाध्याये प्रथमः पादः ॥

२८८. तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । देही देहान्तरगमने देहकारणभूतैर्भूतसूक्ष्मैस्संयुक्तो गच्छति, नेति संशयः । न संयुक्तो गच्छतीति पूर्वः पक्षः, देहारम्भाय तत्रतत्र भूतसूक्ष्माणां सुलभत्वात् । राद्धान्तस्तु— पञ्चाग्निविद्यायां * वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति * इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति * इति प्रश्नप्रतिवचने आम्नायेते । देहारम्भिका आपस्त्रिवृत्करणेन भूतान्तरसंसृष्टाः द्युलोकपर्जन्यपृथिवीपुरुषरूपाग्निषु जीवेन सह प्रविष्टाः पञ्चम्यामाहुतौ योषिदग्निप्रवेशवेलायां पुरुषशब्दाभिलपनीया भवन्तीति प्रतीयते ; पुरुषाकारतां भजन्त इत्यर्थः । अतो भूतसूक्ष्मैस्संपरिष्वक्त एव गच्छतीति । सूत्रार्थस्तु— तदन्तरप्रतिपत्तौ— * संज्ञामूर्तिक्लृप्तिरित्यत्र मूर्तिशब्देन देहः प्रस्तुतस्तच्छब्देन परामृश्यते; देहान्तरप्रतिपत्तौ । रंहति संपरिष्वक्तः— जीवो भूतसूक्ष्मैस्संपरिष्वक्तो गच्छति । कुत ; प्रश्ननिरूपणाभ्यां— पञ्चाग्निविद्यान्तर्गतप्रश्नप्रतिवचनाभ्यां तथाऽवगम्यत इत्यर्थः ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कथमविशेषेणाप्छब्देन सर्वेषामभिधानमित्याशङ्कयाह—

२८९. **त्र्यात्मकत्वात्तु भूयस्त्वात्** । तुशब्दश्शङ्कानिवृत्त्यर्थः । अपां त्रिवृत्करणेन त्र्यात्मकत्वादाप इति भूतान्तरसंसृष्टा आपोऽभिधीयन्ते ; अपां भूयस्त्वात् आधिक्यादप्छब्देनाभिधानम् ॥ २ ॥

२९०. **प्राणगतेश्च** । इतश्च भूतसूक्ष्मैस्संयुक्तो याति । * तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति * इति प्राणानामिन्द्रियाणां जीवेन सह गमनश्रुतेः इन्द्रियाणां देहाश्रयत्वेन देहोऽपि भूतसूक्ष्मरूपेण गच्छतीति गम्यते । स्मर्यते च * मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति * इत्यादिना ॥ ३ ॥

२९१. **अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्** । * यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम् * इति मरणवेलायां वागादीनामग्न्यादिष्वप्ययश्रुतेर्जीवेन सह गमनश्रुतिरन्यथा नेयेति चेत् ; तन्न, भाक्तत्वात् तत्र वागादिशब्दानाम् । वागाद्यभिमानिदेवतासु हि तत्र वागादयश्शब्दाः ; * ओषधीर्लोमानि वनस्पतीन्केशाः * इत्यनपियद्भिर्लोमादिभिस्सहपाठात् ॥ ४ ॥

२९२. **प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः** । प्रथमे— द्युलोकाग्निहोमे अपामश्रवणात् आपो भूतान्तरसंसृष्टा गच्छन्तीति वक्तुं न शक्यते ; तत्र हि * तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वति * इति श्रद्धैव होम्यत्वेन श्रूयत इति चेत् ; न, ताः— आप एव हि श्रद्धाशब्देनोच्यन्ते, प्रतिवचनस्य प्रश्नानुगुण्योपपत्तेः । * वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति * इत्यपां पुरुषवचस्त्वप्रकारे पृष्टे स एव हि प्रतिवक्तव्यः ; अतश्श्रद्धाशब्देन ता आप एवोच्यन्ते । * श्रद्धा वा आपः * इति श्रूयते ॥ ५ ॥

२९३. **अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः** । * आपः पुरुषवचसो भवन्ति * श्रद्धां जुह्वति * इति द्युलोकादिष्वाप एव हि गच्छन्तीति श्रूयते ; न तत्परिष्वक्तो जीवः । अतः प्रश्नप्रतिवचनयोर्जीवस्याश्रुतत्वात्तत्संयुक्तो जीवो गच्छतीति न शक्यते वक्तुमिति चेत् ; तन्न, इष्टादिकारिणां प्रतीतेः— उत्तरत्र * अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति * इत्यादौ इष्टादिकारिणां जीवानां द्युलोकादिगमनपुनरावृत्तिप्रकारवचने द्युलोकाग्निसंबन्धस्याप्छब्दवाच्यस्य सोममापन्नस्य प्रत्यभिज्ञानादत्राप इति तत्संयुक्तो जीव एवोच्यते ॥ ३ ॥

* आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति * इति धूमादिना गतस्य देवैर्भक्ष्यमाणत्वश्रवणात् , जीवस्याऽनदनीयत्वाच्च न जीवस्तत्रोक्त इत्याशङ्कयाह—

Digitization by Arya Samaj Charitable Foundation, Chennai

२९४. **भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति।** वाशब्दश्शङ्काव्यावृत्त्यर्थः । * तं देवा भक्षयन्ति * इति भक्ष्यत्ववचनं भाक्तम्— केवलेष्टादिकारिणामनात्मवित्त्वाद्देवोपकरणत्वाभिप्रायम् । अनात्मविदः केवलेन्द्रादिदेवयाजिनो हि देवान्प्राप्य तदुपकरणं भवन्ति । तथा हि दर्शयति श्रुतिः * यथा पशुरेवं स देवानाम् * इति । अतो भूतसूक्ष्मैस्संपरिष्वक्तो जीवो रंहति ॥ ७ ॥ इति तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

२९५. **कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च।** धूमादिनां गतो निवर्तमानो जीवः सानुशयो निवर्तते, उत नेति संशयः । नेति पूर्वः पक्षः । अनुशयो हि भुक्तशिष्टं कर्म । * यावत्सम्पातमुषित्वा * प्राप्यान्तं कर्मणः * इत्यादिश्रुतिभ्यः कृत्स्नस्य कर्मणोऽनुभूततापतीतेः नानुशयवान्निवर्तते । राद्धान्तस्तु— * तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा * इति रमणीयचरणा ब्राह्मणादियोनिं, कपूयचरणाः— कुत्सितकर्माणः श्वसूकरादियोनिं प्रतिपद्यन्त इति श्रुतेः, * प्राप्यान्तं कर्मणः * इत्यादिश्रुतिः फलप्रदानप्रवृत्तकर्मविषयेति सानुशयो निवर्तते । सूत्रार्थस्तु— कृतात्यये— कृतस्य पूर्वकर्मणोऽत्यये, अनुशयवान्— भुक्तशिष्टकर्मवान्निवर्तते ; कुतः ? दृष्टस्मृतिभ्याम्— श्रुतिस्मृतिभ्यामवगम्यते । * तद्य इह रमणीयचरणाः * इत्यादिश्रुतिः ; * ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपम् * इत्यादिका स्मृतिः, यथेतमनेवं च— आरोहणप्रकारेण प्रकारान्तरेण च निवर्तन्ते । चन्द्रमसस्स्थामादाकाशमित्यारोहणक्रमेणावरोहन्ति, वायुधूमाभ्रादिना प्रकारान्तरेण च ॥ ८ ॥

२९६. **चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः।** * रमणीयचरणाः * इति रमणीयाचारस्य स्मृतिविहितस्य ब्राह्मण्यादिप्राप्तिसाधनत्वश्रवणात् न स कर्मा प्रत्यवरोहतीति चेत् ; तन्न, चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनिराचार्यो मन्यते, पुण्यस्यैव कर्मणस्सुखप्राप्तिसाधनत्वात् ॥ ९ ॥

२९७. **आनर्थक्यमिति चेन्न तदपेक्षत्वात्।** स्मृतिविहितस्याचारस्याकिञ्चित्करत्वेनानर्थक्यं प्रसज्यत इति चेन्न, तदपेक्षत्वात्— आचारापेक्षत्वात्सुखसाधनभूतपुण्यकर्मणः ; * सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु * इति सर्वं हि पुण्यकर्माचारापेक्षमेवेति कार्ष्णाजिनेर्मतम् ॥ १० ॥

२९८. **सुकृतदुष्कृते एवेति तु बादरिः।** तुशब्दः पूर्वमतव्यावृत्त्यर्थः ; * रमणीयचरणाः— कपूयचरणाः * इति चरणशब्देन सुकृतदुष्कृते एव कर्मणी प्रतिपाद्येते ; पुण्यं कर्माचरतीति चरतेः कर्मणि प्रसिद्धेः, न लक्षणा न्याय्येति बादरिर्मन्यते । इदमेव सूत्रकाराभिप्रेतम् , तुशब्देन पूर्वमताद्व्यावृत्तेः सुकृत-

Digitization by Arya Samaj Charitable Foundation, Chennai

दुष्कृते एवेति व्यावर्तनात् । * आनर्थक्यमिति चेन्न तदपेक्षत्वादिति तु स्वीकृतम् ॥ ११ ॥ इति कृतात्ययाधिकरणम् ॥ 2 ॥

२९९. **अनिष्टादिकारिणामपि च श्रुतम्।** विहिताकरणप्रतिषिद्धसेवारताः पापकर्माणोऽपि धूमादिना चन्द्रमसं गत्वा निवर्तन्ते, उत नेति संशयः । गत्वैव निवर्त्तन्त इति पूर्वः पक्षः, * ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति सर्वेषामविशेषेण चन्द्रगमनश्रुतेः । राद्धान्तस्तु— * अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीति धूमादिना चन्द्रगमनस्य पुण्यकर्मफलत्वश्रवणात् तद्रहिताः पापकर्माणो न गच्छन्तीति । * ये वैकेचेति वचनं सर्वेषां पुण्यकर्मणां चन्द्रगमनविषयम् । सूत्रार्थस्तु— अनिष्टादिकारिणामपि च श्रुतम्— अनिष्टादिकारिणामपि— इष्टापूर्ताद्यकुर्वतां पापिनामपि चन्द्रगमनमस्ति, * ये वै केचास्माल्लोकात्प्रयन्तीति यतोऽविशेषेण श्रुतम् ॥ १२ ॥

३००. **संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्।** इयांस्तु विशेषः : संयमने— यमशासने पापफलमनुभूय इतरेषां पापिनां चन्द्रारोहावरोहौ ; कुतः ? तद्गतिदर्शनात्— पापिनां यमसदनगतिदर्शनात् * वैवस्वतं सङ्गमनं जनानाम् * इत्यादौ ॥ १३ ॥

३०१. **स्मरन्ति च।** * सर्वे चैते वशं यान्ति यमस्य भगवन्किल * इति पराशरादयस्स्मरन्ति च ॥ १४ ॥

३०२. **अपि सप्त।** सप्तापि— पापकर्मणां गन्तव्यत्वेन सप्तापि रौरवादिनरकान् स्मरन्ति ॥ १५ ॥

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः ? तत्राह—

३०३. **तत्रापि तद्व्यापारादविरोधः।** तेष्वपि सप्तसु रौरवादिलोकेषु तद्व्यापारात्— यमाज्ञयैव गमनादविरोधः । अतोऽनिष्टादिकारिणामपि यमलोकं प्राप्य यमयातनाश्चानुभूय पश्चाच्चन्द्रारोहावरोहौ भवतः ॥

इति प्राप्त उच्यते—

३०४. **विद्याकर्मणोरिति तु प्रकृतत्वात्।** तुशब्दः पक्षव्यावृत्त्यर्थः । न च पापकर्मणामर्चिरादिना ब्रह्मगमनं, धूमादिना चन्द्रगमनं च संभवति, तयोर्विद्याकर्मणोः फलत्वात् । कथमिदमवगम्यते तत्फलत्वम् ? इति प्रकृतत्वात्— इत्थं प्रकृतत्वात् । विद्याकर्मणी हि प्रकृत्य तत्फलत्वेन गतिद्वयं प्रतिपाद्यते * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्तीति, * अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीति च । पापिनां विद्यारहितत्वेन ब्रह्मगमनाभाववत् पुण्यकर्मरहितत्वेन चन्द्रगमनमपि न संभवतीत्यर्थः ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

* पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति पञ्चमाहुत्या देहारम्भश्रवणात् तस्याश्चन्द्रगमनपूर्वकत्वेन पापिनामपि देहारम्भाय चन्द्रगमनमवश्यम्भावीत्याशङ्क्याह—

३०५. **न तृतीये तथोपलब्धेः ।** केवलपापकर्माणः । तृतीयस्थानम्, न तृतीये स्थाने देहारम्भाय पञ्चमाहुत्यपेक्षाऽस्ति ; तथोपलब्धेः— * वेत्थ यथा केनासौ लोको न संपूर्यते * इति द्युलोकस्याप्राप्ता क इति प्रश्नस्य प्रतिवचने * अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते * इति तृतीयस्य स्थानस्य द्युलोकाप्राप्तिश्रवणात् तस्य देहारम्भे पञ्चमाहुत्यनपेक्षत्वं ह्युपलभ्यते ॥ १८ ॥

३०६. **स्मर्यतेऽपि च लोके ।** पुण्यकर्मणामपि केषाञ्चिद्द्रौपद्यादीनां देहारम्भे पञ्चमाहुत्यनपेक्षत्वं शिष्टलोकेऽपि च स्मर्यते ॥ १९ ॥

३०७. **दर्शनाच्च ।** श्रुतावपि दृश्यते केषाञ्चिद्देहारम्भे पञ्चमाहुत्यनपेक्षत्वं— * तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम् * इति स्वेदजोद्भिज्जयोर्देहारम्भे पञ्चमाहुत्यनपेक्षत्वम् ॥

* आण्डजं जीवजमुद्भिज्जमित्यत्र स्वेदजस्य ग्रहणं न दृश्यत इत्याशङ्क्याह—

३०८. **तृतीयशब्दावरोधस्संशोकजस्य ।** * आण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देन संशोकजस्य स्वेदजस्य अवरोधः— संग्रह इत्यर्थः । अतः केवलपापकर्मणां चन्द्रारोहावरोहौ न संभवतः ॥ २१ ॥ इति अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

३०९. **तत्स्वाभाव्यापत्तिरुपपत्तेः ।** धूमादिना चन्द्रमसं प्राप्तस्य प्रत्यवरोहप्रकार आम्नायते * यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति * इति । अत्राकाशादिभावः, किं देवमनुष्यादिभाववदाकाशादिशरीरत्वम्, उत तत्सादृश्यापत्तिरिति संशयः । आकाशादिशरीरत्वमिति पूर्वः पक्षः, श्रद्धावस्थस्य सोमराजभाववत् ; तत्र हि तच्छरीरत्वमेवोच्यते । राद्धान्तस्तु— आकाशादिप्राप्तौ सुखदुःखानुभवाभावात् तत्सादृश्यापत्तिरेव । सुखदुःखानुभवाय हि सोमादिशरीरत्वम् । सूत्रार्थस्तु— तत्स्वाभाव्यापत्तिः— आकाशादिसादृश्यापत्तिः, उपपत्तेः— सुखदुःखानुभवाभावोपपत्तेः ॥ २२ ॥

३१०. **नातिचिरेण विशेषात् ।** आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ किं तत्रतत्र नातिचिरं तिष्ठति, उतानियम इति संशयः । अनियम इति पूर्वः पक्षः, नातिचिरेणेति विशेषवचनाभावात् । राद्धान्तस्तु— उत्तरत्र

Digitization by Arya Samaj Charitable Foundation, Chennai

व्रीह्यादिभावे * अतो वै खलु दुर्निष्प्रपतरम् * इति विशिष्य चिरेण गमनवचनं ततः प्राचीनेष्वचिरगमनं द्योतयतीत्याकाशादियावद्व्रीह्यादिभावप्राप्ति नातिचिरं तिष्ठतीति । सूत्रमपि व्याख्यातम् ॥ २३ ॥ इति नातिचिराधिकरणम् ॥ 5 ॥

३११. **अन्याधिष्ठिते पूर्ववदभिलापात्**। अवरोहन्तो जीवाः व्रीह्यादिभावेन जायन्त इति श्रूयते * मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते * इति । ते किं व्रीह्यादिशरीरा जायन्ते, उतान्यैः क्षेत्रज्ञैर्व्रीह्यादिशरीरैरधिष्ठितान्व्रीह्यादीनाश्लिष्यन्तीति संशयः । * जायन्ते इति वचनाद्व्रीह्यादिशरीरभोक्तारो जायन्त एवेति पूर्वः पक्षः । राद्धान्तस्तु— व्रीह्यादिजन्महेतुभूतकर्मविशेषाश्रवणाद्व्रीह्यादिसंश्लेषमात्रमेव । जायन्ते इति जन्मवचनमौपचारिकम् । ब्राह्मणादिशरीरभावे हि * रमणीयचरणाः.... कपूयचरणाः * इति जन्महेतुभूतं पुण्यपापरूपं कर्म श्रूयते । सूत्रार्थस्तु— अन्याधिष्ठिते— अन्यक्षेत्रज्ञाधिष्ठिते व्रीह्यादौ, संश्लेषमात्रम्, कुतः? पूर्ववदभिलापात्— आकाशादिभाववत्केवलव्रीह्यादिभावाभिलापात्; जन्महेतुभूतकर्मानभिलापादित्यर्थः ॥ २४ ॥

३१२. **अशुद्धमिति चेन्न शब्दात्**। यद्यपि व्रीह्यादिभावेन जायन्त इत्यत्र जन्महेतुभूतं कर्म न श्रुतम्; तथापि पूर्वश्रुतमिष्टादिकर्माग्नीषोमीयादिहिंसागर्भत्वेनाशुद्धम् । हिंसात्वेनाशुचिव्रीह्यादिजन्मनोऽपि हेतुर्भवतीति चेत्; न, अहिंसात्वशब्दात्— पशोर्हि संज्ञपनस्य स्वर्गावाप्तिसाधनभाववादिशब्दः श्रूयते— * हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेति * न वा उ वे तन्म्रियसे न रिष्यसि * इत्यादिः ॥ २५ ॥

३१३. **रेतस्सिग्योगोऽथ**। ततश्च व्रीह्यादिसंश्लेषमात्रम्, व्रीह्यादिभावानन्तरं रेतस्सिग्योगश्श्रूयते * यो यो ह्यन्नमत्ति यो रेतस्सिञ्चति तद्भूय एव भवति * इति । अत्र हि पुरुषसंश्लेषमात्रमेव श्रुतम्; एवमेव व्रीह्यादिभावेऽपीत्यर्थः ॥ २६ ॥

३१४. **योनेश्शरीरम्**। योनिप्राप्तेः पश्चादेवावरोहतो जीवस्य शरीरप्राप्तिः, तत्रैव सुखदुःखोपभोगात् । ततः प्रागाकाशादिषु तत्तत्संश्लेषमात्रमेवेत्यभिप्रायः ॥ २७ ॥ इति अन्याधिष्ठिताधिकरणम् ॥ 6 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य प्रथमः पादः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ अथ तृतीयाध्याये द्वितीयः पादः ॥

३१५. **सन्ध्ये सृष्टिराह हि।** स्वप्नमधिकृत्य श्रूयते— * न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथस्सृजते * इत्यारभ्य, अथ वेशान्तान्पुष्करिण्यस्स्रवन्त्यस्सृजते स हि कर्ता * इति। किं स्वाप्नानामप्यर्थानां स्रष्टा जीव एव, उत परमात्मेति संशयः। स्वप्नदृशो जीवस्य सन्निधानात् * स हि कर्तेति स एव परामृश्यते; जीवस्यापि सत्यसङ्कल्पत्वं प्रजापतिवाक्योदितमिति स एव स्रष्टेति पूर्वः पक्षः। राद्धान्तस्तु— जीवस्य सत्यसङ्कल्पत्वं स्वाभाविकमपि संसारदशायां परमपुरुषसङ्कल्पात्तिरोहितमिति न जीवस्य सत्यसङ्कल्पमात्रेण स्रष्टृत्वमुपपद्यते। अतः परमपुरुष एव सकलेतरपुरुषानुभवाविषयान् तत्तत्पुरुषमात्रेणानुभाव्यान् तत्तत्कालावसानान् स्वप्नानर्थान् सृजति। सूत्रार्थस्तु— सन्ध्ये— स्वप्ने श्रूयमाणा रथादिसृष्टिः स्वप्नदशाजीवेन कृताः; कुतः? आह हि— * स हि कर्तेति तस्यैव परामर्शादित्यर्थः॥ १॥

३१६. **निर्मातारं चैके पुत्रादयश्च।** एनमेव जीवं निर्मातारं स्वाप्नानामर्थानाम् एके शाखिनोऽधीयते * य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः * इति। अत्र कामशब्दनिर्दिष्टः काम्यमानतया पुत्रादय एव। चशब्दोऽवधारणे। अत्र हि * सर्वान् कामानिति कामशब्देन प्रस्तुतान् * शतायुषः पुत्रपौत्रान्वृणीष्व * इति विविनक्ति॥ २॥

३१७. **मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्।** तुशब्दात्पक्षो विपरिवर्तते; न जीवेन सृष्टं स्वाप्नमर्थजातम्; अपि तु परमेश्वरमायामात्रं— सकलेतरपुरुषानुभवाविषयं तदेकानुभाव्यं तत्कालावसानमाश्चर्यरूपमर्थजातमीश्वरस्सृजतीत्यर्थः। जीवस्य स्वतः सत्यसङ्कल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात् तस्य हि सङ्कल्पमात्रेण स्रष्टृत्वं नोपपद्यते। * कामंकामं पुरुषो निर्मिमाणः इति च परमपुरुषमेव निर्मातारमाह— * य एषु सुप्तेषु जागर्ति * तस्मिल्लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन * इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणधर्मप्रतीतेः, * स हि कर्तेति च तेनैकार्थ्यात् परमपुरुषमेवाह॥ ३॥

स्वाभाविकं चेज्जीवस्य सत्यसङ्कल्पत्वादिकम्, कथं नाभिव्यज्यत इत्याशङ्क्याह—

३१८. **पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ।** तुशब्दश्शङ्कानिवृत्त्यर्थः; परमपुरुषाभिध्यानादस्य स्वाभाविकं रूपमनादिकर्मप्रवाहेण कृतापराधतया तिरोहितम्; ततो ह्यस्य बन्धविपर्ययौ— ततः परमपुरुषसङ्कल्पादेव हि, अस्य— जीवस्य, बन्धविपर्ययौ— संसारमोक्षौ श्रूयते— * को ह्येवान्यात्कः प्राण्यात्

Digitization by Arya Samaj Charitable Foundation, Chennai

यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति * परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते इत्यादौ ॥ ४ ॥

तिरोधानप्रकारमाह—

३१९. **देहयोगाद्वा सोऽपि।** सोऽपि— तिरोधानभावः देहयोगाद्वा भवति; वाशब्दो विकल्पार्थः; व्यवस्थितश्च विकल्पः; देवमनुष्यादिदेहाकारपरिणताचिद्योगात्सृष्टिवेलायाम्, नामरूपविभागानर्हसूक्ष्मदशापन्नाचिद्योगेन प्रलयकाले ॥ ५ ॥

३२०. **सूचकश्च हि श्रुतेराचक्षते च तद्विदः।** इतश्च स्वाप्ना रथादयो न जीवसङ्कल्पकृताः; यतस्स्वप्नश्शुभाशुभयोस्सूचक इति श्रुतेरवगम्यते * यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने ॥ * अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तम् * इत्यादिषु। स्वप्नाध्यायविदश्चाचक्षते। जीवसङ्कल्पकृतत्वे हि सूचकत्वं न संभवति; स्वसङ्कल्पकृतत्वे हि शुभानामेव सूचकानर्थान् सृष्ट्वा तानेव पश्येत्। अतस्स्वाप्नानामर्थानां परमपुरुष एव स्रष्टा ॥ ६ ॥ इति सन्ध्याधिकरणम् ॥ 1 ॥

३२१. **तदभावो नाडीषु तच्छ्रुतेरात्मनि च।** नाड्यः पुरीतत् ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयन्ते; किमेषां विकल्पः, उत समुच्चय इति संशयः। विकल्प इति पूर्वः पक्षः; * आसु तदा नाडीषु सुप्तो भवति * ताभिः प्रत्यवसृप्य पुरीतति शेते * सता सोम्य तदा संपन्नो भवति * इति त्रयाणां नैरपेक्ष्यप्रतीतेः। राद्धान्तस्तु— प्रासादखट्वापर्यङ्कवत् कार्यभेदेन समुच्चये संभवति पाक्षिकबाधगर्भविकल्पो न युक्त इति समुच्चयो न्याय्यः। तत्र पर्यङ्कस्थानीयं ब्रह्म, यतः पर्यङ्कवत्साक्षाद्ब्रह्म सुषुप्तिस्थानम्। सूत्रार्थस्तु— तदभावः— स्वप्नाभावः, सुषुप्तिरित्यर्थः। सुषुप्तिः नाडीष्वात्मनि च; चकारात्पुरीतति च; तच्छ्रुतेः— त्रयाणां सुषुप्तिस्थानत्वश्रुतेः। उक्तेन न्यायेन समुच्चयो न्याय्य इत्यभिप्रायः ॥ ७ ॥

३२२. **अतो प्रबोधोऽस्मात्।** अस्मात्— ब्रह्मणः प्रबोधश्रुतिरत एवोपपद्यते; * सत आगम्य न विदुस्सत आगच्छामहे * इति श्रूयते ॥ ८ ॥ इति तदभावाधिकरणम् ॥ 2 ॥

३२३. **स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।** किं सुषुप्त एव प्रबोधकाले उत्तिष्ठति, स एव वा अन्यो वेत्यनियम इति संशयः। सुषुप्तस्य सर्वोपाधिविनिर्मुक्तस्य ब्रह्मणि संपन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरसंबन्धभावात्स एवेति नियमो न संभवतीति पूर्वः पक्षः। सुषुप्तस्य ब्रह्मज्ञानाभावेन पूर्वकृतस्य कर्मणः तेनैवोपभोक्तव्यत्वात्, सोऽहमिति प्रत्यभिज्ञानात्, * त इह व्याघ्रो वा सिंहो वा * इत्यारभ्य * यद्यद्भवन्ति तथा भवन्ति * इति शब्दात्, मोक्षसाधनविध्यानर्थक्याच्च स एवोत्तिष्ठतीति राद्धान्तः। न चासौ शरीरेन्द्रिय-

Digitization by Arya Samaj Charitable Foundation, Chennai

संबन्धविनिर्मुक्तः, अपि तु करणकलेबरप्रवर्तनायासादाश्वासाय ब्रह्मण्यपीतः पुनराश्वस्तः प्रवर्तनायोत्तिष्ठति । सूत्रमपि व्याख्यातम् ॥ ९ ॥ इति कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ 3 ॥

३२४. **मुग्धेऽर्धसंपत्तिः परिशेषात्** । किं मूर्च्छा मरणादर्थान्तरम्, उत मरणमेवेति संशयः । सर्वेन्द्रियप्राणव्यापारोपरतेः मरणमेवेति पूर्वः पक्षः । आकारवैरूप्येण सूक्ष्मप्राणास्तित्वावगतेः मरणायार्धसंपत्तिरिति सिद्धान्तः । सूत्रार्थस्तु— मुग्धे–मूर्च्छिते पुरुषे याऽवस्था, सा मरणायाऽर्धसंपत्तिः । कुतः ? परिशेषात् । प्राणादिसर्वव्यापारोपरतेः न जागराद्यवस्था, न च गतप्राणा आकारवैलक्षण्येन सूक्ष्मप्राणास्तित्वावगतेः ; मूर्च्छितस्यैव कस्यचित्पुनर्जीवनदर्शनाच्च न मरणमिति परिशेषान्मरणायार्धसंपत्तिरित्यवगम्यते ॥ १० ॥ इति मुग्धाधिकरणम् ॥ 4 ॥

३२५. **न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि** । किं जीवस्येव तदन्तर्यामिणः परस्य ब्रह्मणोऽपि जागरादिस्थानप्रयुक्तदोषास्संभवन्ति, उत नेति संशयः । * यः पृथिव्यां तिष्ठन् * य आत्मनि तिष्ठन् * यश्चक्षुषि तिष्ठन् * यो रेतसि तिष्ठन् * इत्यादिना जीवस्येव सर्वावस्थास्ववस्थितिवचनात् छन्दतोऽपि पूयशोणितादिमज्जनमपुरुषार्थ एवेति सर्वे दोषास्संभवन्तीति पूर्वः पक्षः । राद्धान्तस्तु— * अपहतपाप्मा विजरः * निरवद्यं निरञ्जनम् * सत्यकामस्सत्यसङ्कल्पः * यस्सर्वज्ञस्सर्ववित् * यो मामजमनादिं च वेत्ति लोकमहेश्वरम् * परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे * इत्यादिश्रुतिस्मृतिभ्यो निरस्तनिखिलदोषगन्धतासार्वज्ञ्यसत्यसङ्कल्पत्वाद्युभयलक्षणस्वरूपावगतेः परस्य ब्रह्मणस्सर्वत्रान्तर्यामितयाऽवस्थितस्यापि न दोषगन्धस्संभवति ; अपि तु सर्वनियमनरूपलीलारस एव ॥

सूत्रार्थस्तु— न स्थानतोऽपि परस्य— पृथिव्यात्मादिष्वन्तर्यामितयाऽवस्थितस्यापि परस्य ब्रह्मणः, जीवस्य तत्रतत्रावस्थितस्य ये दोषा उक्ताः, ते न संभवन्ति ; कुतः ? उभयलिङ्गं सर्वत्र हि— हिर्हेतौ, यतस्सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिलदोषत्वसमस्तकल्याणगुणात्मकत्वरूपोभयलिङ्गम्— उभयलक्षणं परं ब्रह्मावगतम् ॥ ११ ॥

३२६. **भेदादिति चेन्न प्रत्येकमतद्वचनात्** । यथा जीवस्य स्वतोऽपहतपाप्मत्वादिगुणकस्यापि देवादिशरीरसंबन्धितयाऽवस्थाभेदादुक्तदोषसंबन्धित्वम् ; एवं परस्यापि * यस्य पृथिवी शरीरमिति शरीरसंबन्धित्वावस्थाभेदात्ते दोषास्स्युरिति चेन्न, प्रत्येकं— प्रतिपर्यायम्, अतद्वचनात्— दोषासंबन्धित्ववचनात् । * यस्य पृथिवी शरीरमित्यादिषु * एष त आत्माऽन्तर्याम्यमृतः * इत्यन्तर्यामिणो हि निर्दोषत्वमुच्यते ; जीवस्य तु पराभिध्यानात्तत्स्वरूपं तिरोहितमित्युक्तम् । अतश्शरीरसंबन्धित्वेऽपि परस्यैते न दोषाः ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३२७. **अपि चैवमेके।** अपि च यदिदं जीवपरयोरेकस्मिन् शरीरे शरीरित्वेनावस्थितयोर्दोषसंबन्धित्वे तद्विपरीतत्वं चोक्तम्, एवमेके शाखिनस्स्वशब्देनाधीयते— * द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति इति ॥ १३ ॥

मनुष्यादिशरीरेषु शरीरित्वमेव जीवस्य नामरूपभाक्त्वेन कर्मवश्यताहेतुः, तत्परस्याप्यविशिष्टं चेत्; कथं परस्य ब्रह्मणोऽकर्मवश्यत्वेन कर्मफलानशनमुच्यते इत्यत आह—

३२८. **अरूपवदेव हि तत्प्रधानत्वात्।** मनुष्यादिशरीरेषु शरीरित्वेऽप्यरूपवदेव हि तत् परं ब्रह्म; कुतः ? प्रधानत्वात्— निर्वाहकत्वात्; जीवस्य नामरूपभाक्त्वेन कर्मफलाशनं निर्वोढुं परस्य तत्तच्छरीरे शरीरित्वेनावस्थानम् । यथाह— * यस्य पृथिवी शरीरम् * यस्याऽत्मा शरीरम्.... आत्मानमन्तरो यमयति * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा * आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म * इति । अत उभयलिङ्गमेव परं ब्रह्म ॥ १४ ॥

* सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकाशैकस्वरूपता ब्रह्मण उच्यते, कथमुभयलिङ्गत्वमित्यत आह—

३२९. **प्रकाशवच्चावैयर्थ्यात्।** यथा * सत्यं ज्ञानमिति वाक्यावैयर्थ्यात्प्रकाशो ब्रह्मणः स्वरूपमित्यवगम्यते; तथा * यस्सर्वज्ञस्सर्ववित् * पराऽस्य शक्तिर्विविधैव श्रूयते * इत्यादिवाक्यावैयर्थ्यात्कल्याणगुणाकरत्वं च ब्रह्मणस्स्वरूपमित्यवगम्यते; इत्युभयलिङ्गमेव ॥ १५ ॥

३३०. **आह च तन्मात्रम्।** * सत्यं ज्ञानमिति वाक्यं ब्रह्मणो ज्ञानं स्वरूपमित्येतावन्मात्रमाह: न पुनः कल्याणगुणाकरत्वं निषेधति ॥ १६ ॥

३३१. **दर्शयति चाथो अपि स्मर्यते।** दर्शयति च वेदान्तवाक्यगणो निरस्तनिखिलदोषत्वं कल्याणगुणाकरत्वं च * निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् * इत्यादिकः । स्मर्यते च * यो मामजमनादिं च वेत्ति लोकमहेश्वरम् * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत् * इत्यादिषु ॥ १७ ॥

३३२. **अत एव चोपमा सूर्यकादिवत्।** यतो ब्रह्मणो निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वेनोभयलिङ्गत्वात् पृथिव्यादिस्थानतोऽपि न तत्तत्प्रयुक्तदोषगन्धसंभवः; अत एव शास्त्रेषु च जलसूर्यकाद्युपमा क्रियते * आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् इत्यादिषु ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३३३. **अम्बुवदग्रहणात्तु न तथात्वम्।** तुशब्दश्चोद्यं द्योतयति। अम्बुनीवाग्रहणात्— यथा अम्बुनि सूर्यः तत्रानवस्थित एव भ्रान्त्या तत्र स्थित इव गृह्यते; न तथा परमात्मा पृथिव्यादौ गृह्यते; * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः * इति परमार्थतस्स्थितो गृह्यते; अतो न तथात्वं— न सूर्यस्येव तत्प्रयुक्त-दोषगन्धाभावः परमात्मनः, परमार्थतस्स्थितत्वात्॥ १९॥

३३४. **वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च।** पृथिव्यादिषु विषमेषु स्थानेषु स्थितस्यापि परमात्मनः तदन्तर्भावात्— तत्रावस्थानतः तत्प्रयुक्तवृद्धिह्रासभाक्त्वं * जलाधारेष्विवांशुमान् * इति दृष्टान्तेन निवर्त्यते। कुतोऽवगम्यते एतावन्मात्रमिति; उभयसामञ्जस्यादेवम्— उभयदृष्टान्तोपादानसामञ्जस्यादेवमवगम्यते। * आकाशमेकं हि यथा घटादिषु पृथग्भवेदिति घटकरकादिषु विषमेष्ववस्थितमाकाशं, * जलाधारेष्विवांशुमानिति चांशुमन्तं परमार्थतस्स्थितमनवस्थितं चोभयं दृष्टान्ततयोपादाय, * तथाऽऽत्मैको ह्यनेकस्थः * इति निगमनात् तत्तत्स्थानप्रयुक्तवृद्धिह्रासभाक्त्वनिवर्तनमात्रं विवक्षितमित्यवगम्यते। अन्यत्रापि दृष्टान्तदार्ष्टान्तिकयोस्सर्वसाम्याभावेऽपि 'सिंह इव माणवकः' इत्यादिषु दृष्टान्तोपादानदर्शनाच्चैवमवगम्यते॥ २०॥

अथात आदेशो नेति नेतीत्यादिना पूर्वप्रकृतस्य मूर्तामूर्तप्रपञ्चस्य ब्रह्मणो रूपत्वप्रतिषेधान्निष्प्रपञ्चं सन्मात्रमेव ब्रह्म; न पुनरुक्तस्वरूपमुभयलिङ्गमित्याशङ्क्याह—

३३५. **प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः।** हीति हेतौ। * द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च * इत्यादिना स्थूलस्य सूक्ष्मस्य च प्रपञ्चस्य ब्रह्मणो रूपतया प्रमाणान्तराप्रज्ञातस्य अत्रैव रूपतयोपदिष्टस्य निषेधासंभवात् प्रकृतैतावत्त्वं हि ब्रह्मणः प्रतिषेधति, पूर्वप्रकृतैतावन्मात्रं न भवति ब्रह्मेति हि * अथात आदेशो नेति नेतीत्यत्र प्रतिपाद्यत इत्यर्थः। ततो ब्रवीति च भूयः— ततः पूर्वोक्ताद्भूयस्त्वं ब्रवीति च वाक्यशेषः, * न ह्येतस्मादिति नेत्यन्यत्परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् * इति। नेति निर्दिष्टादेतस्माद्ब्रह्मणोऽन्यन्न ह्यस्ति; परब्रह्मणोऽन्यत्स्वरूपतो गुणश्चोत्कृष्टं न ह्यस्तीत्यर्थः। * सत्यस्य सत्यमिति ब्रह्मणो नामधेयम्; तस्य निर्वचनम् * प्राणा वै सत्यं तेषामेष सत्यमिति। प्राणसाहचर्याज्जीवात्मनः प्राणाः। ते हि वियदादिवदनुत्पाद्यत्वेन सत्यम्। तेभ्योऽप्येष सत्यम्; ते हि कर्मानुगुणदेहयोगेन जन्मवन्तः; तदप्यस्य नास्तीति तेषामेष सत्यम्, ज्ञानसङ्कोचविकासरूपविकारस्याप्यसंभवात्। अतः प्रमाणान्तराप्रज्ञातस्वरूपस्य ब्रह्मणो मूर्तामूर्तप्रपञ्चप्रकारतयोपदेशात्, पुनरपि प्रकारविशेषोपदेशाच्च, अथात आदेशो नेति नेतीति पूर्वप्रकृतेयत्ता ब्रह्मणः प्रतिषिध्यत इत्यर्थः॥ २१॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु च वस्तुतः प्रत्यक्षेण निर्विशेषसन्मात्रमेव गृह्यते ; तदतिरिक्तं भ्रान्त्या प्रतीयमानं सविशेषरूपमनूद्य * नेति नेतीति निषिध्यत इत्यत्राह—

३३६. **तदव्यक्तमाह हि।** ब्रह्मणः प्रमाणान्तराप्रज्ञाततां द्रढयति ; तत् ब्रह्म न केनापि प्रमाणेन व्यक्तम् ; तथा आह हि श्रुतिः— * न संदृशे तिष्ठति रूपमस्य * इत्यादिका ॥ २२ ॥

३३७. **अपि संराधने प्रत्यक्षानुमानाभ्याम्।** अपि च संराधन एवोपलभ्यते ; संराधनं—सम्यक्प्रीतियुक्तं भजनम्, उपासनमिति यावत्। उपासनरूपतत्प्रीणनेन विना केनापि नोपलभ्यत इति श्रुतिस्मृतिभ्यामवगम्यते। * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यः * * नाहं वेदैर्न तपसा न दानेन न चेज्यया.... भक्त्या त्वनन्यया शक्यः * इति हि श्रुतिस्मृती। अतः केनापि प्रमाणेनानभिव्यक्तस्वरूपत्वाद्ब्रह्मणः * द्वे वाव ब्रह्मणो रूपे * इत्यादिना ब्रह्मणः प्रकारतयोपदिष्टं जगदैश्वर्यं * नेति नेतीति न निषिध्यते ; किन्तु प्रकृतेयत्तामात्रं तु निषिध्यते ॥ २३ ॥

३३८. **प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्।** इतश्च ज्ञानानन्दवज्जगदैश्वर्यमपि ब्रह्मणो रूपम् ; येषां वामदेवादीनां संराधनरूपकर्मण्यभ्यासात्प्रकाशश्च सञ्जातः— दर्शनम् सञ्जातम् ; तेषां दर्शने प्रकाशादिवत् ज्ञानादेरिव जगदैश्वर्यस्याप्यवैशेष्यं प्रतीयते, * तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च अहं कक्षीवान् * इत्यादौ ॥ २४ ॥

३३९. **अतोऽनन्तेन तथा हि लिङ्गम्।** अतोऽनन्तेन कल्याणगुणगणेन योगो ब्रह्मणस्सिद्धः। तथा सत्युभयलिङ्गमेव ब्रह्म ॥ २५ ॥ इति उभयलिङ्गाधिकरणम् ॥ 5 ॥

३४०. **उभयव्यपदेशात्त्वहिकुण्डलवत्।** * द्वे वा व ब्रह्मणो रूपे * इत्यादिनोपदिष्टमचिद्वस्तुनो ब्रह्मरूपत्वं किं ब्रह्मस्वरूपस्यैवाचिद्रूपेण परिणामाद्भवति, उत परस्मिन्ब्रह्मण्यचिद्वस्तुनि चैकजातियोगात्, अथ जीववद्ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनेति संशयः। भिन्नत्वाभिन्नत्वरूपोभयव्यपदेशोपपत्तये ब्रह्मैवाचिद्रूपेण परिणमत इति प्रथमः पक्षः। तथा तु सति ब्रह्मणो निर्दोषत्वादिकं बाध्येतेत्येकजातियोगेनेति द्वितीयः पक्षः। एवं सति * आत्मैवेदं सर्वम् * ब्रह्मैवेदं सर्वम् इति ब्रह्मस्वरूपस्यैव सर्वशब्दवाच्यत्वव्यपदेशबाधस्स्यात्। न ह्येकैव गोव्यक्तिः खण्डो गौः, मुण्डो गौः, पूर्णशृङ्गो गौरित्यादिसर्वगोव्यक्तिवाचकशब्दैरभिधीयते। अतो जीवस्येव ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनाचिद्वस्तुनोऽपि ब्रह्मांशत्वमिति राद्धान्तः। सूत्रार्थस्तु—तुशब्दोऽवधारणे। अहेः कुण्डलभावादिवत् ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थानम् : कुतः? नानात्वैकत्वोभयव्यपदेशात् ॥ २६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३४१. प्रकाशाश्रयवद्वा तेजस्त्वात्। वाशब्दोऽनन्तरोक्तव्यावृत्त्यर्थः; यथा प्रकाशतदाश्रययोः तेजस्त्वेनैकजातियोगादभिन्नत्वं भिन्नत्वञ्च, एवमचिद्ब्रह्मणोरपि ॥ २७ ॥

३४२. पूर्ववद्वा। वाशब्दः पक्षद्वयव्यावृत्त्यर्थः; पूर्ववत्— यथा पूर्वत्र * अंशो नानाव्यपदेशात् * प्रकाशादिवत्तु नैवं परः * इत्युभयव्यपदेशोपपत्तये, ब्रह्मणो निर्दोषत्वसिद्धये च प्रकाशजातिगुणशरीरवत् पृथक्सिद्ध्यनर्हविशेषणतया जीवस्य ब्रह्मांशत्वमुक्तम्; एवमचिद्वस्तुनोऽपि। अचिद्वाचिशब्देनाप्यचिद्वस्तुविशिष्टं ब्रह्मैवाभिधेयमिति * आत्मैवेदं सर्वं * ब्रह्मैवेदं सर्वम् * इत्यभेदव्यपदेशोपपत्तिः। विशेषणविशेष्ययोस्स्वरूपस्वभावभेदज्ञापनाय विशेषणविशेष्यौ निष्कृष्य भेदेन व्यपदेशश्चोपपद्यते। * क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः * इति ब्रह्मणो निर्दोषत्वञ्च ॥ २८ ॥

३४३. प्रतिषेधाच्च। * स वा एष महानज आत्माऽजरोऽमरः * नास्य जरयैतज्जीर्यति.... विजरो विमृत्युः * इत्यादिभिः ब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यभावेनैवांशांशिभाव इत्यर्थः ॥ २९ ॥
इति अहिकुण्डलाधिकरणम् ॥ 6 ॥

३४४. परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः। * यतो वा इमानीत्यादिना जगज्जन्मादिकारणतया निर्दिष्टात्परस्माद्ब्रह्मणोऽपि परं तत्त्वं किञ्चिदस्ति, नेति संशयः। इतोऽपि परमस्तीति पूर्वः पक्षः। * अथ य आत्मा स सेतुः * इत्यस्य सेतुत्वव्यपदेशात्, * एतं सेतुं तीर्त्वेत्यस्य तरितव्यत्वोपदेशाच्चातोऽन्यदप्यस्तीति गम्यते। * चतुष्पाद्ब्रह्म * षोडशकलम् * इति परिमितत्वव्यपदेशाच्चापरिमितमन्यदस्तीति प्रतीयते। * अमृतस्यैष सेतुरिति प्रापकत्वश्रुतेश्चानेन प्राप्यमन्यदस्तीति प्राप्यप्रापकरूपसंबन्धात्प्रतीयते। तथा * तेनेदं पूर्णं पुरुषेण सर्वम् * ततो यदुत्तरतरम् * इति पुरुषशब्दनिर्दिष्टाद्ब्रह्मण उत्तरतरत्वेन भेदव्यपदेशाच्चान्यत्परमस्ति ॥

राद्धान्तस्तु— * न ह्येतस्मादिति नेत्यन्यत्परमस्तीति नेति निर्दिष्टात् मूर्तामूर्तरूपाद्ब्रह्मणोऽन्यत्परं नास्तीति परतत्त्वनिषेधात्कारणाद्ब्रह्मणोऽन्यत्परं नास्ति। सेतुत्वव्यपदेशस्तु * एषां लोकानामसम्भेदायेति सर्वलोकासङ्करकरत्वकृतः। * एतं सेतुं तीर्त्वेति तरतिरपि, वेदान्तं तरतीतिवत्प्राप्तिवचनः। * चतुष्पाद्ब्रह्म * षोडशकलमित्युन्मानव्यपदेशोऽपि, * वाक्पादः....चक्षुः पादः * इतिवदुपासनार्थः। संभवति चापरिमितस्यापि तत्तद्देशसंबन्धितयोन्मितत्वानुसन्धानम्। * अमृतस्यैष सेतुरिति स्वस्यैवामृतस्य स्वयमेव प्रापकमुच्यते, * यमेवैष वृणुते तेन लभ्यः * इत्यादिश्रुतेः। * ततो यदुत्तरतरमित्यपि, * तेनेदं पूर्णमिति निर्दिष्टात्पुरुषादन्यस्य न परत्वमाह; अपि तु * तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय * इति पूर्वप्रतिज्ञातं पुरुषवेद-

Digitization by Arya Samaj Charitable Foundation, Chennai

नस्यामृतत्वहेतुत्वमन्यस्य चापथत्वं सहेतुकमुपसंहरति । * यस्मात्परं नापरमस्ति किञ्चित् * इत्यारभ्य * तेनेदं पूर्णं पुरुषेण सर्वमिति पुरुषस्य सर्वस्मात्परत्वं ज्यायस्त्वमन्यस्य परत्वाभावं च प्रतिपाद्य, ततो हेतोः यदुत्तरतरं पुरुषतत्त्वम्; तदेवारूपमनामयम्; * य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्तीति पूर्वप्रतिज्ञातमेवोपसंहृतम् ॥

सूत्रार्थस्तु— परमतः— * जन्माद्यस्य यतः इत्यारभ्य * अतोऽनन्तेन तथा हि लिङ्गमित्यन्तेन प्रतिपादितान्निखिलजगदेककारणात्सर्वान्तरात्मनो निरस्तनिखिलदोषगन्धानवधिकातिशयानन्तकल्याणगुणाकरात्परस्माद्ब्रह्मणः परमपि किञ्चिदस्तीति कश्चिन्मन्यते । कुतः? सेतून्मानसंबन्धभेदव्यपदेशेभ्यः । व्याख्याताश्चैते ॥ ३० ॥

३४५. **सामान्यात्तु ।** तुशब्दः पक्षं व्यावर्तयति ; सेतुत्वव्यपदेशस्तावत् तस्मात्परं नावगमयति, सेतुसामान्यात्— सादृश्याज्जगद्विधृतिरूपात् ब्रह्मणस्तथाव्यपदेश इति श्रुतिरेव सेतुशब्दं व्याचष्टे— * अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति । यद्यत्स्वभावा लोकास्सृष्टास्तत्तत्स्वभावासङ्कराय सर्वान् लोकानयमेव सेतुवद्बिभर्तीति सेतुरित्यर्थः ॥ ३१ ॥

३४६. **बुद्ध्यर्थः पादवत् ।** * चतुष्पाद्ब्रह्म * पादोऽस्य विश्वा भूतानीत्युन्मानव्यपदेशास्तथाऽनुसन्धानार्थः ; * वाक्पादः.... चक्षुः पादः * इतिवत् ॥ ३२ ॥

अपरिमितस्वरूपस्यानुसन्धानार्थतयाऽपि कथं परिमितत्वमित्यत आह—

३४७. **स्थानविशेषात्प्रकाशादिवत् ।** प्रतिपन्नवागादिस्थानविशेषसंबन्धात्तत्तत्स्थानसंबन्धित्वेनावच्छिद्यानुसन्धानं युज्यते ; यथा प्रकाशादेर्विततस्यापि वातायनघटादौ ॥ ३३ ॥

३४८. **उपपत्तेश्च ।** * अमृतस्यैष सेतुरित्यमृतस्य स्वस्य स्वयमेव प्रापक इति सेतुत्वव्यपदेशोपपत्तेश्चान्यत्परमस्तीति कल्पनं न युज्यते । * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ इति हि श्रूयते ॥ ३४ ॥

३४९. **तथाऽन्यप्रतिषेधात् ।** * तेनेदं पूर्णं पुरुषेण सर्वं * ततो यदुत्तरतरमिति पुरुषादन्यस्य न परत्वमाह । * न तस्येशे कश्चन * न ह्येतस्मादिति नेत्यन्यत्परमस्ति * यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् * यस्मादपरं परं नास्ति किञ्चिदित्यर्थः । एवमादिषु पुरुषादन्यस्य परत्वप्रतिषेधात् । * ततो यदुत्तरतरमिति तु यतः पुरुषतत्त्वमेवोत्तरतरम् ; ततो हेतोः यदुत्तरतरं पुरुषतत्त्वम् ;

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेव * अरूपमनामयमित्यादिना व्याख्यातम्। * य एतद्विदुरमृतास्ते भवन्तीति * तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनायेति प्रतिज्ञातमेवोपसंहृतम्। * न तस्येशे कश्चन तस्य नाम महद्यशः * इति च पुरुषतत्त्वमेव वदति। अनन्तरम् * अद्भ्यस्संम्भूतो हिरण्यगर्भ इत्यष्टौ * इति पुरुषतत्त्ववाचिनैकवाक्यत्वावगमात्; * अम्भस्य पारे * यमन्तस्समुद्रे कवयो वयन्ति *. इति च प्रक्रमात्॥ ३५॥

३५०. **अनेन सर्वगतत्वमायामशब्दादिभ्यः।** अनेन ब्रह्मणा सर्वस्य व्याप्तत्वं * तेनेदं पूर्णं पुरुषेण सर्वम् * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः * नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः * इत्यायामशब्देभ्यः— सर्वव्याप्तिवाचिशब्देभ्योऽवगम्यते। एवमवगम्यमानमेतस्मात्परं वारयतीत्यर्थः। आदिशब्दात् * आत्मैवेदं सर्वमित्यादयो गृह्यन्ते। अतः * यतो वा इमानीत्यादिनाऽवगतजगन्निमित्तोपादानकारणाद्ब्रह्मणोऽन्यत्परं न विद्यते॥ ३६॥ इति पराधिकरणम्॥ 7॥

३५१. **फलमत उपपत्तेः।** किं वेदोदितं यागदानहोमादिकमुपासनाख्यं च * यजेत * उपासीतेति कामिनो मुमुक्षोश्च कर्तव्यतया श्रूयमाणं कर्मैवापूर्वद्वारेण भोगापवर्गरूपफलदम्, उत तत्तदाराधनैः प्रीतः परमपुरुष एव फलद इति संशयः। कर्मैवेति पूर्वः पक्षः; लोके मर्दनादेः कृष्यादेश्च कर्मण एव साक्षात्परम्परया वा फलप्रदत्वदर्शनात्। वेदे च * यजेत स्वर्गकामः * आत्मानमेव लोकमुपासीत * इति कामिनो मुमुक्षोश्च कर्तव्यतया श्रूयमाणं कर्म तत्तत्फलसाधनतयाऽवगतं क्षणिकमप्यपूर्वद्वारेण भोगापवर्गरूपसर्वफलप्रदम्। राद्धान्तस्तु— कर्तव्यतयाऽवगतस्य यागादेरुपासनस्य च * यज देवपूजायामित्यादिनाऽवगतधात्वर्थस्वाभाव्यात्, * वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति * इति वाक्यशेषाच्च, * इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः, तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः * स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हि तान्॥ * अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च * स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः * तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् * इत्यादिश्रुतिस्मृतिभ्यश्च, परमपुरुष एव कर्मभिरुपासनेन चाराधितो भोगापवर्गरूपफलप्रदः। लोके च कृष्यादिकर्मभिस्सस्यादिकमुत्पाद्य, तेन भृत्यद्वारेण साक्षाद्वा राजानमभ्यर्च्य, तत एवापेक्षितानि लभन्ते; अतः परमपुरुष एव फलप्रदः॥

सूत्रार्थस्तु— फलमत उपपत्तेः। अतः— परस्माद्ब्रह्मण एव कर्मभिरुपासनेन चाराधितात् भोगापवर्गरूपफलम्। कुतः? उपपत्तेः— कर्म हि क्षणध्वंसि न कालान्तरभाविफलायालम्; स हि सर्वज्ञस्सर्वशक्तिः परमकारुणिको महोदारः अनादिरनन्तश्च सर्वेश्वरः स्वाराधनरूपेण कर्मणा आराधितः फलप्रद इत्युपपद्यते॥ ३७॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३५२. **श्रुतत्वाच्च।** * स वा एष महानज आत्मा अन्नादो वसुदानः * एष ह्येवानन्दयाति * इति भोगापवर्गरूपं फलमयमेव ददातीति हि श्रूयते ॥ ३८ ॥

३५३. **धर्मं जैमिनिरत एव।** यागादिकमुपासनात्मकं च धर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते; अत एव– उपपत्तेश्श्रुतत्वाच्चेत्यर्थः। लोके कृष्यादेर्मर्दनादेश्च कर्मण एव साक्षात्परम्परया वा फलदायित्वदर्शनात् वेदेऽपि तथैव युक्तमित्युपपत्तिः। उपपद्यते चापूर्वद्वारेण साधनत्वम्। * यजेत स्वर्गकामः * ब्रह्मविदाप्नोति परमिति कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वद्वारेण फलसाधनमित्यवगम्यते ॥ ३९ ॥

३५४. **पूर्वं तु बादरायणो हेतुव्यपदेशात्।** तुशब्दः पक्षव्यावृत्त्यर्थ। पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं भगवान् बादरायणो मन्यते। कुतः? हेतुव्यपदेशात्— * वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति * इति वाय्वाद्यात्मना अवस्थितस्य परमपुरुषस्यैव फलप्रदत्वव्यपदेशात्। * यो वायौ तिष्ठन्निति च वाय्वाद्यात्मना स एव व्यवस्थितश्श्रूयते, * तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः * इति च। तत्परित्यागेनापूर्वस्य फलसाधनत्वकल्पने श्रुतहानमश्रुतकल्पनं च। विध्यपेक्षितफलसाधनत्वप्रकारे वाक्यशेषेणावगते सति न फलसाधनत्वप्रकारकल्पनं न्याय्यम्; यथैव हि रात्रिसत्रादिष्वधिकारी न कल्प्य इत्यर्थः ॥ ४० ॥ इति फलाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयाध्याये तृतीयः पादः ॥

३५५. **सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्।** किं सर्वेषु वेदान्तेषु श्रूयमाणा दहरादिविद्या एकैव, उत विद्यान्तरमिति संशयः। अविशेषपुनश्श्रवणस्य प्रकरणान्तरस्य च विद्याभेदहेतुत्वात् विद्यान्तरमिति पूर्वः पक्षः। चोदनाफलसंयोगरूपाख्यानामविशेषात, प्रतिपत्तृभेदेन पुनश्श्रवणोपपत्तेः, तत एव प्रकरणान्तरत्वाभावाच्च, विद्यैक्यमिति राद्धान्तः। विद्यासु गुणोपसंहारादिचिन्तार्थं शाखान्तराधिकरणोक्तन्यायः तत्फलं च स्थिरीकृतम्। सूत्रार्थस्तु— सर्ववेदान्तप्रत्ययमेकं दहराद्युपासनम्, कुतः चोदनाद्यविशेषात् ॥ १ ॥

३५६. **भेदान्नेति चेदेकस्यामपि।** अविशेषपुनश्श्रुत्या विद्याभेदावगमान्न विद्यैक्यमिति चेत्; एकस्यामपि विद्यायां शाखान्तरे प्रतिपत्तृभेदात्पुनश्श्रवणमर्थवदिति न विद्याभेदः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

* तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् * इत्याथर्वणिकानां शिरोव्रतस्य विद्योपदेशाङ्गत्वनियमदर्शनं विद्याभेदं द्योतयति, विद्यैक्ये ह्याथर्वणिकानामेवेति नियमो नोपपद्यत इत्याशङ्क्याह—

३५७. **स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः।** शिरोव्रतं न विद्याङ्गम्, अपि तु स्वाध्यायस्य तथात्वे हि— स्वाध्यायस्य तज्जन्यसंस्कारभाक्त्वे हि तन्नियमः, * नैतदचीर्णव्रतोऽधीयीत * इत्यध्ययनसंबन्धात्, समाचाराख्ये ग्रन्थे * इदमपि वेदव्रतेन व्याख्यातम् * इति वेदव्रतत्वावगमाच्च। ब्रह्मविद्यां वदेत— वेदविद्यामित्यर्थः। सववच्च तन्नियमः— यथा हि सवहोमास्सप्तसूर्यादयः शतौदनपर्यन्ता आथर्वणिकैकाग्निसंबन्धिनः तत्रैव भवन्ति, तथेदमप्याथर्वणवेदसंबन्धित्वेन तत्रैव भवति ॥ ३ ॥

३५८. **दर्शयति च।** दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम्; छान्दोग्ये दहरविद्यायां * तस्मिन्यदन्तः * इति विहितमपहतपाप्मत्वादिगुणाष्टकं तैत्तिरीयके केवलं * तस्मिन्यदन्तस्तदुपासितव्यम् * इत्येवोक्तम्; तदुभयत्र विद्यैकत्वे संभवति ॥ ४ ॥

३५९. **उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च।** तदेवं सर्ववेदान्तेषु दहराद्युपासने समाने— एकस्मिन् सति, तत्तदुपासने वेदान्तान्तरविहितस्य गुणस्य वेदान्तान्तरे चोपसंहारः कर्तव्यः; कुतः? अर्थाभेदात्— तद्विद्याङ्गत्वेन तदुपकाराभेदात्। विधिशेषवत्— यथैकस्मिन्वेदान्ते वैश्वानरविद्यादिविशेषतया विहितस्य गुणस्य तदुपकारायोपसंहारः; तथा वेदान्तान्तरेऽपि तद्विद्याङ्गत्वाविशेषादुपसंहारो न्याय्यः ॥ ५ ॥ इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

३६०. **अन्यथात्वं शब्दादिति चेन्नाविशेषात्।** अस्ति ह्युद्गीथविद्या वाजिनां छन्दोगानां च वाजिनां तावत् * हन्तासुरान्यज्ञ उद्गीथेनात्ययाम * इत्यारभ्य उद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं विहितम्। छन्दोगानामपि * तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः * इत्यारभ्य उद्गीथे प्राणदृष्ट्योपासनमेव शत्रुपरिभवफलमुक्तम्। किमुभयत्र विद्यैक्यम्, उत विद्याभेद इति संशयः। चोदनाद्यविशेषाद्विद्यैक्यमिति पूर्वः पक्षः। राद्धान्तस्तु— यद्यप्युभयत्रोद्गीथे प्राणदृष्ट्योपासनमविशिष्टमुक्तम्। तथापि छन्दोगानाम् * ओमित्येतदक्षरमुद्गीथमुपासीत * इति प्रकृत्य * उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः * इत्युद्गीथावयवे प्रणवे प्राणदृष्ट्योपासनमुक्तम्; वाजिनां तु * हन्तासुरान्यज्ञ उद्गीथेनात्ययाम * इत्युपक्रमादविशेषेण कृत्स्नोद्गीथे प्राणदृष्ट्योपासनमुक्तम्। * अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे * इति छन्दोगानामुद्गानकर्मण्युद्गीथावयवे प्रणवे प्राणदृष्टिविधानात्, वाजिनां तु * अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उद्गायत् * इति कृत्स्नोद्गीथस्य कर्तरि प्राणदृष्टिविधानाच्चोभयत्र रूपभेदाद्विद्याभेद इति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु— अन्यथात्वं शब्दादिति चेदिति राद्धान्तच्छायया परिचोद्य, नाविशेषादिति पूर्वपक्षी परिहरति । * अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे * अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत् * इत्येकत्रोद्गीथे प्राणदृष्टिशब्दात्, इतरत्रोद्गातरि प्राणदृष्टिशब्दाच्च, रूपान्यथात्वमिति चेत्; न रूपभेदः; कुतः? अविशेषात्— उपक्रमे ह्यविशेषेण * उद्गीथेनात्ययाम * उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः * इत्युद्गीथस्यैवोपास्यत्वप्रतीतेः । * त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायदिति कर्मण्येवोद्गीथे कर्तृत्वमुपचर्यत इति युक्तम्; अन्यथोपक्रमविरोधस्स्यात् ॥ ६ ॥

३६१. न वा प्रकरणभेदात्परो वरीयस्त्वादिवत् । न चैतदस्ति । यद्रूपैक्याद्विद्यैक्यमिति; कुतः? प्रकरणभेदात्— छान्दोग्ये हि * ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथावयवभूतं प्रणवमुपास्यं प्रकृत्य, * उद्गीथमाजह्रुः * इति वचनादुद्गीथावयवभूतः प्रणव एवोद्गीथशब्देनोच्यत इत्यवगम्यते; वाजसनेयके त्वविशेषेण * उद्गीथेनात्ययाम * इत्युपक्रमात् कृत्स्नोद्गीथ उपास्यः प्रकृतः; अत उद्गीथे प्राणदृष्ट्यविशेषेऽपि रूपभेदाद्विद्याभेदः । परोवरीयस्त्वादिवत्— यथैकस्यामपि शाखायाम् उद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात्परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरमिति रूपभेदः; तद्वदत्रापि । एवं प्रकरणभेदेनोपक्रम एवैकत्रोद्गीथावयवविषयत्वेनान्यत्र कृत्स्नोद्गीथविषयत्वेन चोपासनभेदे सिद्धे सत्युपसंहारस्य कर्मविषयं कर्तृविषयं च प्राणदृष्टिविधानं यथाश्रुतमवतिष्ठत इत्यभिप्रायः ॥ ७ ॥

३६२. संज्ञातश्चेत्तदुक्तमस्ति तु तदपि । उद्गीथविद्येति संज्ञैक्यात्, तत्— विद्यैक्यमुक्तं चेत्, तत्— संज्ञैक्यं विधेयभेदेऽपि अस्ति तु अस्त्येवेत्यर्थः; यथा नित्याग्निहोत्रे, कुण्डपायिनामयनाग्निहोत्रे च; यथा च छान्दोग्ये प्रथमप्रपाठकोदितासु बह्वीषु विद्यासूद्गीथविद्येति संज्ञैक्यम् ॥ ८ ॥

३६३. व्याप्तेश्च समञ्जसम् । प्रथमप्रपाठके उपक्रमवदुत्तरास्वप्युद्गीथविद्यासूद्गीथावयवस्य प्रणवस्यैवोपास्यत्वव्याप्तेर्मध्यगतस्य * तद्ध देवा उद्गीथमाजह्रुः * इत्युद्गीथशब्दस्यापि प्रणवविषयत्वमेव समञ्जसम् ॥ ९ ॥ इति अन्यथात्वाधिकरणम् ॥ 2 ॥

३६४. सर्वाभेदादन्यत्रेमे । * यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च * इति छन्दोगानां वाजिनां कौषीतकिनां च प्राणविद्याऽऽम्नाता । तत्र छान्दोग्यवाजसनेयकयोस्सर्वस्यैकरूप्यात्प्राणविद्यैकैव । कौषीतकिप्राणविद्यायास्तस्याश्च भेदोऽस्ति, उत नास्तीति संशयः । अस्ति भेद इति पूर्वः पक्षः । यद्यपि सर्वत्र ज्यैष्ठ्यश्रैष्ठ्यगुणकः प्राण एक एवोपास्यः; तथापि छन्दोगानां वाजसनेयिनां च ज्यैष्ठ्यश्रैष्ठ्यगुणकस्य प्राणस्य वागादिगतवसिष्ठत्वादिगुणसंबन्धित्वमपि शब्दादेव प्रतीयते । कौषीतकिनां तु न तथेति रूपभेदाद्विद्याभेदः । राद्धान्तस्तु— यद्यपि कौषीतकिप्राणविद्यायां वागादिगतवसिष्ठ-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वादिसंबन्धित्वमपि प्राणस्य शब्दान्नाभिहितम्; तथापि तत्रापि प्राणस्य ज्यैष्ठ्यश्रैष्ठ्योपपादनं वागादीनां स्थितेः तत्तत्कार्यस्य च प्राणाधीनत्वेनेत्येतदविशिष्टमिति वागादिगतवसिष्ठत्वादेरपि प्राणहेतुकत्वानुसन्धानेन विना प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानमनुपपन्नमिति कौषीतकिप्राणविद्यायामपि वागादिगतवसिष्ठत्वादिसंबन्ध्येव प्राण उपास्य इति रूपाभेदाद्विद्यैक्यम् ॥

सूत्रार्थस्तु— सर्वाभेदादन्यत्रेमे। अन्यत्र— कौषीतकिप्राणविद्यायामपि, इमे वसिष्ठत्वादयस्सन्त्येव। कुतः? सर्वाभेदात्— प्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात्। वागादीनां स्थितेः कार्यस्य च प्राणहेतुत्वेन हि प्राणस्य ज्यैष्ठ्यं श्रैष्ठ्यं चात्राप्युपपादितम्। अतो वागादिगतकार्यसामर्थ्यरूपवसिष्ठत्वादिसंबन्धित्वं प्राणस्यात्राप्युक्तमेवेत्यर्थः ॥१०॥ इति सर्वाभेदाधिकरणम् ॥ ३ ॥

३६५. **आनन्दादयः प्रधानस्य।** सत्यज्ञानानन्दामलत्वानन्तत्वरूपाः ब्रह्मस्वरूपनिरूपकगुणाः सर्वासु परविद्यासूपसंहर्तव्याः, उत नेति संशयः। नोपसंहर्तव्या इति पूर्वः पक्षः, अप्रकरणाधीतानामुपसंहारे प्रमाणाभावात्, ब्रह्मगुणानामसंख्येयत्वेनोपसंहाराशक्तेश्च। राद्धान्तस्तु— ज्ञानानन्दादीनां ब्रह्मस्वरूपनिरूपकगुणत्वेन तैर्विना ब्रह्मस्वरूपानुसन्धानानुपपत्तेः सर्वासूपसंहर्तव्या इति। सूत्रार्थस्तु— सर्वाभेदादित्यतोऽभेदादिति वर्तते, आनन्दादयो गुणाः सर्वासूपसंहर्तव्याः, प्रधानस्य— गुणिनो ब्रह्मणस्सर्वासु विद्यास्वभेदात्। सर्वासु परविद्यासु ब्रह्मैकमेवानुसन्धेयं चेत्, यैर्गुणैर्विना ब्रह्मस्वरूपानुसन्धानमशक्यम्, ते च ज्ञानानन्दादयोऽनुसन्धेया इत्यर्थः ॥ ११ ॥

३६६ **प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे।** आनन्दादीनां प्राप्तावपि * तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः * इति प्रियशिरस्त्वादीनामप्राप्तिः, ब्रह्मस्वरूपगुणत्वाभावात्तेषाम्। ब्रह्मणशिरःपक्षादिभेदे स्वरूपे सति ब्रह्मण उपचयापचयौ प्रसज्येयाताम्। ततश्च * सत्यं ज्ञानमनन्तं ब्रह्म * आनन्दोऽजरः इत्यादिर्विरुध्यते ॥ १२ ॥

प्रियशिरस्त्वादिभ्य आनन्दादीनां विशेषमाह—

३६७. **इतरे त्वर्थसामान्यात्।** इतरे— आनन्दादयः, अर्थसामान्यात्— ब्रह्मस्वरूपसामान्यात्सर्वास्वनुवर्तन्ते। ब्रह्मस्वरूपनिरूपरूपणधर्मत्वेन ब्रह्मस्वरूपसमाना हि ते ॥ १३ ॥

प्रियशिरस्त्वादयो ब्रह्मस्वरूपधर्मा न भवन्ति चेत्; तदभिधानं किमर्थमित्यत आह—

३६८. **आध्यानाय प्रयोजनाभावात्।** अनुचिन्तनार्थं तदभिधानं, प्रयोजनान्तराभावात्। * ब्रह्मविदाप्नोति परमिति वेदितव्यतयोपदिष्टं ब्रह्मानन्दमयं प्रियमोदादिरूपेण विभज्य शिरःपक्षादित्वेन रूपयित्वा बुद्धावारोप्यत इत्यर्थः ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३६९. **आत्मशब्दाच्च ।** * अन्योऽन्तर आत्माऽऽनन्दमयः * इत्यात्मशब्दाच्च प्रियशिरस्त्वादयो न ब्रह्मस्वरूपधर्माः; शिरःपक्षादयो हि नात्मधर्माः ॥ १५ ॥

३७०. **आत्मगृहीतिरितरवदुत्तरात् ।** * अन्योऽन्तर आत्मेत्यात्मशब्देन परमात्मन एव गृहीतिः— ग्रहणम्; इतरवत्— * आत्मा वा इदमेक एवाग्र आसीत् * इत्यात्मशब्देन यथा परमात्मनो ग्रहणम्, तद्वत् । कथमिदमवगम्यते ? तदेकार्थादुत्तरात् * सोऽकामयत, बहु स्यां प्रजायेयेत्यादिवाक्यात् ॥

३७१. **अन्वयादिति चेत्स्यादवधारणात् ।** पूर्वेषु * अन्योऽन्तर आत्मा प्राणमयः * इत्यादिवाक्येष्वनात्मस्वप्यात्मशब्दान्वयात्कथमुत्तरवाक्यान्निर्णय इति चेत्; * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इति प्रकृतस्यात्मन एव प्राणमयादिष्वानन्दमयपर्यन्तेषु आत्मशब्देनावधारणात् स्यादेव निर्णयः । अतः प्रियशिरस्त्वादीनामनात्मधर्मत्वात्, ज्ञानानन्दादीनामात्मस्वरूपनिरूपणधर्मत्वाच्च, तेषामेव सर्वत्रोपसंहारः ॥ १७ ॥

इति आनन्दाद्यधिकरणम् ॥ 4 ॥

३७२. **कार्याख्यानादपूर्वम् ।** छान्दोग्यवाजसनेयकयोः ज्येष्ठं च श्रेष्ठं च प्राणमुपास्यं विधाय * सहोवाच किं मे वासो भविष्यतीत्याप इति होचुः * इत्यपां प्राणस्य वासस्त्वमुक्त्वा * तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो भवति * इति छान्दोग्ये । वाजसनेयके चापां प्राणवासस्त्वमुक्त्वा * तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते * इति । आचमनेन प्राणमनग्नं कुरुत इत्यर्थः । अत्राशनात्पुरस्तादुपरिष्टाच्च किमाचमनं प्राणविद्याङ्गं विधीयते, उताचमनीयानामपां प्राणवासस्त्वानुसन्धानं विधीयत इति संशयः । * आचामेदित्याचमने विधिप्रत्ययश्रवणात्, स्मृत्याचारप्राप्तादाचमनादाचमनान्तरं प्राणविद्याङ्गं विधीयत इति पूर्वः पक्षः । राद्धान्तस्तु— * अशित्वा चाचामेदित्याचमनं चात्र प्रतीयते; आचमनीयानामपां प्राणवासस्त्वानुसन्धानं च * आपो वासः * अद्भिः परिदधति * एतमेव तदनमनग्नं कुरुते * इति प्रतीयते । तत्राचमनं तावत् स्मृत्याचारप्राप्तम्; अपां प्राणवासस्त्वानुसन्धानमप्राप्तम् । * अनग्नं कुर्वन्तो मन्यते * अनग्नं कुरुते * इत्यनुवादसरूपं प्रतीयते । तत्राचमनान्तरकल्पनादाचमनमनूद्याचमनीयानामपां प्राणवासस्त्वानुसन्धानमप्राप्तं विधीयत इति युक्तम् । * तदनमनग्नं कुरुते * इति वचनानि त्वपूर्वत्वात् * विधिर्वास्यादपूर्वत्वात् * इति न्यायेन विधिवचनमेव भवति । सूत्रार्थस्तु— अपूर्वम्— अप्राप्तमपां प्राणवासस्त्वानुसन्धानं विधेयम्, न पुनः प्राप्तमाचमनम् । कुतः ? कार्याख्यानात्— कार्यस्य अप्राप्तार्थस्याख्यानस्वभावत्वाच्छास्त्रस्येत्यर्थः ॥ १८ ॥ इति कार्याख्यानाधिकरणम् ॥ 5 ॥

३७३. **समान एवं चाभेदात् ।** वाजसनेयकेऽग्निरहस्ये बृहदारण्यके च शाण्डिल्यविद्याऽऽम्नाता । अग्निरहस्ये तावत् * स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानम् *

Digitization by Arya Samaj Charitable Foundation, Chennai

इति। बृहदारण्यके च * मनोमयोऽयं पुरुषो भास्सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति * इति। किमत्र विद्याभेदः, उत नेति संशयः। एकत्र सत्यसङ्कल्पत्वमधिकं श्रुतम्; इतरत्र वशित्वादयोऽधिका इति रूपभेदाद्विद्याभेद इति पूर्वः पक्षः। राद्धान्तस्तु— उभयत्र मनोमयत्वादिके समाने सति वशित्वादेस्सत्यसङ्कल्पत्वविततिरूपतया तेनाभेदान्न रूपभेद इति विद्यैक्यम्। सूत्रार्थस्तु— मनोमयत्वादिके समाने सति विद्यैक्यम्, एवं चाभेदात्— वशित्वादिगुणेनाप्यभेदात्— वशित्वादिर्हि सत्यसङ्कल्पत्वविततिः ॥ १९ ॥ इति समानाधिकरणम् ॥ 6 ॥

३७४. संबन्धादेवमन्यत्रापि। बृहदारण्यके— * य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणोऽक्षिन् * इत्युपक्रम्य आदित्यमण्डलेऽक्षणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा, * तस्योपनिषदहरित्यधिदैवतम् * तस्योपनिषदहमित्यध्यात्मम् * इति द्वे रहस्यनामनी उपासनशेषतयाऽम्नायेते। ते किं यथाश्रुतस्थाननियते, उतोभयत्रोभे इति संशयः। उभयोस्स्थानयोरेकरूपस्यैवोपास्यत्वाद्विद्यैक्यमित्यनियते नामनी इति पूर्वः पक्षः। अक्ष्यादित्यस्थानसंबन्धित्वरूपाकारभेदाद्रूपभेद इति विद्याभेदात् द्वे नामनी नियते इति राद्धान्तः। सूत्रार्थस्तु— यथा मनोमयत्वादिगुणविशिष्टस्यैकस्यैवोपास्यत्वेनोभयत्र विद्यैक्यम्; एवमन्यत्राक्ष्यादित्याधारस्याप्येकस्यैव सत्यस्य ब्रह्मणस्स्थानद्वयसंबन्धान्न रूपभेद इति विद्यैक्यात् द्वे नामनी अनियते ॥ २० ॥

३७५. न वा विशेषात्। न चैतदस्ति यद्विद्यैक्यादुभयत्रोभे नामनी अनियते इति। कुतः? विशेषात्। उभयत्र हि रूपं विशिष्यते, एकत्रादित्यस्थानसंबन्धि इतरत्राक्षिस्थानसंबन्धि ब्रह्मेति रूपभेदाद्विद्याभेद इति नियते नामनी ॥ २१ ॥

३७६. दर्शयति च। दर्शयति च श्रुतिर्विद्याभेदेन गुणानुपसंहारम् * तस्यैतस्य तदेव रूपं यदमुष्य रूपम् * इत्यादिना रूपाद्यतिदेशेन। स्वतो ह्यप्राप्तावतिदेशेन प्राप्त्यपेक्षा ॥ २२ ॥ इति सम्बन्धाधिकरणम् ॥ 7 ॥

३७७. संभृतिद्युव्याप्त्यपि चातः। तैत्तिरीयके राणायनीयानां खिलेषु च * ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान। ब्रह्म भूतानां प्रथमो जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥ * इति ब्रह्मणि ज्येष्ठानां गुणानां संभृतिर्द्युव्याप्तिश्चेत्यादिगुणजातमाम्नातम्। किमेषां सर्वासु विद्यासूपसंहार, उत स्थानविशेषोपासनेषु नियम इति संशयः। अनारभ्याधीतत्वादेषां सर्वासूपसंहारः इति पूर्वः पक्षः। राद्धान्तस्तु— यद्यपि न स्थानविशेषसंबन्ध्युपासनमारभ्याधीता एते; तथापि द्युव्याप्तिसामर्थ्यात्तस्य हृदयाद्यल्पस्थानेषूपसंहारायोगात् तत्साहचर्याच्चेतरेषामल्पस्थानविहितासु विद्यासु नोपसंहारः इति। सूत्रार्थस्तु— संभृतिद्युव्याप्तीति

Digitization by Arya Samaj Charitable Foundation, Chennai

समाहारद्वन्द्वैकवद्भावः । संभृतिप्रभृतिगुणजातमप्यत एव– स्थानविशेषसंबन्धनियमान्नियतम् ; न सर्वत्रोपसंहार्यम् । द्युव्याप्तिर्हि स्वसामर्थ्यादल्पस्थानानर्हतया तदितरस्थाननियता । संभृत्याद्यपि तत्साहचर्यात्तथैव ॥ २३ ॥ इति संभृत्याधिकरणम् ॥ 8 ॥

३७८. **पुरुषविद्यायामपि चेतरेषामनाम्नानात्** । तैत्तिरीयके पुरुषविद्याऽऽम्नाता * तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरम् * इत्यादिका । छान्दोग्येऽपि * पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि * इत्यादिका । किमत्र विद्याभेदः, उत नेति संशयः । पुरुषविद्येति संज्ञैक्यात्, तैत्तिरीयके फलसंबन्धानाम्नानात्, छान्दोग्ये * शतं जीवति * इत्यनेनैकफलत्वाच्च विद्यैक्यमिति पूर्वः पक्षः । राद्धान्तस्तु— पुरुषविद्येति संज्ञैक्येऽपि सवनत्रयकल्पनाप्रकारभेदाद्यजमानपत्न्यादिकल्पनाप्रकारभेदाच्च रूपभेदात्, तैत्तिरीयके पूर्वानुवाकगतस्य * ब्रह्मणो महिमानमाप्नोति * इति ब्रह्मविद्याफलस्यैव सन्निधानात् अफलस्यास्य तदङ्गतया तत्फलत्वात् फलभेदाच्च विद्याभेदः । सूत्रार्थस्तु— पुरुषविद्यायामपि उभयत्र रूपभेदाद्विद्याभेदः : कुतः ? इतरेषामनाम्नानात्– इतरशाखोदितानां तदितरशाखायामनाम्नानात् । छान्दोग्ये तैत्तिरीयकाम्नातानां यजमानपत्न्यादीनां सवनानां चानाम्नानात्, तैत्तिरीयके च छान्दोग्याम्नातानां यज्ञावयवानामनाम्नानादित्यर्थः । तैत्तिरीयके हि * आत्मा यजमानश्श्रद्धा पत्नी * इति यजमानादिकल्पनम्, * यत्सायं प्रातर्मध्यन्दिनं च तानि सवनानि * इति च सवनत्रयकल्पनम् : छान्दोग्ये चाशिशिषादीनां दीक्षात्वादिकल्पनम्, पुरुषायुषं त्रेधा विभज्य सवनत्रयकल्पनं चेति यज्ञावयवकल्पनप्रकारभेदाद्रूपभेदः स्पष्टः । फलमपि तथैवेति । इतरेषामिति फलस्यापि ग्रहणम् ॥ २४ ॥ इति पुरुषविद्याधिकरणम् ॥ 9 ॥

३७९. **वेधाद्यर्थभेदात्** । आथर्वणिकास्तैत्तिरीयका ऐतरेयिण इत्येवमादयः उपनिषदारम्भेषु * शुक्रं प्रविध्य हृदयं प्रविध्य * शं नो मित्रश्शं वरुणः * सह नाववतु * इत्यादिमन्त्रान्महाव्रतादीनि च कर्माण्यधीयते । किमेषां विद्याङ्गत्वम्, उत नेति संशयः । सन्निधिसमाम्नानाद्विद्याङ्गत्वमिति पूर्वः पक्षः । राद्धान्तस्तु— * शुक्रं प्रविध्य हृदयं प्रविध्येत्यादिमन्त्रसामर्थ्यात्, महाव्रतादीनां च कर्मणां श्रुत्यादिभिश्चाभिचारद्वादशाहादिषु विनियोगवत् * शं नो मित्रश्शं वरुणः * सहनाववतु * इत्यादेर्मन्त्रस्य च * ऋतं वदिष्यामि, सत्यं वदिष्यामि * तेजस्वि नावधीतमस्तु * इति मन्त्रसामर्थ्यादध्ययने विनियोग इति न विद्याङ्गत्वम् । सूत्रार्थस्तु— वेधाद्यर्थभेदादित्यस्य वेधाद्यर्थभेदवत् * सत्यं वदिष्यामि * तेजस्वि नावधीतमस्तु * इति शं नो मित्रादेर्मन्त्रस्याप्यध्ययनसंबन्धरूपार्थभेदान्न विद्याङ्गत्वमित्यभिप्रायः । अतः शंनो मित्रादिमन्त्र एवाधिकरणस्य विषयः ॥ २५ ॥ इति वेधाद्यधिकरणम् ॥ 10 ॥

३८०. **हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम्** । विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनं द्वयोश्शाखयोश्श्रुतम् ; विमुक्तयोः पुण्यपापयोरन्यत्र प्रवेश एकस्यां शाखायां श्रुतः ;

Digitization by Arya Samaj Charitable Foundation, Chennai

विमोचनं प्रवेशश्चोभयमेकस्याम्। * तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि॥ इति च केवलविमोचनम्; * तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम् * इति केवलप्रवेशः; * तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयस्सुकृतमुपयन्ति अप्रिया दुष्कृतम् * इत्युभयम्। किं केवलहानिचिन्तनं केवलोपायनचिन्तनमुभयचिन्तनं च सर्वासु विद्यासु विकल्पेनानुष्ठेयम्, उत समुच्चयेनेति संशयः। तथा-तथाऽऽम्नातस्यार्थवत्त्वाय विकल्प इति पूर्वः पक्षः। राद्धान्तस्तु— पुण्यपापप्रवेशस्य विमोचनापेक्षत्वेन शाखान्तरस्थस्यापि प्रवेशवाक्यस्य शाखान्तरस्थविमोचनवाक्यशेषत्वात् वाक्यद्वयेनैकार्थविधानात्समुच्चयः। एकस्यां शाखायामुभयविधानं प्रतिपत्तृभेदेन परिह्रियते॥

सूत्रार्थस्तु— हानौ त्विति तुशब्दः पक्षव्यावृत्त्यर्थः। हानाविति प्रदर्शनार्थम्; केवलविमोचने केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यम्भावी। कुतः? उपायनशब्दशेषत्वात्— उपायनशब्दस्य हानिवाक्यशेषत्वादित्यर्थः। त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वादुपायनवाक्यस्य हानिवाक्यशेषत्वमवगम्यते। प्रदेशान्तराम्नातवाक्यस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्तानाह— कुशाच्छन्दस्स्तुत्युपगानवदिति। यथा * वानस्पत्याः कुशाः * इति प्रदेशान्तराम्नातस्य वाक्यस्य * औदुम्बर्यः कुशाः * इति तद्विशेषवाचिप्रदेशान्तरस्थम्; यथा च * देवासुराणां छन्दोभिः * इति सामान्यतः प्रदेशान्तराम्नातस्य * देवच्छन्दांसि पूर्वम् * इति तत्क्रमविशेषवाचि प्रदेशान्तरस्थम्; यथा च * हिरण्येन षोडशिनस्स्तोत्रमुपाकरोति * इति प्रदेशान्तरस्थस्य तत्कालविशेषवाचि * समयाविषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोति * इति प्रदेशान्तरस्थम्; यथा च * ऋत्विज उपगायन्ति * इति प्रदेशान्तरस्थस्य * नाध्वर्युरुपगायेत् * इति तत्पर्युदासरूपं प्रदेशान्तरस्थम्; एवमुपायनवाक्यस्य हानिवाक्यशेषतया संभवन्त्यां गतौ न विकल्पो युक्तः। तदुक्तं पूर्वस्मिन् काण्डे * अपि तु वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य * इत्यादिना॥ २६॥ इति हान्यधिकरणम्॥ 11॥

३८१. साम्पराये तर्तव्याभावात्तथा ह्यन्ये। किमिदं सुकृतदुष्कृतयोर्हानिचिन्तनं देहवियोगकाले एकदेशः क्षीयते, अध्वनि शिष्टमित्युभयत्र कर्तव्यम्, उत देहवियोगकाल एव सर्वं क्षीयत इति संशयः। उभयत्र श्रुतेः देवयानेन पथा गमनान्यथानुपपत्त्या चोभयत्रेति पूर्वः पक्षः, * अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य, धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकम् * इति देहवियोगकाले, * स आगच्छति विरजां नदीं....तत्सुकृतदुष्कृते धूनुते * इत्यध्वन्यपि हानिश्रुतेः। देहवियोगकाले सर्वकर्मक्षये हि देवयानेन गमनसाधनं कर्म न संभवति। राद्धान्तस्तु— * तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये * इति देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेणानुभाव्यपुण्यपापफलाभावात्, * अश्व इव रोमाणि विधूय पापमित्यादिनैकार्थ्यात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

अध्वन्याम्नातमपि * तत्सुकृतदुष्कृते धूनुते इति वाक्यं देहवियोगकाले सङ्क्रमयितव्यमिति देहवियोगकाल एव हानिचिन्तनम् । सर्वकर्मक्षयेऽपि हि विद्यासामर्थ्यादेव देवयानेन पथा गमनं चोपपद्यते । विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकाऽपि प्रकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्वकर्मणां च निरवशेषक्षयेऽपि स्वफलभूत-ब्रह्मप्राप्तिप्रतिपादनाय देवयानेन पथैनं गमयितुं सूक्ष्मशरीरं स्थापयति ॥

सूत्रार्थस्तु— साम्पराये– देहवियोगकाल एव चिन्तनीयम् : कुतः ? तर्तव्याभावात्– देहवियोगा-दूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावात् । तथा ह्यन्येऽधीयते— * तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये * इति, * अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः * इति च ॥ २७ ॥

३८२. छन्दत उभयाविरोधात् । एवमर्थस्वाभाव्याद्देहवियोगकाल एव निरवशेषकर्मक्षयेऽव-धृते सति * तत्सुकृतदुष्कृते धूनुते इति वाक्यखण्डः ·उभयाविरोधात्– उभयश्रुत्यविरोधाच्छन्दतो नेयः, * अश्व इव रोमाणि विधूय पापं....धूत्वा शरीरमकृतम् * तस्य तावदेव चिरमित्युभयश्रुत्यविरोधाच्चरमश्रुतोऽपि * तत्सुकृतदुष्कृते धूनुते इति वाक्यखण्डः * एतं देवयानं पन्थानमापद्यते * इति प्रथमश्रुतखण्डात् प्रागनुगमयितव्य इत्यर्थः ॥ २८ ॥

अत्र चोदयति—

३८३. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः । देवयानेन गतिश्रुतेरर्थवत्त्वं देहवियोग-कालेऽध्वनि चेत्युभयथा कर्मक्षये सत्येव ; अन्यथा देहवियोगकाले एव सर्वकर्मक्षये सति सूक्ष्मशरीरस्याप्या-रम्भकनाशेन स्थित्यनुपपत्तेः देवयानगतिश्रुतिर्हि विरुध्यते ॥ २९ ॥

परिहरति—

३८४. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् । भगवन्तमुपासीनानां देहवियोगकाले सर्वकर्मक्षये-ऽप्युपपन्नो देवयानः पन्थाः । कुतः ? तल्लक्षणार्थोपलब्धेः— तल्लक्षणार्थः— तज्जातीयार्थः, अकर्मलभ्यार्थो-पलब्धेरित्यर्थः । उपलभ्यते ह्यकर्मलभ्यार्थो ब्रह्मोपासीनानां * स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति * इत्यादिषु । लोकवत्— यथा लोके राजानमुपासीनानां प्राकृतपुरुषासाधारणातिरमणीयानेकार्थसिद्धिः ; तद्वत् सर्वज्ञं सत्यसङ्कल्पं महोदारं परं ब्रह्मोपासीनानां सर्वमुपपन्नमित्यर्थः ॥ ३० ॥

परं ब्रह्मोपासीनानां देहपातसमये सर्वकर्मक्षयात् देहपातादूर्ध्वं कर्मफलानुभवो न विद्यत इत्ये-तन्न संभवति, वसिष्ठादीनां ज्ञानिनामपि कर्मफलरूपदेहान्तरसंयोगः, पुत्रजन्मविपत्त्यादिषु सुखदुःखानुभवो-ऽपि दृश्यते– इत्याशङ्क्याह—

Digitization by Arya Samaj Charitable Foundation, Chennai

३८५. **यावदधिकारमवस्थितिराधिकारिकाणाम्।** येषां ज्ञानिनां देहपातादनन्तरमर्चिरादिका गतिः प्राप्ता ; तेषां देहपातादूर्ध्वं तरितव्यकर्मफलभोगाभावाद्देहपातसमय एव सर्वकर्मक्षय उक्तः। वसिष्ठादीनां तु आधिकारिकाणां यावदधिकारसमाप्ति नार्चिरादिका गतिरस्ति ; अपि त्वधिकारेऽवस्थितिरेव, अधिकारहेतुभूतकर्मणः फलदानायारब्धत्वात्। ज्ञानिनोऽप्यारब्धं हि कर्म फलानुभवेनैव क्षीयते ॥ ३१ ॥ इति साम्परायाधिकरणम् ॥ 12 ॥

३८६. **अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम्।** येषूपासनेषूपकोसलादिष्वर्चिरादिका गतिराम्नाता किं तन्निष्ठानामेव तया ब्रह्मप्राप्तिः, उत सर्वेषां ब्रह्मोपासननिष्ठानामिति संशयः। तन्निष्ठानामेवेति पूर्वः पक्षः, इतरेषां तया ब्रह्मप्राप्तौ प्रमाणाभावात्। यत्तु पञ्चाग्निविद्यायां साधारणं वचनम्, तदप्युपकोसलादिविषयमिति निश्चीयते। अन्यथोपकोसलादिष्वाम्नानानर्थक्यं स्यात्। राद्धान्तस्तु— पञ्चाग्निविद्यायां * य एवमेतद्विदुः ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवन्ति * इति सामान्येन सर्वविषयं गतिश्रवणमुपकोसलादिष्वाम्नानं न बाधितुं क्षमम्, सङ्कोचकं च न भवति, विद्यास्तुत्यर्थतयाऽनुवादेनाप्युपपत्तेः। अतस्सर्वेषां तथैव ब्रह्मप्राप्तिः॥ सूत्रार्थस्तु— अनियमस्सर्वेषां— सर्वेषामविशेषेण तयैव प्राप्तिः। कुतः? अविरोधश्शब्दानुमानाभ्यां— तथा सत्येव श्रुतिस्मृतिभ्यामविरोधः। श्रुतिश्च * ये चेमेऽरण्ये इत्यादिका पञ्चाग्निविद्यायां निदर्शिता ; स्मृतिः * अग्निर्ज्योतिरहश्शुक्लः * इत्यादिका ॥ ३२ ॥ इति अनियमाधिकरणम् ॥ 13 ॥

३८७. **अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्।** बृहदारण्यके * एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वम * इत्यादि श्रूयते। तथा आथर्वणे च * अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्मम * इत्यादि। किमेषामस्थूलत्वादीनां सर्वासु ब्रह्मविद्यासूपसंहारः, उत यत्र श्रुताः तत्रैवेति संशयः। विद्याविशेषरूपतया श्रुतानां सर्वविद्यासाधरणत्वाभावाद्यत्र श्रुतास्तत्रैव नियता इति पूर्वः पक्षः। राद्धान्तस्तु— अस्थूलत्वादीनामप्यानन्दादिवत् ब्रह्मस्वरूपानुसन्धानान्तर्भावात्सर्वत्रैवोपसंहारः, न केवलमानन्दादिर्ब्रह्मस्वरूपं प्रत्यगात्मनो व्यावृत्तम्, तस्यापि हि तदेव स्वरूपम्। अस्थूलत्वादिविशेषितमानन्दादि ब्रह्मणः प्रत्यगात्मनो व्यावृत्त्याकारः। यद्यपि प्रत्यगात्मा स्वभावतः स्थूलत्वाद्यचेतनधर्मासंबन्धी, तथापि तत्संबन्धार्हताऽस्त्येव। तदर्हतयापि हि पूर्वं तत्संबन्धस्सञ्जातः। अतो ब्रह्मणस्तदनर्हस्वरूपानुसन्धानार्थतयाऽस्थूलत्वादयस्सर्वत्रानुसन्धेयाः। सूत्रार्थस्तु— अक्षरधियाम्— अक्षरसंबन्धिनीनामस्थूलत्वादिधियां सर्वविद्यास्ववरोधः— सङ्ग्रहणम्; कुतः? सामान्यतद्भावाभ्यां ब्रह्मणस्सर्वत्र समानत्वात् ब्रह्मानुसन्धानान्तर्भावाच्च तासाम्। गुणानां प्रधानानुवर्तित्वं स्वभावः; औपसदवत्— यथा जामदग्न्यचतूरात्रपुरोडाश्युपसद्गुणभूतः * अग्निर्होत्रं वेतु *

Digitization by Arya Samaj Charitable Foundation, Chennai

इति मन्त्रः सामवेदपठितत्वेन सामवेदस्वरनियतोऽपि प्रधानभूतोपसदनुवर्तित्वात् याजुर्वैदिकत्वाच्चोपसदो याजुर्वैदिकोपांशुत्वसंबन्धी ; तद्वदक्षरविद्यासंबन्धितयाऽधीतत्वेन तद्विद्यानियता अपि प्रधानानुवर्तित्वस्वाभाव्यात्सर्वविद्यासंबन्धिनः । तदुक्तं प्रथमकाण्डे * गुणमुख्यव्यतिक्रमे तदर्थत्वादित्यादिना ॥ ३३ ॥

एवं तर्हि * सर्वकर्मा सर्वगन्धः * इत्यादीनामपि सर्वेषां ब्रह्मगुणत्वान्न क्वचिद्व्यवस्थेत्यत्राह—

३८८. इयदामननात् । इयत्— अस्थूलत्वादिविशेषितमानन्दाद्येव सर्वत्रानुसन्धेयम् ; कुतः ? आमननाद्धेतोः । आमननम्— आभिमुख्येन मननं, ब्रह्मानुसन्धानम् । ब्रह्मस्वरूपानुसन्धानं येन विना नोपपद्यते ; तदेव सर्वत्रानुसन्धेयम् । अन्यत्तु तत्रतत्र व्यवस्थितमित्यर्थः ॥ ३४ ॥ इति अक्षरध्यधिकरणम् ॥ 14 ॥

३८९. अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा प्रतिवचनभेदानुपपत्तिरिति चेन्नोपदेशवत् । बृहदारण्यके उषस्तप्रश्नप्रतिवचनं * यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः योऽपानेनापानिति स त आत्मा * इत्यादि, * अतोऽन्यदार्तमित्यन्तमाम्नातम् । तथा तदनन्तरं कहोलप्रश्नप्रतिवचनं * योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं हैतमात्मनं विदित्वा * इत्यादि * अतोऽन्यदार्तमित्यन्तम् । किमुभयत्र विद्यैक्यम् , उत विद्याभेद इति संशयः । पूर्वत्र प्राणनादिहेतुः प्रत्यगात्मा ; उत्तरत्राशनायाद्यतीतः परमात्मेत्युपास्यभेदाद्विद्याभेदः ॥ इति पूर्वः पक्षः । राद्धान्तस्तु— * यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व * इति उभयत्र प्रश्नस्य परमात्मविषयत्वादेकरूपत्वाच्च, सर्वप्राणिप्राणनापाननादिहेतुत्वस्य अशनायाद्यतीतत्वस्य च प्रतिवचनद्वयावगतस्य परमात्मन्येकस्मिन्नेवोपास्ये संभवाच्च, न विद्याभेदः । सूत्रार्थस्तु— अन्तरा— * य आत्मा सर्वान्तरः इत्युषस्तप्रश्नो भूतग्रामवत्स्वात्मनः— प्रत्यगात्मन इत्युपगन्तव्यः ; अन्यथा प्रतिवचनभेदानुपपत्तिरिति चेत् ; नात्र प्रत्यगात्मपरमात्मविषयं प्रश्नद्वयम् ; प्रतिवचनद्वयं च परमात्मन्येकस्मिन्नेवोपास्ये संभवतीत्यर्थः । उपदेशवत् * स्तब्धोऽस्युत तमादेशमप्राक्ष्यः * इति प्रक्रान्तायामेकस्यामेव सद्विद्यायां * भगवांस्त्वेव मे तद्ब्रवीत्विति, * भूय एव मा भगवान्विज्ञापयतु * इत्यादिका प्रश्नावृत्तिः, प्रतिवचनभेदश्चोपास्यमाहात्म्यविशेषप्रतिपादनपरत्वेन दृश्यते ; तद्वत् ॥ ३५ ॥

प्रष्टृभेदपूर्वकप्रतिवचनप्रकारभेदाद्विद्याभेदोऽवर्जनीय एवेत्याशङ्क्याह—

३९०. व्यतिहारो विशिंषन्ति हीतरवत् । * यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः * इति द्वयोः प्रष्ट्रोः प्रश्नस्यैकरूपत्वेनैकविषयत्वे निश्चिते सत्युषस्तकहोलयोः प्रतिवचनगतबुद्धिव्यतिहारः कार्यः । प्राणनादिहेतुत्वबुद्धिस्सर्वान्तरात्मविषया कहोलेनापि कार्या, तथाऽशनायाद्यतीतत्वबुद्धिरुषस्तेनापि कार्या ।

Digitization by Arya Samaj Charitable Foundation, Chennai

विशिंषन्ति ह्युभयत्रापि याज्ञवल्क्यवचनान्येकं सर्वान्तरमेवोपास्यम्। इतरवत्— यथेतरत्र सद्विद्यायां सर्वाणि प्रतिवचनानि परमकारणपरब्रह्मविषयाणि; तद्वत्॥ ३६॥

सद्विद्यायामप्युपास्यैक्यं प्रश्नप्रतिवचनावृत्तौ सत्यां कथमवगम्यत इत्यत्राह—

३९१. **सैव हि सत्यादयः।** * सेयं देवतैक्षत * इत्यादिषु सर्वत्र सैव परा देवतैकाऽनुवर्तते। * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि * इति त एव सत्यादयः सर्वेषु प्रतिवचनेषूपसंह्रियन्ते॥ ३७॥ इति अन्तरत्वाधिकरणम्॥ 15॥

३९२. **कामादीतरत्र तत्र चायतनादिभ्यः।** छान्दोग्ये श्रूयते * अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् * इत्यादि प्रक्रम्य * तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति; वाजसनेयके च * य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः इत्यादि। किमुभयत्र विद्यैक्यम्, उत विद्याभेद इति संशयः। रूपभेदाद्विद्याभेद इति पूर्वः पक्षः। यद्यप्युभयत्र परमात्मैवोपास्यः; तथाप्येकत्राकाशशब्दाभिधेयः परमात्मोपास्यः, इतरत्राकाशे शयानः परमात्मेति हि रूपं भिद्यते। राद्धान्तस्तु— हृदयायतनत्वसत्यसङ्कल्पत्वसत्यकामत्वादेरभेदादुभयत्र तद्विशिष्टः परमात्मैवोपास्य इति रूपाभेदाद्विद्यैक्यम; छान्दोग्ये हि * दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यारभ्य, * किं तदत्र विद्यते * इत्यादिना परिचोद्य, * तस्मिन्कामास्समाहिताः * एष आत्माऽपहतपाप्मा विजरो विमृत्युरित्यारभ्य * सत्यकामस्सत्यसङ्कल्पः इत्युक्त्वा, * तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् * इत्याकाशशब्दनिर्दिष्टः परमात्मा; तदन्तर्गताश्च सत्यकामत्वसत्यसङ्कल्पत्वापहतपाप्मत्वादयो गुणाः, अतः परमात्मा हृदयायतनः सत्यकामत्वादिविशिष्टः उपास्य इति वाक्येनैव निर्णीतम्। वाजसनेयके च * य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी इत्युक्ते सति वशित्वादेस्सत्यसङ्कल्पत्वविशेषरूपतया स एव परमात्मा हृदयायतनस्सत्यसङ्कल्पत्वविशिष्ट उपास्य इति प्रतीयते। अतो दहरविद्याप्रत्यभिज्ञानात्स एव परमात्मा सत्यसङ्कल्पत्वादिगुणाष्टकविशिष्ट उपास्य इति निश्चीयते। एवं निश्चिते सत्याकाशे शयान इत्याकाशशब्दोऽपि हृदयपुण्डरीकवर्त्याकाशवाचीति रूपाभेदाद्विद्यैक्यमेव॥

सूत्रार्थस्तु— कामादीतरत्र तत्र च— वाजसनेयके छान्दोग्ये च सत्यकामत्वाद्येव रूपम्; कुतः? आयतनादिभ्यः हृदयायतनत्वसत्यसङ्कल्पत्वविशेषरूपवशित्वादिभ्यस्तत्सहचारिणस्सत्यकामत्वादेः प्रत्यभिज्ञानात्। * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * अभयं वै ब्रह्म भवति * इति ब्रह्मप्राप्तिरूपं फलं चैकमिति विद्यैक्यम्॥ ३८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

* मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चनेत्यादेः पूर्वप्रकृतत्वात् , * स एष नेति नेत्यात्मा * इति च वक्ष्यमाणत्वात् , * सर्वस्य वशी सर्वस्येशानः इत्यादिविशेषाणां ब्रह्मस्वरूपत्वाभावात् कथं सत्यकामत्वादेर्मोक्षसाधनोपासनरूपत्वमित्यत आह—

३९३. **आदरादलोपः ।** वशित्वादेः प्रमाणान्तराविदितरूपस्य श्रुत्येकसमधिगम्यस्यादरेण प्रतिपादनादलोपः— अप्रतिषेधः ; तस्यापि ब्रह्मगुणत्वमवश्याश्रयणीयम् ; अविशेषनिषेधास्तु सकलेतरप्राकृतविशेषविषयाः ; नानात्वनिषेधस्तु सर्वस्य ब्रह्मकार्यतयाऽब्रह्मात्मकत्वाभिप्रायः ॥ ३९ ॥

सगुणोपासनस्य * स यदि पितृलोककामो भवतीति सांसारिकफलत्वेन न मोक्षफलत्वमित्याशङ्क्याह—

३९४. **उपस्थितेऽतस्तद्वचनात् ।** उपस्थितिः—उपस्थानम् , ब्रह्मोपसंपत्तिः ; उपस्थिते ब्रह्मोपसंपन्ने, अतः— ब्रह्मोपसंपत्तेरेव हेतोः, तद्वचनात्— पितृलोकादिप्राप्तिवचनात् , न तत्संसारिकं फलम् , अपि तु साक्षान्मुक्तस्यैव । * अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम् * इति, * स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति * इति च निवृत्ताविद्यस्य हि स्वेन रूपेणाभिनिष्पन्नस्यैवोच्यते ; अतो ब्रह्मोपसंपत्तिहेतुकत्वं क्रीडनादेरवगम्यते ॥ ४० ॥ इति कामाद्यधिकरणम् ॥ 16 ॥

३९५. **तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ।** छान्दोग्ये * ओमित्येतदक्षरमुद्गीथमुपासीतेति कर्माङ्गाश्रयमुद्गीथाद्युपासनं श्रूयते ; तत्किं तस्मिन्कर्मणि पर्णतादिवन्नियमेनोपादेयम् , उत गोदोहनादिवदनियमेनेति संशयः । कर्माङ्गाश्रयत्वेन पर्णतादिवत्तद्द्वारेण निरूढकार्यतया * यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति * इति वर्तमाननिर्देशस्य पृथक्फलप्रतिपादनायोगात् क्रत्वर्थतया नियमेनोपादेयमिति पूर्वः पक्षः । राद्धान्तस्तु— * तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद * इत्युद्गीथोपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात्क्रतुफलात्स्वर्गादेः पृथग्भूतवीर्यवत्तरत्वफलमिदमुपासनमिति गोदोहनादिवदनियमः । वर्तमाननिर्देशे सत्यप्यधिकारान्तरनिश्चये सति रात्रिसत्रवत् क्रतोर्वीर्यवत्तरत्वमस्योपासनस्य कल्पनीयम् । सूत्रार्थस्तु— तन्निर्धारणानियमः । निर्धारणम्— निश्चयेन चेतसोऽवधारणम् , उपासनमित्यर्थः ; तस्य उद्गीथोपासनस्यानियमः ; कुतः ? तद्दृष्टेः— * तेनोभौ कुरुतः इत्यनियमदृष्टेः ; पृथग्भूतं ह्यस्य फलम् ; तच्चाप्रतिबन्धरूपम् ; वीर्यवत्तरत्वं नाम प्रबलकर्मान्तरफलैनैतस्य कर्मणः फलस्याप्रतिबन्धः, अविलम्बितत्वमित्यर्थः ॥ ४१ ॥ इति तन्निर्धारणानियमाधिकरणम् ॥ 17 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

३९६. **प्रदानवदेव तदुक्तम्**। दहरविद्यायां * तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् * इत्यपहतपाप्मत्वादिगुणानामपि परमात्मस्वरूपचिन्तनवत्पृथक्चिन्तनं विहितम्। किं गुणचिन्तने तत्तद्गुणविशिष्टतया परमात्मचिन्तनमावर्तनीयम्, उत नेति संशयः। परमात्मन एकस्यैव सर्वेषां गुणानां गुणित्वेन सकृदेव तच्चिन्तनोपपत्तेर्नावर्तनीयमिति पूर्वः पक्षः। राद्धान्तस्तु— गुणिनस्स्वरूपैक्येऽपि तत्तद्गुण-विशिष्टाकारभेदादावर्तनीयमिति। सूत्रार्थस्तु— प्रदानवदावर्तनीयमेव; यथा * इन्द्राय राज्ञे पुरोडाशमेकादश-कपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे * इतीन्द्रस्यैकत्वेऽपि राजत्वादिविशिष्टाकारभेदाद्देवताभेद इति प्रदाना-वृत्तिः; तद्वदेव। तदुक्तं सङ्कर्षे * नाना वा देवता पृथक्त्वादिति॥ ४२॥ इति प्रदानाधिकरणम्॥ 18॥

३९७. **लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि**। तैत्तिरीया अधीयते * सहस्रशीर्षं देवमित्यारभ्य * सोऽक्षरः परमस्स्वराट् * इत्यन्तम्। अस्मिन्ननुवाके नोपासनं विधीयते। किमयं पूर्वानुवाकोदितदहर-विद्योपास्यविशेषनिर्धारणार्थः, उत सर्ववेदान्तोदितसर्वपरविद्योपास्यविशेषनिर्धारणार्थ इति संशयः। दहरविद्याया आनन्तर्यात्तदुपास्यविशेषनिर्धारणार्थ इति पूर्वः पक्षः; * सहस्रशीर्षं देवमिति द्वितीयानिर्देशस्यानन्तरोदितो-पासिना संबन्धस्यैव युक्तत्वाच्च। राद्धान्तस्तु— परब्रह्मपरतत्त्वपरज्योतिः परमात्माक्षरशिवशम्भुशब्दैस्सर्वपर-विद्योपास्यानन्नूद्य वाक्येनैव तेषां नारायणत्वविधानात्तस्य च प्रकरणाद्बलीयस्त्वेन सर्वविद्योपास्यनिर्धारणार्थ इति निश्चीयते। न च * सहस्रशीर्षमिति द्वितीयानिर्देशः पूर्वेणोपासिना संबध्यते, * तस्मिन्यदन्तस्तदुपासितव्यमिति कृत्प्रत्ययेन कर्माभिहितमिति तत्र द्वितीयानिर्देशायोगात्। * नारायणः पर. * व्याप्य नारायणस्स्थितः * पर-मात्मा व्यवस्थितः *, इत्यादिभिरैकार्थ्यात्प्रथमार्थे द्वितीया। सूत्रार्थस्तु— सर्वपरविद्योपास्यनिर्धारणे लिङ्गभूय-स्त्वात् तच्चिह्नभूतवाक्यभूयस्त्वादित्यर्थः। तद्धि— वाक्यं प्रकरणाद्बलीयः, तदपि पूर्वस्मिन्काण्डे * श्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात् * इत्यादिनोक्तम्। एवं सर्वोपास्यनिर्धारणे निश्चिते सति दहरविद्यायामप्ययमेवोपास्य इति * पद्मकोशप्रतीकाशमित्यादिना हृदयाद्यभिधानं च युज्यत इत्यभिप्रायः॥ ४३॥ इति लिङ्गभूयस्त्वाधिकरणम्॥ 19॥

३९८. **पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत्**। वाजसनेयकेऽग्निरहस्ये * मनश्चितो वाक्चितः प्राणचितश्चक्षुश्चितः * इत्यादिना मनश्चितादयोऽग्नयो विद्यारूपाः श्रूयन्ते। किमेते क्रियामयक्रत्वङ्ग-भूताः, उत विद्यामयक्रत्वङ्गभूता इति संशयः। अस्मिन् प्रकरणे विद्यामयक्रत्वनुबन्धिमानसग्रहस्तोत्रा-दिदर्शनेऽपि क्रतोर्विधानाभावात्, फलान्तराप्रतीतेश्च, पूर्वत्र * असद्वा इदमग्र आसीदित्यादिनेष्टकचितस्याग्नेः प्रकृतत्वात्, मनश्चितादिषु च * तेषामेकैक एव तावान्यावानसौ पूर्वः * इति तत्कार्यातिदेशादिष्टक-चितेनैषां विकल्पप्रतीतेश्चेष्टकचिताग्निशेषभूतक्रियामयक्रत्वनुप्रवेशेन तदङ्गभूता इति पूर्वः पक्षः। राद्धान्तस्तु—

Digitization by Arya Samaj Charitable Foundation, Chennai

* ते हैते विद्याचित एव विद्यया हैवैत एवं विदश्चिता भवन्ति * इति मनश्चितादीनां साम्पादिकाग्नित्वेन विद्यारूपत्वे सिद्धेऽपि * ते हैते विद्याचित एवेत्यवधारणश्रुतिर्विद्यामयक्रत्वङ्गत्वेनैषां विद्यारूपतावगत्यर्थेति निश्चयात् सन्निहितैर्मानसैः ग्रहस्तोत्रादिभिः क्रत्वनुबन्धैरनुवादसरूपवाक्यप्रतिपादितैः क्रतुदर्शने सति * वचनानि त्वपूर्वत्वादिति न्यायेन मनश्चितादीनां शेषिभूतविद्यामयक्रतोर्विधिः परिकल्प्यते । * तेषामेकैक एव तावान्यावानसौ पूर्वः * इत्यतिदेशेनेष्टकचिताग्नेस्स्वशेषिभूतक्रतुद्वारेण यत्फलम्, तदेवैषां स्वशेषिभूतविद्यामयक्रतुद्वारेण फलमिति निश्चीयत इति विद्यामयक्रत्वङ्गभूता एव मनश्चितादयः । सूत्रार्थस्तु— मनश्चितादिः क्रिया स्यात्— क्रियामयक्रत्वङ्गभूत इत्यर्थः । कुतः ? प्रकरणात्— पूर्वप्रकृतेनेष्टकचितेनाव्यभिचरितक्रतुसंबन्धिनोपस्थितक्रतुगृहीतत्वेन तदङ्गभूतानामेषां चाग्नित्वात्तेनेष्टकचितेन विकल्पः ; विद्यारूपाणामप्येषां क्रियामयक्रत्वङ्गभावो न विरुध्यते, द्वादशाहाङ्गभूतमानसग्रहवत् ॥ ४४ ॥

३९९. **अतिदेशाच्च ।** * तेषामेकैक एव तावान्यावानसौ पूर्वः * इति तेषु पूर्वेष्टकचितकार्यातिदेशाच्च तेनैषां विकल्पः प्रतीयते । तेन विकल्पो हि तच्छेषिभूतक्रत्वङ्गत्वेन विनैषां नोपपद्यते । अतश्च तदङ्गभूताः ॥ ४५ ॥

४००. **विद्यैव तु निर्धारणाद्दर्शनाच्च ।** तुशब्दः पक्षं व्यावर्तयति ; मनश्चितादिः विद्यैव— विद्यामयक्रत्वङ्गभूत एवेत्यर्थः । कुतः ? निर्धारणात्— तेषां विद्यारूपत्वे सिद्धेऽपि * ते हैते विद्याचित एवेति निर्धारणं विद्यामयक्रत्वङ्गतयैषां विद्यामयत्वख्यापनार्थम् । अत्रैव विद्यामयक्रतुदर्शनाच्च तदङ्गत्वमेवैषाम् । दृश्यते चात्र विद्यामयः क्रतुः * मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन् * इत्यादौ ॥ ४६ ॥

अत्र विद्यामयक्रतौ विधिपदाश्रवणात्, तत्फलसंबन्धाप्रतीतेश्च, प्रकरणेनेष्टकचिताग्न्युपस्थापितक्रत्वङ्गताप्रतीतेश्च विद्यामयक्रत्वन्वयो बाध्यत इत्याशङ्क्याह—

४०१. **श्रुत्यादिबलीयस्त्वाच्च न बाधः ।** श्रुत्यादेः प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः । श्रुतिस्तावत् * ते हैते विद्याचित एवेति । तां विवृणोति * विद्यया हैवैत एवंविदश्चिता भवन्तीति । लिङ्गवाक्ये च भाष्ये दर्शिते । एवंविदः मनश्चक्षुरादिव्यापारेष्वग्नित्वं संपादयितुः, एते मनश्चितादयः, विद्यया प्रधानभूतया चिता भवन्तीत्यर्थः ॥ ४७ ॥

* मनसैषु ग्रहा अगृह्यन्तेत्यादौ विधिपदाश्रवणाद्विद्यामयक्रतुविधिर्न संभवतीति तदसंभवाच्च तदन्वयोऽपि न संभवतीत्याशङ्क्याह—

४०२. **अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ।** ग्रहस्तोत्रशस्त्रेभ्यो यज्ञानुबन्धेभ्यः इष्टकचितान्वयिनः क्रतोरत्र विधीयमानविद्यामयक्रतुपृथक्त्वमवगम्यते ; प्रज्ञान्तरपृथक्त्ववत्— यथा प्रज्ञा-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्तराणां दहरविद्यादीनां पृथक्त्वहेतुभ्यः पृथक्त्वम् ; आदिशब्दात्पूर्वोक्तश्श्रुत्यादिर्गृह्यते ; श्रुत्यादिनाऽनुबन्धैश्च विद्यामयक्रतुविधिः कल्प्यत इत्यर्थः । दृष्टश्चानुवादसरूपेऽपि कल्प्यमानो विधिः * यदेव विद्यया करोतीत्यादौ । तदुक्तं * वचनानि त्वपूर्वत्वादिति ॥ ४८ ॥

यत्तूक्तमतिदेशाच्चेष्टकचितशेषिभूतक्रत्वन्वयोऽवगम्यत इति, तत्राह—

४०३. **न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ।** नावश्यमतिदेशेनेष्टकचिताग्नितुल्यदेशत्वमप्याश्रयणीयम्, येनकेनचित्सामान्येनातिदेशोपलब्धेः । * स एष मृत्युर्य एष एतस्मिन्मण्डले पुरुषः * इतिवत्फलसामान्येन भविष्यत्यतिदेशः । न हि तत्र मण्डलपुरुषे मृत्युंलोकापत्तिरप्यतिदिश्यते ; अपि तु मृत्युवत् सर्वसंहर्तृत्वमेव ॥ ४९ ॥

४०४. **परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ।** परेण च ब्राह्मणेनास्य मनश्चिताद्यभिधायिनश्शब्दस्य ताद्विध्यं- तद्विधत्वम्, विद्यामयप्रतिपादकत्वमवगम्यते । परेण हि ब्राह्मणेन * अयं वाव लोक एषोऽग्निचितस्तस्याप एव * इत्यादिना पृथक्फला विद्यैव विधीयते । अग्निरहस्ये क्रियामया एव विधीयन्त इति नास्ति नियम इत्यर्थः । क्रियाप्रकरणे त्वेषां मनश्चितादीनामनुबन्धः सम्पादनीयानामग्न्यङ्गानामत्र भूयस्त्वात्क्रियते । अतो विद्यामयक्रत्वङ्गभूता एव मनश्चितादयोऽग्नयः ॥ ५० ॥ इति पूर्वविकल्पाधिकरणम् ॥ 20 ॥

४०५. **एक आत्मनश्शरीरे भावात् ।** प्रत्यगात्मन आत्मतया हि परमात्मोपास्यः ; उपासकस्यापि स्वरूपमुपास्योपासनस्वरूपवत् ज्ञातव्यमित्युक्तम् * त्रयाणामित्यादिना ; वक्ष्यते च * आत्मेति तूपगच्छन्तीति । तत्र किं प्रत्यगात्मनश्शरीरे वर्तमानस्य कर्तृत्वभोक्तृत्वादिविशिष्टं रूपमनुसन्धेयम्, उत प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकं यथावस्थितं रूपमिति संशयः । शरीरे वर्तमानस्य यादृशं रूपम्, तदेवानुसन्धेयमिति पूर्वः पक्षः, कर्मविधिष्विवोपासनविधिष्वपि तावतैव साधनानुष्ठानफलानुभवयोस्संभवात् । * यथाक्रतुरस्मिँल्लोके पुरुषो भवतीति तु * तं यथायथोपासते * इत्यनेनैकार्थ्यात्परमात्मविषयम् । राद्धान्तस्तु— * तत्त्वमसि * स त आत्माऽन्तर्याम्यमृतः * इति प्रत्यगात्मन आत्मतयैव परमात्मोपास्य इति प्रत्यगात्मनस्स्वरूपमप्युपासनान्तर्गतम् । * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इति यथावस्थितात्मस्वरूपस्यैव ब्रह्मानुभवः फलमित्यतः * यथाक्रतुरस्मिँल्लोके पुरुषो भवतीति न परमात्ममात्रविषयम् ; अपि तु प्रत्यगात्मात्मभूतोपास्यविषयमिति प्रजापतिवाक्योदितं यथावस्थितस्वरूपमेवानुसन्धेयम् ; अन्यथा प्राप्योपास्ययोः प्रकारभेदात् * यथाक्रतुरस्मिन्निति विरुध्यते । * यजेत स्वर्गकामः इत्यादिकर्मविधौ तु कर्तृस्वरूपानुसन्धानं न

Digitization by Arya Samaj Charitable Foundation, Chennai

साधनान्तर्गतमिति विशेषः । सूत्रार्थस्तु– कर्तृत्वादिविशिष्टमेवात्मनस्स्वरूपमनुसन्धेयमित्येके मन्यन्ते ; कुतः ? शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावात् ॥ ५१ ॥

४०६. **व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्।** नकर्तृत्वादिविशिष्टमनुसन्धेयम्, अपि तु सांसारिकस्वरूपवन्मुक्तस्वरूपस्य यो व्यतिरेकः, सोऽनुसन्धेयः ; कुतः ? तथोपासनभावभावित्वात्तद्व्यतिरिक्तस्वरूपप्राप्तेः । * यथाक्रतुरस्मिल्लोके पुरुषो भवतीति ह्याह । उपलब्धिवत्– यथा ब्रह्मस्वरूपोपलब्धिर्यथावस्थितब्रह्मानुसन्धानयुक्तस्यैव, तथा आत्मोपलब्धिरपि ॥ ५२ ॥ इति शरीरेभावाधिकरणम् ॥ 21 ॥

४०७. **अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्।** * ओमित्येतदक्षरमुद्गीथमुपासीत * इत्युद्गीथादिक्रत्वङ्गाश्रया उपासनाश्श्रूयन्ते । ताः किं यासु शाखासु श्रूयन्ते, तास्वेव व्यवस्थिताः, उत सर्वासु शाखासु संबद्धा इति संशयः । शाखासु स्वरभेदात्प्रतिशाखमुद्गीथभेदेन यत्र श्रूयन्ते, तत्रस्थोद्गीथादेस्सन्निधानात्तेनैवान्विता व्यवस्थिता इति पूर्वः पक्षः । राद्धान्तस्तु– यद्यप्युद्गीथव्यक्तिभेदो विद्यते, तथापि तत्तत्रचोद्गीथजातीयत्वेन संबन्धात्सर्वेषां चोद्गीथजातीयत्वाविशेषात् * उद्गीथमुपासीतेति श्रुत्यैव सर्वसंबन्ध इति सर्वशाखासु संबध्यन्ते। सूत्रार्थस्तु– न त्वङ्गावबद्धा उपासनास्तासु शाखासु व्यवस्थिताः, अपि तु प्रतिवेदं सर्वशाखासु संबध्यन्त इत्यर्थः । हिर्हेतौ । यस्मादुद्गीथजातीयत्वाविशेषेण सर्वसंबन्धः, तस्मादित्यर्थः ॥ ५३ ॥

४०८. **मन्त्रादिवद्वाऽविरोधः।** वाशब्दश्चार्थे ; यथा मन्त्रादीनां क्रत्वङ्गभूतानामेकैकशाखाभिहितानां सर्वशाखासु क्रतोरेकत्वेन सर्वत्र संबन्धो न विरुध्यते ; तद्वच्चाविरोधः ॥ ५४ ॥ इति अङ्गावबद्धाधिकरणम् ॥ 22 ॥

४०९. **भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति।** वैश्वानरविद्यायां स्वर्लोकादित्यवाय्वाकाशपृथिव्यवयवो वैश्वानरात्मोपास्यश्श्रुतः । तत्र किं व्यस्तस्यैवोपासनं कार्यम्, उत व्यस्तस्य समस्तस्य च, अथ समस्तस्यैवेति संशयः । * औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन् * इत्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वमभिधाय, तत्रतत्र व्यस्तस्यैवोपासनं फलं च विहितमिति पश्चात् * यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते * इति पूर्वोक्तस्य समासेनोपसंहार इति युक्तम् ; अतो व्यस्तस्यैवोपासनं कार्यमिति प्रथमः पक्षः । समस्तोपासनस्य * सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति * इति व्यस्तोपासनफलेभ्यः फलान्तरविधानात् व्यस्तस्य समस्तस्य चोपासनं कार्यमिति द्वितीयः पक्षः । राद्धान्तस्तु * आत्मानं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि * इत्यारभ्य वैश्वानरात्मनस्स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय, * यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु * इत्युपसंहारादेकस्यैव वैश्वानरात्मनः त्रैलोक्यशरीरस्य परस्य ब्रह्मणः उपासनं विधाय,

Digitization by Arya Samaj Charitable Foundation, Chennai

फलं च * सर्वेष्वात्मस्वन्नमत्तीति * तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते * इति च सर्वेषामात्मनामविशेषेण भोग्यभूतं परं ब्रह्मानुभवति, तद्विरोधिनश्च सर्वपाप्मनः दहतीत्युक्तमिति गम्यते। अत एकवाक्यत्वात्समस्तस्यैवोपासनं कार्यम्। व्यस्तवादस्तु स्वर्लोकादीनां मूर्धाद्यवयवत्वज्ञापनार्था। तत्ततत्र च फलवादः वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति * इत्यादिवद्द्रष्टव्यः। सूत्रार्थस्तु— भूम्नो ज्यायस्त्वम्—समस्तोपासनस्य श्रैष्ठ्यम्; प्रामाणिकत्वमित्यर्थः। एकवाक्यत्वावगतेः व्यस्तवादः क्रतुवद्द्रष्टव्यः। * वैश्वानरं द्वादशकपालं निर्वपेत्....यदष्टाकपालः * इत्यादिः क्रताविवेत्यर्थः। तथा हि दर्शयति— समस्तोपासनस्य ज्यायस्त्वमेव दर्शयति श्रुतिः * मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः * इत्यादिना व्यस्तोपासनेऽनर्थं ब्रुवती ॥ ५५ ॥ इति भूमज्यायस्त्वाधिकरणम् ॥ 23 ॥

४१०. नाना शब्दादिभेदात्। सद्विद्यादहरविद्याशाण्डिल्यविद्याभूमविद्यादिकाः ब्रह्मोपासनरूपाः ब्रह्मप्राप्तिफलाः किमेकविद्या, उत नानेति संशयः। उपास्यस्य ब्रह्मणः फलस्य चैकत्वात्, वेद, उपासीतेति च पर्यायत्वादेकविद्येति पूर्वः पक्षः। ब्रह्मण एकत्वेऽपि जगदेककारणत्वापहतपाप्मत्वाद्यनुबन्धभेदहेतुभिः पूर्वकाण्डोदितानुबन्धभेदहेतुभिश्शब्दान्तरादिभिरेवानुबन्धभेदान्नानाभूता इति राद्धान्तः। शब्दान्तरादिभिस्तत्रोदितैरेव विद्याभेदसिद्धावपीह पुनर्वचनं ब्रह्मप्राप्तिहेतुभूतं वेदान्तोदितं ज्ञानमविधेयमिति कुदृष्टिनिरासार्थम्। सूत्रार्थस्तु— सद्विद्याभूमविद्यादिका नानाभूताः, ब्रह्मण एकत्वेऽपि सद्भूमापहतपाप्मादिशब्दभेदात्। आदिशब्दात् अभ्याससङ्ख्यागुणप्रक्रियानामधेयानि गृह्यन्ते ॥ ५६ ॥ इति शब्दादिभेदाधिकरणम् ॥ 24 ॥

४११. विकल्पोऽविशिष्टफलत्वात्। सद्विद्याभूमविद्यादिकानां ब्रह्मप्राप्तिफलानामेकस्मिन्पुरुषे समुच्चयोऽपि संभवति, नेति संशयः। अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां स्वर्गैकफलानां तत्र भूयस्त्वापेक्षया यथैकस्मिन्पुरुषे समुच्चयो दृश्यते; तथाऽत्रापि ब्रह्मानुभवभूयस्त्वापेक्षयैकस्मिन् पुरुषे समुच्चयस्संभवतीति पूर्वः पक्षः। देशतः कालतस्स्वरूपतश्चानवच्छिन्नानन्दस्वरूपब्रह्मानुभवस्सर्वासां परविद्यानां फलम्; तच्चैकया विद्ययाऽवाप्तमित्येकस्मिन्पुरुषे विद्यान्तरसमुच्चयः प्रयोजनाभावान्न संभवतीति सर्वासां विकल्पः इति राद्धान्तः। सूत्रमपि व्याख्यातम् ॥ ५७ ॥

४१२. काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्। ब्रह्मप्राप्तिव्यतिरिक्तफला विद्याः काम्याः। तास्तु यथेष्टं समुच्चीयेरन्; विकल्प्येरन्वा, पूर्वहेत्वभावात्— तत्फलस्यापरिमितत्वाभावात्; भूयस्त्वापेक्षया समुच्चयस्संभवतीत्यर्थः ॥ ५८ ॥ इति विकल्पाधिकरणम् ॥ 25 ॥

४१३. अङ्गेषु यथाश्रयभावः। कर्माङ्गाश्रयाणामुद्गीथाद्युपासनानां गोदोहनादिवदधिकारान्तरत्वेनोपादानानियमः पूर्वोक्तस्संभवति, नेति संशयः। न संभवतीति पूर्वः पक्षः, * उद्गीथमुपासीतेत्युपासन-

Digitization by Arya Samaj Charitable Foundation, Chennai

विधौ फलान्तराश्रवणात्, उद्गीथसंबन्धावगतक्रत्वङ्गभावाविरोधात्। एवं विधिवाक्येनैव क्रत्वङ्गभावेऽवगते सति * यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति....तेनेभौ कुरुतः * इति च वर्तमाननिर्देशः * न स पापं श्लोक शृणोति * इतिवदर्थवादमात्रं स्यात्। राद्धान्तस्तु— * यदेव विद्यया करोति....तदेव वीर्यवत्तरम् * इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साक्षात्साधनभावोऽवगम्यते। एवं फलसाधनतयाऽवगता विद्या किमाश्रित्य फलं करोतीत्यपेक्षायाम् * ओमित्येतदक्षरमुद्गीथमुपासीत * इत्युद्गीथमाश्रित्य कुर्यादिति क्रत्वङ्गभूतोद्गीथाश्रयत्वमात्रं प्रतीयते; अतः फलान्तरसाधनतयाऽवगतस्य क्रत्वङ्गभावो नोपपद्यत इति गोदोहनादितुल्यतयोपादानानियमस्सिध्यत्येव। * यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यत्र तु पर्णताया जुहूसंबन्धात्प्रागपापश्लोकश्रवणं प्रति साक्षात्साधनभावो न श्रूयते; पर्णतासंबन्धिपुरुषसंबन्धमात्रं श्रुतम्; तत्तु * पर्णमयी जुहूरिति श्रुत्यैव प्रथमावगतक्रत्वङ्गभावं न निरुणद्धीत्यर्थवादमात्रमिति विशेषः। सूत्रार्थस्तु— अङ्गेषु— उद्गीथादिषु आश्रितानामुपासनानां यथाश्रयभावः— उद्गीथादिवदङ्गभावः। गोदोहनादिवत् तस्मिन्वाक्ये फलसंबन्धश्रवणादङ्गभावो न विरुध्यत इत्यर्थः॥ ५९॥

४१४. **शिष्टेश्च**। शिष्टः— शासनम्, विधानम्; उद्गीथमुपासीतेति विधानाच्च वर्तमाननिर्देशावगतफलसंबन्धात्प्रागेवोद्गीथसंबन्धोऽवगत इति तदङ्गभावो न विरुध्यते। अत उपादाननियमः॥ ६०॥

४१५. **समाहारात्**। इतश्च * होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति * इत्युद्गीथवेदनहानावन्येन समाधानं ब्रुवत् वेदनस्योपादाननियमं दर्शयति। दुरुद्गीथं— वेदनहीनमुद्गीथम्॥ ६१॥

४१६. **गुणसाधारण्यश्रुतेश्च**। इतश्चोपादाननियमोऽवगम्यते। प्रणवगुणत्वेनावगतस्योपासनस्य साधारण्यं हि श्रूयते * तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति * इति तेनेति प्रकृतपरामर्शात्सोपासन एव प्रणवस्सर्वत्र सञ्चरति। अतः प्रणवसहभावनियमदर्शनादुपादाननियमो निश्चीयते॥ ६२॥

४१७. **न वा तत्सहभावाश्रुतेः**। न वोपादाननियमः, तत्सहभावाश्रुतेः— उद्गीथाद्यङ्गभावाश्रुतेरित्यर्थः। क्रत्वङ्गभावो हि सहभावः। * यदेव विद्यया करोति....तदेव वीर्यवत्तरमिति वीर्यवत्तरत्वसाधनतयाऽवगताया विद्यायाः क्रत्वङ्गतया विनियोगासंभवात् तदङ्गभावो हि न श्रूयते। यत्र साक्षात्फलसाधनत्वं प्रतिपाद्यते; तत्र फलसाधनत्वं प्रथमं प्रतीयत इति तस्य क्रत्वङ्गतया विनियोगो न संभवतीत्यभिप्रायः॥ ६३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४१८. **दर्शनाच्च ।** * एवं विद्धवै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति * इति ब्रह्मणो वेदनेन यज्ञस्य यजमानस्य ऋत्विजां च रक्षणं ब्रुवत्यन्येषां वेदनाभावं दर्शयति । तच्चोद्गीथोपासनस्यानङ्गत्वे सत्येवोपपद्यते । अतश्चोपादाननियमः ॥ ६४ ॥ इति यथाश्रयभावाधिकरणम् ॥ 26 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य तृतीयः पादः ॥

॥ अथ तृतीयाध्याये चतुर्थः पादः ॥

४१९. **पुरुषार्थोऽतश्शब्दादिति बादरायणः ।** किं विद्यातः पुरुषार्थः, उत कर्मण इति संशयः । कर्मण इति पूर्वः पक्षः : कर्माङ्गत्वाद्विद्यायाः : कर्मसु कर्तृभूतप्रत्यगात्मनो याथात्म्यप्रतिपादनपराणि वेदान्तवाक्यानि । विद्यायाः कर्माङ्गत्वं च * यदेव विद्यया करोति.... तदेव वीर्यवत्तरमिति श्रुत्यैवावगम्यते । न च प्रकृतोद्गीथोपासनविषयत्वमस्य वक्तुं शक्यते, * यदेव विद्यया करोतीति श्रुत्यैव सर्वकर्मसु विद्याया विनियुक्तत्वात् । श्रुतिश्च प्रकरणाद्बलीयसी । विद्यायाः कर्माङ्गत्वं कथमित्यपेक्षायां * तत्त्वमसि * अयमात्मा ब्रह्मेति सामानाधिकरण्येन कर्माङ्गभूतकर्तृयाथात्म्यानुसन्धानद्वारेण विद्यायाः कर्माङ्गत्वमित्यवगम्यते । अतः कर्तृसंस्काररूपत्वाद्ब्रह्मविद्यायाः कर्मण एव पुरुषार्थः । तत्रतत्र फलश्रुतिरर्थवादस्स्यात् । विद्यायाः कर्माङ्गत्वे भूयांसि लिङ्गानि च दृश्यन्ते सर्ववेदान्तेषु । राद्धान्तस्तु— कर्मसु कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्य स्वसङ्कल्पकृतजगदुदयविभवलयलीलस्य निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दैकस्वरूपस्य सर्वेश्वरस्य सत्यसङ्कल्पस्य करणाधिपरूपप्रत्यगात्माधिपस्य वेद्यस्य वेदनरूपाया विद्यायाः * ब्रह्मविदाप्नोति परमित्यादिषु ब्रह्मप्राप्तिरूपफलोपदेशात् विद्यात एव फलम् । * यदेव विद्यया करोतीति श्रुतिः प्रसिद्धवन्निर्देशात् : प्रसिद्धिश्च प्रकृतोद्गीथोपासनस्यैवेति, प्रस्तुतोद्गीथोपासनविशेषनिष्ठा । * तत्त्वमसीति सामानाधिकरण्यं च तच्छब्दनिर्दिष्टस्य स्वसङ्कल्पकृतजगज्जन्मस्थितिध्वंसादिकस्य परस्य ब्रह्मणो न जीवस्वरूपत्वपरम् ; अपि तु जगत्कारणस्य ब्रह्मणो जीवशरीरकतया जीवस्यात्मत्वपरमिति * अधिकं तु भेदनिर्देशादित्यादिषूक्तम् । * य आत्मति तिष्ठन्.... यस्यात्मा शरीरमिति च प्रत्यगात्मन आत्मत्वं परस्य ब्रह्मणः श्रुत्यन्तरे व्यक्तम् । सूत्रार्थस्तु— पुरुषार्थोऽतः— विद्यातः ; कुतः ? * ब्रह्मविदाप्नोति परमित्यादिशब्दात् ॥ १ ॥

४२०. **शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ।** * तत्त्वमसीत्यादिसामानाधिकरण्येन ब्रह्मणः कर्मसु कर्तृस्वरूपत्वावगमाद्विद्यायाः कर्तृसंस्कारद्वारेण कर्मशेषत्वात्तत्र पुरुषार्थवादोऽर्थवादमात्रम् ; यथा अन्येषु द्रव्यसंस्कारादिष्विति जैमिनिराचार्यो मन्यते ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४२१. **आचारदर्शनात्।** इतश्च विद्या कर्माङ्गम्; ब्रह्मविदामाचारो हि कर्मप्रधानो दृश्यते। यथाऽश्वपतिः केकयो ब्रह्मविदग्रेसरः * यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि * इत्याह। * कर्मणैव हि संसिद्धिमास्थिता जनकादयः * इति च स्मर्यते ॥ ३ ॥

लिङ्गमिदम्; प्राप्तिरुच्यतामित्यत्राह—

४२२. **तच्छ्रुतेः।** * यदेव विद्यया करोतीत्यादिकायाश्श्रुतेर्विद्यायाः कर्माङ्गत्वमवगम्यते। न च दुर्बलेन प्रकरणेन श्रुतिर्विद्याविशेषोद्गीथविषयोपासने व्यवस्थाप्यते ॥ ४ ॥

४२३. **समन्वारम्भणात्।** * तं विद्याकर्मणी समन्वारभेते * इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यं च विद्यायाः कर्माङ्गत्वे हि भवति ॥ ५ ॥

४२४. **तद्वतो विधानात्।** विद्यावतः कर्मविधानाच्च विद्या कर्माङ्गम्। * आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे * इत्यादिनाऽध्ययनवतः कर्माणि विदधदर्थावबोधपर्यन्तत्वादध्ययनस्य विद्यावत एव कर्माणि विदधातीत्यवगम्यते ॥ ६ ॥

४२५. **नियमात्।** * कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः * इत्यात्मविदामायुषः कर्मसु नियमदर्शनाच्च कर्मण एव पुरुषार्थः; न विद्यात इत्यवगम्यते। अतश्च विद्या कर्माङ्गम् ॥ ७ ॥

४२६. **अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्।** तुशब्दात्पक्षो व्यावृत्तः। बादरायणस्यैवं— विद्यातः फलमिति मतम्; कुतः? अधिकोपदेशात्— कर्मसु कर्तुः प्रत्यगात्मनोऽधिकस्य— अर्थान्तरभूतस्य वेद्यस्य वेदनभूतविद्यायाः फलसाधनत्वोपदेशात्। तद्दर्शनात्— दृश्यते हि वेदान्तवाक्येऽधिकविषयत्वं विद्यायाः। एवमेव हि * तदैक्षत बहु स्यां प्रजायेयेति * सोऽकामयत बहु स्यां प्रजायेयेत्यादिषु बहुभवनसङ्कल्पपूर्वकसृष्ट्यादेः कर्तुस्सर्वेश्वरस्य करणाधिपाधिपस्यानवधिकातिशयज्ञानानन्दैकस्वरूपस्य निखिलहेयप्रत्यनीकस्य वेद्यस्य विद्या ब्रह्मप्राप्तिफलाय विधीयते ॥ ८ ॥

४२७. **तुल्यं तु दर्शनम्।** विद्यायाः प्रधानत्वेऽपि ब्रह्मविदामाचारदर्शनं तुल्यम्— कर्मणामनाचारदर्शनमप्यस्तीत्यर्थः, * ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे * इत्यादौ। कर्मानुष्ठानदर्शनं तु फलाभिसन्धिरहितस्य कर्मणो विद्याङ्गत्वात्; त्यागस्तु फलाभिसन्धियुक्तस्य विद्याविरोधित्वादित्यभिप्रायः ॥ ९ ॥

४२८. **असार्वत्रिकी।** * यदेव विद्यया करोतीति श्रुतिः सर्वविद्यायाः कर्माङ्गत्वं विदधातीत्येतदसङ्गतम्; अत्र विद्याशब्दाभिहिता तु न सार्वत्रिकी, अपि तूद्गीथविद्या। यत्करोति, तद्विद्ययेति नैवं पदान्वयः; अपि तु यदेव विद्यया करोति, तदेव वीर्यवत्तरमिति। विद्यया क्रियमाणस्यान्यतोऽन्वगतस्य वीर्यवत्तरत्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिसाधनभावोऽवगम्यते, यदेवेति प्रसिद्धवन्निर्देशात्। अन्यतोऽवगतिर्हि * उद्गीथमुपासीतेति सन्निहितोद्गीथविद्यायाः ॥ १० ॥

४२९. **विभागश्शतवत्।** * तं विद्याकर्मणी समन्वारभेते * इत्यत्र विद्या च स्वस्मै फलाय कर्म च स्वस्मै फलायान्वारभत इति विभागो द्रष्टव्यः, यतो विद्याकर्मणोर्भिन्नफलत्वमुक्तम्। शतवत्— यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते, क्षेत्रार्थं शतम्, रत्नार्थं शतमिति विभागोऽवगम्यते ; तद्वत् ॥ ११ ॥

४३०. **अध्ययनमात्रवतः।** * वेदमधीत्येत्यध्ययनमात्रवत एव कर्मविधानात् अनेन विद्याया न कर्माङ्गत्वमवगतम्। अध्ययनविधिर्ह्याधानवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति ; गृहीतस्य स्वाध्यायस्य फलवदर्थावबोधित्वदर्शनात्तन्निर्णयफलमीमांसाश्रवणे अधीतवेदः पुरुषस्स्वयमेव प्रवर्तते। अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानादर्थान्तरभूता स्मृतिप्रत्ययावृत्तिरूपा, विद्यात्, उपासीतेति शास्त्रविहिता विद्या न कर्माङ्गम् ॥ १२ ॥

४३१. **नाविशेषात्।** * कुर्वन्नेवेह कर्माणि * इति ब्रह्मविदामायुषः कर्मणि नियमो दृश्यत इत्येतन्न संभवति, अविशेषात्— विदुष एवेति विशेषाभावात्किमित्यविदुषो न स्यात्? विदुषस्त्वाप्रयाणादुपासनानुवृत्तिदर्शनादर्थस्वभावाद्विदुष एवेत्यभिप्रायः ॥ १३ ॥

४३२. **स्तुतयेऽनुमतिर्वा।** वाशब्दोऽवधारणे। * ईशावास्यमिदं सर्वम् * इति विद्याप्रकरणाद्विद्यास्तुतये कर्मानुमतिरेव। विद्यामाहात्म्यात्सर्वदा कर्माणि कुर्वन्नपि तैर्न लिप्यत इति हि स्तुता भवति विद्या। वाक्यशेषे च * न कर्म लिप्यते नरे * इति श्रूयते ॥ १४ ॥

४३३. **कामकारेण चैके।** एके शाखिनः कामकारेण च विद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते। * किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः * इति गार्हस्थ्यकर्मत्यागं ब्रुवद्वाक्यं विद्या प्रधानमिति दर्शयति ॥ १५ ॥

४३४. **उपमर्दं च।** विद्यया सर्वकर्मोपमर्दं चाधीयते * क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे * इति ; तद्विद्यायाः कर्माङ्गत्वे न संगच्छते ॥ १६ ॥

४३५. **ऊर्ध्वरतेस्सु च शब्दे हि।** ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्यादर्शनात् तेषु चाग्निहोत्रादिकर्माभावान्न विद्या कर्माङ्गम्। ते चात्राश्रमास्सन्त्येव ; यतो वैदिके शब्दे तेऽपि दृश्यन्ते * त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानम् * इति, * ये चेमेऽरण्ये श्रद्धा तप इत्युपासते * एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति * इत्यादौ। * यावज्जीवमग्निहोत्रमित्यादिका तु श्रुतिरविरक्तविषया ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४३६. **परामर्शं जैमिनिरचोदनाच्चापवदति हि।** * त्रयो धर्मस्कन्धाः * इत्यादिषु तेषामाश्रमाणामचोदनात्– अविधानात् उपासनास्तुत्यर्थं परामर्शम्– अनुवादं जैमिनिराचार्यो मन्यते। अपि च अपवदति हि श्रुतिराश्रमान्तरं * वीरहा वा एष देवानां योऽग्निमुद्वासयते * इत्यादिका। अतस्ते न सन्त्येव ॥ १९ ॥

४३७. **अनुष्ठेयं बादरायणस्साम्यश्रुतेः।** गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते; कुतः? तस्यापि तत्साम्यश्रुतेः– * त्रयो धर्मस्कन्धाः * इत्येवमादौ हि सर्वेषामाश्रमाणामेकरूपं संकीर्तनम् ॥ १९ ॥

४३८. **विधिर्वा धारणवत्।** वाशब्दोऽवधारणे; सर्वेषामाश्रमाणां विधिरेवायम्। धारणवत्– यथा * अधस्तात्समिधं धारयन्ननुद्रवेत् * उपरि हि देवेभ्यो धारयति * इत्यनुवादरूपेऽप्युपरिधारणस्याप्राप्तत्वेन विधिराश्रीयते; एवमिहाश्रमाणामपि। अतः ऊर्ध्वरेतस्स्वपि विद्यादर्शनाद्विद्यातः पुरुषार्थ इति ॥ २० ॥ इति पुरुषार्थाधिकरणम् ॥ 1 ॥

४३९, ४४०. **स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्। भावशब्दाच्च।** * ओमित्येतदक्षरमुद्गीथमुपासीत * स एष रसानां रसतमः परमः परार्थ्योऽष्टमो यदुद्गीथः * इत्येतज्जातीयके किं कर्माङ्गाश्रयाणां दृष्टिविशेषाणां विधिरास्थेयः, उतोद्गीथादिस्तुतिमात्रमिति संशयः। विधित्वे सिद्धे हि गोदोहनादिवद्भवति; विधित्वमेव न संभवतीति पूर्वः पक्षः। * इयमेव जुहूस्स्वर्गो लोक आहवनीयः * इतिवत् कर्माङ्गभूतोद्गीथादिसंबन्धितयोपादानाद्रसतमत्वादेः तत्स्तुतिमात्रत्वमेव; न रसतमत्वादिदृष्टिविधिः। राद्धान्तस्तु– जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानात, रसतमत्वादेरप्राप्तत्वाच्च, उपासीतेति विधिप्रत्ययेन च, न स्तुतिमात्रम्, तद्दृष्टिविधिरेव। सूत्रद्वयमपि व्याख्यातम् ॥ २१, २२ ॥ इति स्तुतिमात्राधिकरणम् ॥ 2 ॥

४४१, ४४२. **पारिप्लवार्था इति चेन्न विशेषितत्वात्। तथा चैकवाक्योपबन्धात्।** * प्रतर्दनो ह वै दैवोदासिः * इत्यादयो वेदान्तेष्वाख्यानविशेषाः किं पारिप्लवप्रयोगार्थाः, उत तत्रतत्र विद्याविशेषप्रतिपादनार्थाः इति संशयः। * आख्यानानि शंसन्तीति पारिप्लवे विनियोगात्तदर्थाः इति पूर्वः पक्षः। राद्धान्तस्तु— * आख्यानानि शंसन्तीत्युक्त्वा * मनुर्वैवस्वतो राजा * इति मन्वाद्याख्याने विनियोगस्य विशेषितत्वात्, * तं मामायुरमृतमित्युपास्स्व * आत्मा वा अरे द्रष्टव्यः * इत्यादिविधिनैकवाक्यत्वाच्च, सोऽरोदीत् * इत्यादिवद्विद्याविध्यर्था एव। सूत्रद्वयमपि व्याख्यातम् ॥ २३, २४ ॥ इति पारिप्लवार्थाधिकरणम् ॥ 3 ॥

४४३. **अत एव चाग्नीन्धनाद्यनपेक्षा।** ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्या संभवति, नेति संशयः। यज्ञाद्यभावात्तेषां तदङ्गिका विद्या न संभवतीति पूर्वः पक्षः। राद्धान्तस्तु— * यदिच्छन्तो ब्रह्मचर्यं चरन्ति

Digitization by Arya Samaj Charitable Foundation, Chennai

* एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति * इत्यादिश्रुतेः तेषां विद्यावत्त्वावगमात्तेष्वग्निहोत्राद्यनपेक्षा विद्येति निश्चीयते। सूत्रार्थस्तु— अत एव— विद्यावत्त्वश्रुतेरेव, आधानाद्यनपेक्षा तेषु विद्या। अग्नीन्धनं हि— अग्न्याधानम् ॥ २५ ॥ इति अग्नीन्धनाद्यधिकरणम् ॥ 4 ॥

४४४. **सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्।** कर्मवत्सु गृहस्थेषु किं यज्ञादिकर्मापेक्षा विद्या, उत तत्रापि केवलैवेति संशयः। ऊर्ध्वरेतस्सु यज्ञाद्यनपेक्षैवामृतत्वं साधयति चेत्; कर्मनिरपेक्षाया विद्याया एव साधनत्वमभ्युपगमनीयम्। तथा सति गृहस्थेष्वपि तन्निरपेक्षैव साधयितुं समर्थेति पूर्वः पक्षः। न हि स्वर्गादि-साधनभूतमग्निहोत्रादिकर्म पुरुषभेदेन नानाविधाङ्गकं दृष्टम्। * विविदिषन्तीति शब्दोऽपि वेदनेच्छायां कर्माणि विनियुङ्क्ते, न विद्यायाम्। राद्धान्तस्तु— कर्मवत्सु गृहस्थेषु यज्ञादि सर्वकर्मापेक्षा विद्या; कुतः? यज्ञादि-श्रुतेः— * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन * इति हि यज्ञादयो विद्याङ्गत्वेन विनियुज्यन्ते। अतो गृहस्थेषु कर्मापेक्षा विद्या। इच्छाया इष्यमाणप्रधानत्वात् विविदिषन्तीतीष्यमाणं ज्ञानमेवेत्यवगम्यते। यथा गमनसाधनभूतोऽश्वः स्वपरिकरबन्धरूपपरिकर्मापेक्षः; एवं मोक्षसाधनभूता विद्यापि नित्यनैमित्तिकपरि-कर्मापेक्षा। ऊर्ध्वरेतस्सु च स्वाश्रमविहितं कर्मैव परिकर्म भवतीति तेष्वपि विद्यासंबन्धश्शास्त्रादवगम्यते। शास्त्रैकसमधिगम्ये हि यथाशास्त्रमभ्युपगमनीयम्। सूत्रमपि व्याख्यातम् ॥ २६ ॥ इति सर्वापेक्षाधिकरणम् ॥

४४५. **शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात्।** किं, विद्यानिर्वृत्तये गृहस्थैश्शमदमादय उपादेयाः, उत नेति संशयः। गृहस्थानामान्तरबाह्यकरणव्यापाररूपकर्माङ्गक-त्वाद्विद्यायाः, तद्विपरीतरूपशमदमाद्युपादानासामर्थ्यादूर्ध्वरेतस्सु कर्मरहितेषु शमादिविनियोगो भविष्यति: यथा यज्ञादिविनियोगः कर्मवत्सु गृहस्थेषु। तस्मादनुपादेयाश्शमादय इति पूर्वः पक्षः। राद्धान्तस्तु— * तस्मादेवं-विच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत् * इति सामान्येन विद्याङ्गतया विनि-योगात् गृहस्थैरप्युपादेयाः। न च कर्मवतां तेषां शमाद्युपादानासामर्थ्यम्; भिन्नविषयत्वाच्छमादेः। विहितेषु हि कर्मसु करणव्यापारः; अविहितेषु प्रयोजनशून्येषु च शमदमादयः। अतश्शमादिविनियोगो यज्ञादिविनि-योगवन्न सङ्कोचमर्हतीति। सूत्रार्थस्तु— यद्यपि गृहस्थो यज्ञादिकर्मसु विनियुक्तः, तथापि तु शमदमाद्युपेत-स्स्यात्; कुतः? * शान्तो दान्तः * इत्यादिना तद्विधेः तदङ्गतया— विद्याङ्गतया विद्यानिष्पत्तये तेषा-मवश्यानुष्ठेयत्वाच्च। एकाग्रतानिष्पाद्यत्वाच्छमदमादिभिरेव विद्यानिष्पत्तिरित्यर्थः। यज्ञादिकर्माण्यपि पापनिबर्हण-द्वारेणैकाग्रतामापादयन्तीत्यभिप्रायः ॥ २७ ॥ इति शमदमाद्यधिकरणम् ॥ 6 ॥

४४६. **सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्।** वाजिनां छन्दोगानां च प्राणविद्यायां * न ह वा एवंविदि किञ्चनानन्नं भवति * इति सर्वान्नानुमतिस्सङ्कीर्त्यते। किं प्राणविदस्सर्वान्नानुमति-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्सर्वदा, उत प्राणात्ययापत्ताविति संशयः। अविशेषासर्वदेति पूर्वः पक्षः। अतिशयितशक्तेर्ब्रह्मविदोऽपि उच्छिष्टपरिग्रहणभक्षणयोः प्राणात्ययापत्तावेव दर्शनादल्पशक्तेः प्राणविदः किं पुनरिति प्राणात्ययापत्तावेवेति राद्धान्तः। सूत्रार्थस्तु— चशब्दोऽवधारणे; प्राणविदस्सर्वान्नानुमतिः। प्राणात्यय एव; कुतः? तद्दर्शनात्— अतिशयितशक्तेर्ब्रह्मविदः प्राणात्यय एव सर्वान्नानुमतिदर्शनात् ॥ २८ ॥

४४७. **अबाधाच्च।** * आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः * इत्याहारशुद्धि-विधेरबाधाच्च प्राणात्यय एव ॥ २९ ॥

४४८. **अपि स्मर्यते।** * प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्म-पत्रमिवाम्भसा ॥ इति प्राणसंशय एव सर्वान्नानुमतिः स्मर्यते च ॥ ३० ॥

४४९. **शब्दश्चातोऽकामकारे।** यतस्सर्वान्नानुमतिः प्राणात्यये; अतोऽकामकारे शब्दश्च— कामकारस्य प्रतिषेधकशब्दश्चोपपद्यत इत्यर्थः ॥ अस्ति हि कठानां कामकारप्रतिषेधकश्शब्दः * तस्माद्ब्राह्मण-स्सुरां न पिबति पाप्मना नोत्सृजा * इति। पाप्मना संस्पृष्टो न भवानीति मत्वा सुरां न पिबतीत्यर्थः ॥ ३१ ॥ इति सर्वान्नानुमत्यधिकरणम् ॥ 7 ॥

४५०. **विहितत्वाच्चाश्रमकर्मापि।** किं यज्ञादयो विद्याङ्गभूताः केवलाश्रमस्याप्यङ्गभूताः, उत नेति संशयः। केवलाश्रमस्याप्यङ्गत्वे नित्यानित्यसंयोगरूपविरोधः प्रसज्यत इति नाङ्गभूताः केवलाश्रमस्येति पूर्वः पक्षः। राद्धान्तस्तु— यदैकेनैव विनियोगेनोभयाङ्गत्वमिष्यते; तदा नित्यानित्यसंयोगविरोधः। इह तु * यावज्जीवमग्निहोत्रं जुहुयात् * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन * इति विनियोग-पृथक्त्वेन विरोधः परिह्रियते; यथाऽग्निहोत्रादीनामेव कर्मणाम्। जीवनाधिकारकामनाधिकारयोरिवाधिकार-भेदस्यास्फुटत्वात्तत्स्फुटीकरणाय पुनरिह चिन्त्यते। सूत्रार्थस्तु— * यावज्जीवमग्निहोत्रं जुहुयादित्यादिना केवलगृहस्थाश्रमिणो जीवननिमित्ततया विहितत्वादेव यज्ञादि केवलाश्रमकर्मापि ॥ ३२ ॥

४५१. **सहकारित्वेन च।** * तमेतं वेदानुवचनेनेत्यादिना विद्यासाधनत्वेन विहितत्वाच्च विद्यासहकारित्वेन चानुष्ठेयं यज्ञादिकर्म। विनियोगपृथक्त्वेन विरोधः परिह्रियत इत्यभिप्रायः ॥ ३३ ॥

४५२. **सर्वथापि त एवोभयलिङ्गात्।** सर्वथापि— उभयत्र विनियोगेऽपि त एव यज्ञादयः। कुतः? उभयलिङ्गात्— उभयत्र प्रत्यभिज्ञानाख्यलिङ्गात् ॥ ३४ ॥

४५३. **अनभिभवं च दर्शयति।** * धर्मेण पापमपनुदति * इत्यादिभिश्च यज्ञादिधर्मान्नि-र्दिश्य तैर्विद्यायाः अनभिभवं— पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति। अत उभयत्र विनियोगात्केवला-श्रमिणां मुमुक्षूणां चानुष्ठेया यज्ञादयः ॥ ३५ ॥ इति विहितत्वाधिकरणम् ॥ 8 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४५४. **अन्तरा चापि तु तद्दृष्टेः।** विधुरादीनामनाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति, नेति संशयः। आश्रमधर्मैतिकर्तव्यताकत्वाद्विद्यायाः तदभावात्तेषामनधिकार इति पूर्वः पक्षः। राद्धान्तस्तु— ऊर्ध्वरेतस्स्विव रैक्वादिष्वनाश्रमिषु विद्यानिष्ठत्वदर्शनादाश्रमानियतैर्जपोपवासदानादिभिरेव तेषां विद्यानुग्रहो भवतीत्यस्त्येवाधिकारः। सूत्रार्थस्तु— तुशब्दात्पक्षो व्यावृत्तः। चशब्दोऽवधारणे। अन्तराऽपि— आश्रमानन्तरा वर्तमानानामनाश्रमिणामप्यधिकारोऽस्त्येव। कुतः? तद्दृष्टेः— रैक्वादिषु विद्यानिष्ठत्वदृष्टेः॥ ३६॥

४५५. **अपि स्मर्यते।** अपि च अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते * जप्येनापि च संसिध्येद्ब्राह्मणो नात्र संशयः * इत्यादिना॥ ३७॥

४५६. **विशेषानुग्रहश्च।** आश्रमानियतधर्मविशेषेण विद्यानुग्रहश्श्रूयते च * तपसा ब्रह्मचर्येण श्रद्धया विद्यया चाऽऽत्मानमन्विच्छेत् * इति॥ ३८॥

४५७. **अतस्त्वितरज्ज्यायो लिङ्गाच्च।** अतः— अनाश्रमित्वादितरत्— आश्रमित्वं ज्यायः, धर्मभूयस्त्वात्; लिङ्गाच्च स्मृतेश्चेत्यर्थः। * अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः * इति हि स्मर्यते। तस्मादनाश्रमित्वेन विद्यानिष्ठत्वमापद्विषयमित्यभिप्रायः॥ ३९॥ इति विधुराधिकरणम्॥ ९॥

४५८. **तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः।** नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि विद्याधिकारोऽस्ति, नेति संशयः। विधुरादिवज्जपादिभिरनुग्रहसंभवादस्त्येवाधिकार इति पूर्वः पक्षः। राद्धान्तस्तु— नैष्ठिकादीनां स्वाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणाच्छिष्टबहिष्कृतत्वाच्च तेषामनधिकारः इति। सूत्रार्थस्तु— तद्भूतस्य तु नातद्भावः— नैष्ठिकादिभूतस्यातथाभावो न संभवति: कुतः? तद्रूपाभावेभ्यः शास्त्रैः नियमात्, तद्रूपाभावाः नैष्ठिकाद्याश्रमधर्माभावाः; तेभ्यो नियच्छन्ति हि शास्त्राणि। * ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् * इति नैष्ठिकस्य तत्रैव नियमः; * अरण्यमियात्ततो न पुनरेयात् * इति च वैखानसस्य; * संन्यस्याग्निं न पुनरावर्तयेत् * इति च परिव्राजकस्य। अत एव तेषामनाश्रमित्वेनावस्थानाभावाद्विद्याधिकारो न संभवति। जैमिनेरप्यविगीतोऽयम्॥ ४०॥

४५९. **न चाधिकारिकमपि पतनानुमानात्तदयोगात्।** आधिकारिकम्— अधिकारलक्षणोक्तम् * अवकीर्णिपशुश्च तद्वत् * इत्येतत्प्रायश्चित्तं नैष्ठिकस्य न संभवति। कुतः? पतनानुमानान्नैष्ठिकस्य तदयोगात्। तस्य हि पतनं स्मर्यते प्रायश्चित्ताभाववचनेन, * आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥ इति। अत उपकुर्वाणब्रह्मचारिविषयमाधिकारिकम्॥ ४१॥

४६०. **उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्।** एके प्रायश्चित्तभावमपि मन्यन्ते, यत उपपूर्वम्— उपपातकमिदम्; अशनवत्— मध्वशनादिनिषेधतत्प्रायश्चित्तवद्भवतीत्यर्थः। अत उपकुर्वाणस्य ब्रह्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

चारिणः उक्तमाधिकारिकमस्यापि भवतीति । तदुक्तं स्मृतिकारैः * उत्तरेषां चैतदविरोधि * इति । उपकुर्वाणे ब्रह्मचारिण्युक्तो धर्म उत्तरेषां चाश्रमिणां स्वाश्रमाविरोधी भवत्येवेत्यर्थः ॥ ४२ ॥

४६१. **बहिस्तूभयथाऽपि स्मृतेराचाराच्च ।** उभयथापि– उपपातकत्वे महापातकत्वेऽपि नैष्ठिकात्प्रच्युतो बहिर्भूतः कर्माधिकारात्, * प्रायश्चित्तं न पश्यामि * इति स्मृतेः, आचाराच्च— वर्जयन्ति ह्येनं शिष्टा विद्योपदेशादौ । यद्यपि कल्मषनिबर्हणाय कैश्चित्प्रायश्चितमुच्यते; तथापि कर्माधिकारापादिनी शुद्धिस्तेषां न संभवतीत्यभिप्रायः ॥ ४३ ॥ इति तद्भूताधिकरणम् ॥ 10 ॥

४६२. **स्वामिनः फलश्रुतेरित्यात्रेयः ।** उद्गीथाद्युपासनं किं यजमानेनानुष्ठेयम्, उत ऋत्विजेति संशयः । * यदेव विद्यया करोति....तदेव वीर्यवत्तरमिति क्रतुवीर्यवत्तरत्वफलं यजमानस्येति दहरोपासनादिवद्यजमानेनानुष्ठेयमिति पूर्वः पक्षः । कर्माङ्गाश्रयत्वादस्योपासनस्य कर्मणश्चार्त्विज्यत्वेन एतदपि ऋत्विजाऽनुष्ठेयं, गोदोहनादिवदिति राद्धान्तः । सूत्रार्थस्तु— स्वामिनः— यजमानस्योद्गीथाद्युपासने कर्तृत्वम्, कुतः ? तस्यैव फलश्रुतेरित्यात्रेयो मन्यते ॥ ४४ ॥

४६३. **आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ।** क्रत्वङ्गाश्रयत्वेन क्रत्वधिकृतस्यैवास्मिन्नुपासनेऽधिकारात् क्रतोश्चार्त्विज्यत्वेन एतदप्यार्त्विज्यमित्यौडुलोमिराचार्यो मन्यते, यजमानफलसाधनत्वेऽपि क्रतोस्तदनुष्ठानाय हि ऋत्विक्परिक्रियते ॥ ४५ ॥ इति स्वाम्यधिकरणम् ॥ 11 ॥

४६४. **सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ।** * तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः * इत्यत्र मौनं विद्याङ्गतया विधीयते, उतानूद्यत इति संशयः । मौनस्य मननरूपत्वात् * श्रोतव्यो मन्तव्यः * इति च प्राप्तत्वेनानूद्यत इति पूर्वः पक्षः । राद्धान्तस्तु— मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धेः, प्रकृष्टमननमुपास्यविषयाभ्यासरूपं विद्यानिष्पत्तये विधीयत इति । सूत्रार्थस्तु— तद्वतः— विद्यावतः, सहकार्यन्तरं— मौनं विधिः; विधीयत इति विधिरिति मौनं विधिरित्युक्तम् । विध्यादिवत्— अत्रापि विधीयत इति विधिः यज्ञदानप्रभृत्याश्रमधर्मः, आदिशब्दाच्छ्रवणमनने गृह्येते । आश्रमधर्मवच्छ्रवणमननवच्च पाण्डित्यबाल्ययोस्तृतीयमिदं सहकार्यन्तरं मौनमपूर्वं विधीयते; कुत इत्यत आह— पक्षेणेति । मुनिशब्दस्य प्रकृष्टमननयुक्ते पक्षेण— प्रसिद्धेरित्यर्थः ॥ ४६ ॥

४६५. **कृत्स्नभावात्तु गृहिणोपसंहारः ।** सर्वाश्रमिणां विद्यावत्त्वेऽपि छान्दोग्ये * स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते * इति गृहस्थधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः । कुतः ? कृत्स्नभावात्— कृत्स्नेषु भावात्— कृत्स्नेष्वाश्रमिषु विद्यायास्सद्भावादित्यर्थः ॥ ४७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४६६. **मौनवदितरेषामप्युपदेशात्**। * अथ मुनिः * इत्यस्मिन्वाक्ये * अथ भिक्षाचर्यं चरति * इति पारिव्राज्यैकान्तधर्मेणोपसंहारोऽपि सर्वाश्रमधर्मप्रदर्शनार्थः, भिक्षाचर्यमौनादिवदितरेषामाश्रमधर्माणां यज्ञादीनामप्युपदेशात् ॥ ४८ ॥ इति सहकार्यन्तरविध्यधिकरणम् ॥ 12 ॥

४६७. **अनाविष्कुर्वन्नन्वयात्**। * तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः * इत्यत्र किं बालस्य कर्म कामचारादिकं सर्वं विदुषोपादेयम्, उत विद्यामाहात्म्यानाविष्कार इति संशयः। * बाल्येन तिष्ठासेदित्यविशेषविधानात्कामचारादिकं सर्वमप्युपादेयमिति पूर्वः पक्षः; विदुषो विशेषविधानात्, विद्यामाहात्म्याच्च, निषेधश्रुतयो बाधिता भवेयुरिति। राद्धान्तस्तु— पाण्डित्यप्रयुक्तस्वमाहात्म्यानाविष्कार एव विद्यान्वययोग्यतयोपादेयः; इतरस्य कामचारादेः * नाविरतो दुश्चरितात् * इत्यादिशास्त्रैर्विद्योत्पत्तिविरोधित्वावगमात्। अतो यथा बालः स्वाभिजनाद्यनाविष्कुर्वन्वर्तते; तथा विद्वान्वर्तेतेत्येतदेव युक्तम्। सूत्रमपि व्याख्यातम् ॥ ४९ ॥ इति अनाविष्काराधिकरणम् ॥ 13 ॥

४६८. **ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्**। मोक्षव्यतिरिक्ताभ्युदयफलमुपासनं किं स्वसाधनभूतपुण्यकर्मानन्तरमेवोत्पद्यते, उतानन्तरमन्यदा वेत्यनियम इति संशयः। साधननिर्वृत्तौ विलम्बहेत्वभावादनन्तरमेवेति पूर्वः पक्षः। राद्धान्तस्तु— अप्रस्तुते— प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरम्, प्रस्तुते तदुत्तरकालमित्यनियमः। दृश्यते हि प्रबलकर्मान्तरेण फलप्रतिबन्धः * यदेव विद्यया करोति तदेव वीर्यवत्तरमिति उद्गीथोपासनस्य क्रतोः कर्मान्तरेण फलाप्रतिबन्धः फलमिति, * पृथग्ध्यप्रतिबन्धः फलम् * इत्यभ्युपगमात्। सूत्रमपि व्याख्यातम्। ऐहिकम्— अभ्युदयफलमित्यर्थः ॥ ५० ॥ इति ऐहिकाधिकरणम् ॥ 14 ॥

४६९. **एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः**। किं मुक्तिफलान्युपासनानि स्वसाधनभूतातिशयितपुण्यकर्मानन्तरमुत्पद्यन्ते, उत पूर्ववदनियम इति संशयः। मुक्तिफलोपासनसाधनभूतकर्मणां सर्वकर्मभ्यो बलवत्तरत्वेन प्रतिबन्धाभावादनन्तरमेवोत्पद्यत इति पूर्वः पक्षः। तत्रापि ब्रह्मविदपचारस्य ततोऽपि बलवत्तरत्वेन प्रतिबन्धसंभवादनियम एवेति राद्धान्तः। सूत्रार्थस्तु— मुक्तिफलानामप्येवमनियमः। कुतः? तदवस्थावधृतेः— प्रतिबन्धाभावे सति फलावधृतेः। द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ ५१ ॥ इति मुक्तिफलाधिकरणम् ॥ 15 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चाध्यायः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमते रामानुजाय नमः ।

॥ अथ चतुर्थाध्याये प्रथमः पादः ॥

४७०. **आवृत्तिरसकृदुपदेशात्** । * ब्रह्मविदाप्नोति परम् * तमेवं विद्वानमृत इह भवति * इत्यादिवेदान्तविहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः, उतासकृदावृत्तमिति संशयः । सकृत्कृतमेवेति पूर्वः पक्षः, * स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति * इत्यादौ वेदनस्यैव मुक्त्युपायत्वप्रतिपादनात्, सकृत्कृतेऽपि वेदने शास्त्रार्थनिर्वृत्तेः, तस्यासकृदावृत्तौ प्रमाणाभावात् । राद्धान्तस्तु— * यस्तद्वेद यत्स वेद स मयैतदुक्तः * इत्युपक्रम्य, * अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से * इत्येकस्मिन्वाक्ये विद्युपास्योर्व्यतिकरेण प्रयोगदर्शनात्, समानार्थेषु * ब्रह्मविदाप्नोति परम् * आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः * इत्यादिषु ध्यानविद्योर्व्यतिकरदर्शनाच्च, ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं स्मृतिसन्तानरूपवेदनमेव शास्त्रार्थ इति निश्चीयते । सूत्रार्थस्तु– आवृत्तिरसकृत्— ब्रह्मप्राप्तिसाधनं वेदनमसकृदावृत्तमेव शास्त्रार्थः ; वेदनं ध्यानशब्दवाच्यमित्यर्थः । कुतः ? उपदेशात्— * ओमित्येवं ध्यायथात्मानम् * निचाय्य तं मृत्युमुखात्प्रमुच्यते * आत्मानमेव लोकमुपासीत * आत्मा वा अरे द्रष्टव्यः * इत्यादिना उपासनोपसंहारोपदेशात् । उपासनं चाविच्छिन्नस्मृतिसन्तानरूपमिति पूर्वमेवोक्तम् ॥ १ ॥

४७१. **लिङ्गाच्च** । लिङ्गं– स्मृतिः । स्मर्यते चायमर्थः * मां ध्यायन्त उपासते, तेषामहं समुद्धर्ता मृत्युसंसारसागरात् * ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते * तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा । तद्ध्यानं प्रथमैष्षड्भिरङ्गैर्निष्पाद्यते तथा ॥ इति ॥ २ ॥ इति आवृत्त्यधिकरणम् ॥ 1 ॥

४७२. **आत्मेति तूपगच्छन्ति ग्राहयन्ति च** । किमुपास्यं ब्रह्मोपासितुरन्यत्वेनानुसन्धेयम्, उतात्मत्वेनेति संशयः । * अधिकं तु भेदनिर्देशात् * अधिकोपदेशात् * इत्यादिषूपासितुरुपास्यस्यार्थान्तरत्वेनैवोपपादनात् यथावस्थितस्यैवोपास्यत्वाच्चान्यत्वेनोपास्यमिति पूर्वः पक्षः । राद्धान्तस्तु— * त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते * इति पूर्वे उपासितारः उपास्यमात्मत्वेनोपगच्छन्ति । अत आत्मेत्येवोपास्यम् । तानुपासितॄन्प्रत्यर्थान्तरभूतस्यापि ब्रह्मणः उपासितुरात्मत्वं ग्राहयन्ति शास्त्राणि * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः * इत्यारभ्योपासिता परमात्मनश्शरीरम्, परमात्मा चोपासितुरात्मेति प्रतिपादनेन ; तथा * सर्वं खल्विदं ब्रह्म तज्जलान् * इति, * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः.... ऐतदात्म्यमिदं सर्वम् * इति च तदायत्तस्वरूपस्थितिप्रवृत्तिताप्रतिपादनेन च । एवमुपासितुस्स्वात्मनोऽप्यात्मत्वाद्ब्रह्मणः यथावस्थितस्वात्म

Digitization by Arya Samaj Charitable Foundation, Chennai

शरीरकब्रह्मानुसन्धानेऽहमित्येवानुसन्धेयम् । यथा मनुष्योऽहमस्मीति स्वशरीरस्य स्वप्रकारतैकस्वभावतया प्रकारिणि स्वात्मनि पर्यवसानम्; तथा स्वात्मनोऽहंप्रत्ययोऽहंशब्दश्च न केवलस्वात्मविषयौ, परमात्मशरीरतया तद्विशेषणत्वेनैव स्वात्मनोऽवस्थानात् । सूत्रमपि व्याख्यातम् ॥ ३ ॥ इति आत्मत्वोपासनाधिकरणम् ॥ 2 ॥

४७३, ४७४. **न प्रतीके न हि सः। ब्रह्मदृष्टिरुत्कर्षात्।** * मनो ब्रह्मेत्युपासीत * इत्यादिषु प्रतीकोपासनेष्वप्यात्मत्वेनानुसन्धानं कर्तव्यम्, उत नेति संशयः। * मनो ब्रह्मेत्युपासीतेति ब्रह्मोपासनत्वविशेषादात्मेत्येवानुसन्धानमिति पूर्वः पक्षः। राद्धान्तस्तु— न प्रतीके आत्मत्वानुसन्धानं कार्यम्; कुतः? न हि मन आदिरुपासितुरात्मा; न च तत्र ब्रह्मोपास्यम्; ब्रह्मदृष्ट्या मन आदिरुपास्यः; अपकृष्टे उत्कृष्टदृष्टिरभ्युदयाय भवति; यथा भृत्यादौ राजदृष्टिः। सूत्रद्वयं च व्याख्यातम् ॥ ४, ५ ॥ इति प्रतीकाधिकरणम् ॥ 3 ॥

४७५. **आदित्यादिमतयश्चाङ्ग उपपत्तेः।** * य एवासौ तपति तमुद्गीथमुपासीत * इत्यादिषु कर्माङ्गाश्रयोपासनेषु किमुद्गीथादावादित्यादिदृष्टिः कार्या, उतादित्यादावुद्गीथादिदृष्टिरिति संशयः। कर्मणः फलसाधनतयोत्कर्षात् आदित्यादेर्देवतात्वेन तद्गुणत्वाच्चादित्यादावुद्गीथादिदृष्टिः कार्येति पूर्वः पक्षः। राद्धान्तस्तु— कर्मणोऽपि फलसाधनत्वमादित्यादिदेवताराधनद्वारेणेति आदित्यादेरेवोत्कर्षोपपत्तेः आदित्यादिमतय एव कर्माङ्गोद्गीथादौ कार्याः। सूत्रं च व्याख्यातम् ॥ ६ ॥ इति आदित्यादिमत्यधिकरणम् ॥ 4 ॥

४७६. **आसीनस्संभवात्।** किमिदं ब्रह्मोपासनमासीनः कुर्यात्, उतासीनश्शयानस्तिष्ठन्गच्छन्वेत्यनियमः? इति संशयः। विशेषाश्रवणादनियम इति पूर्वः पक्षः। राद्धान्तस्तु— आसीनस्यैवैकाग्रतासंभवात्, एकाग्रतामूलत्वाच्चोपासनस्य, आसीनः कुर्यात्। सूत्रमपि व्याख्यातम् ॥ ७ ॥

४७७. **ध्यानाच्च।** * निदिध्यासितव्यः * इत्युपासनस्य ध्यानरूपत्वाच्चैकाग्रचित्तताऽवश्यंभाविनी। ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितं तैलधारावदविच्छिन्नस्मृतिसन्ततिरूपम् ॥ ८ ॥

४७८. **अचलत्वं चापेक्ष्य।** निश्चलत्वं चापेक्ष्य ध्यानवाचोयुक्तिः पृथिव्यादिषु दृश्यते * ध्यायतीव पृथिवी, ध्यायतीवान्तरिक्षं, ध्यायतीव द्यौः * इत्यादिका। अतो ध्यायतः पृथिव्यादिवदचलत्वमासीनस्यैव संभवति ॥ ९ ॥

४७९. **स्मरन्ति च।** स्मरन्ति चासीनस्यैव ध्यानम् * उपविश्याऽऽसने युञ्ज्याद्योगमात्मविशुद्धये * इति ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४८०. **यत्रैकाग्रता तत्राविशेषात्।** यस्मिन्देशे यस्मिंश्च काले मनस एकाग्रता; तत्र देशे काले चोपासनं कार्यम्; * शर्करादिरहिते मनोनुकूले शुचौ देशे * इत्येतदतिरिक्तविशेषाग्रहणात्। यथा देशकालयोरेकाग्रतायामविशेषः, न तथा स्थितिगत्यादौ; आसीनस्य तु विशेषोऽस्तीत्यभिप्रायः ॥ ११ ॥ इति आसीनाधिकरणम् ॥ 5 ॥

४८१. **आप्रयाणात्तत्रापि हि दृष्टम्।** तदिदमपवर्गसाधनमुपासनमेकस्मिन्नहनि कार्यम्, उत प्रत्यहमाप्रयाणादनुवर्तनीयमिति संशयः। एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयम्। * यावदायुषम् * इति तु वचनं विधिशब्दस्याभावाद्विद्यायाः फलेनोपसंहारपरमिति पूर्वः पक्षः। राद्धान्तस्तु— आ-प्रयाणात् अनुवर्तनीयम्; कुतः? तत्रापि हि दृष्टं * स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते * इति। अप्राप्तत्वेनानुवादत्वासंभवाद्विधिरेवायमिति ॥ १२ ॥ इति आप्रयाणाधिकरणम् ॥ 6 ॥

४८२. **तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्।** विदुष उत्तरपूर्वाघयोरश्लेषविनाशौ किं संभवतः, उत नेति संशयः। * नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि * इति भोगादेव कर्मक्षयश्रवणादश्लेषविनाशश्रुतिः कथञ्चिद्विद्यास्तुत्यर्थतया नेयेति पूर्वः पक्षः। राद्धान्तस्तु— द्वयोश्शास्त्रयोर्भिन्नविषयत्वेन विरोधाभावात्संभवत एव; कर्मणां फलजननसामर्थ्यं द्रढयति * नाभुक्तं क्षीयते * इति; * एवमेवंविदि पापं कर्म न श्लिष्यते * एवं हास्य सर्वे पाप्मानः प्रदूयन्ते * इति च श्रुतिर्विद्यायास्तत्सामर्थ्यनिवारणशक्तिविषयेति यथा अप्तेजसोश्शीतजननतन्निवारणशक्तिविषये प्रमाणे न विरुध्येते इति। सूत्रमपि व्याख्यातम् ॥ १३ ॥ इति तदधिगमाधिकरणम् ॥ 7 ॥

४८३. **इतरस्याप्येवमसंश्लेषः पाते तु।** किमसंश्लेषविनाशौ पुण्यकर्मणोऽपि समानौ, उत नेति संशयः। पुण्यकर्मफलस्य सुखरूपत्वेन विदुषोऽनिष्टत्वाभावान्न समानाविति पूर्वः पक्षः। राद्धान्तस्तु— मुमुक्षोर्मोक्षविरोधित्वेनानिष्टत्वसाम्यादश्लेषविनाशौ समानावेव। सूत्रार्थस्तु— इतरस्य— पुण्यस्याप्यनिष्टफलत्वसाम्यादेवम्— अश्लेषविनाशौ; विद्यानुगुणस्य तु वृष्ट्यन्नारोग्यादिफलस्य शरीरपातादूर्ध्वमनिष्टत्वादश्लेषः ॥ १४ ॥ इति इतराधिकरणम् ॥ 8 ॥

४८४. **अनारब्धकार्ये एव तु पूर्वे तदवधेः।** विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोरविशेषेण विनाशः, उतानारब्धकार्ययोरेवेति संशयः। * सर्वे पाप्मानः प्रदूयन्ते * इति विशेषाभावादविशेषेणेति पूर्वः पक्षः। राद्धान्तस्तु— * तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये * इत्युत्पन्नविद्यस्यापि शरीरमोक्षावधित्वश्रुतेः, सर्वविनाशे शरीरस्थित्यनुपपत्तेश्चानारब्धकार्ययोरेव विनाशः। सूत्रं च व्याख्यातम् ॥ १५ ॥ इति अनारब्धकार्याधिकरणम् ॥ 9 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

४८५. **अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्।** अग्निहोत्राद्याश्रमधर्मः किं विदुषोऽनुष्ठेयः, उत नेति संशयः। सुकृतदुष्कृतयोरश्लेषविनाशाभिधानादाश्रमधर्मस्यापि सुकृतत्वसाम्येन कार्याश्लेषादननुष्ठेय इति पूर्वः पक्षः। राद्धान्तस्तु— आश्रमधर्मस्य तु विद्योत्पत्तिरेव कार्यमिति तत्कार्यायैवानुष्ठेयः। दृश्यते हि— * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिना विद्योत्पत्तिकार्यत्वम्। विद्या चाप्रयाणादहरहरभ्यासाधेयातिशयोत्पाद्यैव। सूत्रं च व्याख्यातम्॥ १६॥

यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था; पूर्वकृता च साधुकृत्या अनुभूतफला प्रारब्धफला च; * सुहृदस्साधुकृत्यामित्यस्य विषयः क इत्याशङ्क्याह—

४८६. **अतोऽन्यापि ह्येकेषामुभयोः।** अतः— अग्निहोत्रादिसाधुकृत्यायाः अन्याऽपि विद्याधिगमात् पूर्वोत्तरयोः पुण्यकर्मणोरुभयोश्च कारीर्यादिका वृष्ट्यन्नाद्यर्थतया विदुषाऽनुष्ठिता, विद्योत्पत्तेः पूर्वं कृताऽनादिकालप्रवृत्ता च प्रबलकर्मान्तरप्रतिबद्धफला, साधुकृत्याऽस्ति हि। अत एकेषां शाखिनां * सुहृदस्साधुकृत्यामिति वचनं तद्विषयम्; विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया॥ १७॥

अनुष्ठितस्य कर्मणः प्रबलकर्मप्रतिबन्धसंभवं पूर्वोक्तं स्मारयति—

४८७. **यदेव विद्ययेति हि।** उक्तं ह्युद्गीथविद्यायाः क्रतोः कर्मान्तरप्रतिबन्धाभावः फलमिति; अतः प्रतिबद्धफलसाधुकृत्यस्यैव सुहृत्संक्रमणम्॥ १८॥ इति अग्निहोत्राद्यधिकरणम्॥ 10॥

४८८ **भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते।** इतरे— आरब्धकार्ये पुण्यपापे, किं विद्यायोनिशरीरावसान एव विनश्येते, उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशयः। * यावन्न विमोक्ष्ये अथ संपत्स्ये * इति संपत्तेश्शरीरविमोक्षविलम्बमात्रश्रुतेः तच्छरीरावसान इति पूर्वः पक्षः। राद्धान्तस्तु— प्रारब्धफलयोः कर्मणोः भोगेनैव क्षपयितव्यत्वाभिप्रायेण * यावन्न विमोक्ष्ये अथ संपत्स्ये इत्युच्यते, न शरीरमात्रम्। कर्मविषयौ हि बन्धमोक्षौ। अतः प्रारब्धफले पुण्यपापे यावता शरीरेण समापनीये, तावता क्षपयित्वा अथ संपद्यत इत्यनियम एव। सूत्रं च व्याख्यातम्॥ १९॥ इति इतरक्षपणाधिकरणम्॥ 11॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य प्रथमः पादः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ अथ चतुर्थाध्याये द्वितीयः पादः ॥

४८९. **वाङ्मनसि दर्शनाच्छब्दाच्च।** * अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे * इत्यादिकोत्क्रान्तिविषया आम्नायते। तत्र किं वागिन्द्रियं मनसि संपद्यते, उत वाग्वृत्तिमात्रमिति संशयः। वाचो मनःप्रकृतित्वाभावात् स्वरूपलयस्तत्र न संभवतीति वाग्वृत्तिमात्राभिप्रायमिति पूर्वः पक्षः। राद्धान्तस्तु— अकारणे संपत्त्यभावस्य वाग्वृत्तावपि तुल्यत्वदर्शनात् * वाङ्मनसीति वाक्स्वरूपस्यैव संपत्तिः। शब्दाच्च स्वरूपमेव संपद्यते * वाङ्मनसि संपद्यते इति वाक्स्वरूपसंपत्तावेव हि शब्दः; न वृत्तिमात्रसंपत्तौ। अकारणे लयाभावात्संपत्तिशब्दस्संयोगाभिप्रायः। सूत्रं च व्याख्यातम् ॥ १ ॥

४९०. **अत एव सर्वाण्यनु।** यतो वाचो मनसि संयोगमात्रमुच्यते: न तु लयः; अत एव तदानीं * सर्वाणीन्द्रियाणि वाचमनु मनसि संपद्यन्ते * इति वचनं * वाङ्मनसि संपद्यत इति वचनवदुपपन्नम्, * तस्मादुपशान्ततेजाः— पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः * इति ॥ २ ॥ इति वागधिकरणम् ॥ 1 ॥

४९१. **तन्मनः प्राण उत्तरात्।** * मनः प्राणे * इत्यत्र किं प्राणशब्देनाप उच्यन्ते, उत प्राण एवेति संशयः। प्राणस्य मनःप्रकृतित्वाभावात् * अन्नमयं हि सोम्य मनः * इति मनसोऽन्नमयत्वश्रवणात्, अपां चान्नप्रकृतित्वेन, तत्संपत्तिरुपपद्यत इति प्राणशब्देनाप उच्यन्त इति पूर्वः पक्षः; * आपोमयः प्राणः इति ह्यम्मयत्वात्प्राणस्य प्राणशब्देनापो वक्तुं युज्यन्ते इति। राद्धान्तस्तु— * अन्नमयं हि सोम्य मनः आपोमयः प्राणः * इति मनःप्राणयोर्न तत्तत्प्रकृतित्वमुच्यते; अपि तु तदाप्यायनम्, आहङ्कारिकत्वान्मनस, प्राणस्य चाकाशप्रकृतित्वात्। अतः वाङ्मनसीतिवत् तदुत्तरात् * मनः प्राणे * इति शब्दात्, तत्— सर्वेन्द्रियसंयुक्तं मनः प्राणे संयुज्यते ॥ ३ ॥ इति मनोधिकरणम् ॥ 2 ॥

४९२. **सोऽध्यक्षे तदुपगमादिभ्यः।** सः प्राणः किं तेजसि संयुज्यते, उत जीव इति संशयः। * प्राणस्तेजसीति वचनात्तेजस्येवेति पूर्वः पक्षः। राद्धान्तस्तु— उत्क्रान्तौ प्राणस्य जीवोपगमादिश्रुतेः प्राणः करणाध्यक्षे जीवे संयुज्यते। एतदविरोधाय जीवे संयुज्य पश्चात्तेजस्संयोगं * प्राणस्तेजसीति वदति। श्रूयन्ते हि प्राणस्य जीवोपगमादयः * एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति * तमुत्क्रामन्तं प्राणोऽनूत्क्रामति * कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि * इत्यादिषु ॥ ४ ॥ इति अध्यक्षाधिकरणम् ॥ 3 ॥

४९३, ४९४. **भूतेषु तच्छ्रुतेः। नैकस्मिन् दर्शयतो हि।** * प्राणस्तेजसीति किं तेजोमात्रे प्राणस्संयुज्यते, उत भूतान्तरसंसृष्ट इति संशयः। * तेजसीति वचनात्तेजोमात्र इति पूर्वः पक्षः। * पृथिवी-

Digitization by Arya Samaj Charitable Foundation, Chennai

मयः * इत्यादिना सञ्चरतो जीवस्य सर्वभूतमयत्वश्रुते., त्रिवृत्करणश्रुतिस्मृतिभ्याञ्च तेजस एकस्य कार्याक्षमत्वाद्भूतान्तरसंसृष्ट इति राद्धान्त.। सूत्रद्वयं व्याख्यातम् ॥ ५, ६ ॥ इति भूताधिकरणम् ॥ 4 ॥

४९५. **समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य।** इयमुत्क्रान्तिः किं विद्वदविदुषोस्समाना, उताविदुष एवेति संशयः। विदुषोऽत्रैवामृतत्वप्राप्तिश्रुतेरविदुष एवेति पूर्वः पक्षः। श्रूयते हि विदुषोऽत्रैव ब्रह्मप्राप्तिः— * यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते ॥ इति। राद्धान्तस्तु— विदुषोऽर्चिरादिकयैव ब्रह्मप्राप्तिः; अर्चिरादिगत्युपक्रमात्प्रागियमुत्क्रान्तिस्समाना। गतिश्च मूर्धन्यनाड्या * शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका, तयोर्ध्वमायन्नमृतत्वमेति * इति श्रुतेः। * यदा सर्वे प्रमुच्यन्ते * इत्यनेन गतिश्रुत्यविरोधायामृतत्वसाधनभूतोपासननिष्पत्तिरुच्यते, हृदि स्थिताः कामा यदा प्रमुच्यन्ते, तदैवोपासनारम्भान्मर्त्योऽमृतो भवतीति। अत्र— कामविमोकपूर्वकोपासने स्थितोऽर्चिरादिकया गत्या ब्रह्म समश्नुते इत्यर्थः। सूत्रार्थस्तु— सृतिः— गतिः, आगत्युपक्रमादुत्क्रान्तिर्विदुषोऽपि समाना, विदुषोऽर्चिरादिगतिश्रुतेः * अथ मर्त्योऽमृतो भवति * इत्युच्यमानममृतत्वमनुपोष्य च— अदग्ध्वैव शरीरेन्द्रियादिसंबन्धम्, उपासनारम्भपरिकररूपमित्यर्थः ॥ ७ ॥

४९६. **तदापीतेस्संसारव्यपदेशात्।** तत्— अमृतत्वम्, उक्तप्रकारमेव। कुतः? आपीतेस्संसारव्यपदेशात्— अपीतिः—ब्रह्मप्राप्तिः; अर्चिरादिकया गत्या देशविशेषं गत्वा यावद्ब्रह्म प्राप्यते; तावत्संसारः— शरीरसंबन्धो हि व्यपदिश्यते ॥ ८ ॥

गतिव्यपदेशादेव शरीरादुत्क्रान्तस्य कथं शरीरसंबन्ध इत्यत्राह—

४९७. **सूक्ष्मं प्रमाणतश्च तथोपलब्धेः।** सूक्ष्मशरीरमनुवर्तते, गतिव्यपदेशात्। न केवलं गतिव्यपदेशादेव, प्रमाणान्तरतश्च तथा— सूक्ष्मशरीरवत्त्वस्योपलब्धेश्च। विदुषोऽर्चिरादिकया गत्या गच्छतश्चन्द्रमसा संवादोऽयमुपदिश्यते * तं प्रतिब्रूयात् * सत्यं ब्रूयात् * इत्यादिना ॥ ९ ॥

४९८. **नोपमर्देनातः।** अतः— उक्ताद्धेतुकलापात्, * अथ मर्त्योऽमृतो भवतीति वचनं न देहसंबन्धोपमर्देनामृतत्वं वदति; अपि तूक्तमेवोपासनारम्भरूपं वदतीत्यर्थः ॥ १० ॥

४९९. **अस्यैव चोपपत्तेरूष्मा।** अस्य— सूक्ष्मशरीरस्य विद्यमानत्वोपपत्तेश्च न देहसंबन्धोपमर्देन। उपलभ्यते ह्युत्क्रममाणस्य विदुषः क्वचिदूष्मा सूक्ष्मदेहगुणः; नचायं स्थूलदेहगुणः, अन्यत्रानुपलब्धेः। अतो विद्वान् सूक्ष्मशरीरेणोत्क्रामति ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५००. **प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम्।** * स एतास्तेजोमात्राः * इत्यारभ्य * इति तु कामयमानः * इत्यन्तेनाविदुषः उत्क्रान्तिप्रकारं लोकान्तरगमनं पुनरावृत्तिं चाभिधाय, * अथाकामयमानः * इत्यादिना * न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति * इति विदुष उत्क्रान्तिप्रतिषेधादुक्तप्रकारो नोपपद्यत इति चेत्; तन्न, शारीरात्प्राणानामविश्लेषोऽनेनोच्यते। तस्य अकामयमानस्य विदुषश्शारीरस्य, प्राणास्स्वस्मान्नोत्क्रामन्ति। देवयानेन गमनाय सहैव तिष्ठन्ति। अयमर्थः स्पष्टो ह्येकेषां— माध्यन्दिनशाखिनां पाठे * योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति * इति ॥ १२ ॥

५०१. **स्मर्यते च।** स्मर्यते च विदुषोऽपि मूर्धन्यनाड्योत्क्रान्तिः * ऊर्ध्वमेकस्स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्। ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ इति ॥ १३ ॥ इति आसृत्युपक्रमाधिकरणम् ॥ 5 ॥

५०२. **तानि परे तथा ह्याह।** * प्राणस्तेजसीति तेजश्शब्दनिर्दिष्टानि भूतानि जीवपरिष्वक्तानि किं परस्यां देवतायां संपद्यन्ते, उत यथाकर्म यथाविद्यं च गच्छन्तीति संशयः। तदानीं सुखदुःखोपभोगाद्यभावेन परसंपत्तौ प्रयोजनाभावात् यथाकर्म यथाविद्यमिति पूर्वः पक्षः। सर्वस्य परदेवताकार्यत्वेन तदात्मकत्वात् गन्तव्यस्थानमिदं * परस्यां देवतायाम् * इत्युच्यते। राद्धान्तस्तु— तानि परे— परस्मिन्ब्रह्मणि संपद्यन्ते; * तेजः परस्यां देवतायामिति ह्याह श्रुतिः। यथाश्रुति विश्रमस्थानत्वेन कार्यं परिकल्प्यमित्यर्थः। सूत्रं च व्याख्यातम् ॥ १४ ॥ इति परसंपत्त्यधिकरणम् ॥ 6 ॥

५०३. **अविभागो वचनात्।** सेयं परमात्मनि संपत्तिः किं प्राकृतप्रलयवत्कारणापत्तिरूपा, उत मनःप्रभृतिसंपत्तिवदविश्लेषमात्रमिति संशयः। परमात्मनः कारणत्वात्, तत्संपत्तिवचनाच्च कारणापत्तिरेवेति पूर्वः पक्षः। राद्धान्तस्तु— * वाङ्मनसि संपद्यते * इति श्रुतस्यैव संपत्तिवचनस्य सर्वत्रानुषङ्गादत्रानुषक्तस्य चाभिधानवैरूप्यासंभवादत्राप्यविभागः— अविश्लेष एवोच्यते। सूत्रमपि व्याख्यातम् ॥ १५ ॥ इति अविभागाधिकरणम् ॥ 7 ॥

५०४. **तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया।** * शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ इति शताधिकया मूर्धन्यया नाड्या विदुषो गमनमिति नियमस्संभवति, नेति संशयः। नाडीनामतिसूक्ष्मत्वेन दुर्विवेचत्वान्नियमो न संभवतीति यादृच्छिकीं तया गतिमनुवदतीदं वचनमिति पूर्वः पक्षः। राद्धान्तस्तु— परमपुरुषाराधनभूतया विद्यया तदङ्गभूतगतिचिन्तनेन च प्रीतेन परमपुरुषेणानुगृहीतो जीवस्तत्प्रसादप्रकाशितद्वारस्तयैव मूर्धन्यया नाड्या गच्छतीति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु— हार्दपरमपुरुषाराधनरूपविद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च प्रीतहार्दानुगृहीतो भवति जीवः ; ततः तदोकः— जीवस्य स्थानं हृदयम् , अग्रज्वलनम्— प्रकाशिताग्रं भवति ; एवं परमपुरुषप्रकाशितद्वारः शताधिकया गच्छति ; * तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः * सर्वस्य चाहं हृदि सन्निविष्टः * इति हार्दः परमात्मा ॥ १६ ॥ इति तदोकोधिकरणम् ॥ 8 ॥

५०५. **रश्म्यनुसारी** । * अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते * इति विद्वान् रश्म्यनुसारी गच्छतीति नियमस्संभवति, नेति संशयः । निशि मृतस्य विदुषः आदित्यरश्म्यनुसारासंभवादनियम इति पूर्वः पक्षः । वचनं तु पक्षप्राप्तमनुवदति । राद्धान्तस्तु— वचनस्य पक्षप्राप्त्यनुवादित्वे * अथैतैरेवेत्यवधारणविरोधः । न च निशि रश्मयो न सन्तीति ; निश्यपि निदाघसमये ऊष्मोपलब्धेः सूक्ष्मास्सन्त्येवेति रश्म्यनुसार्येव गच्छति । हेमन्तेऽनुपलब्धिः दुर्दिन इव हिमाभिभवात् ॥ १७ ॥ इति रश्म्यनुसाराधिकरणम् ॥ 9 ॥

५०६. **निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च** । विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति, नेति संशयः । * दिवा च शुक्लपक्षश्च उत्तरायणमेव च । मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम् ॥ इति निशामरणस्य गर्हितत्वेन अधोगतिहेतुत्वान्न ब्रह्मप्राप्तिस्संभवतीति पूर्वः पक्षः । राद्धान्तस्तु— विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशश्रुतेरश्लिष्टविनष्टत्वात् , प्रारब्धस्यापि कर्मणः चरमदेहावधित्वाच्च, बन्धहेत्वभावान्निशि मृतस्यापि ब्रह्मप्राप्तिरस्त्येवेति । अविद्वद्विषया निशामरणनिन्दा ॥

सूत्रार्थस्तु— निशामरणनिन्दया निशि मृतस्य न ब्रह्मप्राप्तिरिति चेत् ; तन्न, संबन्धस्य यावद्देहभावित्वात् अनारब्धकार्यकर्मसंबन्धस्य विद्यया विनष्टत्वात् प्रारब्धकार्यकर्मसंबन्धस्यापि यावच्चरमदेहभावित्वात् बन्धहेत्वभावेन ब्रह्मप्राप्तिरस्त्येवेत्यर्थः । तदेतच्छ्रुतिश्च दर्शयति * तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये * इति ॥ १८ ॥ इति निशाधिकरणम् ॥ 10 ॥

५०७. **अतश्चायनेऽपि दक्षिणे** । दक्षिणायने मृतस्य विदुषो ब्रह्मप्राप्तिरस्ति, नेति संशयः । * अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति * इति विदुषो दक्षिणायने मृतस्य चन्द्रसायुज्यश्रवणात् , चन्द्रं प्राप्तानाम् * अथैतमेवाध्वानं पुनर्निवर्तन्ते * इति वचनाच्च, दक्षिणायनमृतस्य ब्रह्मप्राप्तिर्न संभवतीति पूर्वः पक्षः । राद्धान्तस्तु— पूर्वोक्ताद्बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि पुनरावृत्तिर्न संभवति । चन्द्रसायुज्यवचनं विदुषो ब्रह्मप्रेप्सोर्विश्रमस्थानमात्रविषयम् ; आवृत्तिवचनं त्वविदुषामेव । सूत्रार्थस्तु— यतो हेतोर्निशि मृतस्यापि ब्रह्मप्राप्तिः, तत एव बन्धहेत्वभावाद्दक्षिणायने मृतस्यापि ब्रह्मप्राप्तिरस्त्येव ॥ १९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

* यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः * इति मरणकालविशेषः स्मर्यत इति चेत्, तत्राह —

५०८. **योगिनः प्रति स्मर्येते स्मार्ते चैते।** योगिनः— ब्रह्मविद्यानिष्ठान्प्रति एते— देवयानपितृयाणगती, स्मार्ते स्मर्येते, स्मार्ते— स्मृतिविषयभूते अहरहस्स्मर्तव्ये स्मर्येते इत्यर्थः, * यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः * इत्यादिना * नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ इत्यन्तेन। न मुमूर्षून् प्रति कालविशेषोपादानं स्मर्यते। आतिवाहिकगणस्य कालाभिमानिदेवताविशेषभूयस्त्वेन * यत्र काले * इत्युच्यते ॥ २० ॥ इति दक्षिणायनाधिकरणम् ॥ 11 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

॥ अथ चतुर्थाध्याये तृतीयः पादः ॥

५०९. **अर्चिरादिना तत्प्रथितेः।** किं विद्वानर्चिरादिनैकेन मार्गेण गच्छति, उत तेन वाऽन्येन वेत्यनियम इति संशयः। तदर्थं परीक्ष्यते— किं सर्वासु श्रुतिष्वर्चिरादिरेक एव मार्ग आम्नायते, उत तत्रतत्रान्य इति। यदाऽर्चिरादिरेक एव सर्वत्रोक्तः: तदा तेनैव गच्छति। यदा तत्रतत्राम्नाता अन्ये, तदाऽन्यैर्वाऽनेन वेत्यनियम इति। छान्दोग्यवाजसनेयकादिषु नानाविधाः गतिप्रकाराश्श्रूयन्ते। छान्दोग्ये * यथा पुष्करपलाश आपो न श्लिष्यन्ते * इत्युपक्रम्य, * सर्वाणि....नयति * सर्वेषु लोकेषु भाति य एवं वेद * अथ यदुचैवास्मिञ्छव्यं कुर्वन्ति यदुच नार्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्य एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते * इति। बृहदारण्यके * य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमित्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतात्पुरुषोऽमानवस्स एत्य ब्रह्मलोकान्गमयति * इति। तत्रैवान्यथा * यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुलोकमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथाऽऽडम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम् * इत्यादिषु। तेषां ब्रह्मप्राप्तौ नैरपेक्ष्यश्रवणात्तैर्वाऽर्चिरादिना वेति विकल्प इति पूर्वः पक्षः। राद्धान्तस्तु—

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वत्रार्चिराद्यन्तर्भूतादित्यादीनां दर्शनात्स एवेति प्रत्यभिज्ञानात्, अन्यत्रोक्तानामन्यत्रोपसंहाराच्च, सर्वत्रार्चिरादिरेक एव मार्ग इति तेनैव गच्छति विद्वान्। सूत्रार्थस्तु– अर्चिरादिनैव गच्छति विद्वान्। कुतः? तत्प्रथितेः; प्रथितिः— प्रसिद्धिः; सर्वत्र तत्प्रत्यभिज्ञानादित्यर्थः ॥ १ ॥ इति अर्चिराद्यधिकरणम् ॥ 1 ॥

५१०. **वायुमब्दादविशेषविशेषाभ्याम्।** * तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्नः * इत्यारभ्य * मासेभ्यस्संवत्सरं संवत्सरादादित्यम् * इति छान्दोग्ये श्रुतम्। तत्र संवत्सरादित्ययोर्मध्ये देवलोको वायुश्च श्रुतौ श्रुत्यन्तरे। द्वयोः प्रकरणयोः किं देवलोको वायुश्चार्थान्तरभूतौ, उत वायुरेक एवेति संशयः। शब्दभेदादर्थान्तरभूताविति पूर्वः पक्षः। अर्थान्तरत्वे सति * देवलोकादादित्यमिति देवलोकस्य * तेन स ऊर्ध्वमाक्रमते स आदित्यमिति वायोश्चादित्यात्पूर्वत्वेन श्रौतक्रमनिर्दिष्टत्वाद्देवलोकवायू यथेष्टक्रमेण निवेशयितव्यौ। राद्धान्तस्तु– वायुरेव देवलोकशब्देन निर्दिष्ट इति तस्मादनन्यः। देवानां लोक इति हि देवलोकः, देवानां वासस्थानमित्यविशेषेण निर्दिष्टम्। * योऽयं पवत एष एव देवानां गृहाः * इति वायोर्विशेषेण देवानां वासस्थानत्वेन श्रुतत्वादविशेषनिर्दिष्टो देवलोको वायुरेवेति निश्चीयत इति। संवत्सरादूर्ध्वं वायुर्वायोरादित्य इति क्रमश्च स्यात् ॥

सूत्रार्थस्तु– अब्दात्– संवत्सरादूर्ध्वम आदित्यात्पूर्वं वायुमेकमेव निवेशयेत्, देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायोरेकस्यैव निर्दिष्टत्वात्। देवानां वासस्थानमित्यविशेषेण हि देवलोकशब्दः वायुं देवानामावासस्थानभूतमभिदधाति; वायुशब्दस्तमेव विशेषेणेति द्वयोः प्रकरणद्वयविहितयोरेकत्वादित्यर्थः ॥ २ ॥ इति वाय्वधिकरणम् ॥ 2 ॥

५११. **तटितोऽधि वरुणस्संबन्धात्।** छान्दोग्यवाजसनेयककौषीतकीप्रभृतिष्वाम्नातस्यार्चिरादिमार्गस्यार्चिरहरापूर्यमाणपक्षोत्तरायणसंवत्सरवाय्वादित्यचन्द्रविद्युद्वरुणेन्द्रप्रजापतिरूपस्योपसंहारे वायुपर्यन्तस्य श्रुत्यादिभिः क्रमप्रकार उक्तः। वरुणेन्द्रप्रजापतीनां किं विद्युत उपरि निवेशः, उत वायोरुपरीति संशयः। * स वायुलोकं स वरुणलोकम् * इति कौषीतकीपाठक्रमेण वायोरुपरि वरुणस्य निवेशः। इन्द्रादेरपि वरुणनिवेशाय वाय्वादित्ययोः क्रमस्य बाधितत्वात्तत्रैव वरुणोपरीति पूर्वः पक्षः। राद्धान्तस्तु— विद्युतो मेघोदरवर्तित्वेन विद्युद्वरुणयोर्लोके वेदे च संबन्धावगमात्पाठक्रमादर्थक्रमस्य बलीयस्त्वेन वरुणस्य विद्युत उपरि निवेशः कार्यः। इन्द्रादेरपि वरुणनिवेशाय विद्युतो व्यवधानसहत्वदर्शनाद्वरुणोपरि निवेशः। सूत्रं च व्याख्यातम् ॥ ३ ॥ इति वरुणाधिकरणम् ॥ 3 ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५१२. **आतिवाहिकास्तल्लिङ्गात्**। किमर्चिरादयो विदुषो ब्रह्मप्रेप्सोर्मार्गचिह्नभूताः, उत गमयितार इति संशयः। 'अमुकं वृक्षममुकां नदीममुकं पर्वतपार्श्वं गत्वाऽमुकं ग्रामं गच्छ' इत्यादिदेशिकोपदेशप्रकारदर्शनान्मार्गचिह्नभूताः— इति पूर्वः पक्षः। राद्धान्तस्तु— * स एनान्ब्रह्म गमयति * इति वैद्युतपुरुषस्य गमयितृत्वदर्शनात् इतरेषां चाविशेषनिर्दिष्टानां स एव संबन्ध इति निश्चीयते। * अग्निलोकम् * इत्यादिलोकशब्दोऽपि मध्ये भोगाभावाद्गमयितृत्व एवोपपद्यते। सूत्रार्थस्तु— आतिवाहिकाः— विदुषामतिवाहे परमपुरुषेण नियुक्ताः, अर्चिराद्यभिमानिदेवताविशेषाः गमयितार इत्यर्थः; * स एनान्ब्रह्म गमयतीति लिङ्गात् ॥ ४ ॥

५१३. **वैद्युतेनैव ततस्तच्छ्रुतेः**। ततः— विद्युत उपरि, वैद्युतेन विदुषो गमनम्, तच्छ्रुतेः— * स एनान्ब्रह्म गमयतीति तस्यैव श्रुतेः। वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वमिति निश्चीयत इत्यर्थः ॥ ५ ॥ इति आतिवाहिकाधिकरणम् ॥ ४ ॥

५१४. **कार्यं बादरिरस्य गत्युपपत्तेः**। किमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयति उत परं ब्रह्मोपासीनान्, अथ परं ब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति संशयः। कार्यं— हिरण्यगर्भमुपासीनानिति पूर्वः पक्षः; तेषामेव गत्युपपत्तेः। न हि परिपूर्णं सर्वगतं परं ब्रह्मोपासीनानां तत्प्राप्तये गतिरुपपद्यते, नित्यप्राप्तत्वात्। अविद्यानिवृत्तिरेव हि कार्या। परमेवोपासीनानित्यपरः पक्षः, * स एनान्ब्रह्म गमयतीति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात्। अविद्यानिवृत्तेः फलाभिसन्धिरहितयज्ञाद्यपेक्षावत् श्रवणाद्यपेक्षावच्च गतिश्रुत्या देशविशेषापेक्षा च विद्यत इति निश्चीयते। राद्धान्तस्तु— परमुपासीनानन्यानपि नयति, * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति * इति पञ्चाग्निविदां परं ब्रह्मोपासीनानां चार्चिरादिगतिश्रुतेः। पञ्चाग्निविदो हि प्रकृतिविमुक्तब्रह्मात्मकात्मस्वरूपविदः। ते च तत्प्राप्य पुनर्न निवर्तन्ते। परं ब्रह्मोपासीनास्तु यथावस्थितं परिपूर्णं परं ब्रह्मैव प्राप्य पुनर्न निवर्तन्ते। * तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति * इत्युभयविधान्मेदेनोपादायार्चिरादिगतिश्रुतेरपुनरावृत्तिश्रुतेश्चैवमिति निश्चीयते ॥

सूत्रार्थस्तु— कार्यं— हिरण्यगर्भमुपासीनमातिवाहिको गणो नयतीति बादरिराचार्यो मन्यते, अस्यैव गत्युपपत्तेः; परमुपासीनस्य हि न तत्प्राप्तये गतिरुपपद्यते, सर्वगतत्वात्परस्य ब्रह्मणः ॥ ६ ॥

५१५. **विशेषितत्वाच्च**। * पुरुषोमानव एत्य ब्रह्मलोकान्गमयति * इति * प्रजापतेस्सभां वेश्म प्रपद्ये * इति च प्राप्यस्थानस्य विशेषितत्वाच्च हिरण्यगर्भमुपासीनमेव नयति ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५१६. **सामीप्यात्तु तद्व्यपदेशः।** एवं निश्चिते सति * स एनान्ब्रह्म गमयतीति हिरण्यगर्भस्य ब्रह्मशब्दव्यपदेशो ब्रह्मसामीप्यात्। * यो ब्रह्माणं विदधाति पूर्वम् * इति प्रथमजत्वेन ब्रह्मसामीप्यं हि विद्यते ॥ ८ ॥

५१७. **कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्।** हिरण्यगर्भप्राप्तावप्यपुनरावृत्तिरुपपद्यते, कार्यस्य— हिरण्यगर्भलोकस्यात्यये, तदध्यक्षेण— हिरण्यगर्भेणाधिकारिकपुरुषेण विदुषा सह परप्राप्त्यभिधानात् * ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे * इति ॥ ९ ॥

५१८. **स्मृतेश्च।** * ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥ इति स्मृतेश्चावगम्यते ॥ १० ॥

५१९. **परं जैमिनिर्मुख्यत्वात्।** परं ब्रह्मोपासीनमेव नयत्यातिवाहिको गण इति जैमिनिराचार्यो मन्यते, * ब्रह्म गमयतीति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात्। * ब्रह्मलोकान् * इति शब्दश्च ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयपरिग्रहस्यैव न्याय्यत्वादुपपद्यते। एवं निश्चिते सति बहुवचनं च * अदितिः पाशान् * इतिवदुपपन्नम् ॥ ११ ॥

५२०. **दर्शनाच्च।** * अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इत्यर्चिरादिना गतस्य परब्रह्मप्राप्तिं दर्शयति च ॥ १२ ॥

५२१. **न च कार्ये प्रत्यभिसन्धिः।** * प्रजापतेस्सभां वेश्म प्रपद्ये * इति प्रत्यभिसन्धिश्च न कार्ये * धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि * इत्यकृतं ब्रह्मलोकमिति तत्रैव विशेषितत्वात्, * यशोऽहं भवामि ब्राह्मणानाम् * इति सर्वात्मभावाभिसंधानाच्च ॥ १३ ॥

५२२. **अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च।** कार्यमुपासीनानेवेति नायं नियमः, परमेवोपासीनानित्ययमपि नियमो न संभवति। कुतः? उभयथा च दोषात्— कार्यमुपासीनानेवेति नियमे * अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इत्यादिकाश्श्रुतयः, * ये चेमेऽरण्ये श्रद्धा तपः * इति च प्रकुप्येयुः; परमेति नियमे * तद्य इत्थं विदुः * इति प्रकुप्येत्। तस्मादप्रतीकालम्बनान्नयतीति भगवान्बादरायणो मन्यते। प्रतीकालम्बनास्तु— अचिन्मिश्रम्, केवलमचिद्वस्तु च 'सिंहो देवदत्तः' इतिवत् ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तु य उपासते, ते; अप्रतीकालम्बनाः— तद्व्यतिरिक्ताः। सर्वज्ञं सर्वकारणं सत्यसङ्कल्पं निखिलहेयप्रत्यनीकानवधिकातिशयानन्दस्वरूपं ब्रह्मोपासते ये ये च

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रत्यगात्मनं भूतसूक्ष्मैस्संपरिष्वक्तं सर्वत्र वर्तमानं भूतसूक्ष्मव्यतिरिक्तं ज्ञानैकस्वरूपं नित्यं निर्विकारं * य आत्मनि तिष्ठन्नित्यादिनाऽवगतब्रह्मात्मभावं पञ्चाग्निविद्योदितमुपासते, तानुभयविधान्नयति, * तद्य इत्थं विदुर्ये चेमेऽरण्ये * इत्युभयविषयश्रुतेः। तत्क्रतुश्च— यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति * इत्युभयेषामेवापुनरावृत्तिस्संभवति। अचिन्मिश्रं केवलमचिद्वस्तु चोपासीनानां तत्क्रतुन्यायादेव पुनरावृत्ति-रवर्जनीया ॥ १४ ॥

५२३. **विशेषञ्च दर्शयति।** प्रतीकाद्युक्तलक्षणमचिन्मिश्रं केवलमचिद्वस्तु चोपासीनानां सर्वेषां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति श्रुतिः— * यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति * इत्यादिका। अतः * ब्रह्मणा सह ते सर्वे * इति वचनं नार्चिरादिना गतानां गतिप्रकारविषयम्; अर्चिरा-दिना गतानां देहावसानसमय एव सुकृतदुष्कृतयोर्हानाद्धिरण्यगर्भलोकावाप्तितद्वासतत्रस्थभोगानुभवहेत्वभावात्, तत्क्रतुन्यायविरोधात्, तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाच्च। * ब्रह्मणा सह ते सर्वे * इति वचनं तु पुण्य-कर्मविशेषेण हिरण्यगर्भलोकं प्राप्तानां * तदुपर्यपि बादरायणः * इति न्यायेन तत्रैव निष्पन्नविद्यानां गति-प्रकारविषयम्। * ते ब्रह्मलोके * इति तु ब्रह्मलोकशब्दस्य कर्मधारयवृत्त्या ब्रह्मविषयत्वात् ब्रह्मण्युपास्ये वर्तमानाः परान्तकाले चरमदेहावसानसमये परामृतात्— परस्माद्ब्रह्मण उपासनप्रीताद्धेतोः, परिमुच्यन्ति सर्वे सर्वस्माद्बन्धा-द्विमुच्यन्त इति * वेदान्तविज्ञानसुनिश्चितार्थाः * इति प्रकरणादवगम्यते। * तद्य इत्थं विदुरिति पञ्चाग्नि-विदां ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणात्तत्क्रतुन्यायेनाचिद्वियुक्तब्रह्मात्मकात्मकस्वरूपोपासनं विवक्षितमिति निश्चीयते। तथैव तत्र श्रुतिरपि * इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति * इति * रमणीयचरणाः * इति च कर्महेतुकमनुष्यादिभावोऽपामेव भूतान्तरसंसृष्टानामिति चिदचिद्विवेकं प्रतिपाद्य * तद्य इत्थं विदुः * इति भूतसूक्ष्मव्यतिरिक्तात्मस्वरूपोपासनमेव विदधाति ॥ १५ ॥ इति कार्याधिकरणम् ॥ 5 ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थाध्याये चतुर्थः पादः ॥

५२४. **संपद्याविर्भावस्स्वेन शब्दात्।** * एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योति-रुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * इति किं परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनस्स्वरूपाविर्भावः प्रतिपाद्यते, उतान्येन साध्येन रूपेण संबन्ध इति संशयः। स्वस्वरूपस्य सुषुप्त्यादौ निरानन्दत्वदर्शनात्, स्वरूपमात्रस्य नित्याविर्भूतत्वाच, साध्येन सुखैकान्तेन रूपेण संबध्यते। एवं च * अभिनिष्पद्यते इति वचनं सङ्गच्छते।

Digitization by Arya Samaj Charitable Foundation, Chennai

परं ज्योतिरुपसंपन्नस्य ह्यानन्दित्वं श्रूयते * रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति * स एको ब्रह्मण आनन्दः, श्रोत्रियस्य चाकामहतस्य * इत्यादिषु । अतस्साध्येन रूपेणेति पूर्वः पक्षः । राद्धान्तस्तु— * स्वेन रूपेणाभिनिष्पद्यते * इति विशेषणात्स्वरूपाविर्भाव एव । स्वरूपस्य चापहतपाप्मत्वादिगुणकतया प्रजापतिवाक्योदितस्य कर्मकृतदेहसंबन्धतत्कृततिरोधानस्य परज्योतिरुपसंपत्त्या सूक्ष्मदेहविनिर्मुक्तस्यासङ्कुचितज्ञानादिगुणकस्वरूपाविर्भावात् स्वयाथात्म्यानुभवपूर्वकानवधिकातिशयानन्दब्रह्मानुभवस्संपत्स्यत इति * अभिनिष्पद्यते * इति चोपपन्नतरम् । सूत्रार्थस्तु— परं ज्योतिरुपसंपद्य स्वस्वरूपाविर्भावः प्रतिपाद्यते । कुतः ? स्वेनशब्दात्— साध्यस्यापि रूपस्य स्वासाधारणत्वेन स्वेनेति विशेषणं ह्यनर्थकम् ॥ १ ॥

स्वस्वरूपमात्रस्य अहं जानामीति नित्याविर्भूतत्वेन * परं ज्योतिरुपसंपद्येत्यनर्थकमित्याशङ्क्याह—

५२५. **मुक्तः प्रतिज्ञानात्** । कर्मसंबन्धतत्कृतदेहादेर्मुक्तस्वरूपमत्र * स्वेन रूपेणाभिनिष्पद्यते इत्युच्यते । कथमिदमवगम्यते ? * एतं त्वेव ते भूयोऽनुव्याख्यास्यामि * इति कर्महेतुकदेहसंबन्धतत्कृतजागरिताद्यवस्थाविनिर्मुक्तस्वरूपस्यात्र वक्तव्यतया प्रतिज्ञानात् ॥ २ ॥

एवमपि स्वरूपमात्राविर्भावस्य पुरुषार्थत्वं न सिद्ध्यतीत्याशङ्क्याह—

५२६. **आत्मा प्रकरणात्** । देहादिविनिर्मुक्तः स्वरूपेणावस्थित आत्मा अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकः ; तस्य ह्याविर्भाव उच्यते ; कुतः ? प्रकरणात् ; * य आत्मा अपहतपाप्मा * इति प्रकृत्य हि * एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्यादिनोच्यते । अतोऽपहतपाप्मत्वादिगुणकस्वरूपस्य कर्माख्याविद्यातिरोहितस्य परंज्योतिरुपसंपद्य निवृत्ततिरोधानस्याविर्भावः प्रतिपाद्यते ॥ ३ ॥ इति संपद्याविर्भावाधिकरणम् ॥ 1 ॥

५२७. **अविभागेन दृष्टत्वात्** । किमयं मुक्तः आविर्भूतस्वरूपः प्रत्यगात्मा परं ब्रह्म स्वात्मनो विभक्तमनुभवति, उत स्वात्मनोऽप्यात्मतयाऽविभागेन * अहं ब्रह्मास्मीतीति संशयः । * निरञ्जनः परमं साम्यमुपैति * सोऽश्नुते सर्वान्कामान् सह, ब्रह्मणा विपश्चितेति * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः * इति श्रुतिस्मृतिभ्यः विभक्तमनुभवतीति पूर्वः पक्षः । राद्धान्तस्तु— * सर्वं खल्विदं ब्रह्म * ऐतदात्म्यमिदं सर्वम्.... तत्त्वमसि * इत्यादिना सामानाधिकरण्येन * यः पृथिव्यां तिष्ठन्....यस्य पृथिवी शरीरं * य आत्मनि तिष्ठन्....यस्याऽत्मा शरीरम् * इत्यादिषु सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरतया ब्रह्मप्रकारत्वात् तत्तद्वस्तुबुद्धिशब्दास्तत्पर्यन्तविषया इत्यवगम्य * आत्मेति तूपगच्छन्तीति न्यायेन स्वात्मनोऽप्यात्मतया अहं ब्रह्मास्मीत्युपासनेन यथावस्थितपरमात्मात्मकस्वात्मनो दृष्टत्वात् मुक्तः स्वात्मनोऽप्यात्मभूतं ब्रह्म अहं ब्रह्मास्मीत्यविभागेनैवानुभवति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सूत्रार्थस्तु— अहं ब्रह्मास्मीत्यविभागेनैव ब्रह्मानुभवति मुक्तः, स्वात्मनोऽप्यात्मतयोपासनेन यथावस्थितपरमात्मात्मकस्वरूपस्य दृष्टत्वात् । साधर्म्यश्रुतिस्तु परमात्मशरीरभूतस्य प्रत्यगात्मनोऽपहतपाप्मत्वादिगुणैस्तत्साधर्म्यं प्रतिपादयति । * सोऽश्नुते सर्वान्कामान् सह, ब्रह्मणा विपश्चिता इति ब्रह्मशरीरतया ब्रह्मप्रकारभूतत्वात्स्वात्मभूतेन ब्रह्मणा सह तद्गुणाननुभवतीति वदति । काम्यन्ते इति कामाः— कल्याणगुणाः, कल्याणगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः ॥ ४ ॥ इति अविभागेनदृष्टत्वाधिकरणम् ॥ 2 ॥

५२८. **ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ।** किं जीवस्य स्वाभाविकं रूपमपहतपाप्मत्वादिगुणकम्, उत चैतन्यमात्रम्, उतोभयमिति संशयः । अपहतपाप्मत्वादिगुणकमिति प्रथमः पक्षः, * य आत्माऽपहतपाप्मा * इति प्रतिपादनात् । चैतन्यमात्रमिति द्वितीयः पक्षः, * एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव * विज्ञान घन एव * इत्यवधारणात् । राद्धान्तस्तु— ज्ञानस्वरूपस्यैवापहतपाप्मत्वादिगुणकत्वप्रतिपादनादविरोधाच्चोभयं स्वरूपम् । न च * विज्ञानघन एवेत्यवधारणं गुणान्तरासहम्, यथा सैन्धवघनस्य * रसघन एवेत्यवधारणेऽपि रसाश्रयद्रव्यं रूपस्पर्शादिगुणान्तरं च सहते; * रसघन एवेत्यवधारणं तु रसवद्द्रव्यान्तरस्वभावव्यावृत्तिपरम्; द्रव्यान्तराणां हि स्वैकदेशे रसवत्त्वम्, सैन्धवघनस्य तु सर्वत्र; एवमत्रापि जडवस्तुव्यावृत्तस्वस्वभावस्य सगुणस्यात्मनः स्वप्रकाशतावधारणं * विज्ञानघन एवेति क्रियते ॥

सूत्रार्थस्तु— ब्राह्मेण अपहतपाप्मत्वादिना स्वरूपाविर्भावः । अपहतपाप्मत्वादयो दहरवाक्ये ब्रह्मगुणाश्श्रुताः । उपन्यासादिभ्यः— तेषां ब्रह्मगुणानां प्रत्यगात्मन्यपि * य आत्माऽपहतपाप्मा * इत्यादिनोपन्यासात् । आदिशब्दात् * जक्षत्क्रीडन्रममाणः * इत्यादिभ्योऽपि सत्यसङ्कल्पत्वादयोऽवगम्यन्त इति जैमिनिराचार्यो मन्यते ॥ ५ ॥

५२९. **चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ।** चैतन्यमात्रेण स्वरूपाविर्भावः, * विज्ञानघन एवेति तदात्मकत्वावधारणादित्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥

५३०. **एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ।** एवं—विज्ञानस्वरूपस्यैव, स्वप्रकाशस्वरूपस्यैव पूर्वेषाम्— अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तानामपि * य आत्माऽपहतपाप्मा * इत्युपन्यासात्स द्भावावगमादुभयोस्स्वरूपयोरविरोधं भगवान्बादरायणो मन्यते । उभयश्रुत्यवगतस्येतरेतरविरोधाभावान्नान्यतरबाधे प्रमाणमस्तीत्यभिप्रायः ॥ ७ ॥ इति ब्राह्माधिकरणम् ॥ 3 ॥

५३१. **संकल्पादेव तच्छ्रुतेः ।** * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणस्स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा इत्यादिराम्नायते । किमेते

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञात्यादयो मुक्तस्य सङ्कल्पादेव भवन्ति, उत प्रयत्नान्तरसव्यपेक्षात्सङ्कल्पादिति संशयः। लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवह्रियमाणानामपि कार्ये प्रयत्नान्तरसापेक्षत्वदर्शनान्मुक्तस्यापि तथैव सापेक्षत्वादिति पूर्वः पक्षः, * सङ्कल्पादेवेत्यवधारणं * विज्ञानघन एवेतिवद्भविष्यति। राद्धान्तस्तु— * सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्तीत्यवधारणान्नान्यापेक्षत्वम्। न चेह सत्यकामत्वाद्युपन्यासवत् मुक्तस्यान्यापेक्षत्वे प्रमाणमस्ति। लोके सत्यसङ्कल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वम्; न हि परमपुरुषव्यतिरिक्तः कश्चित्सत्यसङ्कल्पोऽस्ति। मुक्तश्च तत्प्रसादात्तत्साम्यमुपगतस्तथैव। सूत्रमपि व्याख्यातम् ॥ ८ ॥

५३२. **अत एव चानन्याधिपतिः।** अतः— श्रुतेरेव मुक्तोऽनन्याधिपतिश्च। अन्याधिपतित्वं— कर्माधीनत्वम्। * अपहतपाप्मा.... सत्यसङ्कल्पः * इति श्रूयते; अतोऽनन्याधिपतिः ॥ ९ ॥ इति सङ्कल्पाधिकरणम् ॥ 4 ॥

५३३. **अभावं बादरिराह ह्येवम्।** किं मुक्तस्य शरीरेन्द्रियाद्यस्ति, उत न, अथ यथासङ्कल्पमस्ति च नेति संशयः। * नह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः * इति मुक्तस्याशरीरत्वश्रवणान्नास्त्येवेत्येकः पक्षः। * स एकधा भवति त्रिधा भवति * इति सशरीरत्वश्रुतेः अशरीरत्वश्रुतिः कर्मगृहीतशरीरविषयेति शरीरेन्द्रियाद्यस्त्येवेति द्वितीयः पक्षः। राद्धान्तस्तु— * मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके * इत्यशरीरस्यैव भोगश्रुतेः * स एकधा भवति त्रिधा भवति * इति श्रुतेश्च यथासङ्कल्पमस्ति च न चेति। सूत्रार्थस्तु— शरीराभावं बादरिर्मेने; एवमाह हि श्रुतिः * अशरीरं वाव सन्तम् * इति ॥ १० ॥

५३४. **भावं जैमिनिर्विकल्पामननात्।** शरीरादिभावं जैमिनिर्मेने; कुतः? विकल्पामननात्— विविधः कल्पः— विकल्पः; * स एकधा भवति त्रिधा भवतीत्यादिना मुक्तस्य हि विविधकल्पनमाम्नायते; आत्मन एकरूपस्याच्छेद्यस्य वैविध्यासंभवाच्छरीरद्वारेणैव हि विज्ञायते वैविध्यम् ॥ ११ ॥

५३५. **द्वादशाहवदुभयविधं बादरायणोऽतः।** अतः— उभयश्रुतेरिच्छातः, उभयविधम्, शरीरवत्त्वमशरीरत्वं च भगवान्बादरायणो मेने; द्वादशाहवत्— यथा द्वादशाह उभयश्रुतेस्सत्रमहीनं च: * द्वादशाहमृद्धिकामा उपेयुः * इति सत्रं भवति, * द्वादशाहेन प्रजाकामं याजयेत् * इत्यहीनम् ॥ १२ ॥

५३६. **तन्वभावे सन्ध्यवदुपपत्तेः।** स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेस्सत्यसङ्कल्पोऽपि स्वयं न सृजति, सन्ध्यवत्— यथा स्वप्ने * अथ रथान् * इत्यारभ्य * स हि कर्ता * इति, * य एष सुप्तेषु * इत्यारभ्य * तदु नात्येति कश्चन * इति चेश्वरसृष्टैरुपकरणैर्जीवो भुङ्क्ते; तथा मुक्तोऽपि लीलाप्रवृत्तेश्वरसृष्टैः पितृलोकादिभिर्लीलारसं भुङ्क्ते ॥ १३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

५३७. **भावे जाग्रद्वत्।** स्वसङ्कल्पसृष्टतनुप्रभृत्युपकरणसद्भावे जाग्रत्पुरुषभोगवन्मुक्तो लीलारसं भुङ्क्ते, परमपुरुषोऽपि दशरथवसुदेवादिपितृलोकादिकमात्मनस्सृष्ट्वा तैर्मनुष्यधर्मलीलारसं भुङ्क्ते ; तथा मुक्तश्च सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृष्ट्वा तैर्लीलारसमनुभवति ॥ १४ ॥

नन्वात्माऽणुपरिमाण इत्युक्तम् ; कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसंभव इत्यत्राह—

५३८. **प्रदीपवदावेशस्तथा हि दर्शयति।** यथा प्रदीपस्यैकस्यैकदेशवर्तिनस्स्वया प्रभयाऽनेकदेशप्रवेशः ; तद्वदात्मनोऽप्येकदेशस्थस्य स्वप्रभारूपेण ज्ञानेन सर्वदेहेषु यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिस्संभवति ; यथैकस्मिन्देहे हृदयादिदेशे वर्तमानस्याणोरपि सर्वस्मिन्देहे अहमित्यभिमानानुगुणव्याप्तिस्स्वप्रभारूपचैतन्येन, तद्वत्। तथा दर्शयति हि श्रुतिः— * वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्सविज्ञेयस्स चानन्त्याय कल्पते ॥ इति। प्रत्यगात्मनोऽणुत्वमेव स्वरूपमिति सूत्रकारमतम्, * नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् * इति परस्यैव महत्त्ववचनात् ॥ १५ ॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शयति श्रुतिः * प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् * इति; तत्कथं मुक्तस्य ज्ञानानन्त्यमुच्यत इत्यत्राह—

५३९. **स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि।** नेदं मुक्तविषयम् ; सुषुप्तिमरणयोरन्यतरापेक्षम्। आविष्कृतं हि श्रुत्या सुषुप्तिमरणयोर्निस्संबोधत्वम्, मोक्षदशायां सर्वज्ञत्वं च। सुषुप्तौ तावत् * ना ह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति * इति। विनाशम्— अदर्शनमित्यर्थः। मरणे च * एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति * इति। विनश्यति—न पश्यतीत्यर्थः। मोक्षे तु * स वा एष दिव्येन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके * इति; * सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः * इति च ॥ १६ ॥ इति अभावाधिकरणम् ॥ 5 ॥

५४०. **जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च।** किं मुक्तस्य भोगः निखिलहेयप्रत्यनीककल्याणैकतानसकलेतरविलक्षणानवधिकातिशयानन्दमहाविभूतिरूपपरब्रह्मानुभव एव? उत जगत्सृष्ट्यादिजगन्नियमनरूपलीलाऽपीति संशयः। * निरञ्जनः परमं साम्यमुपैति * इत्यादिश्रुतेर्जगन्नियमनरूपलीलापीति पूर्वः पक्षः। राद्धान्तस्तु— * यतो वा इमानि भूतानि जायन्ते * सदेव सोम्येदमग्र आसीत् * ब्रह्म वा इदमेक एवाग्र आसीत् * आत्मा वा इदमेक एवाग्र आसीत् * एको ह वै नारायण आसीत् * इत्यादिषु परं ब्रह्म प्रकृत्यैव जगद्व्यापारश्श्रूयते। तत्रतत्र प्रकरणे न मुक्तस्य सन्निधिरप्यस्ति। अतो जगन्नियमनरूपधुरावर्जं * सोऽश्नुते सर्वान्कामान्सह, ब्रह्मणा विपश्चिता * स एको ब्रह्मण आनन्दः, श्रोत्रियस्य चाका-

Digitization by Arya Samaj Charitable Foundation, Chennai

महतस्य * इत्यनवधिकातिशयानन्दब्रह्मानुभवे मुक्तस्य साम्यम्। ब्रह्म हि स्वस्य परस्य चानुभूयमानमविशेषेणानवधिकातिशयानन्दं भवति, आनन्दस्वरूपत्वाविशेषात्। सूत्रमपि व्याख्यातम् ॥ १७ ॥

५४१. **प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः।** प्रत्यक्षं–श्रुतिः ; * तस्य सर्वेषु लोकेषु कामचारो भवति * इमांल्लोकान्कामान्नी कामरूप्यनुसञ्चरन् * इत्यादिश्रुत्या मुक्तस्य जगद्व्यापारोपदेशात्सोऽपीति चेत्, तन्न; आधिकारिकमण्डलस्थोक्तेः, आधिकारिकाः— परमपुरुषेण लोकनियमनाधिकारे नियुक्ताः हिरण्यगर्भादयः ; मण्डलानि– तेषां लोकाः ; तत्स्थभोगेषु मुक्तस्य यदीच्छा वर्तते, तत्रतत्र यथाकामं परमपुरुषानुग्रहेण वर्तमानस्तत्तत्स्थानभोगान्भुङ्क्ते इति तया श्रुत्योक्तेः। * कामान्नी, * कामचारो भवति * इति हि श्रूयते ; न नियुङ्क्त इति ॥ १८ ॥

उत्पत्त्यादिविकारवर्ती हेयमिश्रोऽत्यल्पश्च कथं मुक्तस्य भोगो भवति, यदिच्छातस्सर्वेषु लोकेषु कामचार उच्यत इत्यत्राह—

५४२. **विकारावर्ति च तथाहि स्थितिमाह।** चशब्दोऽवधारणे ; उत्पत्त्यादिविकारेषु न वर्तत इति विकारावर्ति परं ब्रह्मैव। निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं निरतिशयानन्दं परब्रह्म सविभूति सकलकल्याणगुणं मुक्तस्य भोग्यम् ; तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम्। तथाहि परस्मिन्ब्रह्मणि मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिः— * यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति * रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति— ब्रह्मनिष्ठो ब्रह्मैव लब्ध्वाऽऽनन्दी भवतीत्यर्थः। ब्रह्म हि निरतिशयकल्याणानन्तगुणकमनन्तमहाविभूति च। तत्र सविभूतिकब्रह्मानुभवाय विभूत्येकदेशभूतलोकेषु सञ्चरतस्तत्रतत्र कामचारो भवतीत्युच्यते ॥ १९ ॥

५४३. **दर्शयतश्चैवं प्रत्यक्षानुमाने।** उत्पत्त्यादिजगन्नियमनं परस्यैव ; मुक्तस्य तु परब्रह्मानुभव एव भोग इत्युक्तमेवार्थं प्रत्यक्षानुमाने— श्रुतिस्मृती दर्शयतः * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः * भीषाऽस्माद्वातः पवते * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः * इत्यादिका श्रुतिः ; स्मृतिरपि * अहं सर्वस्य प्रभवः * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् * मत्तस्सर्वं प्रवर्तते * सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः * प्रशासितारं सर्वेषाम् * इत्यादिका परविषया। * अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः * इत्यादिका श्रुतिः। स्मृतिरपि * प्रियो हि ज्ञानिनोऽत्यर्थमहम् * आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् * वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः * मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणा-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ इत्यादिका मुक्तविषया ॥ २० ॥

५४४. **भोगमात्रसाम्यलिङ्गाच्च** । * सोऽश्नुते सर्वान्कामान्सह, ब्रह्मणा विपश्चिता * इति मुक्तस्य ब्रह्मानुभवभोगमात्रब्रह्मसाम्यवचनाल्लिङ्गाच्च जगद्व्यापारवर्जमिति निश्चीयते ॥ २१ ॥

यदि नियन्तृत्वं परस्यैव, एवं तर्हि स्वतन्त्रत्वेन मुक्तं परः कदाचित्पुनरावर्तयिष्यतीत्याशङ्क्याह—

५४५. **अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्** । अस्य मुक्तस्यानावृत्तिश्शब्दादवगम्यते ; यथा * यतो वा इमानि भूतानि जायन्ते * सोऽकामयत, बहु स्यां प्रजायेयेति * यः पृथिवीमन्तरो यमयति * य आत्मानमन्तरो यमयति * इति शब्दात्परमपुरुषस्य स्रष्टृत्वं नियन्तृत्वं चावगम्यते ; तथा * एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते * स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते * मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानस्संसिद्धिं परमां गताः ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इतिशब्दादेवैनं कदाचिदपि नावर्तयतीत्यवगम्यते । सूत्रावृत्तिस्तु शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥ २२ ॥ इति जगद्व्यापारवर्जाधिकरणम् ॥ ४ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चाध्यायः ॥

शास्त्रं च परिसमाप्तम् ॥

श्रीमते रामानुजाय नमः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीरस्तु ॥

॥ श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

श्रीभगवद्रामानुजग्रन्थमालायां

श्रीभगवद्गीताभाष्यम् ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

अवतारिका ।

श्रियःपतिः, निखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमितदिव्यभूषणः, स्वानुरूपासंख्येयाचिन्त्यशक्तिनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुधः, स्वाभिमतानुरूपनित्यनिरवद्यस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभः, स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणापरिमितसूरिभिरनवरताभिष्टुतचरणयुगलः, वाङ्मनसापरिच्छेद्यस्वरूपस्वभावः, स्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्याक्षरपरमव्योमनिलयः, विविधविचित्रानन्तभोग्यभोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, परं ब्रह्म, पुरुषोत्तमो नारायणः ब्रह्मादिस्थावरान्तमखिलं जगत्सृष्ट्वा स्वेन रूपेणावस्थितः, ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरः, अपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः, स्वमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेव कुर्वंस्तेषुतेषु लोकेष्ववतीर्यावतीर्य तैस्तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतारणापदेशेनास्मदादीनामपि समाश्रयणीयत्वायावतीर्योर्व्यां सकलमनुजनयनविषयतां गतः, परावरनिखिलजनमनोनयनहारिदिव्यचेष्टितानि कुर्वन्, पूतनाशकटयमलार्जुनारिष्टप्रलम्बधेनुककालियकेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसादीन्निहत्य अनवधिकदयासौहार्दानुरागगर्भावलोकनालापामृतैर्विश्वमाप्याययन्, निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेणाक्रूरमालाकारादीन् परमभागवतान् कृत्वा, पाण्डुतनययुद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगमवतारयामास ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र पाण्डवानां कुरूणां च युद्धे प्रारब्धे स भगवान् पुरुषोत्तमः सर्वेश्वरेश्वरो जगदुपकृतिमर्त्यः आश्रितवात्सल्यविवशः पार्थं रथिनमात्मानं च सारथिं सर्वलोकसाक्षिकं चकार ।

एवं ज्ञात्वाऽपि सर्वात्मनाऽन्धो धृतराष्ट्रः सुयोधनविजयबुभुत्सया सञ्जयं पप्रच्छ ॥

॥ श्रीभगवद्गीतायां प्रथमोऽध्यायः ॥

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

सञ्जय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशीराजश्च वीर्यवान् । पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम । नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७ ॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणास्सर्वे युद्धविशारदाः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

दुर्योधनः स्वयमेव भीमाभिरक्षितं पाण्डवानां बलमात्मीयं च भीष्माभिरक्षितं बलमवलोक्य, (आत्मीय) आत्मविजये तस्य बलस्य पर्याप्ततामात्मीयस्य बलस्य तद्विजये चापर्याप्ततामाचार्याय निवेद्य, अन्तर्विषण्णोऽभवत् ॥ १–११ ॥

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

तस्य विषादमालक्ष्य भीष्मस्तस्य हर्षं जनयितुं सिंहनादं शङ्खध्मानं च कृत्वा, शङ्खभेरीनिनादैश्च विजयाभिशंसिनं घोषं चाकारयत् ॥ १२, १३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ। माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥
पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः। पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः। नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्च परमेष्वासः शिखण्डी च महारथः। धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वतः पृथिवीपते। सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक् ॥ १८ ॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्। नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

ततः—तं घोषमाकर्ण्य सर्वेश्वरेश्वरः पार्थसारथी रथी च पाण्डुतनयस्त्रैलोक्यविजयोपकरणभूते महति स्यन्दने स्थितौ त्रैलोक्यं कम्पयन्तौ श्रीमत्पाञ्चजन्यदेवदत्तौ दिव्यौ शङ्खौ प्रदध्मतुः ॥

ततो युधिष्ठिरो वृकोदरादयश्च स्वकीयान् शङ्खान् पृथक् प्रदध्मुः। स घोषो दुर्योधनप्रमुखानां सर्वेषामेव भवत्पुत्राणां हृदयानि बिभेद। अद्यैव नष्टं कुरूणां बलमिति धार्तराष्ट्रा मेनिरे। एवं तद्विजयाभिकाङ्क्षिणे धृतराष्ट्राय सञ्जयोऽकथयत् ॥ १४—१९ ॥

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः। प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते।

अर्जुन उवाच—

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान्। कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२ ॥
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः। धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

अथ युयुत्सूनवस्थितान्धार्तराष्ट्रान्दृष्ट्वा लङ्कादहनवानरध्वजः पाण्डुतनयो ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधिं स्वसङ्कल्पकृतजगदुदयविभवलयलीलं हृषीकेशं परावरनिखिलजनान्तरबाह्यकरणानां सर्वप्रकारनियमनेऽवस्थितमाश्रितवात्सल्यविवशतया स्वसारथ्येऽवस्थितं युयुत्सून्यथावदवेक्षितुं तदीक्षणक्षमे स्थाने रथं स्थापयेत्यचोदयत् ॥ २०—२३ ॥

सञ्जय उवाच—

एवमुक्तो हृषीकेशो गुडाकेशेन भारत। सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतस्सर्वेषां च महीक्षिताम्। उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥

स च तेन चोदितस्तत्क्षणादेव भीष्मद्रोणादीनां सर्वेषामेव महीक्षितां पश्यतां यथाचोदितमकरोत्। ईदृशी भवदीयानां विजयस्थितिरिति चावोचत् ॥ २४—२५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान्। आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि। तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्॥ २७॥
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत्।

अर्जुन उवाच—

दृष्ट्वेमं स्वजनं कृष्ण! युयुत्सुं समुपस्थितम्॥ २८॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति। वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते। न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३०॥
निमित्तानि च पश्यामि विपरीतानि केशव। न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च। किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा॥
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च। त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः। मातुलाश्श्वशुराः पौत्राः स्यालास्संबन्धिनस्तथा॥
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन। अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५॥
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन। पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः॥ ३६॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान्। स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥ ३७॥
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः। कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥ ३८॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्। कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३९॥
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः। धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥ ४०॥
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः। स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥ ४१॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च। पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥ ४२॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः। उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥ ४३॥
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन। नरके नियतं वासो भवतीत्यनुशुश्रुम॥ ४४॥
अहो बत महत्पापं कर्तुं व्यवसिता वयम्। यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः॥ ४५॥
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः। धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥ ४६॥

सञ्जय उवाच—

एवमुक्त्वाऽर्जुनस्संख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानसः॥ ४७॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अर्जुनविषादयोगो नाम प्रथमोऽध्यायः॥

स तु पार्थो महामनाः परमकारुणिको दीर्घबन्धुः परमधार्मिकस्सभ्रातृको भवद्भिरतिघोरैर्मारणैः जतुगृहदाहादिभिरसकृद्वञ्चितोऽपि परमपुरुषसहायेनात्मना हनिष्यमाणान् भवदीयान् विलोक्य बन्धुस्नेहेन परया

Digitization by Arya Samaj Charitable Foundation, Chennai

कृपया धर्माधर्मभयेन चातिमात्रसन्नसर्वगात्रः सर्वथाऽहं न योत्स्यामीत्युक्त्वा बन्धुविश्लेषजनितशोकसंविग्नमानसस्सशरं चापं विसृज्य रथोपस्थ उपाविशत् ॥ २६—४७॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये प्रथमोऽध्यायः ॥ १ ॥

॥ अथ द्वितीयोऽध्यायः ॥ २ ॥

सञ्जय उवाच—

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् । विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

*** क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥**

एवमुपविष्टे पार्थे कुतोऽयमस्थाने समुपस्थितः शोक इत्याक्षिप्य तमिमं विषमस्थं शोकमविद्वत्सेवितं परलोकविरोधिनमकीर्तिकरमतिक्षुद्रं हृदयदौर्बल्यकृतं परित्यज्य युद्धायोत्तिष्ठेति श्रीभगवानुवाच ॥ १-३ ॥

अर्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन । इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

गुरूनहत्वा हि महानुभावान् [श्रेयो भोक्तुं] श्रेयश्चर्तुं भैक्षमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥

पुनरपि पार्थः स्नेहकारुण्यधर्माधर्मभयाकुलो भगवदुक्तं हिततममजानन्निदमुवाच— भीष्मद्रोणादिकान् गुरून्बहुमन्तव्यान् कथमहं हनिष्यामि ? कथंतरां भोगेष्वतिमात्रसक्तान् तान् हत्वा तैर्भुज्यमानांस्तानेव भोगान् तद्रुधिरेणोपसिच्य तेष्वासनेषूपविश्य भुञ्जीय ? ॥ ४, ५ ॥

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

---

* मा क्लैब्यं गच्छ कौन्तेयेति तात्पर्यचन्द्रिकानुसारी पाठः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

सञ्जय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः । न योत्स्यामीति गोविन्दमुक्त्वा तूर्ष्णीं बभूव ह ॥ ९ ॥

एवं युद्धमारभ्य निवृत्तव्यापारान् भवतो धार्तराष्ट्राः प्रसह्य हन्युरिति चेत्; अस्तु । तद्वधलब्धविजयादधर्म्यादस्माकं धर्माधर्मावजानद्भिस्तैर्हननमेव [श्रेय] गरीय इति मे प्रतिभातीत्युक्त्वा, यन्मह्यं श्रेय इति निश्चितं तत् शरणागताय तव शिष्याय मे ब्रूहीत्यतिमात्रकृपणो भगवत्पादावुपससाद ॥ ६—९ ॥

एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं, क्षत्रियाणां युद्धं परमधर्ममप्यधर्मं मन्वानं धर्मबुभुत्सया च शरणागतं पार्थमुद्दिश्यात्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसन्धिरहितस्यात्मप्राप्त्युपायताज्ञानेन च विना अस्य मोहो न शाम्यतीति मत्वा, भगवता परमपुरुषेन अध्यात्मशास्त्रावतरणं कृतम् । तदुक्तम्—
* अस्थानस्नेहकारुण्यधर्माधर्मधियाऽऽकुलम् । पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥ इति ॥

तमुवाच हृषीकेशः प्रहसन्निव भारत । सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

[एवं] तमेवं देहात्मनोर्याथात्म्याज्ञाननिमित्तशोकाविष्टम्, देहातिरिक्तात्मज्ञाननिमित्तं च धर्मं भाषमाणम्, परस्परविरुद्धगुणान्वितम्, उभयोस्सेनयोर्युद्धायोद्युक्तयोर्मध्ये अकस्मान्निरुद्योगम्, पार्थमालोक्य परमपुरुषः प्रहसन्निवेदमुवाच— परिहासवाक्यं वदन्निव, इदम्— आत्मपरमात्मयाथात्म्यतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभक्तियोगगोचरं * न त्वेवाहं जातु नासमित्यारभ्य * अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इत्येतदन्तं वचनमुवाचेत्यर्थः ॥ १० ॥

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

अशोच्यान्प्रति अनुशोचसि । * पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः इत्यादिकान् देहात्मस्वभावप्रज्ञानिमित्तवादांश्च भाषसे । देहात्मस्वभावज्ञानवतां नात्र किंचिच्छोकनिमित्तमस्ति । गतासून् देहान् अगतासून् आत्मनश्च प्रति तयोः स्वभावयाथात्म्यविदो न शोचन्ति । अतस्त्वयि विप्रतिषिद्धमिदमुपल [क्ष्य]-भ्यते : यदेतान् हनिष्यामीत्यनुशोचनम्, यच्च देहातिरिक्तात्मज्ञानकृतं धर्माधर्मभाषणम् । अतो देहस्वभावं च न जानासि, तदतिरिक्तमात्मानं च नित्यम्; तत्प्राप्त्युपायभूतं युद्धादिकं धर्मं च । इदं च युद्धं फलाभिसन्धिरहितमात्मयाथात्म्यावाप्त्युपायभूतम् । आत्मा हि न जन्माधीनसद्भावो न मरणाधीनविनाशश्च, तस्य जन्ममरणयोरभावात् । अतः स न शोकस्थानम् । देहस्त्वचेतनः परिणामस्वभावः; तस्योत्पत्तिविनाशयोगः स्वाभाविक इति सोऽपि न शोकस्थानमित्यभिप्रायः ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रथमं तावदात्मनां स्वभावं शृणु—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

अहं सर्वेश्वरस्तावत्, अतो वर्तमानात्पूर्वस्मिन् अनादौ काले, न नासम्— अपि त्वासम्। त्वन्मुखाश्चैते ईशितव्याः क्षेत्रज्ञा न नासन्— अपि त्वासन्। अहं च यूयं च सर्वे वयम्, अतः परम्— अस्मादनन्तरे काले, न चैव न भविष्यामः— अपि तु भविष्याम एव। यथाऽहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयः, तथैव भवन्तः क्षेत्रज्ञा आत्मानोऽपि नित्या एवेति मन्तव्याः।

एवं भगवतः सर्वेश्वरात्, आत्मनां परस्परं च भेदः पारमार्थिक इति भगवतैवोक्तमिति प्रतीयते; अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये अहम्, त्वम्, इमे सर्वे, वयमिति व्यपदेशात्। औपाधिकभेदवादे हि आत्मभेदस्यातात्त्विकत्वेन तत्त्वोपदेशसमये भेदनिर्देशो न संगच्छते। भगवदुक्तात्मभेदः स्वाभाविक इति श्रुतिरप्याह— * नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् इति। नित्यानां बहूनां चेतनानां य एको नित्यश्चेतनः, [स] कामान् विदधातीत्यर्थः। अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थदृष्टेर्निर्विशेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्कार्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशादिव्यवहाराश्च न संगच्छन्ते।

अथ परमपुरुषस्याधिगताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं दग्धपटादिवन्न बन्धकमित्युच्यते— नैतदुपपद्यते; मरीचिकाजलज्ञानादिकं हि बाधितमनुवर्तमानं न जलाहरणादिप्रवृत्तिहेतुः। एवमत्राप्यद्वैतज्ञानेन बाधितं भेदज्ञानमनुवर्तमानमपि मिथ्यार्थविषयत्वनिश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भवति। न चेश्वरस्य पूर्वमज्ञस्य शास्त्राधिगततत्त्वज्ञानतया बाधितानुवृत्तिः शक्यते वक्तुम्; * यस्सर्वज्ञस्सर्ववित्, * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, * वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन॥ इति श्रुतिस्मृतिविरोधात्।

किंच परमपुरुषश्चेदानींतनगुरुपरम्परा च, अद्वितीयात्मस्वरूपनिश्चये सति अनुवर्तमानेऽपि भेदज्ञाने, स्वनिश्चयानुरूपमद्वितीयात्मज्ञानं कस्मा उपदिशतीति वक्तव्यम्। प्रतिबिम्बवत्प्रतीयमानेभ्योऽर्जुनादिभ्य इति चेत्— नैतदुपपद्यते; न ह्यनुन्मत्तः कोऽपि मणिकृपाणदर्पणादिषु प्रतीयमानेषु स्वात्मप्रतिबिम्बेषु, तेषां स्वात्मनोऽनन्यत्वं जानन् तेभ्यः कमप्यर्थमुपदिशति। बाधितानुवृत्तिरपि तैर्न शक्यते वक्तुम्; बाधकेनाद्वितीयात्मज्ञानेनात्मव्यतिरिक्तभेदज्ञानकारणस्यानादेर्विनष्टत्वात्। द्विचन्द्रज्ञानादौ तु चन्द्रैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य द्विचन्द्रज्ञानहेतोरविनष्टत्वात् बाधितानुवृत्तिर्युक्ता: अनुवर्तमानमपि प्रबलप्रमाणबाधितत्वेनाकिंचित्करम्। इह तु भेदज्ञानस्य सविषयस्य सकारणस्यापारमार्थिकत्वेन वस्तुयाथात्म्यज्ञानविनष्टत्वान्न कथञ्चिदपि बाधितानुवृत्तिः संभवति। अतः सर्वेश्वरस्येदानींतनगुरुपरंपरायाश्च तत्त्वज्ञानमस्ति चेद्भेद-

Digitization by Arya Samaj Charitable Foundation, Chennai

दर्शनतत्कार्योपदेशाद्यसंभवः। भेददर्शनमस्ति चेदज्ञानस्य तद्धेतोः स्थितत्वेनाज्ञत्वादेव सुतरामुपदेशो न संभवति॥

किंच गुरोरद्वितीयात्मविज्ञानादेव ब्रह्माज्ञानस्य सकार्यस्य विनष्टत्वात् शिष्यं प्रत्युपदेशो निष्प्रयोजनः। गुरुस्तज्ज्ञानं च कल्पितमिति चेत्; शिष्यतज्ज्ञानयोरपि कल्पितत्वात्तदप्यनिवर्तकम्। कल्पितत्वेऽपि पूर्वविरोधित्वेन निवर्तकमिति चेत्; तदाचार्यज्ञानेऽपि समानमिति तदेव निवर्त्तकं भवतीत्युपदेशानर्थक्यमेव, इति कृतमसमीचीनवादैर्निरस्तैः॥ १२॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥

एकस्मिन् देहे वर्तमानस्य देहिनः कौमारावस्थां विहाय यौवनाद्यवस्थाप्राप्तावात्मनः स्थिरत्वबुद्ध्या यथाऽऽत्मा नष्ट इति न शोचति, देहाद्देहान्तरप्राप्तावपि तथैव स्थिर आत्मेति बुद्धिमान्न [शोचति] तत्र मुह्यति। अत आत्मनां नित्यत्वादात्मानो न शोकस्थानम्। एतावदत्र कर्तव्यम्— आत्मनां नित्यानामेवानादिकर्मवश्यतया तत्तत्कर्मोचितदेहसंसृष्टानां तैरेव देहैर्बन्धनिवृत्तये शास्त्रीयं स्ववर्णोचितं युद्धादिकमनभिसंहितफलं कर्म कुर्वतामवर्जनीयतया इन्द्रियैरिन्द्रियार्थस्पर्शाश्शीतोष्णादिप्रयुक्तसुखदुःखदा भवन्ति, ते तु यावच्छास्त्रीयकर्मसमाप्ति क्षन्तव्या इति॥ १३॥

इममर्थमनन्तरमेवाह—

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥ १४॥

शब्दस्पर्शरूपरसगन्धास्साश्रयास्तन्मात्राकार्यत्वान्मात्रा इत्युच्यन्ते। श्रोत्रादिभिस्तेषां स्पर्शाश्शीतोष्णमृदुपरुषादिरूपाः सुखदुःखदा भवन्ति। शीतोष्णशब्दः प्रदर्शनार्थः। तान् धैर्येण यावद्युद्धादिशास्त्रीयकर्मसमाप्ति तितिक्षस्व। ते चागमापायित्वाद्धैर्यवतां क्षन्तुं योग्याः, अनित्याश्च ते— बन्धहेतुभूतकर्मनाशे सत्यागमापायित्वेनापि निवर्तन्त इत्यर्थः॥ १४॥

तत्क्षमा किमर्थेत्यत आह—

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥

यं पुरुषं धैर्ययुक्तमवर्जनीयदुःखं सुखवन्मन्यमानममृतत्वसाधनतया स्ववर्णोचितं युद्धादिकर्मानभिसंहितफलं कुर्वाणं तदन्तर्गताश्शस्त्रपातादिमृदुक्रूरस्पर्शा न व्यथयन्ति; स एवामृतत्वं साधयति। न त्वादृशो दुःखासहिष्णुरित्यर्थः। आत्मनां नित्यत्वादेतावदत्र कर्तव्यमित्यर्थः॥ १५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्त्वात्मनां नित्यत्वं देहानां स्वाभाविकं नाशित्वं चाशोकनिमित्तमुक्तं * गतासूनगतासूंश्च नानुशोचन्ति पण्डिता इति ; तदुपपादयितुमारभते—

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

असतो देहस्य सद्भावो न विद्यते । सतश्चात्मनो नासद्भावः । उभयोः— देहात्मनोरुपलभ्यमानयोर्यथोपलब्धि तत्त्वदर्शिभिरन्तो दृष्टः— निर्णयान्तत्वान्निरूपणस्य निर्णय इहान्तशब्देनोच्यते ; देहस्याचिद्वस्तुनोऽसत्त्वमेव स्वरूपम् ; आत्मनश्चेतनस्य सत्त्वमेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः । विनाशस्वभावो ह्यसत्त्वम् । अविनाशस्वभावश्च सत्त्वम् । यथोक्तं भगवता पराशरेण— * तस्मान्न विज्ञानमृतेऽस्ति किंचित्कचित्कदाचिद्द्विज वस्तुजातम् । * सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् । * अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते । तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम् ॥ * यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै । परिणामादिसंभूतां तद्वस्तु नृप तच्च किम् ॥ इति । अत्रापि— * अन्तवन्त इमे देहाः, (१८) * अविनाशि तु तद्विद्धि (१७) इति ह्युच्यते । तदेव सत्त्वासत्त्वव्यपदेशहेतुरिति गम्यते । अत्र तु सत्कार्यवादस्याप्रस्तुतत्वान्न तत्परोऽयं श्लोकः । देहात्मस्वभावाज्ञानमोहितस्य तन्मोहशान्तये ह्युभयोर्नाशित्वानाशित्वरूपस्वभावविवेक एव वक्तव्यः । स एव * गतासूनगतासून् इति च प्रस्तुतः । स एव च * अविनाशि तु तद्विद्धि * अन्तवन्त इमे देहाः इत्यनन्तरमुपपाद्यते । अतो यथोक्त एवार्थः ॥ १६ ॥

आत्मनस्त्वविनाशित्वं कथमवगम्यत इत्यत्राह—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥ १७ ॥

तत्— आत्मतत्त्वमविनाशीति विद्धि, येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेतनत्त्वं सर्वं ततं— व्याप्तम् । व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो विनाशानर्हस्य तद्व्यतिरिक्तो न कश्चित्पदार्थो विनाशं कर्तुमर्हति, तद्व्याप्यतया तस्मात् स्थूलत्वात् । नाशकं हि शस्त्रजलाग्निवाय्वादिकं नाश्यं व्याप्य शिथिलीकरोति मुद्गरादयोऽपि हि वेगवत्संयोगेन वायुमुत्पाद्य तद्द्वारेण नाशयन्ति । अत आत्मतत्त्वमविनाशि ॥ १७ ॥

देहानां तु विनाशित्वमेव स्वभाव इत्याह—

अन्तवन्त इमे देहा नित्यस्योक्ताश्शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

* दिह उपचये इत्युपचयरूपा इमे देहा अन्तवन्तः— विनाशस्वभावाः । उपचयात्मका हि घटादयोऽन्तवतो दृष्टाः । नित्यस्य शरीरिणः कर्मफलभोगार्थतया भूतसंघातरूपा देहाः * पुण्यः पुण्येन इत्यादिशास्त्रैरुक्ताः

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्मावसानविनाशिनः। आत्मा त्वविनाशी ; कुतः ? अप्रमेयत्वात्। न ह्यात्मा प्रमेयतयोपलभ्यते, अपि तु प्रमातृतया च। तथा च वक्ष्यते— * एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः इति। न चानेकोपचयात्मक आत्मोपलभ्यते, सर्वत्र देहे अहमिदं जानामि इति देहस्य चान्यस्य च प्रमातृतयैकरूपेणोपलब्धेः। न च देहादेरिव प्रदेशभेदे प्रमातुराकारभेद उपलभ्यते। अत एकरूपत्वेन अनुपचयात्मकत्वात् प्रमातृत्वाद्व्यापकत्वाच्च आत्मा नित्यः। देहस्तु उपचयात्मकत्वात् शरीरिणः कर्मफलभोगार्थत्वात् अनेकरूपत्वात् व्याप्यत्वाच्च विनाशी। तस्माद्देहस्य विनाशस्वभावत्वादात्मनो नित्यस्वभावत्वाच्च उभावपि न शोकस्थानमिति शस्त्रपातादिपरुषस्पर्शानवर्जनीयान् स्वगतानन्यगतांश्च धैर्येण सोढ्वा अमृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं कर्मारभस्व ॥ १८ ॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

एनम्— उक्तस्वभावमात्मानं प्रति, हन्तारं हननहेतुं कमपि यो मन्यते ; यश्चैनं केनापि हेतुना हतं मन्यते ; तावुभौ न विजानीतः, उक्तैर्हेतुभिरस्य नित्यत्वादेनमयं हननहेतुर्न हन्ति, अत एव चायमात्मा न हन्यते। हन्तिधातुरप्यात्मकर्मकः शरीरवियोगकरणवाची। * न हिंस्यात् सर्वा भूतानि, * ब्राह्मणो न हन्तव्यः इत्यादीन्यपि शास्त्राणि अविहितशरीरवियोगकरणविषयाणि ॥ १९ ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥

उक्तैरेव हेतुभिर्नित्यत्वेनापरिणामित्वादात्मनो जननमरणादयस्सर्व एवाचेतनदेहधर्मा न सन्तीत्युच्यते। तत्र जायते, म्रियते इति वर्तमानतया सर्वेषु देहेषु सर्वैरनुभूयमाने जननमरणे कदाचिदप्यात्मानं न स्पृशतः। नायं भूत्वा भविता वा न भूयः— अयं कल्पादौ भूत्वा भूयः कल्पान्ते च न न भविता। केषुचित्प्रजापतिप्रभृतिदेहेष्वागमेनोपलभ्यमानं कल्पादौ जननं कल्पान्ते च मरणमात्मानं च स्पृशतीत्यर्थः। अतस्सर्वदेहगत आत्मा अजः, अत एव नित्यः, शाश्वतः,— प्रकृतिवदविशदसततपरिणामैरपि नान्वीयते, पुराणः— पुराऽपि नवः, सर्वदा अपूर्ववदनुभाव्य इत्यर्थः। अतश्शरीरे हन्यमाने न हन्यतेऽयमात्मा ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

एवमविनाशित्वेनाजत्वेन व्ययानर्हत्वेन च नित्यमेनमात्मानं यः पुरुषो वेद, स पुरुषो देवमनुष्यतिर्यक्स्थावरशरीरावस्थितेष्वात्मसु कमप्यात्मानं कथं घातयति ? कं वा कथं हन्ति— कथं नाशयति ? कथं वा तत्प्रयोजको भवतीत्यर्थः। एतानात्मनो घातयामि हन्मीत्यनुशोचनमात्मस्वरूपयाथात्म्याज्ञानमूलमेवेत्यभिप्रायः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यद्यपि नित्यानामात्मनां शरीरविश्लेषमात्रं क्रियते; तथाऽपि रमणीयभोगसाधनेषु शरीरेषु नश्यत्सु तद्वियोगरूपं शोकनिमित्तमस्त्येवेत्यत्राह—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥

धर्मयुद्धे शरीरं त्यजतां त्यक्तशरीरादधिकतरकल्याणशरीरग्रहणं शास्त्रादवगम्यत इति जीर्णानि वासांसि विहाय नवानि कल्याणानि वासांसि गृह्णतामिव हर्षनिमित्तमेवात्रोपलभ्यते ॥ २२ ॥

पुनरपि * अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् इति पूर्वोक्तमविनाशित्वं सुखग्रहणाय व्यञ्जयन् द्रढयति—

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः। न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यस्सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

शस्त्राग्न्यम्बुवायवः छेदनदहनक्लेदनशोषणान्यात्मानं प्रति कर्तुं न शक्नुवन्ति सर्वगतत्वादात्मनस्सर्वतत्त्वव्यापनस्वभावतया सर्वेभ्यस्तत्त्वेभ्यस्सूक्ष्मत्वादस्य तैर्व्याप्त्यनर्हत्वात्; व्याप्यकर्तव्यत्वाच्च छेदनदहनक्लेदनशोषणानाम्। अत आत्मा नित्यः स्थाणुरचलोऽयं सनातनः— स्थिरस्वभावोऽप्रकम्प्यः पुरातनश्च ॥ २३, २४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

छेदनादियोग्यानि वस्तूनि यैः प्रमाणैर्व्यज्यन्ते; तैरयमात्मा न व्यज्यत इत्यव्यक्तः; अतश्छेद्यादिविसजातीयः। अचिन्त्यश्च— सर्ववस्तुविजातीयत्वेन तत्तत्स्वभावयुक्ततया चिन्तयितुमपि नार्हः; अतश्चाविकार्यः— विकारानर्हः। तस्मादुक्तलक्षणमेनमात्मानं विदित्वा तत्कृते नानुशोचितुमर्हसि ॥ २५ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथाऽपि त्वं महाबाहो! नैवं शोचितुमर्हसि ॥ २६ ॥

अथ नित्यजातं नित्यमृतं देहमेवैनमात्मानं मनुषे, न देहातिरिक्तमुक्तलक्षणम्; तथाऽप्येवमतिमात्रं न शोचितुमर्हसि, परिणामस्वभावस्य देहस्योत्पत्तिविनाशयोरवर्जनीयत्वात् ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

उत्पन्नस्य विनाशो ध्रुवः— अवर्जनीय उपलभ्यते; तथा विनष्टस्यापि जन्म अवर्जनीयम्। कथमिद-

Digitization by Arya Samaj Charitable Foundation, Chennai

मुपपद्यते— विनष्टस्योत्पत्तिरिति, सत एवोत्पत्त्युपलब्धेः, असतश्चानुपलब्धेः? उत्पत्तिविनाशादयस्सतो द्रव्यस्यावस्थाविशेषाः। तन्तुप्रभृतीनि हि द्रव्याणि सन्त्येव रचनाविशेषयुक्तानि पटादीन्युच्यन्ते। असत्कार्यवादिनाऽप्येतावदेवोपलभ्यते। न हि तत्र तन्तुसंस्थानविशेषातिरेकेण द्रव्यान्तरं प्रतीयते। कारकव्यापारनामान्तरभजनव्यवहारविशेषाणामेतावतैवोपपत्तेः न द्रव्यान्तरकल्पना युक्ता। अत उत्पत्तिविनाशादयस्सतो द्रव्यस्यावस्थाविशेषाः। उत्पत्त्याख्यामवस्थामुपयातस्य द्रव्यस्य तद्विरोध्यवस्थान्तरप्राप्तिर्विनाश इत्युच्यते। मृद्द्रव्यस्य पिण्डत्वघटत्वकपालत्वचूर्णत्वादिवत् परिणामिद्रव्यस्य परिणामपरम्परा अवर्जनीया। तत्र पूर्वावस्थस्य द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः। सैव तदवस्थस्य चोत्पत्तिः। एवमुत्पत्तिविनाशाख्यपरिणामपरम्परा परिणामिनो द्रव्यस्यापरिहार्येति न तत्र शोचितुमर्हसि॥ २७॥

सतो द्रव्यस्य पूर्वावस्थाविरोध्यवस्थान्तरप्राप्तिदर्शनेन योऽल्पीयाञ्छोकः, सोऽपि मनुष्यादिभूतेषु न संभवतीत्याह—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥ २८॥

मनुष्यादिभूतानि सन्त्येव द्रव्याण्यनुपलब्धपूर्वावस्थान्युपलब्धमनुष्यत्वादिमध्यमावस्थान्यनुपलब्धोत्तरावस्थानि स्वेषु स्वभावेषु वर्तन्त इति न तत्र परिदेवनानिमित्तमस्ति॥ २८॥

एवं शरीरात्मवादेऽपि नास्ति शोकनिमित्तमित्युक्त्वा शरीरातिरिक्त आश्चर्यस्वरूप आत्मनि द्रष्टा वक्ता श्रोता श्रवणायत्तात्मनिश्चयश्च दुर्लभ इत्याह—

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित्॥ २९॥

एवमुक्तस्वभावं स्वेतरसमस्तवस्तुविसजातीयतया आश्चर्यवदवस्थितमनन्तेषु जन्तुषु महता तपसा क्षीणपापः उपचितपुण्यः कश्चित्पश्यति। तथाविधः कश्चित्परस्मै वदति। एवं कश्चिदेव शृणोति। श्रुत्वाऽप्येनं यथावदवस्थितं तत्त्वतो न कश्चिद्वेद। चकारात् द्रष्टृवक्तृश्रोतृष्वपि तत्त्वतो दर्शनं तत्त्वतो वचनं तत्त्वतश्श्रवणं दुर्लभमित्युक्तं भवति॥ २९॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३०॥

सर्वस्य देवादिदेहिनो देहे वध्यमानेऽप्ययं देही नित्यमवध्यो मन्तव्यः। तस्मात्सर्वाणि देवादिस्थावरान्तानि भूतानि विषमाकाराण्यप्युक्तेन स्वभावेन स्वरूपतस्समानानि नित्यानि च। देहगतं तु वैषम्यमनित्यत्वं च। ततो देवादीनि सर्वाणि भूतान्युद्दिश्य न शोचितुमर्हसि; न केवलं भीष्मादीन्प्रति॥ ३०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ ३१॥

अपि चेदं प्रारब्धं युद्धं प्राणिमारणमपि अग्नीषोमीयादिवत् स्वधर्ममवेक्ष्य न विकम्पितुमर्हसि। धर्म्यात्— न्यायतः प्रवृत्ताद्युद्धादन्यन्न हि क्षत्रियस्य श्रेयो विद्यते। *शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ (१८-४३) इति हि वक्ष्यते। अग्नीषोमीयादिषु च न हिंसा पशोः, निहीनतरच्छागादिदेहपरित्यागपूर्वककल्याणतरदेहस्वर्गादिप्रापकत्वश्रुतेस्संज्ञापनस्य *न वा उ वे तन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिस्सुगेभिः। यत्र यन्ति सुकृतो नापि दुष्कृतः। तत्र त्वा देवस्सविता दधातु। इति हि श्रूयते। इह च युद्धे मृतानां कल्याणतरदेहप्राप्तिरुक्ता, *वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति इत्यादिना। अतश्चिकित्सकशल्यादिकर्म आतुरस्येवास्य रक्षणमेवाग्नीषोमीयादिषु संज्ञपनम्॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥ ३२॥

अयत्नोपनतमिदं निरतिशयसुखोपायभूतं निर्विघ्नमीदृशं युद्धं सुखिनः– पुण्यवन्तः क्षत्रिया लभन्ते॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ ३३॥

अथ क्षत्रियस्य स्वधर्मभूतमिमम्– आरब्धं संग्रामं मोहात् (-अज्ञानात्) न करिष्यसि चेत्; ततः प्रारब्धस्य धर्मस्याकरणात्स्वधर्मफलं निरतिशयसुखं विजयेन निरतिशयां च कीर्तिं हित्वा पापं निरतिशयमवाप्स्यसि॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
संभावितस्य चाकीर्तिः मरणादतिरिच्यते॥ ३४॥

न ते केवलं निरतिशयसुखकीर्तिहानिमात्रम्, पार्थो युद्धे प्रारब्धे पलायितः इत्यव्ययां— सर्वदेशकालव्यापिनीमकीर्तिं च समर्थान्यसमर्थान्यपि सर्वाणि भूतानि कथयिष्यन्ति। ततः किमिति चेत्; शौर्यवीर्यपराक्रमादिभिस्सर्वसंभावितस्य तद्विपर्ययजा ह्यकीर्तिर्मरणादतिरिच्यते; एवंविधाया अकीर्तेर्मरणमेव तव श्रेय इत्यर्थः॥ ३४॥

बन्धुस्नेहात्कारुण्याच्च युद्धान्निवृत्तस्य शूरस्य ममाकीर्तिः कथमागमिष्यतीत्यत्राह—

भयाद्रणादुपरतं मन्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥ ३५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

येषां कर्णदुर्योधनादीनां महारथानामितःपूर्वं त्वं शूरो वैरीति बहुमतो भूत्वेदानीं युद्धे समुपस्थिते निवृत्तव्यापारतया लाघवं– सुनिग्रहतां यास्यसि, ते महारथास्त्वां भयाद्युद्धादुपरतं मंस्यन्ते। शूराणां हि वैरिणां शत्रुभयादृते बन्धुस्नेहादिना युद्धादुपरतिर्नोपपद्यते ॥ ३५ ॥

किंच,

अवाच्यवादांश्च बहून् वादिष्यन्ति तवाहिताः।
निन्दतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

शूराणामस्माकं सन्निधौ कथमयं पार्थः क्षणमपि स्थातुं शक्नुयात्, अस्मत्सन्निधानादन्यत्र ह्यस्य सामर्थ्यमिति तव सामर्थ्यं निन्दन्तः शूराणामवाच्यवादांश्च बहून्वदिष्यन्ति तव शत्रवो धार्तराष्ट्राः। ततोऽधिकतरं दुःखं किं तव? एवंविधावाच्यश्रवणान्मरणमेव श्रेय इति त्वमेव मंस्यसे ॥ ३६ ॥

अतश्शूरस्यात्मना परेषां हननमात्मनो वा परैर्हननमुभयमपि श्रेयसे भवतीत्याह–

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय! युद्धाय कृतनिश्चयः ॥ ३७ ॥

धर्मयुद्धे परैर्हतश्चेत्तत एव परमनिःश्रेयसं प्राप्स्यसि; परान्वा हत्वा अकण्टकं राज्यं भोक्ष्यसे। अनभिसंहितफलस्य युद्धाख्यस्य धर्मस्य परमनिःश्रेयसोपायत्वात् तच्च परमनिःश्रेयसं प्राप्स्यसि। तस्माद्युद्धायोद्योगः परमपुरुषार्थलक्षणमोक्षसाधनमिति निश्चित्य तदर्थमुत्तिष्ठ। कुन्तीपुत्रस्य तवैतदेव युक्तमित्यभिप्रायः ॥

मुमुक्षोर्युद्धानुष्ठानप्रकारमाह–

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

एवं देहातिरिक्तमस्पृष्टसमस्तदेहस्वभावं नित्यमात्मानं ज्ञात्वा युद्धे चावर्जनीयशस्त्रपातादिनिमित्तसुखदुःखार्थलाभालाभजयपराजयेष्वविकृतबुद्धिः स्वर्गादिफलाभिसन्धिरहितः केवलकार्यबुद्ध्या युद्धमारभस्व। एवं कुर्वाणो न पापमवाप्स्यसि– पापं दुःखरूपं संसारं नावाप्स्यसि; संसारबन्धान्मोक्ष्यस इत्यर्थः ॥ ३८ ॥

एवमात्मयाथात्म्यज्ञानमुपदिश्य तत्पूर्वकं मोक्षसाधनभूतं कर्मयोगं वक्तुमारभते–

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ! कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

सङ्ख्या बुद्धिः; बुद्ध्याऽवधारणीयमात्मतत्त्वं साङ्ख्यम्। ज्ञातव्ये आत्मतत्त्वे तज्ज्ञानाय या बुद्धिरभिधेया * न त्वेवाहम् इत्यारभ्य * तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि इत्यन्तेन, सैषा तेऽभिहिता।

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः, स इह योगशब्देनोच्यते। *दूरेण ह्यवरं कर्म बुद्धियोगात् (४९) इति हि वक्ष्यते। तत्र योगे या बुद्धिर्वक्तव्या, तामिमामभिधीयमानां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ; कर्मणा बन्धः कर्मबन्धः, संसारबन्ध इत्यर्थः ॥ ३९ ॥

वक्ष्यमाणबुद्धियुक्तस्य कर्मणो माहात्म्यमाह—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

इह— कर्मयोगे नाभिक्रमनाशोऽस्ति ; अभिक्रमः— आरम्भः, नाशः— फलसाधनभावनाशः, आरब्धस्यासमाप्तस्य विच्छिन्नस्यापि न निष्फलत्वम्, आरब्धस्य विच्छेदे प्रत्यवायोऽपि न विद्यते। अस्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोऽपि महतो भयात्— संसारभयात् त्रायते। अयमर्थः *पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते (६. ४०) इत्युत्तरत्र प्रपञ्चयिष्यते। अन्यानि हि लौकिकानि वैदिकानि च साधनानि विच्छिन्नानि न फलाय भवन्ति, प्रत्यवायाय च भवन्ति ॥ ४० ॥

काम्यकर्मविषयतया बुद्धेर्मोक्षसाधनभूतकर्मविषयां बुद्धिं विशिनष्टि—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

इह— शास्त्रीये सर्वस्मिन् कर्मणि व्यवसायात्मिका बुद्धिरेका— मुमुक्षुणाऽनुष्ठेये कर्मणि बुद्धिर्व्यवसायात्मिका बुद्धिः ; व्यवसायो निश्चयः, सा हि बुद्धिरात्मयाथात्म्यनिश्चयपूर्विका। काम्यकर्मविषया तु बुद्धिरव्यवसायात्मिका। तत्र हि कामाधिकारे देहातिरिक्तात्मास्तित्वज्ञानमात्रमपेक्षितम्, नात्मस्वरूपयाथात्म्यनिश्चयः। स्वरूपयाथात्म्यानिश्चयेऽपि स्वर्गादिफलार्थित्वतत्साधनानुष्ठानतत्फलानुभवानां संभवादविरोधाच्च। सेयं व्यवसायात्मिका बुद्धिः एकफलसाधनविषयतयैका। एकस्मै मोक्षाख्यफलाय हि मुमुक्षोस्सर्वाणि कर्माणि विधीयन्ते। अतश्शास्त्रार्थस्यैकत्वात् सर्वकर्मविषया बुद्धिरेकैव। यथैकफलसाधनतया आग्नेयादीनां षण्णां सेतिकर्तव्यताकानामेकशास्त्रार्थतया तद्विषया बुद्धिरेका, तद्वदित्यर्थः। अव्यवसायिनां तु स्वर्गपुत्रपशुन्नादिफलसाधनकर्माधिकृतानां बुद्धयः फलानन्त्यादनन्ताः। तत्रापि बहुशाखाः। एकस्मै फलाय चोदितेऽपि दर्शपूर्णमासादौ कर्मणि *आयुराशास्ते इत्याद्यवगतावान्तरफलभेदेन बहुशाखत्वं च विद्यते। अतोऽव्यवसायिनां बुद्धयोऽनन्ता बहुशाखाश्च। एतदुक्तं भवति— नित्येषु नैमित्तिकेषु कर्मसु प्रधानफलान्यवान्तरफलानि च यानि श्रूयमाणानि, तानि सर्वाणि परित्यज्य मोक्षैकफलतया सर्वाणि कर्माण्येकशास्त्रार्थतयाऽनुष्ठेयानि ; काम्यानि च स्ववर्णाश्रमोचितानि तत्तत्फलानि परित्यज्य मोक्षसाधनतया नित्यनैमित्तिकैरेकीकृत्य यथाबलमनुष्ठेयानि— इति ॥ ४१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ काम्यकर्माधिकृतान्निन्दति—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्। क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥
भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम्। व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥

यामिमां पुष्पितां— पुष्पमात्रफलाम्, आपातरमणीयां वाचमविपश्चितः— अल्पज्ञाः भोगैश्वर्यगतिं प्रति वर्तमानां प्रवदन्ति, वेदवादरताः— वेदेषु ये स्वर्गादिफलवादाः तेषु सक्ताः, नान्यदस्तीति वादिनः— तत्सङ्गातिरेकेण स्वर्गादेरधिकं फलं नान्यदस्तीति वदन्तः, कामात्मानः— कामप्रवणमनसः, स्वर्गपराः— स्वर्गपरायणाः, स्वर्गादिफलावसाने पुनर्जन्मकर्माख्यफलप्रदां, क्रियाविशेषबहुलां— तत्त्वज्ञानरहिततया क्रियाविशेषप्रचुरां, भोगैश्वर्यगतिं प्रति वर्तमानां यामिमां पुष्पितां वाचं ये प्रवदन्तीति संबन्धः। तेषां भोगैश्वर्यप्रसक्तानां तया— वाचा भोगैश्वर्यविषयया अपहृतज्ञानानां यथोदितव्यवसायात्मिका बुद्धिः, समाधौ— मनसि न विधीयते,— नोत्पद्यते; समाधीयतेऽस्मिन्नात्मज्ञानमिति समाधिर्मनः। तेषां मनस्यात्मयाथात्म्यनिश्चयपूर्वकमोक्षसाधनभूतकर्मविषया बुद्धिः कदाचिदपि नोत्पद्यते इत्यर्थः। अतः काम्येषु कर्मसु मुमुक्षुणा न सङ्गः कर्तव्यः॥ ४२-४४॥

एवमत्यल्पफलानि पुनर्जन्मप्रसवानि कर्माणि मातापितृसहस्रेभ्योऽपि वत्सलतरतया आत्मोज्जीवने प्रवृत्ता वेदाः किमर्थं वदन्ति, कथं वा वेदोदितं त्याज्यतयोच्यते इत्यत आह—

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन। निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ ४५॥
यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ४६॥

त्रयो गुणास्त्रैगुण्यं सत्त्वरजस्तमांसि; सत्त्वरजस्तमःप्रचुराः पुरुषास्त्रैगुण्यशब्देनोच्यन्ते; तद्विषया वेदाः; तमःप्रचुराणां रजःप्रचुराणां सत्त्वप्रचुराणां च वत्सलतरतयैव हितमवबोधयन्ति वेदाः। यद्येषां स्वगुणानुगुण्येन स्वर्गादिसाधनमेव हितं नावबोधयन्ति, तदैते रजस्तमःप्रचुरतया सात्त्विकफलमोक्षविमुखाः स्वापेक्षितफलसाधनमजानन्तः कामप्रावण्यविवशा अनुपा(दे)येषु उपा(दे)यभ्रान्त्या प्रविष्टाः प्रनष्टा भवेयुः। अतस्त्रैगुण्यविषया वेदाः, त्वं तु निस्त्रैगुण्यो भव— इदानीं सत्त्वप्रचुरस्त्वं तदेव वर्धय; नान्योन्यसङ्कीर्णगुणत्रयप्रचुरो भव; न तत्प्राचुर्यं वर्धयेत्यर्थः। निर्द्वन्द्वः— निर्गतसकलसांसारिकस्वभावः, नित्यसत्त्वस्थः— गुणद्वयरहितनित्यप्रवृद्धसत्त्वस्थो भव। कथमिति चेत्; निर्योगक्षेमः आत्मस्वरूपतत्प्राप्त्युपायबहिर्भूतानामर्थानां योगं प्राप्तानां च क्षेमं परित्यज्य आत्मवान् भव— आत्मस्वरूपान्वेषणपरो भव। [अप्राप्तस्य प्राप्तिर्योगः, प्राप्तस्य परिरक्षणं क्षेमः।] एवं वर्तमानस्य ते रजस्तमःप्रचुरता नश्यति; सत्त्वं च वर्धते। न च वेदोदितं सर्वं सर्वस्योपादेयम्। यथा सर्वार्थपरिकल्पिते सर्वतःसंप्लुतोदके उदपाने पिपासोर्यावानर्थः— यावदेव [पानीयं] प्रयोजनम्, तावदेव तेनोपादीयते, न सर्वम्। एवं सर्वेषु च वेदेषु ब्राह्मणस्य विजानतः— वैदिकस्य मुमुक्षोः यदेव मोक्षसाधनं तदेवोपादेयम्; नान्यत्॥ ४५, ४६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अतस्सत्त्वस्थस्य मुमुक्षोरेतावदेवोपादेयमित्याह—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि॥ ४७॥

नित्ये नैमित्तिके काम्ये च केनचित् फलविशेषेण संबन्धितया श्रूयमाणे कर्मणि नित्यसत्त्वस्थस्य मुमुक्षोस्ते कर्ममात्रेऽधिकारः। तत्संबन्धितयाऽवगतेषु फलेषु न कदाचिदप्यधिकारः। सफलस्य बन्धरूपत्वात् फलरहितस्य केवलस्य मदाराधनरूपस्य मोक्षहेतुत्वाच्च। मा च कर्मफलयोर्हेतुर्भूः। त्वयाऽनुष्ठीयमानेऽपि कर्मणि नित्यसत्त्वस्थस्य मुमुक्षोस्तवाकर्तृत्वमप्यनुसन्धेयम्। फलस्यापि क्षुन्निवृत्त्यादेर्न त्वं हेतुरित्यनुसन्धेयम्। तदुभयं गुणेषु वा सर्वेश्वरे मयि वाऽनुसन्धेयमित्युत्तरत्र वक्ष्यते। एवमनुसन्धाय कर्म कुरु। अकर्मणि— अननुष्ठाने *न योत्स्यामीति यत्त्वयाऽभिहितं न तत्र ते सङ्गोऽस्तु; उक्तेन प्रकारेण युद्धादिकर्मण्येव सङ्गोऽस्त्वित्यर्थः॥ ४७॥

एतदेव स्फुटीकरोति—

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ४८॥

राज्यबन्धुप्रभृतिषु सङ्गं त्यक्त्वा युद्धादीनि कर्माणि योगस्थः कुरु— तदन्तर्भूतविजयादिसिद्ध्यसिद्ध्योस्समो भूत्वा कुरु। तदिदं सिद्ध्यसिद्ध्योस्समत्वं योगस्थ इत्यत्र योगशब्देनोच्यते। योगः— सिद्ध्यसिद्ध्योस्समत्वरूपं चित्तसमाधानम्॥ ४८॥

किमर्थमिदमसकृदुच्यत इत्यत आह—

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ ४९॥

योऽयं प्रधानफलत्यागविषयोऽवान्तरफलसिद्ध्यसिद्ध्योस्समत्वविषयश्च बुद्धियोगः, तद्युक्तात्कर्मण इतरत् कर्म दूरेणावरम्। महदिदं द्वयोरुत्कर्षापकर्षरूपं वैरूप्यम्— उक्तबुद्धियोगयुक्तं कर्म निखिलसांसारिकदुःखं विनिवर्त्य परमपुरुषार्थलक्षणं च मोक्षं प्रापयति; इतरदपरिमितदुःखरूपं संसारमिति। अतः कर्मणि क्रियमाणे उक्तायां बुद्धौ शरणमन्विच्छ; शरणं— वासस्थानम्। तस्यामेव बुद्धौ वर्तस्वेत्यर्थः। कृपणाः फलहेतवः— फलसङ्गादिना कर्म कुर्वाणाः कृपणाः— संसारिणो भवेयुः॥ ४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥ ५०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

बुद्धियोगयुक्तस्तु कर्म कुर्वाणः उभे सुकृतदुष्कृते अनादिकालसञ्चिते अनन्ते बन्धहेतुभूते जहाति। तस्मादुक्ताय बुद्धियोगाय युज्यस्व। योगः कर्मसु कौशलम्— कर्मसु क्रियमाणेष्वयं बुद्धियोगः कौशलम्— अतिसामर्थ्यम्; अतिसामर्थ्यसाध्य इत्यर्थः॥ ५०॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ ५१॥

बुद्धियोगयुक्ताः कर्मजं फलं त्यक्त्वा कर्म कुर्वन्तः, तस्मात् जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्ति। हि— प्रसिद्धं ह्येतत्सर्वासूपनिषत्स्वित्यर्थः॥ ५१॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥ ५२॥

उक्तप्रकारेण कर्मणि वर्तमानस्य तया वृत्त्या निर्धूतकल्मषस्य ते बुद्धिर्यदा मोहकलिलम्— अल्पफलसङ्गहेतुभूतं मोहरूपं कलुषं व्यतितरिष्यति, तदा अस्मत्त इतःपूर्वं त्याज्यतया श्रुतस्य फलादेरितःपश्चाच्छ्रोतव्यस्य च कृते स्वयमेव निर्वेदं गन्तासि— गमिष्यसि॥ ५२॥

* योगे त्विमां शृणु इत्यादिनोक्तस्यात्मयाथात्म्यज्ञानपूर्वकस्य बुद्धिविशेषसंस्कृतस्य कर्मानुष्ठानस्य लक्ष्यभूतं योगाख्यं फलमाह—

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ ५३॥

श्रुतिः— श्रवणम्। अस्मत्तः श्रवणेन विशेषतः प्रतिपन्ना, सकलेतरविसजातीयनित्यनिरतिशयसूक्ष्म[तत्त्व]ात्मविषया, स्वयमचला—एकरूपा, बुद्धिरसङ्गकर्मानुष्ठानेन निर्मलीकृते मनसि, यदा निश्चला स्थास्यति, तदा योगम्— आत्मावलोकनम्, अवाप्स्यसि। एतदुक्तं भवति— शास्त्रजन्यात्मज्ञानपूर्वककर्मयोगः स्थितप्रज्ञताख्यज्ञाननिष्ठामापादयति; ज्ञाननिष्ठारूपा स्थितप्रज्ञता तु योगाख्यमात्मावलोकनं साधयति— इति॥ ५३॥

एवमुक्ते पार्थोऽसङ्गकर्मानुष्ठानरूपकर्मयोगसाध्यस्थितप्रज्ञताया योगसाधनभूतायास्स्वरूपम्, स्थितप्रज्ञस्यानुष्ठानप्रकारं च पृच्छति—

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥ ५४॥

समाधिस्थस्य स्थितप्रज्ञस्य का भाषा— को वाचकश्शब्दः? तस्य स्वरूपं कीदृशमित्यर्थः। स्थितप्रज्ञः किं च भाषणादिकं करोति?॥ ५४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तिविशेषकथनेन स्वरूपमप्युक्तं भवतीति वृत्तिविशेष उच्यते—

श्रीभगवानुवाच—

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥ ५५॥

आत्मन्येवात्मना— मनसा आत्मैकावलम्बनेन तुष्टस्तेन तोषेण तद्व्यतिरिक्तान् सर्वान्मनोगतान् कामान् यदा प्रकर्षेण जहाति; तदाऽयं स्थितप्रज्ञ इत्युच्यते; ज्ञाननिष्ठाकाष्ठेयम्॥ ५५॥

अनन्तरं ज्ञाननिष्ठस्य ततोऽर्वाचीनादूरविप्रकृष्टावस्थोच्यते—

दुःखेष्वनुद्विग्नमनास्सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते॥ ५६॥

प्रियविश्लेषादिदुःखनिमित्तेषु उपस्थितेष्वनुद्विग्नमनाः— न दुःखी भवति; सुखेषु विगतस्पृहः— प्रियेषु सन्निहितेष्वपि विगतस्पृहः, वीतरागभयक्रोधः— अनागतेषु स्पृहा रागः, तद्रहितः; प्रियविश्लेषाप्रिया-गमनहेतुदर्शननिमित्तं दुःखं भयं, तद्रहितः, प्रियविश्लेषाप्रियागमनहेतुभूतचेतनान्तरगतदुःखहेतुभूतस्वमनोविकारः क्रोधः, तद्रहितः; एवंभूतो मुनिः— आत्ममननशीलः स्थितधीरित्युच्यते॥ ५६॥

ततोऽर्वाचीनदशा प्रोच्यते—

यस्सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ५७॥

यस्सर्वत्र प्रियेष्वनभिस्नेहः— उदासीनः, प्रियसंश्लेषविश्लेषरूपं शुभाशुभं प्राप्याभिनन्दनद्वेषरहितः, सोऽपि स्थितप्रज्ञः॥ ५७॥

ततोऽर्वाचीनदशामाह—

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ५८॥

यदेन्द्रियाणीन्द्रियार्थान् स्प्रष्टुमुद्युक्तानि, तदैव कूर्मोऽङ्गानीवेन्द्रियार्थेभ्यस्सर्वशः प्रतिसंहृत्य मन आत्मन्यवस्थापयति, सोऽपि स्थितप्रज्ञः। एवं चतुर्विधा ज्ञाननिष्ठा पूर्वपूर्वा उत्तरोत्तरनिष्पाद्या॥ ५८॥

इदानीं ज्ञाननिष्ठाया दुष्प्रापतां तत्प्राप्त्युपायं चाह—

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥ ५९॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इन्द्रियाणामाहारा विषयाः, निराहारस्य विषयेभ्यः प्रत्याहृतेन्द्रियस्य देहिनो विषया विनिवर्तमाना रसवर्जं विनिवर्तन्ते ; रसो रागः, विषयरागो न निवर्तत इत्यर्थः । रागोऽप्यात्मस्वरूपं विषयेभ्यः परं सुखतरं दृष्ट्वा निवर्तते ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

आत्मदर्शनेन विना विषयरागो न निवर्तते, अनिवृत्ते विषयरागे विपश्चितो यतमानस्यापि पुरुषस्येन्द्रियाणि प्रमाथीनि— बलवन्ति, मनः प्रसह्य हरन्ति । एवमिन्द्रियजय आत्मदर्शनाधीनः, आत्मदर्शनमिन्द्रियजयाधीनमिति ज्ञाननिष्ठा दुष्प्रापा ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

अस्य सर्वस्य परिजिहीर्षया विषयानुरागयुक्ततया दुर्जयानीन्द्रियाणि संयम्य चेतसश्शुभाश्रयभूते मयि मनोऽवस्थाप्य समाहित आसीत । मनसि मद्विषये सति निर्दग्धाशेषकल्मषतया निर्मलीकृतं विषयानुरागरहितं मन इन्द्रियाणि स्ववशानि करोति । ततो वश्येन्द्रियं मन आत्मदर्शनाय प्रभवति । यथोक्तम्— * यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः । तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥ इति । तदाह— वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठितेति ॥ ६१ ॥

एवं मय्यनिवेश्य मनः स्वयत्नगौरवेणेन्द्रियजये प्रवृत्तो विनष्टो भवतीत्याह—

ध्यायतो विषयान्पुंसस्सङ्गस्तेषूपजायते । सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

अनिरस्तविषयानुरागस्य हि मय्यनिवेशितमनस इन्द्रियाणि संयम्यावस्थितस्याप्यनादिपापवासनया विषयध्यानमवर्जनीयं स्यात् । ध्यायतो विषयान् पुंसः पुनरपि सङ्गोऽतिप्रवृद्धो जायते । सङ्गात्संजायते कामः । कामो नाम सङ्गस्य विपाकदशा । पुरुषो यां दशामापन्नो विषयानभुक्त्वा स्थातुं न शक्नोति स कामः ॥ कामात्क्रोधोऽभिजायते— कामे वर्तमाने, विषये चासन्निहिते, सन्निहितान् पुरुषान् प्रत्येभिरस्मदिष्टं विहतमिति क्रोधो भवति । क्रोधाद्भवति संमोहः— संमोहः कृत्याकृत्यविवेकशून्यता, यया सर्वं करोति । ततश्च प्रारब्धे इन्द्रियजयादिके प्रयत्ने स्मृतिभ्रंशो भवति । स्मृतिभ्रंशाद्बुद्धिनाशः— आत्मज्ञाने यो व्यवसायः कृतस्तस्य नाशः स्यात् ; बुद्धिनाशात्पुनरपि संसारे निमग्नो विनष्टो भवति ॥ ६२, ६३ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

उक्तेन प्रकारेण मयि सर्वेश्वरे चेतसश्शुभाश्रयभूते न्यस्तमना निर्दग्धाशेषकल्मषतया रागद्वेष-वियुक्तैरात्मवश्यैरिन्द्रियैर्विषयांश्चरन् विषयांस्तिरस्कृत्य वर्तमानो विधेयात्मा— विधेयमनाः, प्रसादमधिगच्छति— निर्मलान्तःकरणो भवतीत्यर्थः ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

अस्य पुरुषस्य मनःप्रसादे सति प्रकृतिसंसर्गप्रयुक्तसर्वदुःखानां हानिरुपजायते । प्रसन्नचेतसः आत्मावलोकनविरोधिदोषरहितमनसः तदानीमेव हि विविक्तात्मविषया बुद्धिः पर्यवतिष्ठते । अतो मनःप्रसादे सर्वदुःखानां हानिर्भवत्येव ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

मयि सन्न्यस्तमनोरहितस्य स्वयत्नेनेन्द्रियनियमने प्रवृत्तस्य कदाचिदपि विविक्तात्मविषया बुद्धिर्न सेत्स्यति । अत एव तस्य तद्भावना च न संभवति । विविक्तात्मानमभावयतो विषयस्पृहाशान्तिर्न भवति । अशान्तस्य— विषयस्पृहायुक्तस्य कुतो नित्यनिरतिशयसुखप्राप्तिः ॥ ६६ ॥

पुनरप्युक्तेन प्रकारेणेन्द्रियनियमनमकुर्वतोऽनर्थमाह—

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

इन्द्रियाणां विषयेषु चरतां— वर्तमानानां वर्तनमनु यन्मनो विधीयते— पुरुषेणानुवर्त्यते, तन्मनोऽस्य विविक्तात्मप्रवणां प्रज्ञां हरति— विषयप्रवणां करोतीत्यर्थः ; यथाऽम्भसि नीयमानां नावं प्रतिकूलो वायुः प्रसह्य हरति ॥ ६७ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

तस्मादुक्तेन प्रकारेण शुभाश्रये मयि निविष्टमनसो यस्येन्द्रियाणीन्द्रियार्थेभ्यः सर्वशो निगृहीतानि, तस्यैवात्मनि प्रज्ञा प्रतिष्ठिता भवति ॥ ६८ ॥

एवं नियतेन्द्रियस्य प्रसन्नमनसस्सिद्धिमाह—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

या आत्मविषया बुद्धिः सर्वभूतानां निशा— निशेवाप्रकाशा, तस्यामात्मविषयायां बुद्धौ इन्द्रियसयमी प्रसन्नमनाः जागर्ति— आत्मानमवलोकयन्नास्त इत्यर्थः। यस्यां— शब्दादिविषयायां बुद्धौ सर्वाणि भूतानि जाग्रति— प्रबुद्धानि भवन्ति; सा शब्दादिविषया बुद्धिरात्मानं पश्यतो मुनेर्निशेवाप्रकाशा भवति ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

यथा स्वेनैवापूर्यमाणमेकरूपं समुद्रं नादेय्य आपः प्रविशन्ति, आसामपां प्रवेशेऽप्यप्रवेशे च समुद्रो न कश्चन विशेषमापद्यते; एवं सर्वे कामाः— शब्दादयो विषयाः यं संयमिनं प्रविशन्ति— इन्द्रियगोचरतां यान्ति, स शान्तिमाप्नोति— शब्दादिष्विन्द्रियगोचरतामापन्नेष्वनापन्नेषु च स्वात्मावलोकनतृप्त्यैव यो न विकारमाप्नोति, स एव शान्तिमाप्नोतीत्यर्थः। न कामकामी— यश्शब्दादिभिर्विक्रियते, स कदाचिदपि न शान्तिमाप्नोति ॥

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१ ॥

काम्यन्त इति कामाश्शब्दादयः। यः पुमान् शब्दादीन् सर्वान्विषयान् विहाय तत्र निस्स्पृहः तत्र ममतारहितश्च, अनात्मनि देहे आत्माभिमानरहितश्चरति; स आत्मानं दृष्ट्वा शान्तिमधिगच्छति ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥

एषा नित्यात्मज्ञानपूर्विका असङ्गकर्मणि स्थितिः स्थितधीलक्षा ब्राह्मी— ब्रह्मप्रापिका, ईदृशीं कर्मणि स्थितिं प्राप्य न विमुह्यति— पुनस्संसारं नाप्नोति। अस्यां स्थित्यामन्तिमेऽपि वयसि स्थित्वा ब्रह्मनिर्वाणमृच्छति— निर्वाणमयं ब्रह्म गच्छति, सुखैकतानमात्मानमवाप्नोतीत्यर्थः ॥ ७२ ॥

एवमात्मयाथात्म्यं युद्धाख्यस्य च कर्मणस्तत्प्राप्तिसाधनतामजानतश्शरीरात्मज्ञानेन मोहितस्य तेन च मोहेन युद्धान्निवृत्तस्य मोहशान्तये नित्यात्मविषया साङ्ख्यबुद्धिः, तत्पूर्विका च असङ्गकर्मानुष्ठानरूपकर्मयोगविषया बुद्धिः स्थितप्रज्ञतायोगसाधनभूता द्वितीयेऽध्याये प्रोक्ता; तदुक्तं * नित्यात्मासङ्गकर्मेहागोचरा साङ्ख्ययोगधीः। द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये ॥ इति ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये द्वितीयोऽध्यायः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ अथ तृतीयोऽध्यायः ॥ ३ ॥

तदेवं मुमुक्षुभिः प्राप्यतया वेदान्तोदितनिरस्तनिखिलाविद्यादिदोषगन्धानवधिकातिशयासंख्येयकल्याणगुणगणपरब्रह्मपुरुषोत्तमप्राप्त्युपायभूतवेदनोपासनध्यानादिशब्दवाच्यां तदैकान्तिकात्यन्तिकभक्तिं वक्तुं तदङ्गभूतं * य आत्माऽपहतपाप्मा इत्यादिप्रजापतिवाक्योदितं प्राप्तुरात्मनो याथात्म्यदर्शनं तन्नित्यताज्ञानपूर्वकासङ्गकर्मनिष्पाद्यज्ञानयोगसाध्यमुक्तम् । प्रजापतिवाक्ये हि दहरवाक्योदितपरविद्याशेषतया प्राप्तुरात्मनस्स्वरूपदर्शनं * यस्तमात्मानमनुविद्य विजानाति, इत्युक्त्वा जागरितस्वप्नसुषुप्त्यतीतं प्रत्यगात्मस्वरूपमशरीरं प्रतिपाद्य * एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति दहरविद्याफलेनोपसंहृतम्। अन्यत्रापि * अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति, इत्येवमादिषु देवं मत्वेति विधीयमानपरविद्याङ्गतया अध्यात्मयोगाधिगमेनेति प्रत्यगात्मज्ञानमपि विधाय * न जायते म्रियते वा विपश्चित् इत्यादिना प्रत्यगात्मस्वरूपं विशोध्य * अणोरणीयान् इत्यारभ्य * महान्तं विभुमात्मानं मत्वा धीरो न शोचति * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥ इत्यादिभिः परस्वरूपं तदुपासनमुपासनस्य च भक्तिरूपतां प्रतिपाद्य * विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इति परविद्याफलेनोपसंहृतम् । अतःपरमध्यायचतुष्टयेनेदमेव प्राप्तुः प्रत्यगात्मनो दर्शनं ससाधनं प्रप[ञ्च्यते]ञ्चयति—

अर्जुन उवाच—

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

यदि कर्मणो बुद्धिरेव ज्यायसीति ते मता, किमर्थं तर्हि घोरे कर्मणि मां नियोजयसि ? एतदुक्तं भवति— ज्ञाननिष्ठैवात्मावलोकनसाधनम् ; कर्मनिष्ठा तु तस्याः निष्पादिका । आत्मावलोकनसाधनभूता च ज्ञाननिष्ठा सकलेन्द्रियमनसां शब्दादिविषयव्यापारोपरतिनिष्पाद्येत्यभिहिता । इन्द्रियव्यापारोपरतिनिष्पाद्यमात्मावलोकनं चेत्सिषाधयिषितं, सकलकर्मनिवृत्तिपूर्वकज्ञाननिष्ठायामेवाहं नियोजयितव्यः । किमर्थं घोरे कर्मणि सर्वेन्द्रियव्यापाररूपे आत्मावलोकनविरोधिनि कर्मणि मां नियोजयसीति । अतो मिश्रवाक्येन मां मोहयसीव प्रतिभाति । तथा हि, आत्मावलोकनसाधनभूतायास्सर्वेन्द्रियव्यापारोपरतिरूपायाः ज्ञाननिष्ठायास्तद्विपर्ययरूपं कर्म साधनं तदेव कुर्विति वाक्यं विरुद्धं व्यामिश्रमेव । तस्मादेकममिश्ररूपं वाक्यं वद ; येन वाक्येनाहमनुष्ठेयरूपं निश्चित्य श्रेयः प्राप्नुयाम् ॥ १, २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीभगवानुवाच—

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

पूर्वोक्तं न सम्यगवधृतं त्वया । पुरा ह्यस्मिन् लोके विचित्राधिकारिपूर्णे, द्विविधा निष्ठा ज्ञानकर्मविषया यथाधिकारमसङ्कीर्णैव मयोक्ता । न हि सर्वो लौकिकः पुरुषस्संजातमोक्षाभिलाषस्तदानीमेव ज्ञानयोगाधिकारे प्रभवति ; अपि त्वनभिसंहितफलेन केवलपरमपुरुषाराधनवेषेणानुष्ठितेन कर्मणा विध्वस्तस्वान्तमलः, अव्याकुलेन्द्रियो ज्ञाननिष्ठायामधिकरोति । * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ (१८. ४६) इति परमपुरुषाराधनैकवेषता कर्मणां वक्ष्यते । इहापि * कर्मण्येवाधिकारस्ते (२. ४७) इत्यादिना अनभिसंहितफलं कर्मानुष्ठेयं विधाय तेन विषयव्याकुलतारूपमोहादुत्तीर्णबुद्धेः * प्रजहाति यदा कामान् (२. ५५) इत्यादिना ज्ञानयोग उदितः । अतस्साङ्ख्यानामेव ज्ञानयोगेन स्थितिरुक्ता । योगिनां तु कर्मयोगेन । सङ्ख्या बुद्धिः, तद्युक्तास्साङ्ख्याः— आत्मैकविषयया बुद्ध्या संबन्धिनस्साङ्ख्याः ; अतदर्हाः कर्मयोगाधिकारिणो योगिनः । विषयव्याकुलबुद्धियुक्तानां कर्मयोगेऽधिकारः ; अव्याकुलबुद्धीनां तु ज्ञानयोगेऽधिकार उक्त इति न किंचिदिह विरुद्धं व्यामिश्रमभिहितम् ॥ ३ ॥

सर्वस्य लौकिकस्य पुरुषस्य मोक्षेच्छायां जातायां सहसैव ज्ञानयोगो दुष्कर इत्याह—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

न शास्त्रीयाणां कर्मणामनारम्भादेव, पुरुषो नैष्कर्म्यं— ज्ञाननिष्ठां प्राप्नोति । न चारब्धस्य शास्त्रीयस्य त्यागात् । यतोऽनभिसंहितफलस्य परमपुरुषाराधनवेषस्य कर्मणस्सिद्धिस्सा ; अतस्तेन विना तां न प्राप्नोति । अनभिसंहितफलैः कर्मभिरनाराधितगोविन्दैरविनष्टानादिकालप्रवृत्तानन्तपापसञ्चयैरव्याकुलेन्द्रियतापूर्विकाऽऽत्मनिष्ठा दुस्संपादा ॥ ४ ॥

एतदेवोपपादयति—

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

न ह्यस्मिन् लोके वर्तमानः पुरुषः कश्चित्कदाचिदपि कर्माकुर्वाणस्तिष्ठति । न किंचित्करोमीति व्यवसितोऽपि सर्वः पुरुषः प्रकृतिसंभवैस्सत्त्वरजस्तमोभिः प्राचीनकर्मानुगुणं प्रवृद्धैर्गुणैः स्वोचितं कर्म प्रत्यवशः कार्यते— प्रवर्त्यते । अत उक्तलक्षणेन कर्मयोगेन प्राचीनं पापसंचयं नाशयित्वा गुणांश्च सत्त्वादीन् वशे कृत्वा निर्मलान्तःकरणेन संपाद्यो ज्ञानयोगः ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्यथा ज्ञानयोगाय प्रवृत्तो मिथ्याचारो भवतीत्याह— .

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

अविनष्टपापतया अजितान्तःकरणः आत्मज्ञानाय प्रवृत्तो विषयप्रवणतया आत्मनि विमुखीकृतमनाः विषयानेव स्मरन् य आस्ते, अन्यथा संकल्प्य अन्यथा चरतीति स मिथ्याचार उच्यते ; आत्मज्ञानायोद्युक्तो विपरीतो विनष्टो भवतीत्यर्थः ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तस्स विशिष्यते ॥ ७ ॥

अतः पूर्वाभ्यस्तविषयसजातीये शास्त्रीये कर्मणि इन्द्रियाण्यात्मावलोकनप्रवृत्तेन मनसा नियम्य तैस्स्वत एव कर्मप्रवणैरिन्द्रियैरसङ्गपूर्वकं यः कर्मयोगमारभते ; सोऽसंभाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपि पुरुषाद्विशिष्यते ॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥

नियतं— व्याप्तम् ; प्रकृतिसंसृष्टेन हि व्याप्तं कर्म, प्रकृतिसंसृष्टस्त्वमनादिवासनया नियतत्वेन सुशकत्वादसंभावितप्रमादत्वाच्च कर्मणः कर्मैव कुरु । अकर्मणः— ज्ञाननिष्ठाया अपि कर्मैव ज्यायः । * नैष्कर्म्यं पुरुषोऽश्नुते. (१. ४) इति प्रक्रमादकर्मशब्देन ज्ञाननिष्ठैवोच्यते । ज्ञाननिष्ठाधिकारिणोऽप्यनभ्यस्तपूर्वतया ह्यनियतत्वेन दुश्शकत्वात्सप्रमादत्वाच्च ज्ञाननिष्ठायाः कर्मनिष्ठैव ज्यायसी । कर्मणि क्रियमाणे चात्मयाथात्म्यज्ञाने-नात्मनोऽकर्तृत्वानुसन्धानमनन्तरमेव वक्ष्यते ; अत आत्मज्ञानस्यापि कर्मयोगान्तर्गतत्वात्स एव ज्यायानित्यर्थः । कर्मणो ज्ञाननिष्ठाया ज्यायस्त्ववचनं ज्ञाननिष्ठायामधिकारे सत्येवोपपद्यते । यदि सर्वं कर्म परित्यज्य केवलं ज्ञान-निष्ठायामधिकरोषि, तर्ह्यकर्मणस्ते ज्ञाननिष्ठस्य ज्ञाननिष्ठोपकारिणी शरीरयात्राऽपि न सेत्स्यति । यावत्साधन-समाप्ति शरीरधारणं चावश्यं कार्यम् । न्यायार्जितधनेन महायज्ञादिकं कृत्वा तच्छिष्टाशनेनैव शरीरधारणं कार्यम् , * आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः इत्यादिश्रुतेः । • ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् (१. १३) इति च वक्ष्यते । अतो ज्ञाननिष्ठस्यापि कर्माकुर्वतो देहयात्राऽपि न सेत्स्यति । यतो ज्ञाननिष्ठस्यापि ध्रियमाणशरीरस्य यावत्साधनसमाप्ति महायज्ञादि नित्यनैमित्तिकं कर्मावश्यं कर्तव्यम् ; यतश्च कर्मयोगेऽप्यात्मनोऽकर्तृत्वभावनयाऽऽत्मयाथात्म्यानुसन्धानमन्तर्भूतम् ; यतश्च प्रकृतिसंसृष्टस्य कर्मयोगस्सुशको-ऽप्रमादश्च ; अतो ज्ञाननिष्ठायोग्यस्यापि ज्ञानयोगात्कर्मयोगो ज्यायान् । तस्मात्त्वं कर्मयोगमेव कुर्वित्यभिप्रायः ॥

एवं तर्हि द्रव्यार्जनादेः कर्मणोऽहङ्कारममकारादिसर्वेन्द्रियव्याकुलतागर्भत्वेनास्य पुरुषस्य कर्मवासनया बन्धनं भविष्यतीत्यत्राह—

Digitization by Arya Samaj Charitable Foundation, Chennai

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर॥ ९॥

यज्ञादिशास्त्रीयकर्मशेषभूताद्द्रव्यार्जनादेः कर्मणोऽन्यत्र– आत्मीयप्रयोजनशेषभूते कर्मणि क्रियमाणेऽयं लोकः कर्मबन्धनो भवति। अतस्त्वं यज्ञार्थं द्रव्यार्जनादिकं कर्म समाचर। तत्रात्मप्रयोजनसाधनतया यस्सङ्गः, तस्मात्सङ्गान्मुक्तस्तत्समाचर। एवं मुक्तसङ्गेन यज्ञाद्यर्थतया कर्मणि क्रियमाणे यज्ञादिभिः कर्मभिराराधितः परमपुरुषोऽस्यानादिकालप्रवृत्तकर्मवासनामुच्छिद्याव्याकुलात्मावलोकनं ददातीत्यर्थः॥ ९॥

यज्ञशिष्टेनैव सर्वपुरुषार्थसाधननिष्ठानां शरीरधारणकर्तव्यतामयज्ञशिष्टेन शरीरधारणं कुर्वतां दोषं चाह–

सह यज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ १०॥

*पतिं विश्वस्य, इत्यादिश्रुतेर्निरुपाधिकः प्रजापतिशब्दः सर्वेश्वरं विश्वस्य स्रष्टारं विश्वात्मानं परायणं नारायणमाह। पुरा– सर्गकाले स भगवान् प्रजापतिरनादिकालप्रवृत्ताचित्संसर्गविवशा उपसंहृतनामरूपविभागास्वस्मिन् प्रलीनाः सकलपुरुषार्थानर्हाश्चेतनेतरकल्पाः प्रजास्समीक्ष्य परमकारुणिकस्तदुज्जिजीवयिषया स्वाराधनभूतयज्ञनिर्वृत्तये यज्ञैस्सह तास्सृष्ट्वैवमुवाच– अनेन यज्ञेन प्रसविष्यध्वम्– आत्मनो वृद्धिं कुरुध्वम्। एष वो यज्ञः परमपुरुषार्थलक्षणमोक्षाख्यस्य कामस्य तदनुगुणानां च कामानां प्रपूरयिता भवतु॥ १०॥

कथम्?

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥ ११॥

अनेन देवताराधनभूतेन देवान् मच्छरीरभूतान् मदात्मकानाराधयत। *अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च (९. २४) इति हि वक्ष्यते। यज्ञेनाराधितास्ते देवा मदात्मकाः स्वाराधनापेक्षितान्नपानादिकैर्युष्मान् पुष्णन्तु। एवं परस्परं भावयन्तः परं श्रेयो मोक्षाख्यमवाप्स्यथ॥ ११॥

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥ १२॥

यज्ञभाविताः– यज्ञेनाराधिता मदात्मका देवाः इष्टान् भोगान् वो दास्यन्ते– उत्तमपुरुषार्थलक्षणं मोक्षं साधयतां ये इष्टा भोगास्तान् भोगान् पूर्वपूर्वयज्ञभाविता देवा दास्यन्ते; उत्तरोत्तराराधनापेक्षितान् सर्वान् भोगान् वो दास्यन्ते इत्यर्थः। स्वाराधनार्थतया तैर्दत्तान् भोगान् तेभ्योऽप्रदाय यो भुङ्क्ते चोर एव सः। चौर्यं हि नाम– अन्यदीये तत्प्रयोजनायैव परिक्लृप्ते वस्तुनि स्वकीयताबुद्धिं कृत्वा तेन स्वात्मपोषणम्। अतोऽस्य न परमपुरुषार्थानर्हतामात्रम्; अपि तु निरयगामित्वं च भविष्यतीत्यभिप्रायः॥ १२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेव विवृणोति—

यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात्॥ १३॥

इन्द्राद्यात्मनावस्थितपरमपुरुषाराधनार्थतयैव द्रव्याण्युपादाय विपच्य तैर्यथावस्थितं परमपुरुषमाराध्य तच्छिष्टाशनेन ये शरीरयात्रां कुर्वते, ते त्वनादिकालोपार्जितैः किल्बिषैरात्मयाथात्म्यावलोकनविरोधिभिस्सर्वैर्मुच्यन्ते। ये तु परमपुरुषेणेन्द्राद्यात्मना स्वाराधनाय दत्तानात्मार्थतयोपादाय विपच्याश्नन्ति ते पापात्मानोऽघमेव भुञ्जते। अघपरिणामित्वादघमित्युच्यते। आत्मावलोकनविमुखाः नरकायैव पचन्ते॥ १३॥

पुनरपि लोकदृष्ट्या शास्त्रदृष्ट्या च सर्वस्य यज्ञमूलत्वं दर्शयित्वा यज्ञानुवर्तनस्यावश्यकार्यतामननुवर्तने दोषं चाह—

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ १४॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ १५॥
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवति॥ १६॥

अन्नात्सर्वाणि भूतानि भवन्ति पर्जन्याच्चान्नसंभव इति सर्वलोकसाक्षिकम्। यज्ञात्पर्जन्यो भवतीति च शास्त्रेणावगम्यते * अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः * इत्यादिना। यज्ञश्च द्रव्यार्जनादिकर्तृव्यापाररूपकर्मसमुद्भवः। कर्म च ब्रह्मोद्भवम्। अत्र च ब्रह्मशब्दनिर्दिष्टं प्रकृतिपरिणामरूपं शरीरम्। * तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते इति हि ब्रह्मशब्देन प्रकृतिर्निर्दिष्टा। इहापि * मम योनिर्महद्ब्रह्म इति हि वक्ष्यते। अतः कर्म ब्रह्मोद्भवमिति प्रकृतिपरिणामरूपशरीरोद्भवं कर्मेत्युक्तं भवति। ब्रह्माक्षरसमुद्भवमित्यत्राक्षरशब्दनिर्दिष्टो जीवात्मा; अन्नपानादिना तृप्ताक्षराधिष्ठितं शरीरं कर्मणे प्रभवतीति कर्मसाधनभूतं शरीरमक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म— सर्वाधिकारिगतं शरीरं, नित्यं यज्ञे प्रतिष्ठितं— यज्ञमूलमित्यर्थः। एवं परमपुरुषेण प्रवर्तितमिदं चक्रम्— अन्नात् भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि, पर्जन्यादन्नम्, यज्ञात्पर्जन्यः, यज्ञश्च कर्तृव्यापाररूपात्कर्मणः, कर्म च सजीवाच्छरीरात्, सजीवं शरीरं पुनरप्यन्नात्— इत्यन्योन्यकार्यकारणभावेन चक्रवत्परिवर्तमानम्, इह— साधने वर्तमानो यः— कर्मयोगाधिकारी ज्ञानयोगाधिकारी वा, नानुवर्तयति— न प्रवर्तयति, यज्ञशिष्टेन देहधारणमकुर्वन्, सोऽघायुर्भवति; अघारम्भायैव यस्यायुरघपरिणतं वोभयरूपं वा सोऽघायुः। अत एवेन्द्रियारामो भवति, नात्मारामः: इन्द्रियाण्येवास्योद्यानानि भवन्ति। अयज्ञशिष्टवर्धितदेहमनस्त्वेनोद्रिक्तरजस्तमस्क आत्मावलोकनविमुखतया विषयभोगैकरतिर्भवति। अतो ज्ञानयोगादौ यतमानोऽपि निष्फलप्रयत्नतया मोघं पार्थ स जीवति॥ १४, १५, १६॥

असाधनायत्तात्मदर्शनस्य मुक्तस्येव महायज्ञादिवर्णाश्रमोचितकर्मानारम्भ इत्याह—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥ १७॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ १८॥

तस्मादसक्तस्सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥ १९॥

यस्तु ज्ञानयोगकर्मयोगसाधननिरपेक्षः स्वत एवात्मरतिरात्माभिमुखः, आत्मनैव तृप्तो नान्नपानादिभिरात्मव्यतिरिक्तैः, आत्मन्येव च सन्तुष्टो नोद्यानस्रक्चन्दनगीतवादित्रनृत्तादौ, धारणपोषणभोग्यादिकं सर्वमात्मैव यस्य, तस्यात्मदर्शनाय कर्तव्यं न विद्यते, स्वत एव सर्वदा दृष्टात्मस्वरूपत्वात्। अत एव तस्यात्मदर्शनाय कृतेन तत्साधनेन नार्थः— न किंचित्प्रयोजनम्। अकृतेनात्मदर्शनसाधनेन न कश्चिदर्थः; असाधनायत्तात्मदर्शनत्वात्। स्वत एवात्मव्यतिरिक्तसकलाचिद्वस्तुविमुखस्यास्य सर्वेषु प्रकृतिपरिणामविशेषेष्वाकाशादिभूतेषु सकार्येषु न कश्चित्प्रयोजनतया व्यपाश्रयः; यतस्तद्विमुखीकरणाय साधनारम्भः। स हि मुक्त एव। यस्मादसाधनायत्तात्मदर्शनस्यैव साधनाप्रवृत्तिः, यस्माच्च साधने प्रवृत्तस्यापि सुशकत्वादप्रमादत्वादन्तर्गतात्मयाथात्म्यानुसन्धानत्वाच्च ज्ञानयोगिनोऽपि मात्रया कर्मानुवृत्त्यपेक्षत्वाच्च कर्मयोग एवात्मदर्शननिर्वृत्तौ श्रेयान्, तस्मादसङ्गपूर्वकं कार्यमित्येव सततं— यावदात्मप्राप्ति कर्मैव समाचर। * असक्तः, कार्यम्, इति वक्ष्यमाणाकर्तृत्वानुसन्धानपूर्वकं च कर्माचरन् पुरुषः कर्मयोगेनैव परमाप्नोति— आत्मानं प्राप्नोतीत्यर्थः॥ १७, १८, १९॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

यतो ज्ञानयोगाधिकारिणोऽपि कर्मयोग एवात्मदर्शने श्रेयान्; अत एव हि जनकादयो राजर्षयो ज्ञानिनामग्रेसराः कर्मयोगेनैव संसिद्धिमास्थिताः— आत्मानं प्राप्तवन्तः॥

एवं प्रथमं मुमुक्षोर्ज्ञानयोगानर्हतया कर्मयोगाधिकारिणः कर्मयोग एव कार्य इत्युक्त्वा ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगात्कर्मयोग एव श्रेयानिति सहेतुकमुक्तम्। इदानीं शिष्टतया व्यपदेश्यस्य सर्वथा कर्मयोग एव कार्य इत्युच्यते—

लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥ २०॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ २१॥

लोकसंग्रहं पश्यन्नपि कर्मैव कर्तुमर्हसि; श्रेष्ठः कृत्स्नशास्त्रज्ञतयाऽनुष्ठातृतया च प्रथितो यद्यदाचरति; तत्तदेवाकृत्स्नविज्जनोऽप्याचरति। अनुष्ठीयमानमपि कर्म श्रेष्ठो यत्प्रमाणं— यदङ्गयुक्तमनुतिष्ठति तदङ्गयुक्तमेवाकृत्स्नविल्लोकोऽप्यनुतिष्ठति। अतो लोकरक्षार्थं शिष्टतया प्रथितेन श्रेष्ठेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदाऽनुष्ठेयम्; अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेत्॥ २१॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥ २२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न मे सर्वेश्वरस्याप्तकामस्य सर्वज्ञस्य सत्यसङ्कल्पस्य त्रिषु लोकेषु देवमनुष्यादिरूपेण स्वच्छन्दतो वर्तमानस्य किंचिदपि कर्तव्यमस्ति, यतोऽनवाप्तं कर्मणाऽवाप्तव्यं न किंचिदप्यस्ति; अथापि लोकरक्षायै कर्मण्येव वर्ते ॥ २२ ॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ २३॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥ २४॥

अहं सर्वेश्वरस्सत्यसङ्कल्पः स्वसङ्कल्पकृतजगदुदयविभवलयलीलश्छन्दतो जगदुपकृतिमर्त्यो जातोऽपि मनुष्येषु शिष्टजनाग्रेसरवसुदेवगृहेऽवतीर्णस्तत्कुलोचिते कर्मण्यतन्द्रितस्सर्वदा यदि न वर्तेय, मम शिष्टजनाग्रेसरवसुदेवसूनोर्वर्त्माकृत्स्नविदशिष्टास्सर्वप्रकारेणायमेव धर्म इत्यनुवर्तन्ते; ते च स्वकर्तव्याननुष्ठानेनाकरणे प्रत्यवायेन चात्मानमलब्ध्वा निरयगामिनो भवेयुः। अहं कुलोचितं कर्म न चेत्कुर्याम्, एवमेव सर्वे शिष्टलोका मदाचारायत्तधर्मनिश्चयाः अकरणादेवोत्सीदेयुः— नष्टा भवेयुः। शास्त्रीयाचाराननुपालनात्सर्वेषां शिष्टकुलानां संकरस्य च कर्ता स्याम्। अत एवेमाः प्रजाः उपहन्याम्। एवमेव त्वमपि शिष्टजनाग्रेसरपाण्डुतनयो युधिष्ठिरानुजोऽर्जुनस्सन् यदि ज्ञाननिष्ठायामधिकरोषि; ततस्त्वदाचारानुवर्तिनोऽकृत्स्नविदशिष्टा मुमुक्षवः स्वाधिकारमजानन्तः कर्मनिष्ठायां नाधिकुर्वन्तो विनश्येयुः। अतो व्यपदेश्येन विदुषा कर्मैव कर्तव्यम्॥ २४॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्॥ २५॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। जोषयेत्सर्वकर्माणि विद्वान् युक्तस्समाचरन्॥ २६॥

अविद्वांसः— आत्मन्यकृत्स्नविदः, कर्मणि सक्ताः— कर्मण्यवर्जनीयसंबन्धाः, आत्मन्यकृत्स्नवित्तया तदभ्यासरूपज्ञानयोगेऽनधिकृताः कर्मयोगाधिकारिणः कर्मयोगमेव यथा आत्मदर्शनाय कुर्वते; तथा आत्मनि कृत्स्नवित्तया कर्मण्यसक्तो ज्ञानयोगाधिकारयोग्योऽपि व्यपदेश्यशिष्टो लोकरक्षार्थं स्वाचारेण शिष्टलोकानां धर्मनिश्चयं चिकीर्षुः, कर्मयोगमेव कुर्यात्। अज्ञानाम्— आत्मन्यकृत्स्नवित्तया ज्ञानयोगोपादानाशक्तानां मुमुक्षूणां, कर्मसङ्गिनाम्— अनादिकर्मवासनया कर्मण्येव नियतत्वेन कर्मयोगाधिकारिणां, कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति न बुद्धिभेदं जनयेत्। किं तर्हि? आत्मनि कृत्स्नवित्तया ज्ञानयोगशक्तोऽपि पूर्वोक्तरीत्या कर्मयोग एव ज्ञानयोगनिरपेक्ष आत्मावलोकनसाधनमिति बुद्ध्या युक्तः कर्मैवाचरन् सकलकर्मस्वकृत्स्नविदां प्रीतिं जनयेत्॥

कर्मयोगमनुष्ठितो विदुषोऽविदुषश्च विशेषं प्रदर्शयन् कर्मयोगापेक्षितमात्मनोऽकर्तृत्वानुसन्धानप्रकारमुपदिशति—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥ २७॥

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥ २८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकृतेर्गुणैस्सत्त्वादिभिः स्वानुरूपं क्रियमाणानि कर्माणि प्रति अहङ्कारविमूढात्माऽहं कर्तेति मन्यते। अहङ्कारेण विमूढ आत्मा यस्यासावहङ्कारविमूढात्मा। अहङ्कारो नाम अनहमर्थे प्रकृतावहमभिमानः ; तेन अज्ञातात्मस्वरूपो गुणकर्मसु अहं कर्तेति मन्यत इत्यर्थः। गुणकर्मविभागयोः— सत्त्वादिगुणविभागे तत्तत्कर्म-विभागे च तत्त्ववित् गुणास्सत्त्वादयः स्वगुणेषु स्वेषु कार्येषु वर्तन्त इति मत्वा गुणकर्मसु अहं कर्तेति न सज्जते ॥ २७, २८ ॥

प्रकृतेर्गुणसंमूढास्सज्जन्ते गुणकर्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥

अकृत्स्नविदस्स्वात्मदर्शनाय प्रवृत्ताः प्रकृतिसंसृष्टतया प्रकृतेर्गुणैर्यथावस्थितात्मनि संमूढाः गुणकर्मसु क्रियास्वेव सज्जन्ते, न तद्विविक्तात्मस्वरूपे। अतस्ते ज्ञानयोगाय न प्रभवन्तीति कर्मयोग एव तेषामधिकारः। एवंभूतांस्तान् मन्दानकृत्स्नविदः कृत्स्नवित् स्वयं ज्ञानयोगावस्थानेन न विचालयेत्। ते किल मन्दाः श्रेष्ठजनाचारानुवर्तिनः कर्मयोगादुत्थितमेनं दृष्ट्वा कर्मयोगात् प्रचलितमनसो भवेयुः। अतश्श्रेष्ठस्स्वयमपि कर्मयोगे तिष्ठन्नात्मयाथात्म्यज्ञानेनात्मनोऽकर्तृत्वमनुसन्दधानः, कर्मयोग एवात्मावलोकने निरपेक्षसाधनमिति दर्शयित्वा तानकृत्स्नविदो जोषयेदित्यर्थः। ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगादस्यैव ज्यायस्त्वं पूर्वमेवोक्तम्। अतो व्यपदेश्यो लोकसंग्रहायैतमेव कुर्यात्। प्रकृतिविविक्तात्मस्वभावनिरूपणेन गुणेषु कर्तृत्वमारोप्य कर्मानुष्ठानप्रकार उक्तः। गुणेषु कर्तृत्वानुसन्धानं चेदम्— आत्मनो न कर्तृत्वम्, अपि तु गुणसंपर्ककृतमिति प्राप्ताप्राप्तविवेकेन गुणकृतमित्यनुसन्धानम् ॥ २९ ॥

इदानीमात्मनां परमपुरुषशरीरतया तन्नियाम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतं च कर्तृत्वमारोप्य कर्मकर्तव्यतोच्यते—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

मयि— सर्वेश्वरे सर्वभूतान्तरात्मभूते सर्वाणि कर्माण्यध्यात्मचेतसा संन्यस्य, निराशीर्निर्ममश्च विगतज्वरो युद्धादिकं सर्वं चोदितं कर्म कुरुष्व। आत्मनि यच्चेतस्तदध्यात्मचेतः : आत्मस्वरूपविषयेण श्रुतिशतसिद्धेन ज्ञानेनेत्यर्थः। * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा....अन्तः प्रविष्टं कर्तारमेतम् * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इत्येवमाद्या श्रुतयः परमपुरुषप्रवर्त्यं तच्छरीरभूतमेनमात्मानम्, परमपुरुषं च प्रवर्तयितारमाचक्षते। स्मृतयश्च * प्रशासितारं सर्वेषाम् इत्याद्याः। * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च (१५. ५५) * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८. ३१) इति वक्ष्यते। अतो मच्छरीरतया मत्प्रवर्त्यात्मस्वरूपानुसन्धानेन सर्वाणि कर्माणि मयैव क्रियमाणानीति मयि परमपुरुषे

Digitization by Arya Samaj Charitable Foundation, Chennai

संन्यस्य तानि च केवलं मदाराधनानीति कृत्वा तत्फले निराशीः तत एव तत्र कर्मणि ममतारहितो भूत्वा विगतज्वरो युद्धादिकं कुरुष्व । स्वकीयेनात्मना कर्त्रा स्वकीयैश्चोपकरणैस्स्वाराधनैकप्रयोजनाय परमपुरुषस्सर्वेश्वर-सर्वशेषी स्वयमेव स्वकर्माणि कारयतीत्यनुसन्धाय, कर्मसु ममतारहितः, प्राचीनेनानादिकालप्रवृत्तानन्तपापसञ्चयेन कथमहं भविष्यामीत्येवंभूतान्तर्ज्वरविनिर्मुक्तः, परमपुरुष एव कर्मभिराराधितो बन्धान्मोचयिष्यतीति सुखेन कर्म-योगमेव कुरुष्वेत्यर्थः । * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् * पतिं विश्वस्य * पतिं पतीनाम् इत्यादिश्रुतिसिद्धं हि सर्वेश्वरत्वं सर्वशेषित्वं च । ईश्वरत्वम्— नियन्तृत्वम्, शेषित्वम्— पतित्वम् ॥ ३० ॥

अयमेव साक्षादुपनिषत्सारभूतोऽर्थ इत्याह—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

ये मानवाश्शास्त्राधिकारिणोऽयमेव शास्त्रार्थ इत्येतन्मे मतं निश्चित्य तथाऽनुतिष्ठन्ति, ये चाननुतिष्ठ-न्तोऽप्यस्मिन् शास्त्रार्थे श्रद्दधाना भवन्ति, ये चाश्रद्दधाना अप्येवं शास्त्रार्थो न संभवतीति नाभ्यसूयन्ति— अस्मिन् महागुणे शास्त्रार्थे दोषमनाविष्कुर्वन्तो भवन्तीत्यर्थः ; ते सर्वे बन्धहेतुभिरनादिकालारब्धैस्सर्वैः कर्मभिर्मुच्यन्ते । तेऽपि कर्मभिः इत्यपिशब्दादेषां पृथक्करणम् । इदानीमननुतिष्ठन्तोऽप्यस्मिन् शास्त्रार्थे श्रद्दधाना अनभ्यसूयवश्च श्रद्धया चानसूयया च क्षीणपापा अचिरेणेममेव शास्त्रार्थमनुष्ठाय मुच्यन्त इत्यर्थः ॥ ३१ ॥

भगवदभिमतमौपनिषदमर्थमननुतिष्ठतामश्रद्दधानानामभ्यसूयतां च दोषमाह—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥

ये त्वेतत्सर्वमात्मवस्तु मच्छरीरतया मदाधारं मच्छेषभूतं मदेकप्रवर्त्यमिति मे मतं नानुतिष्ठन्ति— नैवमनुसन्धाय सर्वाणि कर्माणि कुर्वते, ये च न श्रद्दधते, ये चाभ्यसूयन्तो वर्तन्ते ; तान् सर्वेषु ज्ञानेषु विशे-षेण मूढांस्तत एव नष्टानचेतसो विद्धि । चेतःकार्यं हि वस्तुयाथात्म्यनिश्चयः ; तदभावादचेतसो विपरीतज्ञाना-स्सर्वत्र विमूढाश्च ॥ ३२ ॥

एवं प्रकृतिसंसर्गिणस्तद्गुणोद्रेककृतं कर्तृत्वं तच्च परमपुरुषायत्तमित्यनुसन्धाय कर्मयोगयोग्येन ज्ञानयोग-योग्येन च कर्मयोगस्य सुशकत्वादप्रमादत्वादन्तर्गतात्मज्ञानतया निरपेक्षत्वादितरस्य दुश्शकत्वात् सप्रमादत्वात् शरीरधारणाद्यर्थतया कर्मापेक्षत्वात्कर्मयोग एव कर्तव्यः ; व्यपदेश्यस्य तु विशेषतस्स एव कर्तव्य इति चोक्तम्, अतःपरमध्यायशेषेण ज्ञानयोगस्य दुश्शकतया सप्रमादतोच्यते—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकृतिविविक्तमीदृशमात्मस्वरूपं तदेव सर्वदाऽनुसन्धेयमिति च शास्त्राणि प्रतिपादयन्तीति ज्ञानवानपि स्वस्याः प्रकृतेः— प्राचीनवासनायास्सदृशं प्राकृतविषयेष्वेव चेष्टते। कुतः? प्रकृतिं यान्ति भूतानि— अचित्संसृष्टा जन्तवोऽनादिकालप्रवृत्तवासनामेव यान्ति। तानि वासनानुयायीनि भूतानि [प्रति] शास्त्रकृतो निग्रहः किं करिष्यति ॥ ३३ ॥

प्रकृत्यनुयायित्वप्रकारमाह—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

श्रोत्रादिज्ञानेन्द्रियस्यार्थे शब्दादौ वागादिकर्मेन्द्रियस्य चार्थे वचनादौ प्राचीनवासनाजनिततदनुबुभूषारूपो रागोऽवर्जनीयो व्यवस्थितः; तदनुभवे प्रतिहते चावर्जनीयो द्वेषो व्यवस्थितः। तावेवं ज्ञानयोगाय यतमानं नियमितसर्वेन्द्रियं स्ववशे कृत्वा प्रसह्य स्वकार्येषु संयोजयतः। ततश्चायमात्मस्वरूपानुभवविमुखो विनष्टो भवति। ज्ञानयोगारम्भेण रागद्वेषवशमागम्य न विनश्येत्। तौ हि रागद्वेषावस्य दुर्जयौ शत्रू ज्ञानाभ्यासं वारयतः ॥ ३४ ॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

अतस्सुशकतया स्वधर्मभूतः कर्मयोगो विगुणोऽप्यप्रमादगर्भः प्रकृतिसंसृष्टस्य दुश्शकतया परधर्मभूतात् ज्ञानयोगात्सगुणादपि किंचित्कालमनुष्ठितात् सप्रमादाच्छ्रेयान्। स्वेनैवोपादातुं योग्यतया स्वधर्मभूते कर्मयोगे वर्तमानस्यैकस्मिन् जन्मन्यप्राप्तफलतया निधनमपि श्रेयः, अनन्तरायहततयाऽनन्तरजन्मन्यप्यव्याकुलकर्मयोगारम्भसंभवात्। प्रकृतिसंसृष्टस्य स्वेनैवोपादातुमशक्यतया परधर्मभूतो ज्ञानयोगः प्रमादगर्भतया भयावहः ॥

अर्जुन उवाच—

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

अथायं ज्ञानयोगाय प्रवृत्तः पुरुषः स्वयं विषयाननुभवितुमनिच्छन्नपि केन प्रयुक्तो विषयानुभवरूपं पापं बलान्नियोजित इव चरति ॥ ३६ ॥

श्रीभगवानुवाच—

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्योद्भवाभिभवरूपेण वर्तमानगुणमयप्रकृतिसंसृष्टस्य ज्ञानायारब्धस्य रजोगुणसमुद्भवः प्राचीनवासनाजनितश्शब्दादिविषयः कामो महाशनः शत्रुः विषयेष्वेनमाकर्षति । एष एव प्रतिहतगतिः प्रतिहतिहेतुभूतचेतनान् प्रति क्रोधरूपेण परिणतो महापाप्मा परहिंसादिषु प्रवर्तयति । एनं रजोगुणसमुद्भवं सहजं ज्ञानयोगविरोधिन वैरिणं विद्धि ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

यथा धूमेन वह्निराव्रियते ; यथाऽऽदर्शो मलेन ; यथा चोल्बेनावृतो गर्भः ; तथा तेन— कामेन इदं— जन्तुजातम् , आवृतम् ॥ ३८ ॥

आवरणप्रकारमाह—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

अस्य जन्तोः ज्ञानिनः— ज्ञानस्वभावस्यात्मविषयं ज्ञानमेतेन कामाकारेण विषयव्यामोहजननेन नित्यवैरिणा आवृतम् : दुष्पूरेण— प्राप्त्यनर्हविषयेण, अनलेन च— पर्याप्तिरहितेन ॥ ३९ ॥

कैरुपकरणैरयं काम आत्मानमधितिष्ठतीत्यत्राह—

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

अधितिष्ठत्येभिरयं काम आत्मानमितीन्द्रियाणि मनो बुद्धिरस्याधिष्ठानम् : एतैः— इन्द्रियमनोबुद्धिभिः कामाधिष्ठानभूतैर्विषयप्रवणैर्देहिनं प्रकृतिसंसृष्टं ज्ञानमावृत्य विमोहयति— विविधं मोहयति, आत्मज्ञानविमुखं विषयानुभवपरं करोतीत्यर्थः ॥ ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

यस्मात्सर्वेन्द्रियव्यापारोपरतिरूपे ज्ञानयोगे प्रवृत्तस्यायं कामरूपश्शत्रुः विषयाभिमुख्यकरणेनात्मनि वैमुख्यं करोति ; तस्मात्प्रकृतिसंसृष्टतयेन्द्रियव्यापारप्रवणस्त्वमादौ— मोक्षोपायारम्भसमय एव, इन्द्रियव्यापार[ानु]रूपे कर्मयोगे इन्द्रियाणि नियम्य, एनं ज्ञानविज्ञाननाशनम्— आत्मस्वरूपविषयस्य ज्ञानस्य तद्विवेकविषयस्य च नाशनं पाप्मानं— कामरूपं वैरिणं प्रजहि— नाशय ॥ ४१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानविरोधिषु प्रधानमाह—

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

ज्ञानविरोधे प्रधानानीन्द्रियाण्याहुः ; यत इन्द्रियेषु विषयव्याप्टतेषु आत्मनि ज्ञानं न प्रवर्तते । इन्द्रियेभ्यः परं मनः— इन्द्रियेषु उपरतेष्वपि मनसि विषयप्रवणे आत्मज्ञानं न संभवति । मनसस्तु परा बुद्धिः— मनसि वृत्त्यन्तरविमुखेऽपि विपरीताध्यवसायप्रवृत्तौ सत्यां ज्ञानं न प्रवर्तते । सर्वेषु बुद्धिपर्यन्तेषु उपरतेष्वपीच्छापर्यायः कामो रजस्समुद्भवो वर्तते चेत्, स एवैतानीन्द्रियादीन्यपि स्वविषये वर्तयित्वा आत्मज्ञानं निरुणद्धि । तदिदमुच्यते— यो बुद्धेः परतस्तु सः इति ; बुद्धेरपि यः परस्स काम इत्यर्थः ॥ ४२ ॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
कर्मयोगो नाम तृतीयोऽध्यायः ॥

एवं बुद्धेरपि परं कामं ज्ञानयोगविरोधिनं वैरिणं बुद्ध्वा, आत्मानं— मनः आत्मना— बुद्ध्या कर्मयोगेऽवस्थाप्य एनं कामरूपं दुरासदं शत्रुं जहि— नाशयेति ॥ ४३ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये तृतीयोऽध्यायः ॥ ३ ॥

॥ अथ चतुर्थोऽध्यायः ॥ ४ ॥

तृतीयेऽध्याये प्रकृतिसंसृष्टस्य मुमुक्षोस्सहसा ज्ञानयोगेऽनधिकारात् कर्मयोग एव कार्यः ; ज्ञानयोगाधिकारिणोऽप्यकर्तृत्वानुसन्धानपूर्वककर्मयोग एव श्रेयानिति सहेतुकमुक्तम् । शिष्टतया व्यपदेश्यस्य तु विशेषतः कर्मयोग एव कार्य इति चोक्तम् । चतुर्थेनेदानीमस्यैव कर्मयोगस्य निखिलजगदुद्धरणाय मन्वन्तरादावेवोपदिष्टतया कर्तव्यतां द्रढयित्वा, अन्तर्गतज्ञानतयाऽस्यैव ज्ञानयोगाकारतां प्रदर्श्य, कर्मयोगस्वरूपम्, तद्भेदाः, कर्मयोगे ज्ञानांशस्यैव प्राधान्यं चोच्यते । प्रसङ्गाच्च भगवदवतारयाथात्म्यमुच्यते ।

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः। भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

योऽयं तवोदितो योगः स केवलं युद्धप्रोत्साहनायेदानीमुदित इति न मन्तव्यम्। मन्वन्तरादावेव निखिलजगदुद्धरणाय परमपुरुषार्थलक्षणमोक्षसाधनतयेमं योगमहमेव विवस्वते प्रोक्तवान्, विवस्वांश्च मनवे, मनुरिक्ष्वाकवे; इत्येवं संप्रदायपरम्परया प्राप्तमिमं योगं पूर्वे राजर्षयो विदुः। स महता कालेन तत्तच्छ्रोतृबुद्धिमान्द्याद्विनष्टप्रायोऽभूत्। स एवायमस्खलितस्वरूपः पुरातनो योगः सख्येनातिमात्रभक्त्या च मामेव प्रपन्नाय ते मया प्रोक्तः— सपरिकरस्सविस्तरमुक्त इत्यर्थः। मदन्येन केनापि ज्ञातुं वक्तुं चाशक्यम्, यत इदं वेदान्तोदितमुत्तमं रहस्यं ज्ञानम् ॥ १, २, ३ ॥

अस्मिन् प्रसङ्गे भगवदवतारयाथात्म्यं यथावत् ज्ञातुमर्जुन उवाच—

अर्जुन उवाच—

अवरं भवतो जन्म परं जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

कालसङ्ख्यया अवरम्, अस्मज्जन्मसमकालं हि भवतो जन्म। विवस्वतश्च जन्म कालसङ्ख्यया परम्— अष्टाविंशतिचतुर्युगसङ्ख्यासङ्ख्यातम्। त्वमेवादौ प्रोक्तवानिति कथमेतदसंभावनीयं यथार्थं जानीयाम्? ननु जन्मान्तरेणापि वक्तुं शक्यम्, जन्मान्तरकृतस्य महतां स्मृतिश्च युज्यत इति नात्र कश्चिद्विरोधः। न चासौ वक्तारमेनं वसुदेवतनयं सर्वेश्वरं न जानाति, य एवं वक्ष्यति * परं ब्रह्म परं धाम पवित्रं परमं भवान्। पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा। असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ इति। युधिष्ठिरराजसूयादिषु भीष्मादिभ्यश्चासकृच्छ्रुतं * कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः। कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ॥ इत्येवमादिषु। कृष्णस्य हि कृते इति कृष्णस्य शेषभूतमिदं कृत्स्नं जगदित्यर्थः। अत्रोच्यते— जानात्येवायं भगवन्तं वसुदेवसूनुं पार्थः। जानतोऽप्यजानत इव पृच्छतोऽयमाशयः— निखिलहेयप्रत्यनीककल्याणैकतानस्य सर्वेश्वरस्य सर्वज्ञस्य सत्यसङ्कल्पस्यावाप्तसमस्तकामस्य कर्मपरवशदेवमनुष्यादिसजातीयं जन्म किमिन्द्रजालादिवन्मिथ्या? उत सत्यम्? सत्यत्वे च कथं जन्मप्रकारः? किमात्मकोऽयं देहः? कश्च जन्महेतुः? कदा च जन्म? किमर्थं च जन्मेति परिहारप्रकारेण प्रश्नार्थो विज्ञायते ॥ ४ ॥

श्रीभगवानुवाच—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

अनेन जन्मनस्सत्यत्वमुक्तम्, बहूनि मे व्यतीतानि जन्मानीति वचनात्, तव चेति दृष्टान्ततयोपादानाच्च ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अवतारप्रकारम् , देहयाथात्म्यम् , जन्महेतुं चाह—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया॥ ६॥

अजत्वाव्ययत्वसर्वेश्वरत्वादि सर्वं पारमेश्वरं प्रकारमजहदेव स्वां प्रकृतिमधिष्ठाय आत्ममायया संभवामि। प्रकृतिः— स्वभावः, स्वमेव स्वभावमधिष्ठाय स्वेनैव रूपेण स्वेच्छया संभवामीत्यर्थः। स्वस्वरूपं हि * आदित्यवर्णं तमसः परस्तात् * क्षयन्तमस्य रजसः पराके * य एषोऽन्तरादित्ये हिरण्मयः पुरुषः * तस्मिन्नयं पुरुषो मनोमयः अमृतो हिरण्मयः * सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि * भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः * माहारजतं वासः इत्यादिश्रुतिसिद्धम्। आत्ममायया— आत्मीयया मायया। * माया वयुनं ज्ञानम् इति ज्ञानपर्यायोऽत्र मायाशब्दः। तथा चाभियुक्तप्रयोगः— * मायया सततं वेत्ति प्राणिनां च शुभाशुभम् इति। आत्मीयेन ज्ञानेन— आत्मसङ्कल्पेनेत्यर्थः। अतोऽपहतपाप्मत्वादिसमस्तकल्याणगुणात्मकत्वं सर्वमैशं स्वभावमजहत् स्वमेव रूपं देवमनुष्यादिसजातीयसंस्थानं कुर्वन्नात्मसङ्कल्पेन देवादिरूपस्संभवामि। तदिदमाह— * अजायमानो बहुधा विजायते इति श्रुतिः। इतरपुरुषसाधारणं जन्माकुर्वन्देवादिरूपेण स्वसङ्कल्पेनोक्तप्रक्रियया जायत इत्यर्थः; * बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्यहं वेद सर्वाणि * तदाऽऽत्मानं सृजाम्यहं * जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः इति पूर्वापराविरोधाच्च॥ ६॥

जन्मकालमाह—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥ ७॥

न कालनियमोऽस्मत्संभवस्य। यदा यदा हि धर्मस्य— वेदोदितस्य चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयाऽवस्थितस्य कर्तव्यस्य ग्लानिर्भवति; यदा यदा च तद्विपर्ययस्याधर्मस्याभ्युत्थानं तदाऽहमेव, स्वसङ्कल्पेनोक्तप्रकारेणात्मानं सृजामि॥ ७॥

जन्मनः प्रयोजनमाह—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगेयुगे॥ ८॥

साधवः— उक्तलक्षणधर्मशीला वैष्णवाग्रेसरा मत्समाश्रयणे प्रवृत्ता मन्नामकर्मस्वरूपाणां वाङ्मनसागोचरतया मद्दर्शनेन विना स्वात्मधारणपोषणादिकमलभमानाः क्षणमात्रकालं कल्पसहस्रं मन्वानाः प्रशिथिलसर्वगात्रा भवेयुरिति मत्स्वरूपचेष्टितावलोकनालापादिदानेन तेषां परित्राणाय, तद्विपरीतानां विनाशाय च,

Digitization by Arya Samaj Charitable Foundation, Chennai

क्षीणस्य वैदिकस्य धर्मस्य मदाराधनरूपस्याराध्यस्वरूपप्रदर्शनेन स्थापनाय च देवमनुष्यादिरूपेण युगेयुगे संभवामि ; कृतत्रेतादियुगविशेषनियमोऽपि नास्तीत्यर्थः ॥ ८ ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

एमं कर्ममूलहेयत्रिगुणप्रकृतिसंसर्गरूपजन्मरहितस्य सर्वेश्वरत्वसार्वज्ञ्यसत्यसङ्कल्पत्वादिसमस्तकल्याण-गुणोपेतस्य साधुपरित्राणमत्समाश्रयणैकप्रयोजनं दिव्यम्— अप्राकृतं मदसाधारणं मम जन्म चेष्टितं च तत्त्वतो यो वेत्ति, स वर्तमानं देहं परित्यज्य पुनर्जन्म नैति, मामेव प्राप्नोति ; मदीयदिव्यजन्मचेष्टितयाथात्म्यविज्ञानेन विध्वस्तसमस्तमत्समाश्रयणविरोधिपापोऽस्मिन्नेव जन्मनि यथोदितप्रकारेण मामाश्रित्य मदेकप्रियो मदेकचित्तो मामेव प्राप्नोति ॥ ९ ॥

तदाह—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

मदीयजन्मकर्मतत्त्वज्ञानाख्येन तपसा पूता बहव एवं संवृत्ताः । तथा च श्रुतिः * तस्य धीराः परि-जानन्ति योनिम् इति । धीराः— धीमतामग्रेसराः, एवं तस्य जन्मप्रकारं जानन्तीत्यर्थः ॥ १० ॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

न केवलं देवमनुष्यादिरूपेणावतीर्य मत्समाश्रयणापेक्षाणां परित्राणं करोमि । अपि तु ये मत्समा-श्रयणापेक्षाः, यथा— येन प्रकारेण स्वापेक्षानुरूपं मां संकल्प्य प्रपद्यन्ते— समाश्रयन्ते ; तान् प्रति, तथैव— तन्मनीषितप्रकारेण, भजामि— मां दर्शयामि । किमत्र बहुना, सर्वे मनुष्याः मदनुवर्तनैकमनोरथा मम वर्त्म— मत्स्वभावं सर्वं योगिनां वाङ्मनसागोचरमपि स्वकीयैश्चक्षुरादिकरणैस्सर्वशस्स्वापेक्षितैस्सर्वप्रकारैरनुभूयानुवर्तन्ते ॥

इदानीं प्रासङ्गिकं परिसमाप्य प्रकृतस्य कर्मयोगस्य ज्ञानाकारताप्रकारं वक्तुं तथाविधकर्मयोगा-धिकारिणो दुर्लभत्वमाह—

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

सर्व एव पुरुषाः कर्मणां फलं काङ्क्षमाणाः इन्द्रादिदेवतामात्रं यजन्ते— आराधयन्ति ; न तु कश्चि-दनभिसंहितफलः इन्द्रादिदेवतात्मभूतं सर्वयज्ञानां भोक्तारं मां यजते । कुत एतत् ? यतः क्षिप्रमस्मिन्नेव मानुषे

Digitization by Arya Samaj Charitable Foundation, Chennai

लोके कर्मजा पुत्रपश्वन्नाद्यादिसिद्धिर्भवति । मनुष्यलोकशब्दस्स्वर्गादीनामपि प्रदर्शनार्थः । सर्व एव लौकिकाः पुरुषा अक्षीणानादिकालप्रवृत्तानन्तपापसंचयतयाऽविवेकिनः क्षिप्रफलाकाङ्क्षिणः पुत्रपश्वन्नाद्यस्वर्गाद्यर्थतया सर्वाणि कर्माणीन्द्रादिदेवताराधनमात्राणि कुर्वते ; न तु कश्चित्संसारोद्विग्नहृदयो मुमुक्षुरुक्तलक्षणं कर्मयोगं मदाराधनभूतमारभत इत्यर्थः ॥ १२ ॥

यथोक्तकर्मयोगारम्भविरोधिपापक्षयहेतुमाह—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

चातुर्वर्ण्यप्रमुखं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् सत्त्वादिगुणविभागेन तदनुगुणशमादिकर्मविभागेन च विभक्तं मया सृष्टम् । सृष्टिग्रहणं प्रदर्शनार्थम् ; मयैव रक्ष्यते, मयैव चोपसंह्रियते । तस्य— विचित्रसृष्ट्यादेः कर्तारमप्यकर्तारं मां विद्धि ॥ १३ ॥

कथमित्यत्राह—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

यत इमानि विचित्रसृष्ट्यादीनि कर्माणि मां न लिम्पन्ति— न मां संबध्नन्ति ; न मत्प्रयुक्तानि तानि देवमनुष्यादिवैचित्र्याणि ; सृज्यानां पुण्यपापरूपकर्मविशेषप्रयुक्तानीत्यर्थः । अतः प्राप्ताप्राप्तविवेकेन विचित्रसृष्ट्यादेर्नाहं कर्ता ; यतश्च सृष्टाः क्षेत्रज्ञाः सृष्टिलब्धकरणकलेबराः सृष्टिलब्धं भोग्यजातं फलसङ्गादिहेतुस्वकर्मानुगुणं भुञ्जते ; सृष्ट्यादिकर्मफले च तेषामेव स्पृहेति न मे स्पृहा । तथाऽऽह सूत्रकारः— * वैषम्यनैर्घृण्ये न सापेक्षत्वात् इति । तथा च भगवान् पराशरः— * निमित्तमात्रमेवायं सृज्यानां सर्गकर्मणि । प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वेदं नान्यत्किंचिदपेक्षते । नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम् ॥ इति । सृज्यानां देवादीनां क्षेत्रज्ञानां सृष्टेः कारणमात्रमेवायं परमपुरुषः ; देवादिवैचित्र्ये तु प्रधानकारणं सृज्यभूतक्षेत्रज्ञानां प्राचीनकर्मशक्तय एव । अतो निमित्तमात्रं मुक्त्वा— सृष्टेः कर्तारं परमपुरुषं मुक्त्वा, इदं क्षेत्रज्ञवस्तु देवादिविचित्रभावे नान्यदपेक्षते ; स्वगतप्राचीनकर्मशक्त्यैव हि देवादिवस्तुभावं नीयत इत्यर्थः । एवमुक्तेन प्रकारेण सृष्ट्यादेः कर्तारमप्यकर्तारं सृष्ट्यादिकर्मफलसङ्गरहितं च यो मामभिजानाति ; स कर्मयोगारम्भविरोधिभिः फलसङ्गादिहेतुभिः प्राचीनकर्मभिर्न संबध्यते— मुच्यत इत्यर्थः ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं मां ज्ञात्वा विमुक्तपापैः पूर्वैरपि मुमुक्षुभिरुक्तलक्षणं कर्म कृतम् । तस्मात्त्वमुक्तप्रकारमद्विषयज्ञानविधूतपापः पूर्वैर्विवस्वन्मन्वादिभिः कृतं पूर्वतरं— पुरातनं तदानीमेव मयोक्तं वक्ष्यमाणाकारं कर्मैव कुरु ॥

वक्ष्यमाणस्य कर्मणो दुर्ज्ञानतामाह—

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

मुमुक्षुणाऽनुष्ठेयं कर्म किंरूपम्, अकर्म च किम्? अकर्मेति कर्तुरात्मनो याथात्म्यज्ञानमुच्यते । अनुष्ठेयं कर्म तदन्तर्गतं ज्ञानं च किंरूपमित्युभयत्र कवयः— विद्वांसोऽपि, मोहिताः— यथावन्न जानन्ति । एवमन्तर्गतज्ञानं यत्कर्म तत्ते प्रवक्ष्यामि, यत् ज्ञात्वाऽनुष्ठाय, अशुभात्— संसारबन्धात् मोक्ष्यसे; कर्तव्यकर्मज्ञानं ह्यनुष्ठानफलम् ॥ १६ ॥

कुतोऽस्य दुर्ज्ञानतेत्यत्राह—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

यस्मान्मोक्षसाधनभूते कर्मस्वरूपे बोद्धव्यमस्ति, विकर्मणि च; नित्यनैमित्तिककाम्यरूपेण, तत्साधनद्रव्यार्जनाद्याकारेण च विविधता[मा]पन्नं कर्म विकर्म । अकर्मणि— ज्ञाने च बोद्धव्यमस्ति । गहना— दुर्विज्ञाना मुमुक्षोः कर्मणो गतिः । विकर्मणि बोद्धव्यं— नित्यनैमित्तिककाम्यतत्साधनद्रव्यार्जनादौ कर्मणि फलभेदकृतं वैविध्यं परित्यज्य मोक्षैकफलतयैकशास्त्रार्थत्वानुसन्धानम् । तदेतत् * व्यवसायात्मिका बुद्धिरेका (२. ४१) इत्यत्रैवोक्तमिति नेह प्रपञ्च्यते ॥ १७ ॥

कर्माकर्मणोर्बोद्धव्यमाह—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

अकर्मशब्देनात्र कर्मेतरत्प्रस्तुतमात्मज्ञानमुच्यते । कर्मणि क्रियमाण एवात्मज्ञानं यः पश्येत्, अकर्मणि चात्मज्ञाने वर्तमान एव यः कर्म पश्येत् । किमुक्तं भवति? क्रियमाणमेव कर्मात्मयाथात्म्यानुसन्धानेन ज्ञानाकारं यः पश्येत्, तच्च ज्ञानं कर्म[योगा]न्यन्तर्गततया कर्माकारं यः पश्येदित्युक्तं भवति । क्रियमाणे हि कर्मणि कर्तृभूतात्मयाथात्म्यानुसन्धाने सति तदुभयं संपन्नं भवति । एवमात्मयाथात्म्यानुसन्धानगर्भं कर्म यः पश्येत्, स बुद्धिमान्— कृत्स्नशास्त्रार्थवित्, मनुष्येषु स युक्तः— मोक्षायार्हः, स एव कृत्स्नकर्मकृत्— कृत्स्नशास्त्रार्थकृत् ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रत्यक्षेण क्रियमाणस्य कर्मणो ज्ञानाकारता कथमुपपद्यत इत्यत्राह—

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ १९॥

यस्य मुमुक्षोस्सर्वे द्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपकर्मसमारम्भाः, कामवर्जिताः—फलसङ्गरहिताः; सङ्कल्पवर्जिताश्च—प्रकृत्या तद्गुणैश्चात्मानमेकीकृत्यानुसन्धानं सङ्कल्पः; प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया तद्रहिताः; तम्—एवं कर्म कुर्वाणं पण्डितं कर्मान्तर्गतात्मयाथात्म्यज्ञानाग्निना दग्धप्राचीनकर्माणमाहुस्तत्त्वज्ञाः। अतः कर्मणो ज्ञानाकारत्वमुपपद्यते॥ १९॥

एतदेव विवृणोति—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः॥ २०॥

कर्मफलसङ्गं त्यक्त्वा, नित्यतृप्तः—नित्ये स्वात्मन्येव तृप्तः, निराश्रयः— अस्थिरप्रकृतावाश्रयबुद्धिरहितो यः कर्माणि करोति, स कर्मण्याभिमुख्येन प्रवृत्तोऽपि, नैव किंचित्कर्म करोति— कर्मापदेशेन ज्ञानाभ्यासमेव करोतीत्यर्थः॥ २०॥

पुनरपि कर्मणो ज्ञानाकारतैव विशोध्यते—

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ २१॥

निराशीः— निर्गतफलाभिसन्धिः, यतचित्तात्मा—यतचित्तमनाः, त्यक्तसर्वपरिग्रहः— आत्मैकप्रयोजनतया प्रकृतिप्राकृतवस्तुनि ममतारहितः, यावज्जीवं केवलं शारीरमेव कर्म कुर्वन्, किल्बिषं— संसारं नाप्नोति ; ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेनैवंरूपेणात्मानं पश्यतीत्यर्थः॥ २१॥

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः।
समस्सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते॥ २२॥

यदृच्छोपनतशरीरधारणहेतुवस्तुसन्तुष्टः, द्वन्द्वातीतः— यावत्साधनसमाप्त्यवर्जनीयशीतोष्णादिसहः, विमत्सरः— अनिष्टोपनिपातहेतुभूतस्वकर्मनिरूपणेन परेषु विगतमत्सरः, समस्सिद्धावसिद्धौ च— युद्धादिकर्मसु जयादिसिद्ध्यसिद्ध्योस्समचित्तः, कर्मैव कृत्वाऽपि— ज्ञाननिष्ठां विनाऽपि, न निबध्यते— न संसारं प्रतिपद्यते॥

Digitization by Arya Samaj Charitable Foundation, Chennai

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

आत्मविषयज्ञानावस्थितमनस्त्वेन निर्गततदितरसङ्गस्य तत एव निखिलपरिग्रहविनिर्मुक्तस्य उक्तलक्षणयज्ञादिकर्मनिर्वृत्तये वर्तमानस्य पुरुषस्य बन्धहेतुभूतं प्राचीनं कर्म समग्रं प्रविलीयते— निश्शेषं क्षीयते ॥

प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया कर्मणो ज्ञानाकारत्वमुक्तम् ; इदानीं सर्वस्य सपरिकरस्य कर्मणः परब्रह्मभूतपरमपुरुषात्मकत्वानुसन्धानयुक्ततया ज्ञानाकारत्वमाह—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्मार्पणमिति हविर्विशेष्यते, अर्प्यतेऽनेनेत्यर्पणं स्रुगादि, तत् ब्रह्मकार्यत्वाद्ब्रह्म, ब्रह्म यस्य हविषोऽर्पणं तद्ब्रह्मार्पणम्, ब्रह्म हविः— ब्रह्मार्पणं हविस्स्वयं च ब्रह्मभूतम्, ब्रह्माग्नौ— ब्रह्मभूते अग्नौ, ब्रह्मणा कर्त्रा हुतमिति सर्वं कर्म ब्रह्मात्मकतया ब्रह्ममयमिति यस्समाधत्ते, स ब्रह्मकर्मसमाधिः । तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्— ब्रह्मात्मकतया ब्रह्मभूतमात्मस्वरूपं गन्तव्यम् । मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमेवेत्यनुसन्धानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकनसाधनम् ; न ज्ञाननिष्ठाव्यवधानेनेत्यर्थः ॥ २४ ॥

एवं कर्मणो ज्ञानाकारतां प्रतिपाद्य कर्मयोगभेदानाह—

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवम्—देवार्चनरूपं यज्ञम् अपरे कर्मयोगिनः पर्युपासते— सेवन्ते ; तत्रैव निष्ठां कुर्वन्तीत्यर्थः । अपरे ब्रह्माग्नौ यज्ञं यज्ञेनैवोपजुह्वति ; अत्र यज्ञशब्दो हविस्स्रुगादियज्ञसाधने वर्तते ; * ब्रह्मार्पणं ब्रह्महविरिति न्यायेन यागहोमयोर्निष्ठां कुर्वन्ति ॥ २५ ॥

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

अन्ये श्रोत्रादीनामिन्द्रियाणां संयमने प्रयतन्ते । अन्ये योगिनः इन्द्रियाणां शब्दादिविषयप्रवणतानिवारणे प्रयतन्ते ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्ये ज्ञानदीपिते मनस्संयमयोगाग्नौ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि च जुह्वति : मनस इन्द्रिय-प्राणकर्मप्रवणतानिवारणे प्रयतन्त इत्यर्थः ॥ २७ ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

केचित्कर्मयोगिनो द्रव्ययज्ञाः— न्यायतो द्रव्याण्युपादाय देवतार्चने प्रयतन्ते, केचिच्च दानेषु, केचिच्च यागेषु, केचिच्च होमेषु, एते सर्वे द्रव्ययज्ञाः। केचित्तपोयज्ञाः— कृच्छ्रचान्द्रायणोपवासादिषु निष्ठां कुर्वन्ति। योगयज्ञाश्चापरे पुण्यतीर्थपुण्यस्थानप्राप्तिषु निष्ठां कुर्वन्ति। इह योगशब्दः कर्मनिष्ठाभेदप्रकरणात्तद्विषयः। केचित्स्वाध्यायाभ्यासपराः। केचित्तदर्थज्ञानाभ्यासपराः। यतयः— यतनशीलाः, संशितव्रताः— दृढसङ्कल्पाः ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।

अपरे कर्मयोगिनः प्राणायामेषु निष्ठां कुर्वन्ति। ते च त्रिविधाः पूरकरेचककुम्भकभेदेन ; अपाने जुह्वति प्राणमिति पूरकः, प्राणेऽपानमिति रेचकः, प्राणापानगती रुद्ध्वा प्राणान् प्राणेषु जुह्वतीति कुम्भकः। प्राणायामपरेषु त्रिष्वप्यनुषज्यते नियताहारा इति ॥ २९ ॥

सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।

द्रव्ययज्ञप्रभृति प्राणायामपर्यन्तेषु कर्मयोगभेदेषु स्वसमीहितेषु प्रवृत्ता एते सर्वे * सह यज्ञैः प्रजाः सृष्ट्वा (३. १०) इत्यभिहितमहायज्ञपूर्वकनित्यनैमित्तिककर्मरूपयज्ञविदः— तन्निष्ठाः, तत एव क्षपितकल्मषाः, यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्त एव कर्मयोगे व्यापृताः सनातनं ब्रह्म यान्ति ॥ ३०— ॥

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

अयज्ञस्य— महायज्ञादिरूपनित्यनैमित्तिककर्मरहितस्य, नायं लोकः— न प्राकृतलोकः, प्राकृतलोकसंबन्धिधर्मार्थकामाख्यः पुरुषार्थो न सिध्यति। कुत इतोऽन्यो मोक्षाख्यः पुरुषार्थः? परमपुरुषार्थतया मोक्षस्य प्रस्तुतत्वात्तदितरपुरुषार्थः अयं लोकः इति निर्दिश्यते ; स हि प्राकृतः ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं हि बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे वितताः— आत्मयाथात्म्यावाप्तिसाधनतया स्थिताः । तान्— उक्तलक्षणानुक्तभेदान् कर्मयोगान्सर्वान्कर्मजान्विद्धि— अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मजान् विद्धि । एवं ज्ञात्वा— यथोक्तप्रकारेणानुष्ठाय मोक्ष्यसे ॥ ३२ ॥

अन्तर्गतज्ञानतया कर्मणो ज्ञानाकारत्वमुक्तम्; तत्रान्तर्गतज्ञाने कर्मणि ज्ञानांशस्यैव प्राधान्यमाह—

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

उभयाकारे कर्मणि द्रव्यमयादंशात् ज्ञानमयोंऽशश्श्रेयान्; सर्वस्य कर्मणस्तदितरस्य चाखिलस्योपादेयस्य ज्ञाने परिसमाप्तेः । तदेव सर्वैस्साधनैः प्राप्यभूतं ज्ञानं कर्मान्तर्गतत्वेनाभ्यस्यते, तदेवाभ्यस्यमानं क्रमेण प्राप्यदशां प्रतिपद्यते ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

तत्— आत्मविषयं ज्ञानं * अविनाशि तु तद्विद्धि (२. १७) इत्यारभ्य * एषा तेऽभिहिता (२. ३९) इत्यन्तेन मयोपदिष्टम्, तद्युक्तकर्मणि वर्तमानस्त्वं विपाकानुगुणं कालेकाले प्रणिपातपरिप्रश्नसेवादिभिर्विशदाकारं ज्ञानिभ्यो विद्धि । साक्षात्कृतात्मस्वरूपास्तु ज्ञानिनः प्रणिपातादिभिस्सेविताः ज्ञानबुभुत्सया परितः पृच्छतस्तवाशयमालक्ष्य ज्ञानमुपदेक्ष्यन्ति ॥ ३४ ॥

आत्मयाथात्म्यविषयस्य ज्ञानस्य साक्षात्काररूपस्य लक्षणमाह—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

यत् ज्ञानं ज्ञात्वा पुनरेवं— दे[वा]हाद्यात्माभिमानरूपं तत्कृतं ममताद्यास्पदं च मोहं न यास्यसि, येन च देवमनुष्याद्याकारेणानुसंहितानि सर्वाणि भूतानि स्वात्मन्येव द्रक्ष्यसि, यतस्तवान्येषां च भूतानां प्रकृतिवियुक्तानां ज्ञानैकाकारतया साम्यम्; प्रकृतिसंसर्गदोषविनिर्मुक्तमात्मस्वरूपं सर्वं सममिति च वक्ष्यते * निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः (५. १९) इति । अथो मयि सर्वभूतान्यशेषेण द्रक्ष्यसि, मत्स्वरूपसाम्यात् परिशुद्धस्य सर्वस्यात्मवस्तुनः । * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः (१४. २.) इति हि वक्ष्यते; तथा * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, इत्येवमादिषु नामरूपविनिर्मुक्तस्यात्मवस्तुनः परस्वरूपसाम्यमवगम्यते । अतः प्रकृतिविनिर्मुक्तं सर्वमात्मवस्तु परस्परं समं सर्वेश्वरेण च समम् ॥ ३५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

यद्यपि सर्वेभ्यः पापेभ्यः पापकृत्तमोऽसि, सर्वं पूर्वार्जितं वृजिनरूपं समुद्रमात्मविषयज्ञानरूपप्लवेनैव संतरिष्यसि ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

सम्यक्प्रवृद्धोऽग्निरिन्धनसञ्चयमिवात्मयाथात्म्यज्ञानरूपोऽग्निर्जीवात्मगतमनादिकालप्रवृत्तानन्तकर्मसञ्चयं भस्मीकरोति ॥ ३७ ॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

यस्मादात्मज्ञानेन सदृशं पवित्रं— शुद्धिकरमिह जगति वस्त्वन्तरं न विद्यते, तस्मादात्मज्ञानं सर्वपापं नाशयतीत्यर्थः। तत्— तथाविधं ज्ञानं, यथोपदेशमहरहरनुष्ठीयमानज्ञानाकारकर्मयोगेन संसिद्धः कालेन स्वात्मनि स्वयमेव लभते ॥ ३८ ॥

तदेव विस्पष्टमाह—

श्रद्धावान् लभते ज्ञानं तत्परस्संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

एवमुपदेशात् ज्ञानं लब्ध्वा चोपदिष्टज्ञानवृद्धौ श्रद्धावान्, तत्परः— तत्रैव नियतमनास्तदितरविषयात्संयतेन्द्रियोऽचिरेण कालेनोक्तलक्षणविपाकदशापन्नं ज्ञानं लभते, तथाविधं ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति— परं निर्वाणमाप्नोति ॥ ३९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

अज्ञः— एवमुपदेशलब्धज्ञानरहितः, उपदिष्टज्ञानवृध्द्युपाये चाश्रद्दधानः— अत्वरमाणः, उपदिष्टे च ज्ञाने संशयात्मा— संशयमनाः विनश्यति—नष्टो भवति। अस्मिन्नुपदिष्टे आत्मयाथात्म्यविषये ज्ञाने संशयात्मनोऽयमपि प्राकृतो लोको नास्ति, न च परः, धर्मार्थकामरूपपुरुषार्थाश्च न सिध्यन्ति, कुतो मोक्ष इत्यर्थः ; शास्त्रीयकर्मसिद्धिरूपत्वात्सर्वेषां पुरुषार्थानाम्, शास्त्रीयकर्मजन्यसिद्धेश्च देहातिरिक्तात्मनिश्चयपूर्वकत्वात्। अतस्सुखलवभागित्वमात्मनि संशयात्मनो न संभवति ॥ ४० ॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यथोपदिष्टयोगेन संन्यस्तकर्माणम्— ज्ञानाकारतापन्नकर्माणं, यथोपदिष्टेन चात्मज्ञानेनात्मनि संच्छिन्नसंशयम्, आत्मवन्तम्— मनस्विनम् उपदिष्टार्थे दृढावस्थितमनसं बन्धहेतुभूतप्राचीनानन्तकर्माणि न निबध्नन्ति ॥

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानयोगो नाम चतुर्थोऽध्यायः ॥

तस्मादनाद्यज्ञानसंभूतं हृत्स्थम्— आत्मविषयं संशयं मयोपदिष्टेनात्मज्ञानासिना छित्त्वा मयोपदिष्टं कर्मयोगमातिष्ठ ; तदर्थमुत्तिष्ठ भारतेति ॥ ४२ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

॥ अथ पञ्चमोऽध्यायः ॥ ५ ॥

चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदो ज्ञानांशस्य च प्राधान्यमुक्तम्। ज्ञानयोगाधिकारिणोऽपि कर्मयोगस्यान्तर्गतात्मज्ञानत्वादप्रमादत्वात्सुकरत्वान्निरपेक्षत्वाच्च ज्यायस्त्वं तृतीय एवोक्तम्। इदानीं कर्मयोगस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाश्शैघ्र्यं कर्मयोगान्तर्गताकर्तृत्वानुसन्धानप्रकारं च प्रतिपाद्य तन्मूलं ज्ञानं च विशोध्यते ॥

अर्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

कर्मणां संन्यासं— ज्ञानयोगं, पुनः कर्मयोगं च शंससि। एतदुक्तं भवति— द्वितीयेऽध्याये मुमुक्षोः प्रथमं कर्मयोग एव कार्यः, कर्मयोगेन मृदितान्तःकरणकषायस्य ज्ञानयोगेनात्मदर्शनं कार्यमिति प्रतिपाद्य, पुनस्तृतीयचतुर्थयोर्ज्ञानयोगाधिकारदशापन्नस्यापि कर्मनिष्ठैव ज्यायसी, सैव ज्ञाननिष्ठानिरपेक्षा आत्मप्राप्तौ साधनमिति कर्मनिष्ठां प्रशंससि— इति। तत्रैतयोर्ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावे यदेकं सौकर्याच्छैघ्र्याच्च श्रेयः— श्रेष्ठमिति सुनिश्चितम्, तन्मे ब्रूहि ॥ १ ॥

श्रीभगवानुवाच—

संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

संन्यासः— ज्ञानयोगः, कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निश्श्रेयसकरौ। तयोस्तु कर्मसंन्यासात्— ज्ञानयोगात् कर्मयोग एव विशिष्यते ॥ २ ॥

कुत इत्यत्राह—

ज्ञेयस्स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

यः कर्मयोगी तदन्तर्गतात्मानुभवतृप्तस्तद्व्यतिरिक्तं किमपि न काङ्क्षति, तत एव किमपि न द्वेष्टि, तत एव द्वन्द्वसहश्च ; स नित्यसंन्यासी— नित्यज्ञाननिष्ठ इति ज्ञेयः। स हि सुकरकर्मयोगनिष्ठतया सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावेऽन्योन्यनैरपेक्ष्यमाह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

ज्ञानयोगकर्मयोगौ फलभेदात्पृथग्भूतौ ये प्रवदन्ति, ते बालाः— अनिष्पन्नज्ञानाः ; न पण्डिताः— अकृत्स्नविदः। कर्मयोगो ज्ञानयोगमेव साधयति ; ज्ञानयोग[एक एव]स्त्वेक आत्मावलोकनं साधयतीति तयोः फलभेदेन पृथक्त्वं वदन्तो न पण्डिता इत्यर्थः। उभयोरात्मावलोकनैकफलयोरेकफलत्वेन एकमप्यास्थितस्तदेव फलं लभते ॥ ४ ॥

एतदेव विवृणोति—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

सांख्यैः— ज्ञाननिष्ठैः। यदात्मावलोकनरूपं फलं प्राप्यते ; तदेव कर्मयोगनिष्ठैरपि प्राप्यते। एवमेकफलत्वेनैकं— वैकल्पिकं सांख्यं योगं च यः पश्यति, स पश्यति— स एव पण्डित इत्यर्थः ॥ ५ ॥

इयान् विशेष इत्याह—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

संन्यासः— ज्ञानयोगस्तु, अयोगतः— कर्मयोगादृते, प्राप्तुमशक्यः ; योगयुक्तः— कर्मयोगयुक्तः, स्वयमेव मुनिः— आत्ममननशीलः, सुखेन कर्मयोगं साधयित्वा नचिरेण— अल्पेनैव कालेन, ब्रह्माधिगच्छति—

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मानं प्राप्नोति । ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगं साधयति; दुःखसाध्यत्वादात्मानं चिरेण प्राप्नोतीत्यर्थः ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

कर्मयोगयुक्तस्तु शास्त्रीये परमपुरुषाराधनरूपे विशुद्धे कर्मणि वर्तमानः तेन विशुद्धमनाः, विजितात्मा— स्वाभ्यस्ते कर्मणि व्यापृतमनस्त्वेन सुखेन विजितमनाः, ततएव जितेन्द्रियः, कर्तुरात्मनो याथात्म्यानुसन्धाननिष्ठतया सर्वभूतात्मभूतात्मा— सर्वेषां देवादिभूतानाम् आत्मभूत आत्मा यस्यासौ सर्वभूतात्मभूतात्मा; आत्मयाथात्म्यमनुसन्दधानस्य हि देवादीनां स्वस्य चैकाकार आत्मा; देवादिभेदानां प्रकृतिपरिणामविशेषरूपतयाऽऽत्माकारत्वासंभवात् । प्रकृतिवियुक्तस्सर्वत्र देवादिदेहेषु ज्ञानैकाकारतया समानाकार इति * निर्दोषं हि समं ब्रह्म (१९) इत्यनन्तरमेव वक्ष्यते । स एवंभूतः कर्म कुर्वन्नपि अनात्मन्यात्माभिमानेन न लिप्यते— न संबध्यते । अतोऽचिरेणात्मानं प्राप्नोतीत्यर्थः ॥ ७ ॥

यतस्सौकर्याच्छैघ्र्याच्च कर्मयोग एव श्रेयान्, अतस्तदपेक्षितं शृणु—

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

एवमात्मतत्त्ववित् श्रोत्रादीनि ज्ञानेन्द्रियाणि, वागादीनि च कर्मेन्द्रियाणि, प्राणाश्च स्वविषयेषु वर्तन्त इति धारयन्— अनुसन्दधानो नाहं किंचित्करोमीति मन्येत: ज्ञानैकस्वभावस्य मम कर्ममूलेन्द्रियप्राणसंबन्धकृतमीदृशं कर्तृत्वं न स्वरूपप्रयुक्तमिति मन्येतेत्यर्थः ॥ ८, ९ ॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

ब्रह्मशब्देन प्रकृतिरिहोच्यते । * मम योनिर्महद्ब्रह्म (१४. ३) इति हि वक्ष्यते । इन्द्रियाणां प्रकृतिपरिणामविशेषरूपत्वेन इन्द्रियाकारेणावस्थितायां प्रकृतौ * पश्यञ्च्छृण्वन् इत्याद्युक्तप्रकारेण कर्माण्यादाय, फलसङ्गं त्यक्त्वा नैव किंचित्करोमीति यः कर्माणि करोति, सः प्रकृतिसंसृष्टतया वर्तमानोऽपि प्रकृत्यात्माभिमानरूपेण बन्धहेतुना पापेन न लिप्यते । पद्मपत्रमिवाम्भसा— यथा पद्मपत्रमम्भसा संसृष्टमपि न लिप्यते तथा न लिप्यत इत्यर्थः ॥ १० ॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कायमनोबुद्धीन्द्रियसाध्यं कर्म स्वर्गादिफलसङ्गं त्यक्त्वा योगिन आत्मविशुद्धये कुर्वन्ति; आत्मगत-प्राचीनकर्मबन्धविनाशाय कुर्वन्तीत्यर्थः ॥ ११ ॥

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते॥ १२॥

युक्तः— आत्मव्यतिरिक्तफलेष्वचपलः आत्मैकप्रवणः, कर्मफलं त्यक्त्वा केवलमात्मशुद्धये कर्मानुष्ठाय, नैष्ठिकीं शान्तिमाप्नोति— स्थिरामात्मानुभवरूपां निर्वृतिमाप्नोति। अयुक्तः— आत्मव्यतिरिक्तफलेषु चपलः आत्मावलोकनविमुखः, कामकारेण फले सक्तः, कर्माणि कुर्वन् नित्यं कर्मभिर्बध्यते— नित्यसंसारी भवति। अतः फलसङ्गरहितः इन्द्रियाकारेण परिणतायां प्रकृतौ कर्माणि संन्यस्य आत्मनो बन्धमोचनायैव कर्माणि कुर्वीतेत्युक्तं भवति ॥ १२ ॥

अथ देहाकारेण परिणतायां प्रकृतौ कर्तृत्वसंन्यास उच्यते—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥ १३॥

आत्मनः प्राचीनकर्ममूलदेहसंबन्धप्रयुक्तमिदं कर्मणां कर्तृत्वम्, न स्वरूपप्रयुक्तमिति विवेकविषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे संन्यस्य देही स्वयं वशी देहाधिष्ठानप्रयत्नमकुर्वन् देहं च नैव कारयन् सुखमास्ते ॥ १३ ॥

साक्षादात्मनस्स्वाभाविकं रूपमाह—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥

अस्य देवतिर्यङ्मनुष्यस्थावरात्मना प्रकृतिसंसर्गेण वर्तमानस्य लोकस्य देवाद्यसाधारणं कर्तृत्वं तत्तद-साधारणानि कर्माणि तत्तत्कर्मजन्यदेवादिफलसंयोगं च, अयं प्रभुः— अकर्मवश्यः स्वाभाविकस्वरूपेणावस्थित आत्मा न सृजति— नोत्पादयति। कस्तर्हि? स्वभावस्तु प्रवर्तते। स्वभावः— प्रकृतिवासना; अनादिकालप्रवृत्त-पूर्वपूर्वकर्मजनितदेवाद्याकारप्रकृतिसंसर्गकृततत्तदात्माभिमानजनितवासनाकृतमीदृशं कर्तृत्वादिकं सर्वम्; न स्वरूप-प्रयुक्तमित्यर्थः ॥ १४ ॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥

कस्यचित् स्वसंबन्धितयाऽभिमतस्य पुत्रादेः पापं— दुःखं, नादत्ते— नापनुदति। कस्यचित् प्रतिकूल-तयाऽभिमतस्य सुकृतं— सुखं च, नादत्ते— नापनुदति। यतोऽयं विभुः न क्वाचित्कः, न देवादिदेहाद्यसाधारण-

Digitization by Arya Samaj Charitable Foundation, Chennai

देशः, अत एव न कस्यचित्संबन्धी, न कस्यचित् प्रतिकूलश्च । सर्वमिदं वासनाकृतम् । एवंस्वभावस्य कथमियं विपरीतवासनोत्पद्यते ? अज्ञानेनावृतं ज्ञानं— ज्ञानविरोधिना पूर्वपूर्वकर्मणा स्वफलानुभवयोग्यत्वाय अस्य ज्ञानमावृतं— संकुचितम् । तेन ज्ञानावरणरूपेण कर्मणा देवादिदेहसंयोगस्तत्तदात्माभिमानरूपमोहश्च जायते । ततश्च तथाविधात्माभिमानवासना, तदुचितकर्मवासना च : वासनातो विपरीतात्माभिमानः, कर्मारम्भश्चोपपद्यते ॥ १५ ॥

* सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि । (४. ३६), * ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा । (४. ३७), * न हि ज्ञानेन सदृशं पवित्रम् (४. ३८) इति पूर्वोक्तं स्वकाले संगमयति—

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

एवं वर्तमानेषु सर्वेष्वात्मसु येषामात्मनामुक्तलक्षणेनात्मयाथात्म्योपदेशजनितेन आत्मविषयेण अहरहरभ्यासाधेयातिशयेन निरतिशयपवित्रेण ज्ञानेन, तत्— ज्ञानावरणमनादिकालप्रवृत्तानन्तकर्मसंचयरूपमज्ञानं नाशितम्, तेषां तत् स्वाभाविकं परं ज्ञानमपरिमितमसंकुचितमादित्यवत्सर्वं यथावस्थितं प्रकाशयति । तेषामिति विनष्टाज्ञानानां बहुत्वाभिधानादात्मस्वरूपबहुत्वम् * न त्वेवाहं जातु नासम् (२. १२) इत्युपक्रमावगतमत्र स्पष्टतरमुक्तम् । न चेदं बहुत्वमुपाधिकृतं, विनष्टाज्ञानानामुपाधिगन्धाभावात् । * तेषामादित्यवज्ज्ञानम् इति व्यतिरेकनिर्देशात् ज्ञानस्य स्वरूपानुबन्धिधर्मत्वमुक्तम् । आदित्यदृष्टान्तेन च ज्ञातृज्ञानयोः प्रभाप्रभावतोरिवावस्थानं च । तत एव संसारदशायां ज्ञानस्य कर्मणा संकोचो मोक्षदशायां विकासश्चोपपन्नः ॥ १६ ॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

तद्बुद्धयः— तथाविधात्मदर्शनाध्यवसायाः, तदात्मानः— तद्विषयमनसः, तन्निष्ठाः— तदभ्यासनिरताः, तत्परायणाः— तदेव परमप्रयोजनमिति मन्वानाः, एवमभ्यस्यमानेन ज्ञानेन निर्धूतप्राचीनकल्मषाः तथाविधमात्मानमपुनरावृत्तिं गच्छन्ति । यदवस्थादात्मनः पुनरावृत्तिर्न विद्यते, स आत्मा अपुनरावृत्तिः ; स्वेन रूपेणावस्थितमात्मानं गच्छन्तीत्यर्थः ॥ १७ ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

विद्याविनयसंपन्ने, केवलब्राह्मणे, गोहस्तिश्वश्वपचादिष्वत्यन्तविषमाकारतया प्रतीयमानेष्वात्मसु, पण्डिताः— आत्मयाथात्म्यविदः, ज्ञानैकाकारतया सर्वत्र समदर्शिनः । विषमाकारस्तु प्रकृतेः, नात्मनः : आत्मा तु सर्वत्र ज्ञानैकाकारतया सम इति पश्यन्तीत्यर्थः ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥

इहैव— साधनानुष्ठानदशायामेव, तैस्सर्गो जितः— संसारो जितः; येषामुक्तरीत्या सर्वेष्वात्मसु साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म— प्रकृतिसंसर्गदोषवियुक्ततया सममात्मवस्तु हि ब्रह्म। आत्मसाम्ये स्थिताश्चेद्ब्रह्मणि स्थिता एव ते; ब्रह्मणि स्थितिरेव हि संसारजयः। आत्मसु ज्ञानैकाकारतया साम्यमेवानुसन्दधाना मुक्ता एवेत्यर्थः ॥ १९ ॥

येन प्रकारेणावस्थितस्य कर्मयोगिनस्समदर्शनरूपो ज्ञानविपाको भवति, तं प्रकारमुपदिशति—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

यादृशदेहस्थस्य यदवस्थस्य प्राचीनकर्मवासनया यत्प्रियं भवति, यच्चाप्रियम्, तदुभयं प्राप्य हर्षोद्वेगौ न कुर्यात्। कथम्? स्थिरबुद्धिः— स्थिरे आत्मनि बुद्धिर्यस्य सः स्थिरबुद्धिः, असंमूढः— अस्थिरेण शरीरेण स्थिरमात्मानमेकीकृत्य मोहः— संमोहः, तद्रहितः। तच्च कथम्? ब्रह्मविद्ब्रह्मणि स्थितः— उपदेशेन ब्रह्मवित्सन् तस्मिन् ब्रह्मण्यभ्यासयुक्तः। एतदुक्तं भवति— तत्त्वविदामुपदेशेन आत्मयाथात्म्यविद्भूत्वा तत्रैव यतमानो देहात्माभिमानं परित्यज्य स्थिररूपात्मावलोकनप्रियानुभवे व्यव[सि]स्थितः अस्थिरे प्राकृते प्रियाप्रिये प्राप्य हर्षोद्वेगौ न कुर्यात्— इति ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यस्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

एवमुक्तेन प्रचारेण बाह्यस्पर्शेषु— आत्मव्यतिरिक्तविषयानुभवेषु, असक्तात्मा— असक्तमनाः अन्तरात्मन्येव यस्सुखं विन्दति— लभते; स प्रकृत्यभ्यासं विहाय ब्रह्मयोगयुक्तात्मा— ब्रह्माभ्यासयुक्तमनाः ब्रह्मानुभवरूपमक्षयं सुखं प्राप्नोति ॥ २१ ॥

प्राकृतस्य भोगस्य सुत्यजतामाह—

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

विषयेन्द्रियस्पर्शजाः ये भोगाः दुःखयोनयस्ते— दुःखोदर्काः, आद्यन्तवन्तः— अल्पकालवर्तिनो ह्युपलभ्यन्ते। न तेषु तद्याथात्म्यविद्रमते ॥ २२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ २३॥

शरीरमोक्षणात् प्रागिहैव— साधनानुष्ठानदशायामेव, आत्मानुभवप्रीत्या कामक्रोधोद्भवं वेगं सोढुं— निरोद्धुं यः शक्नोति, स युक्तः— आत्मानुभवायार्हः। स एव शरीरविमोक्षोत्तरकालमात्मानुभवैकसुखस्संपत्स्यते॥

योऽन्तस्सुखोऽन्तराराmस्तथाऽन्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥

यो बाह्यविषयानुभवं सर्वं विहाय अन्तस्सुखः— आत्मानुभवैकसुखः, अन्तरारामः— आत्मैकोद्यानः, स्वगुणैरात्मैव सुखवर्धको यस्य स तथोक्तः, तथाऽन्तर्ज्योतिः— आत्मैकज्ञानो यो वर्तते, स ब्रह्मभूतो योगी, ब्रह्मनिर्वाणम्— आत्मानुभवसुखं प्राप्नोति॥ २४॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानस्सर्वभूतहिते रताः॥ २५॥

छिन्नद्वैधाः— शीतोष्णादिद्वन्द्वैर्विमुक्ताः, यतात्मानः— आत्मन्येव नियमितमनसः, सर्वभूतहिते रताः— आत्मवत्सर्वेषां भूतानां हितेष्वेव निरताः, ऋषयः— द्रष्टारः आत्मावलोकनपराः, य एवंभूतास्ते क्षीणाशेषात्मप्राप्तिविरोधिकल्मषाः ब्रह्मनिर्वाणं लभन्ते॥ २५॥

उक्तलक्षणानां ब्रह्मात्यन्तसुलभमित्याह—

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम्॥ २६॥

कामक्रोधवियुक्तानां, यतीनां— यतनशीलानां, यतचेतसां— नियमितमनसां, विजितात्मनां— विजितमनसां, ब्रह्मनिर्वाणमभितो वर्तते, एवंभूतानां हस्तस्थं ब्रह्मनिर्वाणमित्यर्थः॥ २६॥

उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति—

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः। प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥ २७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः। विगतेच्छाभयक्रोधो यस्सदा मुक्त एव सः॥ २८॥

बाह्यान् विषयस्पर्शान् बहिः कृत्वा— बाह्येन्द्रियव्यापारं सर्वमुपसंहृत्य, योगयोग्यासने ऋजुकाय उपविश्य, चक्षुषी भ्रुवोरन्तरे— नासाग्रे विन्यस्य, नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा— उच्छ्वास-

Digitization by Arya Samaj Charitable Foundation, Chennai

निश्श्वासौ समगती कृत्वा, आत्मावलोकनादन्यत्र प्रवृत्त्यनर्हेन्द्रियमनोबुद्धिः, तत एव विगतेच्छाभयक्रोधः, मोक्षपरायणः— मोक्षैकप्रयोजनः, मुनिः— आत्मावलोकनशीलः यः, सः सदा मुक्त एव— साध्यदशायामिव साधनदशायामपि मुक्त एवेत्यर्थः ॥ २७, २८ ॥

उक्तस्य नित्यनैमित्तिककर्मेतिकर्तव्यताकस्य कर्मयोगस्य योगशिरस्कस्य सुशकतामाह—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ॥

यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिमृच्छति— कर्मयोगकरण एव सुखमृच्छति । सर्वलोकमहेश्वरं— सर्वेषां लोकेश्वराणामपीश्वरम् ; * तमीश्वराणां परमं महेश्वरम्, इति हि श्रूयते । मां सर्वलोकमहेश्वरं सर्वसुहृदं ज्ञात्वा मदाराधनरूपः कर्मयोग इति सुखेन तत्र प्रवर्तत इत्यर्थः ; सुहृद आराधनाय हि सर्वे प्रयतन्ते ॥ २९ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये पञ्चमोऽध्यायः ॥५॥

॥ अथ षष्ठोऽध्यायः ॥ ६ ॥

श्रीभगवानुवाच—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्नचाक्रियः ॥ १ ॥

उक्तः कर्मयोगस्सपरिकरः ; इदानीं कर्मयोगसाध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते । तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रढयितुं ज्ञानाकारः कर्मयोगो योगशिरस्कोऽनूद्यते । कर्मफलं— स्वर्गादिकमनाश्रितः, कार्यं— कर्मानुष्ठानमेव कार्यम्, सर्वात्मनाऽस्मत्सुहृद्भूतपरमपुरुषाराधनरूपतया कर्मैव मम प्रयोजनं न तत्साध्यं किंचिदिति यः कर्म करोति ; स संन्यासी च— ज्ञानयोगनिष्ठश्च ; योगी च— कर्मयोगनिष्ठश्च ; आत्मावलोकनरूपयोगसाधनभूतोभयनिष्ठ इत्यर्थः । न निरग्निर्नचाक्रियः— न चोदितयज्ञादिकर्मस्वप्रवृत्तः, न च केवलज्ञाननिष्ठः ; तस्य हि ज्ञाननिष्ठैव, कर्मयोगनिष्ठस्य तूभयमस्तीत्यभिप्रायः ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

उक्तलक्षणकर्मयोगे ज्ञानमप्यस्तीत्याह—

यं संन्यास इति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥

यं संन्यास इति— ज्ञानयोग इति, आत्मयाथात्म्यज्ञानमिति प्राहुः, तं कर्मयोगमेव विद्धि । तदुपपादयति— न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चनेति । आत्मयाथात्म्यानुसन्धानेन अनात्मनि प्रकृतावात्मसङ्कल्पः संन्यस्तः— परित्यक्तो येन स संन्यस्तसङ्कल्पः, अनेवंभूतः असंन्यस्तसङ्कल्पः । न ह्युक्तेषु कर्मयोगिष्वनेवंभूतः कश्चन कर्मयोगी भवति ? * यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः (४. १९) इति ह्युक्तम् ॥ २ ॥

कर्मयोग एवाप्रमादेन योगं साधयतीत्याह—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

योगम्— आत्मावलोकनं प्राप्तुमिच्छोर्मुमुक्षोः कर्मयोग एव कारणमुच्यते । तस्यैव योगारूढस्य— प्रतिष्ठितयोगस्यैव, शमः— कर्मनिवृत्तिः कारणमुच्यते । यावदात्मावलोकनरूपमोक्षावाप्ति कर्म कार्यमित्यर्थः ॥ ३ ॥

कदा प्रतिष्ठितयोगो भवतीत्यत्राह—

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

यदाऽयं योगी स्वात्मैकानुभवस्वभावतया इन्द्रियार्थेषु— आत्मव्यतिरिक्तप्राकृतविषयेषु तत्संबन्धिषु च कर्मसु नानुषज्जते— न सङ्गमर्हति : तदा हि सर्वसङ्कल्पसंन्यासी योगारूढ इत्युच्यते । तस्मादारुरुक्षोर्विषयानुभवार्हतया तदननुषङ्गाभ्यासरूपः कर्मयोग एव योगनिष्पत्तिकारणम् । अतो विषयाननुषङ्गाभ्यासरूपं कर्मयोगमेवारुरुक्षुः कुर्यात् ॥ ४ ॥

तदेवाह—

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

आत्मना— मनसा ; विषयाननुषक्तेन मनसा आत्मानमुद्धरेत् । तद्विपरीतेन मनसा आत्मानं नावसादयेत् । आत्मैव— मन एव ह्यात्मनो बन्धुः ; तदेवात्मनो रिपुः ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥ ६॥

येन पुरुषेण स्वेनैव स्वमनो विषयेभ्यो जितम्, तन्मनस्तस्य बन्धुः। अनात्मनः— अजितमनसः स्वकीयमेव मनः स्वस्य शत्रुवत् शत्रुत्वे वर्तेत— स्वनिश्श्रेयसविपरीते वर्तेतेत्यर्थः। यथोक्तं भगवता पराशरेणापि— * मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः॥ इति॥ ६॥

योगारम्भयोग्याऽवस्थोच्यते—

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः॥ ७॥

शीतोष्णसुखदुःखेषु मानावमानयोश्च जितात्मनः— जितमनसः, विकाररहितमनसः, प्रशान्तस्य मनसि परमात्मा समाहितः— सम्यगाहितः। स्वरूपेणावस्थितः प्रत्यगात्माऽत्र परमात्मेत्युच्यते, तस्यैव प्रकृतत्वात्। तस्यापि पूर्वपूर्वावस्थापेक्षया परमात्मत्वात्। आत्मा परं समाहित इति वाऽन्वयः॥ ७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ ८॥

ज्ञानविज्ञानतृप्तात्मा— आत्मस्वरूपविषयेण ज्ञानेन, तस्य च प्रकृतिविसजातीयाकारविषयेण विज्ञानेन च तृप्तमनाः, कूटस्थः— देवाद्यवस्थास्वनुवर्तमानसर्वसाधारणज्ञानैकाकारात्मनि स्थितः, तत एव विजितेन्द्रियः, समलोष्टाश्मकाञ्चनः— प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुविशेषेषु भोग्यत्वाभावाल्लोष्टाश्मकाञ्चनेषु समप्रयोजनो यः कर्मयोगी, स युक्त इत्युच्यते— आत्मावलोकनरूपयोगाभ्यासार्ह इत्युच्यते॥ ८॥

तथा च—

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥ ९॥

वयोविशेषानङ्गीकारेण स्वहितैषिणस्सुहृदः; सवयसो हितैषिणो मित्राणि, अरयो निमित्ततोऽनर्थेच्छवः; उभयहेत्वभावात् उभयरहिता उदासीनाः; जन्मत एवोभयरहिता मध्यस्थाः; जन्मत एवानिष्टेच्छवो द्वेष्याः; जन्मत एव हितैषिणो बन्धवः; साधवो धर्मशीलाः; पापाः पापशीलाः; आत्मैकप्रयोजनतया सुहृन्मित्रादिभिः प्रयोजनाभावाद्विरोधाभावाच्च तेषु समबुद्धिर्योगाभ्यासार्हत्वे विशिष्यते॥ ९॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

योगी— उक्तप्रकारकर्मयोगनिष्ठः, सततम्— अहरहर्योगकाले, आत्मानं युञ्जीत— आत्मानं युक्तं कुर्वीत, स्वदर्शननिष्ठं कुर्वीतेत्यर्थः ; रहसि— जनवर्जिते निश्शब्दे देशे स्थितः, एकाकी— तत्रापि न सद्वितीयः, यतचित्तात्मा— यतचित्तमनस्कः, निराशीः— आत्मव्यतिरिक्ते कृत्स्ने वस्तुनि निरपेक्षः, अपरिग्रहः— तद्व्यतिरिक्ते कस्मिंश्चिदपि ममतारहितः ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ॥ ११ ॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

शुचौ देशे— अशुचिभिः पुरुषैरनधिष्ठिते अपरिगृहीते च, अशुचिभिर्वस्तुभिरसंस्पृष्टे च पवित्रभूते देशे, दार्वादिनिर्मितं नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरमासनं प्रतिष्ठाप्य तस्मिन्मनःप्रसादकरे सापाश्रय उपविश्य योगैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः— सर्वात्मनोपसंहृतचित्तेन्द्रियक्रियः, आत्मविशुद्धये— बन्धनिवृत्तये, योगं युञ्ज्यात्— आत्मावलोकनं कुर्वीत ॥ ११, १२ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरम् । संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः । मनस्संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

कायशिरोग्रीवं समम् अचलं सापाश्रयतया स्थिरं धारयन्, दिशश्चानवलोकयन्, स्वनासिकाग्रं संप्रेक्ष्य, प्रशान्तात्मा— अत्यन्तनिर्वृतमनाः, विगतभीर्ब्रह्मचर्ययुक्तो मनस्संयम्य मच्चित्तो युक्तः— अवहितः मत्पर आसीत— मामेव चिन्तयन्नासीत ॥ १३, १४ ॥

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

एवं मयि परस्मिन् ब्रह्मणि पुरुषोत्तमे मनसश्शुभाश्रये सदा आत्मानं— मनो युञ्जन्, नियतमानसः— मत्स्पर्शपवित्रीकृतमानसतया निश्चलमानसः, मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति— निर्वाणकाष्ठारूपां, मत्संस्थां— मयि संस्थितां शान्तिमधिगच्छति ॥ १५ ॥

एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतां मनसो भगवति शुभाश्रये स्थितिमभिधायान्यदपि योगोपकरणमाह—

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः । न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

अत्यशनानशने योगविरोधिनी, अतिविहाराविहारौ च, तथाऽतिमात्रस्वप्नजागर्ये ; तथा चात्यायासानायासौ। मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य सकलदुःखहा— बन्धनाशनो योगस्संपन्नो भवति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निस्स्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

यदा प्रयोजनविषयं चित्तमात्मन्येव विनियतम्— विशेषेण नियतं निरतिशयप्रयोजनतया तत्रैव नियतं निश्चलमवतिष्ठते, तदा सर्वकामेभ्यो निस्स्पृहस्सन् युक्त इत्युच्यते— योगार्ह इत्युच्यते ॥ १८ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

निवातस्थो दीपो यथा नेङ्गते— न चलति, अचलस्सप्रभस्तिष्ठति ; यतचित्तस्य— निवृत्तसकलेतरमनोवृत्तेः, योगिनः आत्मनि योगं युञ्जतः आत्मस्वरूपस्य सोपमा ; निवातस्थतया निश्चलसप्रभदीपवन्निवृत्तसकलेतरमनोवृत्तितया निश्चलो ज्ञानप्रभ आत्मा तिष्ठतीत्यर्थः ॥ १९ ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्। वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥२२॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्। स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

योगसेवाया हेतुना सर्वत्र निरुद्धं चित्तं यत्र योगे उपरमते— अतिशयितसुखमिदमिति रमते, यत्र च योगे आत्मना— मनसा, आत्मानं पश्यन् अन्यनिरपेक्षमात्मन्येव तुष्यति, यत्तदतीन्द्रियमात्मबुद्ध्येकग्राह्यमात्यन्तिकं सुखम्, यत्र च योगे वेत्ति— अनुभवति, यत्र च योगे स्थितः सुखातिरेकेण तत्त्वतस्तद्भावान्न चलति, यं योगं लब्ध्वा योगाद्विरतस्तमेव काङ्क्षमाणो नापरं लाभं मन्यते, यस्मिंश्च योगे स्थितो विरतोऽपि गुणवत्पुत्रवियोगादिना गुरुणाऽपि दुःखेन न विचाल्यते, तं दुःखसंयोगवियोगं— दुःखसंयोगप्रत्यनीकाकारं योगशब्दाभिधेयं विद्यात् ; स एवंरूपो योग इत्यारम्भदशायां निश्चयेनानिर्विण्णचेतसा— हृष्टचेतसा, योगो योक्तव्यः ॥ २०—२३ ॥

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥
शनैश्शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥

स्पर्शजास्सङ्कल्पजाश्चेति द्विविधाः कामाः ; स्पर्शजाः— शीतोष्णादयः, सङ्कल्पजाः— पुत्रक्षेत्रादयः ; तत्र सङ्कल्पप्रभवाः स्वरूपेणैव त्यक्तुं शक्याः, तान्सर्वान्मनसैव तदनन्वयानुसन्धानेन त्यक्त्वा स्पर्शजेष्ववर्जनीयेषु तन्निमित्तहर्षोद्वेगौ त्यक्त्वा, समन्ततः सर्वस्माद्विषयात्सर्वमिन्द्रियग्रामं विनियम्य शनैश्शनैर्धृतिगृहीतया— विवेकविषयया बुद्ध्या सर्वस्मादात्मव्यतिरिक्तादुपरम्य आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ २४, २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

चलस्वभावतयाऽऽत्मन्यस्थिरं मनः यतोयतो विषयप्रावण्यहेतोः बहिः निश्चरति, ततस्ततो यत्नेन मनो नियम्यात्मन्येव अतिशयितसुखभावनया वशं नयेत् ॥ २६ ॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

प्रशान्तमनसम्— आत्मनि निश्चलमनसम्— आत्मन्यस्तमनसम्, तत एव हेतोर्दग्धाशेषकल्मषम्, तत एव शान्तरजसं— विनष्टरजोगुणम्, तत एव ब्रह्मभूतं— स्वस्वरूपेणावस्थितमेनं योगिनम्, आत्मस्वरूपानुभवरूपमुत्तमं सुखमुपैति ; हीति हेतौ ; उत्तमसुखरूपत्वादात्मस्वरूपस्येत्यर्थः ॥ २७ ॥

एवं युञ्जन् सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

एवमुक्तप्रकारेणात्मानं युञ्जन् तेनैव विगतप्राचीनसमस्तकल्मषो ब्रह्मसंस्पर्शं— ब्रह्मानुभवरूपं सुखमत्यन्तमपरिमितं सुखेन— अनायासेन, सदाऽश्नुते ॥ २८ ॥

अथ योगविपाकदशा चतुष्प्रकारोच्यते—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

स्वात्मनः परेषां च भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्याद्वैषम्यस्य च प्रकृतिगतत्वाद्योगयुक्तात्मा प्रकृतिवियुक्तेष्वात्मसु सर्वत्र ज्ञानैकाकारतया समदर्शनः, सर्वभूतस्थं स्वात्मानं सर्वभूतानि च स्वात्मनीक्षते— सर्वभूतसमानाकारं स्वात्मानं स्वात्मसमानाकाराणि च सर्वभूतानि पश्यतीत्यर्थः । एकस्मिन्नात्मनि दृष्टे सर्वस्यात्मवस्तुनस्तत्साम्यात्सर्वमात्मवस्तु दृष्टं भवतीत्यर्थः । * सर्वत्र समदर्शनः इति वचनात, * योऽयं योगस्त्वया प्रोक्तस्साम्येन इत्यनुभाषणाच्च, * निर्दोषं हि समं ब्रह्म इति वचनाच्च ॥ २९ ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

ततो(ऽपि) विपाकदशापन्नो मम साधर्म्यमुपागतः * निरञ्जनः परमं साम्यमुपैति, इत्युच्यमानं सर्वस्यात्मवस्तुनो विधूतपुण्यपापस्य स्वरूपेणावस्थितस्य मत्साम्यं पश्यन्, यस्सर्वत्रात्मवस्तुनि मां पश्यति ; सर्वमात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्तु च मयि पश्यति ; अन्योन्यसाम्यादन्यतरदर्शनेन अन्यतरदपीदृशमिति पश्यति ; तस्य स्वात्म(स्व)रूपं पश्यतोऽहं तत्साम्यान्न प्रणश्यामि— नादर्शनमुपयामि ; ममापि मां पश्यतो मत्साम्यात् स्वात्मानं मत्सममवलोकयन् स नादर्शनमुपयाति ॥ ३० ॥

ततोऽपि विपाकदशामाह—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

योगदशायां सर्वभूतस्थितं मामसंकुचितज्ञानैकाकारतया एकत्वमास्थितः प्राकृतभेदपरित्यागेन सुदृढं यो भजते, स योगी व्युत्थानकालेऽपि यथातथा वर्तमानः स्वात्मानं सर्वभूतानि च पश्यन् मयि वर्तते— मामेव पश्यति ; स्वात्मनि सर्वभूतेषु च सर्वदा मत्साम्यमेव पश्यतीत्यर्थः ॥ ३१ ॥

ततोऽपि काष्ठामाह—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

स्वात्मनश्चान्येषां चात्मनामसंकुचितज्ञानैकाकारतयौपम्येन स्वात्मनि चान्येषु च सर्वत्र वर्तमानं पुत्रजन्मादिरूपं सुखं तन्मरणादिरूपं च दुःखमसंबन्धसाम्यात्समं यः पश्यति, परपुत्रजन्ममरणादिसमं स्वपुत्रजन्ममरणादिकं यः पश्यतीत्यर्थः ; स योगी परमो मतः— योगकाष्ठां गतो मतः ॥ ३२ ॥

अर्जुन उवाच—

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन । एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

योऽयं देवमनुष्यादिभेदेन जीवेश्वरभेदेन चात्यन्तभिन्नतयैतावन्तं कालमनुभूतेषु सर्वेष्वात्मसु ज्ञानैकाकारतया परस्परसाम्येन अकर्मवश्यतया चेश्वरसाम्येन सर्वत्र समदर्शनरूपो योगस्त्वया प्रोक्तः, एतस्य योगस्य स्थिरां स्थितिं न पश्यामि, मनसश्चञ्चलत्वात् । तथा ह्यनवरताभ्यस्तविषयेष्वपि स्वत एव चञ्चलं पुरुषेणैकत्रावस्थापयितुमशक्यं मनः पुरुषं बलात्प्रमथ्य दृढमन्यत्र चरति । तस्य स्वाभ्यस्तविषयेष्वपि चञ्चलस्वभावस्य मनसस्तद्विपरीताकारात्मनि स्थापयितुं निग्रहं प्रतिकूलगतेर्महावातस्य व्यजनादिनेव सुदुष्करमहं मन्ये । मनोनिग्रहोपायो वक्तव्य इत्यभिप्रायः ॥ ३३, ३४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीभगवानुवाच—

असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

चलस्वभावतया मनो दुर्निग्रहमेवेत्यत्र न संशयः ; तथाऽप्यात्मनो गुणाकरत्वाभ्यासजनिताभिमुख्येनात्मव्यतिरिक्तेषु दोषाकरत्वदर्शनजनितवैतृष्ण्येन च कथंचिद्गृह्यते । असंयतात्मना— अजितमनसा महताऽपि बलेन योगो दुष्प्राप एव । उपायतस्तु वश्यात्मना— पूर्वोक्तेन मदाराधनरूपेणान्तर्गतज्ञानेन कर्मणा जितमनसा यतमानेनायमेव समदर्शनरूपो योगोऽवाप्तुं शक्यः ॥ ३५, ३६ ॥

अथ * नेहाभिक्रमनाशोऽस्ति (२. ४०) इत्यादावेव श्रुतं योगमाहात्म्यं यथावच्छ्रोतुमर्जुनः पृच्छति । अन्तर्गतात्मज्ञानतया योगशिरस्कतया च हि कर्मयोगस्य माहात्म्यं तत्रोदितं, तच्च योगमाहात्म्यमेव ।

अर्जुन उवाच—

अयतिश्श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति । अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

एतं मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥ ३९ ॥

श्रद्धया योगे प्रवृत्तो दृढतराभ्यासरूपयतनवैकल्येन योगसंसिद्धिमप्राप्य योगाच्चलितमानसः कां गतिं गच्छति ? उभयविभ्रष्टोऽयं छिन्नाभ्रमिव कच्चिन्न नश्यति ? यथा मेघशकलः पूर्वस्माद्बृहतो मेघाच्छिन्नः परं बृहन्तं मेघमप्राप्य मध्ये विनष्टो भवति, तथैव कच्चिन्न नश्यति ? कथमुभयविभ्रष्टता ? अप्रतिष्ठो विमूढो ब्रह्मणः पथीति, यथावस्थितं स्वर्गादिसाधनभूतं कर्म फलाभिसन्धिरहितस्यास्य पुरुषस्य स्वफलसाधनत्वेन प्रतिष्ठा न भवतीत्यप्रतिष्ठः, प्रक्रान्ते ब्रह्मणः पथि विमूढः तस्मात्पथः प्रच्युतः, अतः उभयविभ्रष्टतया किमयं नश्यत्येव ? उत न नश्यति ? तमेनं संशयमशेषतश्छेत्तुमर्हसि ; स्वतः प्रत्यक्षेण युगपत् सर्वं सदा पश्यतस्त्वत्तोऽन्यस्संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३७—३९ ॥

श्रीभगवानुवाच—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

श्रद्धया योगे प्रक्रान्तस्य तस्मात्प्रच्युतस्येह चामुत्र च विनाशो न विद्यते— प्राकृतस्वर्गादिभोगानुभवे ब्रह्मानुभवे चाभिलषितानवाप्तिरूपः प्रत्यवायाख्यानिष्टावाप्तिरूपश्च विनाशो न विद्यत इत्यर्थः । न हि निरतिशयकल्याणरूपयोगकृत्कश्चित्कालत्रयेऽपि दुर्गतिं गच्छति ॥ ४० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कथमयं भविष्यतीत्यत्राह—

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीस्समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

यज्जातीयभोगाभिकाङ्क्षया योगात्प्रच्युतोऽयमतिपुण्यकृतां प्राप्यान् लोकान् प्राप्य तज्जातीयानतिकल्याणान् भोगान् योगमाहात्म्यादेव भुञ्जानो यावत्तद्भोगतृष्णावसानं शाश्वतीस्समास्तत्रोषित्वा तस्मिन् भोगे वितृष्णः शुचीनां श्रीमतां योगोपक्रमयोग्यानां कुले योगोपक्रमे भ्रष्टो योगमाहात्म्याज्जायते ॥ ४१ ॥

अथवा योगिनामेव कुले [महति] भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

परिपक्वयोगश्चलितश्चेत् योगिनां धीमतां योगं कुर्वतां स्वयमेव योगोपदेशक्षमाणां (महतां) कुले भवति । तदेतदुभयविधं योगयोग्यानां योगिनां च कुले जन्म, लोके प्राकृतानां दुर्लभतरम् ; एतत्तु योगमाहात्म्यकृतम् ॥ ४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।

तत्र जन्मनि तमेव पौर्वदैहिकं योगविषयं बुद्धिसंयोगं लभते । ततस्सुप्तप्रबुद्धवद्भूयस्संसिद्धौ यतते । यथा नान्तरायहतो भवति ; तथा यतते । तेन पूर्वाभ्यासेन— पूर्वेण योगविषयेणाभ्यासेन, सः योगभ्रष्टो ह्यवशोऽपि योग एव ह्रियते । प्रसिद्धं ह्येतद्योगमाहात्म्यमित्यर्थः ॥ ४३ ॥

जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

अप्रवृत्तयोगो योगे जिज्ञासुरपि ततश्चलितमानसः पुनरपि तामेव जिज्ञासां प्राप्य कर्मयोगादिकं योगमनुष्ठाय शब्दब्रह्मातिवर्तते । शब्दब्रह्म— देवमनुष्यपृथिव्यन्तरिक्षस्वर्गादिशब्दाभिलापयोग्यं ब्रह्म प्रकृतिः । प्रकृतिबन्धाद्विमुक्तो देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानानन्दैकतानमात्मानं प्राप्नोतीत्यर्थः ॥ ४४ ॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

यत एवं योगमाहात्म्यम्, ततोऽनेकजन्मार्जितपुण्यसञ्चयैः संशुद्धकिल्बिषः संसिद्धस्संजातः प्रयत्नाद्यतमानस्तु योगी चलितोऽपि पुनः परां गतिं यात्येव ॥ ४५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अतिशयितपुरुषार्थनिष्ठतया योगिनस्सर्वस्मादाधिक्यमाह—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

केवलतपोभिर्यः पुरुषार्थस्साध्यते, आत्मज्ञानव्यतिरिक्तैर्ज्ञानैश्च यः, यश्च केवलैरश्वमेधादिभिः कर्मभिः, तेभ्यस्सर्वेभ्योऽधिकपुरुषार्थसाधनत्वाद्योगस्य तपस्विभ्यो ज्ञानिभ्यः कर्मिभ्यश्चाधिको योगी; तस्माद्योगी भवार्जुन ॥ ४६ ॥

तदेवं परविद्याङ्गभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्तम् । अथ परविद्यां प्रस्तौति—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
योगाभ्यासयोगो नाम षष्ठोऽध्यायः ॥

* योगिनामिति पञ्चम्यर्थे षष्ठी । * सर्वभूतस्थमात्मानम् (२९) इत्यादिना चतुर्विधा योगिनः प्रतिपादिताः; तेष्वन्तर्गतत्वाद्वक्ष्यमाणस्य योगिनो न निर्धारणे षष्ठी संभवति । * अपि सर्वेषामिति सर्वशब्दनिर्दिष्टास्तपस्विप्रभृतयः । तत्राप्युक्तेन न्यायेन पञ्चम्यर्थो ग्रहीतव्यः । योगिभ्योऽपि सर्वेभ्यो वक्ष्यमाणो योगी युक्ततमः । तदपेक्षया अवरत्वे तपस्विप्रभृतीनां योगिनां च न कश्चिद्विशेष इत्यर्थः; मेर्वपेक्षया सर्षपाणामिव । यद्यपि सर्षपेष्वन्योन्यन्यूनाधिकभावो विद्यते; तथाऽपि मेर्वपेक्षया अवरत्वनिर्देशस्समानः । मत्प्रियत्वातिरेकेणानन्यधारणस्वभावतया मद्गतेनान्तरात्मना— मनसा, श्रद्धावान्— अत्यर्थमत्प्रियत्वेन क्षणमात्रविश्लेषासहतया मत्प्राप्तिप्रवृत्तौ त्वरावान्, यो मां भजते, मां— विचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानपरिपूर्णनिखिलजगदुदयविभवलयलीलम्, अस्पृष्टाशेषदोषानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसङ्ख्येयकल्याणगुणगणनिधिम्, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपम्, वाङ्मनसापरिच्छेद्यस्वरूपस्वभावम्, अपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिम्, अनालोचितविशेषाशेषलोकशरण्यम्, प्रणतार्तिहरम्, आश्रितवात्सल्यैकजलधिम्, अखिलमनुजनयनविषयतां गतम्, अजहत्स्वस्वभावम्, वसुदेवगृहेऽवतीर्णम्, अनवधिकातिशयतेजसा निखिलं जगद्भासयन्तम्, आत्मकान्त्या विश्वमाप्याययन्तम्, भजते— सेवते, उपास्त इत्यर्थः । स मे युक्ततमो मतः— स सर्वेभ्यश्श्रेष्ठतमः इति सर्वं सर्वदा यथावस्थितं स्वत एव साक्षात्कुर्वन् अहं मन्ये ॥ ४७ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

इति श्रीमद्भगवद्गीताभाष्ये
॥ प्रथमषट्कं समाप्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

॥ अथ सप्तमोऽध्यायः ॥ ७ ॥

प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निरवद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सर्वभूतस्य सत्यसङ्कल्पस्य महाविभूतेः श्रीमतो नारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्वककर्मानुष्ठान-साध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमुक्तम् । इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमपुरुषस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते । तदेतदुत्तरत्र * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ (१८. ४६) इत्यारभ्य * विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते । ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ (५४) इति संक्षिप्य वक्ष्यते । उपासनं तु भक्तिरूपापन्नमेव परप्राप्त्युपायभूतमिति वेदान्तवाक्यसिद्धम् । * तमेव विदित्वाऽतिमृत्युमेति * तमेवं विद्वा-नमृत इह भवति इत्यादिनाऽभिहितं वेदनम्, * आत्मा वा अरे द्रष्टव्यः.... निदिध्यासितव्यः, * आत्मानमेव लोकमुपासीत, * सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः, * भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ इत्यादिभिरैकार्थ्यात्तत्स्मृतिसन्तानरूपं दर्शनसमाना-कारं ध्यानोपासनशब्दवाच्यमित्यवगम्यते । पुनश्च * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ इति विशेषणात् परेणात्मना वरणीयताहेतुभूतं स्मर्यमाणविषयस्यात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियरूपं स्मृतिसन्तानमेवोपासनशब्दवाच्यमिति हि निश्चीयते । तदेव हि भक्तिरित्युच्यते, * स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते, इत्यादिवचनात् । अतः * तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते, * नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ इत्यनयोरेकार्थं सिद्धं भवति ॥

तत्र सप्तमे तावदुपास्यभूतपरमपुरुषस्वरूपयाथात्म्यं, प्रकृत्या तत्तिरोधानं, तन्निवृत्तये भगवत्प्रपत्तिः, उपासकविधाभेदो, ज्ञानिनश्श्रैष्ठ्यं चोच्यते ॥

श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

मय्याभिमुख्येन सक्तमनाः— मत्प्रियत्वातिरेकेण मत्स्वरूपेण गुणैश्च चेष्टितेन मद्विभूत्या विश्लेषे सति तत्क्षणादेव विशीर्यमाणस्व[भाव]रूपतया मयि सुगाढं बद्धमनाः, मदाश्रयः— तथा स्वयं च मया विना

Digitization by Arya Samaj Charitable Foundation, Chennai

विशीर्यमाणतया मदाश्रयो मदेकाधारः, मद्योगं युञ्जन्— योक्तुं प्रवृत्तः, योगविषयभूतं मामसंशयं— निस्संशयम्, समग्रम्— सकलम्, यथा ज्ञास्यसि— येन ज्ञानेनोक्तेन ज्ञास्यसि ; तज्ज्ञानमवहितमनाः (त्वं) शृणु ॥ १ ॥

ज्ञानं तेऽहं सविज्ञानम् इदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते ॥ २ ॥

अहं ते मद्विषयमिदं ज्ञानं विज्ञानेन सहाशेषतो वक्ष्यामि ; विज्ञानम्— विविक्ताकारविषयं ज्ञानम्। यथाऽहं मद्व्यतिरिक्तात्समस्तचिदचिद्वस्तुजातान्निखिलहेयप्रत्यनीकतया नानाविधानवधिकातिशयासंख्येयकल्याणगुणगणानन्तमहाविभूतितया च विविक्तः, तेन विविक्तविषयज्ञानेन सह मत्स्वरूपविषयज्ञानं वक्ष्यामि। किं बहुना ; यत् ज्ञानं ज्ञात्वा मयि पुनरन्यत् ज्ञातव्यं नावशिष्यते ॥ २ ॥

वक्ष्यमाणस्य ज्ञानस्य दुष्प्रापतामाह—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

मनुष्याः— शास्त्राधिकारयोग्याः, तेषां सहस्रेषु कश्चिदेव सिद्धिपर्यन्तं यतते। सिद्धिपर्यन्तं यतमानानां सहस्रेषु कश्चिदेव मां विदित्वा मत्तस्सिद्धये यतते। मद्विदां सहस्रेषु कश्चिदेव तत्त्वतो यथावस्थितं मां वेत्ति। न कश्चिदित्यभिप्रायः। * स महात्मा सुदुर्लभः (१९) * मां तु वेद न कश्चन (२६) इति हि वक्ष्यते ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

अस्य विचित्रानन्तभोग्यभोगोपकरणभोगस्थानरूपेणावस्थितस्य जगतः प्रकृतिरियं गन्धादिगुणकपृथिव्यप्तेजोवाय्वाकाशादिरूपेण मनःप्रभृतीन्द्रियरूपेण महदहंकाररूपेण चाष्टधा भिन्ना मदीयेति विद्धि ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

इयं ममापरा प्रकृतिः ; इतस्त्वन्याम्— इतोऽचेतनायाश्चेतनभोग्यभूतायाः प्रकृतेर्विसजातीयाकारां जीवभूतां परां— तस्या भोक्तृत्वेन प्रधानभूतां चेतनरूपां मदीयां प्रकृतिं विद्धि ; ययेदम् अचेतनं कृत्स्नं जगद्धार्यते ॥ ५ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनीनि ब्रह्मादिस्तम्बपर्यन्तान्युच्चावचभावेनावस्थितानि चिदचिन्मिश्राणि मदीयानि सर्वाणि भूतानीत्युपधारय। मदीयप्रकृतिद्वययोनीनि हि तानि मदीयान्येव। तथा प्रकृतिद्वययोनित्वेन कृत्स्नस्य जगतः तयोर्द्वयोरपि मद्योनित्वेन मदीयत्वेन च कृत्स्नस्य जगतः अहमेव प्रभावोऽहमेव च प्रलयोऽहमेव च शेषीत्युपधारय। तयोश्चिदचित्समष्टिभूतयोः प्रकृतिपुरुषयोरपि परमपुरुषयोनित्वं श्रुतिस्मृतिसिद्धम्। * महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकी भवति, * विष्णोस्स्वरूपात्परतोदिते द्वे रूपे प्रधानं पुरुषश्च विप्र, * प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि। परमात्मा च सर्वेषामाधारः परमेश्वरः। विष्णुनामा स वेदेषु वेदान्तेषु च गीयते॥ इत्यादिका हि श्रुतिस्मृतयः॥ ६॥

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।

यथा सर्वकारणस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्यापि शेषित्वेन कारणतया शेषितया चाहं परतरः; तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परतरः। मत्तोऽन्यत्— मद्व्यतिरिक्तं ज्ञानबलादिगुणान्तरयोगि किंचिदपि परतरं नास्ति॥

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥

सर्वमिदं चिदचिद्वस्तुजातं कार्यावस्थं कारणावस्थं च मच्छरीरभूतं सूत्रे मणिगणवदात्मतयाऽवस्थिते मयि प्रोतम्— आश्रितम्। * यस्य पृथिवी शरीरम्, * यस्यात्मा शरीरम्, * एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इत्यात्मशरीरभावेनावस्थानं च जगद्ब्रह्मणोरन्तर्यामिब्राह्मणादिषु सिद्धम्॥ ७॥

अतस्सर्वस्य परमपुरुषशरीरत्वेनात्मभूतपरमपुरुषप्रकारत्वात्सर्वप्रकारः परमपुरुष एवावस्थित इति सर्वैश्शब्दैस्तस्यैवाभिधानमिति तत्तत्सामानाधिकरण्येनाह—

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः। प्रणवस्सर्ववेदेषु शब्दः खे पौरुषं नृषु॥ ८॥
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ। जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥ ९॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्। बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्॥ १०॥
बलं बलवतां चाहं कामरागविवर्जितम्। धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥ ११॥

एते सर्वे विलक्षणा भावा मत्त एवोत्पन्नाः, मच्छेषभूताः, मच्छरीरतया मय्येवावस्थिताः; अतस्तत्तत्प्रकारोऽहमेवावस्थितः॥ ८—११॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि नत्वहं तेषु ते मयि॥ १२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किं विशिष्याभिधीयते ; सात्त्विका राजसास्तामसाश्च जगति देहत्वेनेन्द्रियत्वेन भोग्यत्वेन तत्तद्धेतुत्वेन चावस्थिता ये भावाः, तान् सर्वान् मत्त एवोत्पन्नान् विद्धि ; ते मच्छरीरतया मय्येवावस्थिता इति च । नत्वहं तेषु— नाहं कदाचिदपि तदायत्तस्थितिः ; अन्यत्रात्मायत्तस्थितित्वेऽपि शरीरस्य शरीरेणात्मनस्स्थिताबप्युपकारो विद्यते ; मम तु तैर्न कश्चित्तथाविध उपकारः, केवललीलैव प्रयोजनमित्यर्थः ॥ १२ ॥

त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

तदेवं चेतनाचेतनात्मकं कृत्स्नं जगन्मदीयं कालेकाले मत्त एवोत्पद्यते, मयि च प्रलीयते, मय्येवावस्थितम्, मच्छरीरभूतम्, मदात्मकं चेत्यहमेव कारणावस्थायां कार्यावस्थायां च सर्वशरीरतया सर्वप्रकारोऽवस्थितः । अतः कारणत्वेन शेषित्वेन च ज्ञानाद्यसङ्ख्येयकल्याणगुणगणैश्चाहमेव सर्वैः प्रकारैः परतरः ; मत्तोऽन्यत्केनापि कल्याणगुणेन परतरं न विद्यते । एवंभूतं मां त्रिभ्यस्सात्त्विकराजसतामसगुणमयेभ्यो भावेभ्यः परं मदसाधारणैः कल्याणगुणैस्तत्तद्भोग्यताप्रकारैश्च परम्— उत्कृष्टतमम्, अव्ययं सदैकरूपमपि तैरेव त्रिभिर्गुणमयैर्निहीनतरैः क्षणध्वंसिभिः पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेनावस्थितैः पदार्थैर्मोहितं देवतिर्यङ्मनुष्यस्थावरात्मनाऽवस्थितं सर्वमिदं जगन्नाभिजानाति ॥ १३ ॥

कथं स्वत एवानवधिकातिशयानन्दे नित्ये सदैकरूपे लौकिकवस्तुभोग्यताप्रकारैश्चोत्कृष्टतमे त्वयि स्थितेऽप्यत्यन्तनिहीनेषु गुणमयेष्वस्थिरेषु भावेषु सर्वस्य भोक्तृवर्गस्य भोग्यत्वबुद्धिरुपजायत इत्यत्राह—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ १३= ॥

ममैषा गुणमयी— सत्त्वरजस्तमोमयी, माया यस्माद्दैवी— देवेन क्रीडाप्रवृत्तेन मयैव निर्मिता, तस्मात्सर्वैर्दुरत्यया— दुरतिक्रमा । अस्याः मायाशब्दवाच्यत्वमासुरराक्षसास्त्रादीनामिव विचित्रकार्यकरत्वेन ; यथा च * ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् । आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम् । तेन माया सहस्रं तच्छम्बरस्याशुगामिना । बालस्य रक्षता देहमेकैकश्येन सूदितम् ॥ इत्यादौ । अतो मायाशब्दो न मिथ्यार्थवाची । ऐन्द्रजालिकादिष्वपि केनचिन्मन्त्रौषधादिना मिथ्यार्थविषयायाः पारमार्थिक्या एव बुद्धेरुत्पादकत्वेन मायावीति प्रयोगः । तथा मन्त्रौषधादिरेव च तत्र माया, सर्वप्रयोगेष्वनुगतस्यैकस्यैव शब्दार्थत्वात् । तत्र मिथ्यार्थेषु मायाशब्दप्रयोगो मायाकार्यबुद्धिविषयत्वेनौपचारिकः, मञ्चाः क्रोशन्तीतिवत् । एषा गुणमयी पारमार्थिकी भगवन्मायैव * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् इत्यादिष्वभिधीयते । अस्याः कार्यं भगवत्स्वरूपतिरोधानम्, स्वस्वरूपभोग्यत्वबुद्धिश्च । अतो भगवन्मायया मोहितं सर्वं जगद्भगवन्तमनवधिकातिशयानन्दस्वरूपं नाभिजानाति ॥

मायाविमोचनोपायमाह—

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मामेव— सत्यसङ्कल्पं परमकारुणिकमनालोचितविशेषलोकशरण्यं ये शरणं प्रपद्यन्ते, त एतां— मदीयां गुणमयीं मायां, तरन्ति— मायामुत्सृज्य मामेवोपासत इत्यर्थः ॥ १४ ॥

किमिति भगवदुपासनापादिनीं भगवत्प्रपत्तिं सर्वे न कुर्वत इत्यत्राह—

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥ १५॥

दुष्कृतिनः— पापकर्माणो मां न प्रपद्यन्ते। दुष्कृततारतम्येन ते चतुर्विधा भवन्ति— मूढाः, नराधमाः, माययाऽपहृतज्ञानाः, आसुरं भावमाश्रिताः इति। मूढाः— विपरीतज्ञानाः, पूर्वोक्तप्रकारेण भगवच्छेषतैकरसमात्मानं भोग्यजातं च स्वशेषतया मन्यमानाः। नराधमाः— सामान्येन ज्ञातेऽपि मत्स्वरूपे मदौन्मुख्यानर्हाः। माययाऽपहृतज्ञानाः— मद्विषयं मदैश्वर्यविषयं च ज्ञानं प्रस्तुतं येषां तदसंभावनापादिनीभिः कूटयुक्तिभिरपहृतम्, ते तथोक्ताः। आसुरं भावमाश्रिताः— मद्विषयं मदैश्वर्यविषयं च ज्ञानं सुदृढमुपपन्नं येषां द्वेषायैव भवति, त आसुरं भावमाश्रिताः। उत्तरोत्तराः पापिष्ठतमाः ॥ १५ ॥

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ १६॥

सुकृतिनः— पुण्यकर्माणो मां शरणमुपगम्य मामेव भजन्ते। ते च सुकृततारतम्येन चतुर्विधाः, सुकृतगरीयस्त्वेन प्रतिपत्तिवैशेष्यादुत्तरोत्तराधिकतमा भवन्ति। आर्तः— प्रतिष्ठाहीनः, भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः। अर्थार्थी— अप्राप्तैश्वर्यतया ऐश्वर्यकामः। तयोर्मुखभेदमात्रम्; ऐश्वर्यविषयतयैक्यादेक एवाधिकारः। जिज्ञासुः— प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः; ज्ञानमेवास्य स्वरूपमिति जिज्ञासुरित्युक्तम्। ज्ञानी च— * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् (५) इत्यादिनाऽभिहितभगवच्छेषतैकरसात्मस्वरूपवित्; प्रकृतिवियुक्तकेवलात्मन्यपर्यवस्यन् भगवन्तं प्रेप्सुः भगवन्तमेव परमप्राप्यं मन्वानः ॥ १६ ॥

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ १७॥

तेषां ज्ञानी विशिष्यते। कुतः? नित्ययुक्तः, एकभक्तिरिति च। ज्ञानिनो हि मदेकप्राप्यस्य मया योगो नित्यः; इतरयोस्तु यावत्स्वाभिलषितप्राप्ति मया योगः। तथा ज्ञानिनो मय्येकस्मिन्नेव भक्तिः; इतरयोस्तु स्वाभिलषिते तत्साधनत्वेन मयि च। अतस्स एव विशिष्यते। किञ्च, प्रियो हि ज्ञानिनोऽत्यर्थमहम्— अत्रार्थशब्दोऽभिधेयवचनः; ज्ञानिनोऽहं यथा प्रियः, तथा मया सर्वज्ञेन सर्वशक्तिनाऽप्यभिधातुं न शक्यत इत्यर्थः; प्रियत्वस्येयत्तारहितत्वात्। यथा ज्ञानिनामग्रेसरस्य प्रह्लादस्य * स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः। न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः॥ इति तथैव सोऽपि मम प्रियः ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ १८॥

सर्व एवैते मामेवोपासत इत्युदाराः— वदान्याः। ये मत्तो यत्किंचिदपि गृह्णन्ति, ते हि मम सर्वस्वदायिनः। ज्ञानी त्वात्मैव मे मतम्— तदायत्तधारणोऽहमिति मन्ये। कस्मादेवम्? यस्मादयं मया विनाऽऽत्मधारणासंभावनया मामेवानुत्तमं प्राप्यमास्थितः; अतस्तेन विना ममाप्यात्मधारणं न संभवति। ततो ममात्मा हि सः॥ १८॥

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः॥ १९॥

नाल्पसंख्यासङ्ख्यातानां पुण्यजन्मनां फलमिदम्, यन्मच्छेषतैकरसात्मयाथात्म्यज्ञानपूर्वकं मत्प्रपदनम्; अपि तु बहूनां जन्मनां पुण्यजन्मनामन्ते— अवसाने, वासुदेवशेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च, स चासङ्ख्येयैः कल्याणगुणगणैः परतर इति ज्ञानवान्भूत्वा, वासुदेव एव मम परमप्राप्यं प्रापकं च, अन्यदपि यन्मनोरथवर्ति स एव मम तत्सर्वमिति मां प्रपद्यते— मामुपास्ते; स महात्मा— महामनाः, सुदुर्लभः— दुर्लभतरो लोके। वासुदेवस्सर्वमित्यस्यायमेवार्थः, * प्रियो हि ज्ञानिनोऽत्यर्थमहम्, * आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिमिति प्रक्रमात्। ज्ञानवांश्चायमुक्तलक्षण एव, अस्यैव पूर्वोक्तज्ञानित्वात्, * भूमिरापः इत्यारभ्य * अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम् (५) इति हि चेतनाचेतनस्य प्रकृतिद्वयस्य परमपुरुषशेषतैकरसतोक्ता। * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। (७) इत्यारभ्य * ये चैव सात्त्विका भावा राजसास्तामसाश्च ये। मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥ (१२) इति प्रकृतिद्वयस्य कार्यकारणोभयावस्थस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वं परमपुरुषस्य च सर्वैः प्रकारैस्सर्वस्मात्परतरत्वमुक्तम्; अतस्स एवात्र ज्ञानीत्युच्यते॥ १९॥

तस्य ज्ञानिनो दुर्लभत्वमेवोपपादयति—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।
तंतं नियममास्थाय प्रकृत्या नियतास्स्वया॥ २०॥

सर्व एव हि लौकिकाः पुरुषाः स्वया प्रकृत्या— वासनया गुणमयभावविषयया, नियताः— नित्यान्विताः तैस्तैस्स्ववासनानुरूपैर्गुणमयैरेव, कामैः— इच्छाविषयभूतैः, हृतमत्स्वरूपविषयज्ञानाः तत्तत्कामसिद्ध्यर्थमन्यदेवताः— मद्व्यतिरिक्ताः केवलेन्द्रादिदेवताः, तंतं नियममास्थाय— तत्तद्देवताविशेषमात्रप्रीणनासाधारणं नियममास्थाय, प्रपद्यन्ते— ता एवाश्रित्यार्चयन्ते॥ २०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ २१॥

ता अपि देवता मदीयास्तनवः * य आदित्ये तिष्ठन्....यमादित्यो न वेद यस्यादित्यश्शरीरम् इत्यादिश्रुतिभिः प्रतिपादिताः। मदीयास्तनव इत्यजानन्नपि योयो यांयां मदीया[मादित्या]मिन्द्रादिकां तनुं भक्तश्श्रद्धयाऽर्चितुमिच्छति; तस्यतस्याजानतोऽपि मत्तनुविषयैषा श्रद्धेत्यहमनुसन्धाय तामेवाचलां— निर्विघ्नां विदधाम्यहम्॥ २१॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान्॥ २१॥

स तया— निर्विघ्नया श्रद्धया युक्तः, तस्य— इन्द्रादेः, आराधनं प्रतीहते। ततो— मत्तनुभूतेन्द्रादिदेवताराधनात्तानेव हि स्वाभिलषितान्कामान्मयैव विहितान्लभते। यद्यप्याराधनकाले आराध्येन्द्रादयो मदीयास्तनवः, तत एव तदर्चनं च मदाराधनमिति न जानाति; तथाऽपि तस्य वस्तुतो मदाराधनत्वादाराधकाभिलषितमहमेव विदधामि॥ २२॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि॥ २३॥

तेषामल्पमेधसाम्— अल्पबुद्धीनामिन्द्रादिमात्रयाजिनां, तदाराधनफलमल्पम्, अन्तवच्च भवति। कुतः? देवान् देवयजो यान्ति— यत इन्द्रादीन् तद्याजिनो यान्ति। इन्द्रादयोऽपि हि परिच्छिन्नभोगाः परिमितकालवर्तिनश्च; ततस्तत्सायुज्यं प्राप्ताः तैस्सह प्रच्यवन्ते। मद्भक्ता अपि तेषामेव कर्मणां मदाराधनरूपतां ज्ञात्वा परिच्छिन्नफलसङ्गं त्यक्त्वा मत्प्रीणनैकप्रयोजनाः मां प्राप्नुवन्ति; न च पुनर्निवर्तन्ते। * मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इति हि वक्ष्यते॥ २३॥

इतरे तु सर्वसमाश्रयणीयत्वाय मम मनुष्यादिष्ववतारमप्यकिञ्चित्करं कुर्वन्तीत्याह—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्॥ २४॥

सर्वैः कर्मभिराराध्योऽहं सर्वेश्वरो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावः परमकारुण्यादाश्रितवात्सल्याच्च सर्वसमाश्रयणीयत्वायाजहत्स्वभाव एव वसुदेवसूनुरवतीर्ण इति ममैवं परं भावमव्ययमनुत्तममजानन्तः प्राकृतराजसूनुसमानमितः पूर्वमनभिव्यक्तमिदानीं कर्मवशाज्जन्मविशेषं प्राप्य व्यक्तिमापन्नम्— प्राप्तं, मामबुद्धयो मन्यन्ते; अतो मां नाश्रयन्ते: न कर्मभिराराधयन्ति च॥ २४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कुत एवं न प्रकाश्यत इत्यत्राह—

नाहं प्रकाशस्सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥ २५॥

क्षेत्रज्ञासाधारणमनुष्यत्वादिसंस्थानयोगाख्यमायया समावृतोऽहं न सर्वस्य प्रकाशः। मयि मनुष्यत्वादिसंस्थानदर्शनमात्रेण मूढोऽयं लोको मामतिवाय्विन्द्रकर्माणमतिसूर्याग्नितेजसमुपलभ्यमानमप्यजमव्ययं निखिलजगदेककारणं सर्वेश्वरं मां सर्वसमाश्रयणीयत्वाय मनुष्यत्वसंस्थानमास्थितं नाभिजानाति॥ २५॥

वेदाहं समतीतानि वर्तमानानि चार्जुन।
भविष्याणि च भूतानि मां तु वेद न कश्चन॥ २६॥

अतीतानि वर्तमानान्यनागतानि च सर्वाणि भूतान्यहं वेद— जानामि। मां तु वेद न कश्चन— मयाऽनुसंधीयमानेषु कालत्रयवर्तिषु भूतेषु मामेवंविधं वासुदेवं सर्वसमाश्रयणीयत्वायावतीर्णं विदित्वा मामेव समाश्रयन्न कश्चिदुपलभ्य इत्यर्थः। अतो ज्ञानी सुदुर्लभ एव॥ २६॥

तथा हि—

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि संमोहं सर्गे यान्ति परन्तप॥ २७॥

इच्छाद्वेषाभ्यां समुत्थितेन शीतोष्णादिद्वन्द्वाख्येन मोहेन सर्वभूतानि सर्गे— जन्मकाल एव, संमोहं यान्ति। एतदुक्तं भवति— गुणमयेषु सुखदुःखादिद्वन्द्वेषु पूर्वपूर्वजन्मनि यद्विषयाविच्छाद्वेषावभ्यस्तौ, तद्वासनया पुनरपि जन्मकाल एव तदेव द्वन्द्वाख्यमिच्छाद्वेषविषयत्वेन समुत्थितं भूतानां मोहनं भवति: तेन मोहेन सर्वभूतानि संमोहं यान्ति; तद्विषयेच्छाद्वेषस्वभावानि भवन्ति, न मत्संश्लेषवियोगसुखदुःखस्वभावानि। ज्ञानी तु मत्संश्लेषवियोगैकसुखदुःखस्वभावः; न तत्स्वभावं किमपि भूतं जायते— इति॥ २७॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥ २८॥

येषां त्वनेकजन्मार्जितेनोत्कृष्टपुण्यसंचयेन गुणमयद्वन्द्वेच्छाद्वेषहेतुभूतं मदौन्मुख्यविरोधि चानादिकालप्रवृत्तं पापमन्तगतम्— क्षीणम्: ते पूर्वोक्तेन सुकृततारतम्येन मां शरणमनुप्रपद्य गुणमयान्मोहाद्विनिर्मुक्ताः जरामरणमोक्षाय, महते चैश्वर्याय, मत्प्राप्तये च दृढव्रताः— दृढसङ्कल्पाः, मामेव भजन्ते॥ २८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र त्रयाणां भगवन्तं भजमानानां ज्ञातव्यविशेषानुपादेयांश्च प्रस्तौति—

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

जरामरणमोक्षाय— प्रकृतिवियुक्तात्मस्वरूपदर्शनाय मामाश्रित्य ये यतन्ते ; ते तद्ब्रह्म विदुः, अध्यात्मं च कृत्स्नं विदुः, कर्म चाखिलं विदुः ॥ २९ ॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
विज्ञानयोगो नाम सप्तमोऽध्यायः ॥

अत्र य इति पुनर्निर्देशात्पूर्वनिर्दिष्टेभ्योऽन्ये अधिकारिणो ज्ञायन्ते ; साधिभूतं साधिदैवं मामैश्वर्यार्थिनो ये विदुः— इत्येतदनुवादसरूपमप्यप्राप्तार्थत्वाद्विधायकमेव ; तथा साधियज्ञमित्यपि त्रयाणामधिकारिणामविशेषेण विधीयते, अर्थस्वाभाव्यात् । त्रयाणां हि नित्यनैमित्तिकरूपमहायज्ञाद्यनुष्ठानमवर्जनीयम् । ते च प्रयाणकालेऽपि स्वप्राप्यानुगुणं मां विदुः । तेचेति चकारात्पूर्वे जरामरणमोक्षाय यतमानाश्च प्रयाणकाले विदुरिति समुच्चीयन्ते ; अनेन ज्ञानिनोऽप्यर्थस्वाभाव्यात्साधियज्ञं मां विदुः, प्रयाणकालेऽपि स्वप्राप्यानुगुणं मां विदुरित्युक्तं भवति ॥ ३० ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये सप्तमोऽध्यायः ॥७॥

॥ अथ अष्टमोऽध्यायः ॥ ८ ॥

सप्तमे परस्य ब्रह्मणो वासुदेवस्योपास्यत्वम्, निखिलचेतनाचेतनवस्तुशेषित्वम्, कारणत्वम्, आधारत्वम्, सर्वशरीरतया सर्वप्रकारत्वेन सर्वशब्दवाच्यत्वम्, सर्वनियन्तृत्वम्, सर्वैश्च कल्याणगुणगणैस्तस्यैव परतरत्वम्, सत्त्वरजस्तमोमयैर्देहेन्द्रियत्वेन भोग्यत्वेन चावस्थितैर्भावैरनादिकालप्रवृत्तदुष्कृतप्रवाहहेतुकैस्तस्य तिरोधानम्, अत्युत्कृष्टसुकृतहेतुकभगवत्प्रपत्त्या च तन्निवर्तनम्, सुकृततारतम्येन च प्रतिपत्तिवैशेष्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्षयोपासकभेदम्, भगवन्तं प्रेप्सोर्नित्ययुक्ततयैकभक्तितया चात्यर्थपरमपुरुषप्रियत्वेन श्रैष्ठ्यम् दुर्लभत्वं च प्रतिपाद्य एषां त्रयाणां ज्ञातव्योपादेयभेदांश्च प्रास्तौषीत् । इदानीमष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान् विविनक्ति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्जुन उवाच—

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम। अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते॥ १॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन। प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः॥ २॥

जरामरणमोक्षाय भगवन्तमाश्रित्य यतमानानां ज्ञातव्यतयोक्तं तद्ब्रह्माध्यात्मं च कर्म च किमिति वक्तव्यम्। ऐश्वर्यार्थिनां ज्ञातव्यमधिभूतमधिदैवं च किम्? त्रयाणां ज्ञातव्योऽधियज्ञशब्दनिर्दिष्टश्च कः? तस्य चाधियज्ञभावः कथम्? प्रयाणकाले चैभिस्त्रिभिर्नियतात्मभिः कथं ज्ञेयोऽसि?॥ १, २॥

श्रीभगवानुवाच—

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥ ३॥

तद्ब्रह्मेति निर्दिष्टं परममक्षरं न क्षरतीत्यक्षरम्, क्षेत्रज्ञसमष्टिरूपम्। तथा च श्रुतिः— * अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इत्यादिका। परममक्षरं प्रकृतिविनिर्मुक्तमात्मस्वरूपम्। स्वभावोऽध्यात्ममुच्यते— स्वभावः— प्रकृतिः: अनात्मभूतम्, आत्मनि संबध्यमानं, भूतसूक्ष्मतद्वासनादिकं पञ्चाग्निविद्यायां ज्ञातव्यतयोदितम्। तदुभयं प्राप्यतया त्याज्यतया च मुमुक्षुभिर्ज्ञातव्यम्। भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः— भूतभावः— मनुष्यादिभावः, तदुद्भवकरो यो विसर्गः * पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति इति श्रुतिसिद्धो योषित्संबन्धजः; स कर्मसंज्ञितः। तच्चाखिलं सानुबन्धम् उद्वेजनीयतया परिहरणीयतया च मुमुक्षुभिर्ज्ञातव्यम्। परिहरणीयता चानन्तरमेव वक्ष्यते, * यदिच्छन्तो ब्रह्मचर्यं चरन्ति (१२) इति॥ ३॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥ ४॥

ऐश्वर्यार्थिनां ज्ञातव्यतया निर्दिष्टमधिभूतं क्षरो भावः वियदादिभूतेषु वर्तमानस्तत्परिणामविशेषः क्षरणस्वभावो विलक्षणश्शब्दस्पर्शादिस्साश्रयः, विलक्षणास्साश्रयाश्शब्दस्पर्शरूपरसगन्धाः ऐश्वर्यार्थिभिः प्राप्यास्तैरनुसन्धेयाः। पुरुषश्चाधिदैवतम्— अधिदैवतशब्दनिर्दिष्टः पुरुषः। अधिदैवतम्— दैवतोपरि वर्तमानः, इन्द्रप्रजापतिप्रभृतिकृत्स्नदैवतोपरि वर्तमनः, इन्द्रप्रजापतिप्रभृतीनां भोग्यजाताद्विलक्षणशब्दादेर्भोक्ता पुरुषः। सा च भोक्तृत्वावस्था ऐश्वर्यार्थिभिः प्राप्यतयाऽनुसन्धेया। अधियज्ञोऽहमेव— अधियज्ञशब्दनिर्दिष्टोऽहमेव। अधियज्ञः— यज्ञैराराध्यतया वर्तमानः। अत्र इन्द्रादौ मम देहभूते आत्मतयाऽवस्थितोऽहमेव यज्ञैराराध्य इति महायज्ञादिनित्यनैमित्तिकानुष्ठानवेलायां त्रयाणामधिकारिणामनुसन्धेयमेतत्॥ ४॥

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इदमपि त्रयाणां साधारणम्। अन्तकाले च मामेव स्मरन् कलेबरं त्यक्त्वा यः प्रयाति; स मद्भावं याति— मम यो भावः स्वभावः तं याति; तदानीं यथा मामनुसन्धत्ते, तथाविधाकारो भवतीत्यर्थः; यथा आदिभरतादयस्तदानीं स्मर्यमाणमृगसजातीयाकारास्संभूताः ॥ ५ ॥

स्मर्तुस्स्वविषयसजातीयाकारतापादनमन्तिमप्रत्ययस्य स्वभाव इति सुस्पष्टमाह—

यंयं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेबरम्।
तंतमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

अन्ते— अन्तकाले। यंयं वाऽपि भावं स्मरन् कलेबरं त्यजति, तंतं भावमेव मरणानन्तरमेति। अन्तिमप्रत्ययश्च पूर्वभावितविषय एव जायते ॥ ६ ॥

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः ॥ ७ ॥

यस्मात् पूर्वकालाभ्यस्तविषय एवान्तिमप्रत्ययो जायते, तस्मात्सर्वेषु कालेष्वाप्रयाणादहरहर्मामनुस्मर। अहरहरनुस्मृतिकरं युद्धादिकं वर्णाश्रमानुबन्धि श्रुतिस्मृतिचोदितं नित्यनैमित्तिकं च कर्म कुरु। एवमुपायेन मय्यर्पितमनोबुद्धिरन्तकाले च मामेव स्मरन् यथाभिलषितप्रकारं मां प्राप्स्यसि; नात्र संशयः ॥ ७ ॥

एवं सामान्येन स्वप्राप्यावाप्तिरन्तिमप्रत्ययाधीनेत्युक्त्वा तदर्थं त्रयाणामुपासनप्रकारभेदं वक्तुमुपक्रमते: तत्रैश्वर्यार्थिनामुपासनप्रकारं यथोपासनमन्तिमप्रत्ययप्रकारं चाह—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

अहरहरभ्यासयोगाभ्यां युक्ततया नान्यगामिना चेतसा अन्तकाले परमं पुरुषं दिव्यं मां वक्ष्यमाणप्रकारं चिन्तयन् मामेव याति— आदिभरतमृगत्वप्राप्तिवदैश्वर्यविशिष्टतया मत्समानाकारो भवति। अभ्यासः— नित्यनैमित्तिकाविरुद्धेषु सर्वेषु कालेषु मनसोपास्यसंशीलनम्। योगस्त्वहरहर्योगकालेऽनुष्ठीयमानं यथोक्तलक्षणमुपासनम् ॥ ८ ॥

कविं पुराणमनुशासितारम् अणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् ॥ ९ ॥

प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कविं— सर्वज्ञम् , पुराणम्— पुरातनम् , अनुशासितारम्— विश्वस्य प्रशासितारम् , अणोरणीयांसम्— जीवादपि सूक्ष्मतरम् , सर्वस्य धातारम्— सर्वस्य स्रष्टारम् , अचिन्त्यरूपम्— सकलेतरविसजातीयस्वरूपम् , आदित्यवर्णं तमसः परस्तात्— अप्राकृतस्वासाधारणदिव्यरूपम् , तमेवंभूतमहरहरभ्यस्यमानभक्तियुक्तयोगबलेनारूढसंस्कारतया अचलेन मनसा प्रयाणकाले भ्रुवोर्मध्ये प्राणमावेश्य— संस्थाप्य : तत्र भ्रूमध्ये दिव्यं पुरुषं योऽनुस्मरेत् ; स तमेवोपैति— तद्भावं याति, तत्समानैश्वर्यो भवतीत्यर्थः ॥ ९, १० ॥

अथ कैवल्यार्थिनां स्मरणप्रकारमाह—

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

यदक्षरम्— अस्थूलत्वादिगुणकं वेदविदो वदन्ति, वीतरागाश्च यतयो यदक्षरं विशन्ति, यदक्षरं प्राप्तुमिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्पदं संग्रहेण ते प्रवक्ष्ये । पद्यते गम्यते चेतसेति पदम् ; तत् निखिलवेदान्तवेद्यं मत्स्वरूपमक्षरं यथोपास्यम् , तथा संक्षेपेण प्रवक्ष्यामीत्यर्थः ॥ ११ ॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणम् आस्थितो योगधारणाम् ॥ १२
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

सर्वाणि श्रोत्रादीनीन्द्रियाणि ज्ञानद्वारभूतानि संयम्य— स्वव्यापारेभ्यो विनिवर्त्य, हृदयकमलनिविष्टे मय्यक्षरे मनो निरुध्य, योगाख्यां धारणामास्थितः— मय्येव निश्चलां स्थितिमास्थितः, ओमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन् , वाच्यं मामनुस्मरन् , आत्मनः प्राणं मूर्ध्न्याधाय देहं त्यजन् यः प्रयाति : स याति परमां गतिं— प्रकृतिवियुक्तं मत्समानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थः । * यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ॥ (२०, २१) इत्यनन्तरमेव वक्ष्यते ॥ १२, १३ ॥

एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकार उक्तः ; अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाह—

अनन्यचेतास्सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

नित्यशः मामुद्योगप्रभृति सततं— सर्वकालम् अनन्यचेता यः स्मरति— अत्यर्थमत्प्रियत्वेन मत्स्मृत्या विना आत्मधारणमलभमानो निरतिशयप्रियां स्मृतिं यः करोति ; तस्य नित्ययुक्तस्य— नित्ययोगं काङ्क्षमाणस्य योगिनोऽहं सुलभः— अहमेव प्राप्यः : न मद्भाव ऐश्वर्यादिकः । सुप्रापश्च ; तद्वियोगमसहमानोऽहमेव तं वृणे ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मत्प्रासयनुगुणोपासनविपाकं तद्विरोधिनिरसनमत्यर्थमत्प्रियत्वादिकं चाहमेव ददामीत्यर्थः। * यमेवैष वृणुते तेन लभ्यः, इति हि श्रूयते। वक्ष्यते च– * तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता (१०. १०, ११) इति ॥ १४ ॥

अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिं चाह—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

मां प्राप्य पुनर्निखिलदुःखालयमशाश्वतम्— अस्थिरं जन्म न प्राप्नुवन्ति। यत एते महात्मानः— महामनसः, यथावस्थितमत्स्वरूपज्ञाना अत्यर्थमत्प्रियत्वेन मया विना आत्मधारणमलभमाना मय्यासक्तमनसो मदाश्रया मामुपास्य परमसंसिद्धिरूपं मां प्राप्ताः ॥ १५ ॥

ऐश्वर्यगतिं प्राप्तानां भगवन्तं प्राप्तानां च पुनरावृत्तावपुनरावृत्तौ च हेतुमाह—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

ब्रह्मलोकपर्यन्ता ब्रह्माण्डोदरवर्तिनस्सर्वे लोका भोगैश्वर्यालयाः पुनरावर्तिनः— विनाशिनः। अत ऐश्वर्यगतिं प्राप्तानां प्राप्यस्थानविनाशाद्विनाशित्वमवर्जनीयम्। मां— सर्वज्ञं सत्यसङ्कल्पं निखिलजगदुत्पत्तिस्थितिलयलीलं परमकारुणिकं सदैकरूपं प्राप्तानां विनाशप्रसङ्गाभावात्तेषां पुनर्जन्म न विद्यते ॥ १६ ॥

ब्रह्मलोकपर्यन्तानां लोकानां तदन्तर्वर्तिनां च परमपुरुषसङ्कल्पकृतामुत्पत्तिविनाशकालव्यवस्थामाह—

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः। रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७ ॥
अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवन्त्यहरागमे। रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥
भूतग्रामस्स एवायं भूत्वाभूत्वा प्रलीयते। रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

ये मनुष्यादिचतुर्मुखान्तानां मत्सङ्कल्पकृताहोरात्रव्यवस्थाविदो जनाः, ते ब्रह्मणश्चतुर्मुखस्य यदहः, तच्चतुर्युगसहस्रावसानं विदुः; रात्रिं च तथारूपाम्। तत्र ब्रह्मणोऽहरागमसमये त्रैलोक्यान्तर्वर्तिन्यो देहेन्द्रियभोग्यभोगस्थानरूपा व्यक्तयश्चतुर्मुखदेहावस्थादव्यक्तात् प्रभवन्ति। तत्रैवाव्यक्तावस्थाविशेषे चतुर्मुखदेहे रात्र्यागमसमये प्रलीयन्ते। स एवायं कर्मवश्यो भूतग्रामोऽहरागमे भूत्वाभूत्वा रात्र्यागमे प्रलीयते। पुनरप्यहरागमे प्रभवति। तथा वर्षशतावसानरूपयुगसहस्रान्ते ब्रह्मलोकपर्यन्ता लोकाः ब्रह्मा च * पृथिव्यप्सु प्रलीयते आपस्ते-

Digitization by Arya Samaj Charitable Foundation, Chennai

जसि लीयन्ते, इत्यादिक्रमेण अव्यक्ताक्षरतमःपर्यन्तं मय्येव प्रलीयन्ते। एवं मद्व्यतिरिक्तस्य कृत्स्नस्य कालव्यवस्थया मत्त उत्पत्तेर्मय्येव प्रलयाच्चोत्पत्तिविनाशयोगित्वमवर्जनीयमित्यैश्वर्यगतिं प्राप्तानां पुनरावृत्तिरपरिहार्या। मामुपेतानां तु न पुनरावृत्तिप्रसङ्गः॥ १७—१९॥

अथ कैवल्यं प्राप्तानामपि पुनरावृत्तिर्न विद्यत इत्याह—

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः। यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ २०॥
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥ २१॥

तस्मादव्यक्तात्— अचेतनप्रकृतिरूपात्पुरुषार्थतया परः— उत्कृष्टो, भावोऽन्यो— ज्ञानैकाकारतया तस्माद्विसजातीयः, अव्यक्तः— केनचित्प्रमाणेन न व्यज्यत इत्यव्यक्तः, स्वसंवेद्यस्वासाधारणाकार इत्यर्थः; सनातनः— उत्पत्तिविनाशानर्हतया नित्यः, यस्सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु विनश्यत्सु तत्रतत्र स्थितोऽपि न विनश्यति; सोऽव्यक्तोऽक्षर इत्युक्तः * ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते (१२. ३) * कूटस्थोऽक्षर उच्यते (१५. १६) इत्यादिषु; तं वेदविदः परमां गतिमाहुः। अयमेव * यः प्रयाति त्यजन् देहं स याति परमां गतिम् (८. १३) इत्यत्र परमगतिशब्दनिर्दिष्टोऽक्षरः प्रकृतिसंसर्गवियुक्तस्वरूपेणावस्थित आत्मेत्यर्थः। यमेवंभूतं स्वरूपेणावस्थितं प्राप्य न निवर्तन्ते; तन्मम परमं धाम— परं नियमनस्थानम्। अचेतनप्रकृतिरेकं नियमनस्थानम्; तत्संसृष्टरूपा जीवप्रकृतिर्द्वितीयं नियमनस्थानम्; अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्थानमित्यर्थः। तच्चापुनरावृत्तिरूपम्। अथवा प्रकाशवाची धामशब्दः; प्रकाशश्चेह ज्ञानमभिप्रेतम्; प्रकृतिसंसृष्टात् परिच्छिन्नज्ञानरूपादात्मनोऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परं धाम॥ २०, २१॥

ज्ञानिनः प्राप्यं तु तस्मादत्यन्तविभक्तमित्याह—

पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तस्थानि भूतानि येन सर्वमिदं ततम्॥ २२॥

* मत्तः परतरं नान्यत्किञ्चिदस्ति धनंजय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥ (७. ७), * मामेभ्यः परमव्ययम् (७. १३) इत्यादिना निर्दिष्टस्य यस्य अन्तस्स्थानि सर्वाणि भूतानि, येन च परेण पुरुषेण सर्वमिदं ततम्, स परः पुरुषः * अनन्यचेतास्सततम् (१४) इत्यनन्यया भक्त्या लभ्यः॥ २२॥

अथात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाह। द्वयोरप्यर्चिरादिका गतिश्श्रुतौ श्रुता, सा चापुनरावृत्तिलक्षणा। यथा पञ्चाग्निविद्यायां * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः इत्यादौ अर्चिरादिकया गतस्य परब्रह्मप्राप्तिरपुनरावृत्तिश्चाम्नाता * स एनान् ब्रह्म गमयति....एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति। न च प्रजापतिवाक्यादौ श्रुतपर-

Digitization by Arya Samaj Charitable Foundation, Chennai

विद्याङ्गभूतात्मप्राप्तिविषयेयं * तद्य इत्थं विदुरिति गतिश्रुतिः ; * ये चेमेऽरण्ये श्रद्धा तप इत्युपासते इति परविद्यायाः पृथक्छ्रुतिवैयर्थ्यात् । पञ्चाग्निविद्यायां च * इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति इति * रमणीयचरणाः.....कपूयचरणाः इति पुण्यपापहेतुको मनुष्यादिभावोऽपामेव भूतान्तरसंसृष्टानाम् , आत्मनस्तु तत्परिष्वङ्गमात्रमिति चिदचितोर्विवेकमभिधाय * तद्य इत्थं विदुः * तेऽर्चिषमसंभवन्ति * इमं मानवमावर्तं नावर्तन्ते इति विविक्ते चिदचिद्वस्तुनी त्याज्यतया प्राप्यतया च य इत्थं विदुस्तेऽर्चिरादिना गच्छन्ति, न च पुनरावर्तन्त इत्युक्तमिति गम्यते । आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च * स एनान् ब्रह्म गमयतीति ब्रह्मप्राप्तिवचनादचिद्वियुक्तमात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसन्धेयम् , तत्क्रतुन्यायाच्च । परशेषतैकरसत्वं च * य आत्मनि तिष्ठन्.... यस्यात्मा शरीरम् इत्यादिश्रुतिसिद्धम् ।

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अत्र कालशब्दो मार्गस्याहःप्रभृतिसंवत्सरान्तकालाभिमानिदेवताभूयस्तया मार्गोपलक्षणार्थः । यस्मिन्मार्गे प्रयाता योगिनोऽनावृत्तिं, पुण्यकर्माणश्चावृत्तिं यान्ति ; तं मार्गं वक्ष्यामीत्यर्थः । अग्निर्ज्योतिरहश्शुक्लष्षण्मासा उत्तरायणमिति संवत्सरादीनां प्रदर्शनम् ॥ २३, २४ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

एतच्च धूमादिमार्गस्थपितृलोकादेः प्रदर्शनम् । अत्र योगिशब्दः पुण्यकर्मसंबन्धिविषयः ॥ २५ ॥

शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६ ॥

शुक्ला गतिः– अर्चिरादिका, कृष्णा च धूमादिका । शुक्लयाऽनावृत्तिं याति ; कृष्णया तु पुनरावर्तते । एते शुक्लकृष्णे गती ज्ञानिनां, विविधानां पुण्यकर्मणां च श्रुतौ शाश्वते मते । * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति, * अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति, इति ॥ २६ ॥

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

एतौ मार्गौ जानन् योगी प्रयाणकाले कश्चन न मुह्यति ; अपि तु स्वेनैव देवयानेन पथा याति । तस्मादहरहरर्चिरादिगतिचिन्तनाख्ययोगयुक्तो भव ॥ २७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथाध्यायद्वयोदितशास्त्रार्थवेदनफलमाह—

वेदेषु यज्ञेषु तपस्सु चैव दाने च यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥ २८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अक्षरपरब्रह्मयोगो नाम अष्टमोऽध्यायः॥

ऋग्यजुस्सामाथर्वरूपवेदाभ्यासयज्ञतपोदानप्रभृतिषु सर्वेषु पुण्येषु यत्फलं निर्दिष्टम्, इदम्— अध्यायद्वयोदितं भगवन्माहात्म्यं विदित्वा तत्सर्वमत्येति— एतद्वेदनसुखातिरेकेण तत्सर्वं तृणवन्मन्यते। योगी ज्ञानी च भूत्वा ज्ञानिनः प्राप्यं परमाद्यं स्थानमुपैति॥ २८॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टमोऽध्यायः॥८॥

॥ अथ नवमोऽध्यायः ॥ ९ ॥

उपासकभेदनिबन्धना विशेषाः प्रतिपादिताः। इदानीमुपास्यस्य परमपुरुषस्य माहात्म्यं, ज्ञानिनां विशेषं च विशोध्य भक्तिरूपस्योपासनस्य स्वरूपमुच्यते।

श्रीभगवानुवाच —

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १॥

इदं तु ते गुह्यतमं, भक्तिरूपमुपासनाख्यं ज्ञानं, विज्ञानसहितम्— उपासनगतविशेषज्ञानसहितम्, अनसूयवे ते प्रवक्ष्यामि। मद्विषयं सकलेतरविसजातीयमपरिमितप्रकारं माहात्म्यं श्रुत्वा एवमेव संभवतीति मन्वानाय ते प्रवक्ष्यामीत्यर्थः। यज्ज्ञानमनुष्ठानपर्यन्तं ज्ञात्वा मत्प्राप्तिविरोधिनः सर्वस्मादशुभान्मोक्ष्यसे॥ १॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २॥

राजविद्या— विद्यानां राजा, राजगुह्यं— गुह्यानां राजा। राज्ञां विद्येति वा राजविद्या; राजानो हि विस्तीर्णागाधमनसः; महामनसामियं विद्येत्यर्थः। महामनस एव हि गोपनीयगोपनकुशला इति तेषामेव गुह्यम्। इदमुत्तमं पवित्रं— मत्प्राप्तिविरोध्यशेषकल्मषापहम्। प्रत्यक्षावगमम्— अवगम्यत इत्यवगमो विषयः; प्रत्यक्षभूतोऽवगमो विषयो यस्य ज्ञानस्य तत्प्रत्यक्षावगमम्, भक्तिरूपेणोपासनेनोपास्यमानोऽहं तदानीमेवोपासितुः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रत्यक्षतामुपगतो भवामीत्यर्थः। अथापि धर्म्यं— धर्मादनपेतम्; धर्मत्वं हि निश्श्रेयससाधनत्वम्; स्वरूपेणैवात्यर्थप्रियत्वेन तदानीमेव मद्दर्शनापादनतया च स्वयं निश्श्रेयसरूपमपि निरतिशयनिश्श्रेयसरूपात्यन्तिकमत्प्राप्तिसाधनमित्यर्थः। अत एव सुसुखं कर्तुं— सुसुखोपादानम्, अत्यर्थप्रियत्वेनोपादेयम्। अव्ययम्— अक्षयं, मत्प्राप्तिं साधयित्वाऽपि स्वयं न क्षीयते। एवंरूपमुपासनं कुर्वतो मत्प्रदाने कृतेऽपि न किंचित्कृतं मयाऽस्येति मे प्रतिभातीत्यर्थः॥ २॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥ ३॥

अस्योपासनाख्यस्य धर्मस्य निरतिशयप्रियमद्विषयतया स्वयं निरतिशयप्रियरूपस्य परमनिश्श्रेयसरूपमत्प्राप्तिसाधनस्याव्ययस्योपादानयोग्यदशां प्राप्य अश्रद्दधानाः— विश्वासपूर्वकत्वरारहिताः पुरुषाः मामप्राप्य मृत्युरूपे संसारवर्त्मनि नितरां वर्तन्ते। अहो महदिदमाश्चर्यमित्यर्थः॥ ३॥

शृणु तावत्प्राप्यभूतस्य ममाचिन्त्यमहिमानम्—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्। भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥ ५॥

इदं चेतनाचेतनात्मकं कृत्स्नं जगत्, अव्यक्तमूर्तिना— अप्रकाशितस्वरूपेण मया अन्तर्यामिणा, ततम्— अस्य जगतो धारणार्थं च शेषित्वेन व्याप्तमित्यर्थः। यथाऽन्तर्यामिब्राह्मणे * यः पृथिव्यां तिष्ठन्....यं पृथिवी न वेद * य आत्मनि तिष्ठन्....यमात्मा न वेद, इति चेतनाचेतनवस्तुजातैरदृष्टेनान्तर्यामिणा तत्तत्र व्याप्तिरुक्ता। ततो मत्स्थानि सर्वभूतानि— सर्वाणि भूतानि मय्यन्तर्यामिणि स्थितानि। तत्रैव ब्राह्मणे * यस्य पृथिवी शरीरं....यः पृथिवीमन्तरो यमयति, * यस्यात्मा शरीरं...य आत्मानमन्तरो यमयतीति शरीरत्वेन नियाम्यत्वप्रतिपादनात्तदायत्ते स्थितिनियमने प्रतिपादिते, शेषित्वं च। न चाहं तेष्ववस्थितः— अहं तु न तदायत्तस्थितिः, मत्स्थितौ तैर्न कश्चिदुपकार इत्यर्थः। न च मत्स्थानि भूतानि— न घटादीनां जलादेरिव मम धारकत्वम्; कथम्? मत्सङ्कल्पेन। पश्य ममैश्वरं योगम्— अन्यत्र कुत्रचिदसंभावनीयं मदसाधारणमाश्चर्यं योगं पश्य। कोऽसौ योगः? भूतभृन्न च भूतस्थो ममात्मा भूतभावनः— सर्वेषां भूतानां भर्ताऽहं, न च तैः कश्चिदपि ममोपकारः। मम त्मैव भूतभावनः— मम मनोमयस्सङ्कल्प एव भूतानां भावयिता धारयिता नियन्ता च॥ ४, ५॥

सर्वस्यास्य स्वसङ्कल्पायत्तस्थितिप्रवृत्तित्वे निदर्शनमाह—

यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा आकाशे अनालम्बने महान् वायुस्स्थितस्सर्वत्र गच्छति ; स तु वायुर्निरालम्बनो मदायत्तस्थितिरित्यवश्याभ्युपगमनीयः [मयैव धृत इति विज्ञायते] ; एवमेव सर्वाणि भूतानि तैरदृष्टे मयि स्थितानि मयैव धृतानीत्युपधारय। यथाऽऽहुर्वेदविदः— * मेघोदयस्सागरसन्निवृत्तिरिन्दोर्विभागः स्फुरितानि वायोः। विद्युद्विभङ्गो गतिरुष्णरश्मेर्विष्णोर्विचित्राः प्रभवन्ति मायाः॥ इति ; विष्णोरनन्यसाधारणानि महाश्चर्याणीत्यर्थः। श्रुतिरपि * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः * भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च, इत्यादिका ॥ ६ ॥

सकलेतरनिरपेक्षस्य भगवतस्सङ्कल्पात्सर्वेषां स्थितिः प्रवृत्तिश्चोक्ता ; तथा तत्सङ्कल्पादेव सर्वेषामुत्पत्तिप्रलयावपीत्याह—

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

स्थावरजङ्गमात्मकानि सर्वाणि भूतानि, मामिकाम्— मच्छरीरभूताम्, प्रकृतिं— तमश्शब्दवाच्यां नामरूपविभागानर्हां, कल्पक्षये— चतुर्मुखावसानसमये मत्सङ्कल्पाद्यान्ति ; तान्येव भूतानि कल्पादौ पुनर्विसृजाम्यहम्। यथाऽऽह मनुः— * आसीदिदं तमोभूतं ...सोऽभिध्याय शरीरात्स्वात्, इति। श्रुतिरपि * यस्याव्यक्तं शरीरम्, इत्यादिका ; * अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते * तम आसीत्तमसा गूढमग्रे प्रकेतम् इति च ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

स्वकीयां विचित्रपरिणामिनीं प्रकृतिमवष्टभ्य— अष्टधा परिणमय्येमं चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं भूतग्रामं मदीयाया मोहिन्या गुणमय्याः प्रकृतेर्वशादवशं पुनःपुनः कालेकाले विसृजामि ॥ ८ ॥

एवं तर्हि विषमसृष्ट्यादीनि कर्माणि नैर्घृण्याद्यापादनेन भ[ग]वन्तं बध्नन्तीत्यत्राह—

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

न च तानि विषमसृष्ट्यादीनि कर्माणि मां निबध्नन्ति— मयि नैर्घृण्यादिकं नापादयन्ति ; यतः क्षेत्रज्ञानां पूर्वकृतान्येव कर्माणि देवादिविषमभावहेतवः ; अहं तु तत्र वैषम्ये असक्तः तत्रोदासीनवदासीनः : यथाऽऽह सूत्रकारः— * वैषम्यनैर्घृण्ये न सापेक्षत्वात्, * न कर्माविभागादिति चेन्नानादित्वात्, इति ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते॥ १०॥

तस्मात् क्षेत्रज्ञकर्मानुगुणं मदीया प्रकृतिस्सत्यसङ्कल्पेन मयाऽध्यक्षेणेक्षिता सचराचरं जगत्सूयते। अनेन क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगत्परिवर्तत इति मत्स्वाम्यं सत्यसङ्कल्पत्वं नैर्घृण्यादिदोषरहितत्वमित्येवमादिकं मम वसुदेवसूनोरैश्वरं योगं पश्य। यथाऽऽह श्रुतिः— * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्॥ इति॥ १०॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम्॥ ११॥

एवं मां भूतमहेश्वरं सर्वज्ञं सत्यसङ्कल्पं निखिलजगदेककारणं परमकारुणिकतया सर्वसमाश्रयणीयत्वाय मानुषीं तनुमाश्रितं स्वकृतैः पापकर्मभिर्मूढा अवजानन्ति— प्राकृतमनुष्यसमं मन्यन्ते। भूतमहेश्वरस्य ममापारकारुण्यौदार्यसौशील्यवात्सल्यनिबन्धनं मनुष्यत्वसमाश्रयणलक्षणमिमं परं भावमजानन्तो मनुष्यत्वसमाश्रयणमात्रेण मामितरसजातीयं मत्वा तिरस्कुर्वन्तीत्यर्थः॥ ११॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ १२॥

मम मनुष्यत्वे परमकारुण्यादिपरत्वतिरोधानकरीं राक्षसीमासुरीं च मोहिनीं प्रकृतिमाश्रिताः, मोघाशाः— मोघवाञ्छिताः निष्फलवाञ्छिताः, मोघकर्माणः— मोघारम्भाः, मोघज्ञानाः— सर्वेषु मदीयेषु चराचरेष्वर्थेषु विपरीतज्ञानतया निष्फलज्ञानाः, विचेतसः— तथा सर्वत्र विगतयाथात्म्यज्ञानाः, मां सर्वेश्वरमितरसमं मत्वा मयि यत्कर्तुमिच्छन्ति, यदुद्दिश्यारम्भान् कुर्वते, तत्सर्वं मोघं भवतीत्यर्थः॥ १२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥ १३॥

ये तु स्वकृतैः पुण्यसञ्चयैः मां शरणमुपगम्य विध्वस्तसमस्तपापबन्धा दैवीं प्रकृतिमाश्रिता महात्मानः, ते भूतादिमव्ययम्— वाङ्मनसागोचरनामकर्मस्वरूपं परमकारुणिकतया साधुपरित्राणाय मनुष्यत्वेनावतीर्णं मां ज्ञात्वाऽनन्यमनसो मां भजन्ते; मत्प्रियत्वातिरेकेण मद्भजनेन विना मनसश्चात्मनश्च बाह्यकरणानां च धारणमलभमाना मद्भजनैकप्रयोजना भजन्ते॥ १३॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥ १४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्यर्थमतिप्रियत्वेन मत्कीर्तनयतननमस्कारैर्विना क्षणाणुमात्रेऽप्यात्मधारणमलभमानाः, मद्गुणविशेषवाचीनि मन्नामानि स्मृत्वा पुलकाञ्चितसर्वाङ्गाः, हर्षगद्गदकण्ठाः, नारायणकृष्णवासुदेवेत्येवमादीनि सततं कीर्तयन्तः, तथैव यतन्तः— मत्कर्मस्वर्चनादिकेषु तदुपकारकेषु भवननन्दनवनकरणादिकेषु च दृढसङ्कल्पा यतमानाः, भक्तिभारावनमितमनोबुद्ध्यभिमानपदद्वयकरद्वयशिरोभिरष्टाङ्गैरचिन्तितपांसुकर्दमशर्करादिके धरातले दण्डवत्प्रणिपतन्तः, सततं मां नित्ययुक्ताः— नित्ययोगं काङ्क्षमाणा आत्मान्तं मद्दास्यव्यवसायिन उपासते ॥ १४ ॥

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

अन्येऽपि महात्मानः पूर्वोक्तैः कीर्तनादिभिः— ज्ञानाख्येन यज्ञेन च यजन्तो मामुपासते । कथम् ? बहुधा पृथक्त्वेन— जगदाकारेण, विश्वतोमुखम्— विश्वप्रकारमवस्थितं मामेकत्वेनोपासते । एतदुक्तं भवति— भगवान् वासुदेव एव नामरूपविभागानर्हातिसूक्ष्मचिदचिद्वस्तुशरीरस्सन् सत्यसङ्कल्पो विविधविभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरस्स्यामिति संकल्प्य स एक एव देवतिर्यङ्मनुष्यस्थावराख्यविचित्रजगच्छरीरोऽवतिष्ठत इत्यनुसंदधानाश्च मामुपासते इति ॥ १५ ॥

तथा हि विश्वशरीरोऽहमेवावस्थित इत्याह—

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

अहं क्रतुः— अहं ज्योतिष्टोमादिकः क्रतुः ; अहमेव महायज्ञः ; अहमेव पितृगणपुष्टिदा स्वधा ; औषधम्— हविश्चाहमेव, अहमेव च मन्त्रः ; अहमेव चाज्यम् ; प्रदर्शनार्थमिदम् ; सोमादिकं च हविरहमेवेत्यर्थः ; अहमाहवनीयादिकोऽग्निः ; होमश्चाहमेव ॥ १६ ॥

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ १७ ॥

अस्य— स्थावरजङ्गमात्मकस्य जगतः, तत्रतत्र पितृत्वेन, मातृत्वेन, धातृत्वेन, पितामहत्वेन च वर्तमानोऽहमेव । अत्र धातृशब्दो मातापितृव्यतिरिक्ते उत्पत्तिप्रयोजके चेतनविशेषे वर्तते । यत्किञ्चिद्वेदवेद्यं पवित्रम्— पावनम् , तदहमेव । वेदकश्च वेदबीजभूतः प्रणवोऽहमेव । ऋक्सामयजुरात्मको वेदश्चाहमेव ॥१७॥

गतिर्भर्ता प्रभुस्साक्षी निवासश्शरणं सुहृत् ।
प्रभवप्रलयस्थानं निधानं बीजमव्ययम् ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

गम्यत इति गतिः— तत्रतत्र प्राप्यस्थानमित्यर्थः ; भर्ता— धारयिता, प्रभुः— शाशिता, साक्षी— साक्षाद्द्रष्टा, निवासः— वासस्थानं वेश्मादि, शरणम्— इष्टस्य प्रापकतयाऽनिष्टस्य निवारणतया च समाश्रयणीयश्चेतनश्शरणम्, स चाहमेव ; सुहृत्— हितैषी, प्रभवप्रलयस्थानम्— यस्यकस्यचिद्यत्रकुत्रचिदुत्पत्तिप्रलययोर्यत् स्थानम्, तदहमेव, निधानं निधीयत इति निधानम्, उत्पाद्यमुपसंहार्यं चाहमेवेत्यर्थः ; अव्ययं बीजम्— तत्रतत्र व्ययरहितं यत्कारणम्, तदहमेव ॥ १८ ॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९॥

अग्न्यादित्यादिरूपेणाहमेव तपामि ; ग्रीष्मादावहमेव वर्षं निगृह्णामि। तथा वर्षासु चाहमेवोत्सृजामि। अमृतं चैव मृत्युश्च— येन जीवति लोको येन च म्रियते, तदुभयमहमेव। किमत्र बहुनोक्तेन ; सदसच्चाहमेव— सद्यद्वर्तते, असद्यदतीतमनागतं च, सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्तत्प्रकारोऽहमेवास्थित इत्यर्थः। एवं बहुधा पृथक्त्वेन विभक्तनामरूपावस्थितकृत्स्नजगच्छरीरतया तत्प्रकारोऽहमेवावस्थित इत्येकत्वज्ञानेनानुसन्दधानाश्च मामुपासते ॥ १९ ॥

एवं महात्मनां ज्ञानिनां भगवदनुभवैकभोगानां वृत्तमुक्त्वा तेषामेव विशेषं दर्शयितुमज्ञानां कामकामानां वृत्तमाह—

त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्नाः गतागतं कामकामा लभन्ते ॥ २१ ॥

ऋग्यजुस्सामरूपास्तिस्रो विद्यास्त्रिविद्यम् ; केवलं त्रिविद्यनिष्ठास्त्रैविद्याः, न तु त्रय्यन्तनिष्ठाः। त्रय्यन्तनिष्ठा हि महात्मानः पूर्वोक्तप्रकारेण निखिलवेदवेद्यं मामेव ज्ञात्वाऽतिमात्रमद्भक्तिकारितकीर्तनादिभिर्ज्ञानयज्ञेन च मदेकप्राप्या मामेवोपासते। त्रैविद्यास्तु वेदप्रतिपाद्यकेवलेन्द्रादियागशिष्टसोमान् पिबन्तः, पूतपापाः— स्वर्गादिप्राप्तिविरोधिपापात्पूताः, तैः केवलेन्द्रादिदैवत्यतयाऽनुसंहितैर्यज्ञैर्वस्तुतस्तद्रूपं मामिष्ट्वा, तथावस्थितं मामजानन्तः स्वर्गगतिं प्रार्थयन्ते। ते पुण्यम्— दुःखासंभिन्नं सुरेन्द्रलोकं प्राप्य तत्रतत्र दिव्यान् देवभोगानश्नन्ति। ते तं विशालं स्वर्गलोकं भुक्त्वा तदनुभवहेतुभूते पुण्ये क्षीणे पुनरपि मर्त्यलोकं विशन्ति। एवं त्रय्यन्तसिद्धज्ञानविधुराः काम्यस्वर्गादिकामाः केवलं त्रयीधर्ममनुप्रपन्नाः गतागतं लभन्ते— अल्पास्थिरस्वर्गादीननुभूय पुनःपुनर्निवर्तन्त इत्यर्थः ॥ २०, २१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

महात्मानस्तु निरतिशयरूपमच्चिन्तनं कृत्वा मामनवधिकातिशयानन्दं प्राप्य न पुनरावर्तन्त इति तेषां विशेषं दर्शयति—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्याः— अनन्यप्रयोजनाः, मच्चिन्तनेन विनाऽऽत्मधारणालाभान्मच्चिन्तनैकप्रयोजनाः मां चिन्तयन्तो ये महात्मानो जनाः पर्युपासते—सर्वकल्याणगुणान्वितं सर्वविभूतियुक्तं मां परित उपासते, अन्यूनमुपासते, तेषां नित्याभियुक्तानाम्— मयि नित्याभियोगं काङ्क्षमाणानाम्, अहम् मत्प्राप्तिलक्षणं योगम्, अपुनरावृत्तिरूपं क्षेमं च वहामि ॥ २२ ॥

ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

ये त्विन्द्रादिदेवताभक्ताः केवलत्रयीनिष्ठाः श्रद्धयाऽन्विताः इन्द्रादीन् यजन्ते; तेऽपि पूर्वोक्तेन न्यायेन सर्वस्य मच्छरीरतया मदात्मकत्वेनेन्द्रादिशब्दानां च मद्वाचित्वाद्वस्तुतो मामेव यजन्ते; अपित्वविधिपूर्वकं यजन्ते। इन्द्रादीनां देवतानां कर्मस्वाराध्यतया अन्वयं यथा वेदान्तवाक्यानि *चतुर्होतारो यत्र संपदं गच्छन्ति देवैः इत्यादीनि विदधति; न तत्पूर्वकं यजन्ते। वेदान्तवाक्यजातं हि परमपुरुषशरीरतयाऽवस्थितानामिन्द्रादीनामाराध्यत्वं विदधदात्मभूतस्य परमपुरुषस्यैव साक्षादाराध्यत्वं विदधाति। चतुर्होतारः— अग्निहोत्रदर्शपूर्णमासादीनि कर्माणि, यत्र— परमात्मन्यात्मतयाऽवस्थिते सत्येव तच्छरीरभूतैरिन्द्रादिदेवैः, संपदं गच्छन्ति— इन्द्रादिदेवानामाराधनान्येतानि कर्माणीतीमां संपदं गच्छन्तीत्यर्थः ॥ २३ ॥

अतस्त्रैविद्या इन्द्रादिशरीरस्य परमपुरुषस्याराधनान्येतानि कर्माणि, आराध्यश्च स एवेति न जानन्ति; ते च परिमितफलभागिनश्च्यवनस्वभावाश्च भवन्ति: तदाह—

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

प्रभुरेव च— तत्रतत्र फलप्रदाता चाहमेवेत्यर्थः ॥ २४ ॥

अहो महदिदं वैचित्र्यम्, यदेकस्मिन्नेव कर्मणि वर्तमानास्सङ्कल्पमात्रभेदेन केचिदत्यल्पफलभागिनश्च्यवनस्वभावाश्च भवन्ति; केचनानवधिकातिशयानन्दपरमपुरुषप्राप्तिरूपफलभागिनोऽपुनरावर्तिनश्च भवन्तीत्याह—

Digitization by Arya Samaj Charitable Foundation, Chennai

यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि माम्॥ २५॥

व्रतशब्दस्सङ्कल्पवाची; देवव्रताः— दर्शपूर्णमासादिभिः कर्मभिः इन्द्रादीन्यजामह इति इन्द्रादियजनसङ्कल्पा ये, त इन्द्रादीन् यान्ति। ये च पितृयज्ञादिभिः पितॄन् यजामह इति पितृयजनसङ्कल्पाः, ते पितॄन् यान्ति। ये च यक्षरक्षःपिशाचादीनि भूतानि यजामह इति भूतयजनसङ्कल्पाः, ते भूतानि यान्ति। ये तु तैरेव यज्ञैः देवपितृभूतशरीरकं परमात्मानं भगवन्तं वासुदेवं यजामह इति मां यजन्ते, ते मद्याजिनो मामेव यान्ति। देवादिव्रताः देवादीन् प्राप्य तैस्सह परिमितं भोगं भुक्त्वा तेषां विनाशकाले तैस्सह विनष्टा भवन्ति। मद्याजिनस्तु मामनादिनिधनं सर्वज्ञं सत्यसङ्कल्पमनवधिकातिशयासंख्येयकल्याणगुणगणमहोदधिमनवधिकातिशयानन्दं प्राप्य न पुनर्निवर्तन्त इत्यर्थः॥ २५॥

मद्याजिनामयमपि विशेषोऽस्तीत्याह—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ २६॥

सर्वसुलभं पत्रं वा पुष्पं वा फलं वा तोयं वा यो भक्त्या मे प्रयच्छति— अत्यर्थमत्प्रियत्वेन तत्प्रदानेन विनाऽऽत्मधारणमलभमानतया तदेकप्रयोजनो यो मे पत्रादिकं ददाति; तस्य प्रयतात्मनः तत्प्रदानैकप्रयोजनत्वरूपशुद्धियुक्तमनसः, तत्— तथाविधभक्त्युपहृतम्, अहम्— सर्वेश्वरो निखिलजगदुदयविभवलयलीलोऽवाप्तसमस्तकामस्सत्यसङ्कल्पोऽनवधिकातिशयासंख्येयकल्याणगुणगणस्स्वाभाविकानवधिकातिशयानन्दस्स्वानुभवे वर्तमानोऽपि, मनोरथपथदूरवर्ति प्रियं प्राप्येवाश्नामि। यथोक्तं मोक्षधर्मे— * याः क्रियास्संप्रयुक्तास्स्युरेकान्तगतबुद्धिभिः। तास्सर्वाश्शिरसा देवः प्रतिगृह्णाति वै स्वयम्॥ इति॥ २६॥

यस्मात् ज्ञानिनां महात्मनां वाङ्मनसागोचरोऽयं विशेषः, तस्मात्त्वं च ज्ञानी भूत्वोक्तलक्षणभक्तिभारावनमितात्मात्मीयः कीर्तनयतनार्चनप्रणामादिकं सततं कुर्वाणो लौकिकं वैदिकं च नित्यनैमित्तिकं कर्म चेत्थं कुर्वित्याह—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ २७॥

यत् देहयात्राशेषभूतं लौकिकं कर्म करोषि, यच्च देहधारणायाश्नासि, यच्च वैदिकं होमदानतपःप्रभृति नित्यनैमित्तिकं कर्म करोषि, तत्सर्वं मदर्पणं कुरुष्व। अर्प्यत इत्यर्पणम्: सर्वस्य लौकिकस्य वैदिकस्य च कर्मणः कर्तृत्वं, भोक्तृत्वम्, आराध्यत्वं च यथा मयि संमर्पितं भवति तथा कुरु। एतदुक्तं भवति—

Digitization by Arya Samaj Charitable Foundation, Chennai

यागदानादिषु आराध्यतया प्रतीयमानानां देवादीनां कर्मकर्तुर्भोक्तुः तव च मदीयतया मत्सङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तितया च मय्येव परमशेषिणि परमकर्तरि त्वां च कर्तारं भोक्तारमाराधकम्, आराध्यं च देवताजातम्, आराधनं च क्रियाजातम्ः सर्वं समर्पय; तव मन्नियाम्यतापूर्वकमच्छेषतैकरसतामाराध्यादेश्चैतत्स्वभावगर्भतामत्यर्थप्रीतियुक्तोऽनुसंधत्स्वेति ॥ २७ ॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

एवं संन्यासाख्ययोगयुक्तमनाः आत्मानं मच्छेषतामन्नियाम्यतैकरसं कर्म च सर्वं मदाराधनमनुसंदधानो लौकिकं वैदिकं च कर्म कुर्वन् शुभाशुभफलैरनन्तैः प्राचीनकर्माख्यैर्बन्धनैर्मत्प्राप्तिविरोधिभिस्सर्वैर्मोक्ष्यसे ; तैर्विमुक्तो मामेवोपैष्यसि ॥ २८ ॥

ममेमं परममतिलोकं स्वभावं शृणु—

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

देवतिर्यङ्मनुष्यस्थावरात्मनाऽवस्थितेषु जातितश्चाकारतस्स्वभावतो ज्ञानतश्चात्यन्तोत्कृष्टापकृष्टरूपेण वर्तमानेषु सर्वेषु भूतेषु समाश्रयणीयत्वे समोऽहम् ; अयं जात्याकारस्वभावज्ञानादिभिर्निकृष्ट इति समाश्रयणे न मे द्वेष्योऽस्ति— उद्वेजनीयतया न त्याज्योऽस्ति। तथा समाश्रितत्वातिरेकेण जात्यादिभिरत्यन्तोत्कृष्टोऽयमिति तद्युक्ततया समाश्रयणे न कश्चित्प्रियोऽस्ति— न संग्राह्योऽस्ति। अपि त्वत्यर्थमत्प्रियत्वेन मद्भजनेन विनाऽऽत्मधारणालाभान्मद्भजनैकप्रयोजना ये मां भजन्ते ; ते जात्यादिभिरुत्कृष्टा अपकृष्टा वा मत्समानगुणवद्यथासुखं वर्तन्ते। अहमपि तेषु मदुत्कृष्टेष्विव वर्ते ॥ २९ ॥

तत्रापि—

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः ॥ ३० ॥

तत्रतत्र जातिविशेषे जातानां यस्समाचर उपादेयः परिहरणीयश्च ; तस्मादतिवृत्तोऽप्युक्तप्रकारेण मामनन्यभाक् भजनैकप्रयोजनो भजते चेत् ; साधुरेव सः— वैष्णवाग्रेसर एव सः, मन्तव्यः— बहुमन्तव्यः, पूर्वोक्तैस्सम इत्यर्थः। कुत एतत् ? सम्यग्व्यवसितो हि सः— यतोऽस्य व्यवसायस्सुसमीचीनः। भगवान् निखिलजगदेककारणभूतः परं ब्रह्म नारायणश्चराचरपतिरस्मत्स्वामी मम गुरुर्मम सुहृत् मम परमं भोग्यमिति सर्वैर्दुष्प्रापोऽयं व्यवसायस्तेन कृतः, तत्कार्यं चानन्यप्रयोजनं निरन्तरं भजनं तस्यास्ति, अतस्साधुरेव ; बहुमन्तव्यश्च। अस्मिन् व्यवसाये तत्कार्ये चोक्तप्रकारभजने संपन्ने सति तस्याचारव्यतिक्रमस्स्वल्पवैकल्यमिति न तावताऽनादरणीयः, अपि तु बहुमन्तव्य एवेत्यर्थः ॥ ३० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु * नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥ इत्यादिश्रुतेः आचारव्यतिक्रम उत्तरोत्तरभजनोत्पत्तिप्रवाहं निरुणद्धीत्यत्राह—

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

मत्प्रियत्वकारितानन्यप्रयोजनमद्भजनेन विधूतपापतयैव समूलोन्मूलितरजस्तमोगुणः क्षिप्रं धर्मात्मा भवति— क्षिप्रमेव विरोधिरहितसपरिकरमद्भजनैकमना भवति। एवंरूपभजनमेव हि * धर्मस्यास्य परन्तप (३) इत्युपक्रमे धर्मशब्दोदितम्। शश्वच्छान्तिं निगच्छति— शाश्वतीमपुनरावर्तिनीं मत्प्राप्तिविरोध्याचारनिवृत्तिं गच्छति। कौन्तेय त्वमेवास्मिन्नर्थे प्रतिज्ञां कुरु— मद्भक्तावुपक्रान्तो विरोध्याचारमिश्रोऽपि न नश्यति; अपि तु मद्भक्तिमाहात्म्येन सर्वं विरोधिजातं नाशयित्वा शाश्वतीं विरोधिनिवृत्तिमधिगम्य क्षिप्रं परिपूर्णभक्तिर्भवतीति ॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणः पुण्या भक्ता राजर्षयस्तथा। अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

स्त्रियो वैश्याश्शूद्राश्च पापयोनयोऽपि मां व्यपाश्रित्य परां गतिं यान्ति; किं पुनः पुण्ययोनयो ब्राह्मणा राजर्षयश्च मद्भक्तिमास्थिताः। अतस्त्वं राजर्षिरस्थिरं तापत्रयाभिहततया असुखं चेमं लोकं प्राप्य वर्तमानो मां भजस्व ॥ ३२, ३३ ॥

भक्तिस्वरूपमाह—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥

मन्मना भव— मयि सर्वेश्वरेश्वरे, निखिलहेयप्रत्यनीककल्याणैकताने, सर्वज्ञे, सत्यसङ्कल्पे, निखिलजगदेककारणे, परस्मिन् ब्रह्मणि, पुरुषोत्तमे, पुण्डरीकदलामलायताक्षे, स्वच्छनीलजीमूतसङ्काशे, युगपदुदितदिनकरसहस्रसदृशतेजसि, लावण्यामृतमहोदधौ, उदारपीवरचतुर्बाहौ, अत्युज्ज्वलपीताम्बरे, अमलकिरीटमकरकुण्डलहारकेयूरकटकभूषिते, अपारकारुण्यसौशील्यसौन्दर्यमाधुर्यगाम्भीर्यौदार्यवात्सल्यजलधौ, अनालोचितविशेषाशेषलोकशरण्ये सर्वस्वामिनि तैलधारावदविच्छेदेन निविष्टमना भव। तदेव विशिनष्टि, मद्भक्तः— अत्यर्थमत्प्रियत्वेन युक्तो मन्मना भवेत्यर्थः। पुनरपि विशिनष्टि, मद्याजी— अनवधिकातिशयप्रियमदनुभवकारितमद्यजनपरो भव। यजनं नाम परिपूर्णशेषवृत्तिः। औपचारिकसांस्पर्शिकाभ्यवहारिकादिसकलभोगप्रदानरूपो हि यागः। यथा मदनुभव-

Digitization by Arya Samaj Charitable Foundation, Chennai

जनितनिरवधिकातिशयप्रीतिकारितमद्यजनपरो भवसि ; तथा मन्मना भवेत्युक्तं भवति । पुनरपि तदेव विशिनष्टि मां नमस्कुरु— अनवधिकातिशयप्रियमदनुभवकारितात्यर्थप्रियाशेषशेषवृत्तावपर्यवस्यन् मय्यन्तरात्मन्यतिमात्रप्रह्वीभावव्यवसायं कुरु । मत्परायणः— अहमेव परमयनं यस्यासौ मत्परायणः, मया विनाऽऽत्मधारणासंभावनया मदाश्रय इत्यर्थः । एवमात्मानं युक्त्वा मत्परायणस्त्वमेवमनवधिकातिशयप्रीत्या मदनुभवसमर्थं मनः प्राप्य मामेवैष्यसि । आत्मशब्दो ह्यत्र मनोविषयः । एवंरूपेण मनसा मां ध्यात्वा मामनुभूय मामिष्ट्वा मां नमस्कृत्य मत्परायणो मामेव प्राप्स्यसीत्यर्थः । तदेवं लौकिकानि शरीरधारणार्थानि वैदिकानि च नित्यनैमित्तिकानि कर्माणि मत्प्रीतये मच्छेषतैकरसो मयैव कारित इति कुर्वन् सततं मत्कीर्तनयतननमस्कारादिकान् प्रीत्या कुर्वाणो मन्नियाम्यं निखिलजगन्मच्छेषतैकरसमिति चानुसन्दधानोऽत्यर्थप्रियमद्गुणगणं चानुसन्धायाहरहरुक्तलक्षणमिदमुपासनमुपाददानो मामेव प्राप्स्यसि ॥ ३४ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये नवमोऽध्यायः ॥ ९ ॥

॥ अथ दशमोऽध्यायः ॥ १० ॥

भक्तियोगस्सपरिकर उक्तः । इदानीं भक्त्युत्पत्तये तद्विवृद्धये च भगवतो निरङ्कुशैश्वर्यादिकल्याणगुणगणानन्त्यम्, कृत्स्नस्य जगतस्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वं च प्रपञ्चयते—

श्रीभगवानुवाच —

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

मम माहात्म्यं श्रुत्वा प्रीयमाणाय ते मद्भक्त्युत्पत्तिविवृद्धिरूपहितकामनया भूयो मन्माहात्म्यप्रपञ्चविषयमेव परमं वचो यद्वक्ष्यामि ; तदवहितमनाश्शृणु ॥ १ ॥

न मे विदुस्सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

सुरगणा महर्षयश्चातीन्द्रियार्थदर्शिनोऽधिकतरज्ञाना अपि मे प्रभवम्— प्रभावं, न विदुः— मम नामकर्मस्वरूपस्वभावादिकं न जानन्ति ; यतस्तेषां देवानां महर्षीणां च सर्वशोऽहमादिः— तेषां स्वरूपस्य ज्ञानशक्त्यादेश्चाहमादिः ; तेषां देवत्वदेवर्षित्वादिहेतुभूतपुण्यानुगुणं मया दत्तं ज्ञानं परिमितम् ; अतस्ते परिमितज्ञाना मत्स्वरूपादिकं यथावन्न जानन्ति ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेतद्देवाद्यचिन्त्यस्वयाथात्म्यविषयज्ञानं भक्त्युत्पत्तिविरोधिपापविमोचनोपायमाह—

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असंमूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥

न जायत इत्यजः; अनेन विकारिद्रव्यादचेतनात्तत्संसृष्टात्संसारिचेतनाच्च विसजातीयत्वमुक्तम्; संसारिचेतनस्य हि कर्मकृताचित्संसर्गो जन्म। अनादिमित्यनेन पदेनादिमतोऽजान्मुक्तात्मनो विसजातीयत्वमुक्तम्। मुक्तात्मनो ह्यजत्वमादिमत्, तस्य हेयसंबन्धस्य पूर्ववृत्तत्वात्तदर्हताऽस्ति; अतोऽनादिमित्यनेन तदनर्हतया तत्प्रत्यनीकतोच्यते; * निरवद्यम्, इत्यादिश्रुत्या च। एवं हेयसंबन्धप्रत्यनीकस्वरूपतया तदनर्हं मां लोकमहेश्वरम्— लोकेश्वराणामपीश्वरं मर्त्येष्वसंमूढो यो वेत्ति; इतरसजातीयतयैकीकृत्य मोहस्संमोहः, तद्रहितोऽसंमूढः, स मद्भक्त्युत्पत्तिविरोधिभिस्सर्वैः पापैः प्रमुच्यते। एतदुक्तं भवति— लोके मनुष्याणां राजा इतरमनुष्यसजातीयः, केनचित्कर्मणा तदाधिपत्यं प्राप्तः; तथा देवानामधिपतिरपि; तथाऽण्डाधिपतिरपीतरसंसारिसजातीयः, तस्यापि भावनात्रयान्तर्गतत्वात्, * यो ब्रह्माणं विदधाति इति श्रुतेश्च। तथाऽन्येऽपि, ये केचनाणिमाद्यैश्वर्यं प्राप्ताः। अयं तु लोकमहेश्वरः— कार्यकारणावस्थादचेतनाद्बद्धान्मुक्ताच्च चेतनादीशितव्यात्सर्वस्मान्निखिलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणैकतानतया नियमनैकस्वभावतया च विसजातीय इतीतरसजातीयतामोहरहितो यो मां वेत्ति, स सर्वैः पापैः प्रमुच्यते इति॥ ३॥

एवं स्वस्वभावानुसन्धानेन भक्त्युत्पत्तिविरोधिपापनिरसनम्, विरोधिनिरसनादेवार्थतो भक्त्युत्पत्तिं च प्रतिपाद्य स्वैश्वर्यस्वकल्याणगुणगणप्रपञ्चानुसन्धानेन भक्तिविवृद्धिप्रकारमाह—

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमश्शमः। सुखं दुःखं भवोऽभावो भयं चाभयमेव च॥ ४॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः। भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥ ५॥

बुद्धिः— मनसो निरूपणसामर्थ्यम्; ज्ञानम्— चिदचिद्वस्तुविशेषविषयो निश्चयः; असंमोहः पूर्वगृहीताद्रजतादेर्विसजातीये शुक्तिकादिवस्तुनि सजातीयताबुद्धिनिवृत्तिः; क्षमा— मनोविकारहेतौ सत्यप्यविकृतमनस्त्वम्; सत्यम्— यथादृष्टविषयं भूतहितरूपं वचनम्; तदनुगुणा मनोवृत्तिरिहाभिप्रेता, मनोवृत्तिप्रकरणात्; दमः— बाह्यकरणानामनर्थविषयेभ्यो नियमनम्; शमः— अन्तःकरणस्य तथा नियमनम्; सुखम्— आत्मानुकूलानुभवः; दुःखम्— प्रतिकूलानुभवः; भवः— भवनम्, अनुकूलानुभवहेतुकं मनसो भवनम्; अभावः—प्रतिकूलानुभवहेतुको मनसोऽवसादः; भयम्— आगामिनो दुःखस्य हेतुदर्शनजं दुःखम्; तन्निवृत्तिः— अभयम्; अहिंसा— परदुःखाहेतुत्वम्; समता— आत्मनि सुहृत्सु विपक्षेषु चार्थानर्थयोस्सममतित्वम्; तुष्टिः— सर्वेष्वात्मसु दृष्टेषु तोषस्वभावत्वम्; तपः— शास्त्रीयो भोगसङ्कोचरूपः कायक्लेशः; दानम्— स्वकीयभोग्यानां परस्मै प्रतिपादनम्; यशः— गुणवत्ताप्रथा; अयशः— नैर्गुण्यप्रथा; एतच्चोभयं तदनुगुणमनोवृत्तिद्वयं मन्तव्यम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्प्रकरणात् ; तपोदाने च तथा । एवमाद्यास्सर्वेषां भूतानां भावाः—प्रवृत्तिनिवृत्तिहेतवो मनोवृत्तयो मत्त एव—मत्सङ्कल्पायत्ता भवन्ति ॥ ४, ५ ॥

सर्वस्य भूतजातस्य सृष्टिस्थित्योः प्रवर्तयितारश्च मत्संकल्पायत्तप्रवृत्तय इत्याह—

महर्षयस्सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥

पूर्वे सप्त महर्षयः— अतीतमन्वन्तरे ये भृग्वादयस्सप्त महर्षयो नित्यसृष्टिप्रवर्तनाय ब्रह्मणो मनस्संभवाः, नित्यस्थितिप्रवर्तनाय ये च सावर्णिका नाम चत्वारो मनवः स्थिताः, येषां सन्तानमये लोके जाता इमास्सर्वाः प्रजाः प्रतिक्षणमाप्रलयादपत्यानामुत्पादकाः पालकाश्च भवन्ति ; ते भृग्वादयो मनवश्च मद्भावाः— मम यो भावः स एव येषां भावः ते मद्भावाः, मन्मते स्थिताः, मत्सङ्कल्पानुवर्तिन इत्यर्थः ॥ ६ ॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविक[म्पे]म्प्येन योगेन युज्यते नात्र संशयः ॥ ७ ॥

विभूतिः— ऐश्वर्यम् , एतां सर्वस्य मदायत्तोत्पत्तिस्थितिप्रवृत्ति[ता]रूपां विभूतिं, मम हेयप्रत्यनीककल्याणगुणगणरूपं योगं च यस्तत्त्वतो वेत्ति, सोऽविक[म्पे]म्प्येन— अप्रकम्प्येन भक्तियोगेन युज्यते । नात्र संशयः ; मद्विभूतिविषयं कल्याणगुणविषयं च ज्ञानं भक्तियोगवर्धनमिति स्वयमेव द्रक्ष्यसीत्यभिप्रायः ॥ ७ ॥

विभूतिज्ञानविपाकरूपां भक्तिवृद्धिं दर्शयति—

अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥

अहम् , सर्वस्य— विचित्रचिदचित्प्रपञ्चस्य, प्रभवः— उत्पत्तिकारणम् , सर्वं मत्त एव प्रवर्तत इतीदं मम स्वाभाविकं निरंकुशैश्वर्यं, सौशील्यसौन्दर्यवात्सल्यादिकल्याणगुणगणयोगं च मत्वा बुधाः— ज्ञानिनः भावसमन्विताः माम्— सर्वकल्याणगुणान्वितं भजन्ते । भावः— मनोवृत्तिविशेषः । मयि स्पृहयालवो मां भजन्त इत्यर्थः ॥ ८ ॥

कथम् ?

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

मच्चित्ताः— मयि निविष्टमनसः, मद्गतप्राणाः— मद्गतजीविताः, मया विनाऽऽत्मधारणमलभमाना इत्यर्थः ; स्वैःस्वैरनुभूतान् मदीयान् गुणान् परस्परं बोधयन्तो मदीयानि दिव्यानि रमणीयानि कर्माणि च कथयन्तः,

Digitization by Arya Samaj Charitable Foundation, Chennai

तुष्यन्ति च रमन्ति च— वक्तारस्तद्वचनेनानन्यप्रयोजनेन तुष्यन्ति ; श्रोतारश्च तच्छ्रवणेनानवधिकातिशयप्रियेण रमन्ते ॥ ९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

तेषां सततयुक्तानाम्— मयि सततयोगमाशंसमानानां मां भजमानानामहं तमेव बुद्धियोगं विपाकदशापन्नं प्रीतिपूर्वकं ददामि ; येन ते मामुपयान्ति ॥ १० ॥

किञ्च,

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषामेवानुग्रहार्थमहम्, आत्मभावस्थः— तेषां मनोवृत्तौ विषयतयाऽवस्थितो मदीयान् कल्याणगुणगणांश्चाविष्कुर्वन् मद्विषयज्ञानाख्येन भास्वता दीपेन ज्ञानविरोधि प्राचीनकर्मरूपाज्ञानजं मद्व्यतिरिक्तपूर्वाभ्यस्तविषयप्रावण्यरूपं तमो नाशयामि ॥ ११ ॥

एवं सकलेतरविसजातीयं भगवदसाधारणं शृण्वतां निरतिशयानन्दजनकं कल्याणगुणगणयोगं तदैश्वर्यविततिं च श्रुत्वा तद्विस्तारं श्रोतुकामोऽर्जुन उवाच—

अर्जुन उवाच—

परं ब्रह्म परं धाम पवित्रं परमं भवान्।

परं ब्रह्म परं धाम परमं पवित्रमिति यं श्रुतयो वदन्ति, स हि भवान्। * यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति * ब्रह्मविदाप्नोति परम् * स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति इति । तथा परं धाम ; धामशब्दो ज्योतिर्वचनः, परं ज्योतिः ; * अथ यदतः परो दिवो ज्योतिर्दीप्यते * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते * तं देवा ज्योतिषां ज्योतिः, इति । तथा च परमं पवित्रम्—परमं पावनम् ; सर्तुरशेषकल्मषाश्लेषकरम्, विनाशकरं च । * यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते * तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते * नारयण परं ब्रह्म तत्त्वं नारायणः परः। नारयण परो ज्योतिरात्मा नारायणः परः, इति हि श्रुतयो वदन्ति ॥ ११॰ ॥

पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासस्स्वयं चैव ब्रवीषि मे ॥ १३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ऋषयश्च सर्वे परावरतत्त्वयाथात्म्यविदस्त्वामेव शाश्वतं दिव्यं पुरुषमादिदेवमजं विभुमाहुः ; तथैव देवर्षिर्नारदः असितो देवलो व्यासश्च । * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम् ॥ * पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः । साक्षाद्देवः पुराणोऽसौ स हि धर्मस्सनातनः ॥ * ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥ पवित्राणां हि गोविन्दः पवित्रं परमुच्यते । पुण्यानामपि पुण्योऽसौ मङ्गलानां च मङ्गलम् ॥ त्रैलोक्यं पुण्डरीकाक्षो देवदेवस्सनातनः । आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ॥ तथा * यत्र नारायणो देवः परमात्मा सनातनः । तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ॥ तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् । तत्र देवर्षयस्सिद्धास्सर्वे चैव तपोधनाः ॥ ....आदिदेवो महायोगी यत्रास्ते मधुसूदनः । पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ॥ * कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः । कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ॥ इति । तथा स्वयमेव ब्रवीषि च * भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ इत्यादिना * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते इत्यन्तेन ॥ १२, १३ ॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

अतस्सर्वमेतद्यथावस्थितवस्तुकथनं मन्ये, न प्रशंसाद्यभिप्रायम् , यन्मां प्रत्यनन्यसाधारणमनवधिकातिशयं स्वाभाविकं तवैश्वर्यं कल्याणगुणानन्त्यं च वदसि । अतो भगवन्— निरतिशयज्ञानशक्तिबलैश्वर्यतेजसां निधे, ते व्यक्तिं— व्यञ्जनप्रकारम् , न हि परिमितज्ञाना देवा दानवाश्च विदुः ॥ १४ ॥

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

हे पुरुषोत्तम, आत्मना आत्मानम्— त्वां स्वयमेव— स्वेनैव ज्ञानेन वेत्थ । भूतभावन— सर्वेषां भूतानामुत्पादयितः, भूतेश— सर्वेषां भूतानां नियन्तः देवदेव— दैवतानामपि परमदैवत, यथा मनुष्यमृगपक्षिसरीसृपादीन् सौन्दर्यसौशील्यादिकल्याणगुणगणैर्दैवतान्यतीत्य वर्तन्ते, तथा तानि सर्वाणि दैवतान्यपि तैस्तैर्गुणैरतीत्य वर्तमान, जगत्पते— जगत्स्वामिन् ॥ १५ ॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

दिव्याः— त्वदसाधारण्यो विभूतयो याः, तास्त्वमेवाशेषेण वक्तुमर्हसि— त्वमेव व्यञ्जयेत्यर्थः । याभिरनन्ताभिर्विभूतिभिः— यैर्नियमनविशेषैर्युक्तः इमान् लोकांस्त्वं नियन्तृत्वेन व्याप्य तिष्ठसि ॥ १६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कथं विद्यामहं योगी त्वां सदा परिचिन्तयन्।
केषुकेषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥

अहं योगी— भक्तियोगनिष्ठस्सन् भक्त्या त्वां सदा परिचिन्तयन्— चिन्तयितुं प्रवृत्तः चिन्तनीयं त्वां परिपूर्णैश्वर्यादिकल्याणगुणगणं कथं विद्याम्? पूर्वोक्तबुद्धिज्ञानादिभावव्यतिरिक्तेष्वनुक्तेषु केषुकेषु च भावेषु मया नियन्तृत्वेन चिन्त्योऽसि? ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १८॥

* अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (८) इति संक्षेपेणोक्तं तव स्रष्टृत्वादियोगं, विभूतिं— नियमनं च, भूयो विस्तरेण कथय। त्वयोच्यमानं त्वन्माहात्म्यामृतं शृण्वतो मे तृप्तिर्नास्ति हि; ममातृप्तिस्त्वयैव विदितेत्यभिप्रायः ॥ १८ ॥

श्रीभगवानुवाच —

हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ १९॥

हे कुरुश्रेष्ठ! मदीयाः कल्याणीर्विभूतीः प्राधान्यतस्ते कथयिष्यामि। प्राधान्यशब्देनोत्कर्षो विवक्षितः; * पुरोधसां च मुख्यं माम् (२४) इति हि वक्ष्यते। जगत्युत्कृष्टाः काश्चन विभूतीर्वक्ष्यामि, विस्तरेण वक्तुं श्रोतुं च न शक्यते, तासामानन्त्यात्। विभूतित्वं नाम नियाम्यत्वम्, सर्वेषां भूतानां बुद्ध्यादयः पृथग्विधभावा मत्त एव भवन्तीत्युक्त्वा * एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः (७) इति प्रतिपादनात। तथा तत्र योगशब्दनिर्दिष्टं स्रष्टृत्वादिकं विभूतिशब्दनिर्दिष्टं तत्प्रवर्त्यत्वमिति ह्युक्तम्। पुनश्च * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः इति ॥ १९ ॥

तत्र सर्वभूतानां प्रवर्तनरूपं नियमनमात्मतयाऽवस्थायेतीममर्थं योगशब्दनिर्दिष्टं सर्वस्य स्रष्टृत्वं पालयितृत्वं संहर्तृत्वं चेति सुस्पष्टमाह—

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च॥ २०॥

सर्वेषां भूतानां मम शरीरभूतानाम् आशये— हृदये अहमात्मतयाऽवस्थितः। आत्मा हि नाम शरीरस्य सर्वात्मना आधारः, नियन्ता, शेषी च। तथा वक्ष्यते— * सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं च * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ इति। श्रूयते च * यस्सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यस्सर्वाणि भूतान्यन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः इति, * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा

Digitization by Arya Samaj Charitable Foundation, Chennai

न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति च । एवं सर्वभूतानामात्मतयाऽवस्थितोऽहं तेषामादिर्मध्यं चान्तश्च, तेषामुत्पत्तिस्थितिप्रलयहेतुरित्यर्थः ॥ २० ॥

एवं भगवतस्स्वविभूतिभूतेषु सर्वेष्वात्मतयाऽवस्थानं तत्तच्छब्दसामानाधिकरण्यनिर्देशहेतुं प्रतिपाद्य विभूतिविशेषान् सामानाधिकरण्येन व्यपदिशति । भगवत्यात्मतयाऽवस्थिते हि सर्वे शब्दास्तस्मिन्नेव पर्यवस्यन्ति ; यथा देवो मनुष्यः पक्षी वृक्षः इत्यादयश्शब्दाश्शरीराणि प्रतिपादयन्तस्तत्तदात्मनि पर्यवस्यन्ति ; भगवतस्तत्तदात्मतयाऽवस्थानमेव तत्तच्छब्दसामानाधिकरण्यनिबन्धनमिति विभूत्युपसंहारे वक्ष्यति * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् (३९) इति सर्वेषां स्वेनाविनाभाववचनात् । अविनाभावश्च नियाम्यतयेति * मत्तस्सर्वं प्रवर्तते (८) इत्युपक्रमोदितम् ।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

द्वादशसंख्यासंख्यातानामादित्यानां द्वादशो य उत्कृष्टो विष्णुर्नामादित्यः, सोऽहम् । ज्योतिषां— जगति प्रकाशकानां योंऽशुमान् रविरादित्यगणः, सोऽहम् । मरुतामुत्कृष्टो मरीचिर्यः, सोऽहमस्मि । नक्षत्राणामहं शशी : नेयं निर्धारणे षष्ठी, * भूतानामस्मि चेतना (२२) इतिवत् । नक्षत्राणां पतिर्यश्चन्द्रः, सोऽहमस्मि ॥ २१ ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

वेदानाम्— ऋग्यजुस्सामाथर्वणां य उत्कृष्टस्सामवेदः, सोऽहम् । देवानामिन्द्रोऽहमस्मि । एकादशानामिन्द्रियाणां यदुत्कृष्टं मन इन्द्रियम्, तदहमस्मि । इयमपि न निर्धारणे : भूतानां चेतनावतां या चेतना, साऽहमस्मि ॥ २२ ॥

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुश्शिखरिणामहम् ॥ २३ ॥

रुद्राणामेकादशानां शङ्करोऽहमस्मि । यक्षरक्षसां वैश्रवणोऽहम् । वसूनामष्टानां पावकोऽहम् । शिखरिणाम्— शिखरशोभिनां पर्वतानां मध्ये मेरुरहम् ॥ २३ ॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥

पुरोधसामुत्कृष्टो बृहस्पतिर्यः, सोऽहमस्मि । सेनानीनां— सेनापतीनां स्कन्दोऽहमस्मि । सरसां सागरोऽहमस्मि ॥ २४ ॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

महर्षीणां मरीच्यादीनां भृगुरहम्। अर्थाभिधायिनश्शब्दा गिरः; तासामेकमक्षरं प्रणवोऽहमस्मि। यज्ञानामुत्कृष्टो जपयज्ञोऽस्मि। पर्वतमालानां हिमवानहम्॥ २५॥

अश्वत्थस्सर्ववृक्षाणां देवर्षीणां च नारदः। गन्धर्वाणां चित्ररथस्सिद्धानां कपिलो मुनिः॥ २६॥
उच्चैश्श्रवसमश्वानां विद्धि माममृतोद्भवम्। ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ २७॥
आयुधानामहं वज्रं धेनूनामस्मि कामधुक्। प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ २८॥
अनन्तश्चास्मि नागानां वरुणो यादसामहम्। पितॄणामर्यमा चास्मि यमस्संयमतामहम्॥ २९॥

वृक्षाणां पूज्योऽश्वत्थोऽहम्। देवर्षीणां नारदोऽहम्। कामधुक्— दिव्या सुरभिः। जननहेतुः कन्दर्पश्चाहमस्मि। सर्पाः— एकशिरसः; नागाः— बहुशिरसः। यादांसि— जलवासिनः, तेषां वरुणोऽहम्। दण्डयतां वैवस्वतोऽहम्॥ २६—२९॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥

अनर्थप्रेप्सुतया गणयतां मध्ये कालः— मृत्युरहम्॥ ३०॥

पवनः पवतामस्मि रामश्शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१॥

पवतां— गमनस्वभावानां पवनोऽहम्। शस्त्रभृतां रामोऽहम्। शस्त्रभृत्त्वमत्र विभूतिः, अर्थान्तराभावात्। आदित्यादयश्च क्षेत्रज्ञा आत्मत्वेनावस्थितस्य भगवतश्शरीरतया धर्मभूता इति शस्त्रभृत्त्वस्थानीयाः॥ ३१॥

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ ३२॥

सृज्यन्त इति सर्गाः, तेषाम् आदिः— कारणम्: सर्वदा सृज्यमानानां सर्वेषां प्राणिनां तत्रतत्र स्रष्टारोऽहमेवेत्यर्थः। तथाऽन्तः— सर्वदा संह्रियमाणानां तत्रतत्र संहर्तारोऽप्यहमेव। तथा च मध्यं पालनम्: सर्वदा पाल्यमानानां पालयितारश्चाहमेवेत्यर्थः। जल्पवितण्डादि कुर्वतां तत्त्वनिर्णयाय प्रवृत्तो वादो यस्सोऽहम्॥

अक्षराणामकारोऽस्मि द्वन्द्वस्सामासिकस्य च।
अहमेवाक्षयः कालः धाताऽहं विश्वतोमुखः॥ ३३॥

अक्षराणां मध्ये * अकारो वै सर्वा वाक् इति श्रुतिसिद्धस्सर्ववर्णानां प्रकृतिरकारोऽहम्। सामासिकः— समाससमूहः; तस्य मध्ये द्वन्द्वसमासोऽहम्; स ह्युभयपदार्थप्रधानत्वेनोत्कृष्टः। कलामुहूर्तादिमयोऽक्षयः कालोऽहमेव। सर्वस्य स्रष्टा हिरण्यगर्भश्चतुर्मुखोऽहम्॥ ३३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मृत्युस्सर्वहरश्चाहम् उद्भवश्च भविष्यताम् ।
कीर्तिश्श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

सर्वप्राणहरो मृत्युश्चाहम् । उत्पत्स्यमानानामुद्भवाख्यं कर्म चाहम् । श्रीरहम् ; नारीणां कीर्तिश्चाहम् ; वाक्चाहम् ; स्मृतिश्चाहम् ; मेधा चाहम् ; धृतिश्चाहम् ; क्षमा चाहम् ॥ ३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

साम्नां बृहत्सामाहम् । छन्दसां गायत्र्यहम् । कुसुमाकरो वसन्तः ॥ ३५ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

छलं कुर्वतां छलास्पदेष्वक्षादिलक्षणं द्यूतमहम् । जेतॄणां जयोऽस्मि । व्यवसायिनां व्यवसायोऽस्मि । सत्त्ववतां सत्त्वम्— महामनस्त्वम् ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

वसुदेवसूनुत्वमत्र विभूतिः, अर्थान्तराभावादेव । पाण्डवानां धनंजयोऽर्जुनोऽहम् । मुनयः— मननेनात्मयाथात्म्यदर्शिनः, तेषां व्यासोऽहम् । कवयः— विपश्चितः ॥ ३७ ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

नियमातिक्रमणे दण्डं कुर्वतां दण्डोऽहम् । विजिगीषूणां जयोपायभूता नीतिरस्मि । गुह्यानां संबन्धिषु गोपनेषु मौनमस्मि । ज्ञानवतां ज्ञानं चाहम् ॥ ३८ ॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

सर्वभूतानां सर्वावस्थावस्थितानां तत्तदवस्थाबीजभूतं प्रतीयमानमप्रतीयमानं च यत्, तदहमेव । भूतजातं मया आत्मतयाऽवस्थितेन विना यत्स्यात्, न तदस्ति । * अहमात्मा गुडाकेश सर्वभूताशयस्थितः (२०) इति प्रक्रमात् * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् इत्यत्राप्यात्मतयाऽवस्थानमेव विवक्षितम् । सर्वं वस्तुजातं सर्वावस्थं मया आत्मभूतेन युक्तं स्यादित्यर्थः । अनेन सर्वस्यास्य सामानाधिकरण्यनिर्देशस्यात्मतयाऽवस्थितिरेव हेतुरिति [प्रकटितम्] प्रकटयति ॥ ३९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

मम दिव्यानां— कल्याणीनां विभूतीनामन्तो नास्ति ; एष तु विभूतेर्विस्तरो मया कैश्चिदुपाधिभिः संक्षेपतः प्रोक्तः ॥ ४० ॥

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ ४१ ॥

यद्यद्विभूतिमत्— ईशितव्यसंपन्नं भूतजातं श्रीमत्— कान्तिमत्, धनधान्यसमृद्धं वा, ऊर्जितं कल्याणारम्भेषूद्युक्तम ; तत्तन्मम तेजोंससंभवमित्यवगच्छ । तेजः— पराभिभवनसामर्थ्यम् , ममाचिन्त्यशक्तेर्नियमनशक्त्येकदेशसंभवमित्यर्थः ॥ ४१ ॥

अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
विभूतिविस्तरयोगो नाम दशमोऽध्यायः ॥

बहुनैतेनोच्यमानेन ज्ञानेन किं प्रयोजनम् । इदं चिदचिदात्मकं कृत्स्नं जगत्कार्यावस्थं कारणावस्थं स्थूलं सूक्ष्मं च स्वरूपसद्भावे, स्थितौ, प्रवृत्तिभेदे च यथा मत्सङ्कल्पं नातिवर्तेत ; तथा मम महिम्नोऽयुतायुतांशेन विष्टभ्याहमवस्थितः । यथोक्तं भगवता पराशरेण— • यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता इति ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये दशमोऽध्यायः ॥ १० ॥

॥ अथ एकादशोऽध्यायः ॥ ११ ॥

एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतस्सर्वात्मत्वं, तत एव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तम् । तमेतं भगवदसाधारणं स्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितां च भगवत्सकाशादुपश्रुत्यैवमेवेति निश्चित्य तथाभूतं भगवन्तं साक्षात्कर्तुकामोऽर्जुन उवाच । तथैव भगवत्प्रसादादनन्तरं द्रक्ष्यति । • सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्.... तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा (१३) इति हि वक्ष्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्जुन उवाच—

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १॥

देहात्माभिमानरूपमोहेन मोहितस्य ममानुग्रहैकप्रयोजनाय परमं गुह्यम्— परमं रहस्यमध्यात्मसंज्ञितम्— आत्मनि वक्तव्यं वचः; न त्वेवाहं जातु नासम् (२. १२) इत्यादि, तस्माद्योगी भवार्जुन (६. ४६) इत्येतदन्तं यत्त्वयोक्तम्, तेनायं ममात्मविषयो मोहस्सर्वो विगतः— दूरतो निरस्तः॥ १॥

तथा च—

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥

(तथा) सप्तमप्रभृति दशमपर्यन्ते त्वद्व्यतिरिक्तानां सर्वेषां भूतानां त्वत्तः— परमात्मनो भवाप्ययौ— उत्पत्तिप्रलयौ विस्तरशो मया श्रुतौ हि। कमलपत्राक्ष, तवाव्ययं— नित्यं सर्वचेतनाचेतनवस्तुशेषित्वं ज्ञानबलादिकल्याणगुणगणैस्तवैव परतरत्वं सर्वाधारत्वं चिन्तितनिमिषितादिसर्वप्रवृत्तिषु तवैव प्रवर्तयितृत्वमित्याद्यपरिमितं माहात्म्यं च श्रुतम्। हिशब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थः॥ २॥

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥ ३॥

हे परमेश्वर, एवमेतदित्यवधृतम्, यथाऽऽत्थ त्वम्— आत्मानं ब्रवीषि। पुरुषोत्तम आश्रितवात्सल्यजलधे तवैश्वरं त्वदसाधारणं सर्वस्य प्रशासितृत्वे, पालयितृत्वे, स्रष्टृत्वे, संहर्तृत्वे, भर्तृत्वे, कल्याणगुणाकरत्वे, परतरत्वे, सकलेतरविसजातीयत्वेऽवस्थितं रूपं द्रष्टुं— साक्षात्कर्तुमिच्छामि॥ ३॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्॥ ४॥

तत्— सर्वस्य स्रष्टृ, सर्वस्य प्रशासितृ, सर्वस्याधारभूतं त्वद्रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे ततो योगेश्वर— योगो ज्ञानादिकल्याणगुणयोगः; पश्य मे योगमैश्वरम्, इति हि वक्ष्यते; त्वद्व्यतिरिक्तस्य कस्याप्यसंभावितानां ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधे आत्मानं त्वामव्ययं मे दर्शय। अव्ययमिति क्रियाविशेषणम्। त्वां सकलं मे दर्शयेत्यर्थः॥ ४॥

एवं कौतूहलान्वितेन हर्षगद्गदकण्ठेन पार्थेन प्रार्थितो भगवानुवाच—

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीभगवानुवाच—

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

पश्य मे सर्वाश्रयाणि रूपाणि; अथ शतशस्सहस्रशश्च नानाविधानि— नानाप्रकाराणि, दिव्यानि— अप्राकृतानि, नानावर्णाकृतीनि— शुक्लकृष्णादिनानावर्णानि, नानाकाराणि च पश्य ॥ ५ ॥

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

ममैकस्मिन्रूपे पश्यादित्यान् द्वादश, वसूनष्टौ, रुद्रानेकादश, अश्विनौ द्वौ, मरुतश्चैकोनपञ्चाशतम्। प्रदर्शनार्थमिदम्, इह जगति प्रत्यक्षदृष्टानि शास्त्रदृष्टानि च यानि वस्तूनि, तानि सर्वाण्यन्यान्यपि सर्वेषु लोकेषु सर्वेषु च शास्त्रेष्वदृष्टपूर्वाणि बहून्याश्चर्याणि पश्य ॥ ६ ॥

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥ ७ ॥

इह ममैकस्मिन् देहे, तत्राप्येकस्थम्— एकदेशस्थं सचराचरं कृत्स्नं जगत्पश्य; यच्चान्यद्द्रष्टुमिच्छसि, तदप्येकदेहैकदेश एव पश्य ॥ ७ ॥

न तु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

अहं मम देहैकदेशे सर्वं जगद्दर्शयिष्यामि; त्वं त्वनेन नियतपरिमितवस्तुग्राहिणा प्राकृतेन स्वचक्षुषा, मां— तथाभूतं सकलेतरविसजातीयमपरिमेयं द्रष्टुं न शक्ष्यसे। तव दिव्यम्— अप्राकृतं मद्दर्शनसाधनं चक्षुर्ददामि। पश्य मे योगमैश्वरम्— मदसाधारणं योगं पश्य; ममानन्तज्ञानादियोगमनन्तविभूतियोगं च पश्येत्यर्थः ॥ ८ ॥

सञ्जय उवाच—

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

एवमुक्त्वा सारथ्येऽवस्थितः पार्थमातुलजो महायोगेश्वरो हरिः— महाश्चर्ययोगानामीश्वरः परब्रह्मभूतो नारायणः परममैश्वरं— स्वासाधारणं रूपं पार्थाय— पितृष्वसुः पृथायाः पुत्राय दर्शयामास, तद्विविधविचित्रनिखिलजगदाश्रयं विश्वस्य प्रशासितृ च रूपम् ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तच्चेदृशम्—

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥

देवं— द्योतमानम्, अनन्तम्— कालत्रयवर्तिनिखिलजगदाश्रयतया देशकालपरिच्छेदानर्हम्, विश्वतोमुखम्— विश्वदिग्वर्तिमुखम्, स्वोचितदिव्याम्बरगन्धमाल्याभरणायुधान्वितम् ॥ १०, ११ ॥

तामेव देवशब्दनिर्दिष्टां द्योतमानतां विशिनष्टि—

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

तेजसोऽपरिमितत्वदर्शनार्थमिदम् ; अक्षयतेजस्स्वरूपमित्यर्थः ॥ १२ ॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

तत्रानन्तायामविस्तारे, अनन्तबाहूदरवक्त्रनेत्रे, अपरिमिततेजस्के, अपरिमितदिव्यायुधोपेते, स्वोचितापरिमितदिव्यभूषणे, दिव्यमाल्याम्बरधरे, दिव्यगन्धानुलेपने, अनन्ताश्चर्यमये, देवदेवस्य दिव्ये शरीरे अनेकधा प्रविभक्तं— ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थावरादिभोक्तृवर्गपृथिव्यन्तरिक्षस्वर्गपातालातलवितलसुतलादिभोगस्थानभोग्यभोगोपकरणभेदभिन्नं प्रकृतिपुरुषात्मकं कृत्स्नं जगत् * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते * हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः * अहमात्मा गुडाकेश सर्वभूताशयस्थितः * आदित्यानामहं विष्णुः इत्यादिना * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इत्यन्तेनोदितम्, एकस्थम्— एकदेशस्थम् ; पाण्डवो भगवत्प्रसादलब्धतद्दर्शनानुगुणदिव्यचक्षुरपश्यत् ॥ १३ ॥

ततस्स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

ततो धनञ्जयो महाश्चर्यस्य कृत्स्नस्य जगतः स्वदेहैकदेशेनाश्रयभूतं कृत्स्नस्य प्रवर्तयितारं चाश्चर्यतमानन्तज्ञानादिकल्याणगुणगणं देवं दृष्ट्वा विस्मयाविष्टो हृष्टरोमा शिरसा दण्डवत्प्रणम्य कृताञ्जलिरभाषत ॥ १४ ॥

अर्जुन उवाच—

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

देव तव देहे सर्वान् देवान् पश्यामि ; तथा सर्वान् प्राणिविशेषाणां सङ्घान्, तथा ब्रह्माणं— चतुर्मुखमण्डाधिपतिं, तथेशं कमलासनस्थं— कमलासने ब्रह्मणि स्थितमीशं, तन्मतेऽवस्थितम् : तथा देवर्षिप्रमुखान् सर्वानृषीन्, उरगांश्च वासुकितक्षकादीन् दीप्तान् ॥ १५ ॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १६ ॥

अनेकबाहूदरवक्त्रनेत्रम् अनन्तरूपं त्वां सर्वतः पश्यामि : विश्वेश्वर— विश्वस्य नियन्तः, विश्वरूप— विश्वशरीर, यतस्त्वमनन्तः, अतस्तव नान्तं न मध्यं न पुनस्तवादिं च पश्यामि ॥ १६ ॥

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वा दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

तेजोराशिं सर्वतो दीप्तिमन्तं समन्ताद्दुर्निरीक्ष्यं दीप्तानलार्कद्युतिमप्रमेयं त्वां किरीटिनं गदिनं चक्रिणं च पश्यामि ॥ १७ ॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययश्शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

उपनिषत्सु * द्वे विद्ये वेदितव्ये इत्यादिषु वेदितव्यतया निर्दिष्टं परममक्षरं त्वमेव ; अस्य विश्वस्य परं निधानम्— विश्वस्यास्य परमाधारभूतस्त्वमेव : त्वमव्ययः— व्ययरहितः ; यत्स्वरूपो यद्गुणो यद्विभवश्च त्वं तेनैव रूपेण सर्वदाऽवतिष्ठसे । शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य वैदिकस्य धर्मस्य एवमादिभिरवतारैस्त्वमेव गोप्ता । सनातनस्त्वं पुरुषः [मतो मे]— * वेदाहमेतं पुरुषं महान्तं * परात्परं पुरुषम् इत्यादिषूदितस्सनातनपुरुषस्त्वमेवेति मे मतः— ज्ञातः । यदुकुलतिलकस्त्वमेवंभूत इदानीं साक्षात्कृतो मयेत्यर्थः ॥ १८ ॥

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९ ॥

अनादिमध्यान्तम्— आदिमध्यान्तरहितम । अनन्तवीर्यम्— अनवधिकातिशयवीर्यम्, वीर्यशब्दः प्रदर्शनार्थः : अनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधिमित्यर्थः । अनन्तबाहुम्— असंख्येयबाहुम् : सोऽपि प्रदर्शनार्थः ; अनन्तबाहूदरपादवक्त्रादिकम् । शशिसूर्यनेत्रम्— शशिवत्सूर्यवच्च प्रसादप्रतापयुक्तसर्वनेत्रम् । देवादीननुकूलान् नमस्कारादि कुर्वाणान्प्रति प्रसादः ; तद्विपरीतानसुरराक्षसादीन् प्रति प्रतापः : * रक्षांसि
XI. 36 भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः इति हि वक्ष्यते । दीप्तहुताशवक्त्रम्— प्रदीप्तकालानलवत्संहारानुगुणवक्त्रम् । स्वतेजसा विश्वमिदं तपन्तम्— तेजः पराभिभवनसामर्थ्यम् : स्वकीयेन तेजसा

Digitization by Arya Samaj Charitable Foundation, Chennai

विश्वमिदं तपन्तं त्वां पश्यामि— एवंभूतं सर्वस्य स्रष्टारं सर्वस्याधारभूतम्, सर्वस्य प्रशासितारम्, सर्वस्य संहर्तारम्, ज्ञानाद्यपरिमितगुणसागरम, आदिमध्यान्तरहितमेवंभूतदिव्यदेहं त्वां यथोपदेशं साक्षात्करोमीत्यर्थः। एकस्मिन् दिव्यदेहे अनेकोदरादिकं कथम्? इत्थमुपपद्यते— एकस्मात्कटिप्रदेशादनन्तपरिमाणादूर्ध्वमुद्गता यथोदितोदरादयः, अधश्च यथोदितदिव्यपादः; तत्रैकस्मिन्मुखे नेत्रद्वयमिति च न विरोधः ॥ १९ ॥

एवंभूतं त्वां दृष्ट्वा देवादयोऽहं च प्रव्यथिता भवाम इत्याह—

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

द्युशब्दः पृथिवीशब्दश्चोभावुपरितनानामधस्तनानां च लोकानां प्रदर्शनार्थौ। द्यावापृथिव्योरन्तरम्— अवकाशः, यस्मिन्नवकाशे सर्वे लोकास्तिष्ठन्ति; सर्वोऽयमवकाशो दिशश्च सर्वास्त्वयैकेन व्याप्ताः। दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदम्— अनन्तायामविस्तारमत्यद्भुतमत्युग्रं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम्— युद्धदिदृक्षया आगतेषु ब्रह्मादिदेवासुरपितृगणसिद्धगन्धर्वयक्षराक्षसेषु प्रतिकूलानुकूलमध्यस्थरूपं लोकत्रयं सर्वं प्रव्यथितम्— अत्यन्तभीतम्। महात्मन्— अपरिच्छेद्यमनोवृत्ते। एतेषामप्यर्जुनस्येव विश्वाश्रयरूपसाक्षात्कारसाधनं दिव्यं चक्षुर्भगवता दत्तम्। किमर्थमिति चेत्; अर्जुनाय स्वैश्वर्यं सर्वं प्रदर्शयितुम्। अत इदमुच्यते— * दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्निति ॥ २० ॥

अमी हि त्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

अमी सुरसंघाः उत्कृष्टास्त्वां विश्वाश्रयमवलोक्य हृष्टमनसस्त्वत्समीपं विशन्ति। तेष्वेव केचिदत्युग्रमत्यद्भुतं च तवाकारमालोक्य भीताः प्राञ्जलयस्स्वज्ञानानुगुणं स्तुतिरूपाणि वाक्यानि गृणन्ति— उच्चारयन्ति। अपरे महर्षिसंघास्सिद्धसंघाश्च परावरतत्त्वयाथात्म्यविदः स्वस्तीत्युक्त्वा पुष्कलाभिर्भगवदनुरूपाभिः स्तुतिभिः स्तुवन्ति ॥ २१ ॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

ऊष्मपाः— पितरः, * ऊष्मभागा हि पितरः इति श्रुतेः। एते सर्वे विस्मयमापन्नास्त्वां वीक्षन्ते ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ २३ ॥

बह्वीभिर्दंष्ट्राभिरतिभीषणाकारं लोकाः पूर्वोक्ताः प्रतिकूलानुकूलमध्यस्थास्त्रिविधाः सर्व एवाहं च तवेदमीदृशं रूपं दृष्ट्वा अतीव व्यथिता भवामः ॥ २३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नभस्स्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥

नभश्शब्दः * तदक्षरे परमे व्योमन् , * आदित्यवर्णं तमसः परस्तात् , * क्षयन्तमस्य रजसः पराके * यो अस्याध्यक्षः परमे व्योमन् इत्यादिश्रुतिसिद्धत्रिगुणप्रकृत्यतीतपरमव्योमवाची, सविकारस्य प्रकृतितत्त्वस्य, पुरुषस्य च सर्वावस्थस्य, कृत्स्नस्याश्रयतया नभस्स्पृशमिति वचनात् , * द्यावापृथिव्योरिदमन्तरं हि व्याप्तमिति पूर्वोक्तत्वाच्च । दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा, प्रव्यथितान्तरात्मा— अत्यन्तभीतमनाः, धृतिं न विन्दामि— देहस्य धारणं न लभे ; मनसश्चेन्द्रियाणां च शमं न लभे । विष्णो— व्यापिन् ! सर्वव्यापिनमतिमात्रमत्यद्भुतमतिघोरं च त्वां दृष्ट्वा प्रशिथिलसर्वावयवो व्याकुलेन्द्रियश्च भवामीत्यर्थः ॥ २४ ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

युगान्तकालानलवत्सर्वसंहारे प्रवृत्तान्यतिघोराणि तव मुखानि दृष्ट्वा दिशो न जाने ; सुखं च न लभे । जगतां निवास देवेश— ब्रह्मादीनामीश्वराणामपि परममहेश्वर ! मां प्रति प्रसन्नो भव । यथाहं प्रकृतिं गतो भवामि, तथा कुर्वित्यर्थः ॥ २५ ॥

एवं सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तित्वं दर्शयन् पार्थसारथी राजवेषच्छद्मनावस्थितानां धार्तराष्ट्राणां यौधिष्ठिरेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतरणं स्वमनीषितं स्वेनैव करिष्यमाणं पार्थाय दर्शयामास । स च पार्थो भगवतः स्रष्टृत्वादिकं सर्वैश्वर्यं साक्षात्कृत्य तस्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रादीनामुपसंहारमनागतमपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्निदं [चो] प्रोवाच—

अमी [च त्वा] सर्वे धृतराष्ट्रस्य पुत्रास्सर्वैस्सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणस्सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥

अमी धृतराष्ट्रस्य पुत्राः दुर्योधनादयस्सर्वे भीष्मो द्रोणस्सूतपुत्रः— कर्णश्च तत्पक्षीयैरवनिपालसमूहैस्सर्वैरस्मदीयैरपि कैश्चिद्योधमुख्यैस्सह त्वरमाणा दंष्ट्राकरालानि भयानकानि तव वक्त्राणि विनाशाय विशन्ति ; तत्र केचिच्चूर्णितैरुत्तमाङ्गैर्दशनान्तरेषु विलग्नास्संदृश्यन्ते ॥ २६, २७ ॥

यथा नदीनां बहवोऽम्बुवेगास्समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा प्रदीप्तज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥

एते राजलोका बहवो नदीनामम्बुप्रवाहाः समुद्रमिव, प्रदीप्तज्वलनमिव च शलभाः, तव वक्त्राण्यभिविज्वलन्ति स्वयमेव त्वरमाणा आत्मनाशाय विशन्ति ॥ २८, २९ ॥

लेलिह्यसे ग्रसमानस्समन्ताल्लोकान् समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥

राजलोकान् समग्रान् ज्वलद्भिर्वदनैर्ग्रसमानः कोपवेगेन तद्रुधिरावसिक्तमोष्ठपुटादिकं लेलिह्यसे— पुनःपुनर्लेहनं करोषि । तवातिघोरा भासः— रश्मयः, तेजोभिः— स्वकीयैः प्रकाशैः, जगत्समग्रमापूर्य प्रतपन्ति ॥

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं नहि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

• दर्शयात्मानमव्ययम् (४) इति तवैश्वर्यं निरङ्कुशं साक्षात्कर्तुं प्रार्थितेन भवता निरङ्कुशमैश्वर्यं दर्शयताऽतिघोररूपमिदमाविष्कृतम् । अतिघोररूपः को भवान्, किं कर्तुं प्रवृत्त इति भवन्तं ज्ञातुमिच्छामि । तवाभिप्रेतां प्रवृत्तिं न जानामि । एतदाख्याहि मे । नमोऽस्तु ते देववर प्रसीद— नमस्तेऽस्तु सर्वेश्वर । एवं कर्तुमनेनाभिप्रायेणेदं संहर्तृ रूपमाविष्कृतमित्युक्त्वा प्रसन्नरूपश्च भव ॥ ३१ ॥

आश्रितवात्सल्यातिरेकेण विश्वैश्वर्यं दर्शयतो भवतो घोररूपाविष्कारे कोऽभिप्राय इति पृष्टो भगवान् पार्थसारथिस्स्वाभिप्रायमाह— पार्थोद्योगेन विनाऽपि धार्तराष्ट्रप्रमुखमशेषं राजलोकं निहन्तुमहमेव प्रवृत्त इति ज्ञापनाय मम घोररूपाविष्कारः, तज्ज्ञापनं च पार्थमुद्योजयितुमिति ।

श्रीभगवानुवाच—

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

कलयति— गणयतीति कालः; धार्त्रराष्ट्रप्रमुखानां राजलोकानामायुरवसानं गणयन्नहं तत्क्षयकृत् घोररूपेण प्रवृद्धो राजलोकान् समाहर्तुम्— आभिमुख्येन संहर्तुमिह प्रवृत्तोऽस्मि । अतो मत्संकल्पादेव त्वामृतेऽपि— त्वदुद्योगादृतेऽपि, एते धार्तराष्ट्रप्रमुखास्तव प्रत्यनीकेषु येऽवस्थिता योधाः, ते सर्वे न भविष्यन्ति— विनङ्क्ष्यन्ति ॥ ३२ ॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात्त्वं तान् प्रति युद्धायोत्तिष्ठ, तान् शत्रून् जित्वा यशो लभस्व ; धर्म्यं राज्यं च समृद्धं भुङ्क्ष्व। मयैवैते कृतापराधाः पूर्वमेव निहताः— हनने विनियुक्ताः ; त्वं तु तेषां हनने निमित्तमात्रं भव ; मया हन्यमानानां शस्त्रादिस्थानीयो भव। सव्यसाचिन् ; * षच समवाये ; सव्येन शरसचनशीलस्सव्यसाची ; सव्येनापि करेण शरसमवायकरः, करद्वयेन योद्धुं समर्थ इत्यर्थः ॥ ३३ ॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योध[वीरान्]मुख्यान्।
मया हतांस्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

द्रोणभीष्मकर्णादीन् कृतापराधतया मयैव हनने विनियुक्तान् त्वं जहि— त्वं हन्याः। एतान् गुरून् बन्धूंश्चान्यानपि भोगसक्तान् कथं हनिष्यामीति मा व्यथिष्ठाः— तानुद्दिश्य धर्माधर्मभयेन बन्धुस्नेहेन कारुण्येन च मा व्यथां कृथाः। यतस्ते कृतापराधा मयैव हनने विनियुक्ताः ; अतो निर्विशङ्को युध्यस्व। रणे सपत्नान् जेतासि— जेष्यसि। नैतेषां वधे नृशंसतागन्धः ; अपि तु जय एव लभ्यत इत्यर्थः ॥ ३४ ॥

सञ्जय उवाच—

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

एतदाश्रितवात्सल्यजलधेः केशवस्य वचनं श्रुत्वा अर्जुनस्तस्मै नमस्कृत्य भीतभीतो भूयस्तं प्रणम्य कृताञ्जलिर्वेपमानः किरीटी सगद्गदमाह ॥ ३५ ॥

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ३६ ॥

स्थाने— युक्तम् ; यदेतद्युद्धदिदृक्षयाऽऽगतमशेषदेवगन्धर्वसिद्धयक्षविद्याधरकिन्नरकिंपुरुषादिकं जगत्, त्वत्प्रसादात् त्वां सर्वेश्वरमवलोक्य तव प्रकीर्त्या सर्वं प्रहृष्यति, अनुरज्यते च। यच्च त्वामवलोक्य रक्षांसि भीतानि सर्वा दिशः प्रद्रवन्ति। सर्वे सिद्धसङ्घाः— सिद्धाद्यनुकूलसङ्घाः नमस्यन्ति च। तदेतत्सर्वं युक्तमिति पूर्वेण संबन्धः ॥ ३६ ॥

युक्ततामेवोपपादयति—

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।

महात्मन्, ते— तुभ्यं गरीयसे ब्रह्मणः— हिरण्यगर्भस्यापि आदिभूताय कर्त्रे हिरण्यगर्भादयः कस्माद्धेतोर्न नमस्कुर्युः ॥ ३६॥ ॥

अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्।

अनन्त देवेश जगन्निवास त्वमेवाक्षरम्— न क्षरतीत्यक्षरं जीवात्मतत्त्वम्। * न जायते म्रियते वा विपश्चित् इत्यादिश्रुतिसिद्धो जीवात्मा हि न क्षरति। सदसच्च त्वमेव— सदसच्छब्दनिर्दिष्टं कार्यकारणभावेनावस्थितं प्रकृतितत्त्वम्, नामरूपविभागवत्तया कार्यावस्थं सच्छब्दनिर्दिष्टं तदनर्हतया कारणावस्थमसच्छब्दनिर्दिष्टं च त्वमेव। तत्परं यत्— तस्मात्प्रकृतेः प्रकृतिसंबन्धिनश्च जीवात्मनः परम्— अन्यन्मुक्तात्मतत्त्वं यत्, तदपि त्वमेव। अतस्त्वादिदेवः, पुरुषः पुराणः, त्वमस्य विश्वस्य परं निधानम्— निधीयते त्वयि विश्वमिति त्वमस्य विश्वस्य परं निधानम्; विश्वस्य शरीरभूतस्यात्मतया परमाधारभूतस्त्वमेवेत्यर्थः॥ ३७॥

वेत्ताऽसि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥ ३८॥

जगति सर्वो वेदिता वेद्यं च सर्वं त्वमेव, एवं सर्वात्मतयाऽवस्थितस्त्वमेव परं च धाम— स्थानं प्राप्यस्थानमित्यर्थः। त्वया ततं विश्वमनन्तरूप— त्वयाऽऽत्मत्वेन विश्वं— चिदचिन्मिश्रं जगत् ततं— व्याप्तम्॥ ३८॥

अतस्त्वमेव वाय्वादिशब्दवाच्य इत्याह—

वायुर्यमोऽग्निर्वरुणश्शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।

सर्वेषां प्रपितामहस्त्वमेव, पितामहादयश्च; सर्वासां प्रजानां पितरः प्रजापतयः, प्रजापतीनां पिता हिरण्यगर्भः प्रजानां पितामहः, हिरण्यगर्भस्यापि पिता त्वं प्रजानां प्रपितामहः; पितामहादीनामात्मतया तत्तच्छब्दवाच्यस्त्वमेवेत्यर्थः॥ ३८॥

नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते॥ ३९॥
नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।

अत्यद्भुताकारं भगवन्तं दृष्ट्वा हर्षोत्फुल्लनयनोऽत्यन्तसाध्वसावनतस्सर्वतो नमस्करोति॥ ३९॥

अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः॥ ४०॥

अनन्तवीर्य— अपरिमितवीर्य, अपरिमितपराक्रमस्त्वं सर्वमात्मतया समाप्नोषि, ततस्सर्वोऽसि— यतस्त्वं सर्वं चिदचिद्वस्तुजातमात्मतया समाप्नोषि, अतः सर्वस्य चिदचिद्वस्तुजातस्य त्वच्छरीरतया त्वत्प्रकारत्वात्सर्वप्रकारस्त्वमेव सर्वशब्दवाच्योऽसीत्यर्थः। * त्वमक्षरं सदसत् * वायुर्यमोऽग्निः इत्यादिसर्वसामानाधिकरण्यनिर्देशस्यात्मतया व्याप्तिरेव हेतुरिति सुव्यक्तमुक्तं— * त्वया ततं विश्वमनन्तरूप * सर्वं समाप्नोषि ततोऽसि सर्वः इति च॥ ४०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेमं मया प्रमादात्प्रणयेन वाऽपि ॥ ४१ ॥

यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाऽप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

तवानन्तवीर्यत्वामितविक्रमत्वसर्वान्तरात्मत्वस्रष्टृत्वादिको यो महिमा, तमिमजानता मया प्रमादान्मोहात्प्रणयेन चिरपरिचियेन वा, सखेति मम वयस्य इति मत्वा हे कृष्ण, हे यादव, हे सखे इति त्वयि प्रसभं– विनयापेतं यदुक्तम् ; यच्च परिहासार्थं सर्वदैव सत्कारार्हस्त्वमसत्कृतोऽसि ; विहारशय्यासनभोजनेषु च सहकृतेष्वेकान्ते वा समक्षं वा यदसत्कृतोऽसि ; तत्सर्वं त्वामप्रमेयमहं क्षामये ॥ ४१, ४२ ॥

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥

अप्रतिमप्रभाव ! त्वमस्य सर्वस्य चराचरस्य लोकस्य पिताऽसि । अस्य लोकस्य गुरुश्चासि । अतस्त्वमस्य चराचरस्य लोकस्य गरीयान्– पूज्यतमः । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽपि– त्वदन्यः कारुण्यादिना केनापि गुणेन न त्वत्समोऽस्ति, कुतोऽभ्यधिकः ॥ ४३ ॥

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

यस्मात् त्वं सर्वस्य पिता, पूज्यतमो गुरुश्च, कारुण्यादिगुणैश्च सर्वाधिकोऽसि ; तस्मात् त्वामीशमीड्यं प्रणम्य प्रणिधाय च कायं प्रसादये । यथा कृतापराधस्यापि पुत्रस्य, यथा च सख्युः प्रणामपूर्वं प्रार्थितः पिता वा सखा वा प्रसीदति ; तदा त्वं परमकारुणिकः प्रियः प्रियाय मे सर्वं सोढुमर्हसि ॥ ४४ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

अदृष्टपूर्वमत्यद्भुतमत्युग्रं च तव रूपं दृष्ट्वा हृषितोऽस्मि– प्रीतोऽस्मि । भयेन प्रव्यथितं च मे मनः । अतस्तदेव तव सुप्रसन्नं रूपं मे दर्शय । प्रसीद देवेश जगन्निवास— मयि प्रसादं कुरु, देवानां ब्रह्मादीनामपीश, निखिलजगदाश्रयभूत ॥ ४५ ॥

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तथैव पूर्ववत् किरीटिनं, गदिनं, चक्रहस्तं त्वां द्रष्टुमिच्छामि। अतस्तेनैव पूर्वसिद्धेन चतुर्भुजेन रूपेण युक्तो भव। सहस्रबाहो विश्वमूर्ते— इदानीं सहस्रबाहुत्वेन विश्वशरीरत्वेन दृश्यमानरूपस्त्वं तेनैव रूपेण युक्तो भवेत्यर्थः॥ ४६॥

श्रीभगवानुवाच—

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥

यन्मे तेजोमयं— तेजसां राशिं, विश्वं— विश्वात्मभूतम्, अनन्तम्— अन्तरहितम्; प्रदर्शनार्थमिदम्, आदिमध्यान्तरहितम्; आद्यम्— मद्व्यतिरिक्तस्य कृत्स्नस्यादिभूतम्, त्वदन्येन केनापि न दृष्टपूर्वं रूपम्; तदिदं प्रसन्नेन मया मद्भक्ताय ते दर्शितम्; आत्मयोगात्— आत्मनस्सत्यसंकल्पत्वयोगात्॥ ४७॥

अनन्यभक्तिव्यतिरिक्तैस्सर्वैरप्युपायैर्यथावदवस्थितोऽहं द्रष्टुं न शक्य इत्याह—

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपश्शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥ ४८॥

एवंरूपो यथावदवस्थितोऽहं मयि भक्तिमतस्त्वत्तोऽन्येन ऐकान्तिकात्यन्तिकभक्तिरहितेन केनापि पुरुषेण वेदयज्ञादिभिः केवलैर्द्रष्टुं न शक्यः॥ ४८॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥ ४९॥

ईदृशघोररूपदर्शनेन ते या व्यथा, यश्च विमूढभावो वर्तते, तदुभयं माभूत्। त्वयाऽभ्यस्तपूर्वमेव सौम्यं रूपं दर्शयामि, तदेवेदं मम रूपं प्रपश्य॥ ४९॥

सञ्जय उवाच—

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं भूत्वा पुनस्सौम्यवपुर्महात्मा॥ ५०॥

एवं पाण्डुतनयं भगवान् वसुदेवसूनुरुक्त्वा भूयः स्वकीयमेव चतुर्भुजं रूपं दर्शयामास। अपरिचितस्वरूपदर्शनेन भीतमेनं पुनरपि परिचितसौम्यवपुर्भूत्वा आश्वासयामास च; महात्मा— सत्यसंकल्पः। अस्य सर्वेश्वरस्य परमपुरुषस्य परस्य ब्रह्मणो जगदुपकृतिमर्त्यस्य वसुदेवसूनोश्चतुर्भुजमेव स्वकीयं रूपम्; कंसाद्भीतवसुदेवप्रार्थनेन आकंसवधाद्भुजद्वयमुपसंहृतं, पश्चादाविष्कृतं च। * जातोऽसि देव देवेश शङ्खचक्रगदाधर। दिव्यं रूपमिदं देव प्रसादेनोपसंहर॥.... उपसंहर विश्वात्मन् रूपमेतच्चतुर्भुजम् इति हि प्रार्थितम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

शिशुपालस्यापि द्विषतोऽनवरतभावनाविषयश्चतुर्भुजमेव वसुदेवसूनो रूपम् * उदारपीवरचतुर्बाहुं शङ्खचक्रगदाधरम् इति। अतः पार्थेनात्र * तेनैव रूपेण चतुर्भुजेनेत्युच्यते ॥ ५० ॥

अर्जुन उवाच—

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तस्सचेताः प्रकृतिं गतः ॥ ५१ ॥

अनवधिकातिशयसौन्दर्यसौकुमार्यलावण्यादियुक्तं तवैवासाधारणं मनुष्यत्वसंस्थानसंस्थितमतिसौम्यमिदं तव रूपं दृष्ट्वा इदानीं सचेतास्संवृत्तोऽस्मि, प्रकृतिं गतश्च ॥ ५१ ॥

श्रीभगवानुवाच—

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२ ॥

ममेदं सर्वस्य प्रशासनेऽवस्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद्दृष्टवानसि; तत्सुदुर्दर्शं— न केनापि द्रष्टुं शक्यम्। अस्य रूपस्य देवा अपि नित्यं दर्शनकाङ्क्षिणः, न तु दृष्टवन्तः ॥ ५२ ॥

कुत इत्यत्राह—

नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ५४ ॥

वेदैरध्यापनप्रवचनाध्ययनश्रवणजपविषयैर्यागदानहोमतपोभिश्च, मद्भक्तिविरहितैः केवलैः यथावदवस्थितोऽहं द्रष्टुमशक्यः। अनन्यया तु भक्त्या तत्त्वतश्शास्त्रैर्ज्ञातुं, तत्त्वतस्साक्षात्कर्तुं, तत्त्वतः प्रवेष्टुं च शक्यः। तथा च श्रुतिः— * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ इति ॥ ५३, ५४ ॥

मत्कर्मकृन्मत्परमो मद्भक्तस्सङ्गवर्जितः।
निर्वैरस्सर्वभूतेषु यस्स मामेति पाण्डव ॥ ५५ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपसंदर्शनयोगो नाम एकादशोऽध्यायः ॥

वेदाध्ययनादीनि सर्वाणि कर्माणि मदाराधनरूपाणीति यः करोति, स मत्कर्मकृत्। मत्परमः— सर्वेषामारम्भाणामहमेव परमोद्देश्यो यस्य स मत्परमः। मद्भक्तः— अत्यर्थमप्रियत्वेन मत्कीर्तनस्तुतिध्यानार्चनप्रणामादिभिर्विना आत्मधारणमलभमानो मदेकप्रयोजनतया यस्सततं तानि करोति, स मद्भक्तः। सङ्गवर्जितः—

Digitization by Arya Samaj Charitable Foundation, Chennai

मदेकप्रियत्वेनेतरसङ्गमसहमानः। निर्वैरस्सर्वभूतेषु— मत्संश्लेषवियोगैकसुखदुःखस्वभावत्वात्स्वदुःखस्य स्वापराध-निमित्तत्वानुसंधानाच्च, सर्वभूतानां परमपुरुषपरतन्त्रत्वानुसंधानाच्च सर्वभूतेषु वैरनिमित्ताभावात्तेषु निर्वैरः। य एवं— भूतस्स मामेति— मां यथावदवस्थितं प्राप्नोति ; निरस्ताविद्याद्यशेषदोषगन्धो मदेकानुभवो भवतीत्यर्थः ॥ ५५ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये एकादशोऽध्यायः ॥ ११ ॥

॥ अथ द्वादशोऽध्यायः ॥ १२ ॥

भक्तियोगनिष्ठानां प्राप्यभूतस्य परस्य ब्रह्मणो भगवतो नारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामा-यार्जुनायानवधिकातिशयकारुण्यौदार्यसौशील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शि-तम् ; उक्तं च तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीनामैकान्तिकात्यन्तिकभगवद्भक्त्येकलभ्यत्वम्। अनन्तरमात्मप्राप्ति-साधनभूतादात्मोपासनात् भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च श्रैष्ठ्यम्, भगवदुपासनोपायश्च, तदशक्तस्याक्षरनिष्ठता, तदपेक्षिताश्चोच्यन्ते। भगवदुपासनस्य प्राप्यभूतोपास्यश्रैष्ठ्यात् श्रैष्ठ्यं तु * योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ (६. ४७.) इत्यत्रोक्तम्।

अर्जुन उवाच—

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

एवम्— * मत्कर्मकृत इत्यादिनोक्तेन प्रकारेण, सततयुक्ताः— भगवन्तं त्वामेव परं प्राप्यं मन्वानाः, ये भक्ताः, त्वाम्— सकलविभूतियुक्तमनवधिकातिशयसौन्दर्यसौशील्यसार्वज्ञ्यसत्यसंकल्पत्वाद्यनन्तगुणसागरं परि-पूर्णमुपासते ; ये चाप्यक्षरम्— प्रत्यगात्मस्वरूपं, तदेव चाव्यक्तं— चक्षुरादिकरणानभिव्यक्तस्वरूपमुपासते ; तेषामुभयेषां के योगवित्तमाः— के स्वसाध्यं प्रति शीघ्रगामिन इत्यर्थः। * भवामि न चिरात्पार्थ (७) इत्यु-त्तरत्र योगवित्तमत्वं शैघ्र्यविषयमिति हि व्यञ्जयिष्यते ॥ १ ॥

श्रीभगवानुवाच—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्यर्थमतिप्रियत्वेन मनो मय्यावेश्य श्रद्धया परयोपेताः नित्ययुक्ताः— नित्ययोगं काङ्क्षमाणाः, ये मामुपासते— प्राप्यविषयं मनो मय्यावेश्य ये मामुपासत इत्यर्थः। ते युक्ततमाः मे मताः— मां सुखेनाचिरात्प्राप्नुवन्तीत्यर्थः ॥ २ ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

ये त्वक्षरम्— प्रत्यगात्मस्वरूपम्, अनिर्देश्यम्— देहादन्यतया देवादिशब्दानिर्देश्यम्, अत एव चक्षुरादिकरणानभिव्यक्तम्, सर्वत्रगमचिन्त्यं च— सर्वत्र देवादिदेहेषु वर्तमानमपि तद्विसजातीयतया तेनतेन रूपेण चिन्तयितुमनर्हम्, तत एव कूटस्थम्— सर्वसाधारणम्, तत्तद्देवाद्यसाधारणाकारासंबद्धमित्यर्थः : अपरिणामित्वेन स्वासाधारणाकारान्न चलति न च्यवत इत्यचलम्, तत एव ध्रुवम्— नित्यम्। सन्नियम्येन्द्रियग्रामम्— चक्षुरादिकमिन्द्रियग्रामं सर्वं स्वव्यापारेभ्यस्सम्यङ्नियम्य, सर्वत्र समबुद्धयः— सर्वत्र देवादिविषमाकारेषु देहेष्ववस्थितेष्वात्मसु ज्ञानैकाकारतया समबुद्धयः, तत एव सर्वभूतहिते रताः— सर्वभूताहितरतित्वान्निवृत्ताः, सर्वभूताहितरतित्वं ह्यात्मनो देवादिविषमाकाराभिमाननिमित्तम् ; य एवमक्षरमुपासते, तेऽपि मां प्राप्नुवन्त्येव— मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः। * मम साधर्म्यमागताः इति हि वक्ष्यते। श्रूयते च * निरञ्जनः परमं साम्यमुपैति इति। तथा अक्षरशब्दनिर्दिष्टात्कूटस्थादन्यत्वं परस्य ब्रह्मणो वक्ष्यते * कूटस्थोक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः इति। * अथ परा यया तदक्षरमधिगम्यते, इत्यक्षरविद्यायां तु अक्षरशब्दनिर्दिष्टं परमेव ब्रह्म, भूतयोनित्वादेः। तेषामव्यक्तासक्तचेतसां क्लेशस्त्वधिकतरः। अव्यक्ता हि गतिः— अव्यक्तविषया मनोवृत्तिः, देहवद्भिः— देहात्माभिमानयुक्तैः, दुःखेनावाप्यते ; देहवन्तो हि देहमेवात्मानं [मन्वते] मन्यन्ते ॥ ३—५ ॥

भगवन्तमुपासीनानां युक्ततमत्वं सुव्यक्तमाह—

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

ये तु लौकिकानि देहयात्राशेषभूतानि देहधारणार्थानि चाशनादीनि कर्माणि, वैदिकानि च यागदानहोमतपःप्रभृतीनि सर्वाणि सकारणानि सोद्देश्यान्यध्यात्मचेतसा मयि संन्यस्य, मत्पराः— मदेकप्राप्याः, अनन्येनैव योगेन— अनन्यप्रयोजनेन योगेन मां ध्यायन्त उपासते— ध्यानार्चनप्रणामस्तुतिकीर्तनादीनि स्वयमेवात्यर्थप्रियाणि प्राप्यसमानि कुर्वन्तो मामुपासत इत्यर्थः। तेषां मत्प्राप्तिविरोधितया मृत्युभूतात्संसाराख्यात्सागरादहमचिरेणैव कालेन समुद्धर्ता भवामि ॥ ६, ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥ ८॥

अतोऽतिशयितपुरुषार्थत्वात्सुलभत्वादचिरलभ्यत्वाच्च मय्येव मन आधत्स्व— मयि मनस्समाधानं कुरु। मयि बुद्धिं निवेशय— अहमेव परमप्राप्य इत्यध्यवसायं कुरु। अत ऊर्ध्वं मय्येव निवसिष्यसि— अहमेव परमप्राप्य इत्यध्यवसायपूर्वकमनोनिवेशनानन्तरमेव मयि निवसिष्यसीत्यर्थः॥ ८॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥ ९॥

अथ सहसैव मयि स्थिरं चित्तं समाधातुं न शक्नोषि, ततोऽभ्यासयोगेन मामाप्तुमिच्छ— स्वाभाविकानवधिकातिशयसौन्दर्यसौशील्यसौहार्दवात्सल्यकारुण्यमाधुर्यगाम्भीर्यौदार्यशौर्यवीर्यपराक्रमसार्वज्ञ्यसत्यकामत्वसत्यसंकल्पत्वसर्वेश्वरत्वसकलकारणत्वाद्यसंख्येयगुणसागरे निखिलहेयप्रत्यनीके मयि निरतिशयप्रेमगर्भस्मृत्यभ्यासयोगेन स्थिरं चित्तसमाधानं लब्ध्वा मां प्राप्तुमिच्छ॥ ९॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि॥ १०॥

अथैवंविधस्मृत्यभ्यासेऽप्यसमर्थोऽसि, मत्कर्मपरमो भव— मदीयानि कर्माण्यालयनिर्माणोद्यानकरणप्रदीपारोपणमार्जनाभ्युक्षणोपलेपनपुष्पाहरणपूजाप्रवर्तननामसंकीर्तनप्रदक्षिणस्तुतिनमस्कारादीनि, तान्यत्यर्थप्रियत्वेनाचर; अत्यर्थप्रियत्वेन मदर्थं कर्माणि कुर्वन्नपि अचिरादभ्यासयोगपूर्विकां मयि स्थिरां चितस्थितिं लब्ध्वा मत्प्राप्तिरूपां सिद्धिमवाप्स्यसि॥ १०॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥ ११॥

अथ मद्योगमाश्रित्यैतदपि कर्तुं न शक्नोषि— मद्गुणानुसन्धानकृतमदेकप्रियत्वाकारं भक्तियोगमाश्रित्य भक्तियोगाङ्कुररूपमेतन्मत्कर्मापि कर्तुं न शक्नोषि, ततोऽक्षरयोगमात्मस्वभावानुसन्धानरूपं परभक्तिजननं पूर्वषट्कोदितमाश्रित्य तदुपायतया सर्वकर्मफलत्यागं कुरु। मत्प्रियत्वेन मदेकप्राप्यताबुद्धिर्हि प्रक्षीणाशेषपापस्यैव जायते। यतात्मवान्— यतमनस्कः। ततोऽनभिसंहितफलेन मदाराधनरूपेणानुष्ठितेन कर्मणा सिद्धेनात्मध्यानेन निवृत्ताविद्यादिसर्वतिरोधाने मच्छेषतैकस्वरूपे प्रत्यगात्मनि साक्षात्कृते सति मयि परा भक्तिः स्वयमेवोत्पद्यते। तथा च वक्ष्यते * स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः (१८. ४६) इत्यारभ्य * विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते। ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम्। (५४) इति॥ ११॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ १२॥

अत्यर्थप्रीतिविरहितात्कर्कशरूपात् स्मृत्यभ्यासादक्षरयाथात्म्यानुसन्धानपूर्वकं तदापरोक्ष्यज्ञानमेवात्महितत्वे विशिष्यते। आत्मापरोक्ष्यज्ञानादप्यनिष्पन्नरूपात्तदुपायभूतात्मध्यानमेवात्महितत्वे विशिष्यते। तद्ध्यानादप्यनिष्पन्नरूपात्तदुपायभूतं फलत्यागेनानुष्ठितं कर्मैव विशिष्यते। अनभिसंहितफलादनुष्ठितात् कर्मणोऽनन्तरमेव निरस्तपापतया मनसश्शान्तिर्भविष्यति, शान्ते मनसि आत्मध्यानं संपत्स्यते, ध्यानाच्च तदापरोक्ष्यम्, तदापरोक्ष्यात्परा भक्तिरिति भक्तियोगाभ्यासाशक्तस्यात्मनिष्ठैव श्रेयसी। आत्मनिष्ठस्याप्यशान्तमनसो निष्ठाप्राप्तयेऽन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थः॥ १२॥

अनभिसंहितफलकर्मनिष्ठस्योपादेयान् गुणानाह—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारस्समदुःखसुखः क्षमी॥ १३॥
सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः॥ १४॥

अद्वेष्टा सर्वभूतानाम्— विद्विषतामपकुर्वतामपि सर्वेषां भूतानामद्वेष्टा, मदपराधानुगुणमीश्वरप्रेरितान्येतानि भूतानि द्विषन्त्यपकुर्वन्ति चेत्यनुसन्दधानः, तेषु द्विषत्स्वपकुर्वत्सु च सर्वभूतेषु मैत्रीं मतिं कुर्वन् मैत्रः, तेष्वेव दुःखितेषु करुणां कुर्वन् करुणः, निर्ममः— देहेन्द्रियेषु तत्संबन्धिषु च निर्ममः, निरहङ्कारः— देहात्माभिमानरहितः, तत एव समदुःखसुखः— सुखदुःखागमयोः साङ्कल्पिकयोः हर्षोद्वेगरहितः, क्षमी— स्पर्शप्रभवयोरवर्जनीययोरपि तयोर्विकाररहितः, संतुष्टः— यदृच्छोपनतेन येनकेनापि देहधारणद्रव्येण संतुष्टः, सततं योगी— सततं प्रकृतिवियुक्तात्मानुसन्धानपरः, यतात्मा— नियमितमनोवृत्तिः, दृढनिश्चयः— अध्यात्मशास्त्रोदितेष्वर्थेषु दृढनिश्चयः, मय्यर्पितमनोबुद्धिः— भगवान् वासुदेव एवानभिसंहितफलेनानुष्ठितेन कर्मणा आराध्यते, आराधितश्च ममात्मापरोक्ष्यं साधयिष्यति मय्यर्पितमनोबुद्धिः, य एवंभूतो मद्भक्तः— एवं कर्मयोगेन मां भजमानो यः, स मे प्रियः॥ १३, १४॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यस्स च मे प्रियः॥ १५॥

यस्मात् कर्मनिष्ठात् पुरुषान्निमित्तभूताल्लोको नोद्विजते, यो लोकोद्वेगकरं कर्म किञ्चिदपि न करोतीत्यर्थः; लोकाच्च निमित्तभूताद्यो नोद्विजते— यमुद्दिश्य सर्वलोको नोद्वेगकरं कर्म करोति, सर्वाविरोधित्वनिश्चयात्: अत एव कञ्चन प्रति हर्षेण, कञ्चन प्रत्यमर्षेण, कञ्चन प्रति भयेन, कञ्चन प्रत्युद्वेगेन मुक्तः: एवंभूतो यः, सोऽपि मम प्रियः॥ १५॥

अनपेक्षश्शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः॥ १६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अनपेक्षः— आत्मव्यतिरिक्ते कृत्स्ने वस्तुन्यनपेक्षः, शुचिः— शास्त्रविहितद्रव्यवर्धितकायः, दक्षः— शास्त्रीयक्रियोपादानसमर्थः, अन्यत्रोदासीनः, गतव्यथः— शास्त्रीयक्रियानिर्वृत्ताववर्जनीयशीतोष्णपरुषस्पर्शादिदुःखेषु व्यथारहितः, सर्वारम्भपरित्यागी— शास्त्रीयव्यतिरिक्तसर्वकर्मारम्भपरित्यागी, य एवंभूतो मद्भक्तः, स मे प्रियः ॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ॥ १७ ॥

यो न हृष्यति— यन्मनुष्याणां हर्षनिमित्तं प्रियजातं तत्प्राप्य यः कर्मयोगी न हृष्यति ; यच्चाप्रियम्, तत्प्राप्य न द्वेष्टि ; यच्च मनुष्याणां शोकनिमित्तं भार्यापुत्रवित्तक्षयादिकम्, तत्प्राप्य न शोचति ; तथाविधमप्राप्तं च न काङ्क्षति ; शुभाशुभपरित्यागी पापवत्पुण्यस्यापि बन्धहेतुत्वाविशेषादुभयपरित्यागी ; य एवंभूतो भक्तिमान्, स मे प्रियः ॥ १७ ॥

समश्शत्रौ च मित्रे च तथा मानावमानयोः। शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ॥ १८ ॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येनकेनचित्। अनिकेतस्स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

* अद्वेष्टा सर्वभूतानाम् (१३) इत्यादिना शत्रुमित्रादिषु द्वेषादिरहितत्वमुक्तम् ; अत्र तेषु सन्निहितेष्वपि समचित्तत्वं ततोऽप्यतिरिक्तो विशेष उच्यते। आत्मनि स्थिरमतित्वेन निकेतनादिष्वसक्त इत्यनिकेतः ; तत एव मानावमानादिष्वपि समः ; य एवंभूतो भक्तिमान्, स मे प्रियः ॥ १८, १९ ॥

अस्मादात्मनिष्ठाद्भक्तियोगनिष्ठस्य श्रैष्ठ्यं प्रतिपादयन् यथोपक्रममुपसंहरति—

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
भक्तियोगो नाम द्वादशोऽध्यायः ॥

धर्म्यं चामृतं चेति धर्म्यामृतम्, ये तु प्राप्यसमं प्रापकं भक्तियोगम्, यथोक्तम्— * मय्यावेश्य मनो ये माम् (२) इत्यादिनोक्तेन प्रकारेण, उपासते ; ते भक्ताः अतितरां मम प्रियाः ॥ २० ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये द्वादशोऽध्यायः ॥ १२ ॥

इति श्रीमद्भगवद्गीताभाष्ये
॥ द्वितीयषट्कं समाप्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

॥ अथ त्रयोदशोऽध्यायः ॥ १३ ॥

पूर्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूतभक्तिरूपभगवदुपासनाङ्गभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तम् । मध्यमे च परमप्राप्यभूतभगवत्तत्त्वयाथात्म्यतन्माहात्म्यज्ञानपूर्वकैकान्तिकात्यन्तिकभक्तियोगनिष्ठा प्रतिपादिता । अतिशयितैश्वर्यापेक्षाणामात्मकैवल्यमात्रापेक्षाणां च भक्तियोगस्तत्तदपेक्षितसाधनमिति चोक्तम् । इदानीमुपरितनषट्के प्रकृतिपुरुषतत्संसर्गरूपप्रपञ्चेश्वरयाथात्म्यकर्मज्ञानभक्तिस्वरूपतदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यन्ते । तत्र तावत् त्रयोदशे– देहात्मनोस्स्वरूपम्, देहयाथात्म्यशोधनम्, देहवियुक्तात्मप्राप्त्युपायः, विविक्तात्मस्वरूपसंशोधनम्, तथाविधस्यात्मनश्चाचित्संबन्धहेतुः, ततो विवेकानुसन्धानप्रकारश्चोच्यते ।

श्रीभगवानुवाच—

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥

इदं शरीरम्— देवोऽहम्, मनुष्योऽहम्, स्थूलोऽहम्, कृशोऽहमित्यात्मना भोक्त्रा सह सामानाधिकरण्येन प्रतीयमानं भोक्तुरात्मनोऽर्थान्तरभूतस्य भोगक्षेत्रमिति शरीरयाथात्म्यविद्भिरभिधीयते । एतत् अवयवशस्संघातरूपेण च, इदमहं वेद्मीति यो वेत्ति, तं वेद्यभूतादस्माद्वेदितृत्वेनार्थान्तरभूतम्, क्षेत्रज्ञ इति, तद्विदः— आत्मयाथात्म्यविदः प्राहुः । यद्यपि देहव्यतिरिक्तघटाद्यर्थानुसन्धानवेलायां देवोऽहम्, मनुष्योऽहं घटादिकं जानामीति देहसामानाधिकरण्येन ज्ञातारमात्मानमनुसन्धत्ते ; तथाऽपि देहानुभववेलायां देहमपि घटादिकमिव इदमहं वेद्मीति वेद्यतया वेदिताऽनुभवतीति वेदितुरात्मनो वेद्यतया शरीरमपि घटादिवदर्थान्तरभूतम् । तथा घटादेरिव वेद्यभूताच्छरीरादपि वेदिता क्षेत्रज्ञोऽर्थान्तरभूतः । सामानाधिकरण्येन प्रतीतिस्तु वस्तुतश्शरीरस्य गोत्वादिवदात्मविशेषणतैकस्वभावतया तदपृथक्सिद्धेरुपपन्ना । तत्र वेदितुरसाधारणाकारस्य चक्षुरादिकरणाविषयत्वाद्योगसंस्कृतमनोविषयत्वाच्च प्रकृतिसन्निधानादेव मूढाः प्रकृत्याकारमेव वेदितारं पश्यन्ति ; तथा च वक्ष्यति * उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् । विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ (१५, १०) इति ॥ १ ॥

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

देवमनुष्यादिसर्वक्षेत्रेषु वेदितृत्वैकाकारं क्षेत्रज्ञं च मां विद्धि— मदात्मकं विद्धि। * क्षेत्रज्ञं चापी-त्यपिशब्दात् क्षेत्रमपि मां विद्धीत्युक्तमिति गम्यते। यथा क्षेत्रं क्षेत्रज्ञविशेषणतैकस्वभावतया तदपृथक्सिद्धेः तत्सामानाधिकरण्येनैव निर्देश्यम्, तथा क्षेत्रं क्षेत्रज्ञं च मद्विशेषणतैकस्वभावतया मदपृथक्सिद्धेः मत्सामानाधि-करण्येनैव निर्देश्यौ विद्धि। पृथिव्यादिसंघातरूपस्य क्षेत्रस्य क्षेत्रज्ञस्य च भगवच्छरीरतैकस्वरूपतया भगवदात्मकत्वं श्रुतयो वदन्ति * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इत्यारभ्य * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इत्याद्याः। इदमेवान्तर्यामितया सर्वक्षेत्रज्ञानामात्मत्वेना-वस्थानं भगवतस्तत्सामानाधिकरण्येन व्यपदेशहेतुः। * अहमात्मा गुडाकेश सर्वभूताशयस्थितः * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति पुरस्तादुपरिष्टाच्चाभिधाय, मध्ये सामानाधिकरण्येन व्यपदिशति * आदित्यानामहं विष्णुः, इत्यादिना। यदिदं क्षेत्रक्षेत्रज्ञयोर्विवेकविषयं तयोर्मदात्मकत्वविषयं च ज्ञानमुक्तम्, तदेवोपादेयं ज्ञानमिति मम मतम्।

केचिदाहुः— * क्षेत्रज्ञं चापि मां विद्धीति सामानाधिकरण्येनैकत्वमवगम्यते। ततश्चेश्वरस्यैव सतोऽज्ञानात्क्षेत्रज्ञत्वमिव भवतीत्यभ्युपगन्तव्यम्। तन्निवृत्त्यर्थश्चायमेकत्वोपदेशः। अनेन चाप्ततमभगवदुपदेशेन, रज्जुरेषा न सर्प इत्याप्तोपदेशेन सर्पत्वभ्रमनिवृत्तिवत्क्षेत्रज्ञत्वभ्रमो निवर्तते इति। ते प्रष्टव्याः— अयमुपदेष्टा भगवान् वासुदेवः परमेश्वरः किमात्मयाथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः? उत न? इति। निवृत्ताज्ञानश्चेत्; निर्विशेषचिन्मात्रैकस्वरूपे आत्मन्यतद्रूपाध्यासासंभावनया कौन्तेयादिभेददर्शनं, तान् प्रत्युपदेशादिव्यापाराश्च न संभवन्ति। अथात्मसाक्षात्काराभावादनिवृत्ताज्ञानः, न तर्ह्यज्ञत्वादेवात्मज्ञानोपदेशसंभवः; * उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः इति ह्युक्तम्। अत एवमादिवादा अनाकलितश्रुतिस्मृतीतिहासपुराणन्यायस्ववाग्विरोधै-रज्ञानिभिर्जगन्मोहनाय प्रवर्तिता इत्यनादरणीयाः।

अत्रेदं तत्त्वम्— अचिद्वस्तुनः चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन, भोक्तृत्वेन, चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः— * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः, * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, * क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः * अमृताक्षरं हरः इति भोक्ता निर्दिश्यते: प्रधानमात्मनो भोग्यत्वेन हरतीति हरः। * स कारणं करणाधिपाधिपो न चास्य कश्चि-ज्जनिता न चाधिपः, * प्रधानक्षेत्रज्ञपतिर्गुणेशः, पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्, * ज्ञाज्ञौ द्वावजावीश-नीशौ, * नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् * भोक्ता भोग्यं प्रेरितारं च मत्वा * पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, * तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचा-कशीति, * अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहा-त्येनां भुक्तभोगामजोऽन्यः, (* गौरनाद्यन्तवती सा जनित्री भूतभाविनी), * समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥ इत्याद्याः। अत्रापि, * अहङ्कार

Digitization by Arya Samaj Charitable Foundation, Chennai

इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां, * सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ .... मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ॥ * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि, * मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्। संभवस्सर्वभूतानां ततो भवति भारत ॥ इति। जगद्योनिभूतं महद्ब्रह्म मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु यत्, तस्मिन् चेतनाख्यं गर्भं संयोजयामि; ततो मत्सङ्कल्पकृताच्चिदचित्संसर्गादेव देवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां संभवो भवतीत्यर्थः। श्रुतावपि भूतसूक्ष्मं ब्रह्मेति निर्दिष्टं * तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते, इति।

एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः। * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति इत्यारभ्य * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इति; तथा * यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद इत्यारभ्य, * योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद, * यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः। अत्र मृत्युशब्देन तमश्शब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते, अस्यामेवोपनिषदि * अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इति वचनात्; * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा इति च।

एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं च जगत् स एवेत्याहुः * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत, इत्यारभ्य * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति। तथा * सोऽकामयत, बहु स्यां प्रजायेयेति, स तपोऽतप्यत, स तपस्तप्त्वा, इदं सर्वमसृजत, इत्यारभ्य * सत्यं चानृतं च सत्यमभवत् इति। अत्रापि श्रुत्यन्तरसिद्धश्चिदचितोः परमपुरुषस्य च स्वरूपविवेकः स्मारितः * हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि, * तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्.... विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् इति च। एवंभूतमेव नामरूपव्याकरणं * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इत्यत्राप्युक्तम्। अतः कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति, कारणात् कार्यस्यानन्यत्वेन कारणविज्ञानेन कार्यस्य ज्ञाततयैकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम्। * हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि इति, तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाश्शब्दाः अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनश्शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत् । सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्मैव कारणमिति जगतो ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासङ्करोऽप्युपपन्नतरः । यथा शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंबन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसङ्करः; तथा चिदचिदीश्वरसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसङ्करः । तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च: इह तु चिदचितोस्सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परमपुरुष एव कारणं कार्यं च; स एव सर्वदा सर्वशब्दवाच्य इति विशेषः । स्वभावभेदस्तदसङ्करश्च तत्र चात्र तुल्यः ।

एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम् । स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयाऽवस्थानात्कार्यत्वमप्युपपन्नम् । अवस्थान्तरापत्तिरेव हि कार्यता । निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणसंबन्धाभावादुपपद्यन्ते । * अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः, इति हेयगुणान् प्रतिषिध्य * सत्यकामस्सत्यसङ्कल्पः इति कल्याणगुणगणान्विदधतीयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति । ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेर्निखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणस्स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः । * यस्सर्वज्ञस्सर्ववित्, * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, * विज्ञातारमरे केन विजानीयात्, इत्यादिका ज्ञातृत्वमावेदयन्ति । * सत्यं ज्ञानम्, इत्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्वरूपताम् । * सोऽकामयत, बहु स्याम् * तदैक्षत बहु स्याम्, * तन्नामरूपाभ्यां व्याक्रियत, इति ब्रह्मैव स्वसङ्कल्पाद्विचित्रस्थिरत्रसरूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकवस्तुनानात्वमतत्त्वमिति प्रतिषिध्यते * मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति.... नेह नानास्ति किञ्चन * यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् इत्यादिना; न पुनः * बहु स्यां प्रजायेय इत्यादिश्रुतिसिद्धं स्वसङ्कल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते । * यत्र त्वस्य सर्वमात्मैवाभूत् इति निषेधवाक्यारम्भे च तत्स्थापितं * सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद * तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः इत्यादिना ।

एवं चिदचिदीश्वराणां स्वरूपभेदं स्वभावभेदं च वदन्तीनां कार्यकारणभावं कार्यकारणयोरनन्यत्वं वदन्तीनां च सर्वासां श्रुतीनामविरोधः, (चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावं शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः) श्रुतिभिरेव ज्ञायत इति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यस्याप्यपन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथंचिदप्यवकाशो दृश्यत इत्यलमतिविस्तरेण ॥ २ ॥

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्क्षेत्रं यच्च– यद्द्रव्यम्, यादृक्च– येषामाश्रयभूतम्, यद्विकारि– ये चास्य विकाराः, यतश्च— यतो हेतोरिदमुत्पन्नम्, यस्मै प्रयोजनायोत्पन्नमित्यर्थः, यत्– यत्स्वरूपं चेदम्, स च यः— स च क्षेत्रज्ञो यः– यत्स्वरूपः, यत्प्रभावश्च— ये चास्य प्रभावाः, तत्सर्वम्, समासेन— संक्षेपेण मत्तः शृणु ॥ ३ ॥

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

तदिदं क्षेत्रक्षेत्रज्ञयाथात्म्यम् ऋषिभिः– पराशरादिभिः, बहुधा— बहुप्रकारं गीतम्– * अहं त्वं च तथाऽन्ये च भूतैरुह्याम पार्थिव । गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम् ॥ कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते । अविद्यासञ्चितं कर्म तच्चाशेषेषु जन्तुषु ॥ आत्मा शुद्धोऽक्षरश्शान्तो निर्गुणः प्रकृतेः परः ॥ तथा * पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः । ततोऽहमिति कुत्रैतां संज्ञां राजन्करोम्यहम् ॥ तथा [च] * किं त्वमेतच्छिरः किं नु उरस्तव तथोदरम् । किमु पादादिकं त्वं वै तवैतत्किं महीपते ॥ समस्तावयवेभ्यस्त्वं पृथग्भूप व्यवस्थितः । कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव ॥ इति । एवं विविक्तयोर्द्वयोर्वासुदेवात्मकत्वं चाहुः * इन्द्रियाणि मनो बुद्धिस्सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च ॥ इति । छन्दोभिर्विविधैः पृथक्– पृथग्विधैश्छन्दोभिश्च ऋग्यजुस्सामाथर्वभिः देहात्मनोः स्वरूपं पृथग्गीतम्– * तस्माद्वा एतस्मादात्मन आकाशस्संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्, अन्नात्पुरुषः, स वा एष पुरुषोऽन्नरसमयः इति शरीरस्वरूपमभिधाय तस्मादन्तरं प्राणमयं तस्माच्चान्तरं मनोमयमभिधाय * तस्माद्वा एतस्मान्मनोमयात्, अन्योऽन्तर आत्मा विज्ञानमयः इति क्षेत्रज्ञस्वरूपमभिधाय * तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः इति क्षेत्रज्ञस्याप्यन्तरात्मतया आनन्दमयः परमात्माऽभिहितः । एवमृक्सामाथर्वसु च तत्रतत्र क्षेत्रक्षेत्रज्ञयोः पृथग्भावस्तयोर्ब्रह्मात्मकत्वं च सुस्पष्टं गीतम् । ब्रह्मसूत्रपदैश्चैव– ब्रह्मप्रतिपादनसूत्राख्यैः पदैः शारीरकसूत्रैः, हेतुमद्भिः– हेतुयुक्तैः, विनिश्चितैः— निर्णयान्तैः । * न वियदश्रुतेः इत्यारभ्य क्षेत्रप्रकारनिर्णय उक्तः ; * नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः इत्यारभ्य [* ज्ञोऽत एव इत्यादिभिः] क्षेत्रज्ञयाथात्म्यनिर्णय उक्तः ; * परात्तु तच्छ्रुतेः इति भगवत्प्रवर्त्यत्वेन भगवदात्मकत्वमुक्तम् । एवं बहुधा गीतं क्षेत्रक्षेत्रज्ञयाथात्म्यं मया संक्षेपेण सुस्पष्टमुच्यमानं शृण्वित्यर्थः ॥ ४ ॥

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५ ॥
इच्छा द्वेषस्सुखं दुःखं संघातश्चेतनाधृतिः । एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेति क्षेत्रारम्भकद्रव्याणि ; पृथिव्यप्तेजोवाय्वाकाशा महाभूतानि, अहंकारो भूतादिभिः, बुद्धिर्महान्, अव्यक्तं प्रकृतिः । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचरा इति क्षेत्राश्रितानि तत्त्वानि ; श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रिया-

Digitization by Arya Samaj Charitable Foundation, Chennai

णीति, तानि दश, एकमिति मनः ; इन्द्रियगोचराश्च पञ्च— शब्दस्पर्शरूपरसगन्धाः ; इच्छा द्वेषस्सुखं दुःखमिति क्षेत्रकार्याणि क्षेत्रविकारा उच्यन्ते ; यद्यपीच्छाद्वेषसुखदुःखान्यात्मधर्मभूतानि, तथाऽप्यात्मनः क्षेत्रसंबन्धप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्ते ; तेषां पुरुषधर्मत्वं * पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते, इति वक्ष्यते । संघातश्चेतनाधृतिः— आधृतिराधारः, सुखदुःखे भुञ्जानस्य भोगापवर्गौ साधयतश्च चेतनस्याधारतयोत्पन्नो भूतसंघातः ; प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारि भूतसंघातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवति । एतत् क्षेत्रं समासेन— संक्षेपेण, सविकारं— सकार्यमुदाहृतम् ॥ ५, ६ ॥

अथ क्षेत्रकार्येष्वात्मज्ञानसाधनतयोपादेया गुणाः प्रोच्यन्ते—

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

अमानित्वम्— उत्कृष्टजनेष्ववधीरणारहितत्वम् ; अदम्भित्वम्— धार्मिकत्वयशःप्रयोजनतया धर्मानुष्ठानम् दम्भः, तद्रहितत्वम् ; अहिंसा— वाङ्मनःकायैः परपीडारहितत्वम् ; क्षान्तिः— परैः पीड्यमानस्यापि तान्प्रत्यविकृतचित्तत्वम् ; आर्जवम्— परान्प्रति वाङ्मनःकायप्रवृत्तीनामेकरूपता ; आचार्योपासनम्— आत्मज्ञानप्रदायिन्याचार्ये प्रणिपातपरिप्रश्नसेवादिनिरतत्वम् ; शौचम्— आत्मज्ञानतत्साधनयोग्यता मनोवाक्कायगता शास्त्रसिद्धा ; स्थैर्यम्— अध्यात्मशास्त्रोदितेऽर्थे निश्चलत्वम् ; आत्मविनिग्रहः— आत्मस्वरूपव्यतिरिक्तविषयेभ्यो मनसो निवर्तनम् ॥ ७ ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

इन्द्रियार्थेषु वैराग्यम्—आत्मव्यतिरिक्तेषु विषयेषु सदोषतानुसंधानेनोद्वेजनम् ; अनहंकारः— अनात्मनि देहे आत्माभिमानरहितत्वम् ; प्रदर्शनार्थमिदम्, अनात्मीयेष्वात्मीयाभिमानरहितत्वं च विवक्षितम् ; जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्— सशरीरत्वे जन्ममृत्युजराव्याधिदुःखरूपस्य दोषस्यावर्जनीयत्वानुसंधानम् ॥ ८ ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

असक्तिः— आत्मव्यतिरिक्तपरिग्रहेषु सङ्गरहितत्वम् ; अनभिष्वङ्गः पुत्रदारगृहादिषु— तेषु शास्त्रीयकर्मोपकरणत्वातिरेकेण श्लेषरहितत्वम् ; संकल्पप्रभवेष्विष्टानिष्टोपनिपातेषु हर्षोद्वेगरहितत्वम् ॥ ९ ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मयि— सर्वेश्वरे चैकान्त्ययोगेन स्थिरा भक्तिः; जनवर्जितदेशवासित्वम्, जनसंसदि चाप्रीतिः ॥ १० ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थचिन्तनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥

आत्मनि ज्ञानम्— अध्यात्मज्ञानं तन्निष्ठत्वम्; तत्त्वज्ञानार्थचिन्तनम्— तत्त्वज्ञानप्रयोजनं यच्चिन्तनं तन्निरतत्वमित्यर्थः; ज्ञायतेऽनेनात्मेति ज्ञानम्, आत्मज्ञानसाधनमित्यर्थः; क्षेत्रसंबन्धिनः पुरुषस्यामानित्वादिकमुक्तं गुणबृन्दमेवात्मज्ञानोपयोगि, एतद्व्यतिरिक्तं सर्वं क्षेत्रकार्यमात्मज्ञानविरोधीत्यज्ञानम् ॥ ११ ॥

अथ * एतद्यो वेत्तीति वेदितृत्वलक्षणेनोक्तस्य क्षेत्रज्ञस्य स्वरूपं विशोध्यते—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते।
अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

अमानित्वादिभिस्साधनैः, ज्ञेयं— प्राप्यं, यत्प्रत्यगात्मस्वरूपं तत्प्रवक्ष्यामि, यत् ज्ञात्वा जन्मजरामरणादिप्राकृतधर्मरहितममृतमात्मानं प्राप्नोति। अनादि— आदिर्यस्य न विद्यते, तदनादि; अस्य हि प्रत्यगात्मन उत्पत्तिर्न विद्यते; तत एवान्तो न विद्यते। श्रुतिश्च * न जायते म्रियते वा विपश्चित् इति। मत्परम्— अहं परो यस्य तन्मत्परम्; * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्, जीवभूताम् इति ह्युक्तम्। भगवच्छरीरतया भगवच्छेषतैकरसं ह्यात्मस्वरूपम्। तथा च श्रुतिः— * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति इति। तथा * स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः, * प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादिका। ब्रह्म— बृहत्त्वगुणयोगि, शरीरादेरर्थान्तरभूतम्, स्वतश्शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः। * स चानन्त्याय कल्पते इति हि श्रूयते; शरीरपरिच्छिन्नत्वं चास्य कर्मकृतम्; कर्मबन्धान्मुक्तस्यानन्त्यम्। आत्मन्यपि ब्रह्मशब्दः प्रयुज्यते— * स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते। ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च, * ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ इति। न सत्तन्नासदुच्यते— कार्यकारणरूपावस्थाद्वयरहिततया सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते। कार्यावस्थायां हि देवादिनामरूपभाक्त्वेन सदित्युच्यते, तदनर्हतया कारणावस्थायामसदित्युच्यते। तथा च श्रुतिः— * असद्वा इदमग्र आसीत्, ततो वै सदजायत * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत, इत्यादिका। कार्यकारणावस्थाद्वयान्वयस्त्वात्मनः कर्मरूपाविद्यावेष्टनकृतः, न स्वरूपकृत इति सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते। यद्यपि * असद्वा इदमग्र आसीदिति कारणावस्थं परं ब्रह्मोच्यते, तथाऽपि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरं परं ब्रह्म कारणावस्थमिति कारणावस्थायां क्षेत्रक्षेत्रज्ञस्वरूपमप्यसच्छब्दवाच्यम्; क्षेत्रज्ञस्य साऽवस्था कर्मकृतेति परिशुद्धस्वरूपं न सदसच्छब्दनिर्देश्यम् ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्।
सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठसि॥ १३॥

सर्वतः पाणिपादं तत्— परिशुद्धात्मस्वरूपं सर्वतः पाणिपादकार्यशक्तम्ः तथा सर्वतोऽक्षिशिरोमुखं सर्वतश्श्रुतिमत्— सर्वतश्चक्षुरादिकार्यकृत्। * अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः इति परस्य ब्रह्मणोऽपाणिपादस्यापि सर्वतः पाणिपादादिकार्यकृत्त्वं श्रूयते। प्रत्यगात्मनोऽपि परिशुद्धस्य तत्साम्यापत्त्या सर्वतः पाणिपादादिकार्यकृत्त्वं श्रुतिसिद्धमेव। * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, इति हि श्रूयते। * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः इति च वक्ष्यते। लोके सर्वमावृत्य तिष्ठति— लोके यद्वस्तुजातं तत्सर्वं व्याप्य तिष्ठति; परिशुद्धस्वरूपं देशादिपरिच्छेदरहिततया सर्वगतमित्यर्थः॥ २३॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ १४॥

सर्वेन्द्रियगुणाभासम्— सर्वेन्द्रियगुणैराभासो यस्य तत्सर्वेन्द्रियगुणाभासम्, इन्द्रियगुणा इन्द्रियवृत्तयः, इन्द्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थमित्यर्थः। स्वभावतस्सर्वेन्द्रियविवर्जितम्— विनैवेन्द्रियवृत्तिभिः स्वत एव सर्वं जानातीत्यर्थः। असक्तम्— स्वभावतो देवादिदेहसङ्गरहितम्, सर्वभृच्चैव— देवादिसर्वदेहभरणसमर्थं च, * स एकधा भवति त्रिधा भवति, इत्यादिश्रुतेः। निर्गुणम्— तथा स्वभावतस्सत्त्वादिगुणरहितम्। गुण-भोक्तृ च— सत्त्वादीनां गुणानां भोगसमर्थं च॥ १४॥

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ १५॥

पृथिव्यादीनि भूतानि परित्यज्याशरीरो बहिर्वर्तते; तेषामन्तश्च वर्तते, * जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा इत्यादिश्रुतिसिद्धस्वच्छन्दवृत्तिषु। अचरं चरमेव च— स्वभावतोऽचरं चरं च देहित्वे सूक्ष्म-त्वात्तदविज्ञेयम्— एवं सर्वशक्तियुक्तं सर्वज्ञं तदात्मतत्त्वमस्मिन् क्षेत्रे वर्तमानमप्यतिसूक्ष्मत्वाद्देहात् पृथक्त्वेन संसारिभिरविज्ञेयम्। दूरस्थं चान्तिके च तत्— अमानित्वाद्युक्तगुणरहितानां विपरीतगुणानां पुंसां स्वदेहे वर्त-मानमप्यतिदूरस्थम्, तथा अमानित्वादिगुणोपेतानां तदेवान्तिके वर्तते॥ १५॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।

देवमनुष्यादिभूतेषु सर्वत्र स्थितमात्मवस्तु वेदितृत्वैकाकारतया अविभक्तम्; अविदुषां देवाद्या-कारेण अयं देवो मनुष्यः इति विभक्तमिव च स्थितम्।

भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥ १६॥

* देवोऽहम्, मनुष्योऽहमिति देहसामानाधिकरण्येनानुसन्धीयमानमपि वेदितृत्वे देहार्थान्तरभूतं ज्ञातुं शक्यमिति आदावुक्त[म्]मेव * एतद्यो वेत्ति (१) इति; इदानीं प्रकारान्तरैश्च देहादर्थान्तरत्वेन ज्ञातुं

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्यमित्याह— भूतभर्तृ चेति। भूतानां पृथिव्यादीनां देहरूपेण संहतानां यद्भर्तृ, तद्भर्तव्येभ्यो भूतेभ्योऽर्थान्तरं ज्ञेयम्, अर्थान्तरमिति ज्ञातुं शक्यमित्यर्थः। तथा ग्रसिष्णु— अन्नादीनां भौतिकानां ग्रसिष्णु, ग्रस्यमानेभ्यो भूतेभ्यो ग्रसितृत्वेनार्थान्तरभूतमिति ज्ञातुं शक्यम्। प्रभविष्णु च— प्रभवहेतुश्च, ग्रस्तानामन्नादीनामाकारान्तरेण परिणतानां प्रभवहेतुः, तेभ्योऽर्थान्तरमिति ज्ञातुं शक्यमित्यर्थः; मृतशरीरे ग्रसनप्रभवादीनामदर्शनान्न भूतसंघातरूपं क्षेत्रं ग्रसनप्रभवभरणहेतुरिति निश्चीयते ॥ १६ ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

ज्योतिषाम्— दीपादित्यमणिप्रभृतीनामपि, तदेव ज्योतिः— प्रकाशकम्। दीपादित्यादीनामप्यात्मप्रभारूपं ज्ञानमेव प्रकाशकम्: दीपादयस्तु विषयेन्द्रियसन्निकर्षविरोधिसंतमसनिरसनमात्रं कुर्वते: तावन्मात्रेण तेषां प्रकाशकत्वम्। तमसः परमुच्यते— तमश्शब्दस्सूक्ष्मावस्थप्रकृतिवचनः, प्रकृतेः परमुच्यत इत्यर्थः। अतो ज्ञानं ज्ञेयम्— ज्ञानैकाकारमिति ज्ञेयम्। तच्च ज्ञानगम्यम्— अमानित्वादिभिर्ज्ञानसाधनैरुक्तैः प्राप्यमित्यर्थः। हृदि सर्वस्य विष्ठितम्— सर्वस्य मनुष्यादेः हृदि विशेषेणावस्थितम्— सन्निहितम् ॥ १७ ॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

एवं * महाभूतान्यहङ्कारः (५) इत्यादिना * संघातश्चेतनाधृतिरित्यन्तेन क्षेत्रतत्त्वं समासेनोक्तम्। * अमानित्वम् (७) इत्यादिना * तत्त्वज्ञानार्थचिन्तनमित्यन्तेन ज्ञातव्यस्यात्मतत्त्वस्य ज्ञानसाधनमुक्तम। * अनादिमत्परम् (१२) इत्यादिना * हृदि सर्वस्य विष्ठितमित्यन्तेन ज्ञेयस्य क्षेत्रज्ञस्यं याथात्म्यं च संक्षेपेणोक्तम्। मद्भक्तः एतत्— क्षेत्रयाथात्म्यम्, क्षेत्राद्विविक्तात्मस्वरूपप्राप्त्युपाययाथात्म्यम्, क्षेत्रज्ञयाथात्म्यं च विज्ञाय, मद्भावायोपपद्यते मम यो भावः— स्वभावः, असंसारित्वम्; असंसारित्वप्राप्तये उपपन्नो भवतीत्यर्थः ॥ १८ ॥

अथात्यन्तविविक्तस्वभावयोः प्रकृत्यात्मनोस्संसर्गस्यानादित्वं संसृष्टयोर्द्वयोः कार्यभेदस्संसर्गहेतुश्चोच्यते—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥

प्रकृतिपुरुषावुभावन्योन्यसंसृष्टावनादी इति विद्धि। बन्धहेतुभूतान् विकारान्— इच्छाद्वेषादीन्, अमानित्वादिकांश्च गुणान् मोक्षहेतुभूतान् प्रकृतिसंभवान् विद्धि। पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैरिच्छाद्वेषादिभिः पुरुषस्य बन्धहेतुर्भवति; सैवामानित्वादिभिस्स्वविकारैः पुरुषस्यापवर्गहेतुर्भवतीत्यर्थः ॥ १९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

कार्यं—शरीरम्, कारणानि—ज्ञानकर्मात्मकानि समनस्कानीन्द्रियाणि, तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः; पुरुषाधिष्ठितक्षेत्राकारपरिणतप्रकृत्याश्रया भोगसाधनभूताः क्रिया इत्यर्थः। पुरुषस्याधिष्ठातृत्वमेव; तदपेक्षया * कर्ता शास्त्रार्थवत्त्वात् इत्यादिकमुक्तम्। शरीराधिष्ठानप्रयत्नहेतुत्वमेव हि पुरुषस्य कर्तृत्वम्। प्रकृतिसंसृष्टः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः, सुखदुःखानुभवाश्रय इत्यर्थः ॥ २० ॥

एवमन्योन्यसंसृष्टयोः प्रकृतिपुरुषयोः कार्यभेद उक्तः; पुरुषस्य स्वतस्स्वानुभवैकसुखस्यापि वैषयिकसुखदुःखोपभोगहेतु[त्व]माह—

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।

गुणशब्दः स्वकार्येष्वौपचारिकः; स्वतस्स्वानुभवैकसुखः पुरुषः प्रकृतिस्थः—प्रकृतिसंसृष्टः, प्रकृतिजान् गुणान्— प्रकृतिसंसर्गोपाधिकान् सत्त्वादिगुणकार्यभूतान् सुखदुःखादीन्, भुङ्क्ते— अनुभवति ॥ २०½ ॥

प्रकृतिसंसर्गहेतुमाह—

कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

पूर्वपूर्वप्रकृतिपरिणामरूपदेवमनुष्यादियोनिर्विशेषेषु स्थितोऽयं पुरुषस्तत्तद्योनिप्रयुक्तसत्त्वादिगुणमयेषु सुखदुःखादिषु सक्तस्तत्साधनभूतेषु पुण्यपापकर्मसु प्रवर्तते; ततस्तत्पुण्यपापफलानुभवाय सदसद्योनिषु साध्वसाधुषु योनिषु जायते; ततश्च कर्मारभते; ततश्च जायते; यावदमानित्वादिकानात्मप्राप्तिसाधनभूतान् गुणान् [न] सेवते, तावदेव संसरति; तदिदमुक्तं * कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु इति ॥ २१ ॥

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२ ॥

अस्मिन् देहेऽवस्थितोऽयं पुरुषो देहप्रवृत्त्यनुगुणसङ्कल्पादिरूपेण देहस्योपद्रष्टा अनुमन्ता च भवति। तथा देहस्य भर्ता च भवति; तथा देहप्रवृत्तिजनितसुखदुःखयोर्भोक्ता च भवति। एवं देहनियमनेन, देहभरणेन, देहशेषित्वेन च देहेन्द्रियमनांसि प्रति महेश्वरो भवति। तथाच वक्ष्यते * शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ इति। अस्मिन् देहे देहेन्द्रियमनांसि प्रति परमात्मेति चाप्युक्तः। देहे मनसि चात्मशब्दोऽनन्तरमेव प्रयुज्यते— * ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना, इति; अपिशब्दान्महेश्वर इत्यप्युक्त इति गम्यते; पुरुषः परः— * अनादि मत्परम् इत्यादिनोक्तोऽपरिच्छिन्नज्ञानशक्तिरयं पुरुषोऽनादिप्रकृतिसंबन्धकृतगुणसङ्गादेतद्देहमात्रमहेश्वरो देहमात्रपरमात्मा च भवति ॥ २२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैस्सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

एनम्— उक्तस्वभावं पुरुषम्, उक्तस्वभावां च प्रकृतिं वक्ष्यमाणस्वभावयुक्तैस्सत्त्वादिभिर्गुणैस्सह, यो वेत्ति— यथावद्विवेकेन जानाति ; स सर्वथा— देवमनुष्यादिदेहेष्वतिमात्राक्लिष्टप्रकारेण वर्तमानोऽपि, न भूयोऽभिजायते— न भूयः प्रकृत्या संसर्गमर्हति । अपरिच्छिन्नज्ञानलक्षणमपहतपाप्मानमात्मानं तद्देहावसानसमये प्राप्नोतीत्यर्थः ॥ २३ ॥

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

केचित्— निष्पन्नयोगाः, आत्मनि— शरीरे, अवस्थितमात्मानम्, आत्मना— मनसा, ध्यानेन— योगेन पश्यन्ति । अन्ये च अनिष्पन्नयोगाः, सांख्येन योगेन— ज्ञानयोगेन, योगयोग्यं मनः कृत्वा आत्मानं पश्यन्ति । अपरे— ज्ञानयोगानधिकारिणः तदधिकारिणश्च सुकरोपायसक्ताः, व्यपदेश्याश्च, कर्मयोगेनान्तर्गतज्ञानेन मनसो योगयोग्यतामापाद्यात्मानं पश्यन्ति ॥ २४ ॥

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अन्ये तु— कर्मयोगादिष्वात्मावलोकनसाधनेष्वधिकृताः, अन्येभ्यः— तत्त्वदर्शिभ्यो ज्ञानिभ्यः, श्रुत्वा कर्मयोगादिभिरात्मानमुपासते । तेऽप्यात्मदर्शनेन मृत्युमतितरन्ति ; ये श्रुतिपरायणाः— श्रवणमात्रनिष्ठाः । एते च श्रवणनिष्ठाः पूतपापाः क्रमेण कर्मयोगादिकमारभ्यातितरन्त्येव मृत्युम् ; अपिशब्दाच्च पर्वभेदोऽवगम्यते ॥

अथ प्रकृतिसंसृष्टस्यात्मनो विवेकानुसन्धानप्रकारं वक्तुं सर्वं स्थावरं जङ्गमं च सत्त्वं चिदचित्संसर्गजमित्याह—

यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

यावत् स्थावरजङ्गमात्मना सत्त्वं जायते, तावत् क्षेत्रक्षेत्रज्ञयोरितरेतरसंयोगादेव जायते— संयुक्तमेव जायते, न त्वितरेतरवियुक्तमित्यर्थः ॥ २६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

एवमितरेतरयुक्तेषु सर्वेषु भूतेषु देवादिविषमाकारात् विविक्तं तत्तत् तत्तद्देहेन्द्रियमनांसि प्रति परमेश्वरत्वेन स्थितमात्मानं ज्ञातृत्वेन समानाकारं तेषु देहादिषु विनश्यत्सु विनाशानर्हस्वभावेनाविनश्यन्तं यः

Digitization by Arya Samaj Charitable Foundation, Chennai

पश्यति, स पश्यति— स आत्मानं यथावदवस्थितं पश्यति। यस्तु देवादिविषमाकारेणात्मानमपि विषमाकारं जन्मविनाशादियुक्तं च पश्यति, स नित्यमेव संसरतीत्यभिप्रायः॥ २७॥

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥ २७॥

सर्वत्र— देवादिशरीरेषु तत्तच्छेषित्वेनाधारतया नियन्तृतया च स्थितमीश्वरम्— आत्मानं देवादिविषमाकारवियुक्तं ज्ञानैकाकारतया समं पश्यन्, आत्मना— मनसा, स्वम्— आत्मानं, न हिनस्ति— रक्षति, संसारान्मोचयति। ततः— तस्मात् ज्ञातृतया सर्वत्र समानाकारदर्शनात्, परां गतिं याति : गम्यत इति गतिः, परं गन्तव्यं यथावदवस्थितमात्मानं प्राप्नोति। देवाद्याकारयुक्ततया सर्वत्र विषममात्मानं पश्यन् आत्मानं हिनस्ति— भवजलधिमध्ये प्रक्षिपति॥ २८॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति॥ २९॥

सर्वाणि कर्माणि * कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते, इति पूर्वोक्तरीत्या प्रकृत्या क्रियमाणानीति यः पश्यति, तथा आत्मानं ज्ञानाकारमकर्तारं च यः पश्यति, तस्य प्रकृतिसंयोगस्तदधिष्ठानं तज्जन्यसुखदुःखानुभवश्च कर्मरूपाज्ञानकृतानीति च यः पश्यति, स आत्मानं यथावदवस्थितं पश्यति॥ २९॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ ३०॥

प्रकृतिपुरुषतत्त्वद्वयात्मकेषु देवादिषु सर्वेषु भूतेषु सत्सु तेषां देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिपृथग्भावमेकस्थम्— एकतत्त्वस्थम्, प्रकृतिस्थं यदा पश्यति, नात्मस्थम् ; तत एव— प्रकृतित एवोत्तरोत्तरपुत्रपौत्रादिभेदविस्तारं च यदा पश्यति : तदैव ब्रह्म संपद्यते— अनवच्छिन्नं ज्ञानैकाकारमात्मानं प्राप्नोतीत्यर्थः॥ ३०॥

अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥ ३१॥

अयं परमात्मा देहान्निष्कृष्य स्वस्वभावेन निरूपितः, शरीरस्थोऽपि, अनादित्वात्— अनारभ्यत्वात् अव्ययः— व्ययरहितः ; निर्गुणत्वात्— सत्त्वादिगुणरहितत्वात्, न करोति, न लिप्यते— देहस्वभावैर्न लिप्यते॥ ३१॥

यद्यपि निर्गुणत्वान्न करोति, नित्यसंयुक्तो देहस्वभावैः कथं न लिप्यत इत्यत्राह—

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते॥ ३२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा आकाशं सर्वगतमपि— सर्वैर्वस्तुभिस्संयुक्तमपि, सौक्ष्म्यात्सर्ववस्तुस्वभावैर्न लिप्यते, तथा आत्मा अतिसौक्ष्म्यात्सर्वत्र— देवमनुष्यादौ देहेऽवस्थितोऽपि तत्तद्देहस्वभावैर्न लिप्यते ॥ ३२ ॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

यथैक आदित्यः स्वया प्रभया कृत्स्नमिमं लोकं प्रकाशयति, तथा क्षेत्रमपि क्षेत्री, ममेदं क्षेत्रमीदृशम् इति, कृत्स्नम्— बहिरन्तश्चापादतलमस्तकं, स्वकीयेन ज्ञानेन प्रकाशयति ; अतः प्रकाश्याल्लोकात्प्रकाशकादित्यवद्वेदितृत्वेन वेद्यभूतादस्मात् क्षेत्रादत्यन्तविलक्षणोऽयमुक्तलक्षण आत्मेत्यर्थः ॥ ३३ ॥

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥

एवम्— उक्तेन, प्रकारेण, क्षेत्रक्षेत्रज्ञयोरन्तरं— विशेषं, विवेकविषयज्ञानाख्येन चक्षुषा ये विदुः, भूतप्रकृतिमोक्षं च, ते परं यान्ति— निर्मुक्तबन्धमात्मानं प्राप्नुवन्ति ; मोक्ष्यतेऽनेनेति मोक्षः, अमानित्वादिकमुक्तं मोक्षसाधनमित्यर्थः। क्षेत्रक्षेत्रज्ञयोर्विवेकविषयेणोक्तेन ज्ञानेन तयोर्विवेकं विदित्वा भूताकारपरिणतप्रकृतिमोक्षोपायममानित्वादिकं चावगम्य य आचरन्ति, ते निर्मुक्तबन्धाः स्वेन रूपेणावस्थितमनवच्छिन्नज्ञानलक्षणमात्मानं प्राप्नुवन्तीत्यर्थः ॥ ३४ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥

॥ अथ चतुर्दशोऽध्यायः ॥ १४ ॥

त्रयोदशे प्रकृतिपुरुषयोरन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञायामानित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बन्धान्मुच्यत इत्युक्तम्। तत्र बन्धहेतुः पूर्वपूर्वसत्त्वादिगुणमयसुखादिसङ्ग इति चाभिहितं *कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु (२१) इति। अथेदानीं गुणानां बन्धहेतुताप्रकारो गुणनिवर्तनप्रकारश्चोच्यते।

श्रीभगवानुवाच—

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।
यज्ज्ञात्वा मुनयस्सर्वे परां सिद्धिमितो गताः ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परम्— पूर्वोक्तादन्यत् प्रकृतिपुरुषान्तर्गतमेव सत्त्वादिगुणविषयं ज्ञानं भूयः प्रवक्ष्यामि। तच्च ज्ञानं सर्वेषां प्रकृतिपुरुषविषयज्ञानानामुत्तमम्। यज्ज्ञानं ज्ञात्वा सर्वे मुनयः तन्मननशीलाः इतः— संसारमण्डलात्परां सिद्धिं गताः— परिशुद्धात्मस्वरूपप्राप्तिरूपां सिद्धिमवगताः॥ १॥

पुनरपि तज्ज्ञानं फलेन विशिनष्टि—

इदं ज्ञान[म]मुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥ २॥

इदम्— वक्ष्यमाणं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः— मत्साम्यं प्राप्ताः, सर्गेऽपि नोपजायन्ते— न सृजिकर्मतां भजन्ते : प्रलये न व्यथन्ति च— न च संहृतिकर्मताम् [भजन्ते]॥ २॥

अथ प्राकृतानां गुणानां बन्धहेतुताप्रकारं वक्तुं सर्वस्य भूतजातस्य प्रकृतिपुरुषसंसर्गजत्वं * यावत्संजायते किञ्चित् इत्यनेनोक्तं भगवता स्वेनैव कृतमित्याह—

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
संभवस्सर्वभूतानां ततो भवति भारत॥ ३॥

कृत्स्नस्य जगतो योनिभूतं मम महद्ब्रह्म यत्, तस्मिन् गर्भं दधाम्यहम् : * भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ अपरेयम् इति निर्दिष्टा अचेतनप्रकृतिर्महदहङ्कारादिविकाराणां कारणतया महद्ब्रह्मेत्युच्यते। श्रुतावपि क्वचित्प्रकृतिरपि ब्रह्मेति निर्दिश्यते— * यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते॥ इति; * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम् इति चेतनपुञ्जरूपा या परा प्रकृतिर्निर्दिष्टा, सेह सकलप्राणिबीजतया गर्भशब्देनोच्यते। तस्मिन्नचेतने योनिभूते महति ब्रह्मणि चेतनपुञ्जरूपं गर्भं दधामि; अचेतनप्रकृत्या भोगक्षेत्रभूतया भोक्तृवर्गपुञ्जभूतां चेतनप्रकृतिं संयोजयामीत्यर्थः। ततस्तस्मात्प्रकृतिद्वयसंयोगान्मत्संकल्पकृतात्सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां संभवो भवति॥ ३॥

कार्यावस्थोऽपि चिदचित्प्रकृतिसंसर्गो मयैव कृत इत्याह—

सर्वयोनिषु कौन्तेय मूर्तयस्संभवन्ति याः।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥ ४॥

सर्वासु देवगन्धर्वयक्षराक्षसमनुष्यपशुमृगपक्षिसरीसृपादिषु योनिषु तत्तन्मूर्तयो याः संभवन्ति— जायन्ते, तासां ब्रह्म महत् योनिः— कारणम्; मया संयोजितचेतनवर्गा महदादिविशेषान्तावस्था प्रकृतिः कारणमित्यर्थः। अहं बीजप्रदः पिता— तत्रतत्र च तत्तत्कर्मानुगुण्येन चेतनवर्गस्य संयोजकश्चाहमित्यर्थः॥ ४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं सर्गादौ प्राचीनकर्मवशादचित्संसर्गेण देवादियोनिषु जातानां पुनःपुनर्देवादिभावेन जन्महेतुमाह—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥ ५॥

सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबन्धिनः स्वभावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायामनुद्भूतास्तद्विकारेषु महदादिषूद्भूता महदादिविशेषान्तैरारब्धदेवमनुष्यादिदेहसंबन्धिनमेनं देहिनमव्ययम्— स्वतो गुणसंबन्धानर्हं देहे वर्तमानं निबध्नन्ति, देहे वर्तमानत्वोपाधिना निबध्नन्तीत्यर्थः॥ ५॥

सत्त्वरजस्तमसामाकारं बन्धनप्रकारं चाह—

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ ६॥

तत्र सत्त्वरजस्तमस्सु सत्त्वस्य स्वरूपमीदृशम्— निर्मलत्वात्प्रकाशकम्; प्रकाशसुखावरणस्वभावरहितता निर्मलत्वम्; प्रकाशसुखजननैकान्तस्वभावतया प्रकाशसुखहेतुभूतमित्यर्थः। प्रकाशो— वस्तुयाथात्म्यावबोधः; अनामयम्— आमयाख्यकार्यं न विद्यत इत्यनामयम्, अरोगताहेतुरित्यर्थः। एष सत्त्वाख्यो गुणो देहिनमेनं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति— पुरुषस्य सुखसङ्गं ज्ञानसङ्गं च जनयतीत्यर्थः। ज्ञानसुखयोस्सङ्गे हि जाते तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते; ततश्च तत्फलानुभवसाधनभूतासु योनिषु जायत इति सत्त्वं सुखज्ञानसङ्गद्वारेण पुरुषं बध्नाति। ज्ञानसुखजननं पुनरपि तयोस्सङ्गजननं च सत्त्वमित्युक्तं भवति॥ ६॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ ७॥

रजो रागात्मकम्— रागहेतुभूतम्। रागो योषित्पुरुषयोरन्योन्यस्पृहा। तृष्णासङ्गसमुद्भवम्— तृष्णासङ्गयोरुद्भवस्थानम्, तृष्णासङ्गहेतुभूतमित्यर्थः। तृष्णा— शब्दादिसर्वविषयस्पृहा; सङ्गः पुत्रमित्रादिषु संबन्धिषु संश्लेषस्पृहा। तथा देहिनं कर्मसु— क्रियासु स्पृहाजननद्वारेण निबध्नाति; क्रियासु हि स्पृहया याः क्रिया आरभते देही, ताश्च पुण्यपापरूपा इति तत्फलानुभवसाधनभूतासु योनिषु जन्महेतवो भवन्ति। अतः कर्मसङ्गद्वारेण रजो देहिनं निबध्नाति। तदेवं रजो रागतृष्णासङ्गहेतुः कर्मसङ्गहेतुश्चेत्युक्तं भवति॥ ७॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥ ८॥

ज्ञानादन्यदिहाज्ञानमभिप्रेतम्। ज्ञानं वस्तुयाथात्म्यावबोधः; तस्मादन्यत् तद्विपर्ययज्ञानम्। तमस्तु वस्तुयाथात्म्यविपरीतविषयज्ञानजम्। मोहनं सर्वदेहिनाम्— मोहो विपर्ययज्ञानम्; विपर्ययज्ञानहेतुरित्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्— तमः प्रमादालस्यनिद्राहेतुतया तद्द्वारेण देहिनं निबध्नाति । प्रमादः— कर्तव्यात्कर्मणोऽन्यत्र प्रवृत्ति-हेतुभूतमनवधानम् ; आलस्यम्— कर्मस्वनारम्भस्वभावः, स्तब्धतेति यावत् ; पुरुषस्येन्द्रियप्रवर्तनश्रान्त्या सर्वे-न्द्रियप्रवर्तनोपरतिर्निद्रा ; तत्र बाह्येन्द्रियप्रवर्तनोपरमः स्वप्नः ; मनसोऽप्युपरतिः सुषुप्तिः ॥ ८ ॥

सत्त्वादीनां बन्धद्वारभूतेषु प्रधानान्याह—

सत्त्वं सुखे संजयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥

सत्त्वं सुखसङ्गप्रधानम् ; रजः कर्मसङ्गप्रधानम् ; तमस्तु वस्तुयाथात्म्यज्ञानमावृत्य विपरीतज्ञानहेतु-तया कर्तव्यविपरीतप्रवृत्तिसङ्गप्रधानम् ॥ ९ ॥

देहाकारपरिणतायाः प्रकृतेः स्वरूपानुबन्धिनस्सत्त्वादयो गुणाः ; ते च स्वरूपानुबन्धित्वेन सर्वदा सर्वे वर्तन्त इति परस्परविरुद्धं कार्यं कथं जनयन्तीत्यत्राह—

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजस्सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा ॥ १० ॥

यद्यपि सत्त्वादयस्त्रयः प्रकृतिसंसृष्टात्मस्वरूपानुबन्धिनः, तथापि प्राचीनकर्मवशाद्देहाप्यायनभूताहार-वैषम्याच्च सत्त्वादयः परस्परसमुद्भवाभिभवरूपेण वर्तन्ते । रजस्तमसी कदाचिदभिभूय सत्त्वमुद्रिक्तं वर्तते। तथा तमस्सत्त्वे अभिभूय रजः कदाचित् । कदाचिच्च रजस्सत्त्वे अभिभूय तमः ॥ १० ॥

तच्च कार्योपलब्ध्यैवावगच्छेदित्याह—

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ॥ ११ ॥

सर्वेषु चक्षुरादिषु ज्ञानद्वारेषु यदा वस्तुयाथात्म्यप्रकाशो ज्ञानमुपजायते, तदा तस्मिन् देहे सत्त्वं प्रवृद्धमिति विद्यात् ॥ ११ ॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमस्स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

लोभः— स्वकीयद्रव्यस्यात्यागशीलता, प्रवृत्तिः— प्रयोजनमनुद्दिश्यापि चलनस्वभावता, आरम्भः कर्मणां— फलसाधनभूतानां कर्मणामारम्भः, अशमः— इन्द्रियानुपरतिः, स्पृहा— विषयेच्छा । एतानि रजसि प्रवृद्धे जायन्ते ; यदा लोभादयो वर्तन्ते तदा रजः प्रवृद्धमिति विद्यादित्यर्थः ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

अप्रकाशः— ज्ञानानुदयः, अप्रवृत्तिश्च— स्तब्धता, प्रमादः— अकार्यप्रवृत्तिफलमनवधानम्, मोहः— विपरीतज्ञानम्। एतानि तमसि प्रवृद्धे जायन्ते; एतैस्तमः प्रवृद्धमिति विद्यात् ॥ १३ ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥ १४ ॥

यदा सत्त्वं प्रवृद्धम्, तदा सत्त्वे प्रवृद्धे देहभृत् प्रलयम्— मरणं याति चेत्, उत्तमविदाम्— उत्तमतत्त्वविदाम्, आत्मयाथात्म्यविदां, लोकान्— समूहान्, अमलान्— मलरहितान्, अज्ञानरहितान्, प्रतिपद्यते— प्राप्नोति; सत्त्वे प्रवृद्धे तु मृतः आत्मविदां कुलेषु जनित्वा आत्मयाथात्म्यज्ञानसाधनेषु पुण्यकर्मस्वधिकरोतीत्युक्तं भवति ॥ १४ ॥

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।

रजसि प्रवृद्धे मरणं प्राप्य फलार्थं कर्म कुर्वतां कुलेषु जायते: तत्र जनित्वा स्वर्गादिफलसाधनकर्मस्वधिकरोतीत्यर्थः ॥

तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

तथा तमसि प्रवृद्धे मृतो मूढयोनिषु— श्वसूकरादियोनिषु जायते; सकलपुरुषार्थारम्भानर्हो जायत इत्यर्थः ॥ १५ ॥

कर्मणस्सुकृतस्याहुस्सात्त्विकं निर्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

एवं सत्त्ववृद्धौ मरणमुपगम्यात्मविदां कुले जातेनानुष्ठितस्य सुकृतस्य— फलाभिसन्धिरहितस्य मदाराधनरूपस्य कर्मणः फलं पुनरपि ततोऽधिकसत्त्वजनितं, निर्मलं— दुःखगन्धरहितं भवतीत्याहुस्सत्त्वगुणपरिणामविदः। अन्त्यकालप्रवृद्धस्य रजसस्तु फलं फलसाधनकर्मसङ्गिकुलजन्म - फलाभिसन्धिपूर्वककर्मारम्भ - तत्फलानुभवपुनर्जन्म - रजोवृद्धि - फलाभिसन्धिपूर्वककर्मारम्भपरम्परारूपसांसारिकदुःखप्रायमेवेत्याहुस्तद्गुणयाथात्म्यविदः। अज्ञानं तमसः फलम्— एवमन्त्यकालप्रवृद्धस्य तमसः फलमज्ञानपरम्परारूपम् ॥ १६ ॥

तदधिकसत्त्वादिजनितं निर्मलादिफलं किमित्यत्राह—

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं परम्परया जातादधिकसत्त्वादात्मयाथात्म्यापरोक्ष्यरूपं ज्ञानं जायते। तथा प्रवृद्धाद्रजसस्स्वर्गादिफललोभो जायते। तथा प्रवृद्धाच्च तमसः प्रमादः— अनवधाननिमित्तासत्कर्मणि प्रवृत्तिः; ततश्च मोहः— विपरीतज्ञानम्; ततश्चाधिकतरं तमः; ततश्चाज्ञानम्— ज्ञानाभावः ॥ १७ ॥

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

एवमुक्तेन प्रकारेण सत्त्वस्था ऊर्ध्वं गच्छन्ति— क्रमेण संसारबन्धान्मोक्षं गच्छन्ति। रजसस्स्वर्गादिफललोभकरत्वाद्राजसाः फलसाधनभूतं कर्मानुष्ठाय तत्फलमनुभूय पुनरपि जनित्वा तदेव कर्मानुतिष्ठन्तीति मध्ये तिष्ठन्ति। पुनरावृत्तिरूपतया दुःखप्रायमेव तत्। तामसास्तु जघन्यगुणवृत्तिस्थाः— उत्तरोत्तरनिकृष्टतमोगुणवृत्तिषु स्थिताः, अधो गच्छन्ति— अन्त्यत्वम्, ततस्तिर्यक्त्वम्, ततः क्रिमिकीटादिजन्म, [ततः] स्थावरत्वम्, ततोऽपि गुल्मलतात्वम्, ततश्च शिलाकाष्ठलोष्टतृणादित्वं गच्छन्तीत्यर्थः ॥ १८ ॥

आहारविशेषैः फलाभिसन्धिरहितसुकृतविशेषैश्च परम्परया प्रवर्धितसत्त्वानां गुणात्ययद्वारेण ऊर्ध्वगमनप्रकारमाह—

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

एवं सात्त्विकाहारसेवया फलाभिसन्धिरहितभगवदाराधनरूपकर्मानुष्ठानैश्च रजस्तमसी सर्वात्मनाऽभिभूय उत्कृष्टसत्त्वनिष्ठो यदाऽयं द्रष्टा गुणेभ्योऽन्यं कर्तारं नानुपश्यति; गुणा एव स्वानुगुणप्रवृत्तिषु कर्तार इति पश्यति; गुणेभ्यश्च परं वेत्ति— कर्तृभ्यो गुणेभ्यश्च परम्— अन्यमात्मानमकर्तारं वेत्ति; स मद्भावमभिगच्छति— मम यो भावस्तमधिगच्छति। एतदुक्तं भवति— आत्मनस्स्वतः परिशुद्धस्वभावस्य पूर्वपूर्वकर्ममूलगुणसङ्गनिमित्तं विविधकर्मसु कर्तृत्वम्; आत्मा स्वतस्त्वकर्ता अपरिच्छिन्नज्ञानैकाकार इत्येवमात्मानं यदा पश्यति, तदा मद्भावमधिगच्छतीति ॥ १९ ॥

कर्तृभ्यो गुणेभ्योऽन्यमकर्तारमात्मानं पश्यन् भगवद्भावमधिगच्छतीत्युक्तम्; स भगवद्भावः कीदृश इत्यत आह—

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥

अयं देही देहसमुद्भवान्— देहाकारपरिणतप्रकृतिसमुद्भवानेतान् सत्त्वादीन् त्रीन् गुणानतीत्य तेभ्योऽन्यं ज्ञानैकाकारमात्मानं पश्यन् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमात्मानमनुभवति; एष मद्भाव इत्यर्थः ॥ २० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ गुणातीतस्य स्वरूपसूचनाचारप्रकारं गुणात्ययहेतुं च पृच्छन् अर्जुन उवाच—

अर्जुन उवाच—

कैर्लिङ्गैस्त्रिगुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते ॥ २१ ॥

सत्त्वादीन् त्रीन् गुणानेतानतीतः कैर्लिङ्गैः— कैर्लक्षणैः उपलक्षितो भवति ? किमाचारः— केनाचारेण युक्तोऽसौ ? अस्य स्वरूपावगतिलिङ्गभूताचारः कीदृश इत्यर्थः । कथं चैतान्— केनोपायेन सत्त्वादींस्त्रीन् गुणानतिवर्तते ? ॥ २१ ॥

श्रीभगवानुवाच—

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥

आत्मव्यतिरिक्तेषु वस्तुष्वनिष्टेषु संप्रवृत्तानि सत्त्वरजस्तमसां कार्याणि प्रकाशप्रवृत्तिमोहाख्यानि यो न द्वेष्टि, तथा आत्मव्यतिरिक्तेष्विष्टेषु वस्तुषु तान्येव निवृत्तानि न काङ्क्षति ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३ ॥

उदासीनवदासीनः— गुणव्यतिरिक्तात्मावलोकनतृप्त्या अन्यत्रोदासीनवदासीनः, गुणैर्द्वेषाकाङ्क्षाद्वारेण यो न विचाल्यते ; गुणास्स्वेषु कार्येषु प्रकाशादिषु वर्तन्त इत्यनुसन्धाय यस्तूष्णीमवतिष्ठते । नेङ्गते— न गुणकार्यानुगुणं चेष्टते ॥ २३ ॥

समदुःखसुखस्स्वस्थस्समलोष्टाश्मकाञ्चनः । तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४ ॥
मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारम्भपरित्यागी गुणातीतस्स उच्यते ॥ २५ ॥

समदुःखसुखः— सुखदुःखयोस्समचित्तः । स्वस्थः— स्वस्मिन् स्थितः, स्वात्मैकप्रियत्वेन तद्व्यतिरिक्तपुत्रादिजन्ममरणादिसुखदुःखयोस्समचित्त इत्यर्थः । तत एव समलोष्टाश्मकाञ्चनः । तत एव तुल्यप्रियाप्रियः— तुल्यप्रियाप्रियविषयः । धीरः— प्रकृत्यात्मविवेककुशलः । तत एव तुल्यनिन्दात्मसंस्तुतिः— आत्मनि मनुष्यत्वाद्यभिमानकृतगुणागुणनिमित्तस्तुतिनिन्दयोस्स्वासंबन्धानुसन्धानेन तुल्यचित्तः । तत्प्रयुक्तमानावमानयोः तत्प्रयुक्तमित्रारिपक्षयोरपि स्वसंबन्धाभावादेव तुल्यचित्तः । तथा देहित्वप्रयुक्तसर्वारम्भपरित्यागी । य एवंभूतः, स गुणातीत उच्यते ॥ २४, २५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथैवंरूपगुणात्यये प्रधानहेतुमाह—

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥

* नान्यं गुणेभ्यः कर्तारम् (१९) इत्यादिनोक्तेन प्रकृत्यात्मविवेकानुसन्धानमात्रेण न गुणात्ययस्संपत्स्यते, तस्यानादिकालप्रवृत्तविपरीतवासनाबाध्यत्वसंभवात् । माम्— सत्यसङ्कल्पं परमकारुणिकमाश्रितवात्सल्यजलधिम्, अव्यभिचारेण— ऐकान्त्यविशिष्टेन, भक्तियोगेन च यस्सेवते, स एतान् सत्त्वादीन् गुणान् दुरत्ययान् अतीत्य ब्रह्मभूयाय— ब्रह्मत्वाय, कल्पते— ब्रह्मभावयोग्यो भवति ; यथावस्थितमात्मानममृतमव्ययं प्राप्नोतीत्यर्थः ॥ २६ ॥

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥

हिशब्दो हेतौ ; यस्मादव्यभिचारिभक्तियोगेन सेवितोऽमृतस्याव्ययस्य च ब्रह्मणः प्रतिष्ठा, तथा शाश्वतस्य च धर्मस्य, अतिशयितनित्यैश्वर्यस्यैकान्तिकस्य च सुखस्य— * वासुदेवस्सर्वम् इत्यादिना निर्दिष्टस्य ज्ञानिनः प्राप्यस्य सुखस्येत्यर्थः । यद्यपि शाश्वतधर्मशब्दः प्रापकवचनः, तथाऽपि पूर्वोत्तरयोः प्राप्यरूपत्वेन तत्साहचर्यादयमपि प्राप्यलक्षकः । एतदुक्तं भवति— पूर्वत्र * दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते इत्यारभ्य गुणात्ययस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनां च भगवत्प्रपत्त्येकोपायतायाः प्रतिपादितत्वादेकान्तभगवत्प्रपत्त्येकोपायो गुणात्ययस्तत्पूर्वकब्रह्मभावश्चेति ॥ २७ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये चतुर्दशोऽध्यायः ॥ १४ ॥

॥ अथ पञ्चदशोऽध्यायः ॥ १५ ॥

क्षेत्राध्याये क्षेत्रक्षेत्रज्ञभूतयोः प्रकृतिपुरुषयोः स्वरूपं विशोध्य विशुद्धस्यापरिच्छिन्नज्ञानैकाकारस्यैव पुरुषस्य प्राकृतगुणसङ्गप्रवाहनिमित्तो देवाद्याकारपरिणतप्रकृतिसंबन्धोऽनादिरित्युक्तम् । अनन्तरे चाध्याये पुरुषस्य कार्यकारणोभयावस्थप्रकृतिसंबन्धो गुणसङ्गमूलो भगवतैव कृत इत्युक्त्वा गुणसङ्गप्रकारं सविस्तरं प्रतिपाद्य गुणसङ्गनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तम् । इदानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

विभूतिमत्ताम्, विभूतिभूतात् क्षराक्षरपुरुषद्वयात् निखिलहेयप्रत्यनीककल्याणैकतानतया अत्यन्तोत्कर्षेण विसजातीयस्य भगवतः पुरुषोत्तमत्वं च वक्तुमारभते। तत्र तावत् असङ्गरूपशस्त्रच्छिन्नबन्धामक्षराख्यविभूतिं वक्तुं छेद्यरूपबन्धाकारेण विततमचित्परिणामविशेषमश्वत्थवृक्षाकारं कल्पयन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥ १॥

यं संसाराख्यमश्वत्थम् ऊर्ध्वमूलमधश्शाखमव्ययं प्राहुश्श्रुतयः, * ऊर्ध्वमूलोऽवाक्छाख एषोऽश्वत्थस्सनातनः * ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेद संप्रति इत्याद्याः। सप्तलोकोपरिनिविष्टचतुर्मुखादित्वेन तस्योर्ध्वमूलत्वम्। पृथिवीनिवासिसकलनरपशुमृगक्रिमिकीटपतङ्गस्थावरान्ततया अधश्शाखत्वम्। असङ्गहेतुभूतादासम्यग्ज्ञानोदयात् प्रवाहरूपेणाच्छेद्यत्वेनाव्ययत्वम्। यस्य चाश्वत्थस्य छन्दांसि पर्णान्याहुः। छन्दांसि— श्रुतयः * वायव्यं श्वेतमालभेत भूतिकामः * ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः, इत्यादिश्रुतिप्रतिपादितैः काम्यकर्मभिर्वर्धतेऽयं संसारवृक्ष इति छन्दांस्येवास्य पर्णानि। पर्णैर्हि वृक्षो वर्धते। यस्तमेवंभूतमश्वत्थं वेद, स वेदवित्। वेदो हि संसारवृक्षच्छेदोपायं वदति; छेद्यवृक्षस्वरूपज्ञानं छेदनोपायज्ञानोपयोगीति वेदविदित्युच्यते॥ १॥

अधश्चोर्ध्वं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।

तस्य— मनुष्यादिशाखस्य वृक्षस्य तत्तत्कर्मकृता अपराश्चाधश्शाखाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवन्ति; ऊर्ध्वं च गन्धर्वयक्षदेवादिरूपेण प्रसृता भवन्ति। ताश्च गुणप्रवृद्धाः— गुणैस्सत्त्वादिभिः प्रवृद्धाः, विषयप्रवालाः— शब्दादिवियपल्लवाः॥ १॥

कथमित्यत्राह—

अधश्च मूलान्यनुसंततानि कर्मानुबन्धीनि मनुष्यलोके॥ २॥

ब्रह्मलोकमूलस्यास्य वृक्षस्य मनुष्याग्रस्य, अधः— मनुष्यलोके, मूलान्यनुसन्ततानि। तानि च कर्मानुबन्धीनि— कर्माण्येवानुबन्धीनि मूलानि, अधो मनुष्यलोके च भवन्तीत्यर्थः; मनुष्यत्वावस्थायां कृतैर्हि कर्मभिः अधो मनुष्यपश्वादयः, ऊर्ध्वं च देवादयो भवन्ति॥ २॥

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा।

अस्य— वृक्षस्य चतुर्मुखादित्वेनोर्ध्वमूलत्वम्, तत्सन्तानपरम्परया मनुष्याग्रत्वेनाधश्शाखत्वम्, मनुष्यत्वे कृतैः कर्मभिर्मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति यथेदं रूपं निर्दिष्टम्, न तथा संसारिभिरुपलभ्यते; मनुष्योऽहं देवदत्तस्य पुत्रो यज्ञदत्तस्य पिता तदनुरूपपरिग्रहश्चेत्येतावन्मात्रमुपलभ्यते। तथाऽस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

वृक्षस्य अन्तः— विनाशोऽपि, गुणमयभोगेष्वसङ्गकृत इति नोपलभ्यते । तथाऽस्य गुणसङ्ग एवादिरिति नोपलभ्यते । तस्य प्रतिष्ठा चानात्मन्यात्माभिमानरूपमज्ञानमिति नोपलभ्यते ; प्रतितिष्ठत्यस्मिन्नेवेति ह्यज्ञानमेवास्य प्रतिष्ठा ॥ २॥

अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ॥ ३ ॥

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ।

एनम्— उक्तप्रकारं, सुविरूढमूलम्— सुष्ठु विविधं रूढमूलमश्वत्थं सम्यग्ज्ञानमूलेन दृढेन गुणमयभोगासंगाख्येन शस्त्रेण छित्वा, ततो— विषयासंगाद्धेतोस्तत्पदं परिमार्गितव्यम्— अन्वेषणीयम् ; यस्मिन् गता भूयो न निवर्तन्ते ॥ ३॥

कथमनादिकालप्रवृत्तो गुणमयभोगसंगस्तन्मूलं च विपरीतज्ञानं निवर्तत इत्यत आह—

तमेव चाद्यं पुरुषं प्रपद्ये[य]यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

अज्ञानादिनिवृत्तये तमेव चाद्यम्— कृत्स्नस्यादिभूतं, * मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् • अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते * मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय इत्यादिषूक्तमाद्यं पुरुषमेव शरणं प्रपद्येत्— तमेव शरणं प्रपद्येत । यतो— यस्मात् कृत्स्नस्य स्रष्टुरियं गुणमयभोगसङ्गप्रवृत्तिः, पुराणी— पुरातनी प्रसृता । उक्तं हि मयैतत्पूर्वमेव • दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति । * प्रपद्येयतः प्रवृत्तिरिति वा पाठः ; तमेव चाद्यं पुरुषं प्रपद्य— शरणमुपगम्य, इयतः— अज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य साधनभूता प्रवृत्तिः पुराणी— पुरातनी प्रसृता ; पुरातनानां मुमुक्षूणां प्रवृत्तिः पुराणी ; पुरातना हि मुमुक्षवो मामेव शरणमुपगम्य निर्मुक्तबन्धास्संजाता इत्यर्थः ॥ ४ ॥

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।

द्वन्द्वैर्विमुक्तास्सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

एवं मां शरणमुपगम्य निर्मानमोहाः— निर्गतानात्मात्माभिमानरूपमोहाः, जितसङ्गदोषाः— जितगुणमयभोगसङ्गाख्यदोषाः, अध्यात्मनित्याः— आत्मनि यत् ज्ञानं तदध्यात्मम्, आत्मज्ञाननिरताः, विनिवृत्तकामाः— विनिवृत्ततदितरकामाः, सुखदुःखसंज्ञैर्द्वन्द्वैश्च विमुक्ताः, अमूढाः— आत्मानात्मस्वभावज्ञाः, तदव्ययं पदं गच्छन्ति— अनवच्छिन्नज्ञानाकारमात्मानं यथावस्थितं प्राप्नुवन्ति ; मां शरणमुपगतानां मत्प्रसादादेवैतास्सर्वाः प्रवृत्तयस्सुशकास्सिद्धिपर्यन्ता भवन्तीत्यर्थः ॥ ५ ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदात्मज्योतिर्न सूर्यो भासयते, न शशाङ्कः, न पावकश्च । ज्ञानमेव हि सर्वस्य प्रकाशकम् ; बाह्यानि तु ज्योतींषि विषयेन्द्रियसंबन्धविरोधितमोनिरसनद्वारेणोपकारकाणि । अस्य च प्रकाशको योगः, तद्विरोधि चानादिकर्म, तन्निवर्तनं चोक्तं भगवत्प्रपत्तिमूलमसङ्गादि । यद्गत्वा पुनर्न निवर्तन्ते, तत्परं धाम— परं ज्योतिः, मम— मदीयम् ; मद्विभूतिभूतो ममांश इत्यर्थः । आदित्यादीनामपि प्रकाशकत्वेन तस्य परमत्वम् । आदित्यादीनि हि ज्योतींषि न ज्ञानज्योतिषः प्रकाशकानि ; ज्ञानमेव सर्वस्य प्रकाशकम् ॥ ६ ॥

ममैवांशो जीवलोके जीवभूतस्सनातनः ।
मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

इत्थमुक्तस्वरूपस्सनातनो ममांश एव सन् कश्चिदनादिकर्मरूपाविद्यावेष्टितो जीवभूतो जीवलोके वर्तमानो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि मनष्षष्ठानीन्द्रियाणि कर्षति । कश्चिच्च पूर्वोक्तेन मार्गेणास्या अविद्यायाः मुक्तः स्वेन रूपेणावतिष्ठते ; जीवभूतस्त्वतिसंकुचितज्ञानैश्वर्यः कर्मलब्धप्रकृतिपरिणामविशेषरूपशरीरस्थानामिन्द्रियाणां मनष्षष्ठानामीश्वरः तानि कर्मानुगुणमितस्ततः कर्षति ॥ ७ ॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८ ॥

यच्छरीरमवाप्नोति, यस्माच्छरीरादुत्क्रामति, तत्रायमिन्द्रियाणामीश्वरः एतानीन्द्रियाणि भूतसूक्ष्मैस्सह गृहीत्वा संयाति । वायुर्गन्धानिवाशयात्— यथा वायुः स्रक्चन्दनकस्तूरिकाद्याशयात्— तत्स्थानात्, सूक्ष्मावयवैस्सह गन्धान् गृहीत्वाऽन्यत्र संयाति, तद्वदित्यर्थः ॥ ८ ॥

कानि पुनस्तानीन्द्रियाणीत्यत्राह—

श्रोत्रं चक्षुस्स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

एतानि मनष्षष्ठानीन्द्रियाण्यधिष्ठाय— स्वस्वविषयवृत्त्यनुगुणानि कृत्वा, तान् शब्दादीन् विषयानुपसेवते— उपभुङ्क्ते ॥ ९ ॥

उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

एवं गुणान्वितं सत्त्वादिगुणमयप्रकृतिपरिणामविशेषमनुष्यत्वादिसंस्थानपिण्डसंसृष्टम्, पिण्डविशेषादुत्क्रामन्तं पिण्डविशेषेऽवस्थितं वा, गुणमयान् विषयान् भुञ्जानं वा कदाचिदपि प्रकृतिपरिणामविशेषमनुष्यत्वादिपिण्डाद्विलक्षणं ज्ञानैकाकारं विमूढा नानुपश्यन्ति । विमूढाः— मनुष्यत्वादिपिण्डात्माभिमानिनः । ज्ञानचक्षुषस्तु पिण्डात्मविवेकविषयज्ञानवन्तः सर्वावस्थमप्येनं विविक्ताकारमेव पश्यन्ति ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः॥ ११॥

मत्प्रपत्तिपूर्वकं कर्मयोगादिषु यतमानास्तैर्निर्मलान्तःकरणा योगिनो योगारूढेन चक्षुषा आत्मनि— शरीरेऽवस्थितमपि शरीराद्विविक्तं स्वेन रूपेणावस्थितमेनं पश्यन्ति। यतमाना अप्यकृतात्मानः— मत्प्रपत्तिविरहिणः तत एवासंस्कृतमनसः, तत एवाचेतसः— आत्मावलोकनसमर्थचेतोरहिताः, नैनं पश्यन्ति॥ ११॥

एवं रविचन्द्राग्नीनामिन्द्रियसन्निकर्षविरोधिसंतमसनिरसनमुखेनेन्द्रियानुग्राहकतया प्रकाशकानां ज्योतिष्मतामपि प्रकाशकज्ञानज्योतिरात्मा मुक्तावस्थो जीवावस्थश्च भगवद्विभूतिरित्युक्तम्— * तद्धाम परमं मम * ममैवांशो जीवलोके जीवभूतस्सनातनः इति। इदानीमचित्परिणामविशेषभूतमादित्यादीनां ज्योतिष्मतां ज्योतिरपि भगवद्विभूतिरित्याह—

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ १२॥

अखिलस्य जगतो भासकमेतेषामादित्यादीनां यत्तेजः, तन्मदीयं तेजः— तैस्तैराराधितेन मया तेभ्यो दत्तमिति विद्धि॥ १२॥

पृथिव्याश्च भूतधारिण्या धारकत्वशक्तिर्मदीयेत्याह—

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीस्सर्वास्सोमो भूत्वा रसात्मकः॥ १३॥

अहं पृथिवीमाविश्य सर्वाणि भूतान्योजसा— ममाप्रतिहतसामर्थ्येन धारयामि। तथाऽहममृतरसमयस्सोमो भूत्वा सर्वौषधीः पुष्णामि॥ १३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ १४॥

अहं वैश्वानरः— जाठरानलो भूत्वा सर्वेषां प्राणिनां देहमाश्रितः तैर्भुक्तं खाद्यचो[चू]ष्यलेह्यपेयात्मकं चतुर्विधमन्नं प्राणापानवृत्तिभेदसमायुक्तः पचामि॥ १४॥

अत्र परमपुरुषविभूतिभूतौ सोमवैश्वानरौ * अहं सोमो भूत्वा * वैश्वानरो भूत्वेति तत्सामानाधिकरण्येन निर्दिष्टौ। तयोश्च सर्वस्य भूतजातस्य(च) परमपुरुषसामानाधिकरण्यनिर्देशहेतुमाह—

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।

Digitization by Arya Samaj Charitable Foundation, Chennai

वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥

तयोस्सोमवैश्वानरयोः सर्वस्य च भूतजातस्य सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयदेशे हृदि सर्वं मत्संकल्पेन नियच्छन् अहमात्मतया सन्निविष्टः । तथाहुश्श्रुतयः * अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा * यः पृथिव्यां तिष्ठन् * य आत्मनि तिष्ठन्नात्मनोऽन्तरो....यमयति, * पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् * अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म इत्याद्याः । स्मृतयश्च * शास्ता विष्णुरशेषस्य जगतो यो जगन्मयः, * प्रशासितारं सर्वेषामणीयांसमणीयसाम् , यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः इत्याद्याः । अतो मत्त एव सर्वेषां स्मृतिर्जायते ; स्मृतिः– पूर्वानुभूतविषयमनुभवसंस्कारमात्रजं ज्ञानम् । ज्ञानम्– इन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः ; सोऽपि मत्तः । अपोहनं च, अपोहनम्— ज्ञाननिवृत्तिः । अपोहनम्– ऊहनं वा, ऊहनमूहः, ऊहो नामेदं प्रमाणमित्थं प्रवर्तितुमर्हतीति प्रमाणप्रवृत्त्यर्हताविषयं सामग्र्यादिनिरूपणजन्यं प्रमाणानुग्राहकं ज्ञानम् ; स चोहो मत्त एव । वेदैश्च सर्वैरहमेव वेद्यः । अतोऽग्निसूर्यवायुसोमेन्द्रादीनां मदन्तर्यामिकत्वेन मदात्मकत्वात्तत्प्रतिपादनपरैरपि सर्वैर्वेदैरहमेव वेद्यः, देवमनुष्यादिशब्दैर्जीवात्मेव । वेदान्तकृत्— वेदानाम्—* इन्द्रं यजेत, वरुणं यजेतेत्येवमादीनामन्तः— फलम् ; फले हि ते सर्वे वेदाः पर्यवस्यन्ति ; अन्तकृत्— फलकृत् ; वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः । तदुक्तं पूर्वमेव * योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति इत्यारभ्य * लभते च ततः कामान् मयैव विहितान् हि तानिति, * अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च, इति च । वेदविदेव चाहं— वेदविच्चाहमेव । एवं मदभिधायिनं वेदमहमेव वेद ; इतोऽन्यथा यो वेदार्थं ब्रूते न स वेदविदित्यभिप्रायः ॥ १५ ॥

अतो मत्त एव सर्ववेदानां सारभूतमर्थं शृणु—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥

क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रथितौ । तत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्दाभिलपनीयब्रह्मादिस्तम्बपर्यन्तक्षरणस्वभावाचित्संसृष्टसर्वभूतानि । अत्राचित्संसर्गरूपैकोपाधिना पुरुष इत्येकत्वनिर्देशः । अक्षरशब्दनिर्दिष्टः कूटस्थः अचित्संसर्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा । स त्वचित्संसर्गाभावादचित्परिणामविशेषब्रह्मादिदेहासाधारणो न भवतीति कूटस्थ इत्युच्यते । अत्राप्येकत्वनिर्देशोऽचिद्वियोगरूपैकोपाधिनाऽभिहितः । नहीतः पूर्वमनादौ काले मुक्त एक एव । यथोक्तं * बहवो ज्ञानतपसा पूता मद्भावमागताः * सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च इति ॥ १६ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः— अर्थान्तरभूतः, परमात्मेत्युदाहृतस्सर्वासु श्रुतिषु । परमात्मेति निर्देशादेव ह्युत्तमः पुरुषो बद्धमुक्तपुरुषाभ्यामर्थान्तरभूत इत्यवगम्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कथम् ? यो लोकत्रयमाविश्य बिभर्ति— लोक्यत इति लोकः, तत्त्रयम्— लोकत्रयम्; अचेतनं तत्संसृष्टश्चेतनो मुक्तश्चेति प्रमाणावगम्यमेतत्त्रयं य आत्मतया आविश्य बिभर्ति, स तस्माद्व्याप्याद्भर्तव्याच्चार्थान्तरभूतः। इतश्चोक्ताल्लोकत्रयादर्थान्तरभूतः; यतस्सोऽव्ययः, ईश्वरश्च; अव्ययस्वभावो हि व्ययस्वभावादचेतनात्तत्संबन्धेन तदनुसारिणश्च चेतनादचित्संबन्धयोग्यतया पूर्वसंबन्धिनो मुक्ताच्चार्थान्तरभूत एव। तथैतस्य लोकत्रयस्येश्वरः, ईशितव्यात्तस्मादर्थान्तरभूतः॥ १७॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ १८॥

यस्मादेवमुक्तैस्स्वभावैः क्षरं पुरुषमतीतोऽहम्, अक्षरान्मुक्तादप्युक्तैर्हेतुभिरुत्कृष्टतमः, अतोऽहं लोके वेदे च पुरुषोत्तम इति प्रथितोऽस्मि। वेदार्थावलोकनाल्लोक इति स्मृतिरिहोच्यते। श्रुतौ स्मृतौ चेत्यर्थः। श्रुतौ तावत् * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः, इत्यादौ। स्मृतावपि * अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यान्तमजस्य विष्णोः इत्यादौ॥ १८॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥ १९॥

य एवम्—उक्तेन प्रकारेण पुरुषोत्तमं मामसंमूढो जानाति— क्षराक्षरपुरुषाभ्यामव्ययस्वभावतया व्यापनभरणैश्वर्यादियोगेन च विसजातीयं जानाति, स सर्ववित्— मत्प्राप्त्युपायतया यद्वेदितव्यं तत्सर्वं वेद। भजति मां सर्वभावेन— ये च मत्प्राप्त्युपायतया मद्भजनप्रकारा निर्दिष्टास्तैश्च सर्वैर्भजनप्रकारैर्मां भजते, सर्वैर्मद्विषयैर्वेदनैर्मम या प्रीतिर्या च मम सर्वैर्मद्विषयैर्भजनैः; उभयविधा सा प्रीतिरनेन वेदनेन मम जायते॥ १९॥

इत्येतत्पुरुषोत्तमत्ववेदनं पूजयति—

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ।
एतद्बुद्ध्वा बुद्धिमांस्स्यात्कृतकृत्यश्च भारत॥ २०॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
पुराणपुरुषोत्तयोगो नाम पञ्चदशोऽध्यायः॥

इत्थं मम पुरुषोत्तमत्वप्रतिपादनं सर्वेषां गुह्यानां गुह्यतममिदं शास्त्रं त्वमनघतया योग्यतम इति कृत्वा मया तवोक्तम्। एतद्बुद्ध्वा बुद्धिमांस्स्यात्कृतकृत्यश्च— मां प्रेप्सुना उपादेया या बुद्धिस्सा सर्वा उपात्ता स्यात्; यच्च तेन कर्तव्यम्, तत्सर्वं कृतं स्यादित्यर्थः। अनेन श्लोकेनानन्तरोक्तं पुरुषोत्तमविषयं ज्ञानं शास्त्रजन्यमेवैतत्सर्वं करोति, न तु साक्षात्काररूपमित्युच्यते॥ २०॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये पञ्चदशोऽध्यायः॥ १५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

॥ अथ षोडशोऽध्यायः ॥ १६ ॥

अतीतेनाध्यायत्रयेण प्रकृतिपुरुषयोर्विविक्तयोस्संसृष्टयोश्च याथात्म्यम्, तत्संसर्गवियोगयोश्च गुणसङ्गतद्विपर्ययहेतुकत्वम्, सर्वप्रकारेणावस्थितयोः प्रकृतिपुरुषयोर्भगवद्विभूतित्वम्, विभूतिमतो भगवतो विभूतिभूतादचिद्वस्तुनश्चिद्वस्तुनश्च बद्धमुक्तोभयरूपादव्ययत्वव्यापनभरणस्वाम्यैरर्थान्तरतया पुरुषोत्तमत्वेन याथात्म्यं च वर्णितम्। अनन्तरमुक्तस्य कृत्स्नस्यार्थस्य स्थेम्ने शास्त्रवश्यतां वक्तुं शास्त्रवश्यतद्विपरीतयोर्दैवासुरसर्गयोर्विभागं श्रीभगवानुवाच—

श्रीभगवानुवाच—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥

अहिंसा सत्यमक्रोधस्त्यागश्शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥

तेजः क्षमा धृतिश्शौचमद्रोहो नातिमानिता। भवन्ति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥

इष्टानिष्टवियोगसंयोगरूपस्य दुःखस्य हेतुदर्शनजं दुःखं भयम्, तन्निवृत्तिरभयम्। सत्त्वसंशुद्धिः— सत्त्वस्यान्तःकरणस्य रजस्तमोभ्यामस्पृष्टत्वम्। ज्ञानयोगव्यवस्थितिः— प्रकृतिवियुक्तात्मस्वरूपविवेकनिष्ठा। दानम्— न्यायार्जितधनस्य पात्रे प्रतिपादनम्। दमः— मनसो विषयौन्मुख्यनिवृत्तिसंशीलनम्। यज्ञः— फलाभिसन्धिरहितभगवदाराधनरूपमहायज्ञाद्यनुष्ठानम्। स्वाध्यायः— सविभूतेर्भगवतस्तदाराधनप्रकारस्य च प्रतिपादकः कृत्स्नो वेद इत्यनुसन्धाय वेदाभ्यासनिष्ठा। तपः— कृच्छ्रचान्द्रायणद्वादश्युपवासादेर्भगवत्प्रीणनकर्मयोग्यतापादनस्य करणम्। आर्जवम्— मनोवाक्कायवृत्तीनामेकनिष्ठता परेषु। अहिंसा— परपीडावर्जनम्। सत्यम्— यथादृष्टार्थगोचरभूतहितवाक्यम्। अक्रोधः— परपीडाफलचित्तविकाररहितत्वम्। त्यागः— आत्महितप्रत्यनीकपरिग्रहविमोचनम्। शान्तिः— इन्द्रियाणां विषयप्रावण्यनिरोधसंशीलनम्। अपैशुनम्— परानर्थकरवाक्यनिवेदनाकरणम्। दया भूतेषु— सर्वभूतेषु दुःखासहिष्णुत्वम्। अलोलुप्त्वम्— अलोलुपत्वम्। अलोलुत्वमिति वा पाठः; विषयेषु निस्स्पृहत्वमित्यर्थः। मार्दवम्— अकाठिन्यम्, साधुजनसंश्लेषार्हतेत्यर्थः। ह्रीः— अकार्यकरणे व्रीडा। अचापलम्— स्पृहणीयविषयसन्निधावचञ्चलत्वम्। तेजः— दुर्जनैरनभिभवनीयत्वम्। क्षमा— परनिमित्तपीडानुभवेऽपि परेषु तं प्रति चित्तविकाररहितता। धृतिः— महत्यामप्यापदि कृत्यकर्तव्यतावधारणम्। शौचम्— बाह्यान्तरकरणानां कृत्ययोग्यता शास्त्रीया। अद्रोहः— परेष्वनुपरोधः; परेषु स्वच्छन्दवृत्तिनिरोधरहितत्वमित्यर्थः। नातिमानिता— अस्थाने गर्वोऽतिमानित्वम्, तद्रहितता। एते गुणाः दैवीं संपदमभिजातस्य भवन्ति— देवसंबन्धिनी संपत् दैवी, देवा भगवदाज्ञानुवृत्तिशीलाः, तेषां संपत्, सा च भगवदाज्ञानुवृत्तिरेव; तामभिजातस्य— तामभिमुखीकृत्य जातस्य, तां निर्वर्तयितुं जातस्य भवन्तीत्यर्थः ॥ १–३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥

दम्भः— धार्मिकत्वख्यापनाय धर्मानुष्ठानम् । दर्पः— कृत्याकृत्याविवेककरो विषयानुभवनिमित्तो हर्षः । अतिमानश्च— स्वविद्याभिजनाननुगुणोऽभिमानः । क्रोधः— परपीडाफलचित्तविकारः । पारुष्यम्— साधूनामुद्वेगकरः स्वभावः । अज्ञानम्— परावरतत्त्वकृत्याकृत्याविवेकः । एते स्वभावा आसुरीं संपदमभिजातस्य भवन्ति । असुरा भगवदाज्ञातिवृत्तिशीलाः ॥ ४ ॥

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।

दैवी— मदाज्ञानुवृत्तिरूपा संपत्, विमोक्षाय— बन्धान्मुक्तये भवति ; क्रमेण मत्प्राप्तये भवतीत्यर्थः । आसुरी— मदाज्ञातिवृत्तिरूपा संपत्, निबन्धाय भवति— अधोगतिप्राप्तये भवतीत्यर्थः ॥ ४॥ ॥

एतच्छ्रुत्वा स्वप्रकृत्यनिर्धारणादतिभीतायार्जुनायैवमाह—

मा शुचस्संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५ ॥

शोकं मा कृथाः ; त्वं तु दैवीं संपदमभिजातोऽसि, पाण्डव— धार्मिकाग्रेसरस्य हि पाण्डोस्तनयस्त्वमित्यभिप्रायः ॥ ५ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

अस्मिन् कर्मलोके कर्मकराणां भूतानां सर्गौ द्विविधौ— दैवश्चासुरश्चेति ; सर्गः— उत्पत्तिः ; प्राचीनपुण्यपापरूपकर्मवशाद्भगवदाज्ञानुवृत्तितद्विपरीतकरणायोत्पत्तिकाल एव विभागेन भूतान्युत्पद्यन्त इत्यर्थः । तत्र दैवस्सर्गो विस्तरशः प्रोक्तः— देवानां मदाज्ञानुवृत्तिशीलानामुत्पत्तिर्यदाचारकरणार्था, स आचारः कर्मयोगज्ञानयोगभक्तियोगरूपो विस्तरशः प्रोक्तः । असुराणां सर्गश्च यदाचारार्थः, तमाचारं मे शृणु— मम सकाशाच्छृणु ॥ ६ ॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

प्रवृत्तिं च निवृत्तिं च— अभ्युदयसाधनं मोक्षसाधनं च वैदिकं धर्मम्, आसुरा न विदुः— न जानन्ति । शौचम्— वैदिककर्मयोग्यत्वं शास्त्रसिद्धम् ; तद्बाह्यमान्तरं चासुरेषु न विद्यते ; नापि चाचारः— तद्बाह्यान्तरशौचं येन सन्ध्यावन्दनादिना आचारेण जायते, सोऽप्याचारस्तेषु न विद्यते । यथोक्तम्—

Digitization by Arya Samaj Charitable Foundation, Chennai

* सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु इति। तथा सत्यं च तेषु न विद्यते– यथाज्ञानं भूतहितरूपभाषणं तेषु न विद्यते ॥ ७ ॥

किंच—

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहेतुकम् ॥ ८ ॥

असत्यम्— जगदेतत्सत्यशब्दनिर्दिष्टब्रह्मकार्यतया ब्रह्मात्मकमिति नाहुः। अप्रतिष्ठम्— तथा ब्रह्मणि प्रतिष्ठितमिति न वदन्ति। ब्रह्मणाऽनन्तेन धृता हि पृथिवी सर्वान् लोकान् बिभर्ति। यथोक्तं * तेनेयं नागवर्येण शिरसा विधृता मही। बिभर्ति मालां लोकानां सदेवासुरमानुषाम् ॥ इति। अनीश्वरम्– सत्यसंकल्पेन परेण ब्रह्मणा सर्वेश्वरेण मयैतन्नियमितमिति च न वदन्ति। * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते इति ह्युक्तम्। वदन्ति चैवम्— अपरस्परसंभूतम्, किमन्यत्– योषित्पुरुषयोः परस्परसंबन्धेन जातमिदं मनुष्यपश्वादिकमुपलभ्यते, अनेवंभूतं किमन्यदुपलभ्यते? किंचिदपि नोपलभ्यत इत्यर्थः। अतस्सर्वमिदं जगत् कामहेतुकमिति ॥ ८ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽशुभाः ॥ ९ ॥

एतां दृष्टिमवष्टभ्य– अवलम्ब्य, नष्टात्मानः— अदृष्टदेहातिरिक्तात्मनः, अल्पबुद्धयः— घटादिवत् ज्ञेयभूते देहे ज्ञातृत्वेन देहव्यतिरिक्त आत्मोपलभ्यत इति विवेकाकुशलाः, उग्रकर्माणः— सर्वेषां हिंसकाः, जगतः क्षयाय प्रभवन्ति ॥ ९ ॥

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥

दुष्पूरम्— दुष्प्रापविषयं काममाश्रित्य तत्सिषाधयिषया मोहात्— अज्ञानात्, असद्ग्राहान्— अन्यायगृहीतपरिग्रहान्, गृहीत्वा, अशुचिव्रताः— अशास्त्रविहितव्रतयुक्ताः दम्भमानमदान्विताः प्रवर्तन्ते ॥ १० ॥

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥

अद्य श्वो वा मुमूर्षवः चिन्तामपरिमेयाम्— अपरिच्छेद्यां, प्रलयान्तां— प्राकृतप्रलयावधिकालसाध्यविषयाम्, उपाश्रिताः, तथा कामोपभोगपरमाः— कामोपभोग एव परमपुरुषार्थ इति मन्वानाः, एतावदिति निश्चिताः— इतोऽधिकः पुरुषार्थो न विद्यत इति संजातनिश्चयाः ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १२ ॥

आशापाशशतैः— आशाख्यपाशशतैर्बद्धाः, कामक्रोधपरायणाः— कामक्रोधैकनिष्ठाः, कामभोगार्थमन्यायेनार्थसंचयान् प्रतीहन्ते ॥ १२ ॥

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥

इदम्— क्षेत्रपुत्रादिकं सर्वं मया मत्सामर्थ्येनैव लब्धम्, नादृष्टादिना; इमं च मनोरथमहमेव प्राप्स्ये, नादृष्टादिसहितः । इदं धनं मत्सामर्थ्येन लब्धं मे अस्ति, इदमपि पुनर्मे मत्सामर्थ्येनैव भविष्यति ॥

असौ मया हतश्शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥ १४ ॥

असौ मया बलवता हतश्शत्रुः, अपरानपि शत्रूनहं शूरो वीरश्च हनिष्ये, किमत्र मन्दधीभिर्दुर्बलैः परिकल्पितेनादृष्टपरिकरेण । तथा च ईश्वरोऽहम्— स्वाधीनोऽहम्, अन्येषां चाहमेव नियन्ता । अहं भोगी— स्वत एवाहं भोगी, नादृष्टादिभिः । सिद्धोऽहम्— स्वतस्सिद्धोऽहम्, न कस्माच्चिददृष्टादेः । तथा स्वत एव बलवान्; स्वत एव सुखी ॥ १४ ॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥

अहं स्वतश्चाढ्योऽस्मि; [अभिजनवानस्मि— स्वत एवोत्तमकुले प्रसूतोऽस्मि ;] अस्मिन् लोके मया सदृशः कोऽन्यस्स्वसामर्थ्यलब्धसर्वविभवो विद्यते ? अहं स्वयमेव यक्ष्ये, दास्यामि, मोदिष्ये इत्यज्ञानविमोहिताः— ईश्वरानुग्रहनिरपेक्षेण स्वेनैव यागदानादिकं कर्तुं शक्यमित्यज्ञानविमोहिता मन्यन्ते ॥ १५ ॥

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६ ॥

अदृष्टेश्वरादिसहकारमृते स्वेनैव सर्वं कर्तुं शक्यमिति कृत्वा एवं कुर्याम्, तच्च कुर्याम्; अन्यच्च कुर्यामित्यनेकचित्तविभ्रान्ताः, एवंरूपेण मोहजालेन समावृताः, कामभोगेषु प्रकर्षेण सक्ताः, मध्ये मृताः अशुचौ नरके पतन्ति ॥ १६ ॥

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मनैव संभाविताः, आत्मनैवात्मानं संभावयन्तीत्यर्थः । स्तब्धाः— परिपूर्णंमन्यमाना न किंचित्कुर्वाणाः । कथम् ? धनमानमदान्विताः— धनेन विद्याभिजनाभिमानेन च जनितमदान्विताः, नामयज्ञैः— नामप्रयोजनैः, यष्टेतिनाममात्रप्रयोजनैर्यज्ञैः यजन्ते । तदपि दम्भेन हेतुना यष्टृत्वख्यापनाय, अविधिपूर्वकम्— अयथाचोदनं यजन्ते ॥ १७ ॥

ते चेदृग्भूता यजन्त इत्याह—

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥

अनन्यापेक्षोऽहमेव सर्वं करोमीत्येवंरूपमहंकारमाश्रिताः, तथा सर्वस्य करणे मद्बलमेव पर्याप्तमिति च बलम्, अतो मत्सदृशो न कश्चिदस्तीति च दर्पम्, एवंभूतस्य मम काममात्रेण सर्वं संपत्स्यत इति कामम्, मम ये अनिष्टकारिणस्तान् सर्वान् हनिष्यामीति च क्रोधम्, एवमेतान् संश्रिताः स्वदेहेषु परदेहेषु चावस्थितं सर्वस्य कारयितारं पुरुषोत्तमं मामभ्यसूयकाः— प्रद्विषन्तः, कुयुक्तिभिर्मयि स्थितौ दोषमाविष्कुर्वन्तो मामसहमाना अहंकारादिकान् संश्रिता यागादिकं सर्वं क्रियाजातं कुर्वत इत्यर्थः ॥ १८ ॥

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

य एवं मां द्विषन्ति, तान् क्रूरान् नराधमानशुभानहमजस्रं संसारेषु जन्मजरामरणादिरूपेण परिवर्तमानेषु संतानेषु, तत्राप्यासुरीष्वेव योनिषु क्षिपामि— मदानुकूल्यप्रत्यनीकेष्वेव जन्मसु क्षिपामि ; तत्तज्जन्मप्राप्त्यनुगुणप्रवृत्तिहेतुभूतबुद्धिषु क्रूरास्वहमेव संयोजयामीत्यर्थः ॥ १९ ॥

आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

मदानुकूल्यप्रत्यनीकजन्मापन्नाः पुनरपि जन्मनिजन्मनि मूढाः मद्विपरीतज्ञाना मामप्राप्यैव— अस्ति भगवान् सर्वेश्वरो वासुदेव इति ज्ञानमप्राप्य ततस्ततो जन्मनोऽधमामेव गतिं यान्ति ॥ २० ॥

अस्यासुरस्वभावस्यात्मनाशस्य मूलहेतुमाह—

त्रिविधं नरकस्यैतद् द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्य[ज]जेत् ॥ २१ ॥

अस्यासुरस्वभावरूपस्य नरकस्यैतत् त्रिविधं द्वारम्, तच्चात्मनो नाशनम् : कामः क्रोधो लोभ इति । त्रयाणां स्वरूपं पूर्वमेव व्याख्यातम् । द्वारम्— मार्गो हेतुरित्यर्थः । तस्मादेतत्त्रयं त्य[ज]जेत् ; तस्मात्— अतिघोरनरकहेतुत्वात् कामक्रोधलोभानाम्, एतत्त्रितयं दूरतः परित्य[ज]जेत् ॥ २१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनश्श्रेयस्ततो याति परां गतिम्॥ २२॥

एतैः— कामक्रोधलोभैः तमोद्वारैः - मद्विपरीतज्ञानहेतुभिः विमुक्तो नरः आत्मनः श्रेय आचरति— लब्धमद्विषयज्ञानो मदानुकूल्ये प्रयतते ; ततो मामेव परां गतिं याति ॥ २२ ॥

शास्त्रानादरोऽस्य नरकस्य प्रधानहेतुरित्याह—

यश्शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥ २३॥

शास्त्रं वेदाः, विधिरनुशासनम्, वेदाख्यं मदनुशासनमुत्सृज्य यः कामकारतो वर्तते— स्वच्छन्दानुगुणमार्गेण वर्तते, न स सिद्धिमवाप्नोति– न काममप्यामुष्मिकीं सिद्धिमवाप्नोति ; न सुखं किंचिदवाप्नोति ; न परां गतिं– कुतः परां गतिं प्राप्नोतीत्यर्थः ॥ २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ २४॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः ॥

तस्मात्कार्याकार्यव्यवस्थितौ— उपादेयानुपादेयव्यवस्थायां शास्त्रमेव तव प्रमाणम्— धर्मशास्त्रेतिहासपुराणाद्युपबृंहिता वेदाः यदेव पुरुषोत्तमाख्यं परं तत्त्वं तत्प्रीणनरूपं तत्प्राप्त्युपायभूतं च कर्मावबोधयन्ति, तच्छास्त्रविधानोक्तं तत्त्वं कर्म च ज्ञात्वा– यथावदन्यूनातिरिक्तं विज्ञाय, कर्तुं त्वमर्हसि– तदेवोपादातुमर्हसि ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये षोडशोऽध्यायः ॥ १६॥

॥ अथ सप्तदशोऽध्यायः ॥ १७॥

दैवासुरविभागोक्तिमुखेन प्राप्यतत्त्वज्ञानं तत्प्राप्त्युपायज्ञानं च वेदैकमूलमित्युक्तम्। इदानीमशास्त्रविहितस्यासुरत्वेनाफलत्वम्, शास्त्रविहितस्य च गुणतस्त्रैविध्यम्, शास्त्रसिद्धस्य लक्षणं चोच्यते। तत्राशास्त्रविहितस्य निष्फलत्वमजानन् अशास्त्रविहिते श्रद्धासंयुक्ते यागादौ सत्त्वादिनिमित्तफलभेदबुभुत्सया अर्जुनः पृच्छति—

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्जुन उवाच—

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥ १॥

शास्त्रविधिमुत्सृज्य श्रद्धयाऽन्विता ये यजन्ते, तेषां निष्ठा का? किं सत्त्वम्? आहोस्विद्रजः? अथ तमः? निष्ठा— स्थितिः; स्थीयतेऽस्मिन्निति स्थितिः, सत्त्वादिरेव निष्ठेत्युच्यते। तेषां किं सत्त्वे स्थितिः, किं वा रजसि, किं वा तमसीत्यर्थः॥ १॥

एवं पृष्टो भगवानशास्त्रविहितश्रद्धायास्तत्पूर्वकस्य च यागादेर्निष्फलत्वं हृदि निधाय शास्त्रीयस्यैव यागादेर्गुणतस्त्रैविध्यं प्रतिपादयितुं शास्त्रीयश्रद्धायाः त्रैविध्यं तावदाह—

श्रीभगवानुवाच—

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥ २॥

सर्वेषां देहिनां श्रद्धा त्रिविधा भवति। सा च स्वभावजा— स्वभावः स्वासाधारणो भावः, प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः; यत्र रुचिस्तत्र श्रद्धा जायते। श्रद्धा हि, स्वाभिमतं साधयत्येतदिति विश्वासपूर्विका साधने त्वरा। वासना रुचिश्च श्रद्धा चात्मधर्मा गुणसंसर्गजाः; तेषामात्मधर्माणां वासनादीनां जनकाः देहेन्द्रियान्तःकरणविषयगता धर्माः कार्यैकनिरूपणीयाः सत्त्वादयो गुणाः— सत्त्वादिगुणयुक्तदेहाद्यनुभवजा इत्यर्थः॥ ततश्चेयं श्रद्धा सात्त्विकी राजसी तामसी चेति त्रिविधा। तामिमां श्रद्धां शृणु; सा श्रद्धा यत्स्वभावा, तं स्वभावं शृण्वित्यर्थः॥ २॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धस्स एव सः॥ ३॥

सत्त्वम्— अन्तःकरणम, सर्वस्य पुरुषस्यान्तःकरणानुरूपा श्रद्धा भवति; अन्तःकरणं यादृशगुणयुक्तम्, तद्विषया श्रद्धा जायत इत्यर्थः। सत्त्वशब्दः पूर्वोक्तानां देहेन्द्रियादीनां प्रदर्शनार्थः। श्रद्धामयोऽयं पुरुषः; श्रद्धामयः— श्रद्धापरिणामः। यो यच्छ्रद्धः— यः पुरुषो यादृश्या श्रद्धया युक्तः, स एव सः— स तादृशश्रद्धापरिणामः। पुण्यकर्मविषये श्रद्धायुक्तश्चेत्, पुण्यकर्मफलसंयुक्तो भवतीति श्रद्धाप्रधानः फलसंयोग इत्युक्तं भवति॥ ३॥

तदेव विवृणोति—

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥ ४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्त्वगुणप्रचुराः सात्त्विक्या श्रद्धया युक्ता देवान् यजन्ते। दुःखासंभिन्नोत्कृष्टसुखहेतुभूतदेवयागविषया श्रद्धा सात्त्विकीत्युक्तं भवति। राजसा यक्षरक्षांसि यजन्ते। अन्ये तु तामसा जनाः प्रेतान् भूतगणान् यजन्ते। दुःखसंभिन्नाल्पसुखजननी राजसी श्रद्धा ; दुःखप्रायात्यल्पसुखजननी तामसीत्यर्थः ॥ ४ ॥

एवं शास्त्रीयेष्वेव यागादिषु श्रद्धायुक्तेषु गुणतः फलविशेषः, अशास्त्रीयेषु तपोयागप्रभृतिषु मदनुशासनविपरीतत्वेन न कश्चिदपि सुखलवः, अपि त्वनर्थ एवेति हृदि निहितं व्यञ्जयन्नाह—

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः। दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥ ५॥
कर्शयन्तश्शरीरस्थं भूतग्राममचेतसः। मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान्॥ ६॥

अशास्त्रविहितमतिघोरमपि तपो ये जनाः तप्यन्ते। प्रदर्शनार्थमिदम्, अशास्त्रविहितं बह्वायासं यागादिकं ये कुर्वते, दम्भाहंकारसंयुक्ताः कामरागबलान्विताः शरीरस्थं पृथिव्यादिभूतसमूहं कर्शयन्तः, मदंशभूतं जीवं चान्तश्शरीरस्थं कर्शयन्तो ये तप्यन्ते, यागादिकं च कुर्वते ; तानासुरनिश्चयान्विद्धि। असुराणां निश्चय आसुरो निश्चयः ; असुरा हि मदाज्ञाविपरीतकारिणः ; मदाज्ञाविपरीतकारित्वात्तेषां सुखलवसंबन्धो न विद्यते ; अपित्वनर्थव्राते पतन्तीति पूर्वमेवोक्तं * पतन्ति नरकेऽशुचौ इति ॥ ५–६ ॥

अथ प्रकृतमेव शास्त्रीयेषु यज्ञादिषु गुणतो विशेषं प्रपञ्चयति। तत्राहारमूलत्वात्सत्त्वादिवृद्धेराहारत्रैविध्यं प्रथममुच्यते। * अन्नमयं हि सोम्य मनः, * आहारशुद्धौ सत्त्वशुद्धिः, इति हि श्रूयते।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु॥ ७॥

आहारोऽपि सर्वस्य प्राणिजातस्य सत्त्वादिगुणत्रयान्वयेन त्रिविधः प्रियो भवति। तथैव यज्ञोऽपि त्रिविधः, तथा तपो दानं च। तेषां भेदमिमं श्रृणु— तेषामाहारयज्ञतपोदानानां सत्त्वादिभेदेनेममुच्यमानं भेदं श्रृणु ॥ ७ ॥

आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः॥ ८॥

सत्त्वगुणोपेतस्य सत्त्वमया आहाराः प्रिया भवन्ति। सत्त्वमयाश्चाहारा आयुर्विवर्धनाः, पुनरपि सत्त्वस्य विवर्धनाः। सत्त्वमन्तःकरणम्, अन्तःकरणकार्यं ज्ञानमिह सत्त्वशब्देनोच्यते। * सत्त्वात्संजायते ज्ञानम्, इति सत्त्वस्य ज्ञानविवृद्धिहेतुत्वात्, आहारोऽपि सत्त्वमयो ज्ञानविवृद्धिहेतुः। तथा बलारोग्ययोरपि विवर्धनाः। सुखप्रीत्योरपि विवर्धनाः— परिणामकाले स्वयमेव सुखस्य विवर्धनाः। तथा प्रीतिहेतुभूतकर्मारम्भद्वारेण

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रीतिवर्धनाः। रस्याः— मधुररसोपेताः। स्निग्धाः— स्नेहयुक्ताः। स्थिराः— स्थिरपरिणामाः। हृद्याः— रमणीयवेषाः। एवंविधास्सत्त्वमया आहारास्सात्त्विकस्य पुरुषस्य प्रियाः॥ ८॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥ ९॥

कटुरसाः, अम्लरसाः, लवणोत्कटाः, अत्युष्णाः, अतितीक्ष्णाः, रूक्षाः, विदाहिनश्चेति कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः; अतिशैत्यातितैक्ष्ण्यादिना दुरुपयोगास्तीक्ष्णाः; शोषकरा रूक्षाः; तापकरा विदाहिनः। एवंविधा आहारा राजसस्येष्टाः। ते च रजोमयत्वाद्दुःखशोकामयवर्धनाः रजोवर्धनाश्च॥ ९॥

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥ १०॥

यातयामम्— चिरकालावस्थितम्, गतरसम्— त्यक्तस्वाभाविकरसम्, पूति— दुर्गन्धोपेतम्, पर्युषितम्— कालातिपत्त्या रसान्तरापन्नम्, उच्छिष्टम्— गुर्वादिभ्योऽन्येषां भुक्तशिष्टम्, अमेध्यम्— अयज्ञार्हम्, अयज्ञशिष्टमित्यर्थः; एवंविधं तमोमयं भोजनं तामसप्रियं भवति। भुज्यत इत्याहार एव भोजनम्। पुनश्च तमसो वर्धनम्। अतो हितैषिभिस्सत्त्वविवृद्धये सात्त्विकाहार एव सेव्यः॥ १०॥

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनस्समाधाय स सात्त्विकः॥ ११॥

फलाकाङ्क्षारहितैः पुरुषैः विधिदृष्टः— शास्त्रदृष्टः मन्त्रद्रव्यक्रियादिभिर्युक्तः, यष्टव्यमेवेति— भगवदाराधनत्वेन स्वयंप्रयोजनतया यष्टव्यमिति मनस्समाधाय यो यज्ञ इज्यते, स सात्त्विकः॥ ११॥

अभिसन्धाय तु फलं दम्भार्थमपि चैव यः।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥

फलाभिसन्धियुक्तैर्दम्भगर्भो यशःफलश्च यो यज्ञ इज्यते, तं यज्ञं राजसं विद्धि॥ १२॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥ १३॥

विधिहीनम्— ब्राह्मणोक्तिहीनम्, सदाचारयुक्तैर्विद्वद्भिर्ब्राह्मणैर्यजस्वेत्युक्तिहीनमित्यर्थः; असृष्टान्नम्— अचोदितद्रव्यम्, मन्त्रहीनमदक्षिणं श्रद्धाविरहितं च यज्ञं तामसं परिचक्षते॥ १३॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ तपसो गुणतस्त्रैविध्यं वक्तुं तस्य शरीरवाङ्मनोनिष्पाद्यतया स्वरूपभेदं तावदाह—

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १४॥

देवद्विजगुरुप्राज्ञानां पूजनम्, शौचम्— तीर्थस्नानादिकम्, आर्जवम्— यथामनश्शारीरवृत्तम्, ब्रह्मचर्यम्— योषित्सु भोग्यताबुद्धियुक्तेक्षणादिरहितत्वम्, अहिंसा— अप्राणिपीडा; एतच्छारीरं तप उच्यते॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ १५॥

परेषामनुद्वेगकरं सत्यं प्रियहितं च यद्वाक्यं स्वाध्यायाभ्यसनं चेत्येतद्वाङ्मयं तप उच्यते॥ १५॥

मनःप्रसादस्सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥ १६॥

मनःप्रसादः— मनसः क्रोधादिरहितत्वम्, सौम्यत्वम्—मनसः परेषामभ्युदयप्रावण्यम्, मौनं— मनसा वाक्प्रवृत्तिनियमनम्, आत्मविनिग्रहः— मनोवृत्तेर्ध्येयविषयेऽवस्थापनम्, भावसंशुद्धिः— आत्मव्यतिरिक्त-विषयचिन्तारहितत्वम्; एतन्मानसं तपः॥ १६॥

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैस्सात्त्विकं परिचक्षते॥ १७॥

अफलाकाङ्क्षिभिः— फलाकाङ्क्षारहितैः, युक्तैः— परमपुरुषाराधनरूपमिदमिति चिन्तायुक्तैः नरैः परमा श्रद्धया यत् त्रिविधं तपः कायवाङ्मनोभिस्तप्तम्, तत्सात्त्विकं परिचक्षते॥ १७॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ १८॥

मनसा आदरस्सत्कारः, वाचा प्रशंसा मानः, शारीरो नमस्कारादिः पूजा। फलाभिसन्धिपूर्वकं सत्काराद्यर्थं च दम्भेन हेतुना यत्तपः क्रियते, तदिह राजसं प्रोक्तम्; स्वर्गादिफलसाधनत्वेनास्थिरत्वात् चलमध्रुवम्। चलत्वम्— पातभयेन चलनहेतुत्वम्, अध्रुवत्वम्— क्षयिष्णुत्वम्॥ १८॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥ १९॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मूढाः-- अविवेकिनः, मूढग्राहेण— मूढैः कृतेनाभिनिवेशेन आत्मनश्शक्त्यादिकमपरीक्ष्य आत्मपीडया यत्तपः क्रियते, परस्योत्सादनार्थं च यत्क्रियते, तत्तामसमुदाहृतम् ॥ १९ ॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

फलाभिसन्धिरहितं दातव्यमिति देशे काले पात्रे चानुपकारिणे यद्दानं दीयते, तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१ ॥

प्रत्युपकारकटाक्षगर्भं फलमुद्दिश्य च परिक्लिष्टम्— अकल्याणद्रव्यकं यद्दानं दीयते, तद्राजसमुदाहृतम् ॥ २१ ॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

अदेशकाले अपात्रेभ्यश्च यद्दानं दीयते, असत्कृतम्— पादप्रक्षालनादिगौरवरहितम्, अवज्ञातं— सावज्ञम्, अनुपचारयुक्तं यद्दीयते, तत्तामसमुदाहृतम् ॥ २२ ॥

एवं वैदिकानां यज्ञतपोदानानां सत्त्वादिगुणभेदेन भेद उक्तः, इदानीं तस्यैव वैदिकस्य यज्ञादेः प्रणवसंयोगेन तत्सच्छब्दव्यपदेश्यतया च लक्षणमुच्यते—

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

ओं तत् सत् इति त्रिविधोऽयं निर्देशः— शब्दो ब्रह्मणः स्मृतः— ब्रह्मणोऽन्वयी भवति। ब्रह्म च वेदः; [ब्रह्म]वेदशब्देन वैदिकं कर्मोच्यते; वैदिकम्— यज्ञादिकम्; यज्ञादिकं कर्म ओं तत्सदिति शब्दान्वितं भवति। ओमितिशब्दस्यान्वयो वैदिककर्माङ्गत्वेन प्रयोगादौ प्रयुज्यमानतया; तत्सदितिशब्दयोरन्वयः पूज्यत्वाय वाचकतया। तेन त्रिविधेन शब्देनान्विता ब्राह्मणा वेदान्वयिनस्त्रैवर्णिकाः वेदाश्च यज्ञाश्च पुरा विहिताः— पुरा मयैव निर्मिता इत्यर्थः ॥ २३ ॥

त्रयाणाम् ओं तत्सदिति शब्दानामन्वयप्रकारो वर्ण्यते; प्रथममोमितिशब्दस्यान्वयप्रकारमाह—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्तास्सततं ब्रह्मवादिनाम् ॥ २४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात् ब्रह्मवादिनाम्— वेदवादिनां त्रैवर्णिकानां, यज्ञदानतपःक्रियाः विधानोक्ताः— वेदविधानोक्ताः आदावोमित्युदाहृत्य सततम्— सर्वदा, प्रवर्तन्ते। वेदाश्चोमित्युदाहृत्यारभ्यन्ते। एवं वेदानां वैदिकानां च यज्ञादीनां कर्मणामोमितिशब्दान्वयो वर्णितः। ओमितिशब्दान्वितवेदधारणात्तदन्वितयज्ञादिकर्मकरणाच्च ब्राह्मण-शब्दनिर्दिष्टानां त्रैवर्णिकानामप्योमितिशब्दान्वयो वर्णितः॥ २४॥

अथैतेषां तदितिशब्दान्वयप्रकारमाह—

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥

फलमनभिसन्धाय वेदाध्ययनयज्ञतपोदानक्रियाः मोक्षकाङ्क्षिभिस्त्रैवर्णिकैर्याः क्रियन्ते, ताः ब्रह्मप्राप्ति-साधनतया ब्रह्मवाचिना तदितिशब्देन निर्देश्याः; * स वः कः किं यत्तत्पदमनुत्तमम्, इति तच्छब्दो हि ब्रह्मवाची प्रसिद्धः। एवं वेदाध्ययनयज्ञादीनां मोक्षसाधनभूतानां तच्छब्दनिर्देश्यतया तदितिशब्दान्वय उक्तः। त्रैवर्णिकानामपि तथाविधवेदाध्ययनाद्यनुष्ठानादेव तच्छब्दान्वय उपपन्नः॥ २५॥

अथैषां सच्छब्दान्वयप्रकारं वक्तुं लोके सच्छब्दस्य व्युत्पत्तिप्रकारमाह—

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥

सद्भावे— विद्यमानतायां, साधुभावे— कल्याणभावे च सर्ववस्तुषु सदित्येतत्पदं प्रयुज्यते लोक-वेदयोः। तथा केनचित्पुरुषेणानुष्ठिते लौकिके प्रशस्ते— कल्याणे कर्मणि सत्कर्मेदमिति सच्छब्दो युज्यते— प्रयुज्यत इत्यर्थः॥ २६॥

यज्ञे तपसि दाने च स्थितिस्सदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥ २७॥

अतो वैदिकानां त्रैवर्णिकानां यज्ञे तपसि दाने च स्थितिः कल्याणतया सदित्युच्यते। कर्म च तदर्थीयम्— त्रैवर्णिकार्थीयं यज्ञदानादिकं सदित्येवाभिधीयते। तस्माद्वेदा वैदिकानि कर्माणि ब्राह्मणशब्द-निर्दिष्टास्त्रैवर्णिकाश्च ओं तत्सदितिशब्दान्वयरूपलक्षणेन अवेदेभ्यश्चावैदिकेभ्यश्च व्यावृत्ता वेदितव्याः॥ २७॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ २८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अश्रद्धया कृतं शास्त्रीयमपि होमादिकमसदित्युच्यते। कुतः? न च तत्प्रेत्य, नो इह— न मोक्षाय, न सांसारिकाय च फलायेति ॥ २८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये सप्तदशोऽध्यायः ॥ १७ ॥

॥ अथ अष्टादशोऽध्यायः ॥ १८ ॥

अतीतेनाध्यायद्वयेन अभ्युदयनिश्श्रेयससाधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म, नान्यत्; वैदिकस्य च कर्मणस्सामान्यलक्षणं प्रणवान्वयः; तत्र मोक्षाभ्युदयसाधनयोर्भेदः तत्सच्छब्दनिर्देश्यत्वेन; मोक्षसाधनं च कर्म फलाभिसन्धिरहितं यज्ञादिकम्: तदारम्भश्च सत्त्वोद्रेकाद्भवति; सत्त्ववृद्धिश्च सात्त्विकाहारसेवया इत्युक्तम्। अनन्तरं मोक्षसाधनतया निर्दिष्टयोस्त्यागसंन्यासयोरैक्यम्, त्यागस्य च स्वरूपम्, भगवति सर्वेश्वरे च सर्वकर्मणां कर्तृत्वानुसन्धानम्, सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणस्यावश्योपादेयत्वम्, स्ववर्णोचितानां कर्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारः, कृत्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोग इत्येते प्रतिपाद्यन्ते। तत्र तावत्त्यागसंन्यासयोः पृथक्त्वैकत्वनिर्णयाय स्वरूपनिर्णयाय चार्जुनः पृच्छति—

अर्जुन उवाच—

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

त्यागसंन्यासौ हि मोक्षसाधनतया विहितौ— * न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः....वेदान्तविज्ञानसुनिश्चितार्थास्संन्यासयोगाद्यतयश्शुद्धसत्त्वाः, ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे इत्यादिषु। अस्य संन्यासस्य त्यागस्य च तत्त्वम्— याथात्म्यं पृथग्वेदितुमिच्छामि। अयमभिप्रायः— किमेतौ संन्यासत्यागशब्दौ पृथगर्थौ, उतैकार्थावेव? यदा पृथगर्थौ, तदा अनयोः पृथक्त्वेन स्वरूपं वेदितुमिच्छामि; एकत्वेऽपि तस्य स्वरूपं वक्तव्यमिति ॥ १ ॥

अथानयोरेकमेव स्वरूपम्, तच्चेदृशमिति निर्णेतुं वादिविप्रतिपत्तिं दर्शयन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

केचन विद्वांसः काम्यानां कर्मणां न्यासं स्वरूपत्यागं संन्यासं विदुः। केचिच्च विचक्षणाः नित्यानां नैमित्तिकानां काम्यानां च सर्वेषां कर्मणां फलत्याग एव मोक्षशास्त्रेषु त्यागशब्दार्थ इति प्राहुः। तत्र शास्त्रीय-त्यागः काम्यकर्मस्वरूपविषयः, सर्वकर्मफलविषय इति विवादं प्रदर्शयन् एकत्र संन्यासशब्दमितरत्र त्यागशब्दं प्रयुक्तवान्, अतस्त्यागसंन्यासशब्दयोरेकार्थत्वमङ्गीकृतमिति ज्ञायते। तथा * निश्चयं शृणु मे तत्र त्यागे भरतसत्तम इति त्यागशब्देनैव निर्णयवचनात् * नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागः तामसः परिकीर्तितः॥ * अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥ इति परस्परपर्यायतादर्शनाच्च तयोरेकार्थत्वमङ्गीकृतमिति निश्चीयते॥ २॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ ३॥

एके— मनीषिणः कापिला वैदिकाश्च तन्मतानुसारिणो रागादिदोषवद्बन्धकत्वात् सर्वं यज्ञादिकं कर्म मुमुक्षुणा त्याज्यमिति प्राहुः; अपरे पण्डिताः यज्ञादिकं कर्म न त्याज्यमिति प्राहुः॥ ३॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः॥ ४॥

तत्र– एवं वादिविप्रतिपन्ने त्यागे त्यागविषयं निश्चयं मत्तश्शृणु; त्यागः क्रियमाणेष्वेव वैदिकेषु कर्मसु फलविषयतया, कर्मविषयतया, कर्तृत्वविषयतया च पूर्वमेव हि मया त्रिविधस्संप्रकीर्तितः— * मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा। निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥ इति। कर्मजन्यं स्वर्गादिकं फलं मम न स्यादिति फलत्यागः; मदीयफलसाधनतया मदीयमिदं कर्मेति कर्मणि ममतायाः परित्यागः कर्म-विषयस्त्यागः; सर्वेश्वरे कर्तृत्वानुसंधानेनात्मनः कर्तृतात्यागः कर्तृत्वविषयस्त्यागः॥ ४॥

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ ५॥

यज्ञदानतपःप्रभृति वैदिकं कर्म मुमुक्षुणा न कदाचिदपि त्याज्यम्, अपि त्वाप्रयाणा दहरहः कार्यमेव॥ कुतः? यज्ञदानतपःप्रभृतीनि वर्णाश्रमसंबन्धीनि कर्माणि मनीषिणां— मननशीलानां पावनानि। मननमुपासनम्; मुमुक्षूणां यावज्जीवमुपासनं कुर्वतामुपासननिष्पत्तिविरोधिप्राचीनकर्मविनाशनानी-त्यर्थः॥ ५॥

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ ६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यस्मान्मनीषिणां यज्ञदानतपःप्रभृतीति पावनानि, तस्मादुपासनवदेतान्यपि यज्ञादिकर्माणि मदाराधनरूपाणि, सङ्गम्— कर्मणि ममतां फलानि च त्यक्त्वा, अहरहराप्रयाणादुपासननिर्वृत्तये मुमुक्षुणा कर्तव्यानीति मम निश्चितमुत्तमं मतम् ॥ ६ ॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥

नियतस्य— नित्यनैमित्तिकस्य महायज्ञादेः कर्मणः, संन्यासः— त्यागो नोपपद्यते, * शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः इति शरीरयात्राया एवासिद्धेः ; शरीरयात्रा हि यज्ञशिष्टाशनेन निर्वर्त्यमाना सम्यग्ज्ञानाय प्रभवति ; अन्यथा * ते त्वघं भुञ्जते पापाः इत्ययज्ञशिष्टाघरूपाशनाप्यायनं मनसो विपरीतज्ञानाय भवति। * अन्नमयं हि सोम्य मनः इत्यन्नेन हि मन आप्यायते ; * आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ॥ इति ब्रह्मसाक्षात्काररूपं ज्ञानमाहारशुद्ध्यायत्तं श्रूयते। तस्मान्महायज्ञादिनित्यनैमित्तिकं कर्म आप्रयाणात् ब्रह्मज्ञानायैवोपादेयमिति तस्य त्यागो नोपपद्यते। एवं ज्ञानोत्पादिनः कर्मणो बन्धकत्वमोहात्परित्यागस्तामसः परिकीर्तितः। तमोमूलस्त्यागस्तामसः, तमःकार्याज्ञानमूलत्वेन त्यागस्य तमोमूलत्वम्। तमो ह्यज्ञानस्य मूलं * प्रमादमोहौ तमसो भवतोऽज्ञानमेव च इत्यत्रोक्तम्। अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानम् ; तथा च वक्ष्यते— * अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता। सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी ॥ इति। अतो नित्यनैमित्तिकादेः कर्मणस्त्यागो विपरीतज्ञानमूल एवेत्यर्थः ॥ ७ ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

यद्यपि परंपरया मोक्षसाधनभूतं कर्म ; तथाऽपि दुःखात्मकद्रव्यार्जनसाध्यत्वात् बह्वायासरूपतया कायक्लेशकरत्वाच्च मनसोऽवसादकरमिति तद्भीत्या योगनिष्पत्तये ज्ञानाभ्यास एव यतनीय इति यो महायज्ञाद्याश्रमकर्म परित्यजेत्, स राजसं— रजोमूलं त्यागं कृत्वा तदयथावस्थितशास्त्रार्थरूपमिति ज्ञानोत्पत्तिरूपं त्यागफलं न लभेत ; * अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी इति हि वक्ष्यते। नहि कर्म दृष्टद्वारेण मनःप्रसादहेतुः, अपि तु भगवत्प्रसादद्वारेण ॥ ८ ॥

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ॥ ९ ॥

नित्यनैमित्तिकमहायज्ञादिवर्णाश्रमविहितं कर्म मदाराधनरूपतया कार्यं— स्वयंप्रयोजनमिति मत्वा सङ्गम्— कर्मणि ममतां फलं च त्यक्त्वा यत्क्रियते, स त्यागस्सात्त्विको मतः— स सत्त्वमूलः ; यथावस्थितशास्त्रार्थज्ञानमूल इत्यर्थः। सत्त्वं हि यथावस्थितवस्तुज्ञानमुत्पादयतीत्युक्तं * सत्त्वात्संजायते ज्ञानम् इति,

Digitization by Arya Samaj Charitable Foundation, Chennai

वक्ष्यते च * प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ॥ इति ॥ ९ ॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः ॥ १० ॥

एवं सत्त्वसमाविष्टो मेधावी– यथावस्थिततत्त्वज्ञानः, तत एव च्छिन्नसंशयः, कर्मणि सङ्गफलकर्तृत्वत्यागी, न द्वेष्ट्यकुशलं कर्म, कुशले च कर्मणि नानुषज्जते। अकुशलं कर्मानिष्टफलम्, कुशलं च कर्मेष्टरूपस्वर्गपुत्रपश्वन्नाद्यादिफलम्, सर्वस्मिन् कर्मणि ममतारहितत्वात्, त्यक्तब्रह्मव्यतिरिक्तसर्वफलत्वात्, त्यक्तकर्तृत्वाच्च तयोः क्रियमाणयोः प्रीतिद्वेषौ न करोति। अनिष्टफलं पापं कर्मात्र प्रामादिकमभिप्रेतम्, * नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ इति दुश्चरिताविरतेर्ज्ञानोत्पत्तिविरोधित्वश्रवणात्। अतः कर्मणि कर्तृत्वसङ्गफलानां त्यागश्शास्त्रीयत्यागः, न कर्मस्वरूपत्यागः ॥ १० ॥

तदाह—

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

नहि देहभृता— ध्रियमाणशरीरेण कर्माण्यशेषतस्त्यक्तुं शक्यम्, देहधारणार्थानामशनपानादीनां तदनुबन्धिनां च कर्मणामवर्जनीयत्वात्। तदर्थं च महायज्ञाद्यनुष्ठानमवर्जनीयम्। यस्तु तेषु महायज्ञादिकर्मसु फलत्यागी, स एव * त्यागेनैके अमृतत्वमानशुः इत्यादिशास्त्रेषु त्यागीत्यभिधीयते, फलत्यागीति प्रदर्शनार्थः, फलकर्तृत्वकर्मसङ्गानां त्यागीति, * त्रिविधस्संप्रकीर्तितः इति प्रक्रमात् ॥ ११ ॥

ननु कर्माण्यग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च स्वर्गादिफलसंबन्धितया शास्त्रैर्विधीयन्ते; नित्यनैमित्तिकानामपि * प्राजापत्यं गृहस्थानाम् इत्यादिफलसंबन्धितयैव हि चोदना। अतस्त(त्त)फलसाधनस्वभावतयाऽवगतानां कर्मणामनुष्ठाने बीजावापादीनामिवानभिसंहितफलस्यापीष्टानिष्टरूपफलसंबन्धोऽवर्जनीयः, अतो मोक्षविरोधिफलत्वेन मुमुक्षुणा न कर्मानुष्ठेयमित्यत उत्तरमाह—

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥

अनिष्टम्– नरकादिफलम्, इष्टम्— स्वर्गादि, मिश्रम्– अनिष्टसंभिन्नं पुत्रपश्वन्नाद्यादि: एतत्त्रिविधं कर्मणः फलम्, अत्यागिनाम्– कर्तृत्वममताफलत्यागरहितानां प्रेत्य भवति। प्रेत्य— कर्मानुष्ठानोत्तरकालमित्यर्थः। नतु संन्यासिनां क्वचित्— न तु कर्तृत्वादिपरित्यागिनां क्वचिदपि मोक्षविरोधिफलं भवति।

Digitization by Arya Samaj Charitable Foundation, Chennai

एतदुक्तं भवति— यद्यप्यग्निहोत्रमहायज्ञादीनि [नित्यान्येव] तान्येव ; तथाऽपि जीवनाधिकारकामाधिकारयोरिव मोक्षाधिकारे च विनियोगपृथक्त्वेन परिह्रियते। मोक्षविनियोगश्च * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन इत्यादिभिरिति। तदेवं क्रियमाणेष्वेव कर्मसु कर्तृत्वादिपरित्यागश्शास्त्रसिद्धस्संन्यासः, स एव च त्याग इत्युक्तः ॥ १२ ॥

इदानीं भगवति पुरुषोत्तमे अन्तर्यामिणि कर्तृत्वानुसंधानेन आत्मन्यकर्तृत्वानुसंधानप्रकारमाह, तत एव फलकर्मणोरपि ममतापरित्यागो भवतीति। परमपुरुषो हि स्वकीयेन जीवात्मना स्वकीयैश्च करणकलेबरप्राणैः स्वलीलाप्रयोजनाय कर्माण्यारभते, अतो जीवात्मगतं क्षुन्निवृत्त्यादिकमपि फलम्, तत्साधनभूतं च कर्म परमपुरुषस्यैव।

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

संख्या— बुद्धिः ; सांख्ये कृतान्ते— यथावस्थिततत्त्वविषयया वैदिक्या बुद्ध्या अनुसंहिते निर्णये, सर्वकर्मणां सिद्धये— उत्पत्तये, प्रोक्तानि पञ्चैतानि कारणानि निबोध मे— मम सकाशादनुसंधत्स्व। वैदिकी हि बुद्धिः शरीरेन्द्रियप्राणजीवात्मोपकरणं परमात्मानमेव कर्तारमवधारयति— * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः * अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा इत्यादिषु ॥ १३ ॥

तदिदमाह—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

न्याय्ये— शास्त्रसिद्धे, विपरीते— प्रतिषिद्धे वा सर्वस्मिन् कर्मणि शारीरे, वाचिके, मानसे च पञ्चैते हेतवः। अधिष्ठानम्— शरीरम् ; अधिष्ठीयते जीवात्मनेति महाभूतसंघातरूपं शरीरमधिष्ठानम्। तथा कर्ता— जीवात्मा ; अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं च— * ज्ञोऽत एव * कर्ता शास्त्रार्थवत्त्वात् इति च सूत्रोपपादितम्। करणं च पृथग्विधम्— वाक्पाणिपादादिपञ्चकं समनस्कं कर्मेन्द्रियम्, पृथग्विधम्— कर्मनिष्पत्तौ पृथग्व्यापारम्। विविधा च पृथक्चेष्टा— चेष्टाशब्देन पञ्चात्मा वायुरभिधीयते तद्वृत्तिवाचिना ; शरीरेन्द्रियधारणस्य प्राणापानादिभेदभिन्नस्य वायोः पञ्चात्मनो विविधा च चेष्टा— विविधा वृत्तिः। दैवं चैवात्र पञ्चमम्— अत्र— कर्महेतुकलापे दैवं पञ्चमम्— परमात्माऽन्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः। उक्तं हि * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च इति। वक्ष्यति च * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ इति। परमात्मायत्तं च जीवात्मनः कर्तृत्वम् * परात्तु तच्छ्रुतेः इत्युपपादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

तम्। नन्वेवं परमात्मायत्ते जीवात्मनः कर्तृत्वे जीवात्मा कर्मण्यनियोज्यो भवतीति विधिनिषेधशास्त्राण्यनर्थकानि स्युः। इदमपि चोद्यं सूत्रकारेणैव परिहृतं * कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः इति। एतदुक्तं भवति– परमात्मना दत्तैस्तदाधारैश्च करणकलेबरादिभिस्तदाहितशक्तिभिस्स्वयं च जीवात्मा तदाधारस्तदाहित-शक्तिस्सन् कर्मनिष्पत्तये स्वेच्छया करणाद्यधिष्ठानाकारं प्रयत्नं चारभते; तदन्तरवस्थितः परमात्मा स्वानुमति-दानेन तं प्रवर्तयतीति जीवस्यापि स्वबुद्ध्यैव प्रवृत्तिहेतुत्वमस्ति; यथा गुरुतरशिलामहीरुहादिचलनादिफल-प्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विधिनिषेधभाक्त्वं चेति ॥ १४–१५ ॥

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

एवं— वस्तुतः परमात्मानुमतिपूर्वके जीवात्मनः कर्तृत्वे सति, तत्र— कर्मणि, केवलमात्मानमेव कर्तारं यः पश्यति, स दुर्मतिः— विपरीतमतिः, अकृतबुद्धित्वात्— अनिष्पन्नयथावस्थितवस्तुबुद्धित्वात्, न पश्यति— न यथावस्थितं कर्तारं पश्यति ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १७ ॥

परमपुरुषकर्तृत्वानुसंधानेन यस्य भावः— कर्तृत्वविषयो मनोवृत्तिविशेषो, नाहंकृतः— नाहमभिमान-कृतः; अहं करोमीति ज्ञानं यस्य न विद्यत इत्यर्थः। बुद्धिर्यस्य न लिप्यते— अस्मिन् कर्मणि मम कर्तृत्वाभावा-देतत्फलं न मया संबध्यते, न च मदीयं कर्मेति यस्य बुद्धिर्जायत इत्यर्थः। स इमान् लोकान् युद्धे हत्वापि तान्न निहन्ति; न केवलं भीष्मादीनित्यर्थः। ततस्तेन युद्धाख्येन कर्मणा न निबध्यते— तत्फलं नानुभवती-त्यर्थः ॥ १७ ॥

सर्वमिदमकर्तृत्वाद्यनुसन्धानं सत्त्वगुणवृद्ध्यैव भवतीति सत्त्वस्योपादेयताज्ञापनाय कर्मणि सत्त्वादि-गुणकृतं वैषम्यं प्रपञ्चयिष्यन् कर्मचोदनाप्रकारं तावदाह—

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

ज्ञानम्– कर्तव्यकर्मविषयं ज्ञानम्, ज्ञेयं च– कर्तव्यं कर्म, परिज्ञाता– तस्य बोद्धेति त्रिविधा कर्मचोदना— बोधबो[ध्य]द्धव्यबोद्धृयुक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः। तत्र बोद्धव्यरूपं कर्म त्रिविधं संगृह्यते— करणं कर्म कर्तेति। करणम्— साधनभूतं द्रव्यादिकम्; कर्म यागादिकं; कर्ता– अनुष्ठातेति ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

कर्तव्यकर्मविषयं ज्ञानमनुष्ठीयमानं च कर्म तस्यानुष्ठाता च सत्त्वादिगुणभेदतस्त्रिधैव प्रोच्यते । गुणसंख्याने— गुणकार्यगणने, यथावच्छृणु तान्यपि— तानि गुणतो भिन्नानि ज्ञानादीनि यथावच्छृणु ॥ १९ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेण विभक्तेषु सर्वेषु भूतेषु— कर्माधिकारिषु, येन ज्ञानेनैकम्— आत्माख्यं भावं, तत्राप्यविभक्तम्— ब्राह्मणत्वाद्यनेकाकारेष्वपि भूतेषु सितदीर्घादिविभागवत्सु ज्ञानाकार आत्मनि विभागरहितम्, अव्ययं— व्ययस्वभावेष्वपि ब्राह्मणादिशरीरेष्वव्ययम्, अविकृतं फलादिसङ्गानर्हं च कर्माधिकारवेलायामीक्षते, तज्ज्ञानं सात्त्विकं विद्धि ॥ २० ॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

सर्वेषु भूतेषु— ब्राह्मणादिषु ब्राह्मणाद्याकारपृथक्त्वेनात्माख्यानपि भावान्नानाभूतान् ' सितदीर्घादिपृथक्त्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्माधिकारवेलायां यज्ज्ञानं वेत्ति, तज्ज्ञानं राजसं विद्धि ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहेतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

यत्तु— ज्ञानम्, एकस्मिन् कार्ये— एकस्मिन् कर्तव्ये कर्मणि प्रेतभूतगणाद्याराधनरूपे अत्यल्पफले कृत्स्नफलवत् सक्तम्, अहेतुकम्— वस्तुतस्त्वकृत्स्नफलवत्तया तथाविधसङ्गहेतुरहितम्, अतत्त्वार्थवत्— पूर्ववदेवात्मनि पृथक्त्वादियुक्ततया मिथ्याभूतार्थविषयम्, अत्यल्पफलं च प्रेतभूताद्याराधनविषयत्वादल्पं च, तज्ज्ञानं तामसमुदाहृतम् ॥ २२ ॥

एवं कर्तव्यकर्मविषयज्ञानस्याधिकारवेलायामधिकार्यंशेन गुणतस्त्रैविध्यमुक्त्वा अनुष्ठेयस्य कर्मणो गुणतस्त्रैविध्यमाह—

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नियतम्— स्ववर्णाश्रमोचितम्, सङ्गरहितम्— कर्तृत्वादिसङ्गरहितम्, अरागद्वेषतः कृतम्— कीर्तिरागादकीर्तिद्वेषाच्च न कृतम्, अदम्भेन कृतमित्यर्थः; अफलप्रेप्सुना— अफलाभिसन्धिना कार्यमित्येव कृतं यत्कर्म, तत्सात्त्विकमुच्यते ॥ २३ ॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

यत्तु पुनः कामेप्सुना— फलप्रेप्सुना साहंकारेण वा; वाशब्दश्चार्थे, कर्तृत्वाभिमानयुक्तेन च, बहुलायासं यत्कर्म क्रियते, तद्राजसम्— बहुलायासमिदं कर्म मयैव क्रियत इत्येवंरूपाभिमानयुक्तेन यत्कर्म क्रियते, तद्राजसमित्यर्थः ॥ २४ ॥

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥

कृते कर्मण्यनुबध्यमानं दुःखमनुबन्धः; क्षयः— कर्मणि क्रियमाणे अर्थविनाशः; हिंसा— तत्र प्राणिपीडा; पौरुषम्— आत्मनः कर्मसमापनसामर्थ्यम्; एतानि अनवेक्ष्य— अविमृश्य, मोहात्— परमपुरुषकर्तृत्वाज्ञानात् यत्कर्मारभ्यते, तत्तामसमुच्यते ॥ २५ ॥

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥

मुक्तसङ्गः— फलसङ्गरहितः, अनहंवादी— कर्तृत्वाभिमानरहितः, धृत्युत्साहसमन्वितः— आरब्धे कर्मणि यावत्कर्मसमाप्त्यवर्जनीयदुःखधारणं धृतिः, उत्साहः—उद्युक्तचेतस्त्वम्, ताभ्यां समन्वितः, सिद्ध्यसिद्ध्योर्निर्विकारः— युद्धादौ कर्मणि तदुपकरणभूतद्रव्यार्जनादिषु च सिद्ध्यसिद्ध्योरविकृतचित्तः कर्ता सात्त्विक उच्यते ॥ २६ ॥

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

रागी— यशोर्थी, कर्मफलप्रेप्सुः— कर्मफलार्थी; लुब्धः— कर्मापेक्षितद्रव्यव्ययस्वभावरहितः, हिंसात्मकः— परान् पीडयित्वा तैः कर्म कुर्वाणः, अशुचिः— कर्मापेक्षितशुद्धिरहितः, हर्षशोकान्वितः— युद्धादौ कर्मणि जयादिसिद्ध्यसिद्ध्योर्हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

अयुक्तः प्राकृतः स्तब्धश्शठो नैकृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अयुक्तः— शास्त्रीयकर्मायोग्यः, विकर्मस्थः प्राकृतः— अनधिगतविद्यः, स्तब्धः— अनारम्भशीलः, शठः— अभिचारादिकर्मरुचिः, नैकृतिकः— वञ्चनपरः, अलसः— आरब्धेष्वपि कर्मसु मन्दप्रवृत्तिः, विषादी— अतिमात्रावसादशीलः, दीर्घसूत्री— अभिचारादिकर्म कुर्वन् परेषु दीर्घकालवर्त्यनर्थपर्यालोचनशीलः, एवंभूतो यः कर्ता, स तामसः ॥ २८ ॥

एवं कर्तव्यकर्मविषयज्ञाने कर्तव्ये च कर्मणि अनुष्ठातरि च गुणतस्त्रैविध्यमुक्तम्; इदानीं सर्वतत्त्वसर्वपुरुषार्थनिश्चयरूपाया बुद्धेर्धृतेश्च गुणतस्त्रैविध्यमाह—

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥

बुद्धिः— विवेकपूर्वकं निश्चयरूपं ज्ञानम्, धृतिः— आरब्धायाः क्रियाया विघ्नोपनिपातेऽपि धारणम्, तयोस्सत्त्वादिगुणतस्त्रिविधं भेदं पृथक्त्वेन प्रोच्यमानं यथावच्छृणु ॥ २९ ॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ॥ ३० ॥

प्रवृत्तिः— अभ्युदयसाधनभूतो धर्मः, निवृत्तिः— मोक्षसाधनभूतः, तावुभौ यथावस्थितौ या बुद्धिर्वेत्ति; कार्याकार्ये— सर्ववर्णानां प्रवृत्तिनिवृत्तिधर्मयोरन्यतरनिष्ठानां देशकालावस्थाविशेषेषु, इदं कार्यम्, इदमकार्यमिति या वेत्ति: भयाभये— शास्त्रातिवृत्तिर्भयस्थानं, तदनुवृत्तिरभयस्थानम्, बन्धं मोक्षं च— संसारयाथात्म्यं तद्विगमयाथात्म्यं च या वेत्ति; सा सात्त्विकी बुद्धिः ॥ ३० ॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी ॥ ३१ ॥

यया पूर्वोक्तं द्विविधं धर्मं तद्विपरीतं च तन्निष्ठानां देशकालावस्थादिषु कार्यं चाकार्यं च यथावन्न जानाति, सा राजसी बुद्धिः ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी ॥ ३२ ॥

तामसी तु बुद्धिः तमसाऽऽवृता सती सर्वार्थान्विपरीतान्मन्यते । अधर्मं धर्मं, धर्मं चाधर्मं, सन्तं चार्थमसन्तम्, असन्तं चार्थं सन्तं, परं च तत्त्वमपरम्, अपरं च तत्त्वं परम् । एवं सर्वं विपरीतं मन्यत इत्यर्थः ॥ ३२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी॥ ३३॥

यया धृत्या योगेनाव्यभिचारिण्या मनःप्राणेन्द्रियाणां क्रियाः पुरुषो धारयते; योगः— मोक्षसाधनभूतं भगवदुपासनम्; योगेन प्रयोजनभूतेनाव्यभिचारिण्या योगोद्देशेन प्रवृत्तास्तत्साधनभूता मनःप्रभृतीनां क्रियाः यया धृत्या धारयते. सा सात्त्विकीत्यर्थः ॥ ३३ ॥

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिस्सा पार्थ राजसी॥ ३४॥

फलाकाङ्क्षी पुरुषः प्रकृष्टसङ्गेन धर्मकामार्थान् यया धृत्या धारयते, सा राजसी। धर्मकामार्थशब्देन तत्साधनभूता मनःप्राणेन्द्रियक्रियां लक्ष्यन्ते। फलाकाङ्क्षीत्यत्रापि फलशब्देन राजसत्वाद्धर्मकामार्था एव विवक्षिताः। अतो धर्मकामार्थापेक्षया मनःप्रभृतीनां क्रिया यया धृत्या धारयते, सा राजसीत्युक्तं भवति॥३४॥

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिस्सा पार्थ तामसी॥ ३५॥

यया धृत्या स्वप्नं— निद्रां, मदं— विषयानुभवजनितं मदं स्वप्नमदावुद्दिश्य प्रवृत्ता मनःप्राणादीनां क्रियाः दुर्मेधा न विमुञ्चति– धारयति; भयशोकविषादशब्दाश्च भयशोकादिदायिविषयपराः; तत्साधनभूताश्च मनःप्राणादिक्रिया यया धारयते, सा धृतिस्तामसी ॥ ३५ ॥

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।

पूर्वोक्तास्सर्वे ज्ञानकर्मकर्त्रादयो यच्छेषभूताः, तच्च सुखं गुणतस्त्रिविधमिदानीं शृणु॥

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥ ३६॥

यस्मिन् सुखे चिरकालाभ्यासात् क्रमेण निरतिशयां रतिं प्राप्नोति, दुःखान्तं च निगच्छति— निखिलस्य सांसारिकस्य दुःखस्यान्तं निगच्छति ॥ ३६ ॥

तदेव विशिनष्टि—

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥ ३७॥

यत्तत्सुखम्, अग्रे— योगोपक्रमवेलायां बह्वायाससाध्यत्वाद्विविक्तस्वरूपस्याननुभूतत्वाच्च विषमिव— दुःखमिव भवति; परिणामेऽमृतोपमम्– परिणामे– विपाके, अभ्यासबलेन विविक्तात्मस्वरूपाविर्भावे अमृतोपमं

Digitization by Arya Samaj Charitable Foundation, Chennai

भवति ; तच्चात्मबुद्धिप्रसादजम्— आत्मविषया बुद्धिः— आत्मबुद्धिः, तस्याः निवृत्तसकलेतरविषयत्वं प्रसादः; निवृत्तसकलेतरविषयबुद्ध्या विविक्तस्वभावात्मानुभवजनितं सुखममृतोपमं भवति ; तत्सुखं सात्त्विकं प्रोक्तम् ॥

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

अग्रे– अनुभववेलायां, विषयेन्द्रियसंयोगात् यत्तदमृतमिव भवति ; परिणामे— विपाके विषयाणां सुखतानिमित्तक्षुदादौ निवृत्ते तस्य च सुखस्य निरयादिनिमित्तत्वाद्विषमिव पीतं भवति ; तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

यत्सुखमग्रे चानुबन्धे च– अनुभववेलायां विपाके च आत्मनो मोहनम्— मोहहेतुर्भवति ; मोहोऽत्र यथावस्थितवस्त्वप्रकाशोऽभिप्रेतः ; निद्रालस्यप्रमादोत्थम्— निद्रालस्यप्रमादजनितम् , निद्रादयो ह्यनुभववेलायामपि मोहहेतवः ; निद्राया मोहहेतुत्वं स्पष्टम् ; आलस्यम्– इन्द्रियव्यापारमान्द्यम् ; इन्द्रियव्यापारमान्द्ये च ज्ञानमान्द्यं भवत्येव ; प्रमादः कृत्यानवधानरूप इति तत्रापि ज्ञानमान्द्यं भवति ; ततश्च तयोरपि मोहहेतुत्वम् ; तत्सुखं तामसमुदाहृतम् । अतो मुमुक्षुणा रजस्तमसी अभिभूय सत्त्वमेवोपादेयमित्युक्तं भवति ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात्त्रिभिर्गुणैः ॥ ४० ॥

पृथिव्यां— मनुष्यादिषु, दिवि– देवेषु वा प्रकृतिसंसृष्टेषु ब्रह्मादिस्थावरान्तेषु, प्रकृतिजैरेभिस्त्रिभिर्गुणैर्मुक्तं यत्सत्त्वं— प्राणिजातं, न तदस्ति ॥ ४० ॥

* त्यागेनैके अमृतत्वमानशुः इत्यादिषु मोक्षसाधनतया निर्दिष्टस्त्यागः संन्यासशब्दार्थादनन्यः ; स च क्रियमाणेष्वेव कर्मसु कर्तृत्वत्यागमूलः फलकर्मणोस्त्यागः ; कर्तृत्वत्यागश्च परमपुरुषे कर्तृत्वानुसंधानेनेत्युक्तम् । एतत्सर्वं सत्त्वगुण-वृद्धिकार्यमिति सत्त्वोपादेयताज्ञापनाय सत्त्वरजस्तमसां कार्यभेदाः प्रपञ्चिताः । इदानीमेवंभूतस्य मोक्षसाधनतया क्रियमाणस्य कर्मणः परमपुरुषाराधनवेषतां, तथानुष्ठितस्य च कर्मणस्तत्प्राप्तिलक्षणं फलं प्रतिपादयितुं ब्राह्मणाद्यधिकारिणां स्वभावानुबन्धिसत्त्वादिगुणभेदभिन्नं वृत्त्या सह कर्तव्यकर्मस्वरूपमाह—

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

ब्राह्मणक्षत्रियविशां स्वकीयो भावः, स्वभावः, ब्राह्मणादिजन्महेतुभूतं प्राचीनकर्मेत्यर्थः ; तत्प्रभवास्सत्त्वादयो गुणाः । ब्राह्मणस्य स्वभावप्रभवो रजस्तमोभिभवेनोद्भूतस्सत्त्वगुणः ; क्षत्रियस्य स्वभावप्रभवस्तम-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्सत्त्वाभिभवेनोद्भूतो रजोगुणः, वैश्यस्य स्वभावप्रभवस्सत्त्वरजोभिभवेनाल्पोद्रिक्तस्तमोगुणः ; शूद्रस्य स्वभावप्रभवस्तु रजस्सत्त्वाभिभवेनात्युद्रिक्तस्तमोगुणः । एभिः स्वभावप्रभवैर्गुणैस्सह प्रविभक्तानि कर्माणि शास्त्रैः प्रतिपादितानि । ब्राह्मणादय एवंगुणकाः, तेषां चैतानि कर्माणि, वृत्तयश्चैता इति हि विभज्य प्रतिपादयन्ति शास्त्राणि ॥ ४१ ॥

शमो दमस्तपश्शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ॥ ४२ ॥

शमः— बाह्येन्द्रियनियमनम्, दमः— अन्तःकरणनियमनम्, तपः— भोगनियमनरूपश्शास्त्रसिद्धः कायक्लेशः, शौचं— शास्त्रीयकर्मयोग्यता, क्षान्तिः— परैः पीड्यमानस्याप्यविकृतचित्तता, आर्जवं— परेषु मनोनुरूपं बाह्यचेष्टाप्रकाशनम्, ज्ञानम्— परावरतत्त्वयाथात्म्यज्ञानम्, विज्ञानम्— परतत्त्वगतासाधारणविशेषविषयं ज्ञानम्, आस्तिक्यम्— वैदिकार्थस्य कृत्स्नस्य सत्यतानिश्चयः प्रकृष्टः, केनापि हेतुना चालयितुमशक्य इत्यर्थः ; भगवान् पुरुषोत्तमो वासुदेवः परब्रह्मशब्दाभिधेयो निरस्तनिखिलदोषगन्धः स्वाभाविकानवधिकातिशयज्ञानशक्त्याद्यसङ्ख्येयकल्याणगुणगणो निखिलवेदवेदान्तवेद्यः, स एव निखिलजगदेककारणं निखिलजगदाधारभूतः, निखिलस्य स एव प्रवर्तयिता ; तदाराधनभूतं च वैदिकं कृत्स्नं कर्म, तैस्तैराराधितो धर्मार्थकाममोक्षाख्यं फलं प्रयच्छतीत्यर्थस्य सत्यतानिश्चय आस्तिक्यम् ; * वेदैश्च सर्वैरहमेव वेद्यः * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते * मयि सर्वमिदं प्रोतम् * भोक्तारं यज्ञतपसां....ज्ञात्वा मां शान्तिमृच्छति * मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ * यो मामजमनादिं च वेत्ति लोकमहेश्वरम् इति ह्युच्यते । तदेतद्ब्राह्मणस्य स्वभावजं कर्म ॥ ४२ ॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

शौर्यं— युद्धे निर्भयप्रवेशसामर्थ्यं, तेजः– परैरनभिभवनीयता, धृतिः– आरब्धे कर्मणि विघ्नोपनिपातेऽपि तत्समापनसामर्थ्यं, दाक्ष्यं— सर्वक्रियानिर्वृत्तिसामर्थ्यं, युद्धे चाप्यपलायनम्– युद्धे चात्ममरणनिश्चयेऽप्यनिवर्तनम्, दानम्— आत्मीयस्य धनस्य परस्वत्वापादनपर्यन्तस्त्यागः, ईश्वरभावः— स्वव्यतिरिक्तसकलजननियमनसामर्थ्यम्, एतत् क्षत्रियस्य स्वभावजं कर्म ॥ ४३ ॥

कृषिगोरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजम्।

कृषिः– सस्योत्पादनं कर्षणम्, गोरक्ष्यम्— पशुपालनमित्यर्थः, वाणिज्यम्— धनसञ्चयहेतुभूतं क्रयविक्रयात्मकं कर्म, एतद्वैश्यस्य स्वभावजं कर्म ॥ ४३ $\frac{1}{2}$ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

पूर्ववर्णत्रयपरिचर्यारूपं शूद्रस्य स्वभावजं कर्म। तदेतच्चतुर्णां वर्णानां वृत्तिभिस्सह कर्तव्यानां शास्त्रविहितानां यज्ञादिकर्मणां प्रदर्शनार्थमुक्तम्। यज्ञादयो हि त्रयाणां वर्णानां साधारणाः। शमादयोऽपि त्रयाणां वर्णानां मुमुक्षूणां साधारणाः। ब्राह्मणस्य तु सत्त्वोद्रेकस्य स्वाभाविकत्वेन शमदमादयस्सुखोपादाना इति कृत्वा तस्य शमादयः स्वभावजं कर्मेत्युक्तम्। क्षत्रियवैश्ययोस्तु स्वतो रजस्तमःप्रधानत्वेन शमदमादयो दुःखोपादाना इति कृत्वा न तत्कर्मेत्युक्तम्। ब्राह्मणस्य वृत्तिर्याजनाध्यापनप्रतिग्रहाः; क्षत्रियस्य जनपदपरिपालनम्; वैश्यस्य च कृष्यादयो यथोक्ताः; शूद्रस्य तु कर्तव्यं वृत्तिश्च पूर्ववर्णत्रयपरिचर्यैव ॥ ४४ ॥

स्वेस्वे कर्मण्यभिरतस्संसिद्धिं लभते नरः।
स्वकर्मनिरतस्सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

स्वेस्वे— यथोदिते कर्मण्यभिरतो नरः संसिद्धिं— परमपदप्राप्तिं लभते: स्वकर्मनिरतो यथा सिद्धिं विन्दति— परमपदं प्राप्नोति, तथा शृणु ॥ ४५ ॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

यतो भूतानामुत्पत्त्यादिका प्रवृत्तिः, येन च सर्वमिदं ततम्, स्वकर्मणा तं— मामिन्द्राद्यन्तरात्मतयाऽवस्थितमभ्यर्च्य मत्प्रसादान्मत्प्राप्तिरूपां सिद्धिं विन्दति मानवः। मत्त एव सर्वमुत्पद्यते, मया च सर्वमिदं ततमिति पूर्वमेवोक्तम् * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ॥ * मया ततमिदं सर्वं जगदव्यक्तमूर्तिना * मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते इत्यादिषु ॥ ४६ ॥

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।

एवं त्यक्तकर्तृत्वादिको मदाराधनरूपस्स्वधर्मः— स्वेनैवोपादातुं योग्यो धर्मः; प्रकृतिसंसृष्टेन हि पुरुषेणेन्द्रियव्यापाररूपः कर्मयोगात्मको धर्मस्सुकरो भवति; अतः कर्मयोगाख्यः स्वधर्मो विगुणोऽपि परधर्मात्— इन्द्रियजयनिपुणपुरुषधर्मात् ज्ञानयोगात् सकलेन्द्रियनियमनरूपतया सप्रमादात् कदाचित्स्वनुष्ठितात् श्रेयान् ॥ ४६= ॥

तदेवोपपादयति—

स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम् ॥ ४७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकृतिसंसृष्टस्य इन्द्रियव्यापाररूपतया स्वभावत एव नियतत्वात्कर्मणः कर्म कुर्वन् किल्बिषं— संसारं, न प्राप्नोति, अप्रमादत्वात्कर्मणः। ज्ञानयोगस्य सकलेन्द्रियनियमनसाध्यतया सप्रमादत्वात्तन्निष्ठस्तु प्रमादात्किल्बिषं प्रतिपद्येतापि ॥ ४७ ॥

अतः कर्मनिष्ठैव ज्यायसीति तृतीयाध्यायोक्तं स्मारयति—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

अतस्सहजत्वेन सुकरमप्रमादं च कर्म सदोषं— सदुःखमपि न त्यजेत्; ज्ञानयोगयोग्योऽपि कर्मयोगमेव कुर्वीतेत्यर्थः। सर्वारम्भाः,– कर्मारम्भाः ज्ञानारम्भाश्च हि दोषेण— दुःखेन, धूमेनाग्निरिवावृताः। इयांस्तु विशेषः— कर्मयोगस्सुकरोऽप्रमादश्च, ज्ञानयोगस्तद्विपरीत इति ॥ ४८ ॥

असक्तबुद्धिस्सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

सर्वत्र— फलादिष्वसक्तबुद्धिः, जितात्मा— जितमनाः, परमपुरुषकर्तृत्वानुसंधानेनात्मकर्तृत्वे विगतस्पृहः, एवं त्यागादनन्यत्वेन निर्णीतेन संन्यासेन युक्तः कर्म कुर्वन् परमां नैष्कर्म्यसिद्धिमधिगच्छति— परमां ध्याननिष्ठां ज्ञानयोगस्यापि फलभूतामधिगच्छतीत्यर्थः। वक्ष्यमाणध्यानयोगावाप्तिं सर्वेन्द्रियकर्मोपरतिरूपामधिगच्छति ॥ ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

सिद्धिं प्राप्तः— आप्रयाणादहरहरनुष्ठीयमानकर्मयोगनिष्पाद्यध्यानसिद्धिं प्राप्तः, यथा— येन प्रकारेण वर्तमानो, ब्रह्म प्राप्नोति, तथा समासेन मे निबोध। तदेव ब्रह्म विशेष्यते– निष्ठा ज्ञानस्य या परेति। ज्ञानस्य ध्यानात्मकस्य या परा निष्ठा— परमप्राप्यमित्यर्थः ॥ ५० ॥

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च। शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

बुद्ध्या विशुद्धया— यथावस्थितात्मतत्त्वविषयया युक्तः, धृत्या आत्मानं नियम्य च— विषयविमुखीकरणेन योगयोग्यं मनः कृत्वा, शब्दादीन् विषयांस्त्यक्त्वा— असन्निहितान् कृत्वा, तन्निमित्तौ च राग-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वेषौ व्युदस्य, विविक्तसेवी— सर्वैर्ध्यानविरोधिभिर्विविक्ते देशे वर्तमानः, लघ्वाशी— अत्यशनानशनरहितः, यतवाक्कायमानसः— ध्यानाभिमुखीकृतकायवाङ्मनोवृत्तिः, ध्यानयोगपरो नित्यम्— एवंभूतस्सन् आप्रयाणादहरहर्ध्यानयोगपरः, वैराग्यं समुपाश्रितः— ध्येयतत्त्वव्यतिरिक्तविषयदोषावमर्शेन तत्रतत्र विरागतां वर्धयन्, अहंकारम्— अनात्मन्यात्माभिमानं, बलं— तद्वृद्धिहेतुभूतवासनाबलं, तन्निमित्तं दर्पं कामं क्रोधं परिग्रहं विमुच्य, निर्ममः— सर्वेष्वनात्मीयेष्वात्मीयबुद्धिरहितः, शान्तः— आत्मानुभवैकसुखः, एवंभूतो ध्यानयोगं कुर्वन् ब्रह्मभूयाय कल्पते— ब्रह्मभावाय कल्पते ; सर्वबन्धविनिर्मुक्तो यथावस्थितमात्मानमनुभवतीत्यर्थः ॥ ५१—५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

ब्रह्मभूतः— आविर्भूतापरिच्छिन्नज्ञानैकाकारमच्छेषतैकस्वभावात्मस्वरूपः, * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् इति हि स्वशेषतोक्ता ; प्रसन्नात्मा— क्लेशकर्मादिभिरकलुषस्वरूपो मद्व्यतिरिक्तं न कंचन भूतविशेषं प्रति शोचति ; न किंचन काङ्क्षति ; अपितु मद्व्यतिरिक्तेषु सर्वेषु भूतेषु अनादरणीयतायां समो निखिलं वस्तुजातं तृणवन्मन्यमानो मद्भक्तिं लभते परां— मयि सर्वेश्वरे निखिलजगदुदयविभवलयलीले निरस्तसमस्तहेयगन्धेऽनवधिकातिशयासंख्येयकल्याणगुणगणैकताने लावण्यामृतसागरे श्रीमति पुण्डरीकनयने स्वस्वामिन्यत्यर्थप्रियानुभवरूपां भक्तिं लभते ॥ ५४ ॥

तत्फलमाह—

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
यतो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

स्वरूपतः स्वभावतश्च योऽहम्; गुणतो विभूतितोऽपि यावांश्चाहम्, तं मामेवंरूपया भक्त्या तत्त्वतोऽभिजानाति ; मां तत्त्वतो ज्ञात्वा तदनन्तरम्— तत्त्वज्ञानानन्तरं, ततो— भक्तितो, मां विशते— प्रविशति। तत्त्वतस्स्वरूपस्वभावगुणविभूतिदर्शनोत्तरकालभाविन्या अनवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः। अत्र तत इति प्राप्तिहेतुतया निर्दिष्टा भक्तिरेवाभिधीयते ; * भक्त्या त्वनन्यया शक्यः इति तस्या एव तत्त्वतः प्रवेशहेतुत्वाभिधानात् ॥ ५५ ॥

एवं वर्णाश्रमोचितनित्यनैमित्तिककर्मणां परित्यक्तफलादिकानां परमपुरुषाराधनरूपाणामनुष्ठितानां विपाक उक्तः। इदानीं काम्यानामपि कर्मणामुक्तेनैव प्रकारेणानुष्ठितानां स एव विपाक इत्याह—

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न केवलं नित्यनैमित्तिकानि कर्माणि, अपितु सर्वाणि काम्यान्यपि कर्माणि, मद्व्यपाश्रयः— मयि संन्यस्तकर्तृत्वादिकः, कुर्वाणो मत्प्रसादाच्छाश्वतं पदमव्ययम्— अविकलं प्राप्नोति। पद्यत इति पदम्; मां प्राप्नोतीत्यर्थः ॥ ५६ ॥

यस्मादेवं, तस्मात्,

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तस्सततं भव ॥ ५७ ॥

चेतसा— आत्मनो मदीयत्वमन्नियाम्यत्वबुद्ध्या, उक्तं हि * मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा इति : सर्वकर्माणि सकर्तृकाणि साराध्यानि मयि संन्यस्य, मत्परः— अहमेव फलतया प्राप्य इत्यनुसंदधानः, कर्माणि कुर्वन्निममेव बुद्धियोगमुपाश्रित्य सततं मच्चित्तो भव ॥ ५७ ॥

मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८ ॥

एवं मच्चित्तस्सर्वकर्माणि कुर्वन् सर्वाणि सांसारिकाणि दुर्गाणि मत्प्रसादादेव तरिष्यसि। अथ त्वम्, अहंकारात्— अहमेव कृत्याकृत्यविषयं सर्वं जानामीति भावात्, मदुक्तं न श्रोष्यसि चेत्, विनङ्क्ष्यसि— विनष्टो भविष्यसि। नहि कश्चिन्मद्व्यतिरिक्तः कृत्स्नस्य प्राणिजातस्य कृत्याकृत्ययोर्ज्ञाता प्रशासिता वाऽस्ति ॥ ५८ ॥

यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

यद्यहंकारम्— आत्मनि हिताहितज्ञाने स्वातन्त्र्याभिमानम्, आश्रित्य मन्नियोगमनादृत्य न योत्स्य इति मन्यसे, एष ते स्वातन्त्र्यव्यवसायो मिथ्या भविष्यति : यतः प्रकृतिस्त्वां युद्धे नियोक्ष्यति— मत्स्वातन्त्र्योद्विग्नं त्वामज्ञं प्रकृतिर्नियोक्ष्यति ॥ ५९ ॥

तदुपपादयति—

स्वभावजेन कौन्तेय निबद्धस्स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥

स्वभावजं हि क्षत्रियस्य कर्म शौर्यम्, स्वभावजेन शौर्याख्येन स्वेन कर्मणा निबद्धः, तत एवावशः, परैर्धर्षणमसहमानस्त्वमेव तद्युद्धं करिष्यसि, यदिदानीं मोहात्— अज्ञानात् कर्तुं नेच्छसि ॥ ६० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वं हि भूतजातं सर्वेश्वरेण मया पूर्वकर्मानुगुण्येन प्रकृत्यनुवर्तने नियमितं, तच्छृणु ।

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्त्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

ईश्वरः— सर्वनियमनशीलो वासुदेवः सर्वभूतानां हृद्देशे— सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयप्रदेशे तिष्ठति । कथं किं कुर्वंस्तिष्ठति ? यन्त्रारूढानि सर्वभूतानि मायया भ्रामयन्— स्वेनैव निर्मितं देहेन्द्रियावस्थं प्रकृत्याख्यं यन्त्रमारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्तयंस्तिष्ठतीत्यर्थः । पूर्वमप्येतदुक्तं * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च इति ; * मत्तस्सर्वं प्रवर्तते इति च । * य आत्मनि तिष्ठन् इत्यादिका श्रुतिश्च ॥ ६१ ॥

एतन्मायानिवृत्तिहेतुमाह—

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

यस्मादेवं, तस्मात्तमेव— सर्वस्य प्रशासितारमाश्रितवात्सल्येन त्वत्सारथ्येऽवस्थितम्, इत्थं कुर्विति च शासितारं, सर्वभावेन— सर्वात्मना, शरणं गच्छ— सर्वात्मनाऽनुवर्तस्व । अन्यथाऽपि तन्मायाप्रेरितेनाज्ञेन त्वया युद्धादिकरणमवर्जनीयम् ; तथा सति नष्टो भविष्यसि ; अतस्तदुक्तप्रकारेण युद्धादिकं कुर्वित्यर्थः । एवं कुर्वाणस्तत्प्रसादात् परां शान्तिं— सर्वकर्मबन्धोपशमं, शाश्वतं च स्थानं प्राप्स्यसि । यदभिधीयते श्रुतिशतैः— * तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः * ते ह नाकं महिमानस्सचन्ते, यत्र पूर्वे साध्यास्सन्ति देवाः * यत्र ऋषयः प्रथमजा ये पुराणाः * परेण नाकं निहितं गुहायां * यो अस्याध्यक्षः परमे व्योमन् * अथ यदतः परो दिवो ज्योतिर्दीप्यते * सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् इत्यादिभिः ॥ ६२ ॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

इति— एवं, ते मुमुक्षुभिरधिगन्तव्यं ज्ञानं सर्वस्माद्गुह्याद्गुह्यतरं कर्मयोगविषयं ज्ञानयोगविषयं भक्तियोगविषयं च सर्वमाख्यातम् । एतदशेषेण विमृश्य स्वाधिकारानुरूपं यथेच्छसि तथा कुरु— कर्मयोगं ज्ञानयोगं भक्तियोगं वा यथेष्टमातिष्ठेत्यर्थः ॥ ६३ ॥

सर्वगुह्यतमं भूयश्शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वेष्वेतेषु गुह्येषु भक्तियोगस्य श्रैष्ठ्याद्गुह्यतम[म्] इति पूर्वमेवोक्तम्— * इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे इत्यादौ। भूयोऽपि तद्विषयं परमं मे वचः शृणु। इष्टोऽसि मे दृढमिति ततस्ते हितं वक्ष्यामि ॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

वेदान्तेषु * वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसस्तु पारे, तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते ॥ इत्यादिषु विहितं वेदनध्यानोपासनादिशब्दवाच्यं दर्शनसमानाकारं स्मृतिसंतानमत्यर्थप्रियमिह मन्मना भवेति विधीयते। मद्भक्तः— अत्यर्थमत्प्रियः ; अत्यर्थमत्प्रियत्वेन निरतिशयप्रियां स्मृतिसंततिं कुरुष्वेत्यर्थः। मद्याजी— तत्रापि मद्भक्त इत्यनुषज्यते, यजनं पूजनं, अत्यर्थप्रियमदाराधनपरो भव। आराधनं हि परिपूर्णशेषवृत्तिः। मां नमस्कुरु— नमो नमनं, मय्यतिमात्रप्रह्वीभावमत्यर्थप्रियं कुर्वित्यर्थः। एवं वर्तमानो मामेवैष्यसि, एतत्सत्यं ते प्रतिजाने— तव प्रतिज्ञां करोमि ; नोपच्छन्दनमात्रम्। यतस्त्वं प्रियोऽसि मे * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः इति पूर्वमेवोक्तम्। यस्य मय्यतिमात्रा प्रीतिर्वर्तते, ममापि तस्मिन्नतिमात्रा प्रीतिर्भवतीति तद्वियोगमसहमानोऽहं तं मां प्रापयामि। अतस्सत्यमेव प्रतिज्ञातं * मामेवैष्यसीति ॥ ६५ ॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् परमनिश्श्रेयससाधनभूतान् मदाराधनत्वेन अतिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलकर्मकर्तृत्वादिपरित्यागेन परित्यज्य मामेकमेव कर्तारमाराध्यं प्राप्यमुपायं चानुसंधत्स्व। एष एव सर्वधर्माणां शास्त्रीयपरित्याग इति— * निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः ॥ इत्यारभ्य * सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ॥ .... नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ इत्यध्यायादौ सुदृढमुपपादितम्। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि— एवं वर्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसंचितानन्ताकृत्यकरणकृत्याकरणरूपेभ्यस्सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि। मा शुचः— शोकं मा कृथाः। अथवा, सर्वपापविनिर्मुक्तात्यर्थभगवत्प्रियपुरुषनिर्वर्त्यत्वाद्भक्तियोगस्य तदारम्भविरोधिपापानामानन्त्यात् तत्प्रायश्चित्तरूपैर्धर्मैः परिमितकालकृतैस्तेषां दुस्तरतया आत्मनो भक्तियोगारम्भानर्हतामालोच्य शोचतोऽर्जुनस्य शोकमपनुदन् श्रीभगवानुवाच— * सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति ॥ भक्तियोगारम्भविरोध्यनादिकालसंचितनानाविधानन्तपापानुगुणान् तत्तत्प्रायश्चित्तरूपान् कृच्छ्रचान्द्रायणकूश्माण्डवैश्वानरव्रातपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान् नानाविधाननन्तांस्त्वया परिमितकालवर्तिना दुरनुष्ठानान् सर्वान् धर्मान् परित्यज्य भक्तियोगारम्भसिद्धये मामेकं परम-

22

Digitization by Arya Samaj Charitable Foundation, Chennai

कारुणिकमनालोचितविशेषाशेषलोकशरण्यमाश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व। अहं त्वा सर्वपापेभ्यो यथोदितस्वरूपभक्त्यारम्भविरोधिभ्यस्सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन।
नचाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७॥

इदं ते परमं गुह्यं शास्त्रं मयाऽऽख्यातम्, अतपस्काय— अतप्ततपसे त्वया न वाच्यम्; त्वयि वक्तरि मयि चाभक्ताय कदाचन न वाच्यम्, तप्ततपसे चाभक्ताय न वाच्यमित्यर्थः। न चाशुश्रूषवे— भक्तायाप्यशुश्रूषवे न वाच्यम्। न च मां योऽभ्यसूयति— मत्स्वरूपे मदैश्वर्ये मद्गुणेषु च कथितेषु यो दोषमाविष्करोति, न तस्मै वाच्यम्। असमानविभक्तिनिर्देशस्तस्यात्यन्तपरिहरणीयताज्ञापनाय ॥ ६७ ॥

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८॥

इदं परमं गुह्यं मद्भक्तेषु योऽभिधास्यति— व्याख्यास्यति, सः मयि परमां भक्तिं कृत्वा मामेवैष्यति; न तत्र संशयः ॥ ६८ ॥

नच तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता नच मे तस्मादन्यः प्रियतरो भुवि ॥ ६९॥

सर्वेषु मनुष्येष्वितःपूर्वं तस्मादन्यो मनुष्यो मे न कश्चित्प्रियकृत्तमोऽभूत्; इत उत्तरं च न भविता। अयोग्यानां प्रथममुपादानं योग्यानामकथनादपि तत्कथनस्यानिष्टतमत्वात् ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टस्स्यामिति मे मतिः ॥ ७०॥

य इममावयोर्धर्म्यं संवादमध्येष्यते, तेन ज्ञानयज्ञेनाहमिष्टस्स्यामिति मे मतिः— अस्मिन् यो ज्ञानयज्ञोऽभिधीयते, तेनाहमेतदध्ययनमात्रेणेष्टस्स्यामित्यर्थः ॥ ७० ॥

श्रद्धावाननसूयुश्च शृणुयादपि यो नरः।
सोऽपि मुक्तश्शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१॥

श्रद्धावाननसूयुश्च यो नरश्शृणुयादपि, तेन श्रवणमात्रेण सोऽपि भक्तिविरोधिपापेभ्यो मुक्तः पुण्यकर्मणां मद्भक्तानां लोकान्— समूहान् प्राप्नुयात् ॥ ७१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय॥ ७२॥

मया कथितमेतत्पार्थ त्वयाऽवहितेन चेतसा कच्चिच्छ्रुतम्, तवाज्ञानसंमोहः कच्चित्प्रनष्टः, येनाज्ञानेन मूढो न योत्स्यामीत्युक्तवान्॥ ७२॥

अर्जुन उवाच—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव॥ ७३॥

मोहः— विपरीतज्ञानम्, त्वत्प्रसादान्मम तद्विनष्टम्। स्मृतिः— यथावस्थिततत्त्वज्ञानम्, त्वत्प्रसादादेव तच्च लब्धम्। अनात्मनि प्रकृतावात्माभिमानरूपो मोहः, परमपुरुषशरीरतया तदात्मकस्य कृत्स्नस्य चिदचिद्वस्तुनः अतदात्माभिमानरूपश्च, नित्यनैमित्तिकरूपस्य कर्मणः परमपुरुषाराधनतया तत्प्राप्त्युपायभूतस्य बन्धकत्वबुद्धिरूपश्च सर्वो विनष्टः। आत्मनः प्रकृतिविलक्षणत्वतत्स्वभावरहितताज्ञातृत्वैकस्वभावतापरमपुरुषशेषतातन्नियाम्यत्वैकस्वरूपताज्ञानम्, निखिलजगदुद्भवस्थितिप्रलयलीलाशेषदोषप्रत्यनीककल्याणैकस्वरूपस्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृतिसमस्तकल्याणगुणगणमहार्णवपरब्रह्मशब्दाभिधेयपरमपुरुषयाथात्म्यज्ञानं च; एवंरूपपरावरतत्त्वयाथात्म्यविज्ञानतदभ्यासपूर्वकाहरहरुपचीयमानपरमपुरुषप्रीत्येकफलनित्यनैमित्तिककर्मनिषिद्धपरिहारशमदमाद्यात्मगुणनिर्वर्त्यभक्तिरूपतापन्नपरमपुरुषोपासनैकलभ्यो वेदान्तवेद्यः परमपुरुषो वासुदेवस्त्वमिति ज्ञानं च लब्धम्। ततश्च बन्धुस्नेहकारुण्यप्रवृद्धविपरीतज्ञानमूलात्सर्वस्मादवसादाद्विमुक्तो गतसंदेहः स्वस्थः स्थितोऽस्मि। इदानीमेव युद्धादिकर्तव्यताविषयं तव वचनं करिष्ये; यथोक्तं युद्धादिकं करिष्य इत्यर्थः॥ ७३॥

धृतराष्ट्राय स्वपुत्राः पाण्डवाश्च युद्धे किं करिष्यन्तीति पृच्छते

संजय उवाच—

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं रोमहर्षणम्॥ ७४॥

इति— एवं, वासुदेवस्य— वसुदेवसूनोः, पार्थस्य च— तत्पितृष्वसुः पुत्रस्य च महात्मनो महाबुद्धेस्तत्पदद्वन्द्वमाश्रितस्येमं रोमहर्षणमद्भुतं संवादमहं यथोक्तमश्रौषम्—श्रुतवानहम्॥ ७४॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतस्स्वयम्॥ ७५॥

व्यासप्रसादात्— व्यासानुग्रहेण दिव्यचक्षुश्श्रोत्रलाभात् एतत्परं योगाख्यं गुह्यं योगेश्वरात्— ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधेर्भगवतः कृष्णात् स्वयमेव कथयतः साक्षाच्छ्रुतवानहम्॥ ७५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

राजन् संस्मृत्यसंस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

केशवार्जुनयोरिमं पुण्यमद्भुतं संवादं साक्षाच्छ्रुतं स्मृत्वा मुहुर्मुहुर्हृष्यामि ॥ ७६ ॥

तच्च संस्मृत्यसंस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान् राजन् हृष्यामि च मुहुर्मुहुः ॥ ७७ ॥

तच्चार्जुनाय प्रकाशितमैश्वरं हरेरत्यद्भुतं रूपं मया साक्षात्कृतं संस्मृत्यसंस्मृत्य हृष्यतो मे महान् विस्मयो जायते; पुनःपुनश्च हृष्यामि ॥ ७७ ॥

किमत्र बहुनोक्तेन—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः ॥

श्री कृष्णाय परब्रह्मणेनमः।

यत्र योगेश्वरः— कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो येये स्वभावयोगाः, तेषां सर्वेषां योगानामीश्वरः, स्वसंकल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णः वसुदेवसूनुः, यत्र च पार्थो धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पदद्वन्द्वैकाश्रयः; तत्र श्रीर्विजयो भूतिर्नीतिश्च ध्रुवा— निश्चला; इति मतिर्ममेति ॥ ७८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमते रामानुजाय नमः।

इति श्रीमद्भगवद्गीताभाष्ये
॥ तृतीयषट्कं समाप्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीः ॥

श्रीमते रामानुजाय नमः ।

श्रीभगवद्रामानुजग्रन्थमालायां गद्यत्रयम् ॥

॥ शरणागतिगद्यम् ॥

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ॥

ॐ ॥ भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणाम्, पद्मवनालयाम्, भगवतीम्, श्रियम्, देवीम्, नित्यानपायिनीम्, निरवद्याम्, देवदेवदिव्यमहिषीम्, अखिलजगन्मातरम्, अस्मन्मातरम्, अशरण्यशरण्याम्, अनन्यशरणः शरणमहं प्रपद्ये ॥ १ ॥

पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्यपेक्षया पारमार्थिकी भगवच्चरणारविन्दशरणागतिर्यथावस्थिता अविरताऽस्तु मे ॥ २ ॥

अस्तु ते ॥ ३ ॥ तयैव सर्वं संपत्स्यते ॥ ४ ॥

अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूप ! स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूप ! स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णव, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यनिरतिशयसुगन्धनिरतिशयसुखस्पर्शनिरतिशयौज्ज्वल्यकिरीटमकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकांचीगुणनूपुराद्यपरिमितदिव्यभूषण !

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदाशार्ङ्गाद्यसंख्येयनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुध ! स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभ ! एवंभूतभूमिनीला-नायक ! स्वच्छन्दानुवर्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्त-कल्याणगुणगणशेषशेषाशनगरुडप्रमुखनानाविधानन्तपरिजनपरिचारिकापरिचरितचरणयुगल ! परमयोगिवाङ्मनसा-परिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्त-परिमाणनित्यनिरवद्यनिरतिशयवैकुण्ठनाथ ! स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभावप्रकृतिपुरुषकाला-त्मकविविधविचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूपनिखिलजगदुदयविभवलयलील ! सत्यकाम ! सत्य-सङ्कल्प ! परब्रह्मभूत ! पुरुषोत्तम ! महाविभूते ! श्रीमन् ! नारायण ! श्रीवैकुण्ठनाथ ! अपारकारुण्य-सौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधे ! अनालोचितविशेषाशेषलोकशरण्य ! प्रणतार्तिहर ! आश्रितवात्सल्यैक-जलधे ! अनवरतविदितनिखिलभूतजातयाथात्म्य ! अशेषचराचरभूतनिखिलनियमननिरत ! अशेषचिदचि-द्वस्तुशेषिभूत ! निखिलजगदाधार ! अखिलजगत्स्वामिन् ! अस्मत्स्वामिन् ! सत्यकाम ! सत्यसङ्कल्प ! सकलेतरविलक्षण ! अर्थिकल्पक ! आपत्सख ! श्रीमन् ! नारायण ! अशरण्यशरण्य ! अनन्यशरण-स्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ॥ ५ ॥

[अत्र द्वयम्]

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून् । रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥
सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान् । लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो ! ॥ ६ ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ ७ ॥

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ८ ॥

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ९ ॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचाररूपनाना-विधानन्तापचारान् आरब्धकार्यान् अनारब्धकार्यान् कृतान् क्रियमाणान् करिष्यमाणांश्च सर्वानशेषतः क्षमस्व ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अनादिकालप्रवृत्तं विपरीतज्ञानम् आत्मविषयं कृत्स्नजगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ॥ ११ ॥

मदीयानादिकर्मप्रवाहप्रवृत्ताम् भगवत्स्वरूपतिरोधानकरीम् विपरीतज्ञानजननीम् स्वविषयायाश्च भोग्य-बुद्धेर्जननीम् देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थिताम् दैवीम् गुणमयीम् मायाम्; दासभूतम् 'शरणागतोऽस्मि; तवास्मि दासः' इति वक्तारं मां तारय ॥ १२ ॥

* तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥

उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम्। आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥

इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व ॥ १३ ॥

* पुरुषस्स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया * भक्त्या त्वनन्यया शक्यः, * मद्भक्तिं लभते पराम् इति स्थानत्रयोदितपरभक्तियुक्तं मां कुरुष्व ॥ १४ ॥

परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मां कुरुष्व ॥ १५ ॥

परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोऽहं तथाविधभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ॥

एवंभूतमत्कैङ्कर्यप्राप्त्युपायतयाऽवक्लृप्तसमस्तवस्तुविहीनोऽपि, अनन्ततद्विरोधिपापाक्रान्तोऽपि, अनन्त-मदपचारयुक्तोऽपि, अनन्तमदीयापचारयुक्तोऽपि, अनन्तासह्यापचारयुक्तोऽपि, एतत्कार्यकारणभूतानादिविपरीता-हङ्कारविमूढात्मस्वभावोऽपि, एतदुभयकार्यकारणभूतानादिविपरीतवासनासंबद्धोऽपि, एतदनुगुणप्रकृतिविशेषसंबद्धोऽपि, एतन्मूलाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखतद्धेतुतदितरोपेक्षणीयविषयानुभवज्ञानसङ्कोचरूपमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोऽपि, येन केनापि प्रकारेण द्वयवक्ता त्वं केवलं मदीययैव दयया निःशेषविनष्टसहेतुकमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नः, मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिः, मत्प्रसादादेव साक्षात्कृतयथाव-स्थितमत्स्वरूपरूपगुणविभूतिलीलोपकरणविस्तारः, अपरोक्षसिद्धमन्नियाम्यतामद्दास्यैकस्वभावात्मस्वरूपः, मदेका-नुभवः, मद्दास्यैकप्रियः, परिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं तथाविध-मदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भव ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवंभूतोऽसि ॥ १८ ॥

आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगन्धरहितस्त्वं द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्स्व ॥ १९ ॥

शरीरपातसमये तु केवलं मदीययैव दयया अतिप्रबुद्धः, मामेवावलोकयन्नप्रच्युतपूर्वसंस्कारमनोरथः, जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य, तदानीमेव मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशय-प्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भविष्यसि ॥ २० ॥

मा ते भूदत्र संशयः ॥ २१ ॥

* अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन, * रामो द्विर्नाभिभाषते, * सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ * सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ इति मयैव ह्युक्तम् ॥ २२ ॥

अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व ॥ २३ ॥

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता ।
तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे ॥

इति श्रीभगवद्रामानुजविरचितं शरणागतिगद्यम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीः ।

श्रीमते रामानुजाय नमः ।

॥ अथ श्रीरङ्गगद्यम् ॥

चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णवं परब्रह्मभूतं पुरुषोत्तमं श्रीरङ्गशायिनम् अस्मत्स्वामिनं प्रबुद्धनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावोऽहं तदेकानुभवः तदेकप्रियः परिपूर्णं भगवन्तं विशदतमानुभवेन निरन्तरमनुभूय तदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूप नित्यकिङ्करो भवानि ॥ १ ॥

स्वात्मनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावानुसन्धानपूर्वकभगवदनवधिकातिशयस्वाम्याद्यखिलगुणगणानुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्युपायभूतभक्तितदुपायसम्यग्ज्ञानतदुपायसमीचीनक्रियातदनुगुणसात्विकतास्तिक्यादिसमस्तात्मगुणविहीनः दुरुत्तरानन्ततद्विपर्ययज्ञानक्रियानुगुणानादिपापवासनामहार्णवान्तर्निमग्नः तिलतैलवद्दारुवह्निवद्दुर्विवेचत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूपदुरत्ययभगवन्मायातिरोहितस्वप्रकाशः अनाद्यविद्यासञ्चितानन्ताशक्यविस्रंसनकर्मपाशप्रग्रथितः अनागतानन्तकालसमीक्षयाप्यदृष्टसन्तारोपायः, निखिलजन्तुजातशरण्य ! श्रीमन् ! नारायण ! तव चरणारविन्दयुगलं शरणमहं प्रपद्ये ॥ २ ॥

एवमवस्थितस्याप्यर्थित्वमात्रेण परमकारुणिको भगवान् स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिकनित्यकैङ्कर्यैकरतिरूपनित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थये ॥ ३ ॥

तवानुभूतिसंभूतप्रीतिकारितदासताम् । देहि मे कृपया नाथ ! न जाने गतिमन्यथा ॥ ४ ॥

सर्वावस्थोचिताशेषशेषतैकरतिस्तव । भवेयं पुण्डरीकाक्ष ! त्वमेवैवं कुरुष्व माम् ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवंभूततत्त्वयाथात्म्यावबोधतदिच्छारहितस्यापि एतदुच्चारणमात्रावलम्बने उच्यमानार्थपरमार्थनिष्ठं मे मनस्त्वमेवाद्यैव कारय ॥ ६ ॥

अपारकरुणाम्बुधे ! अनालोचितविशेषाशेषलोकशरण्य ! प्रणतार्तिहर ! आश्रितवात्सल्यैकमहोदधे ! अनवरतविदितनिखिलभूतजातयाथात्म्य ! सत्यकाम ! सत्यसङ्कल्प ! आपत्सख ! काकुत्स्थ ! श्रीमन् ! नारायण ! पुरुषोत्तम ! श्रीरङ्गनाथ ! मम नाथ ! नमोऽस्तु ते ॥ ७ ॥

इति श्रीभगवद्रामानुजविरचितं श्रीरङ्गगद्यं समाप्तम् ॥

॥ श्रीः ॥

श्रीमते रामानुजाय नमः ।

॥ अथ श्रीवैकुण्ठगद्यम् ॥

यामुनार्यसुधाम्भोधिमवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं संदर्शयाम्यहम् ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम् , क्लेशकर्माद्यशेषदोषासंस्पृष्टम् , स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवम् , परमपुरुषम् , भगवन्तम् , नारायणं, स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य, ऐकान्तिकात्यन्तिकतत्पादाम्बुजद्वयपरिचर्यैकमनोरथः, तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः, तस्यैव भगवतो नारायणस्य, अखिलसत्त्वदयैकसागरस्य, अनालोचितगुणागुणाखण्डजनानुकूलामर्यादशीलवतः, स्वाभाविकानवधिकातिशयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिलजनहृदयानन्दनस्य, आश्रितवात्सल्यैकजलधेः, भक्तजनसंश्लेषैकभोगस्य, नित्यज्ञानक्रियैश्वर्यादिभोगसामग्रीसमृद्धस्य, महाविभूतेः, श्रीमतश्चरणारविन्दयुगलम् अनन्यात्मसञ्जीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् ॥ १ ॥

ततश्च प्रत्यहम् आत्मोज्जीवनाय एवमनुस्मरेत् ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्दशभुवनात्मकमण्डं दशगुणितोत्तरं चावरणसप्तकं समस्तं कार्यकारणजातमतीत्य वर्तमाने परमव्योमशब्दाभिधेये ब्रह्मादीनां वाङ्मनसागोचरे श्रीमति वैकुण्ठे दिव्यलोके सनकविधिशिवादिभिरप्यचिन्त्य-स्वभावैश्वर्यैर्नित्यसिद्धैरनन्तैर्भगवदानुकूल्यैकभोगैः दिव्यपुरुषैर्महात्मभिरापूरिते तेषामपीयत्परिमाणम् इयदैश्वर्यम् ईदृशस्वभावम् इति परिच्छेत्तुमयोग्ये दिव्यावरणशतसहस्रावृते दिव्यकल्पकतरूपशोभिते दिव्योद्यानशत-सहस्रकोटिभिरावृते अतिप्रमाणे दिव्यायतने कस्मिंश्चिद्विचित्रदिव्यरत्नमये दिव्यास्थानमण्डपे दिव्यरत्न-स्तम्भशतसहस्रकोटिभिरुपशोभिते दिव्यनानारत्नकृतस्थलविचित्रिते दिव्यालङ्कारालङ्कृते परितः पतितैः पतमानैः पादपस्थैश्च नानागन्धवर्णैर्दिव्यपुष्पैश्शोभमानैर्दिव्यपुष्पोपवनैरुपशोभिते संकीर्णपारिजातादिकल्पद्रुमो-पशोभितैरसङ्कीर्णैश्च कैश्चिदन्तःस्थपुष्परत्नादिनिर्मितदिव्यलीलामण्डपशतसहस्रोपशोभितैस्सर्वदा अनुभूय-मानैरपि अपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशतसहस्रैरलङ्कृतैः कैश्चिन्नारायणदिव्यलीलासाधारणैः कैश्चि-त्पद्मवनालयादिव्यलीलासाधारणैस्साधारणैश्च कैश्चिच्छुकशारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलै-र्दिव्योद्यानशतसहस्रैरावृते मणिमुक्ताप्रवालकृतसोपानैर्दिव्यामलामृतरसोदकैर्दिव्याण्डजवरैरतिरमणीयदर्शनैरति-मनोहरमधुरस्वरैराकुलैः अन्तःस्थमुक्तामयदिव्यक्रीडास्थानोपशोभितैर्दिव्यसौगन्धिकवापीशतसहस्रैर्दिव्यराजहंसा-वलीविराजितैरावृते निरस्तातिशयानन्दैकरसतया चानन्त्याच्च प्रविष्टानुन्मादयद्भिः क्रीडोद्देशैर्विराजिते तत्र तत्र कृतदिव्यपुष्पपर्यङ्कोपशोभिते नानापुष्पासवास्वादमत्तभृङ्गावलीभिरुद्गीयमानदिव्यगान्धर्वेणापूरिते चन्दनागरुकर्पूर-दिव्यपुष्पावगाहिमन्दानिलासेव्यमाने मध्ये दिव्यपुष्पसञ्चयविचित्रिते महति दिव्ययोगपर्यङ्के अनन्तभोगिनि श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकम् आत्मकान्त्या विश्वमाप्याययन्त्या शेषशेषाशनादिसर्वपरिजनं भगवतस्तत्तदवस्थोचित-परिचर्यायामाज्ञापयन्त्या शीलरूपगुणविलासादिभिरात्मानुरूपया श्रिया सहासीनम्, प्रत्यग्रोन्मीलितसरसिज-सदृशनयनयुगलम्, स्वच्छनीलजीमूतसङ्काशम्, अत्युज्ज्वलपीतवाससम्, स्वया प्रभया अतिनिर्मलया अति-शीतलया स्वच्छया माणिक्याभया कृत्स्नं जगद्भासयन्तम्, अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृत-सागरम्, अतिसौकुमार्यादीषत्प्रस्विन्नवदालक्ष्यमाणललाटफलकदिव्यालकावलीविराजितम्, प्रबुद्धमुग्धाम्बुजचारु-लोचनम्, सविभ्रमभ्रूलतम्, उज्ज्वलाधरम्, शुचिस्मितम्, कोमलगण्डम्, उन्नसम्, उदग्रपीनांसविलम्बि-कुण्डलालकावलीबन्धुरकम्बुकन्धरम्, प्रियावतंसोत्पलकर्णभूषणश्लथालकाबन्धविमर्दशंसिभिश्चतुर्भिराजानुविलम्बि-भिर्भुजैर्विराजितम्, अतिकोमलदिव्यरेखालङ्कृताताम्रकरतलम्, दिव्याङ्गुलीयकविराजितम्, अतिकोमलदिव्य-नखावलीविराजितातिरक्ताङ्गुलीभिरलङ्कृतम्, तत्क्षणोन्मीलितपुण्डरीकसदृशचरणयुगलम्, अतिमनोहरकिरीट-मकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुरादिभि-रत्यन्तसुखस्पर्शैर्दिव्यगन्धैर्भूषणैर्भूषितम्, श्रीमत्या वैजयन्त्या वनमालया विराजितम्, शङ्खचक्रगदासिशार्ङ्गादि-दिव्यायुधैस्सेव्यमानम्, स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

वैनतेयादिभिस्स्वभावतोनिरस्तसमस्तसांसारिकस्वभावैर्भगवत्परिचर्याकरणयोग्यैर्भगवत्परिचर्यैकभोगैर्नित्यसिद्धैरनन्तैर्यथायोगं सेव्यमानम्, आत्मभोगेन अननुसंहितपरादिकालम्, दिव्यामलकोमलावलोकनेन विश्वमाह्लादयन्तम्, ईषदुन्मीलितमुखाम्बुजोदरविनिर्गतेन दिव्याननारविन्दशोभाजनकेन दिव्यगाम्भीर्यौदार्यसौन्दर्यमाधुर्याद्यनवधिकगुणगणविभूषितेन अतिमनोहरदिव्यभावगर्भेण दिव्यलीलालापामृतेन अखिलजनहृदयान्तराण्यापूरयन्तम् भगवन्तम् नारायणम् ध्यानयोगेन दृष्ट्वा [ततो] भगवतो नित्यस्वाम्यम्, आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय, "कदाऽहं भगवन्तं नारायणं मम कुलनाथं मम कुलदैवतं मम कुलधनं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा ; कदाऽहं भगवत्पादाम्बुजद्वयं शिरसा धारयिष्यामि : कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याकरणयोग्यः तदेकभोगस्तत्पादौ परिचरिष्यामि ; कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याशया निरस्तसमस्तेतरभोगाशः अपगतसमस्तसांसारिकस्वभावः तत्पादाम्बुजद्वयं प्रवेक्ष्यामि ; कदा मां भगवान् स्वकीयया अतिशीतलया दृशा अवलोक्य स्निग्धगम्भीरमधुरया गिरा परिचर्यायामाज्ञापयिष्यति " इति भगवत्परिचर्यायाम् आशां वर्धयित्वा, तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य, दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनं वैनतेयादिभिस्सेव्यमानं "समस्तपरिवाराय श्रीमते नारायणाय नमः" इति प्रणम्य, उत्थायोत्थाय पुनःपुनः प्रणम्य अत्यन्तसाध्वसविनयावनतो भूत्वा, भगवत्पारिषदगणनायकैर्द्वारपालैः कृपया स्नेहगर्भया दृशाऽवलोकितः सम्यगभिवन्दितैस्तैस्तैरेवानुमतः भगवन्तमुपेत्य श्रीमता मूलमन्त्रेण "[भगवन् !] माम् ऐकान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्व" इति याचमानः प्रणम्यात्मानं भगवते निवेदयेत् ॥

ततो भगवता स्वयमेवात्मसञ्जीवनेनामर्यादशीलवताऽतिप्रेमान्वितेनावलोकनेनावलोक्य सर्वदेशसर्वकालसर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतः अनुज्ञातश्च अत्यन्तसाध्वसविनयावनतः किङ्कुर्वाणः कृताञ्जलिपुटः भगवन्तमुपासीत ॥ ४ ॥

ततश्चानुभूयमानभावविशेषः निरतिशयप्रीत्या अन्यत् किञ्चित्कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानः भगवन्तमेव अविच्छिन्नस्रोतोरूपेणावलोकनेनावलोकयन्नासीत ॥ ५ ॥

ततो भगवता स्वयमेवात्मसञ्जीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहम् आत्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो योऽसौ पुरा समजनिष्ट जगद्धितार्थम् ।
प्राच्यं प्रकाशयतु नः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः ॥

इति श्रीभगवद्रामानुजविरचितं श्रीवैकुण्ठगद्यम् ॥

इति गद्यत्रयं समाप्तम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीभगवद्रामानुजग्रन्थमालायां नित्यग्रन्थः ॥

अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये ॥

भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वकीयैश्च कल्याणतमैरौपचारिकसांस्पर्शिकाभ्यवहारिकैर्भोगैरखिलपरिजनपरिच्छदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय, तीर्थं गत्वा, शुचौ देशे पादौ प्रक्षाल्याचम्य, तीरं संशोध्य, शुचौ देशे मूलमन्त्रेण मृदमादाय, द्विधा कृत्वा शोधिततीरे निधाय, एकेनाधिकभागेन देहमलप्रक्षालनं कृत्वा, निमज्ज्य, आचम्य, प्राणायामत्रयम् आसीनो भगवन्तं ध्यायन् कृत्वा, अन्यं मृद्भागमादाय वामपाणितले त्रिधा कृत्वा, पृथक्पृथक् संप्रोक्ष्य अभिमन्त्र्य एकेन दिग्बन्धनमस्त्रमन्त्रेण कुर्यात् ॥

अन्येन तीर्थस्य पीठम् ॥ इतरेण गात्रानुलेपनम् ॥

ततः पाणी प्रक्षाल्य उदकाञ्जलिमादाय तीर्थस्यार्घ्यमुत्क्षिप्य भगद्रामपादाङ्गुष्ठविनिस्सृतगङ्गाजलं संकल्पितपीठे आवाह्य, अर्घ्यं दत्वा, मूलमन्त्रेणाभिमन्त्र्य, उदकाञ्जलिमादाय, सप्तकृत्वोऽभिमन्त्र्य स्वमूर्धनि सिञ्चेत् ॥ एवं त्रिः पञ्चकृत्वः सप्तकृत्वो वा ॥

दक्षिणेन पाणिना जलमादाय अभिमन्त्र्य पीत्वा आचम्य स्वात्मानं संप्रोक्ष्य (परिषिच्य) तीर्थे निमग्नो भगवत्पादारविन्दविन्यस्तशिरस्को यावच्छक्ति मूलमन्त्रं जपित्वा, उत्तीर्य शुक्लवस्त्रधरो धृतोत्तरीयश्च आचम्य, ऊर्ध्वपुण्ड्रांस्तत्तन्मन्त्रेण धारयित्वा, भगवन्तमनुस्मृत्य, तत्तन्मन्त्रेण भगवत्पर्यन्ताभिधायिना मूलमन्त्रेण च जलं पीत्वा, आचम्य, प्रोक्ष्य, परिषिच्य, उदकाञ्जलिं भगवत्पादयोर्निक्षिप्य, प्राणानायम्य, भगवन्तं ध्यात्वा, अष्टोत्तरशतं मूलमन्त्रमावर्त्य, परिक्रम्य, नमस्कृत्य, आधारशक्त्यादिपृथिव्यन्तं तर्पयित्वा, श्रीवैकुण्ठादिपारिषदान्तं तर्पयित्वा, देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा संतर्प्य, वस्त्रं शुचौ देशे संपीड्य, आचम्य, आवाहिततीर्थं मूलमन्त्रेणात्मनि समाहृत्य, यागभूमिं गच्छेत् ॥

24

Digitization by Arya Samaj Charitable Foundation, Chennai

सुप्रक्षालितपाणिपादः स्वाचान्तः शुचौ देशेऽतिमनोहरे निश्शब्दे भुवं संगृह्य, तां शोषणादिभिर्विशोध्य, गुरुपरंपरया परमगुरुं भगवन्तमुपगम्य, तमेव प्राप्यत्वेन प्रापकत्वेनानिष्टनिवारकत्वेनेष्टप्रापकत्वेन च यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय, तमेव शरणमुपगच्छेदखिलेत्यादिना ॥

एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिः तमेव भगवन्तं सर्वेश्वरेश्वरमात्मनस्स्वामित्वेनानुसन्धाय, अत्यर्थप्रियाविरतविशदतमप्रत्यक्षरूपानुध्यानेन ध्यायन्नासीत ॥ ततस्तदनुभवजनितातिमात्रप्रीतिकारितपरिपूर्णकैङ्कर्यरूपपूजामारभेत ॥

भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकरसेनानेनात्मना स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयकल्याणतमद्रव्यमयानौपचारिकसांस्पर्शिकाभ्यवहारिकादिसमस्तभोगान् अतिप्रभूतानतिसमग्रानतिप्रियतमानत्यन्तभक्तिकृतान् अखिलपरिजनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादयितुमुपक्रमत इत्यनुसन्धाय, स्वदेहे पञ्चोपनिषन्मन्त्रान् संहारक्रमेण न्यस्य, प्राणायामेनैकेन दक्षिणेन पाणिना नाभिदेशे मूलमन्त्रं न्यस्य, मन्त्रोद्भूतचण्डवाय्वाप्यायितनाभीदेशस्थवायुना शरीरमन्तर्बहिश्च सर्वतत्त्वमयं तत्त्वक्रमेण विशोष्य, पुनरपि प्राणायामेनैकेन हृद्देशे मूलमन्त्रं न्यस्य, मन्त्रोद्भूतचक्राग्निज्वालोपबृंहितजाठराग्निना दग्धतत्तत्समष्टिप्रलीनसर्वतत्त्वसर्वकिल्बिषसर्वाज्ञानतद्वासनो भूत्वा, भगवद्दक्षिणपादाङ्गुष्ठे मूलमन्त्रेण स्वात्मानं प्रवेशयेत् ॥

अपरेण प्राणायामेन भगवत्प्रसादेन भगवत्किङ्करत्वयोग्यतामापाद्य, तस्मादादाय, तद्वामपादाङ्गुष्ठाधस्तान्मूलमन्त्रेणात्मानं विन्यस्य, देववामपादाङ्गुष्ठनखशीतांशुमण्डलनिर्गलद्दिव्यामृतरसैरात्मानमभिषिंच्य, भगवत्प्रसादेन तदमृतमयं सर्वकैङ्कर्यमनोहरं सर्वकैङ्कर्ययोग्यं शरीरं लब्ध्वा, तस्मिन् शरीरे पञ्चोपनिषन्मन्त्रान् सृष्टिक्रमेण विन्यस्येत् । ओं षां नमः पराय परमेष्ठ्यात्मने नमः इति मूर्ध्नि स्पृशेत् । ओं यां नमः पराय पुरुषात्मने नम इति नासाग्रे । ओं रां नमः पराय विश्वात्मने नम इति हृदये । ओं वां नमः पराय निवृत्त्यात्मने नम इति गुह्ये । ओं लां नमः पराय सर्वात्मने नम इति पादयोः । एवं न्यासं कुर्वंस्तत्तच्छक्तिमयमुद्भूतदेहं ध्यायेत् ।

पुनरपि प्राणायामेनैकेन भगवद्वामपादाङ्गुष्ठविनिस्सृतामृतधारयाऽऽत्मानमभिषिच्य कृतलाञ्छनो धृतोर्ध्वपुण्ड्रो भगवद्यागमारभेत ॥

भगवानेव सर्वं कारयतीति पूर्ववत् ध्यात्वा, हृद्यागं कृत्वा, संभारान् संभृत्यात्मनो वामपार्श्वे जलकुम्भे तोयमुत्पूर्य, गन्धपुष्पयुतं कृत्वा, सप्तकृत्वोऽभिमन्त्र्य, विशोष्य, दग्ध्वा, दिव्यामृततोयमुत्पाद्य,

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य, अन्यानि पूजाद्रव्याणि आत्मनो दक्षिणपार्श्वे निधाय, आत्मनः पुरतस्स्वास्तीर्णे पीठे क्रमेणाग्नेयादिकोणेष्वर्घ्यपाद्याचमनीयस्नानीयपात्राणि निधाय, (अस्त्र) मन्त्रेण प्रक्षाल्य, शोषणादिना पात्राणि विशोध्य, संस्कृततोयेन तानि पूरयित्वा, अर्घ्यपात्रे गन्धपुष्पकुशाग्राक्षतादीनि निक्षिपेत् । दूर्वां विष्णुपर्णीं श्यामाकं पद्मकं पाद्यपात्रे । एलालवङ्गतक्कोलल ामज्जकजातीपुष्पाण्याचमनीये । [द्वे हरिद्रे मुराशैलेयतक्कोलजटामांसीमलयजगन्धचम्पकपुष्पाणि स्नानीये] सिद्धार्थकादीनि स्नानीये ॥

अन्यस्मिन् पात्रे सर्वार्थतोयं संकल्प्य ततोऽर्घ्यपात्रं पाणिना स्पृष्ट्वा, मूलमन्त्रेणाभिमन्त्र्य, ओं नमो भगवतेऽर्घ्यं परिकल्पयामीत्यर्घ्यं परिकल्पयेत् ॥ एवं पाद्यं परिकल्पयामीति पाद्यम् । आचमनीयं परिकल्पयामीत्याचमनीयम् । स्नानीयं परिकल्पयामीति स्नानीयम् । शुद्धोदकं परिकल्पयामीति शुद्धोदकम् । ततोऽर्घ्यजलात् जलमन्येन पात्रेणादाय यागभूमिं सर्वाणि यागद्रव्याण्यात्मानं च [प्रत्येकं] प्रोक्ष्यासनं परिकल्पयेत् ॥

ओं आधारशक्त्यै नमः, ओं मूलप्रकृत्यै नमः, ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः, ओं भगवतेऽनन्ताय नागराजाय नमः, ओं [भूं] भूम्यै नमः इति यथास्थानमुपर्युपरि ध्यात्वा प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यलोकाय नमः इति [श्रीवैकुण्ठ] दिव्यलोकं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यजनपदाय नमः इति दिव्यजनपदं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यनगराय नमः इति दिव्यनगरं प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यविमानाय नमः इति दिव्यविमानं प्रणम्य, ओं आनन्दमयाय दिव्यमण्टपरत्नाय नमः इति मण्टपरत्नं प्रणम्य, तस्मिन्, अनन्ताय [नागराजाय] नमः इत्यास्तरणं प्रणम्य, तस्मिन्नुपरि, ओं धर्माय नमः इत्याग्नेय्यां पादं विन्यस्य, ओं ज्ञानाय नमः इति नैर्ऋत्याम्, ओं वैराग्याय नमः इति वायव्याम्, ओं ऐश्वर्याय नमः इत्यैशान्याम्, ॐ अधर्माय नमः इति प्राच्यां पीठ गात्रं विन्यस्य, ॐ अज्ञानाय नमः इति दक्षिणस्याम्, ओं अवैराग्याय नमः इति प्रतीच्याम्, ओं अनैश्वर्याय नमः इत्युत्तरस्याम्, एभिः परिच्छिन्नतनुं पीठभूतं सदात्मकमनन्तं विन्यस्य, पश्चात् सर्वकार्योन्मुखं विभुमनन्तम्– ओं अनन्ताय नमः इति विन्यस्य, तस्मिन्नुपरि ओं पद्माय नमः इति पद्मं विन्यस्य, तत्पूर्वपत्रे ॐ विमलायै (चामरहस्तायै) नमः इति विमलां चामरहस्तां विन्यस्य, तत आरभ्य प्रादक्षिण्येनैशानान्तं पत्रेषु ओं उत्कर्षिण्यै (चामरहस्तायै) नमः, ओं ज्ञानायै (चामरहस्तायै) नमः ओं क्रियायै (चामरहस्तायै) नमः ओं योगायै (चामरहस्तायै) नमः, ओं प्रह्व्यै (चामरहस्तायै) नमः, ओं सत्यायै (चामरहस्तायै) नमः, ओं ईशानायै (चामरहस्तायै) नमः– इति सप्त शक्तीश्चामरहस्ता विन्यस्य, ओं अनुग्रहायै (चामरहस्तायै) नमः इति कर्णिकापूर्वभागेऽनुग्रहां चामरहस्तां विन्यस्य, ओं जगत्प्रकृतये योगपीठाय नमः इति योगपीठं विन्यस्य, ओं [दिव्याय योगपर्यङ्काय] दिव्ययोगपीठपर्यङ्काय नमः इति दिव्ययोग [पीठ]

Digitization by Arya Samaj Charitable Foundation, Chennai

पर्यङ्कं विन्यस्य, तस्मिन्ननन्तं नागराजं सहस्रफणाशोभितम् ओं अनन्ताय नागराजाय नमः इति विन्यस्य, ओं अनन्ताय नमः इति पुरतः पादपीठं विन्यस्य, सर्वाण्याधारशक्त्यादीनि पीठान्तानि तत्त्वानि प्रत्येकं गन्धपुष्पधूपदीपैरभ्यर्च्य, सर्वपरिवाराणां तत्तत्स्थानेषु पद्मासनानि संकल्प्य, अनन्तगरुडविष्वक्सेनानां सपीठकं पद्मं विन्यस्य, सर्वतः पुष्पाक्षतादीनि विकीर्य, योगपीठस्य पश्चिमोत्तरदिग्भागे ओं अस्मद्गुरुभ्यो नमः इति गुरून् गन्धपुष्पधूपदीपैस्संपूज्य, प्रणम्यानुज्ञाप्य भगवद्यागमारभेत ॥

कल्पिते नागभोगे समासीनं भगवन्तं नारायणं पुण्डरीकदलामलायताक्षं किरीटमकुटकेयूरहारकटकादिसर्वभूषणैर्भूषितं आकुञ्चितदक्षिणपादं प्रसारितवामपादं जानुविन्यस्तप्रसारितदक्षिणभुजं नागभोगविन्यस्तवामभुजम् ऊर्ध्वभुजद्वयेन शङ्खचक्रधरं सर्वेषां सृष्टिस्थितिप्रलयहेतुभूतमञ्जनाभं कौस्तुभेन विराजमानं चकासतमुदग्रप्रबुद्धस्फुरदपूर्वाचिन्त्यपरमसत्त्वपञ्चशक्तिमयविग्रहं पञ्चोपनिषदैर्ध्यात्वा, आराधनाभिमुखो भवेति [मूलमन्त्रेण] प्रार्थ्य, मूलमन्त्रेण दण्डवत्प्रणम्य, उत्थाय, स्वागतं निवेद्य, यावदाराधनसमाप्ति सान्निध्ययाचनं कुर्यात् ॥

अन्यत्र स्वाभिमतदेशे पूजा चेदेवमावाहनम्—

मन्त्रयोगस्समाह्वानं करपुष्पोपदर्शनम् । बिम्बोपवेशनं चैव योगविग्रहचिन्तनम् ॥

प्रणामश्च समुत्थानं स्वागतं पुष्पमेव च । सान्निध्ययाचनं चेति तत्राह्वानस्य सत्क्रियाः ॥

ततो भगवन्तं प्रणम्य दक्षिणतः, ओं श्रीं श्रियै नम इति श्रियमावाह्य प्रणम्य, वामतः ओं भूं भूम्यै नम इति भुवमावाह्य, तत्रैव ओं नीं नीलायै नम इति नीलामावाह्य, ओं किरीटाय मकुटाधिपतये नम इत्युपरि भगवतः पश्चिमपार्श्वे चतुर्बाहुं चतुर्वक्त्रं कृताञ्जलिपुटं मूर्ध्नि भगवत्किरीटं धारयन्तं किरीटाख्यदिव्यपुरुषं प्रणम्य, एवमेव ओं किरीटमाल्यायापीडकात्मने नम इत्यापीडकं तत्रैव (पुरस्तात्) प्रणम्य, ओं दक्षिणकुण्डलाय मकरात्मने नमः इति दक्षिणकुण्डलं दक्षिणतः प्रणम्य, ओं वामकुण्डलाय मकरात्मने नमः इति वामकुण्डलं वामतः प्रणम्य, ओं वैजयन्त्यै वनमालायै नम इति वनमालां पुरतः प्रणम्य, ओं श्रीतुलस्यै नम इति तुलसीं (देवीं) पुरतः प्रणम्य, ओं श्रीवत्साय श्रीनिवासाय नम इति श्रीवत्सं पुरतः प्रणम्य, ओं हाराय सर्वाभरणाधिपतये नम इति हारं पुरतः प्रणम्य, ओं श्रीकौस्तुभाय सर्वरत्नाधिपतये नम इति कौस्तुभं पुरतः प्रणम्य, ओं काञ्चीगुणोज्ज्वलाय पीताम्बराय नम इति पीताम्बरं पुरतः प्रणम्य, ॐ सर्वेभ्यो भगवद्भूषणेभ्यो नम इति सर्वभूषणानि सर्वतः प्रणम्य, ओं सुदर्शनाय हेतिराजाय नम इति सुदर्शनं रक्तवर्णं रक्तनेत्रं (द्वि) चतुर्भुजं कृताञ्जलिपुटं भगवन्तमालोकयन्तं तद्दर्शनानन्दबृंहितमुखं मूर्ध्नि भगवच्चक्रं धारयन्तं

Digitization by Arya Samaj Charitable Foundation, Chennai

दक्षिणतः प्रणम्य, ओं नन्दकाय खड्गाधिपतये नम इति नन्दकात्मानं शिरसि भगवत्खड्गं धारयन्तं तत्रैव प्रणम्य, ओं पद्माय नम इति पद्मं (पद्मं शिरसि धारयन्तं) प्रणम्य, ओं पाञ्चजन्याय शङ्खाधिपतये नम इति शङ्खात्मानं सितवर्णं (रक्तनेत्रं) द्विभुजं कृताञ्जलिपुटं शिरसि भगवच्छङ्खं धारयन्तं वामतः प्रणम्य, ओं कौमोदक्यै गदाधिपतये नम इति गदात्मानं तत्रैव प्रणम्य, तत्रैव ओं शार्ङ्गाय चापाधिपतये नम इति शार्ङ्गात्मानं प्रणम्य, ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नम इति सर्वायुधानि परितः प्रणम्य, ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नम इति दिव्यपादारविन्दसंवाहिनीस्समन्ततः प्रणम्य, ॐ अनन्ताय नागराजाय इति पृष्ठतोऽनन्तं (भगवन्तं) नागराजं चतुर्भुजं हलमुसलधरं कृताञ्जलिपुटं फणामणिसहस्रमण्डितोत्तमाङ्गं भगवन्तमालोकयन्तं भगवत्स्पर्शनानन्दबृंहितसर्वगात्रं ध्यात्वा प्रणम्य, ॐ सर्वेभ्यो भगवत्परिजनेभ्यो नम इत्यनुक्तानन्तपरिजनान् समन्ततः प्रणम्य, ओं भगवत्पादुकाभ्यां नम इति भगवत्पादुके पुरतः प्रणम्य, ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नम इति सर्वपरिच्छदान् समन्ततः प्रणम्य, ओं वैनतेयाय नम इत्यग्रतो (भगवतो भगवन्तं) वैनतेयमासीनं द्विभुजं कृताञ्जलिपुटं ध्यात्वा प्रणम्य, ओं नमो भगवते विष्वक्सेनायेति भगवतः प्रागुत्तरपार्श्वे दक्षिणाभिमुखं भगवन्तं विष्वक्सेनमासीनं चतुर्भुजं शङ्खचक्रधरं कृताञ्जलिपुटं नीलमेघनिभं ध्यात्वा प्रणम्य, ओं गं गजाननाय नमः, ओं जं जयत्सेनाय नमः, ओं हं हरिवक्त्राय नमः, ओं कं कालप्रकृतिसंज्ञाय नमः, ओं सर्वेभ्यो भगवद्विष्वक्सेनपरिजनेभ्यो नमः इति विष्वक्सेनपरिजनान् प्रणम्य, ओं चण्डाय द्वारपालाय नमः, ओं प्रचण्डाय द्वारपालाय नमः इति पूर्वद्वारपार्श्वयोः प्रणम्य, ओं भद्राय द्वारपालाय नमः, ओं सुभद्राय द्वारपालाय नमः इति दक्षिणद्वारपार्श्वयोः प्रणम्य, ओं जयाय द्वारपालाय नमः, ओं विजयाय द्वारपालाय नमः इति पश्चिमद्वारपार्श्वयोः प्रणम्य, ॐ धात्रे द्वारपालाय नमः, ॐ विधात्रे द्वारपालाय नमः इत्युत्तरद्वारपार्श्वयोः प्रणमेत् ॥

एते द्वारपालास्सर्वे शङ्खचक्रगदाधरा आज्ञामुद्रायुता ध्यातव्याः ॥

ॐ सर्वेभ्यो भगवद्द्वारपालेभ्यो नम इति सर्वद्वारेषु सर्वद्वारपालान् प्रणम्य, ॐ कुमुदाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति पूर्वस्यां दिशि पार्षदेश्वरं कुमुदं प्रणम्य, ॐ कुमुदाक्षाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इत्याग्नेय्यां कुमुदाक्षं प्रणम्य, ॐ पुण्डरीकाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति दक्षिणस्यां पुण्डरीकं प्रणम्य, ॐ वामनाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति नैर्ऋत्यां वामनं प्रणम्य, ॐ शङ्कुकर्णाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति पश्चिमस्यां शङ्कुकर्णं प्रणम्य, ॐ सर्पनेत्राय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति वायव्यां सर्पनेत्रं प्रणम्य, ॐ सुमुखाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इत्युदीच्यां सुमुखं प्रणम्य, ॐ सुप्रतिष्ठिताय गणाधि-

Digitization by Arya Samaj Charitable Foundation, Chennai

पतये सवाहनपरिवारप्रहरणाय नम इत्यैशान्यां सुप्रतिष्ठितं प्रणम्य, ॐ सर्वेभ्यो भगवत्पारिषदेभ्यो नम इति सर्वस्माद्बहिः प्रणमेत् ॥

अन्यत्रावाह्य पूजायामावाहनस्थानानि परमव्योमक्षीरार्णवादित्यमण्डलहृदयानि मधुराद्वारकागोकुलायोध्यादीनि दिव्यावतारस्थानानि चान्यानि पौराणिकानि श्रीरङ्गादीनि च यथारुचि ॥

एवं भगवन्तं नारायणं देवीभूषणायुधपरिजनपरिच्छदद्वारपालपारिषदैस्सेव्यमानं स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवं ध्यात्वा, प्रणम्य, मूलमन्त्रेण स्वात्मानं देवाय निवेद्य, प्रणम्यानुज्ञाप्य, भगवत्पूजामारभेत ॥

पात्रेण पूर्वस्थापितार्घ्यपात्रादर्घ्यजलमादाय पाणिभ्यां मुखसममुद्धृत्य, भगवन्! इदं प्रतिगृह्णीष्वेति चिन्तयन् भगवन्मुखे दर्शयित्वा भगवद्दक्षिणहस्ते किंचित्प्रदायार्घ्यं प्रतिग्रहपात्रे प्रक्षिपेत् । हस्तौ प्रक्षाल्य पादयोः पुष्पाणि समर्प्य पाद्यपात्रात्पाद्यजलमादाय पादयोः किंचिद्दत्वा मनसा पादौ प्रक्षालयन् पाद्यं प्रतिग्रहपात्रे निक्षिपेत् । (हस्तौ प्रक्षाल्य) वस्त्रेण पादौ संमृज्य गन्धपुष्पाणि दत्वा, आचमनीयपात्रादाचमनीयमादाय भगवद्दक्षिणहस्ते किंचित्प्रदाय भगवद्वदने आचमनीयं समर्पितमिति मनसा भावयन् शेषमाचमनीयं प्रतिग्रहपात्रे निक्षिपेत् । ततो गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलादिनिवेदनं कृत्वा, प्रणम्यात्मानमात्मीयं च सर्वं भगवन्! नित्यकिंकरत्वाय स्वीकुर्विति भगवते निवेदयेत् । ततः स्नानार्थमासनमानीय गन्धादिभिरभ्यर्च्य भगवन्तं प्रणम्यानुज्ञाप्य, पादुके प्रदाय, तत्रोपविष्टे माल्यभूषणवस्त्राण्यपनीय, विष्वक्सेनाय दत्वा, स्नानशाटिकां प्रदाय, पाद्याचनीयपादपीठप्रदानदन्तकाष्ठजिह्वानिर्लेहनगण्डूषमुखप्रक्षालनाचमनादर्शप्रदर्शनहस्तप्रक्षालनमुखवासताम्बूलतैलाभ्यङ्गोद्वर्तामलकतोयकङ्कतप्लोतदेहशोधनशाटिकाप्रदानहरिद्रालेपनप्रक्षालनवस्त्रोत्तरीययज्ञोपवीतप्रदानपाद्याचमनपवित्रप्रदानगन्धपुष्पधूपदीपाचमननृत्तगीतवाद्यादिसर्वमङ्गलसंयुक्ताभिषेकनीराजनाचमनदेहशोधनप्लोतवस्त्रोत्तरीययज्ञोपवीताचमनकूर्चप्रसारणसहस्रधाराभिषेकनीराजनाचमनदेहशोधनप्लोतवस्त्रोत्तरीययज्ञोपवीताचमनानि दद्यात् ॥

ततोऽलङ्कारासनमभ्यर्च्य प्रणम्यानुज्ञाप्य, पादुके प्रदाय, तत्रोपविष्टे पूर्ववत् स्नानीयवर्जमर्घ्यपाद्याचमनीयशुद्धोदकानि मन्त्रेण कल्पयित्वा भगवते गन्धपुष्पपादसंमर्दनवस्त्रोत्तरीयभूषणोपवीतार्घ्यपाद्याचमनीयानि दत्वा, सर्वपरिवाराणां स्नानवस्त्रादिभूषणान्तं दत्वा, गन्धादीन् देवानन्तरं सर्वपरिवाराणां प्रत्येकं प्रदाय, धूपदीपाचमनीयानि दद्यात् ॥ अथवा सर्वपरिवाराणां गन्धादीनेव दद्यात् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

गन्धपुष्पप्रदानालङ्काराञ्जनोर्ध्वपुण्ड्रादर्शधूपदीपाचमनध्वजच्छत्रचामरवाहनशङ्खचिह्नकाहलभेर्यादिसकल-नृत्तगीतवाद्यादिभिरभ्यर्च्य मूलमन्त्रेण पुष्पं प्रदाय, प्रत्यक्षरं पुष्पं प्रदाय द्वादशाक्षरेण विष्णुषडक्षरेण विष्णु-गायत्र्या पञ्चोपनिषदैः पुरुषसूक्तर्ग्भिरन्यैश्च भगवन्मन्त्रैश्शक्तश्चेत्पुष्पं प्रदाय, देव्यादिदिव्यपारिषदान्तं तत्तन्मन्त्रेण पुष्पं दत्वा प्रणम्य, प्रतिदिशं प्रदक्षिणप्रणामपूर्वकं भगवते पुष्पाञ्जलिं दत्वा पुरतः प्रणम्य, श्रुतिसुखैः स्तोत्रैः स्तुत्वा, आत्मानं नित्यकिंकरतया निवेद्य, तथैव ध्यात्वा, यथाशक्ति मूलमन्त्रं जपित्वा, सर्वभोगप्रपूरणीं मात्रां दत्वा, मुखवासताम्बूले प्रदाय, अर्घ्यं दत्वा, भोज्यासनमभ्यर्च्य प्रणम्योनुज्ञाप्य पादुके प्रदाय, तत्रोपविष्टे पाद्याचमनीयार्हणानि दत्वा, गुडं माक्षिकं सर्पिर्दधि क्षीरं चेति पात्रे निक्षिप्य शोषणादिभिर्विशोध्य, अर्घ्यजलेन संप्रोक्ष्य, मधुपर्कमवनतशिरा हर्षोत्फुल्लनयनो हृष्टमना भूत्वा प्रदायाचमनीयं दद्यात् । यत्किंचिद्द्रव्यं भगवते दीयते तत्सर्वं शोषणादिभिर्विशोध्यार्घ्यजलेन संप्रोक्ष्य दद्यात् ॥

ततश्च गां स्वर्णरत्नादिकं च यथाशक्ति दद्यात् । ततस्सुसंस्कृतान्नमाज्याढ्यं दधिक्षीरमधूनि च फलमूलव्यञ्जनानि मोदकांश्चान्यानि च लोके प्रियतमान्यात्मनश्चेष्टानि शास्त्राविरुद्धानि संभृत्य शोषणादिभि-र्विशोध्यार्घ्यजलेन संप्रोक्ष्यास्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य अर्हणपूर्वकं हविर्निवेदयेत् ॥ अतिप्रभूत-मतिसमग्रमतिप्रियतममत्यन्तभक्तिकृतमिदं स्वीकुर्विति प्रणामपूर्वकमत्यन्तसाध्वसविनयावनतो भूत्वा निवेदयेत् ॥

ततश्चानुपानतर्पणे प्रदाय हस्तप्रक्षालनाचमनहस्तसंमार्जनचन्दनमुखवासताम्बूलादीनि दत्वा प्रणम्य पुनर्मन्त्रासनं कूर्चेन मार्जयित्वा, अभ्यर्च्यानुज्ञाप्य, पादुके प्रदाय तत्रोपविष्टे माल्यादिकमपोह्य विष्वक्सेनाय दत्वा, पाद्याचमनीयगन्धपुष्पधूपदीपाचमनापूपफलादीनि दत्वा, आचमनमुखवासताम्बूलनृत्तगीतवाद्यादिभि-रभ्यर्च्य, प्रदक्षिणीकृत्य दण्डवत्प्रणम्य, पर्यङ्कासनमभ्यर्च्यानुज्ञाप्य पादुके प्रदाय, तत्रोपविष्टे पाद्याचमने दत्वा माल्यभूषणवस्त्राण्यपनीय विष्वक्सेनाय दत्वा सुखशयनोचितं सुखस्पर्शं च वासस्तदुचितानि भूषणान्युपवीतं च प्रदायाचमनीयं दत्वा गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलादिभिरभ्यर्च्य श्रुतिसुखैः स्तोत्रैरभिष्टूय भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकरसेनानेनात्मना स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयकल्याणतमद्रव्य-मयानौपचारिकसांस्पर्शिकाभ्यवहारिकादिसमस्तभोगानतिप्रभूतानतिसमग्रानतिप्रियतमानत्यन्तभक्तिकृतानखिलपरि-जनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादितवानित्यनुसंधाय, भगवन्तमनुज्ञाप्य, भगवन्निवेदित-हविश्शेषाद्विष्वक्सेनाय किंचिदुद्धृत्य निधायान्यत्सर्वं स्वाचार्यप्रमुखेभ्यो वैष्णवेभ्यो दत्वा, भगवद्यागावशिष्टै-र्जलादिभिर्द्रव्यैर्विष्वक्सेनमभ्यर्च्य, पूर्वोद्धृतं हविश्च दत्वा, तदर्चनं परिसमाप्य, भगवन्तमष्टाङ्गेन प्रणामेन प्रणम्य शरणमुपगच्छेत् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥
प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतः प्रभोः ॥

इत्युक्तोऽष्टाङ्गप्रणामः । शरणागतिप्रकारश्च पूर्वोक्तः ॥

ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

इति श्रीभगवद्रामानुजविरचितो नित्यग्रन्थस्समाप्तः ॥

श्रीभगवद्रामानुजग्रन्थमाला समाप्ता ।

श्रीमते रामानुजाय नमः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

गीताभाष्योपात्तप्रमाणवाक्यानामकारादिक्रमेण सूची ॥

[संख्या — पृष्ठसंख्या]

अंशावतारं पुरुषोत्तमस्य १३९
अकारो वै सर्वा ९४
अग्नौ प्रास्ताहुति २७
अजामेकां लोहित ११५
अजायमानो ३६
अणोरणीयान् २३
अथ परा यया तदक्षर ११०
अथ य इमे ग्राम ७६
अथ यदतः परो ९०, १६८
अथ यदिदमस्मिन् १३८
अध्यात्मयोगाधि २३
अनाशी परमार्थ ९
अन्तः प्रविष्ट ३०, ११६, १३८, १५६
अन्नमयं हि १४७, १५४
अपहतपाप्मा ११७
अपाणिपादो १२१
अव्यक्तमक्षरे ६, ७१, ७९, ११६
असद्वा इदमग्र १२०
अस्थानस्नेह ६
अस्मान्मायी ८०, ११५
अहं त्वं च तथा ११८
आत्मानमेव लोक ६२
आत्मा वा अरे ६२
आत्मा शुद्धो ११८
आदित्यवर्णं ३६, १०२
आदिदेवो महायोगी ९१
आयुराशास्ते १५
आसीदिदं ७९
आहारशुद्धौ २२, १४७, १५४
इति तु पञ्चम्या ७६
इन्द्रं यजेत १३८
इन्द्रियाणि मनो ११८
इमं मानव ७६
उदारपीवर १०८

उपसंहर १०७
ऊर्ध्वमूलम् १३४
ऊर्ध्वमूलो १३४
ऊष्मभागा हि १०१
एतस्य वा अक्षरस्य ७९
एतेन प्रतिपद्यमाना ७५
एवमेवैष संप्रसादो २३
एष नारायणः ९१
एष सर्वभूतान्त ६४
ऐतदात्म्यमिदं ११६
ऐन्द्राग्नमेकादश १३४
कर्ता शास्त्रार्थ १२३, १५६
कर्मवश्या गुणा ११८
किं त्वमेतच्छिरः ११८
कृतप्रयत्नापेक्ष १५७
कृष्ण एव हि ३५, ९१
क्षयन्तमस्य रजसः ३६, १०२
क्षरं प्रधानममृता ११५
गौरनाद्यन्तवती ११५
चतुर्होतारो ८३
जक्षत्क्रीडन् १२१
जातोसि १०७
ज्ञाज्ञौ ११५
ज्ञोत एव ११८, १५६
तं देवा ज्योतिषां ९०
ततो भगवता ६५
तत्सृष्ट्वा ११६
तदक्षरे परमे १०२
तदा विद्वान् ४३, १२१
तदैक्षत ११६, ११७
तद्वेदं ११६, १२०
तद्य इत्थं ७५, ७६
तद्यथेषीकतूल ९०
तद्विष्णोःपरमं १६८
तन्नामरूपा ११७

तम आसीत्तमसा ७९
तमीश्वराणां ३१, ५२
तमेतं वेदानुवचने १५६
तमेवं विद्वानमृत ६२
तमेव विदित्वा ६२
तयोरन्यः ११५
तस्मादेत २७, ११६
तस्माद्वा एतस्मा ११८
तस्मान्नवि ९
तस्मिन्नयं ३६
तस्य धीराः ३७
तस्य ह वा एतस्य ११७
तेन मायासहस्रं ६५
तेनेयं नागवर्येण १४२
तेर्चिषमभि ७६
तेह नाकं महि १६८
त्यागेनैके १५५, १६२
त्रैलोक्यं पुण्ड ९१
द्वे विद्ये वेदितव्ये १००
न कर्मणा १५२
न कर्माविभागा ७९
न जायते १०५, १२०
न वा उ वे त १३
नवियदश्रुतेः ११८
न हिंस्यात् १०
नात्माश्रुतेः ११८
नायमात्मा २३, ६२, १०८
नारायणपरं ९०
नाविरतो ८६, १५५
नित्यात्मासङ्ग २२
नित्यो नित्यानां ७, ११५
निमित्तमात्रं ३८
निरञ्जनः परमं ५७, ११०
निरवद्यम् ८८
नेह नानास्ति ११७

Digitization by Arya Samaj Charitable Foundation, Chennai

गीताभाष्योपात्तप्रमाणवाक्यानामकारादिक्रमेण सूची ।

पञ्चम्यामाहुता ७१
पतिं पतीनाम् ३१
पतिं विश्वस्य २६, ३१
पद्मकोशप्रती १३८
परमात्मा च ६४
परात्तु ११८, १५६
परात्परं १००
परास्य ७, ११७
परेण नाकं १६८
परं ज्योति ९०, १३९
पवित्राणां हि ९१
पिण्डः पृथग्यतः ११८
पुण्या द्वारवती ९१
पुण्यः पुण्येन ९
पृथगात्मानं ११५
पृथिव्यप्सु प्र ७४
प्रकृतिर्या ६४
प्रधानक्षेत्रज्ञ ११५, १२०
प्रशासितारं ३०, १३८
प्राजापत्यं १५५
बहु स्यां ११७
ब्रह्मविदाप्नोति ९०
ब्राह्मणो न हन्तव्यः ९०
भारूपस्सत्य ३६
भिद्यते हृदय ६२
भीषास्माद्वातः ७९
भोक्ता भोग्यं ११५
मन एव मनुष्याणां ५४
महानव्यक्ते ६४
महान्तं विभु २३
मायया सततं ३६
मायां तु ६५, ११५
माया वयुनं ३६
माहारजतं ३६
मृत्योस्स मृत्यु ११७
मेघोदयस्सागर ७९
य आत्मनि ३०, ७६, ७८, ९२, ११५, ११६, १२०, १३८, १५६, १६८
य आत्मा अपहत २३
य आदित्ये तिष्ठन् ६८
य एषोन्तरादित्ये ३६
यः पृथिवीमन्तरो ११६
यः पृथिव्यां ७८,११५,११६,१३८
यतो वा इमानि ९०
यत्तु कालान्तरेणा ९
यत्र ऋषयः १६८
यत्र त्वस्य ११७
यत्र नारायणो ९१
यत्र हि द्वैतमिव ११७
यथाग्निरुद्धत २०
यथा पुष्कर ९०
यमेवैष ७४
यस्तमात्मान २३
यस्य पृथिवी ६४, ७८
यस्यात्मा ६४, ७८
यस्यायुतायुतां ९६
यस्याव्यक्तं ७९
यस्सर्वज्ञस्सर्व ७, ११७
यस्सर्वेषु भूतेषु ९२
याः क्रियास्संप्र ८४
ये च वेदविदो ९१
ये चेमेरण्ये ७६
यो अस्याध्यक्षः १०२, १६८
योक्षरमन्तरे ११६
यो ब्रह्माणं ८८
यो मृत्युमन्तरे ११६
रमणीयचरणाः ७६
वायव्यं श्वेत १३४
विज्ञातारमरे ११७
विज्ञानसारथि २३
विष्णोः स्वरूपात् ६४
वेदाहमेतं १००, १६९
वैषम्यनैर्घृण्ये ३८, ७९
शास्ता विष्णुर १३८
स एकधा भवति १२१
स एतान् ब्रह्म ७५
स एनान् ब्रह्म ७६
स कारणं ११५, १२०
स चानन्त्याय १२०
सत्यं चानृतं च ११६
सत्यं ज्ञानमन ११७
सत्यकामस्सत्य ११७
सत्वशुद्धौ ध्रुवा ६२
स त्वासक्तमतिः ६६
सदेव सोम्येद ११६
सद्भाव एवं भवतो ९
सन्ध्याहीनो १४२
सन्मूलास्सोम्ये ११६
समस्तावयवेभ्यः ११८
समाने वृक्षे ११५
स यो ह वैतत्परमं ९०
सर्वं तं परादात् ११७
सर्वे निमेषा ३६
स वः कः किं १५१
सोकामयत ११६, ११७
सोध्वनः पार १६८
स्नेहपूर्वमनु ६२
हन्ताहमिमा ११६

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीमद्भगवद्गीतापादानुक्रमणिका ॥

पा.–पादादि. अ.–अध्यायसंख्या. श्लो.–श्लोकसंख्या.

पा.	अ.	श्लो.
अकर्तारं स	१३	२९
अकर्मणश्च	४	१७
अकर्मणि	४	१८
अकीर्तिकर	२	२
अकीर्तिं चापि	२	३४
अक्लेद्यो	२	२४
अक्षरं ब्रह्म	८	३
अक्षराणामका	१०	३३
अक्षरादपि	१५	१८
अग्निर्ज्योति	८	२४
अघायुरिन्द्रिया	३	१६
अचरं चरमेव	१३	१५
अचलोऽयं	२	२४
अचिरेणाधि	४	३९
अच्छेद्योऽयम्	२	२४
अजानता	११	४१
अजो नित्यः	२	२०
अजोऽपि	४	६
अज्ञश्चाश्रद्द	४	४०
अज्ञानं चाभि	१६	४
अज्ञानं तमसः	१४	१६
अज्ञानं यदतो	१३	११
अज्ञानां कम	३	२६
अज्ञानेनावृत	५	१५
अणोरणीयांसम्	८	९
अत उर्ध्वं	१२	८
अतत्त्वार्थ	१८	२२
अतीतो भवात	१४	२१
अतोऽस्मि लोके	१५	१८
अत्यन्तं	६	२८
अत्यति तत्सर्वम्	८	२८
अत्र शूरा	१	४
अथ केन	३	३६
अथ चित्तं	१२	९
अथ चेत्त्वमह	१८	५८
अथ चेत्त्वमिमं	२	३३
अथ चैनं	२	२६
अथवा बहुना	१०	४२
अथवा योगिनाम्	६	४२
अथ व्यवस्थितान्	१	२०
अथैतदप्य	१२	११
अदृष्टपूर्वं	११	४५
अदेशकाले	१७	२२
अद्भुतं रोम	१८	७४
अद्रोहो नाति	१६	३
अद्वेष्टा सव	१२	१३
अध ं धर्ममिति	१८	३२
अधर्माभिभवात्	१	४१
अधर्मोऽभि	१	४०
अधश्च मूलानि	१५	२
अधश्चोर्ध्वं	१५	२
अधिदैवं	८	१
अधिभूतं क्षरो	८	४
अधिभूतं च किं	८	१
अधियज्ञः कथं	८	२
अधियज्ञोऽहम्	८	४
अधिष्ठानं तथा	१८	१४
अधिष्ठाय मनः	१५	९
अधो गच्छन्ति	१४	१८
अध्यात्मं कर्म	७	२९
अध्यात्मज्ञान	१३	११
अध्यात्मनित्या	१५	५
अध्यात्मविद्या	१०	३२
अध्येष्यते च	१८	७०
अनन्तं विश्वतो	११	११
अनन्त देवेश	११	३७
अनन्तबाहुं	११	१९
अनन्तविजय	१	१६
अनन्तवीर्यामित	११	४०
अनन्तश्चास्मि	१०	२९
अनन्यचेताः	८	१४
अनन्याश्चिन्त	९	२२
अनन्येनैव	१२	६
अनपेक्षः	१२	१६
अनयोस्तत्त्व	२	१६
अनवेक्ष्य च	१८	२५
अनहंकार एव	१३	८
अनात्मनस्तु	६	६
अनादित्वात्	१३	३१
अनादि मत्परं	१३	१२
अनादिमध्यान्त	११	१९
अनार्यजुष्टम्	२	२
अनाशिनो	२	१८
अनाश्रितः कर्म	६	१
अनिकेतः स्थिर	१२	९
अनिच्छन्नपि	३	३६
अनित्यमसुखं	९	३३
अनिष्टमिष्ट मिश्रं	१८	१२
अनुतिष्ठन्ति	३	३१
अनुद्वेगकरं	१७	१५
अनुबन्धं क्षयं	१८	२५
अनेकचित्त	१६	१६
अनेकजन्म	६	४५
अनेक दिव्या	११	१०
अनेकबाहू	११	१६
अनेकवक्र	११	१०
अनेकाद्भुत	११	१०
अनेन प्रस	३	१०
अनेनैव	११	८
अन्तकाले	८	५
अन्तरं ज्ञान	१३	३४
अन्तवत्तु फलं	७	२३
अन्तवन्त इमे	२	१८
अन्नाद्भवन्ति	३	१४
अन्यः प्रियतरो	१८	६९
अन्यथाऽऽवर्तते	८	२६
अन्यानि संयाति	२	२२
अन्यायेनार्थ	१६	१२
अन्ये च बहवः	१	९
अन्ये त्वेवम्	१३	२५
अन्ये सांख्येन	१३	२४
अपरस्पर	१६	८
अपरे नियता	४	३०
अपरेयमितः	७	५
अपर्याप्तं	१	१०
अपश्यद्देव	११	१३
अपात्रेभ्य	१७	२२
अपाने जुह्वति	४	२९
अपि चेत्सु	९	३०
अपिचेदसि	४	३६
अपि त्रैलोक्य	१	३५
अप्रकाशो	१४	१३
अप्रतिष्ठो	६	३८
अप्राप्य मां	९	३

अप्राप्य योग	६	३७
अफलप्रेप्सुना	१८	२३
अफलाकाङ्क्षि-भिर्यज्ञो	१७	११
अफलाकाङ्क्षि-भिर्युक्तैः	१७	१७
अभयं सत्त्व	१६	१
अभिजातस्य	१६	३
अभिजातोऽसि	१६	५
अभितो ब्रह्म	५	२६
अभिसंधाय	१७	१२
अभ्यासयोग	८	८
अभ्यासयोगेन	१२	९
अभ्यासाद्रमते	१८	३६
अभ्यासेन	६	३५
अभ्यासेऽप्य	१२	१०
अभ्युत्थान	४	७
अमलान्प्राति	१४	१४
अमानित्व	१३	७
अमी[च त्वा]सर्वे	११	२६
अमी हि त्वा	११	२१
अमृतं चैव	९	१९
अमृतस्याव्य	१४	२७
अयतिः	६	३७
अयथावत्	१८	३१
अयनेषु च	१	११
अयुक्तः काम	५	१२
अयुक्तः प्राकृतः	१८	२८
अरतिर्जन	१३	१०
अरागद्वेषतः	१८	२३
अवजानन्ति	९	११
अवरं भवतो	४	४
अवशं प्रकृतेः	९	८
अवाच्यवादांश्च	२	३६
अवाप्य भूमौ	२	८
अविकार्योऽयम्	२	२५
अविनाशि तु	२	१७
अविभक्तं च	१३	१६
अविभक्तं वि	१८	२०
अव्यक्तं पर्यु	१२	३
अव्यक्तं व्यक्ति	७	२४
अव्यक्तनिधना	२	२८
अव्यक्तादीनि	२	२८
अव्यक्ताद्व्यक्तयः	८	१८
अव्यक्तासक्त	१२	५
अव्यक्ता हि	१२	५
अव्यक्तोऽक्षर	८	२१
अव्यक्तोऽय	२	२५
अव्यक्तोऽव्य	८	२०
अशस्त्रं शस्त्र	१	४६
अशान्तस्य	२	६६
अशास्त्रविहितं	१७	५
अशोच्यानन्व	२	११
अश्नन् गच्छन्	५	८
अश्नन्ति दिव्यान्	९	२०
अश्नामि प्रयता	९	२६
अश्रद्दधाना	९	३
अश्रद्धया हुतं	१७	२८
अश्रुपूर्णाकुले	२	१
अश्वत्थं प्राहु	१५	१
अश्वत्थः सर्व	१०	२६
अश्वत्थमेनं	१५	३
अश्वत्थामा	१	८
अश्विनौ	११	६
असंमूढः स	१०	३
असंयतात्मना	६	३६
असंशयं	६	३५
असंशयं समग्रं	७	१
असक्तं तेषु	९	९
असक्तं सर्व	१३	१४
असक्तः स	३	७
असक्तबुद्धिः	१८	४९
असक्तिरनभि	१३	९
असक्तो ह्याचरन्	३	१९
असङ्गशस्त्रेण	१५	३
असत्कृत	१७	२२
असत्यमप्रतिष्ठं	१६	८
असदित्युच्यते	१७	२८
असितो देवलो	१०	१३
असौ मया	१६	१४
अस्माकं तु	१	७
अस्मिन् रण	१	२२
अस्याधिष्ठान	३	४०
अहंकार इतीयं	७	४
अहंकारं बलं	१६	१८
अहंकारं बल	१८	५३
अहंकारविमू	३	२७
अहं कृत्स्नस्य	७	६
अहं क्रतुरहं	९	१६
अहं त्वा सर्व	१८	६६
अहं बीजप्रदः	१४	४
अहं वैश्वानरो	१५	१४
अहं स च	७	१७
अहं सर्वस्य	१०	८
अहं हि सर्व	९	२४
अहमग्निरहं	९	१६
अहमज्ञानजं	१०	११
अहमात्मा	१०	२०
अहमादिर्हि	१०	२
अहमादिश्च	१०	२०
अहमेवंविधो	११	५४
अहमेवाक्षयः	१०	३३
अहर्यद्ब्रह्मणो	८	१७
अहिंसा क्षान्ति	१३	७
अहिंसा सत्य	१६	२
अहिंसा समता	१०	५
अहो बत	१	४५
आकाशं नोप	१३	३२
आख्याहि मे	११	३१
आगमापायिनो	२	१४
आचरत्यात्मनः	१६	२२
आचार्य महती	१	३
आचार्यमुप	१	२
आचार्याः पितरः	१	३४
आचार्यान्मातुलान्	१	२६
आचार्योपासनं	१३	७
आढ्योऽभिजन	१६	१५
आतिष्ठोत्तिष्ठ	४	४२
आत्मतृप्तश्च	३	१७
आत्मन्येव च	३	१७
आत्मन्येव वशं	६	२६
आत्मन्येवात्मना	२	५५
आत्मन्येवाव	६	१८
आत्मबुद्धिप्रसा	१८	३७
आत्मवन्तं न	४	४१
आत्मवश्यैर्विधे	२	६४
आत्मसंभाविताः	१६	१७
आत्मसंयम	४	२७
आत्मसंस्थं मनः	६	२५
आत्मानं केवलं	१८	१६
आत्मानं परमे	११	३
आत्मानं मत्परा	९	३४
आत्मानं रहसि	६	१०
आत्मैव रिपु	६	५
आत्मैव ह्यात्मनो	६	५
आत्मौपम्येन	६	३२
आदित्यवर्णं	८	९
आदित्यानामहं	१०	२१
आदिदेवमजं	१०	१२
आद्यन्तवन्तः	५	२२

Digitization by Arya Samaj Charitable Foundation, Chennai

आपूर्यमाणम्	२	७०
आब्रह्मभुवना	८	१६
आयुःसत्त्व	१७	८
आयुधानामहं	१०	२८
आरुरुक्षोर्मुनेः	६	३
आर्तो जिज्ञासु	७	१६
आवृतं ज्ञानमेतेन	३	३९
आवृत्तिं चैव	८	२३
आशापाशशतैः	१६	१२
आश्चर्यवच्चैनम्	२	२९
आश्चर्यवत्पश्यति	२	२९
आश्चर्यवद्वदति	२	२९
आश्वासयामास	११	५०
आसुरं पाथ	१६	६
आसुरं भावम्	७	१५
आसुरीं योनिम्	१६	२०
आसुरीष्वेव	१६	१९
आस्थितः स हि	७	१८
आस्थिता जनका	३	२०
आस्थितो योग	८	१२
आहारस्त्वपि	१७	७
आहाराः सात्त्वि	१७	८
आहारा राजस	१७	९
आहुस्त्वाम्	१०	१३
इच्छा द्वेषः	१३	६
इच्छाद्वेषसमु	७	२७
इच्छामि त्वां	११	४६
इज्यते भरत	१७	१२
इति क्षेत्रं	१३	१८
इति गुह्यमतं	१५	२०
इति ते ज्ञानम्	१८	६३
इति मत्वा न	३	२८
इति मत्वा भजन्ते	१०	८
इति मां योऽभि	४	१४
इत्यज्ञानविमो	१६	१५

इत्यर्जुनंवासु	११	५०
इत्यहं वासु	१८	७४
इदं ज्ञानमुपा	१४	२
इदं तु ते गुह्य	९	१
इदं ते नातप	१८	६७
इदं वक्ष्याम्यशे	७	२
इदं शरीरं	१३	१
इदमद्य मया	१६	१३
इदमस्तीद	१६	१३
इदमाह महीपते	१	२१
इदमुक्तं मया	१५	२०
इदानीमस्मि	११	५१
इन्द्रियस्येन्द्रिय	३	३४
इन्द्रियाग्निषु	४	२६
इन्द्रियाणां मनः	१०	२२
इन्द्रियाणां हि	२	६७
इन्द्रियाणि दशैकं	१३	५
इन्द्रियाणि परा	३	४२
इन्द्रियाणि प्रमा	२	६०
इन्द्रियाणि मनो	३	४०
इन्द्रियाणीन्द्रिया	२	५८
इन्द्रियाणीन्द्रिया	२	६८
इन्द्रियाणीन्द्रियार्थेषु	५	९
इन्द्रियार्थान्	३	६
इन्द्रियार्थेषु	१३	८
इन्द्रियेभ्यः	३	४२
इमं प्राप्य	९	३३
इमं प्राप्स्ये	१६	१३
इमं राजर्षयो	४	२
इमं विवस्वते योगं	४	१
इमांस्त्वं व्याप्य	१०	१६
इषुभिः प्रतियो	२	४
इष्टः स्यामिति	१८	७०
इष्टानिष्टोपपत्तिषु	१३	९
इष्टान् भोगान्	३	१२

इष्टोऽसि मे	१८	६४
इहैकस्थं जगत्	११	७
इहैव तैर्जितः	५	१९
ईक्षते योग	६	२९
ईश्वरः सर्व	१८	६१
ईश्वरोऽहमहं	१६	१४
ईहन्ते काम	१६	१२
उक्त्वा तूष्णीं	२	९
उच्चैः श्रवसमश्वा	१०	२७
उच्छिष्टमपि	१७	१०
उत्क्रामन्तं	१५	१०
उत्तमः पुरुषः	१५	१७
उत्तमौजाश्च	१	६
उत्सन्नकुलधर्माणाम्	१	४४
उत्साद्यन्ते जाति	१	४३
उत्सीदेयुरिमे	३	२४
उदराः सर्व एवैते	७	१८
उदासीनवदासीनो	१४	२३
उदासीनवदासीनं	९	९
उदासीनो गत	१२	१६
उद्धरेदात्मना	६	५
उद्भवश्च भवि	१०	३४
उन्मिषन्निमिषन्नपि	५	९
उपदेक्ष्यन्ति ते	४	३४
उपद्रष्टाऽनुमन्ता	१३	२२
उपविश्यासने	६	१२
उपहन्यामिमाः	३	२४
उपैति शान्तरजसम्	६	२७
उभयोरपि दृष्टोऽन्तः	२	१६
उभयोर्विन्दते	५	४
उभे सुकृतदुष्कृते	२	५०
उभौ तौ न विजा	२	१९
उवाच पार्थ	१	२५
उवाच मधुसूदनः	२	१
उषित्वा शाश्वतीः	६	४१

ऊर्ध्वं गच्छन्ति	१४	१८
ऊर्ध्वमूलमधः	१५	१
ऋक्साम यजुरेव	९	१७
ऋतूनां कुसुमा	१०	३५
ऋतेऽपि त्वा	११	३२
ऋषयः क्षीण	५	२५
ऋषिभिर्बहुधा	१३	४
ऋषींश्च सर्वान्	११	१५
एकं सांख्यं च	५	५
एकत्वेन पृथक्त्वेन	९	१५
एकभक्तिर्विशिष्यते	७	१७
एकमप्यास्थितः	५	४
एकया यात्यनावृत्तिं	८	२६
एकस्थमनुपश्यति	१३	३०
एकाकी यत	६	१०
एकांशेन स्थितो	१०	४२
एकह कुरुनन्दन	२	४१
एकोऽथवा	११	४२
एतच्छ्रुत्वा वचनं	११	३५
एतत्क्षेत्रं समासेन	१३	६
एतद्गुह्यमहं	१८	७५
एतज्ज्ञानमिति	१३	११
एतद्धि दुर्लभतरं	६	४२
एतद्बुध्वा बुद्धि	१५	२०
एतद्योनीनि भूतानि	७	६
एतद्यो वेत्ति	१३	१
एतं मे संशयं	६	३९
एतस्याहं न पश्यामि	६	३३
एतां दृष्टिमवष्टभ्य	१६	९
एतां विभूतिं	१०	७
एतान्न हन्तु	१	३५
एतान्यपि तु	१८	६
एतावदिति	१६	११
एतैर्विमुक्तः	१६	२२

Digitization by Arya Samaj Charitable Foundation, Chennai

एतैर्विमोहयत्येषः	३	४०
एभिः सर्वमिदं	७	१३
एवं ज्ञात्वा कृतं	४	१५
एवं ज्ञात्वा विमो	४	३२
एवं त्रयीधर्म	९	२१
एवं यास्यसि	४	३५
एवं युञ्जन्	६	२८
एवं यो वेत्ति	४	९
एवं रूपः शक्य	११	४८
एवं सततयुक्ता	१२	१
एवमुक्त्वा ततो	११	९
एवमुक्त्वाऽर्जुनः	१	४७
एवमुक्त्वा हृषी	२	९
एवमुक्तो हृषी	१	२४
एवमेतद्यथाऽऽत्थ	११	३
एवं परम्पराप्राप्तं	४	२
एवं प्रवर्तितं चक्रं	३	१६
एवं बहुविधा यज्ञाः	४	३२
एवं बुद्धेः परं	३	४३
एष तूद्देशतः	१०	४०
एष वोऽस्त्विष्ट	३	१०
एषा तेऽभिहिता	२	३९
एषा ब्राह्मी स्थितिः	२	७२
ऐरावतं गजे	१०	२७
ऐश्वरं पुरुषोत्तम	११	३
ओमित्येकाक्षरं	८	१३
ॐ तत्सदिति	१७	२३
कं घातयति हन्ति	२	२१
कच्चिदज्ञान	१८	७२
कच्चिदेतच्छ्रुतं	१८	७२
कच्चिन्नोभय	६	३८
कट्वम्ललवणा	१७	९
कथं न ज्ञेय	१	३९
कथं भीष्ममहं	२	४
कथं विद्यामहं	१०	१७
कथं स पुरुषः	२	२१
कथमेतद्विजानीयां	४	४
कथयन्तश्च मां	१०	९
कथयिष्यन्ति	२	३४
करणं कर्म	१८	१८
करणं च पृथ	१८	१४
करिष्यस्यवशो	१८	६०
करिष्ये वचनं	१८	७३
कर्णं तथाऽन्या	११	३४
कर्तव्यानीति मे	१८	६
कर्ता तामस	१८	२८
कर्ता सात्त्विक	१८	२६
कर्ताऽहमिति	३	२७
कर्तुं नेच्छसि	१८	६०
कर्तुं मद्योग	१२	११
कर्तुं व्यवसिता	१	४५
कर्म कर्तुमिहा	१६	२४
कर्म कारण	६	३
कर्म चैव तद	१७	२७
कर्मजं बुद्धियुक्ता	२	५१
कर्मजान्विद्धि तान्	४	३२
कर्म ज्यायो	३	८
कर्मणः सुकृत	१४	१६
कर्मणामशमः	१४	१२
कर्मणैव हि संसिद्धिं	३	२०
कर्मणो नोपपद्यते	१८	७
कर्मणो ह्यपि	४	१७
कर्मण्यकर्म यः	४	१८
कर्मण्यभिप्रवृत्तो	४	२०
कर्मण्येवाधिकारः	२	४७
कर्म प्रारभते	१८	१५
कर्म प्राहुर्मनी	१८	३
कर्मबन्धं प्रहास्य	२	३९
कर्म ब्रह्मोद्भवं	३	१५
कर्मभिर्न स	४	१४
कर्मयोगेन चापरे	१३	२४
कर्मयोगेन	३	३
कर्मयोगो विशि	५	२
कर्मसङ्गिषु	१४	१५
कर्मसङ्गेन	१४	७
कर्माणि प्रवि	१८	४१
कर्मानुबन्धीनि	१५	२
कर्मिभ्यश्चाधिको	६	४६
कर्मेन्द्रियाणि	३	६
कर्मेन्द्रियैः कर्म	३	७
कर्शयन्तः शरीर	१७	६
कल्पक्षये पुन	९	७
कल्पादौ विसृ	९	७
कवयोऽप्यत्र	४	१६
कविं पुराणमनु	८	९
कवीनामुशना	१०	३७
कश्चिदर्थव्यपा	३	१८
कश्चिद्यतति	७	३
कश्चिन्मां वेत्ति	७	३
कश्चिन्मे प्रिय	१८	६९
कस्माच्च ते न	११	३७
काङ्क्षन्तः कर्मणां	४	११
कां गतिं कृष्ण	६	३७
का प्रीतिः स्यात्	१	३६
काम एष क्रोध	३	३७
कामं क्रोधं च	१६	१८
कामं क्रोधं परि	१८	५३
कामः क्रोधस्तथा	१६	२१
कामक्रोधपरा	१६	१२
कामक्रोधवियुक्ता	५	२६
कामक्रोधोद्भवं	५	२३
काममाश्रित्य	१६	१०
कामरागबला	१७	५
कामरागविव	७	११
कामरूपं दुरास	३	४३
कामरूपेण	३	३९
कामसंकल्पवर्जि	४	१९
कामात्क्रोधो	२	६२
कामात्मानः स्वर्ग	२	४३
कामैस्तैस्तैर्हृत	७	२०
कामोपभोग	१६	११
कामोऽस्मि भर	७	११
काम्यानां कर्मणां	१८	२
कायक्लेशभयात्	१८	८
कायेन मनसा	५	११
कारणं गुणसं	१३	२१
कारणानि निबोध	१८	१३
कार्पण्यदोषोपहत	२	७
कार्यं कर्म करोति	६	१
कार्यं कर्म समा	३	१९
कार्यं चाकार्यं	१८	३१
कार्यकारण	१३	२०
कार्यते ह्यवशः कर्म	३	५
कार्यमित्येव	१८	९
कार्याकार्यव्य	१६	२४
कार्याकार्ये भया	१८	३०
कार्ये सक्तमहेतु	१८	२२
कालः कलयता	१०	३०
कालेनात्मनि	४	३८
कालोऽस्मि	११	३२
काश्यश्च परमे	१	१७
काशीराजश्च	१	५
किं ज्ञानेन	१०	४१
किं कर्म किम	४	१६
किं कर्म पुरु	८	१
किंचिदस्ति	७	७
किं तद्ब्रह्म किम	८	१
किं नो राज्येन	१	३१
किं पुनर्ब्राह्मणा	९	३३

Digitization by Arya Samaj Charitable Foundation, Chennai

किं भोगैर्जीवितेन	१	३२
किमकुर्वत संजय	१	१
किमन्यत्काम	१६	८
किमाचारः कथं	१४	२१
किमासीत व्रजेत	२	५४
किरीटिनं गदिनं	११	१७
,,	११	४६
कीर्तिः श्रीर्वाक्च	१०	३४
कुतस्त्वा कश्मल	२	२
कुतोऽन्यः कुरु	४	३१
कुन्तीपुत्रो	१	१६
कुरु कर्मैव	४	१५
कुरुवृद्धः पितामहः	१	१२
कुर्याद्विद्वांस्तथा	३	२५
कुर्वन्नपि न	५	७
कुर्वन्सिद्धिम्	१२	१०
कुर्वन्नाप्नोति	४	२१
,,	१८	४७
कुर्वाणो मद्व्यपा	१८	५६
कुलक्षयकृतं दोषं	१	३८
,,	१	३९
कुलक्षये प्रणश्यन्ति	१	४०
कुलघ्नानां कुलस्य	१	४२
कुलधर्माः सना	१	४०
कुलधर्माश्च	१	४३
कुले भवति	६	४२
कुशले नानु	१८	१०
कूटस्थमचलं	१२	३
कूटस्थोऽक्षर	१५	१६
कूटस्थो विजिते	६	८
कूर्मोऽङ्गानीव	२	५८
कृतकृत्यश्च	१५	२०
कृताञ्जलिरभाषत	११	१४
कृताञ्जलिर्वेपमानः	११	३५
कृत्वाऽपि न	४	२२
कृत्स्नं लोकमिमं	१३	३३
कृत्स्नविन्न	३	२९
कृपणाः फलहेतवः	२	४९
कृपया परया	१	२८
कृपश्च समितिंजयः	१	८
कृषिगोरक्ष्य	१८	४४
केचिदात्मान	१३	२४
केचिद्भीताः	११	२१
केचिद्विलग्ना	११	२७
केवलैरिन्द्रियैरपि	५	११
केशवार्जुनयोः	१८	७६
केषुकेषु च	१०	१७
कैर्मया सह	१	२२
कैर्लिङ्गैस्त्रीन्गुणाने	१४	२१
कोऽन्योऽस्ति	१६	१५
कौन्तेय प्रतिजा	९	३१
कौमारं यौवनं	२	१३
क्रियते तदिह	१७	१८
क्रियते बहुला	१८	२४
क्रियन्ते मोक्ष	१७	२५
क्रियमाणानि	१३	२९
क्रियाविशेष	२	४३
क्रोधः पारुष्य	१६	४
क्रोधाद्भवति	२	६३
क्लेशोऽधिकतर	१२	५
क्लैब्यं मा स्म	२	३
क्षत्रियस्य न	२	३१
क्षमा सत्यं दमः	१०	४
क्षयाय जगतो	१६	९
क्षरश्चाक्षर एव	१५	१६
क्षरः सर्वाणि	१५	१६
क्षात्रं कर्म	१८	४३
क्षान्तिरार्जवमेव	१८	४२
क्षिपाम्यजस्रं	१६	१९
क्षिप्रं भवति	९	३१
क्षिप्रं हि मानुषे	४	१२
क्षीणे पुण्ये	९	२१
क्षुद्रं हृदयदौर्बल्यं	२	३
क्षेत्रक्षेत्रज्ञयोरेवं	१३	३४
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं	१३	२
क्षेत्रक्षेत्रज्ञसं	१३	२६
क्षेत्रज्ञ इति	१३	१
क्षेत्रज्ञं चापि मां	१३	२
क्षेत्रं क्षेत्री तथा	१३	३३
क्षेत्रमित्याभि	१३	१
खं मनो बुद्धि	७	४
गच्छन्त्यपुनरा	५	१७
गच्छन्त्यमूढाः	१५	५
गतसङ्गस्य मुक्तस्य	४	२३
गतागतं काम	९	२१
गतासूनगतासूंश्च	२	११
गतिर्भर्ता प्रभुः	९	१८
गन्धर्वयक्षासुर	११	२२
गन्धर्वाणां	१०	२६
गरीयसे ब्रह्मणो	११	३७
गहना कर्मणो	४	१७
गाण्डीवं स्रंसते	१	३०
गामाविश्य च	१५	१३
गायत्री छन्दसां	१०	३५
गिरामस्म्येक	१०	२५
गुडाकेशः परंतपः	२	९
गुडाकेशेन भारत	१	२४
गुणकर्मविभागयोः	३	२८
गुणकर्मविभागशः	४	१३
गुणतस्त्रिविधं	१८	२९
गुणप्रवृद्धा	१५	२
गुणाः प्रकृति	१४	५
गुणा गुणेषु	३	२८
गुणातीतः स	१४	२५
गुणानेताननतीत्य	१४	२०
गुणा वर्तन्ते	१४	२३
गुणेभ्यश्च परं	१४	१९
गुणैर्यो न विचा	१४	२३
गुणैः कर्माणि	३	२७
गुरुणाऽपि	६	२२
गुरूनहत्वा हि	२	५
गुह्यमध्यात्म	११	१
गुह्याद्गुह्यतरं	१८	६३
गृहीत्वैतानि	१५	८
ग्रसिष्णु प्रभ	१३	१६
ग्लानिर्भवति	४	७
घ्नतोऽपि मधु	१	३५
चक्षुश्चैवान्तरे	५	२७
चञ्चलं हि मनः	६	३४
चञ्चलत्वात्स्थितिं	६	३३
चतुर्विधा भजन्ते	७	१६
चत्वारो मनवः	१०	६
चातुर्वर्ण्यं	४	१३
चिकीर्षुर्लोक	३	२५
चिन्तामपरिमेयां	१६	११
चिन्त्योऽसि	१०	१७
चेतसा नान्य	८	८
चेतसा सर्व	१८	५७
चेलाजिनकुशो	६	११
छन्दांसि यस्य	१५	१
छन्दोभिर्विविधैः	१३	४
छित्त्वैनं संशयं	४	४२
छिन्नद्वैधा यता	५	२५
छिन्नाभ्रमिव	६	३८
छेत्ता न ह्युपपद्यते	६	३९
छेत्तुमर्हस्यशेषतः	६	३९
जगतः शाश्वते	८	२६
जगत्प्रहृष्यत्यनु	११	३६
जगदव्यक्त	९	४
जगदाहुरनी	१६	८

Digitization by Arya Samaj Charitable Foundation, Chennai

जगद्भासयते	१५	१२
जगद्धि परिवर्तते	९	१०
जघन्यगुण	१४	१८
जना न विदुरा	१६	७
जनानां पुण्य	७	२८
जनाः सुकृतिनो	७	१६
जन्म कर्म च	४	९
जन्मकर्मफलप्रदाम्	२	४३
जन्मबन्धविनि	२	५१
जन्ममृत्युजरादुः	१४	२०
जन्ममृत्युजराव्या	१३	८
जन्मानि तव	४	५
जयोऽस्मि व्यव	१०	३६
जरामरणमोक्षाय	७	२९
जहि शत्रुं महा	३	४३
जाग्रतो नैव	६	१६
जातस्य हि ध्रुवो	२	२७
जातु कर्मण्यत	३	२३
जातु तिष्ठत्यकर्म	३	५
जानाति पुरुषो	१५	१९
जायते वर्णसंकरः	१	४१
जिज्ञासुरपि	६	४४
जितात्मनः	६	७
जितात्मा विगत	१८	४९
जित्वा वा	२	३७
जित्वा शत्रून्	११	३३
जीवनं सर्वभूतेषु	७	९
जीवभूतः सना	१५	७
जीवभूतां महाबाहो	७	५
जुह्वति ज्ञानदीपिते	४	२७
जोष येत्सर्वकर्माणि	३	२६
ज्ञातव्यमव	७	२
ज्ञातुं द्रष्टुं च	११	५४
ज्ञात्वा भूतादि	९	१३
ज्ञात्वा मां शान्ति	५	२९

ज्ञात्वा शास्त्र	१६	२४
ज्ञानं कर्म च	१८	१९
ज्ञानं ज्ञानवता	१०	३८
ज्ञानं ज्ञेयं ज्ञान	१३	१७
ज्ञानं ज्ञेयं परि	१८	१८
ज्ञानं तेऽहं	७	२
ज्ञानं यदा तदा	१४	११
ज्ञानं लब्ध्वा परां	४	३९
ज्ञानं विज्ञानम्	१८	४२
ज्ञानं विज्ञानसहितं	९	१
ज्ञानदीपेन	१०	११
ज्ञाननिर्धूत	५	१७
ज्ञानमावृत्य	३	४०
ज्ञानमावृत्य तु	१४	९
ज्ञानयज्ञः परंतप	४	३३
ज्ञानयज्ञेन चाप्यन्ये	९	१५
ज्ञानयज्ञेन तेनाहं	१८	७०
ज्ञानयोगव्यव	१६	१
ज्ञानयोगेन	३	३
ज्ञानवान्मां प्रपद्यते	७	१९
ज्ञानविज्ञानतृप्तात्मा	६	८
ज्ञानविज्ञाननाशनम्	३	४१
ज्ञानसङ्गेन चानघ	१४	६
ज्ञानसंछिन्नसंशयम्	४	४१
ज्ञानाग्निदग्ध	४	१९
ज्ञानाग्निः सर्व	४	३७
ज्ञानाद्ध्यानं	१२	१२
ज्ञानानां ज्ञान	१४	१
ज्ञानावस्थितचेतसः	४	२३
ज्ञानिनस्तत्त्व	४	३४
ज्ञानिभ्योऽपि	६	४६
ज्ञानिनो नित्य	३	३९
ज्ञानी च भरतर्षभ	७	१६
ज्ञानी त्वात्मैव	७	१८
ज्ञानेन तु तद	५	१६

ज्ञाने परिसमाप्यते	४	३३
ज्ञेयं चोक्तं	१३	१८
ज्ञेयं यत्तत्प्रव	१३	१२
ज्ञेयः स नित्य	५	३
ज्ञेयोऽसि नियता	८	२
ज्यायसी चेत्	३	१
ज्योतिषां रवि	१०	२१
ज्योतिषामपि	१३	१७
झषाणां मकर	१०	३१
त इमेऽवस्थिता	१	३३
तं तथा कृपया	२	१
तंतं नियममास्थाय	७	२०
तंतमेवैति कौन्तेय	८	६
तं यज्ञं विद्धि	१७	१२
तं विद्याद्दुःख	६	२३
तच्च संस्मृत्यसंस्मृ	१८	७७
तज्ज्ञानं विद्धि रा	१८	२१
तज्ज्ञानं विद्धि सा	१८	२०
तत एव च विस्तारं	१३	३०
ततः कुरु यतात्म	१२	११
ततः पदं तत्परि	१५	४
ततः शङ्खाश्च	१	१३
ततः श्वेतैर्हयैर्युक्ते	१	१४
ततस्ततो नियम्यै	६	२६
ततः स विस्मया	११	१४
ततः स्वधर्मं कीर्तिं	२	३३
ततो दुःखतरं	२	३६
ततो भवति भारत	१४	३
ततो मां तत्त्वतो	१८	५५
ततो याति परां	६	४५
,,	१३	२८
,,	१६	२२
ततो यान्त्यधमां	१६	२०
ततो युद्धाय	२	३८

ततो वक्ष्यामि ते	१८	६४
तत्किं कर्मणि घोरे	३	१
तत्कुरुष्व मदर्प	९	२७
तत्क्षामये त्वाम्	११	४२
तत्क्षेत्रं यच्च	१३	३
तत्तत्प्राप्य शुभा	२	५७
तत्तदेवावगच्छ	१०	४१
तत्तदेवेतरो	३	२१
तत्तामसमुदा	१७	१९
,,	१७	२२
,,	१८	२२
,,	१८	३९
तत्ते कर्म प्रव	४	१६
तत्तेजो विद्धि	१५	१२
तत्ते पदं संग्रहेण	८	११
तत्त्वज्ञानार्थ	१३	११
तत्त्वमिच्छामि	१८	१
तत्त्ववित्तु महा	३	२८
तत्त्वेनातश्च्यवन्ति	९	२४
तत्परः संयते	४	३९
तत्प्रसादात्परां	१८	६२
तत्र का परिदेवना	२	२८
तत्र चान्द्रमसं	८	२५
तत्र तं बुद्धिसंयोगं	६	४३
तत्र प्रयाता	८	२४
तत्र श्रीर्विजयो	१८	७८
तत्र सत्त्वं निर्मल	१४	६
तत्रापश्यत्स्थितान्	१	२६
तत्रैकस्थं जगत्	११	१३
तत्रैकाग्रं मनः	६	१२
तत्रैवं सति कर्तारं	१८	१६
तत्रैवाव्यक्तसंज्ञके	८	१८
तत्समासेन मे	१३	३
तत्सुखं राजसं	१८	३८
तत्सुखं सात्त्विकं	१८	३७

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्स्वयं योग	४	३८
तथा तवामी	११	२८
तथा तेनेदमावृतम्	३	३८
तथाऽऽत्मा नोप	१३	३२
तथा देहान्तर	२	१३
तथाऽपि त्वं महा	२	२६
तथाऽऽप्नोति	१८	५०
तथा प्रलीनः	१४	१५
तथाऽन्तर्ज्योति	५	२४
तथा मानावमानयोः	६	७
,,	१२	१८
तथा शरीराणि	२	२२
तथा सर्वाणि	९	६
तथैव च पितामहाः	१	३४
तथैव नाशाय	११	२९
तदर्थं कर्म	३	९
तदस्य हरति	२	६७
तदहं भक्त्युपहृतं	९	२६
तदा गन्तासि	२	५२
तदाऽऽत्मानं	४	७
तदा योगमवा	२	५३
तदित्यनभि	१७	२५
तदेकं वद	३	२
तदेव मे दर्शय	११	४५
तदेव मे रूप	११	४९
तदोत्तमविदां	१४	१४
तद्दानं सात्त्विकं	१७	२०
तद्धाम परमं मम	८	२१
,,	१५	६
तद्बुद्धयस्तदा	५	१७
तद्भवत्यल्प	७	२३
तद्योगैरपि गम्यते	५	५
तद्राजसमुदा	१७	२१
,,	१८	२४
तद्वत्कामा यं	२	७०
तद्विद्धि प्रणिपा	४	३४
तद्विद्धि भरतर्षभ	१३	२६
तन्निबध्नाति	१४	७
तन्निबध्नाति भारत	१४	८
तन्निष्ठास्तत्परा	५	१७
तन्मे क्षेमतरं भवेत्	१	४६
तन्मे ब्रूहि	५	१
तपश्चास्मि तपस्विषु	७	९
तपस्तत्त्रिविधं नरैः	१७	१७
तपस्तप्तं कृतं	१७	२८
तपस्विभ्योऽधिको	६	४६
तपाम्यहमहं वर्षं	९	१९
तपो दम्भेन	१७	१८
तपो दानं	१७	५
तपो मानस	१७	१६
तप्यन्ते ये तपो	१७	५
तमसः परमुच्यते	१३	१७
तमस्त्वज्ञानजं	१४	८
तमस्येतानि	१४	१३
तमस्सत्त्वं	१४	१०
तमाहुः पण्डितं	४	१९
तमाहुः परमां	८	२१
तमुवाच हृषीकेशः	२	१०
तमेव चाद्यं पुरुषं	१५	४
तमेव शरणं गच्छ	१८	६२
तमोद्वारैस्त्रिभिर्नरः	१६	२२
तयाऽपहृत	२	४४
तयोर्न वशमा	३	३४
तयोस्तु कर्म	५	२
तव शिष्येण	१	३
तव सौम्यं	११	५१
तवापि वक्त्राणि	११	२९
तस्माच्छास्त्रं	१६	२४
तस्मात्त्वमिन्द्रि	३	४१
तस्मात्त्वमुत्तिष्ठ	११	३३
तस्मात्प्रणम्य	११	४४
तस्मात्सर्वगतं ब्रह्म	३	१५
तस्मात्सर्वाणि	२	३०
तस्मात्सर्वेषु कालेषु	८	७
,,	८	२७
तस्मादज्ञानसंभूतं	४	४२
तस्मादपरिहार्येऽर्थे	२	२७
तस्मादसक्तः सततं	३	१९
तस्मादुत्तिष्ठ	२	३७
तस्मादेतत्त्रयं	१६	२१
तस्मादेवं	२	२५
तस्मादोमित्युदा	१७	२४
तस्माद्ब्रह्मणि ते	५	१९
तस्माद्यस्य महा	२	६८
तस्माद्युध्यस्व	२	१८
तस्माद्योगाय	२	५०
तस्माद्योगी	६	४६
तस्मान्नार्हा वयं	१	३७
तस्मिन् गर्भं	१४	३
तस्य कर्तारमपि	४	१३
तस्य कार्यं न	३	१७
तस्यतस्याचलां	७	२१
तस्य प्रज्ञा प्रति	२	५७
,,	२	५८
,,	२	६१
,,	२	६८
तस्य संजनयन्	१	१२
तस्यां जागर्ति	२	६९
तस्याराधनमीहते	७	२२
तस्याहं न प्रण	६	३०
तस्याहं निग्रहं	६	३४
तस्याहं सुलभः	८	१४
तांस्तथैव भजा	४	११
तांस्तितिक्षस्व	२	१४
तानकृत्स्नविदो	३	२९
तानहं द्विषतः	१६	१९
तानि सर्वाणि	२	६१
तान्निबोध द्विजोत्तम	१	७
तान्यहं वेद	४	५
तान्विद्ध्यासुर	१७	६
तान्समीक्ष्य स	१	२७
तामसं परिचक्षते	१७	१३
तामसः परि	१८	७
तामसी चेति तां	१७	२
तामेव विदधा	७	२१
तावान्सर्वेषु वेदेषु	२	४६
तासां ब्रह्म	१४	४
तिष्ठन्तं परमेश्वरम्	१३	२७
तीक्ष्णरूक्षविदा	१७	९
तुमुलो व्यनुनाद	१	१९
तुल्यनिन्दात्म	१४	२४
तुल्यनिन्दास्तुति	१२	१९
तुल्यप्रियाप्रियो	१४	२४
तुल्यो मित्रारि	१४	२५
तुष्यन्ति च रमन्ति	१०	९
तृष्णासङ्गसमु	१४	७
तेजश्चास्मि	७	९
तेजस्तेजस्विनाम्	७	१०
,,	१०	३६
तेजः क्षमा धृतिः	१६	३
तेजोभिरापूर्य	११	३०
तेजोमयं विश्व	११	४७
तेजोराशिं सर्वतो	११	१७
ते तं भुक्त्वा	९	२१
ते त्वघं भुञ्जते	३	१३
ते देवा भावयन्तु	३	११
ते द्वन्द्वमोह	७	२८
तेन मुह्यन्ति	५	१५
तेनैव रूपेण	११	४६

Digitization by Arya Samaj Charitable Foundation, Chennai

तेऽपि चाति	१३	२५
तेऽपि मामेव	९	२३
तेऽपि यान्ति परां	९	३२
ते पुण्यमासाद्य	९	२०
ते प्राप्नुवन्ति	१२	४
ते ब्रह्म तद्विदुः	७	२९
ते मे युक्ततमा	१२	२
तेऽवस्थिताः	२	६
ते विदुर्युक्तचेतसः	७	३०
तेषां के योग	१२	१
तेषां ज्ञानी	७	१७
तेषां नित्याभियुक्ता	९	२२
तेषां निष्ठा तु	१७	१
तेषां भेदमिमं	१७	७
तेषां सततयुक्तानां	१०	१०
तेषामहं समुद्धर्ता	१२	७
तेषामादित्यवज्ज्ञानं	५	१६
तेषामेवानुकम्पार्थं	१०	११
तेऽहोरात्रविदो	८	१७
तैर्दत्तानप्रदायैभ्यो	३	१२
तौ ह्यस्य परिपन्थि	३	३४
त्यक्तसर्वपरिग्रहः	४	२१
त्यक्तुं कर्माण्यशे	१८	११
त्यक्त्वा कर्मफला	४	२०
त्यक्त्वा देहं	४	९
त्यक्त्वा सर्वानशेष	६	२४
त्यक्त्वोत्तिष्ठ	२	३
त्यजत्यन्ते कलेबरम्	८	६
त्यागः शान्तिः	१६	२
त्यागस्य च	१८	१
त्यागाच्छान्तिः	१२	१२
त्यागी सत्त्वसमा	१८	१०
त्यागे भरतसत्तम	१८	४
त्यागो हि पुरुष	१८	४
त्याज्यंदोषवत्	१८	३
त्रायते महतो	२	४०
त्रिधैव गुणभेदतः	१८	१९
त्रिभिर्गुणमयैर्भावैः	७	१३
त्रिविधं कर्मणः	१८	१२
त्रिविधं नरकस्येदं	१६	२१
त्रिविधःकर्मसंग्रहः	१८	१८
त्रिविधः संप्रकी	१८	४
त्रिविधा कर्म	१८	१८
त्रिविधा भवति	१७	२
त्रिविधो भवति	१७	७
त्रिषु लोकेषु	३	२२
त्रीन्गुणानतिवर्तते	१४	२१
त्रैगुण्यविषया	२	४५
त्रैविद्या मां सोमपाः	९	२०
त्वक्चैव परिदह्यते	१	३०
त्वत्तः कमलपत्राक्ष	११	२
त्वत्प्रसादान्मया	१८	७३
त्वदन्यः संशय	६	३९
त्वमक्षरं परमं	११	१८
त्वमक्षरं सदसत्	११	३७
त्वमव्ययः शाश्वत	११	१८
त्वमस्य पूज्यश्च	११	४३
त्वमस्य विश्वस्य	११	१८
त्वमस्य विश्वस्य	११	३८
त्वमादिदेवः	११	३८
त्वमादौ प्रोक्तवान्	४	४
त्वया ततं विश्व	११	३८
त्वय्यैकाग्रेण चेतसा	१८	७२
त्वां सदा परिचिन्त	१०	१७
दंष्ट्राकरालानि च	११	२५
,, मया	११	२७
दण्डो दमयता	१०	३८
ददामि बुद्धियोगं	१०	१०
दम्भमानमदान्वि	१६	१०
दम्भार्थमपि चैव	१७	१२
दम्भाहंकार	१७	५
दम्भेनाविधि	१६	१७
दम्भो दर्पोऽति	१६	४
दया भूतेष्व	१६	२
दर्शयात्मान	११	४
दर्शयामास पार्थाय	११	९
दातव्यमिति	१७	२०
दानक्रियाश्च	१७	२५
दानं दमश्च	१६	१
दानमीश्वरभावश्च	१८	४३
दाने च यत्पुण्य	८	२८
दास्यन्ते यज्ञ	३	१२
दिवि देवेषु वा	१८	४०
दिवि सूर्यसह	११	१२
दिव्यगन्धानु	११	११
दिव्यं ददामि ते	११	८
दिव्यमाल्याम्बर	११	११
दिव्यानेकोद्यता	११	१०
दिव्या ह्यात्मविभू	१०	१६
दिव्यौ शङ्खौ प्रद	१	१४
दिशश्चानवलोक	६	१३
दिशो न जाने	११	२५
दीप्तानलार्कद्युति	११	१७
दीयते च परि	१७	२१
दीयतेऽनुपकारि	१७	२०
दुःखदोषानुदर्श	१३	८
दुःखमाप्तुमयो	५	६
दुःखमित्येव	१८	८
दुःखयोनय एव	५	२२
दुःखशोकामय	१७	९
दुःखान्तं च	१८	३६
दुःखालयमशाश्व	८	१५
दुःखेष्वनुद्विग्न	२	५६
दुर्गतिं तात	६	४०
दुष्पूरेणानलेन च	३	३९
दुष्प्राप इति मे	६	३६
दूरस्थं चान्तिके	१३	१५
दूरेण ह्यवरं कर्म	२	४९
दृष्टवानसि मां	११	५३
दृष्टवानसि यन्मम	११	५२
दृष्ट्वा तु पाण्डवा	१	२
दृष्ट्वाद्भुतं रूपमुग्रं	११	२०
दृष्ट्वा रूपं घोरमी	११	४९
दृष्ट्वा लोकाः प्रव्य	११	२३
दृष्ट्वा हि त्वा	११	२४
दृष्ट्वेदं मानुषं रूपं	११	५१
दृष्ट्वेमं स्वजनं	१	२८
दृष्ट्वैव कालानलसं	११	२५
देवदत्तं धनंजयः	१	१५
देवदेव जगत्पते	१०	१५
देवद्विजगुरुप्राज्ञ	१७	१४
देवर्षिर्नारदस्तथा	१०	१३
देवर्षीणां च	१०	२६
देवा अप्यस्य	११	५२
देवानामस्मि	१०	२२
देवान्देवयजो	७	२३
देवान्भावयतानेन	३	११
देशे काले च पात्रे	१७	२०
देहवद्भिरवाप्यते	१२	५
देहिनां सा स्वभा	१७	२
देहिनोऽस्मिन्यथा	२	१३
देही देहसमु	१४	२०
देही नित्यमवध्यो	२	३०
देहे देहभृतां वर	८	४
देहे देहिनमव्य	१४	५
देहे सर्वस्य भारत	२	३०
देहेऽस्मिन्पुरुषः	१३	२२
देहेऽस्मिन्मधु	८	२
दैव आसुर एव च	१६	६
दैवं चैवात्र पञ्च	१८	१४

Digitization by Arya Samaj Charitable Foundation, Chennai

दैवमेवापरे यज्ञं	४	२५
दैवीं प्रकृतिमाश्रि	९	१३
दैवी संपद्विमो	१६	५
दैवी ह्येषा गुण	७	१४
दैवो विस्तरशः	१६	६
दोषैरेतैः कुलघ्ना	१	४३
द्यावापृथिव्योरिद	११	२०
द्युतं छलयतामस्मि	१०	३६
द्रक्ष्यस्यात्मन्यथो	४	३५
द्रव्ययज्ञास्तपो	४	२८
द्रष्टुं त्वदन्येन	११	४८
द्रष्टुमिच्छामि ते	११	३
द्रुपदश्च महारथः	१	४
द्रुपदो द्रौपदेयाश्च	१	१८
द्रोणं च भीष्मं च	११	३४
द्रोणं च मधुसूदन	२	४
द्वन्द्वः सामासि	१०	३३
द्वन्द्वमोहेन भारत	७	२७
द्वन्द्वातीतो विम	४	२२
द्वन्द्वैर्विमुक्ताः	१५	५
द्वारं नाशनमा	१६	२१
द्वाविमौ पुरुषौ	१५	१६
द्वौ भूतसर्गौ	१६	६
धनमानमदान्वि	१६	१७
धनुरुद्यम्य पाण्डवः	१	२०
धर्मक्षेत्रे कुरुक्षेत्रे	१	१
धर्मसंस्थापनार्थाय	४	८
धर्मस्यास्य परंतप	९	३
धर्माविरुद्धो भूतेषु	७	११
धर्मे नष्टे कुलं	१	४०
धर्म्यं संवादमाव	१८	७०
धर्म्याद्धि युद्धाच्छ्रे	२	३१
धाताऽहं विश्वतो	१०	३३
धारयन्नचलं स्थिरम्	६	१३
धारयाम्यहमोजसा	१५	१३
धार्तराष्ट्रस्य दुर्बुद्धेः	१	२३
धार्तराष्ट्रान्कपि	१	२०
धार्तराष्ट्रान्सबान्ध	१	३७
धार्तराष्ट्रा रणे	१	४६
धीरस्तत्र न मुह्यति	२	१३
धूमेनाग्निरिवा	१८	४८
धूमेनाव्रियते वह्निः	३	३८
धूमो रात्रिस्तथा	८	२५
धृतिं न विन्दामि	११	२४
धृतिः सा पार्थ	१८	३५
,,	१८	३४
,,	१८	३३
धृत्याऽऽत्मानं	१८	५१
धृत्या धारयते	१८	३४
धृत्या यया धारय	१८	३३
धृत्युत्साहसमन्वि	१८	२६
धृष्टकेतुश्चेकितानः	१	५
धृष्टद्युम्नो विराटश्च	१	१७
धेनूनामस्मि काम	१०	२८
ध्यानयोगपरो	१८	५२
ध्यानात्कर्म	१२	१२
ध्यानेनात्मनि	१३	२४
ध्यायतो विषयान्	२	६२
ध्रुवं जन्म मृतस्य	२	२७
ध्रुवा नीतिर्मति	१८	७८
न करोति न	१३	३१
न कर्तृत्वं न कर्मा	५	१४
न कर्मणामनारम्भा	३	४
न कर्मफलसंयोगं	५	१४
न कर्मस्वनुषज्जते	६	४
न कश्चित्कर्तुमर्हं	२	१७
न काङ्क्षे विजयं	१	३२
न किंचिदपि	६	२५
न कुर्यां कर्म चेद	३	२४
नकुलः सहदेवश्च	१	१६
नक्षत्राणामहं	१०	२१
न च क्रियाभिर्न	११	४८
न च तत्प्रेत्य नो	१७	२८
न च तस्मान्मनु	१८	६९
न च मत्स्थानि	९	५
न च मां तानि	९	९
न च मां योऽभ्य	१८	६७
न च राज्यं	१	३२
न च शक्नोम्यवस्था	१	३०
न च श्रेयोऽनु	१	३१
न च संन्यसनादेव	३	४
न चातिस्वप्नशील	६	१६
न चाभावयतः	२	६६
न चायुक्तस्य	२	६६
न चाशुश्रूषवे	१८	६७
न चास्य सर्वभूते	३	१८
न चाहं तेष्ववस्थि	९	४
न चिरेणाधिगच्छ	५	६
न चैकान्तमनश्नतः	६	१६
न चैतद्विद्मः कतर	२	६
न चैनं क्लेदयन्त्या	२	२३
न चैव न भवि	२	१२
न चैव सुकृतं विभुः	५	१५
न जायते म्रियते	२	२०
न तदस्ति पृथिव्यां	१८	४०
न तदस्ति विना	१०	३९
न तद्भासयते	१५	६
न तु मामभिजा	९	२४
न तु मां शक्यसे	११	८
न तु सन्यासिनां	१८	१२
न तेषु रमते बुधः	५	२२
न त्याज्यं कार्यमेव	१८	५
न त्याज्यमिति	१८	३
न त्वं नेमे जनाधि	२	१२
न त्वं वेत्थ परंतप	४	५
न त्वं शोचितु	२	२७
,,	२	३०
न त्वत्समोऽस्त्य	११	४३
न त्वहं तेषु ते	७	१२
न त्वेवाहं जातु	२	१२
न दानेन न	११	५३
न द्वेष्टि संप्रवृ	१४	२२
न द्वेष्ट्यकुशलं	१८	१०
न निरग्निर्नचा	६	१
न निवृत्तानि	१४	२२
न प्रसिध्येदकर्म	३	८
न प्रहृष्येत्प्रियं	५	२०
न बुद्धिभेदं जन	३	२६
नभश्च पृथिवीं	१	१९
नभस्स्पृशं दीप्तमने	११	२४
नमस्कृत्वा भूय	११	३५
नमस्यन्तश्च मां	९	१४
नमः पुरस्तादथ	११	४०
न मां कर्माणि	४	१४
न मां दुष्कृतिनो	७	१५
न मे कर्मफले	४	१४
न मे द्वेष्योऽस्ति	९	२९
न मे पार्थास्ति	३	२२
न मे भक्तः प्रण	९	३१
न मे विदुः सुर	१०	२
नमो नमस्तेऽस्तु	११	३९
नमोऽस्तु ते	११	३१
नमोऽस्तु ते सर्वत	११	४०
न योत्स्य इति	१८	५९
न योत्स्यामीति	२	९
नरके नियतं वासो	१	४४

नराणां च नराधि	१०	२७
न रूपमस्येह	१५	३
नवद्वारे पुरे देही	५	१३
नवानि गृह्णाति	२	२२
न विकम्पितुमर्हसि	२	३१
न विमुञ्चति	१८	३५
न वेदयज्ञाध्ययनै	११	४८
न शक्नोषि मयि	१२	९
न शशाङ्को न	१५	६
न शोचति न	१२	१७
,,	१८	५४
न शोषयति	२	२३
न शौचं नापि	१६	७
नश्यत्सु न विन	८	२०
न श्रोष्यसि	१८	५८
नष्टात्मानोऽल्प	१६	९
नष्टो मोहः	१८	७३
न सत्तन्नासदुच्य	१३	१२
न सत्यं तेषु	१६	७
न स पश्यति	१८	१६
न स भूयोऽभि	१३	२३
न स सिद्धिमवा	१६	२३
न सुखं न परां	१६	२३
न सुखं संशया	४	४०
न हन्ति न निब	१८	१७
न हन्यते हन्य	२	२०
न हि कल्याण	६	४०
न हि कश्चित्क्षण	३	५
न हि ज्ञानेन	४	३८
न हि ते भगवन्	१०	१४
न हि देहभृता	१८	११
न हिनस्त्यात्मना	१३	२८
न हि प्रजानामि	११	३१
न हि प्रपश्यामि	२	८
न ह्यसंन्यस्तसंक	६	२
नाकृतेनेह कश्चन	३	१८
नात्मानमवसादये	६	५
नात्यश्नतस्तु	६	१६
नात्युच्छ्रितं नाति	६	११
नादत्ते कस्यचित्	५	१५
नानवाप्तमवाप्तव्यं	३	२२
नानाभावान्पृथग्वि	१८	२१
नानावर्णाकृतीनि	११	५
नानाविधानि	११	५
नानाशस्त्रप्रहरणाः	१	९
नानुतिष्ठन्ति मे	३	३२
नानुवर्तयतीह यः	३	१६
नानुशोचन्ति	२	११
नानुशोचितुमर्हसि	२	२५
नान्तं न मध्यं	११	१६
नान्तो न चादिर्न	१५	३
नान्तोऽस्ति मम	१०	४०
नान्यं गुणेभ्यः	१४	१९
नान्यदस्तीति	२	४२
नाप्नुवन्ति महात्मा	८	१५
नाभक्ताय कदा	१८	६७
नाभावो विद्यते	२	१६
नाभिनन्दति न	२	५७
नायका मम सैन्य	१	७
नायं लोकोऽस्ति	४	४०
नायं लोकोऽस्त्यय	४	३१
नायं हन्ति न	२	१९
नायं भूत्वा भविता	२	२०
नाशयाम्यात्म	१०	११
नासतो विद्यते	२	१६
नासाभ्यन्तरचारि	५	२७
नास्ति बुद्धिरयुक्त	२	६६
नास्त्यन्तो विस्तर	१०	१९
नाहं प्रकाशः	७	२५
नाहं वेदैर्न तपसा	११	५३
निगृहीतानि	२	६८
निगृह्णाम्युत्सृजामि	९	१९
निग्रहः किं करि	३	३३
नित्यं च समचित्त	१३	९
नित्यं दर्शनकाङ्क्षि	११	५२
नित्यं यज्ञे प्रतिष्ठि	३	१५
नित्यं वा मन्यसे	२	२६
नित्यतृप्तो निराश्र	४	२०
नित्ययुक्तस्य योगि	८	१४
नित्ययुक्ता उपासते	९	१४
नित्ययुक्ता उपा	१२	२
नित्यस्योक्ताः शरी	२	१८
नित्यस्सर्वगत	२	२४
निद्रालस्यप्रमादो	१८	३९
निधानं बीजमव्य	९	१८
निन्दन्तस्तव	२	३६
निबद्धःस्वेन	१८	६०
निबध्नन्ति धनंजय	४	४१
,,	९	९
निबध्नन्ति महा	१४	५
निबन्धायासुरी	१६	५
निमित्तमात्रं भव	११	३३
निमित्तानि च	१	३१
नियतं कुरु कर्म	३	८
नियतं क्रियते	१८	९
नियतं संगरहितं	१८	२३
नियतस्य तु	१८	७
नियम्य भरतर्षभ	३	४१
नियम्यारभतेऽर्जुन	३	७
नियोजयसि केशव	३	१
निराशीरपरिग्रहः	६	१०
निराशीर्निर्ममो	३	३०
निराशीर्यतचित्तात्मा	४	२१
निराहारस्य देहिनः	२	५९
निरुद्धं योगसेवया	६	२०
निर्गुणं गुणभोक्तृ	१३	१४
निर्दोषं हि समं	५	१९
निर्द्वन्द्वो नित्यसत्त्व	२	४५
निर्द्वन्द्वो हि महा	५	३
निर्ममो निरहंकारः	२	७१
,,	१२	१३
निर्मानमोहा जित	१५	५
निर्योगक्षेम आत्म	२	४५
निर्वैरः सर्वभूतेषु	११	५५
निवसिष्यसि	१२	८
निवासः शरण	९	१८
निश्चयं शृणु मे	१८	४
निश्चितं मतमुत्त	१८	६
निःश्रेयसकरावुभौ	५	२
निष्ठा ज्ञानस्य या	१८	५०
निस्त्रैगुण्यो भवा	२	४५
निःस्पृहः सर्वकामे	६	१८
निहत्य धार्तराष्ट्रान्नः	१	३६
नीतिरस्मि जिगीष	१०	३८
नेङ्गते सोपमा	६	१९
नेहाभिक्रमनाशो	२	४०
नैतत्त्वय्युपपद्यते	२	३
नैति मामेति	४	९
नैते सृती पार्थ	८	२७
नैनं छिन्दन्ति	२	२३
नैनं दहति पावकः	२	२३
नैनं पश्यन्त्ययचेत	१५	११
नैनां प्राप्य विमु	२	७२
नैवं पापमवाप्स्यसि	२	३८
नैवं शोचितुमर्हसि	२	२६
नैव किंचित्करोति	४	२०

Digitization by Arya Samaj Charitable Foundation, Chennai

पाद	अ.	श्लो.
नैव किंचित्करोमीति	५	८
नैव कुर्वन्न कारयन्	५	१३
नैव तस्य कृतेनार्थो	३	१८
नैव त्यागफलं	१८	८
नष्कैर्म्यं पुरुषो	३	४
नैष्कर्म्यसिद्धिं पर	१८	४९
नोद्विजेत्प्राप्य चाप्रि	५	२०
न्याय्यं वा विपरी	१८	१५
पचाम्यन्नं चतुर्वि	१५	१४
पञ्च चेन्द्रियगोच	१३	५
पञ्चैतानि महा	१८	१३
पञ्चैते तस्य हेतवः	१८	१५
पणवानकगोमुखाः	१	१३
पण्डिताः समदर्शि	५	१८
पतन्ति नरकेऽशु	१६	१६
पतन्ति पितरो	१	४२
पत्रं पुष्पं फलं तोयं	९	२६
पदं गच्छन्त्यनाम	२	५१
पद्मपत्रमिवाम्भसा	५	१०
परं जन्म विवस्वतः	४	४
परं दृष्ट्वा निवर्तते	२	५९
परं ब्रह्म परं धाम	१०	१२
परं भावमजानन्तो	७	२४
,,	९	११
परं भूयः प्रव	१४	१
परधर्मात्स्वनुष्ठितात्	३	३५
,,	१८	४७
परधर्मो भयावहः	३	३५
परमं पुरुषं दिव्यं	८	८
परमं रूपमैश्वरम्	११	९
परमात्माऽयम	१३	३१
परात्मा समाहितः	६	७
परमात्मेति	१३	२२
परमात्मेत्युदा	१५	१७
परमाप्नोति पूरुषः	३	१९
परस्तस्मात्तु भावो	८	२०
परस्परं भावयन्तः	३	११
परस्योत्सादनार्थं	१७	१९
परां सिद्धिमितो	१४	१
परिचर्यात्मकं कर्म	१८	४४
परिणामेऽमृतोप	१८	३७
परिणामे विषमिव	१८	३८
परित्राणाय साधूनां	४	८
परिप्रश्नेन सेवया	४	३४
पर्जन्यादन्नसंभवः	३	१४
पर्याप्तं त्विदमेतेषां	१	१०
पवनः पवतामस्मि	१०	३१
पवित्रमिदमुत्तमम्	९	२
पवित्रमिह विद्यते	४	३८
पवित्रं परमं भवान्	१०	१२
पश्यत्यकृतबुद्धि	१८	१६
पश्यन्ति ज्ञान	१५	१०
पश्यन्त्यात्मन्यव	१५	११
पश्यन्नात्मनि	६	२०
पश्यञ्छृण्वन्स्पृशन्	५	८
पश्य मे पार्थ	११	५
पश्य मे योगमैश्वरम्	९	५
,,	११	८
पश्यादित्यान्वसून्	११	६
पश्याद्य सचरा	११	७
पश्यामि त्वा दीप्त	११	१९
पश्यामि त्वा दुर्नि	११	१७
पश्यामि त्वां सर्व	११	१६
पश्यामि देवांस्तव	११	१५
पश्यामि विश्वेश्वर	११	१६
पश्याश्चर्याणि	११	६
पश्यैतां पाण्डुपुत्रा	१	३
पाञ्चजन्यं हृषीकेशो	१	१५
पाण्डवानां धनं	१०	३७
पापं चरति पूरुषः	३	३६
पापमेवाश्रयेदस्मान्	१	३६
पापादस्मान्निवर्तितुं	१	३९
पाप्मानं प्रजहि ह्येनं	३	४१
पार्थ नैवेह नामुत्र	६	४०
पार्थ संपदमासुरी	१६	४
पार्थस्य च महा	१८	७४
पावनानि मनी	१८	५
पिताऽसि लोकस्य	११	४३
पिताऽहमस्य	९	१७
पितॄणामर्यमा	१०	२९
पितॄनथ पितामहान्	१	२६
पितॄन्यान्ति पितृ	९	२५
पितेव पुत्रस्य	११	४४
पीडया क्रियते	१७	१९
पुण्यो गन्धः पृथि	७	९
पुत्रदारगृहादिषु	१३	९
पुत्रान्पौत्रान्सखीन्	१	२६
पुनरावर्तिनोऽर्जुन	८	१६
पुनर्जन्म न विद्यते	८	१६
पुनर्योगं च शंससि	५	१
पुनश्च भूयोऽपि	११	३९
पुमांश्चरति निःस्पृहः	२	७१
पुरा प्रोक्ता मया	३	३
पुरुजित्कुन्तिभोजश्च	१	५
पुरुषं पुरुषर्षभ	२	१५
पुरुषं शाश्वतं	१०	१२
पुरुषः प्रकृतिस्थो	१३	२१
पुरुषश्चाधिदैवतम्	८	४
पुरुषस्य विपश्चितः	२	६०
पुरुषस्स परः पार्थ	८	२२
पुरुषस्सुखदुःखा	१३	२०
पुरोधसां च मुख्यं	१०	२४
पुरोवाच प्रजापतिः	३	१०
पुष्णामि चौषधीः	१५	१३
पूजनं शौचमार्जं	१७	१४
पूजार्हावरिसूदन	२	४
पूता मद्भावमागताः	४	१०
पूति पर्युषितं च	१७	१०
पूर्वाभ्यासेन तेनैव	६	४४
पूर्वैः पूर्वतरं कृतम्	४	१५
पूर्वैरपि मुमुक्षुभिः	४	१५
पृच्छामि त्वा धर्म	२	७
पृथक्केशिनिषूदन	१८	१
पृथक्त्वेन तु	१८	२१
पृथक्त्वेन धनं	१८	२९
पौण्ड्रं दध्मौ महा	१	१५
प्रकाश उपजायते	१४	११
प्रकाशकमनामयम्	१४	६
प्रकाशं च प्रवृत्तिं	१४	२२
प्रकाशयति तत्परम्	५	१६
प्रकाशयतिं भारत	१३	३३
प्रकृतिं च गुणैः	१३	२३
प्रकृतिं पुरुषं चैव	१३	१९
प्रकृतिं मोहिनीं	९	१२
प्रकृति यान्ति भूतानि	३	३३
प्रकृतिं यान्ति मामि	९	७
प्रकृतिं विद्धि मे	७	५
प्रकृतिं स्वामधिष्ठाय	४	६
प्रकृतिं स्वामवष्टभ्य	९	८
प्रकृतिस्त्वां नियो	१८	५९
प्रकृतिस्थानि	१५	७
प्रकृतेः क्रियमा	३	२७
प्रकृतेर्गुणसंमूढाः	३	२९
प्रकृतेर्ज्ञानवानपि	३	३३
प्रकृत्या नियताः	७	२०
प्रकृत्यैव च	१३	२९

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रजनश्चास्मि	१०	२८
प्रजहाति यदा	२	५५
प्रजापतिस्त्वं प्रपि	११	३९
प्रज्ञावादांश्च भाषसे	२	११
प्रणम्य शिरसा	११	१४
प्रणवः सर्ववेदेषु	७	८
प्रतिजाने प्रियो	१८	६५
प्रत्यक्षावगमं धर्म्यं	९	२
प्रत्यवायो न विद्यते	२	४०
प्रथितः पुरुषोत्तमः	१५	१८
प्रदुष्यन्ति कुल	१	४१
प्रद्विषन्तोऽभ्यसूय	१६	१८
प्रनष्टस्ते धनंजय	१८	७२
प्रपद्यन्ते नराधमाः	७	१५
प्रपद्यन्तेऽन्यदेवताः	७	२०
प्रपश्यद्भिर्जनार्दन	१	३९
प्रभवं न महर्षयः	१०	२
प्रभवः प्रलयस्तथा	७	६
प्रभवप्रलयस्थानं	९	१८
प्रभवत्यहरागमे	८	१९
प्रभवन्त्यहरागमे	८	१८
प्रभवन्त्युग्रकर्माणः	१६	९
प्रभाऽस्मि शशिसूर्य	७	८
प्रमाथि बलवद्दृढन्	६	३४
प्रमादमोहौ तमसो	१४	१७
प्रमादालस्यनिद्रा	१४	८
प्रमादे संजयत्युत	१४	९
प्रमादो मोह एव	१४	१३
प्रयत्नाद्यतमानस्तु	६	४५
प्रयाणकाले च कथं	८	२
प्रयाणकालेऽपि च	७	३०
प्रयाणकाले मनसा	८	१०
प्रयाता यान्ति तं	८	२३
प्रलपन्विसृजन्गृह्णन्	५	९

प्रलयं याति देह	१४	१४
प्रलयान्तामुपाश्रि	१६	११
प्रलये न व्यथन्ति	१४	२
प्रवक्ष्याम्यनसूयवे	९	१
प्रवदन्ति न पण्डि	५	४
प्रवदन्त्यविपश्चितः	२	४२
प्रवर्तन्ते विधानो	१७	२४
प्रवर्तन्तेऽशुचित्र	१६	१०
प्रविभक्तमनेकधा	११	१३
प्रवृत्तिं च निवृत्तिं	१६	७
”	१८	३०
प्रवृत्ते शस्त्रसंपाते	१	२०
प्रवेष्टुं च परंतप	११	५४
प्रशस्ते कर्मणि	१७	२६
प्रशान्तमनसं ह्येनं	६	२७
प्रशान्तात्मा विगत	६	१४
प्रसक्ताः कामभो	१६	१६
प्रसङ्गेन फलाका	१८	३४
प्रसन्नचेतसो ह्याशु	२	६५
प्रसादमधिगच्छति	२	६४
प्रसादये त्वामहमी	११	४४
प्रसादे सर्वदुःखा	२	६५
प्रसीद देवेश जग	११	२५
”	११	४५
प्रहसन्निव भारत	२	१०
प्रह्लादश्चास्मि	१०	३०
प्राक्शरीरविमोक्ष	५	२३
प्राणकर्माणि चापरे	४	२७
प्राणांस्त्यक्त्वा	१	३३
प्राणान्प्राणेषु जुह्वति	४	३०
प्राणापानगतीरुद्ध्वा	४	२९
प्राणापानसमा	१५	१४
प्राणापानौ समौ	५	२७
प्राणायामपरायणाः	४	२९

प्राणिनां देहमा	१५	१४
प्राणेऽपानं तथा	४	२९
प्राधान्यतः कुरु	१०	१९
प्राप्नुयात्पुण्यकर्म	१८	७१
प्राप्य पुण्यकृतां	६	४१
प्राहुस्त्यागं विचक्ष	१८	२
प्रियः प्रियायार्हसि	११	४४
प्रियो हि ज्ञानिनोऽ	७	१७
प्रेतान्भूतगणां	१७	४
प्रोक्तवानहमव्ययम्	४	१
प्रोच्यते गुणसं	१८	१९
प्रोच्यमानमशेषे	१८	२९
फलं त्यक्त्वा मनी	२	५१
फलं यज्ञतपःक्रि	१७	२५
फलमुद्दिश्य वा	१७	२१
फले सक्तो निब	५	१२
बन्धं मोक्षं च या	१८	३०
बन्धुरात्माऽऽत्मन	६	६
बलं बलवतामस्मि	७	११
बलं भीमाभिरक्षि	१	१०
बलं भीष्माभिरक्षि	१	१०
बलादिव नियोजि	३	३६
बहवो ज्ञानतपसा	४	१०
बहिरन्तश्च भूता	१३	१५
बहुधा विश्वतोमुख	९	१५
बहुशाखा ह्यनन्ता	२	४१
बहूदरं बहुदंष्ट्रा	११	२३
बहूनां जन्मना	७	१९
बहूनि मे व्यती	४	५
बहून्यदृष्टपूर्वाणि	११	६
बाह्यस्पर्शेष्वसक्ता	५	२१
बिभर्त्यव्यय	१५	१७
जं बीतदहमर्जुन	१०	३९
बीजं मां सर्वभूता	७	१०

बुधा भावसमन्वि	१०	८
बुद्धयोऽव्यवसायि	२	४१
बुद्धिं मोहयसीव मे	३	२
बुद्धिः पर्यवतिष्ठते	२	६५
बुद्धिग्राह्यमतीन्द्रि	६	२१
बुद्धिनाशात्प्रणश्यति	२	६३
बुद्धियुक्तो जहाती	२	५०
बुद्धियोगमुपाश्रि	१८	५७
बुद्धियोगाद्धनञ्जय	२	४९
बुद्धिरव्यक्तमेव	१३	५
बुद्धिर्ज्ञानमसंमो	१०	४
बुद्धिर्बुद्धिमतामस्मि	७	१०
बुद्धिर्यस्य न लिप्य	१८	१७
बुद्धिर्योगे त्विमां	२	३९
बुद्धिर्व्यतितरिष्यति	२	५२
बुद्धिस्सा पार्थ ता	१८	३२
बुद्धिस्सा पार्थ रा	१८	३१
बुद्धिस्सा पार्थ सा	१८	३०
बुद्धेर्भेदं धृतेश्चैव	१८	२९
बुद्धौ शरणमन्वि	२	४९
बुद्ध्या धृतिगृहीत	६	२५
बुद्ध्या युक्तो यया	२	३९
बुद्ध्या विशुद्धया	१८	५१
बृहत्साम तथा	१०	३५
बोद्धव्यं च विकर्म	४	१७
बोधयन्तः परस्प	१०	९
ब्रह्मकर्मसमाधिना	४	२४
ब्रह्मचर्यमहिंसा च	१७	१४
ब्रह्मचारिव्रते	६	१४
ब्रह्मणस्त्रिविधः	१७	२३
ब्रह्मणो हि प्रति	१४	२७
ब्रह्मण्याधाय कर्मा	५	१०
ब्रह्मनिर्वाणमृच्छति	२	७२
ब्रह्म ब्रह्मविदो	८	२४

ब्रह्मभूतः प्रसन्ना	१८	५४
ब्रह्मभूतमकल्मषम्	६	२७
ब्रह्मभूतोऽधिगच्छ	५	२४
ब्रह्मभूयाय कल्पते	१४	२६
,,	१८	५३
ब्रह्मविद्ब्रह्मणि	५	२०
ब्रह्म संपद्यते तदा	१३	३०
ब्रह्मसूत्रपदैश्चैव	१३	४
ब्रह्माक्षरसमुद्भवम्	३	१५
ब्रह्माग्नावपरे यज्ञं	४	२५
ब्रह्माग्नौ ब्रह्मणा	४	२४
ब्रह्माणमीशं कमला	११	१५
ब्रह्मार्पणं ब्रह्महविः	४	२४
ब्रह्मैव तेन गन्तव्यं	४	२४
ब्राह्मं कर्म स्वभाव	१८	४२
ब्राह्मणक्षत्रियविशां	१८	४१
ब्राह्मणस्य विजानतः	२	४६
ब्राह्मणास्तेन वेदा	१७	२३
ब्राह्मणे गवि हस्तिनि	५	१८
भक्ता राजर्षय	९	३३
भक्तास्तेऽतीव मे	१२	२०
भक्तास्त्वां पर्युपास	१२	१
भक्तिं मयि परां	१८	६८
भक्तिमान्मे प्रियो	१२	१९
भक्तिमान् यः स	१२	१७
भक्तियोगेन सेव	१४	२६
भक्तिरव्यभिचारि	१३	१०
भक्तोऽसि मे सखा	४	३
भक्त्या त्वनन्यया	११	५४
भक्त्या मामभि	१८	५५
भक्त्या युक्तो योग	८	१०
भक्त्या लभ्यस्त्व	८	२२
भजतां प्रीतिपूर्वं	१०	१०
भजते मामनन्य	९	३०
भजत्येकत्वमास्थितः	६	३१
भजन्ते मां दृढव्र	७	२८
भजन्त्यनन्यमनसो	९	१३
भयं चाभयमेव च	१०	४
भयाद्रणादुपरतम्	२	३५
भयेन च प्रव्य	११	४५
भर्ता भोक्ता महे	१३	२२
भवतीत्यनुशुश्रुम	१	४४
भवतोऽज्ञानमेव च	१४	१७
भवत्यत्यागिनां	१८	१२
भवन्तः सर्व एव हि	१	११
भवन्ति भावा	१०	५
भवन्ति संपदं	१६	३
भवान्भीष्मश्च कर्ण	१	८
भवाप्ययौ हि	११	२
भवामि न चिरात्	१२	७
भविता न च मे	१८	६९
भविष्यंति पुन	१६	१३
भविष्याणि च	७	२६
भवेद्युगपदुत्थिता	११	१२
भस्मसात्कुरुते तथा	४	३७
भस्मसात्कुरुतेऽर्जुन	४	३७
भावमव्ययमीक्षते	१८	२०
भावसंशुद्धिरित्ये	१७	१६
भासस्तवोग्राः प्रत	११	३०
भासस्तस्य महात्म	११	१२
भिन्ना प्रकृतिरष्टधा	७	४
भीमकर्मा वृकोदरः	१	१५
भीमार्जुनसमा युधि	१	४
भीष्मद्रोणप्रमुखतः	१	२५
भीष्ममेवाभिरक्षन्तु	१	११
भीष्मो द्रोणः सूत	११	२६
भुङ्क्ते प्रकृतिजान्	१३	२१
भुञ्जानं वा गुणा	१५	१०
भुञ्जीय भोगान्	२	५
भूतग्राममचेतसः	१७	६
भूतग्राममिमं कृत्स्नं	९	८
भूतग्रामः स एवायं	८	१९
भूतप्रकृतिमोक्षं च	१३	३४
भूतभर्तृ च तज्ज्ञेयं	१३	१६
भूतभावन भूतेश	१०	१५
भूतभावोद्भवकरो	८	३
भूतभृन्न च भूतस्थो	९	५
भूतानामन्त एव	१०	२०
भूतानामस्मि	१०	२२
भूतानामीश्वरोऽपि	४	६
भूतानि यान्ति	९	२५
भूत्वा पुनः सौम्य	११	५०
भूत्वाभूत्वा प्रली	८	१९
भूत्वा यास्यसि लाघ	२	३५
भूमिरापोऽनलो	७	४
भूय एव महा	१०	१
भूयः कथय तृप्ति	१०	१८
भोक्ता च प्रभुरेव	९	२४
भोक्तारं यज्ञतपसां	५	२९
भोक्तृत्वे हेतुरुच्य	१३	२०
भोगैश्वर्यगतिं प्रति	२	४३
भोगैश्वर्यप्रसक्तानां	२	४४
भोजनं तामसप्रियं	१७	१०
भ्रमतीव च मे मनः	१	३०
भ्रामयन्सर्वभूतानि	१८	६१
भ्रुवोर्मध्ये प्राणमावे	८	१०
मच्चित्तस्सततं	१८	५७
मच्चित्तस्सर्वदुर्गा	१८	५८
मच्चित्ता मद्गत	१०	९
मता बुद्धिर्जनार्दन	३	१
मत्कर्मकृन्मत्परमो	११	५५
मत्कर्मपरमो भव	१२	१०
मत्त एव पृथग्वि	१०	५
मत्त एवेति तान्वि	७	१२
मत्तः परतरं नान्यत्	७	७
मत्तस्सर्वं प्रवर्तते	१०	८
मत्तस्स्मृतिर्ज्ञान	१५	१५
मत्प्रसादात्तरिष्य	१८	५८
मत्प्रसादादवाप्नो	१८	५६
मत्संस्थामधि	६	१५
मत्स्थानि सर्व	९	४
मत्स्थानीत्युपधारय	९	६
मदनुग्रहाय परमं	११	१
मदर्थमपि कर्माणि	१२	१०
मदर्थे त्यक्तजीविताः	१	९
मद्गतेनान्तरात्मना	६	४७
मद्भक्त एतद्विज्ञाय	१३	१८
मद्भक्तस्सङ्गवर्जि	११	५५
मद्भक्ता यान्ति	७	२३
मद्भक्तिं लभते	१८	५४
मद्भक्तेष्वभिधा	१८	६८
मद्भावं सोऽधि	१४	१९
मद्भावा मानसा	१०	६
मद्भावायोपपद्यते	१३	१८
मद्याजी मां नम	९	३४
,,	१८	६५
मध्यं चैवाहमर्जुन	१०	३२
मध्यस्थद्वेष्यबन्धुषु	६	९
मध्ये तिष्ठन्ति	१४	१८
मनःप्रसादः	१७	१६
मनःप्राणेन्द्रिय	१८	३३
मनश्चञ्चलमस्थिरम्	६	२६
मनष्षष्ठानीन्द्रि	१५	७
मनसस्तु परा बुद्धिः	३	४२
मनसैवेन्द्रियग्रामं	६	२४
मनस्संयम्य मच्चित्तो	६	१४

Digitization by Arya Samaj Charitable Foundation, Chennai

मनुरिक्ष्वाकवेऽब्र	४	१
मनुष्याणां जनार्दन	१	४४
मनुष्याणां सहस्रेषु	७	३
मनुष्याः पार्थ सर्वशः	३	२३
,,	४	११
मनो दुर्निग्रहं	६	३५
मनो हृदि निरुध्य	८	१२
मन्त्रहीनमदक्षिणम्	१७	१३
मन्त्रोऽहमहमेवाज्यं	९	१६
मन्मना भव मद्भक्तो	९	३४
मन्मना भव	१८	६५
मन्मया मामुपाश्रिताः	४	१०
मन्यते तमसाऽऽवृ	१८	३२
मन्यते नाधिकं	६	२२
मन्यन्ते त्वाम्	२	३५
मन्यन्ते मामबुद्धयः	७	२४
मन्यसे यदि तच्छ	११	४
मम तेजोंशसंभ	१०	४१
मम देहे गुडा	११	७
मम भूतमहेश्वरम्	९	११
मम माया दुरत्यया	७	१४
मम योनिर्महद्ब्रह्म	१४	३
मम यो वेत्ति	१०	७
मम वर्त्मानुवर्तन्ते	३	२३
,,	४	११
मम साधर्म्यमागताः	१४	२
समात्मा भूतभावनः	९	५
ममाव्ययमनुत्तमम्	७	२४
ममैवांशो जीव	१५	७
मया ततमिदं सर्वं	९	४
मया द्रष्टुमिति प्रभो	११	४
मयाऽध्यक्षेण	९	१०
मया प्रमादात्प्रण	११	४१
मया प्रसन्नेन	११	४७
मया भूतं चरा	११	३९
मया हतांस्त्वं	११	३४
मयि चानन्ययो	१३	१०
मयि ते तेषु	९	२९
मयि बुद्धिं निवे	१२	८
मयि संन्यस्य	१८	५७
,,	१२	६
मयि सर्वमिदं प्रोतं	७	७
मयि सर्वाणि	३	३०
मयैव विहितान्हि	७	२२
मयैवैते निहताः	११	३३
मय्यर्पितमनोबुद्धिः	८	७
,,	१२	१४
मय्यावेशितचेत	१२	७
मय्यावेश्य मनो	१२	२
मय्यासक्तमनाः	७	१
मय्येव मन	१२	८
मरणादतिरिच्यते	२	३४
मरीचिर्मरुतामस्मि	१०	२१
महति स्यन्दने	१	१४
महर्षयः सप्त पूर्वे	१०	६
महर्षीणां च सर्व	१०	२
महर्षीणां भृगुरहं	१०	२५
महात्मानस्तु मां	९	१३
महाबाहो बहुबाहू	११	२३
महाभूतान्यहंकारो	१३	५
महायोगेश्वरो हरिः	११	९
महाशनो महापाप्मा	३	३७
मां च योऽव्यभि	१४	२६
मां चैवान्तःशरीर	१७	६
मां तु वेद न	७	२६
मां ध्यायन्त उपा	१२	६
मां हि पार्थ व्यपा	९	३२
मा कर्मफलहेतुर्भूः	२	४७
माता धाता पिता	९	१७
मातुलाः श्वशुराः	१	३४
माते व्यथामा	११	४९
मा ते सङ्गोऽस्त्व	२	४७
मात्रास्पर्शास्तु	२	१४
माधवः पाण्डवश्चैव	१	१४
मानावमानयोः	१४	२५
मानुषीं तनुमाश्रितं	९	११
मा फलेषु कदा	२	४७
मामकाः पाण्डवा	१	१
मामनुस्मर युध्य च	८	७
मामप्राप्यैव कौन्ते	१६	२०
मामात्मपरदेहेषु	१६	१८
मामाश्रित्य यतन्ति	७	२९
मामिच्छाप्तुं	१२	९
मामुपेत्य तु कौन्तेय	८	१६
मामुपेत्य पुनर्जन्म	८	१५
मामेकं शरणं व्रज	१८	६६
मामेभ्यःपरमव्य	७	१३
मामेव ये प्रपद्यन्ते	७	१४
मामेवानुत्तमां	७	१८
मामेवैष्यत्यसंश	१८	६८
मामेवैष्यसि युक्त्वै	९	३४
मामेवैष्यसि सत्य	१८	६५
मामेवैष्यस्यसंशयः	८	७
माययाऽपहृतज्ञानाः	७	१५
मायामेतां तरन्ति	७	१४
मार्दवं ह्रीरचापलं	१६	२
मा शुचः संपदं	१६	५
मासानां मार्गशी	१०	३५
माहात्म्यमपि	११	२
मित्रद्रोहे च पातकं	१	३८
मिथ्याचारः स	३	६
मिथ्यैष व्यवसा	१८	५९
मुक्तसङ्गः समाचर	३	९
मुक्तसङ्गोऽनहं	१८	२६
मुक्तो यः स च	१२	१५
मुखं च परिशुष्यति	१	२९
मुच्यन्ते तेऽपि	३	३१
मुच्यन्ते सर्वकिल्बि	३	१३
मुनिर्मोक्षपरायणः	५	२८
मुनीनामप्यहं	१०	३७
मूढग्राहेणात्मनो	१७	१९
मूढयोनिषु	१४	१५
मूढा जन्मनि	१६	२०
मूढोऽयं नाभिजा	७	२५
मूर्तयः संभवन्ति	१४	४
मूर्ध्न्याधायात्मनः	८	१२
मृगाणां च मृगे	१०	३०
मृत्युं श्रुतिपरा	१३	२५
मृत्युसंसारवर्त्मनि	९	३
मृत्युसंसारसागरात्	१२	७
मृत्युस्सर्वहरश्चाहं	१०	३४
मेधावी छिन्नसं	१८	१०
मेरुः शिखरिणा	१०	२३
मैत्रः करुण एव च	१२	१३
मोक्षयिष्यामि मा	१८	६६
मोक्ष्यसे कर्मबन्ध	९	२८
मोघं पार्थ स जीवति	३	१६
मोघज्ञाना विचेत	९	१२
मोघाशा मोघकर्मा	९	१२
मोहजालसमावृताः	१६	१६
मोहनं सर्वदेहि	१४	८
मोहमेव च पाण्डव	१४	२२
मोहात्तस्य परित्या	१८	७
मोहादारभ्यते	१८	२५
मोहाद्गृहीत्वाऽस	१६	१०
मोहितं नाभिजाना	७	१३

Digitization by Arya Samaj Charitable Foundation, Chennai

मोहोऽयं विगतो	११	१
मौनं चैवास्मि	१०	३८
मौनमात्मविनि	१७	१६
य आस्ते मनसा	३	६
य इदं परमं गुह्यं	१८	६८
य एतेऽत्र समा	१	२३
य एनं वेत्ति हन्तारं	२	१९
य एनमजमव्ययम्	२	२१
य एवं वेत्ति पुरुषं	१३	२३
यं प्राप्य न निवर्त	८	२१
यंयं वाऽपि स्मरन्	८	६
यं लब्ध्वा चापरं	६	२२
यं संन्यास इति	६	२
यं हि न व्यथय	२	१५
यः पश्यति तथा	१३	२९
यः पश्यति स पश्य	५	५
,,	१३	२७
यः प्रयाति त्यजन्	८	१३
यः प्रयाति स मद्भा	८	५
यक्षरक्षांसि राज	१७	४
यक्ष्ये दास्यामि	१६	१५
यच्चन्द्रमसि	१५	१२
यच्चान्यद्द्रष्टुम्	११	७
यच्चापहासार्थम्	११	४२
यच्चापि सर्वभूता	१०	३९
यच्चाप्युत्क्रामती	१५	८
यच्छोकमुच्छोषण	२	८
यच्छ्रेय एतयोरेकं	५	१
यच्छ्रेयः स्यान्निश्चि	२	७
यजन्त इह देवताः	४	१२
यजन्ते तामसा	१७	४
यजन्ते नामयज्ञै	१६	१७
यजन्ते श्रद्धयाऽ	१७	१
यजन्ते श्रद्धयाऽ	९	२३

यजन्ते सात्त्विका	१७	४
यजन्तो मामुपास	९	१५
यजन्त्यविधिपूर्वकं	९	२३
यज्जुहोषि ददासि	९	२७
यज्ञः कर्मसमुद्भवः	३	१४
यज्ञक्षपितकल्मषाः	४	३०
यज्ञदानतपःकर्म	१८	३
,,	१८	५
तज्ञदानतपःक्रियाः	१७	२४
यज्ञशिष्टामृतभुजो	४	३१
यज्ञशिष्टाशिनः	३	१३
यज्ञस्तपस्तथा दानं	१७	७
यज्ज्ञात्वा न पुन	४	३५
यज्ज्ञात्वा नेह	७	२
यज्ज्ञात्वा मुनयस्स	१४	१
यज्ज्ञात्वाऽमृतम	१३	१२
यज्ज्ञात्वा मोक्ष्यसे	४	१६
,,	९	१
यज्ञाद्भवति पर्जन्यः	३	१४
यज्ञानां जपयज्ञोऽ	१०	२५
यज्ञायाचरतः कर्म	४	२३
यज्ञार्थात्कर्मणोऽ	३	९
यज्ञाश्च विहिताः	१७	२३
यज्ञे तपसि दाने	१७	२७
यज्ञेनैवोपजुह्वति	४	२५
यज्ञैरिष्ट्वा स्वर्गतिं	९	२०
यज्ञो दानं तपश्चै	१८	५
यतः प्रवृत्तिः प्रसृ	१५	४
यतः प्रवृत्तिर्भूता	१८	४६
यतचित्तेन्द्रियक्रियः	६	१२
यततामपि सिद्धानां	७	३
यतते च ततो भूयः	६	४३
यततो ह्यपि कौन्ते	२	६०
यतन्तश्च दृढव्रताः	९	१४

यतन्तोऽप्यकृता	१५	११
यतन्तो योगिनश्चै	१५	११
यतयः संशितव्रताः	४	२८
यतवाक्कायमानसः	१८	५२
यतात्मा दृढनिश्च	१२	१४
यतीनां यतचेतसां	५	२६
यतेन्द्रियमनोबुद्धिः	५	२८
यतोयतो निश्चरति	६	२६
यत्करोषि यदश्ना	९	२७
यत्तज्ज्ञानं मतं	१३	२
यत्तत्तामसमुच्य	१८	२५
यत्तत्सात्त्विकमु	१८	२३
यत्तदग्रेऽमृतोपमं	१८	३८
यत्तदग्रे विषमिव	१८	३७
यत्तपस्यसि कोन्ते	९	२७
यत्तु कामेप्सुना	१८	२४
यत्तु कृत्स्नवदेक	१८	२२
यत्तु प्रत्युपकारार्थं	१७	२१
यत्तेऽहं प्रीयमाणा	१०	१
यत्त्वयोक्तं व- .ते	११	१
यत्र काले त्वनावृ	८	२३
यत्र चैवात्मनाऽऽ	६	२०
यत्र पार्थो धनुर्धरः	१८	७८
यत्र योगेश्वरः	१८	७८
यत्रोपरमते चित्तं	६	२०
यत्सांख्यैः प्राप्यते	५	५
यथाऽऽकाशस्थितो	९	६
यथा कुर्वन्ति भारत	३	२५
यथा ज्ञास्यसि	७	१
यथाऽऽदर्शो मलेन	३	३८
यथा दीपो निवात	६	१९
यथा नदीनां बह	११	२८
यथा प्रकाशयत्ये	१३	३३
यथा प्रदीप्तं ज्वल	११	२९

यथाभागमवस्थिताः	१	११
यथावच्छृणु	१८	१९
यथा विन्दति	१८	४५
यथा सर्वगतं	१३	३२
यथेच्छसि तथा	१८	६३
यथैधांसि समिद्धोऽ	४	३७
यथोक्तं पर्युपासते	१२	२०
यथोल्बेनावृतो गर्भः	३	३८
यदक्षरं वेदविदो	८	११
यदग्रे चानुबन्धे	१८	३९
यदा ते मोहकलि	२	५२
यदादित्यगतं	१५	१२
यदा द्रष्टाऽनुपश्य	१४	१९
यदा भूतपृथग्भा	१३	३०
यदायदा हि धर्म	४	७
यदा विनियतं चित्तं	६	१८
यदा संहरते चायं	२	५८
यदा सत्त्वे प्रवृद्धे	१४	१४
यदा हि नेन्द्रिया	६	४
यदा स्थास्यति	२	५३
यदिच्छन्तो ब्रह्मच	८	११
यदि भाः सदृशी	११	१२
यदि मामप्रतीकारं	१	४६
यदि ह्यहं न वर्तेयं	३	२३
यदृच्छया चोपपन्नं	२	३२
यदृच्छालाभसंतुष्टो	४	२२
यदेभिः स्यात्त्रिभि	१८	४०
यद्गत्वा न निवर्त	१५	६
यद्यदाचरति श्रेष्ठः	३	२१
यद्यद्विभूतिमत्सत्त्वं	१०	४१
यद्यप्येते न पश्य	१	३८
यद्यहंकारमाश्रित्य	१८	५९
यद्राज्यसुखलोभेन	१	४५
यद्वा जयेम यदि	२	६

Digitization by Arya Samaj Charitable Foundation, Chennai

यद्विकारि यतश्च	१३	३
यन्त्रारूढानि माय	१८	६१
यन्मनोऽनुविधीयते	२	६७
यन्मां वदसि केश	१०	१४
यन्मे त्वदन्येनन	११	४७
यमस्संयमतामहं	१०	२९
यया तु धर्मकामा	१८	३४
यया धर्ममधर्मं च	१८	३१
यया स्वप्नं भयं	१८	३५
ययेदं धार्यते जगत्	७	५
यश्चैनं मन्यते हतं	२	१९
यश्शास्त्रविधि	१६	२३
यष्टव्यमेवेति मनः	१७	११
यस्तं वेद स वेदवि	१५	१
यस्तु कर्मफलत्या	१८	११
यस्त्वात्मरतिरेव	३	१७
यस्त्विन्द्रियाणि मन	३	७
यस्मात्क्षरमतीतोऽ	१५	१८
यस्मान्नोद्विजते	१२	१५
यस्मिन्गता न निव	१५	४
यस्मिन्स्थितो न	६	२२
यस्यनाहंकृतो	१८	१७
यस्य सर्वे समार	४	१९
यस्यां जाग्रति	२	६९
यस्यान्तःस्थानि	८	२२
यस्सदा मुक्त एव	५	२८
यस्स मामेति	११	५५
यस्सर्वत्रानभिस्नेहः	२	५७
यस्स सर्वेषु भूतेषु	८	२०
यातयामं गतरसं	१७	१०
याति नास्त्यत्र	८	५
याति पार्थानुचिन्त	८	८
या निशा सर्वभूता	२	६९
यानेव हत्वा न	२	६
यान्ति देवव्रता	९	२५
यान्ति ब्रह्म सनात	४	३१
यान्ति मद्याजिनोऽ	९	२५
याभिर्विभूतिभिर्लो	१०	१६
यामिमां पुष्पितां	२	४२
यावत्संजायते किं	१३	२६
यावदेतान्निरीक्षेऽ	१	२२
यावानर्थ उदपाने	२	४६
यावन्यश्चास्मि	१८	५५
युक्त आसीत मत्परः	२	६१
,,	६	१४
युक्त इत्युच्यते तदा	६	१८
युक्त इत्युच्यते यो	६	८
युक्तः कर्मफलं	५	१२
युक्तचेष्टस्य कर्मसु	६	१७
युक्तस्वप्नावबोधस्य	६	१७
युक्ताहारविहारस्य	६	१७
युक्तो मन्येत तत्त्व	५	८
युज्यते नात्र संश	१०	७
युञ्जतो योगमात्म	६	१९
युञ्जन्नेवं सदाऽऽ	६	१५
युद्धाय कृतनिश्चयः	२	३७
युद्धे चाप्यपलाय	१८	४३
युद्धे प्रियचिकीर्षवः	१	२३
युधामन्युश्च विक्रा	१	६
युध्यस्वजेताऽसि	११	३४
युध्यस्व विगतज्वरः	३	३०
युयुत्सुं समुपस्थितम्	१	२८
युयुधानो विराटश्च	१	४
ये चाप्यक्षरमव्यक्तं	१२	१
ये चैव सात्त्विका	७	१२
ये जनाः पर्युपासते	९	२२
ये तु धर्म्यामृतमि	१२	२०
ये तु सर्वाणि कर्मा	१२	६
ये त्वक्षरमनिर्दे	१२	३
ये त्वन्यदेवता	९	२३
ये त्वेतदभ्यसूयन्तो	३	३२
येन भूतान्यशेषेण	४	३५
येन मामुपयान्ति	१०	१०
येन श्रेयोऽहमाप्नु	३	२
येन सर्वमिदं ततम्	२	१७
,,	८	२२
,,	१८	४६
येनात्मैवात्मना	६	६
ये पचन्त्यात्मकार	३	१३
येऽपि स्युः पापयो	९	३२
ये भजन्ति तु मां	९	२९
ये मे मतमिदं	३	३१
ये यथा मां प्रपद्य	४	११
येऽवस्थिताः प्रत्य	११	३२
ये विदुर्यान्ति ते	१३	३४
ये शास्त्रविधिमुत्सृ	१७	१
येषां च त्वं बहुम	२	३५
येषां त्वन्तगतं पापं	७	२८
येषां नाशितमात्म	५	१६
येषां लोक इमाः	१०	६
येषां साम्ये स्थितं	५	१९
येषामर्थे काङ्क्षितं नो	१	३३
ये हि संस्पर्शजा	५	२२
योगं तं विद्धि पाण्ड	६	२
योगं युञ्जन्मदाश्रयः	७	१
योगं योगेश्वरात्कृ	१८	७५
योगः कर्मसु कौश	२	५०
योगः प्रोक्तः पुरात	४	३
योगक्षेमं वहाम्यहम्	९	२२
योगभ्रष्टोऽभिजाय	६	४१
योगमात्मविशुद्धये	६	१२
योगमायासमावृतः	७	२५
योगयज्ञास्तथाऽपरे	४	२८
योगयुक्तो भवार्जुन	८	२७
योगयुक्तो मुनिर्ब्रह्म	५	६
योगयुक्तो विशुद्धा	५	७
योगसंन्यस्तकर्माणं	४	४१
योगस्थः कुरु कर्मा	२	४८
योगाच्चलितमानसः	६	३७
योगारूढस्तदोच्यते	६	४
योगारूढस्य तस्यैव	६	३
योगिनं सुखमुत्तमं	६	२७
योगिनः कर्म कुर्व	५	११
योगिनः पर्युपासते	४	२५
योगिनामपि सर्वेषां	६	४७
योगिनो यतचित्त	६	१९
योगी नियतमानसः	६	१५
योगी परं स्थानमुपै	८	२८
योगी प्राप्य निवर्त	८	२५
योगी भवति कश्च	६	२
योगी मुह्यति कश्च	८	२७
योगी युञ्जीत सत	६	१०
योगी विगतकल्मषः	६	२८
योगी संशुद्धकिल्बि	६	४५
योगेनाव्यभिचारि	१८	३३
योगेश्वर ततो मे	११	४
योगो नष्टः परंतप	४	२
योगोऽनिर्विण्णचेत	६	२३
योगो भवति दुःख	६	१७
योत्स्यमानानवेक्षेऽहं	१	२३
योद्धुकामानवस्थिता	१	२२
यो न द्वेष्टि न काङ्क्ष	५	३
यो न हृष्यति न	१२	१७
योऽन्तःसुखोऽन्तरा	५	२४
यो बुद्धेः परतस्तु	३	४२
यो भुङ्क्ते स्तेन	३	१२

Digitization by Arya Samaj Charitable Foundation, Chennai

योमद्भक्तः स मे	१२	१४
,,	१२	१६
यो मां पश्यति	६	३०
यो मां स्मरति	८	१४
योमामजमनादिं	१०	३
यो मामेवमसंमूढो	५	१९
यो मे भक्त्या प्रय	९	२६
योऽयं योगस्त्वया	६	३३
यो यच्छ्रद्धस्स	१७	३
यो यो यां यां तनुं	७	२१
यो लोकत्रयमावि	१५	१७
योऽवतिष्ठति नेङ्ग	१४	२३
रक्षांसि भीतानि	११	३६
रजसस्तु फलं	१४	१६
रजसि प्रलयं गत्वा	१४	१५
रजसो लोभ एव	१४	१७
रजस्तमश्चाभिभूय	१४	१०
रजस्येतानि जायन्ते	१४	१२
रजः कर्मणि भारत	१४	९
रजस्सत्त्वं तमश्चै	१४	१०
रजोगुणसमुद्भवः	३	३७
रजो रागात्मकं	१४	७
रथं स्थापंय मेऽच्यु	१	२१
रथोपस्थ उपाविशत्	१	४७
रसनं घ्राणमेव च	१५	९
रसवर्जं रसोऽप्यस्य	२	५९
रसोऽहमप्सु कौन्ते	७	८
रस्याः स्निग्धाः	१७	८
रहस्यं ह्येतदुत्तमम्	४	३
राक्षसीमासुरीं चैव	९	१२
रागद्वेषवियुक्तैस्तु	२	६४
रागद्वेषौ व्यवस्थि	३	३४
रागद्वेषौ व्युदस्य	१८	५१
रागी कर्मफलप्रेप्सुः	१८	२७
राजन् संस्मृत्य	१८	७६
राजविद्या राजगुह्यं	९	२
राजसं चलमध्रुवम्	१७	१८
राजसः परिकीर्ति	१८	२७
राजसास्तामसाश्च	७	१२
राजा वचनमब्रवीत्	१	२
राज्यं भोगास्सुखानि	१	३३
राज्यं सुराणामपि	२	८
रात्रिं युगसहस्रान्तां	८	१७
रात्र्यागमे प्रलीय	८	१८
रात्र्यागमेऽवशः	८	१९
रामः शस्त्रभृतामहं	१०	३१
रुद्राणां शंकरश्चा	१०	२३
रुद्रादित्या वसवो	११	२२
रूपं परं दर्शितमा	११	४७
रूपं महत्ते बहुव	११	२३
रूपमत्यद्भुतं हरेः	१८	७७
रोमहर्षश्च जायते	१	२९
लभते च ततः	७	२२
लभते पौर्वदैहिकम्	६	४३
लभन्ते ब्रह्मनिर्वाणं	५	२५
लभन्ते युद्धमीदृशं	२	३२
लाभालाभौ जयाज	२	३८
लिप्यते न स पापे	५	१०
लुप्तपिण्डोदकक्रियाः	१	४२
लुब्धो हिंसात्मको	१८	२७
लेलिह्यसे ग्रसमानः	११	३०
लोकत्रयं प्रव्यथि	११	२०
लोकत्रयेऽप्यप्रति	११	४३
लोकसंग्रहमेवापि	३	२०
लोकस्तदनुवर्तते	३	२१
लोकस्य सृजति प्रभुः	५	१४
लोकान्नोद्विजते	१२	१५
लोकान्समग्रान्वद	११	३०
लोकान्समाहर्तुमिह	११	३२
लोके जन्म यदी	६	४२
लोकेऽस्मिन्द्विविधा	३	३
लोको मामजमव्य	७	२५
लोकोऽयं कर्मबन्धन	३	९
लोभः प्रवृत्तिरार	१४	१२
लोभोपहतचेतसः	१	३८
वक्तुमर्हस्यशेषेण	१०	१६
वक्त्राणि ते त्वर	११	२७
वक्ष्यामि भरतर्षभ	८	२३
वक्ष्यामि हितका	१०	१
वदिष्यन्ति तवा	२	३६
वरुणो यादसामहं	१०	२९
वर्णसंकरकारकैः	१	४३
वर्त एव च कर्मणि	३	२२
वर्तते कामकारतः	१६	२३
वर्तते विजितात्म	५	२६
वर्तन्त इति धारयन्	५	९
वर्तमानानि चार्जुन	७	२६
वर्तेतात्मैव शत्रुवत्	६	६
वशे हि यस्येन्द्रिया	२	६१
वश्यात्मना तु यत	६	३६
वसूनां पावकश्चा	१०	२३
वाङ्मयं तप उच्य	१७	१५
वादः प्रवदतामहं	१०	३२
वायुर्गन्धानिवाश	१५	८
वायुर्नावमिवाम्भसि	२	६७
वायुर्यमोऽग्निर्वरुण	११	३९
वायुस्सर्वत्रगो	९	६
वायोरिव सुदुष्करं	६	३४
वासांसि जीर्णानि	२	२२
वासुदेवः सर्वमिति	७	१९
विकारांश्च गुणां	१३	१९
विगतेच्छाभयक्रो	५	२८
विजितात्मा जिते	५	७
विज्ञातुमिच्छामि	११	३१
वितता ब्रह्मणो मुखे	४	३२
वित्तेशो यक्षरक्ष	१०	२३
विदुर्देवा न दान	१०	१४
विद्धि नष्टानचेतसः	३	३२
विद्धि पार्थ बृहस्प	१०	२४
विद्धि पार्थ सनात	७	१०
विद्धि प्रकृतिसंभ	१३	१९
विद्धि माममृतोद्भ	१०	२७
विद्ध्यकर्तारमव्य	४	१३
विद्ध्यनादी उभा	१३	१९
विद्ध्येनमिह वैरिणं	३	३७
विद्याविनयसंपन्ने	५	१८
विद्वान्युक्तः समाच	३	२६
विधिदृष्टो य इज्य	१७	११
विधिहीनमसृष्टान्नं	१७	१३
विनश्यत्स्वविनश्य	१३	२७
विनाशमव्ययस्यास्य	२	१७
विनाशस्तस्य विद्य	६	४०
विनाशाय च दुष्कृ	४	८
विनियम्य समन्ततः	६	२४
विन्दत्यात्मनि यस्सु	५	२१
विपरीतानि केशव	१	३१
विभक्तमिव च	१३	१६
विभूतिं च जनार्द	१०	१८
विभूतीनां परंतप	१०	४०
विभूतीरात्मनः	१०	१९
विभूतेर्विस्तरो	१०	४०
विमुक्तो मामुपैष्य	९	२८
विमुक्तोऽमृतमश्नु	१४	२०
विमुच्य निर्ममः	१८	५३
विमूढा नानुपश्य	१५	१०
विमूढो ब्रह्मणः	६	३८

विमृश्यैतदशेषेण	१८	६३
वियोगं योगसंज्ञितं	६	२३
विवस्वान्मनवे प्राह	४	१
विविक्तदेशसेवित्वं	१३	१०
विविक्तसेवी लघ्वा	१८	५२
विविधा च पृथ	१८	१४
विवृद्धं सत्त्वमित्युत	१४	११
विवृद्धे कुरुनन्दन	१४	१३
विवृद्धे भरतर्षभ	१४	१२
विशते तदनन्तरम्	१८	५५
विशन्ति नाशाय	११	२९
विशन्ति यद्यतयो	८	११
विशन्ति वक्त्राण्य	११	२८
विश्वेऽश्विनौ मरुत	११	२२
विषमे समुपस्थितं	२	२
विषयानिन्द्रियैश्चरन्	२	६४
विषयानुपसेवते	१५	९
विषया विनिवर्तन्ते	२	५९
विषयेन्द्रियसंयो	१८	३८
विषादं मदमेव च	१८	३५
विषादी दीर्घसूत्री	१८	२८
विषीदन्तमिदं	२	१
विषीदन्तमिदं	२	१०
विषीदन्निदमब्रवीत्	१	२८
विष्टभ्याहमिदं	१०	४२
विसर्गः कर्मसंज्ञितः	८	३
विसृजामि पुनः	९	८
विसृज्य सशरं चापं	१	४७
विस्तरेणात्मनो	१०	१८
विस्मयो मे महान्	१८	७७
विहाय कामान्यः	२	७१
विहारशय्यासन	११	४२
वीक्षन्ते त्वां विस्मि	११	२२
वीतरागभयक्रोधः	२	५६
वीतरागभयक्रोधाः	४	१०
वृजिनं संतरिष्यसि	४	३६
वृष्णीनां वासुदेवो	१०	३७
वेत्ताऽसि वेद्यं च	११	३८
वेत्ति यत्र नचैवायं	६	२१
वेत्ति लोकमहेश्वरं	१०	३
वेत्ति सर्वेषु भूते	१८	२१
वेत्थ त्वं पुरुषोत्तम	१०	१५
वेदवादरताः पार्थ	२	४२
वेदानां सामवेदो	१०	२२
वेदान्तकृद्वेदविदे	१५	१५
वेदाविनाशिनं	२	२१
वेदाहं समतीतानि	७	२६
वेदेषु यज्ञेषु तपस्सु	८	२८
वेदैश्च सर्वैरहमेव	१५	१५
वेद्यं पवित्रमोंकारः	९	१७
वेपथुश्च शरीरे मे	१	२९
वैनतेयश्च पक्षिणा	१०	३०
वैराग्यं समुपाश्रितः	१८	५२
वैराग्येण च गृह्यते	६	३५
वैश्यं कर्म स्वभाव	१८	४४
व्यक्तमध्यानि भार	२	२८
व्यपेतभीः प्रीत	११	४९
व्यवसायात्मिका	२	४१
व्यवसायात्मिका	२	४४
व्यात्ताननं दीप्त	११	२४
व्याप्तं त्वयैकेन	११	२०
व्यामिश्रेणैव वाक्ये	३	२
व्यासप्रसादाच्छ्रुत	१८	७५
व्याहरन्मामनुस्मरन्	८	१३
व्यूढं दुर्योधनस्तदा	१	२
व्यूढां द्रुपदपुत्रेण	१	३
शक्नोतीहैव यः	५	५३
शक्य एवंविधो	११	५३
शक्योऽवाप्तुमुपाय	६	३६
शङ्खं दध्मौ प्रताप	१	१२
शङ्खान्दध्मुः पृथक्	१	१८
शठो नैष्कृतिकोऽ	१८	२८
शतशोऽथ सहस्र	११	५
शनैःशनैरुपरमेत्	६	२५
शब्दः खे पौरुषं	७	८
शब्दब्रह्मातिवर्तते	६	४४
शब्दादीन्विषयां	१८	५१
शब्दादीन्विषयान	४	२६
शमः कारणमुच्य	६	३
शमो दमस्तपः	१८	४२
शरीरं यदवाप्नोति	१५	८
शरीरयात्राऽपि च	३	८
शरीरवाङ्मनोभि	१८	१५
शरीरस्थोऽपि	१३	३१
शरीरे पाण्डवस्तदा	११	१३
शश्वच्छान्तिं निग	९	३१
शान्तिं निर्वाणपर	६	१५
शान्तिमाप्नोति	५	१२
शारीरं केवलं कर्म	४	२१
शारीरं तप उच्य	१७	१४
शाश्वतं पदमव्ययं	१८	५६
शाश्वतस्य च धर्म	१४	२७
शिखण्डी च महार	१	१७
शिष्यस्तेऽहं शाधि	२	७
शीतोष्णसुखदुःख	२	१४
शीतोष्णसुखदुःखेषु	६	७
,,	१२	१८
शुक्लकृष्णे गती	८	२६
शुचीनां श्रीमतां	६	४१
शुचौ देशे प्रति	६	११
शुनि चैव श्वपाके	५	१८
शुभाशुभपरित्यागी	१२	१७
शुभाशुभफलैरेवं	९	२८
शूद्रस्यापि स्वभाव	१८	४४
शूद्राणां च परंतप	१८	४१
शृणु मे परमं	१०	१
,,	१८	६४
शृणु मे भरतर्षभ	१८	३६
शृणुयादपि यो नरः	१८	७१
शृण्वतो नास्ति	१०	१८
शैब्यश्च नरपुङ्गवः	१	५
शोकसंविग्नमानसः	१	४७
शौर्यं तेजो धृतिर्दा	१८	४३
श्रद्दधाना मत्परमा	१२	२०
श्रद्धया परया तप्तं	१७	१७
श्रद्धया परयोपेताः	१२	२
श्रद्धयाऽर्चितुमिच्छ	७	२१
श्रद्धा भवति भार	१७	३
श्रद्धामयोऽयं	१७	३
श्रद्धावन्तोऽनसूय	३	३१
श्रद्धावाननसूयश्च	१८	७१
श्रद्धावान्भजते यो	६	४७
श्रद्धावाँल्लभते ज्ञानं	४	३९
श्रद्धाविरहितं यज्ञं	१७	१३
श्रीमदूर्जितमेव वा	१०	४१
श्रुतिविप्रतिपन्ना ते	२	५३
श्रुतौ विस्तरशो	११	२
श्रुत्वाऽन्येभ्य उपा	१३	२५
श्रुत्वाऽप्येनं वेद न	२	२९
श्रेयः परमवाप्स्यथ	३	११
श्रेयान्द्रव्यमयाद्य	४	३३
श्रेयान्स्वधर्मो विगु	३	३५
,,	१८	४७
श्रेयो भोक्तुं भैक्ष्यमपी	२	५
श्रेयो हि ज्ञानमभ्या	१२	१२
श्रोतव्यस्य श्रुतस्य	२	५२

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रोत्रं चक्षुः स्पर्शनं	१५	९
श्रोत्रादीनीन्द्रिया	४	२६
श्वशुरान्सुहृदश्चैव	१	२७
षण्मासा उत्तराय	८	२४
षण्मासा दक्षिणाय	८	२५
स एवायं मया तेऽद्य	४	३
संकल्पप्रभवान्का	६	२४
संकरो नरकायैव	१	४२
संकरस्य च कर्ता	३	२४
संग्रामं न करिष्य	२	३३
संघातश्चेतना धृति	१३	६
संज्ञार्थं तान्ब्रवीमि	१	७
संतुष्टस्सततं	१२	१४
संतुष्टो येन केन	१२	१९
संदृश्यन्ते चूर्णि	११	२७
संनियम्येन्द्रियग्रा	१२	४
संन्यस्याध्यात्मचेत	३	३०
संन्यस्यास्ते सुखं	५	१३
संन्यासं कर्मणां	५	१
संन्यासं कवयो	१८	२
संन्यासः कर्मयोग	५	२
संन्यासयोगयुक्ता	९	२८
संन्यासस्तु महा	५	६
संन्यासस्य महा	१८	१
संन्यासेनाधिगच्छ	१८	४९
संपश्यन्कर्तुमर्हसि	३	२०
संप्रेक्ष्य नासिकाग्रं	६	१३
संभवः सर्वभूतानां	१४	३
संभवामि युगेयुगे	४	८
संभवाम्यात्ममायया	४	६
संभावितस्य चाकी	२	३४
संमोहात्स्मृतिविभ्र	२	६३
संयमाग्निषु जुह्वति	४	२६
संवादमिममद्भुतम्	१८	७६
संवादमिममश्रौषं	१८	७४
संशयात्मा विनश्य	४	४०
संसारेषु नराधमा	१६	१९
संसिद्धिं परमां गताः	८	१५
संसिद्धिं लभते	१८	४५
संसिद्धौ कुरुनन्दन	६	४३
संस्तभ्यात्मानमात्म	३	४३
स कालेनेह महता	४	२
स कृत्वा राजसं	१८	८
सक्ताः कर्मण्यविद्वां	३	२५
सखेति मत्वा प्रस	११	४१
सगद्गदं भीतभीतः	११	३५
स गुणान्समतीत्यै	१४	२६
स घोषो धार्तराष्ट्राणां	१	१९
सङ्गं त्यक्त्वा करो	५	१०
सङ्गं त्यक्त्वाऽऽत्म	५	११
सङ्गं त्यक्त्वा धनंज	२	४८
सङ्गं त्यक्त्वा फलं	१८	९
सङ्गं त्यक्त्वा फला	१८	६
सङ्गस्तेषूपजायते	२	६२
सङ्गात्संजायते कामः	२	६२
स च मे न प्रणश्य	६	३०
स च यो यत्प्रभा	१३	३
सचेताः प्रकृतिं	११	५१
सच्छब्दः पार्थ	१७	२६
सजन्ते गुणकर्मसु	३	२९
स तं परं पुरुषमु	८	१०
सततं कीर्तयन्तो	९	१४
सततं ब्रह्मवादिनां	१७	२४
स तया श्रद्धया	७	२२
सत्कारमानपूजार्थ	१७	१८
सत्त्वं प्रकृतिजैर्गु	१८	४०
सत्त्वं भवति भार	१४	१०
सत्त्वं रजस्तम इति	१४	५
सत्त्वं सत्त्ववतामहं	१०	३६
सत्त्वं सुखे संजय	१४	९
सत्त्वं स्थावरजङ्ग	१३	२६
सत्त्वमाहो रजस्त	१७	१
सत्त्वात्संजायते	१४	१७
सत्त्वानुरूपा सर्व	१७	३
सत्यं प्रियहितं च	१७	१५
स त्यागः सात्त्वि	१८	९
स त्यागीत्यभिधी	१८	११
सदसच्चाहमर्जुन	९	१९
सदसद्योनिजन्मसु	१३	२१
सदा तद्भावभावितः	८	६
सदित्येतत्प्रयुज्यते	१७	२६
सदित्येवाभिधीय	१७	२७
सदृशं चेष्टते स्वस्याः	३	३३
सदोषमपि न त्यजे	१८	४८
सद्भावे साधुभावे	१७	२६
सनातनस्त्वं पुरुषो	११	१८
स निश्चयेन योक्त	६	२३
स बुद्धिमान्मनुष्येषु	४	१८
स ब्रह्मयोगयुक्तात्मा	५	२१
समं कायशिरोग्रीवं	६	१३
समं पश्यति योऽर्जु	६	३२
समं पश्यन्हि सर्व	१३	२८
समं सर्वेषु भूतेषु	१३	२७
समग्रं प्रविलीयते	४	२३
समत्वं योग उच्य	२	४८
समदुःखसुखं धीरं	२	१५
समदुःखसुखः	१२	१३
समदुःखसुखः स्व	१४	२४
समबुद्धिर्विशिष्यते	६	९
समलोष्टाश्मकाञ्चनः	६	८
,,	१४	२४
समवस्थितमीश्वरम्	१३	२८
समवेतान्कुरूनिति	१	२५
समवेता युयुत्सवः	१	१
समश्शत्रौ च मित्रे	१२	१८
समस्सङ्गविवर्जितः	१२	१८
समस्सर्वेषु भूते	१८	५४
समस्सिद्धावसिद्धौ	४	२२
स महात्मा सुदुर्लभः	७	१९
समाधाय स सात्त्वि	१७	११
समाधावचला बुद्धिः	२	५३
समाधिस्थस्य केशव	२	५४
समाधौ न विधीयते	२	४४
समासेनैव कौन्ते	१८	५०
समुद्रमापः प्रविश	२	७०
समुद्रमेवाभिमुखा	११	२८
स मे युक्ततमो मतः	६	४७
समोऽहं सर्वभूतेषु	९	२९
सम्यग्व्यवसितो हि	९	३०
स यत्प्रमाणं कुरुते	३	२१
स याति परमां	८	१३
स युक्तः कृत्स्नकर्म	४	१८
स युक्तः स सुखी	५	२३
स योगी परमो मतः	६	३२
स योगी ब्रह्मनिर्वा	५	२४
स योगी मयि वर्तते	६	३१
सरसामस्मि सागरः	१०	२४
सर्गाणामादिरन्त	१०	३२
सर्गेऽपि नोपजाय	१४	२
सर्गे यान्ति परंतप	७	२७
सर्पाणामस्मि वासु	१०	२८
सर्वं कर्माखिलं पार्थ	४	३३
सर्वं च मयि पश्य	६	३०
सर्वं ज्ञानप्लवेनैव	४	३६
सर्वं समाप्नोषि	११	४०
सर्वः प्रकृतिजैर्गुणैः	३	५

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्व एव महारथाः १ ६
सर्वकर्मफलत्यागं १२ ११
,, १८ २
सर्वकर्माणि मनसा ५ १३
सर्वकर्माण्यपि १८ ५६
सर्वक्षेत्रेषु भारत १३ २
सर्वगुह्यतमं भूयः १८ ६४
सर्वज्ञानविमूढांस्ता ३ ३२
सर्वतःश्रुतिमल्लोके१३ १३
सर्वतः पाणिपादं १३ १३
सर्वतः पृथिवीपते १ १८
सर्वतः संप्लुतोदके २ ४६
सर्वतोऽक्षिशिरोमु १३ १३
सर्वत्रगमचिन्त्यं च१२ ३
सर्वत्र समदर्शनः ६ २९
सर्वत्र समबुद्धयः १२ ४
सर्वत्रावस्थितो देहे१३ ३२
सर्वद्वाराणि संयम्य ८ १२
सर्वद्वारेषु देहेऽ १४ ११
सर्वथा वर्तमानोऽपि६ ३१
सर्वथा वर्तमानोऽपि१३ २३
सर्वधर्मान्परित्यज्य१८ ६६
सर्वपापैः प्रमुच्यते १० ३
,, १३ २३
सर्वभावेन भारत १५ १९
,, १८ ६२
सर्वभूतस्थमात्मानं ६ २९
सर्वभूतस्थितं यो ६ ३१
सर्वभूतहिते रताः ५ २५
,, १२ ४
सर्वभूतात्मभूतात्मा ५ ७
सर्वभूतानि कौन्ते ९ ७
सर्वभूतानि चात्मनि६ २९
सर्वभूतानि संमोहं ७ २७

सर्वभूताशयस्थित१० २०
सर्वभूतेषु येनैकं १८ २०
सर्वमावृत्य तिष्ठति१३ १३
सर्वमेतदृतं मन्ये १० १४
सर्वयोनिषु कौन्ते १४ ४
सर्वलोकमहेश्वरम् ५ २९
सर्वसंकल्पसंन्यासी ६ ४
सर्वस्य चाहं हृदि१५ १५
सर्वस्य धातारमचि ८ ९
सर्वाणीत्युपधारय ७ ६
सर्वाणीन्द्रियकर्मा ४ २७
सर्वान्पार्थ मनोगतान्२ ५५
सर्वान्बन्धूनवस्थि १ २७
सर्वारम्भपरित्यागी१२ १६
,, १४ २५
सर्वारम्भा हि दोषै१८ ४८
सर्वार्थान्विपरीतां १८ ३२
सर्वाश्चर्यमयं देवं ११ ११
सर्वांस्तथा भूतविशे११ १५
सर्वे नमस्यन्ति च११ ३६
सर्वेन्द्रियगुणाभासं१३ १४
सर्वेन्द्रियविवर्जितम्१३ १४
सर्वेऽप्येते यज्ञविदो४ ३०
सर्वेभ्यः पापकृत्तमः ४ ३६
सर्वे युद्धविशारदाः १ ९
सर्वे वयमतः परम् २ १२
सर्वेषां च महीक्षि १ २५
सर्वैस्सहैवावनिपाल११ २६
सविकारमुदाहृतम्१३ ६
स शब्दस्तुमुलोऽभ १ १३
स शान्तिमधिगच्छ २ ७१
स शान्तिमाप्नोति २ ७०
स सर्वविद्भजति १५ १९
स संन्यासी च योगी६ १

सहजं कर्म कौन्ते१८ ४८
सह यज्ञैः प्रजाः ३ १०
सहसैवाभ्यहन्यन्त १ १३
सहस्रबाहो भव ११ ४६
सहस्रयुगपर्यन्तम् ८ १७
सहास्मदीयैरपि ११ २६
साक्षात्कथयतः १८ ७५
सात्त्विकं निर्मलं १४ १६
सात्त्विकं परिचक्ष१७ १७
सात्त्विकी राजसी१७ २
सात्यकिश्चापराजितः१ १७
साधिभूताधिदैवं ७ ३०
साधियज्ञं च ये ७ ३०
साधुरेव स मन्तव्यः९ ३०
साधुष्वपि च पापेषु६ ९
सा निशा पश्यतो २ ६९
साम्येन मधुसूदन ६ ३३
साहंकारेण वा १८ २४
सांख्ययोगौ पृथग्बा५ ४
सांख्ये कृतान्ते १८ १३
सिंहनादं विनद्योच्चैः१ १२
सिद्धये सर्वकर्मणां१८ १३
सिद्धानां कपिलो १० २६
सिद्धिं प्राप्तो यथा१८ ५०
सिद्धिं विन्दति १८ ४६
सिद्धिं समधिगच्छ ३ ४
सिद्धिर्भवति कर्म ४ १२
सिद्धोऽहं बलवान्सु१६ १४
सिद्ध्यसिद्ध्योर्नि १८ २६
सिद्ध्यसिद्ध्योस्स २ ४८
सीदन्ति मम गात्रा१ २९
सुखं त्विदानीं १८ ३६
सुख दुःखं भवो१० ४
सुखं बन्धात्प्रमुच्य ५ ३

सुखं मोहनमात्म १८ ३९
सुखं वा यदि वा ६ ३२
सुखदुःखे समे २ ३८
सुखप्रीतिविवर्धनाः१७ ८
सुखमक्षय्यमश्नुते ५ २१
सुखमात्यन्तिकं ६ २१
सुखसङ्गेन बध्नाति१४ ६
सुखस्यैकान्तिकस्य१४ २७
सुखिनः क्षत्रियाः २ ३२
सुखिनःस्याम १ ३७
सुखेन ब्रह्मसंस्पर्शं ६ २८
सुखेषु विगतस्पृहः २ ५६
सुघोषमणिपुष्पकौ १ १६
सुदुर्दर्शमिदं रूपं ११ ५२
सुसुखं कर्तुमव्ययम् ९ २
सुहृदं सर्वभूतानां ५ २९
सुहृन्मित्रार्युदासीन ६ ९
सूक्ष्मत्वात्तदविज्ञेयं१३ १५
सूत्रे मणिगणा इव ७ ७
सूयते सचराचरम् ९ १०
सेनयोरुभयोरपि १ २७
सेनयोरुभयोर्मध्ये १ २१
,, १ २४
,, २ १०
सेनानीनामहं १० २४
सोऽपि मुक्तः १८ ७१
सोऽमृतत्वाय २ १५
सोमो भूत्वा रसा१५ १३
सोऽविकम्प्येन १० ७
सौभद्रश्च महाबाहुः १ १८
सौभद्रो द्रौपदेयाश्च १ ६
सौमदत्तिस्तथैव च १ ८
स्तुवन्ति त्वां ११ २१
स्त्रियो वैश्यास्तथा ९ ३२

Sri Sankarachar... Bharatiya Vidya ... Mahavidyalaya

Digitization by Arya Samaj Charitable Foundation, Chennai

स्त्रीषु दुष्टासु वार्ष्णेय	१	४१
स्थानं प्राप्स्यसि	१८	६२
स्थाने हृषीकेश	११	३६
स्थापयित्वा रथोत्त	१	२४
स्थावराणां हिमा	१०	२५
स्थितधीः किं	२	५४
स्थितप्रज्ञस्तदोच्यते	२	५५
स्थितप्रज्ञस्य का	२	५४
स्थितश्चलति तत्त्वतः	६	२१
स्थितिस्सादिति	१७	२७
स्थितोऽस्मि गतसं	१८	७३
स्थित्वाऽस्यामन्त	२	७२
स्थिरधीर्मुनिरुच्यते	२	५६
स्थिरबुद्धिरसंमूढो	५	२०
स्थिरमासनमात्मनः	६	११
स्थैर्यमात्मविनिग्रहः	१३	७
स्पर्शान्कृत्वा बहिर्बा	५	२७
स्मरन्मुक्त्वा कलेवरं	८	५
स्मृतिभ्रंशाद्बुद्धि	२	६३
स्मृतिर्मेधा धृतिः	१०	३४
स्यालाः संबन्धि	१	३४
स्रोतसामस्मि	१०	३१
स्वकर्मणा तमभ्य	१८	४६
स्वकर्मनिरतः	१८	४५
स्वकं रूपं दर्शया	११	५०
स्वजनं हि कथं	१	३७
स्वतेजसा विश्व	११	१९
स्वधर्ममपि चावेक्ष्य	२	३१
स्वधर्मे निधनं श्रेयः	३	३५
स्वधाऽहमहमौषधं	९	१६
स्वभावजेन	१८	६०
स्वभावनियतं कर्म	१८	४७
स्वभावप्रभवैर्गुणैः	१८	४१
स्वभावस्तु प्रवर्तते	५	१४
स्वभावोऽध्यात्म	८	३
स्वयं चैव ब्रवीषि	१०	१३
स्वयमेवात्मना	१०	१५
स्वर्गद्वारमपावृतम्	२	३२
स्वल्पमप्यस्य	२	४०
स्वस्तीत्युक्त्वा मह	११	२१
स्वाध्यायज्ञानयज्ञाः	४	२८
स्वाध्यायस्तपआर्ज	१६	१
स्वाध्यायाभ्यसनं	१७	१५
स्वे स्वे कर्मण्य	१८	४५
हतो वा प्राप्स्यसि	२	३७
हत्वाऽपि स इमाँ	१८	१७
हत्वाऽर्थकामांस्तु	२	५
हत्वा स्वजनमाहवे	१	३१
हत्वैतानाततायिनः	१	३६
हनिष्ये चापरा	१६	१४
हन्त ते कथयि	१०	१९
हन्तुं स्वजनमुद्यताः	१	४५
हरन्ति प्रसभं मनः	२	६०
हर्षशोकान्वितः	१८	२७
हर्षामर्षभयोद्वेगैः	१२	१५
हानिरस्योपजायते	२	६५
हित्वा पापमवा	२	३३
हृत्स्थं ज्ञानासिना	४	४२
हृदयानि व्यदार	१	१९
हृदि सर्वस्य विष्ठि	१३	१७
हृद्देशेऽर्जुन	१८	६१
हृषीकेशं तदा	१	२१
हृष्टरोमा धनंजयः	११	१४
हृष्यामि च पुनः	१८	७७
हृष्यामि च मुहु	१८	७६
हे कृष्ण हे यादव	११	४१
हेतुः प्रकृतिरुच्यते	१३	२०
हेतुनाऽनेन	९	१०
हेतुमद्भिर्विनि	१३	४
हेतोः किं नु मही	१	३५
ह्रियते ह्यवशोऽपि	६	४४

गीतापादानुक्रमणिका समाप्ता ।

Bhawan's Sri Sankaracharya Sanskrit Vidya Mahavidyalaya
312

Digitization by Arya Samaj Charitable Foundation, Chennai

श्री भगवद्रामानुज
ग्रन्थमाला समाप्ता ।
श्रीमते रामानुजाय नमः ।

Printed at the Wardhaman Press, Sholapur
and
Srivilasam Press, Srirangam.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

Bhawan's Sri Sank
Vidya
Sanskrit
Maha

Digitization by Arya Samaj Charitable Foundation, Chennai